KÂVYÂMÂLÂ. 67.

THE

HÎRASAUBHÂGYA

OF

DEVAVIMALAGAṆI

with his own gloss.

EDITED BY

MAHÂMAHOPÂDYÂYA PAṆDIT S'IVADATTA

Head Paṇḍit and Superintendent, Sanskṛit Department, Oriental College, Lahore,

AND

KÂSHÎNÂTH PÂṆDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S "NIRṆAYA-SÂGARA" PRESS.

BOMBAY.

1900.

Price 5½ Rupees.

काव्यमाला. ६७.

श्रीदेवविमलगणिविरचितं

हीरसौभाग्यम् ।

स्वोपज्ञया व्याख्यया समलंकृतम् ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा महामहोपाध्याय-
पण्डितशिवदत्तशर्मणा, मुम्बापुरवासिपरबोपाह्व-
पाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितम् ।

तच्च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१९००

मूल्यं सार्धं रूप्यकपञ्चकम् ।

भूमिका ।

अस्य हि सटीकस्य हीरसौभाग्यनामकमहाकाव्यस्य कविता देवविमलगणिः कस्मि-
ाले कस्मिन्देशे कं ग्राममलंचकारेति सम्यक्तया न निश्चितम्, तथापि ग्रन्थप्रशस्ति-
खतः श्वेताम्बरजैनत्वमस्य प्रतीयते. प्रतिसर्गसमाप्तिश्लोकतस्तु 'अस्य पिता शिवसाधुः,
ता सौभाग्यदेवी, गुरुः सीहविमलगणिः,' इति व्यक्तमेव प्रतीयेते.

ग्रन्थनिर्माणसमयस्तु वर्णनीयस्य हीरविजयगणेर्मरणस्य १६५२ विक्रमसंवत्सरे
.595 A. D.) भाद्रपदशुक्लैकादश्यां वर्णितत्वेन षोडशशतकादुपरितन एव
भाव्यते.

अनेन प्रायः सर्वेऽपि कविवर्णनीयाः पदार्था वर्णिताः. तेषामनुक्रमण्यपि प्रतिसर्ग-
ाप्तिटीकायां ग्रन्थकर्त्रैव प्रकाशिता. अस्माभिरपि विषयानुक्रमणिका स्थूलतया
ामुद्रापिता. ततश्च सर्वेऽपि विषया द्रष्टव्याः.

अस्य च पुस्तकमेकमेव प्राप्तम्, तदाधारेणैव शोधनं कृतम्. तथा चात्रास्मद्दोषादक्ष-
ोजकदोषाद्वा यत्र क्वचनाशुद्धिः स्थिता जाता वा, तां सहृदया दयार्द्रचित्ततया
धयिष्यन्ति इति संभावयामः. यतः—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

ते प्रार्थयतः

पण्डितशिवदत्त-काशीनाथौ ।

विषयानुक्रमणिका ।

विषयः।	पृष्ठे।
देवसुन्दरसूरिवर्णनम्	१७७
सोमसुन्दरसूरिवर्णनम्... ...	१७८
मुनिसुन्दरसूरिवर्णनम् ...	१७८
रत्नशेखरसूरिवर्णनम्	१८०
लक्ष्मीसागरसूरिवर्णनम् ...	१८०
सुमतिसाधुसूरिवर्णनम् ...	१८०
हेमविमलसूरिवर्णनम्	१८१
आनन्दविमलसूरिवर्णनम् ...	१८१
विजयदानसूरिवर्णनम् ...	१८७
चतुर्थसर्गसमाप्तिः	१८९
पञ्चमसर्गारम्भः	१८९
हीरकुमारागमन-गुरुवन्दने ...	१८९
गुरुदेशना	१९२
हीरकुमारस्य वैराग्योत्पत्तिः ...	१९५
हीरकुमारं प्रति गुरुवाक्यानि ...	१९५
विजयदानसूरिपुरो हीरकुमारस्य दीक्षाग्रहणनिश्चयः	१९८
विमलभगिनीं प्रति हीरकुमारस्य दीक्षादेशमार्गणवचनम् ...	१९९
विमलायाः प्रथमोक्तिः	२०१
प्रव्रज्यादृढतायां भगिनीं प्रति कुमारवचः	२०३
शीतकालकाव्यम्	२०४
ग्रीष्मसमयकाव्यम्	२०५
वर्षर्तुकाव्यम्	२०६
विमलाया द्वितीयवारं वाक्यानि ...	२०६
कुमारोक्तं यत्तिसातकृच्छीतकालकाव्यम्	२०७
कुमारोक्तमुनिमनःसुखकृद्ग्रीष्मर्तुकाव्यम्	२०७
कुमारोक्तश्रमणस्वान्तविश्रामकारिवर्षर्तुकाव्यम्	२०७

विषयः।	पृष्ठे।
विमलायास्तृतीयवारं वाक्यम् ...	२०८
विमलां स्वसारं प्रति कुमारस्यापि तृतीयवारं प्रतिवचः	२१०
विमलाया दीक्षादेशप्रदानम् ...	२१०
दीक्षानुज्ञादानानन्तरं धर्मकारकत्वेन भगिनीस्तुतिः	२१०
भगिनीवचनानन्तरं स्वजनवर्गादेशग्रहणम्	२१२
दीक्षामुहूर्तदिवसावलोकनम् ...	२१३
दीक्षासमये कुमारशृङ्गारवर्णनम् ...	२१४
दीक्षासमये हीरस्यारोहणार्थं तुरगाद्यानयनम्	२२४
दीक्षाग्रहणप्रस्थानसमये कुमारपुरो गीतनृत्यवादित्रादिकथनम् ...	२२४
तत्समयानीतगजाश्वरथलोकभारबाहुल्यम्	२३०
पौराङ्गनाविविधविचेष्टितवर्णनम् ...	२३१
कुमाररूपदर्शनादिविचारः ...	२३७
पौराङ्गनानां हीरकुमारदर्शनोद्भूतमिथः कथाप्रथा	२३९
हीरकुमारस्योपवनप्रवेशः... ...	२४१
दीक्षाग्रहणयोग्यवटद्रुमवर्णनम् ...	२४३
हीरकुमारस्य दीक्षाग्रहणम् ...	२४४
पञ्चमसर्गसमाप्तिः...	२४९
षष्ठसर्गारम्भः	२४९
हीरहर्षगणेः पठनसमयगुणवत्त्वम्	२४९
मलयाचलवर्णनम्...	२५३
माणिक्यस्वामिवर्णनम्	२५५
अन्तरीक्षपार्श्वनाथवर्णनम् ...	२५५
करहेटकपार्श्वनाथवर्णनम्... ...	२५६
जीवत्स्वामिवर्णनम्	२५६
गिरिवननद्यः	२५६

काव्यमाला ।

देवविमलगणिविरचितं
हीरसौभाग्यम् ।

स्वोपज्ञया व्याख्यया समलंकृतम् ।

प्रथम सर्गः ।

श्रेयः श्रीजयमङ्गलैकनिलयः संकल्पकल्पद्रुमो
भूयाद्भूरिविभूतये स भगवाञ्श्रीपार्श्वचिन्तामणिः ।
भव्यानां दशदिग्भुवां प्रणमतां मन्ये निहन्तुं तमो
बिभ्राणा दशतां बभुः क्रमनखा यस्यार्भभास्वत्त्विषः ॥
श्रीचिन्तामणिपार्श्वमोहितकरं चिन्तामणीवन्नृणां
सिद्धिश्रीपरिरम्भिणं प्रणिदधे विश्वत्रयीनायकम् ।
सान्द्रानन्दमरन्दसुन्दरहृदम्भोजन्मलीलालसां
हंसीवद्विधिना पुनः प्रवि(णि)दधे वाग्वादिनीं देवताम् ॥
स्वोपज्ञहीरसौभाग्यकाव्यस्याव्यासशालिनीम् ।
कुर्वे वृत्तिं विदग्धानां झगित्यर्थविबोधिकाम् ॥

इह हि ग्रन्थारम्भे ग्रन्थकर्ता स्वाभिमतार्थसिद्धये शिष्टाचारपरिपालनाय च सकलविघ्नविघातकारकं विशिष्टेष्टदेवतानमस्कारलक्षणं मङ्गलमाचरति । तदेव सूत्रमुच्यते—

श्रियं स पार्श्वाधिपतिः प्रदिश्यात्सुधाशनाधीशवतंसितांह्रिः ।
जगन्निदिध्यासुरिव त्रिमूर्तिर्यत्कीर्तिरासीत्त्रिदशस्रवन्ती ॥ १ ॥

स त्रिजगदद्वैतमहिमा श्रिया त्रैलोक्याधिपत्यलक्षणया चतुस्त्रिं[श]दतिशयरूपया लक्ष्म्या वा युक्तः पार्श्व एवाधिपतिः स्वामी जगदीश्वरः । यद्वा—अष्टचत्वारिंशत्सहस्रयक्षनायकः पार्श्वनामा यक्षस्तस्याधिपतिः प्रभुः । सकलसुरासुराधिपत्येऽपि पार्श्वनाथशासनाधिष्ठातृतया सर्वदा पार्श्वनाथसमीप एव वर्तितया च । भद्रबाहुस्वामिनापि तथैवोक्तम् । 'उवसग्गहरं पासम्' इति तस्योपादानम् । श्रियं लक्ष्मीं प्रदिश्यात्प्रदेयादित्याशीःप्रयोगः । किंलक्षणः पार्श्वाधिपतिः । सुधाममृतमश्नन्तीति सुधा अमृतमशनं येषां वा । सुधा पीयूषमश्यते एभिरिति भावे(?) वा । सुधाशना देवास्तेषामधीशा नायकाः । द्वात्रिंशद्व्यन्तरेन्द्राः, विंशतिर्भुवनेन्द्राः, दश कल्पेन्द्राः, द्वौ सूर्याचन्द्रमसौ इति चतुःषष्टिरिन्द्रास्तैर्वतंसितौ । 'तत्करोति तदाचष्टे' इतीनक्तप्रत्यये 'वष्टि भागुरिरल्लोपमवाप्योरुपस-

गैयोः' इत्यकारलोपे च वतंसिताविति सिद्धौ । अवतंसौ कुर्वन्तीति अवतंसयन्ति, अवतंस्येते स्म इत्यवतंसितौ । अथवा सुधाशनाधीशानामवतंसः । 'संजातोऽनयोः । इतो जातार्थे' इतीतःप्रत्ययः । तादृशावंह्री चरणौ यस्य । अथ यत्तदोर्नित्याभिसंबन्धात्स कः । यत्कीर्तिः यस्य पार्श्वनाथस्य समाज्ञा । 'श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा' इति हेमचन्द्रनाममालायाम् । जगन्ति त्रीणि भुवनानि निदिध्यासुर्निध्यातुमिच्छुरिव । 'निध्यानमवलोकनम्' इति हैम्याम् । तथा—'पश्यति विभावयत्यपि विलोकते वीक्षते गवेषयति । निध्यायत्यान्विषति' इति क्रियाकलापे । द्रष्टुकामेव । तिस्रो मूर्तयस्तनवो यस्याः सा त्रिमूर्तिस्त्रिदशस्रवन्ती सुरनदी गङ्गा आसीज्जाता। गङ्गारूपा जातेत्यर्थः । गङ्गा हि त्रिष्वपि लोकेषु प्रवहतीति कविसमयः । तथा [हि]—'विबुधानन्दमन्दिरं विबुधानां देवानां जलक्रीडादिभिरानन्दमन्दिरं प्रमोदसदनम् । अर्थात्स्वर्गमार्गप्रवृत्तम् । पुनः—रसान्तरप्रौढं रसायां पृथिव्यामन्तरे स्वभ्रे अर्थात्पाताले प्रवहति स्मेति प्रौढम्' इति चम्पूकथायां तट्टिप्पनकेऽर्थश्च । इति गङ्गा त्रिपथगा । तेन त्रिलोकीं स्वैरं दिदृक्षोर्यत्कीर्तेस्त्रिपथगारूपमूर्तिनिर्माणं युक्तमेवेति ॥

सम्यगुपासिता हि वाग्देवता कवितॄणामसाधारणीं कवित्वशक्तिं विश्राणयति, अतो वाग्वादिनीं नमस्कुर्वन्कविराह—

प्रीणाति या प्राज्ञदृशश्चकोरीर्विभावरीवल्लभमण्डलीव ।
तमस्तिरस्कारकरीं सुरीं तां भक्तेर्नतेर्गोचरयामि वाचम् ॥ २ ॥

अहं तां प्रसिद्धां विद्यासंसिद्धये सकलकविकुलैः समाराध्यमानां वाचं सुरीं सरस्वतीं देवतां भक्तेः सेवासत्क्रियावशान्नतेः प्रणामस्य गोचरीकरोमि । गोचरां करोमीति गोचरयामि । 'णिङ्क्तकरणे' इति णिः । प्रणमामीत्यर्थः । 'गोचरयन्ति न वाचो यच्चरितं चन्द्रचन्द्रिकारुचिरम् । वाचस्पतेर्वचस्वी को वान्यो वर्णस्य जगति ॥' इति हस्तिमतीचैत्यप्रशस्तौ । कीदृशीं वाचम् । तमसोऽज्ञानस्य पापस्य वा । तस्याः पापक्षयकारिता शास्त्रेऽपि दृश्यते । यथा—'सुअदेवया भगवईनाणावरणीयकम्मसंघायं । ते सिंखवे उसययन्ति ।' तथा—'भवविरहवरं देहि मे देवि सारम्' इति संसारदावास्तुतौ । भवविरहस्तु कर्मक्षयजनित एव स्यात् । तथा—'जीसेरिव ते सा हता देवी हरतु दुरियाइं' । यद्यपरा क्षेत्रदेवी दुरितहन्त्री तर्हि श्रुतदेवी पातकघातुका कथं न । तिरस्कारो विनाशस्तस्य करीं कारिकां अज्ञानहन्त्रीम् । सा का । या वाग्देवी प्राज्ञानां विदग्धानां दृशो दृष्टीः प्रीणात्यानन्दयति । केव । विभा० । यथा विभावरी रात्रिस्तस्या वल्लभो भर्ता चन्द्रस्तस्य मण्डली संपूर्णबिम्बम् । मण्डलशब्दस्य त्रिलिङ्गत्वेन मण्डली । यथा—'शुद्धा सुधादीधितिमण्डलीयम्' इति । चकोरीश्चकोराङ्गनाः प्रीणयति । विभावरीवल्लभमण्डल्यपि कीदृग्विधा । तमसो ध्वान्तस्य तिरस्कारकरी निर्नाशिका ॥

अथ गुरोरनुभावादेव देवादीनां सम्यक्स्वरूपावगमो वाग्देवतासमाराधनमन्त्राद्युपायाधिगमश्च भवेत्, ततस्तत्प्रसत्तिं स्पृहयन्कविराह—

यच्चक्षुषा मातृमुखोऽप्यशेषविशेषविच्छेखरतानुषङ्गी ।
गुरुं सुराणामधरीकरोति भवन्तु ते श्रीगुरवः प्रसन्नाः ॥ ३ ॥

ते विश्वविख्याताः श्रिया शोभया युक्ता गुरवोऽर्थान्मयि विषये प्रसत्तिभाजः प्रसादभाजनं भवन्तु । ते के । यच्च० । येषां गुरूणां चक्षुषा दृशा प्रसन्ननयनावलोकनेन कृत्वा । 'यद्दृष्टिपातसामर्थ्यान्मूको वाचस्पतिर्भवेत्' इति प्रक्रियाकौमुद्याम् । मातृमुखो जडोऽपि अशेषाः समस्ता ये विशेषा वाङ्मयरहस्यानि विदन्ति जानन्तीति अशेषविशेषविदो विशारदास्तेषां शेखरताया उत्तंसभावस्यानुषङ्गः प्रसङ्गोऽस्यास्तीति तादृशः सन् सुराणां गुरुं बृहस्पतिमधरीकरोति हीनीकरोति स्वप्रतिभाप्रागल्भ्येन पराजयते ॥

विशदहृदयात्मदर्शप्रतिबिम्बितसमस्तभुवनपदार्थसार्थान्सदसद्विवेचनचातुर्याचार्यान्महात्मनो निजविनिर्मितवृत्तविशुद्धिहेतवे अनुकूलयन्कविराह—

कवित्वनिष्कं कषितुं कवीनां येषां मनीषा कषपट्टिकेव ।
सन्तः प्रसन्ना मयि सन्तु शुद्धाशयाः प्रवाहा इव जाह्नवीयाः ॥ ४ ॥

ते सन्तो महात्मानो मयि विषये प्रसन्नाः प्रसादोपेताः प्रज्ञाप्राग्भारावगताशेषविशेषोपनिषत्तया वृत्तशुद्धिविधानविधिना मय्यनुग्रहपरायणाः सन्तु भवन्तु । किं[विधाः] सन्तः । शुद्धो मात्सर्यरहित आशयोऽभिप्रायो मनो वा येषां ते । आशयशब्देन चित्तमपि प्रोच्यते । यथा नैषधे—'दयासमुद्रे स तदाशयेऽतिथीचकार' इति । तद्वृत्तिः—तदाशये नलचित्ते । शुद्धाशयाः क इव । प्रवाहा इव । यथा जाह्नवीया जाह्नव्या गङ्गाया इमे जाह्नवीयाः प्रवाहा ओघा निर्मलमध्याः स्युः । ते के सन्तः । येषां सतां मनीषा बुद्धिः कवीनां काव्यकर्तॄणां कवित्वं काव्यम् । जातावेकवचनम् । तदेव निष्कं सुवर्णं कषितुं सम्यक्परीक्षितुं कषपट्टिकेव कषः स्वर्णपरीक्षणपाषाणविशेषस्तस्य पट्टिका शिला तद्वद्वर्तते । यथा कषोपलेन स्वर्णं परीक्ष्यते तथा यत्प्रतिभाप्रागल्भ्येन काव्यमपि विशुद्धं विधीयते ॥

अथ प्रस्तुताभिधेयमाह—

अमन्दगन्धैरिव गन्धसारो दिशो यशोभिः सुरभीकरोति ।
वृत्तं व्रतीन्द्रस्य तनोमि तस्य कुरान्ववायाम्बरपद्मबन्धोः ॥ ५ ॥

अहं तस्य साहिश्रीमदकब्बरनरपतिप्रदत्तजगद्गुरुबिरुदतया जगति विख्यातिभाजो व्रतिनां साधूनामिन्द्रस्य श्रीहीरविजयसूरीश्वरस्य वृत्तं काव्यं चरितं वा तनोमि विस्तारयामि । करोमीत्यर्थः । 'कथिताः करणे तनने ग्रथने चोत्पादने च ये पूर्वम् । ते धातवः स्पृशन्ति प्रायस्तुल्यार्थतामेव ॥' इति क्रियाकलापोक्तेः । किं च वृत्तनायकाश्चतुर्विधा वर्ण्यन्ते । धीरोदात्ताः, धीरोद्धताः, धीरललिताः, धीरप्रशान्ताश्च । तत्र धीरोदात्ता रामचन्द्रादयः, धीरोद्धता दुर्योधनादयः, धीरललिता नलादयः, धीरप्रशान्ता जीमूतवाहनप्रमुखाः । तेषु तेष्वपि नायकेषु श्रीहीरविजयसूरेर्धीरप्रशान्तत्वेन वृत्तकरणं

युक्तिमदेव । किं० । कुरा इति नामा व्यवहारी तस्य योऽन्ववायो वंशः । 'गोत्रं तु संतानोऽन्ववायोऽभिजनः कुलम्' इति हैमः । स एवाम्बरमाकाशं तत्र प्रकाशकत्वात्पद्मानां बन्धुरिव पद्मबन्धुर्भास्वान् । यत्तदोः संबन्धात्तस्य। कस्य। यो व्रतीन्द्रो यशोभिः स्वकीर्तिभिः कृत्वा दिशः सर्वा अप्याशाः सुरभीकरोति वासयति । चित्रास्पदीकरोतीत्यर्थः । क इव । गन्धसार इव । यथा चन्दनद्रुमः अमन्दैरतिबहुलैर्गन्धैः परिमलैर्दिशः सुरभयति समस्तहरितः सुरभीकुरुते ॥

वर्णनीयस्योत्कर्षाविष्करणद्वारेण आत्मनोऽनौद्धत्यं प्रतिपादयन्कविराह—

पारे गिरां वृत्तमिदं क सूरेस्तनुप्रकाशा क च शेमुषी मे ।
प्रक्रम्य मोहादहमङ्गुलीस्तत्प्रमातुमीहे चरणं मुरारेः ॥ ६ ॥

सूरेः श्रीहीरविजययतीन्द्रस्य गिरां पारे वाचामगोचरः । 'गिरां हि पारे निषधेन्द्रवृत्तम्' इति नैषधे । वक्तुमशक्यमिदमिदानींतनसर्वजनप्रतीतं वृत्तं क्वास्ते । च पुनः तनुः स्तोकः प्रकाशो विषयो यस्या एतादृशी मे मम शेमुषी बुद्धिः क । तत्तस्मात्कारणादहं मोहान्मौढ्यादज्ञानाद्वा । 'सोऽहं हंसायितुं मोहाद्बकः पङ्गुर्यथेच्छति' इति चम्पूकथायाम् । मोहोऽज्ञानमिति तद्वृत्तिः । अङ्गुलीः करशाखाः प्रक्रम्य प्रारभ्य । 'प्रारम्भः प्रोपतः क्रमः' इति हैम्याम् । स्थापयित्वा । मुरारेर्नारायणस्य चरणं पदम् । आकाशमित्यर्थः । प्रमातुमीहे प्रमाणविषयं नेतुमिच्छामि । यथा कश्चिदज्ञानवान्पुमान्स्वाङ्गुलीर्मण्डयित्वा अनन्तं नभः प्रमातुमारभते, न पुनः प्रभवति, तथा वाचां गोचरातीतं गुरुवृत्तं कर्तुं प्रारब्धवानप्यहं न सम्यक्तया पूर्णं प्रणेतुं प्रभविष्णुरिति तत्त्वम् ॥

न तु कश्चिदपि प्रभुवृत्तं भाषितुं प्रभुर्भवेत्तदेवाह—

यो वालुका हैमवतीप्रतीरे प्रमाति संख्याति च विप्रुषोऽब्धेः ।
ताराः पुनः पारयति प्रमातुं गुणान्गणेन्दोर्गणयेन्न सोऽपि ॥ ७ ॥

यो जनो हैमवत्या मन्दाकिन्याः। 'गङ्गा त्रिपथगा ऋषिकुल्या हैमवती' इति हैम्याम्। प्रतीरे तटे । 'तटं तीरं प्रतीरं च' इति हैम्याम् । वालुकाः सिकताकणान्प्रमाति प्रमाणयति च। पुनः—यो अब्धेः समुद्रस्य विप्रुषो जलबिन्दून्संख्याति संख्यागोचरीकरोति। पुनः—यस्तारास्तारकाः प्रमातुं प्रमाणीकर्तुं पारयति समर्थीभवति । सोऽपि प्रज्ञाप्रकर्षपराभूतपुरुहूतसूरिरपि गणस्तपागच्छस्तत्र इन्दुरिव सर्वेषामाह्लादकत्वेन इन्दुस्तस्य गच्छनायकस्य हीरविजयसूरेर्गुणाञ्ज्ञानदर्शनचारित्रशमदमादिकान्न गणयेद्गणयितुं न शक्नुयात् ॥

प्रागुक्तं पुनरपि द्रढयन्स्वकीयसामर्थ्यं वक्ति—

वृत्तं विभोर्भाषितुमप्रभुर्यज्जम्भारिसूरिस्तदहं किमीशे ।
यः शृङ्गिशृङ्गाग्रगतैर्दुरापः किं भूमिगस्तं विधुमाददीत ॥ ८ ॥

विभोर्हीरविजयसूरीश्वरस्य यद्वृत्तं चरित्रं भाषितुं वक्तुं जम्भारेः शक्रस्य सूरि-

राचार्यः । 'प्रज्ञाप्राग्भारपराङ्मुखीकृतपुरंदरगुरुः' इति चम्पूकथायाम् । सोऽप्रभुरसमर्थः । तद्वृत्तं वक्तुमहं कविः किं कथम् । अथ वा किमिति प्रश्ने वितर्के ईशे समर्थीभवामि । अपि तु नेत्यर्थः । उक्तमर्थमर्थान्तरेण द्रढयति—यश्चन्द्रः शृङ्गिणः शिखरिणः शैलस्य शृङ्गं शिखरं तस्य यदग्रं सर्वोपरितनभूमिभागः तत्र गतैः प्राप्तैः पुरुषैः । दुःखेन कष्टेन आप्यते लभ्यते इति दुरापः । सर्वथापि प्राप्तुं न शक्यः । तं विधुं चन्द्रमसं भूमिगो भूमौ स्थितः पुमान्किमिति प्रश्ने आददीत गृह्णीयात्स्वपाणिना ॥

यद्येवं तर्हि वृत्तं न कर्तव्यम् । नहि, कर्तव्यं त्ववश्यमेव । तर्हि कथं करिष्यतेऽतः करणसामर्थ्यमाह—

प्रभोः प्रभावादथ वा कथं न प्रभुर्भवामि प्रविधातुमेतत् ।
स्वःसत्प्रसादात्रिदशाचलस्य शिखासु खेलायति किं न खञ्जः ॥ ९ ॥

अथ वेति स्मरणगर्भे पक्षान्तरे वा । अत्रान्तरे मम गुरुभक्तिप्राग्भारवशाविर्भूतभाग्योदयात्स्मृतिविषयमायातम्, तदेव काव्ये प्रोच्यते । प्रभोर्हीरविजयसूरेः प्रभावान्माहात्म्यादेतत्काव्यं प्रविधातुं निर्मातुमहं प्रभुः समर्थः कथं न भवामि । अपि तु प्रभुर्भवाम्येव । उक्तमर्थमर्थान्तरेण समर्थयति—खञ्जश्चरणविकलः पुमान् स्वः स्वर्गे सीदति तिष्ठतीति स्वःसद्देवस्तस्य प्रसादादनुग्रहात्रिदशाचलस्य मेरोः शिखासु अग्रभागभूमीषु किं न खेलायति क्रीडति । अपि तु खेलतीत्यर्थः । यथा खञ्जो दिव्यानुभावात्सुरशिखरिशिखरे खेलति, तथाहमपि हीरसूरिमाहात्म्यादेतत्काव्यं कर्तुं समर्थीभवाम्येव । 'क्रीडति विहरति रमते खेलति खेलायतीति खेलार्थाः' इति क्रियाकलापे ॥

इति पीठिकापद्धतिः ।

अथ वर्णनप्रारम्भः—

सुपर्वभिर्भोगिभिरङ्गिसंघैर्लीलां स्वयं बिभ्रदिव त्रिलोक्याः ।
प्रेयानिव स्त्रीभिरिहास्ति जम्बूद्वीपोऽब्धिवेलाभिरुपास्यमानः ॥ १० ॥

इह जगति भूमण्डलरूपमध्यमलोके पार्थिवो रजतहेमरत्नमयोऽनादृताभिधानस्य द्वीपाधिदेवस्यावासभूत उत्तरकुरुवर्ती जम्बूवृक्षस्तेनोपलक्षितो द्वीपो जम्बूद्वीपोऽस्ति वर्तते । जम्बूद्वीपः किं क्रियमाणः । उपास्यमानः सेव्यमानः । काभिः । अब्धेः समुद्रस्य वेलाभिर्जलवृद्धिभिः । कः काभिरिव । प्रेयान् स्त्रीभिरिव । यथा अतिशयेन प्रियः । मातृपितृभ्रातृपुत्रादिसर्वस्वजनेभ्योऽपि पतिव्रतानां स्त्रीणां प्रेमाधिक्यं भर्तर्येव तेन प्रेयानिति पदोपादानम् । कान्तः स्त्रीभिर्निषेव्यते । जम्बूद्वीपः किं कुर्वन् । उत्प्रेक्ष्यते—बिभ्रदिव धारयन्निव । काम् । लीलां शोभां विलासं वा । कस्याः । त्रिलोक्या जगत्रयस्य । कथम् । स्वयमात्मना । कैः । क्रीडार्थमागतैर्हिमवद्गिरिसुरसरित्पद्मह्रदादिनिवासिभिर्वा सुपर्वभिर्देवैः । तथा—भोगिभिर्नागकुमारैः । तथा—अङ्गिसंघैर्देहिसार्थैः । 'संघः सार्थस्तु देहिनां समूहे' । अथवाङ्गिविशेषणान्यपि । अङ्गिसंघैः । किं० । सुशोभनानि

पर्वाणि पर्युषणादीपालिकादीनि येषां ते तथा । पुनः किं० । भोगो राज्यादिसुखमस्त्येषामिति मत्वर्थीयप्रत्यये भोगिनस्तैः । विलासम् । 'लस श्लेषणक्रीडनयोः' इति धात्वर्थत्वादाश्लेषणं मिलनं कलयन् ॥

नीराजयन्तीष्विव चित्रभानुमादाय दिग्वारविलासिनीषु ।
संवर्धयन्तीषु पयःपृषद्भिर्वेलासु कान्तास्विव मुक्तिकाभिः ॥ ११ ॥
यं शंभुशैलच्छविरोमगुच्छचन्द्रातपत्रोद्धतवाहिनीकम् ।
वार्धेस्तरङ्गा मगधा इवोर्वीधवं स्तुवन्तीव गभीररावैः ॥ १२ ॥

यं जम्बूद्वीपं वार्धेः समुद्रस्य तरङ्गाः कल्लोलाः । उत्प्रेक्ष्यते—गभीररावैर्मन्द्रस्वरैः स्तुवन्तीव स्तुतिं कुर्वन्तीव । के इव । मगधा इव । यथा मागधा वंशादिस्तुतिकारिणः उर्वीधवं पृथ्वीपतिं स्तुवन्ति । किं० जम्बूः । शंभुशैलः कैलासस्तस्य च्छवयः स्फटिकरत्ननिर्यद्द्युतय एव रोमगुच्छाश्चामराणि यस्य तथा चन्द्रो विधुमण्डल एवातपत्रं छत्रं यस्य । पुनः किं० । उद्धता रङ्गत्तरङ्गैरुत्कटा वाहिन्यो नद्यो यस्य । पश्चात्कर्मधारयः । उर्वीधवमपि शंभुशैलच्छविवदुज्ज्वला रोमगुच्छा यस्य । तथा—चन्द्रतुल्यमातपवारणं यस्य । तथा—उद्धताः स्वच्छोत्कर्षाद्वैरिवारं तृणं मन्यमाना वाहिन्यः सेना यस्य । अत्रापि कर्मधारयः । कासु सतीषु । दिग्वारविलासिनीषु सतीषु दिश एव वाराङ्गनास्तासु । उत्प्रेक्ष्यते—नीराजयन्तीष्विव । नीराजनामारात्रिकां कुर्वतीषु । नीराजनां कुर्वन्ति इति नीराजयन्ति । करणे ञिप्रत्ययः । नीराजयन्तीति नीराजयन्त्यस्तासु । 'प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः' इति नैषधे । 'नीराजनया आरात्रिकविधानेन' इति तद्वृत्तिः । किं कृत्वा । चित्रभानुं सूर्यमादाय गृहीत्वा । अन्या अपि वारविलासिन्यश्चित्रभानुं वह्निमादाय राजानं नीराजयन्ति । 'ब्रध्नो हंसश्चित्रभानुर्विवस्वान्' । तथा—'वृषाकपिः पावकचित्रभानू' इति सूर्यवह्निनाम्नी हैम्याम् । पुनः कासु सतीषु । वेलासु समुद्रजलवृद्धिषु सतीषु । किं कुर्वतीषु । संवर्धयन्तीषु अवकिरन्तीषु । उत्प्रेक्ष्यते—वर्धापयन्तीष्विव । वर्धापयन्तीति प्रयोगः कल्पकिरणावल्याम् । कैः । पयसां पानीयानां पृषद्भिर्बिन्दुभिः । कास्विव । कान्तास्विव । यथा कामिन्यः क्षमाकान्तं मुक्तिकाभिर्मुक्ताफलैरुपलक्षणाल्लाजैरपि वर्धापयन्ति । 'अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः' इति रघुवंशेऽपि । 'सिता वमन्तः खलु कीर्तिमुक्तिकाः' इति नैषधे ॥ युग्मम् ॥

चन्द्रार्कचक्रद्वयभृत्प्रभूतक्षेत्रप्रभू रत्ननिधानवार्धिः ।
यः कोऽपि चक्रीव चकास्त्यसंख्यद्वीपावनीपैः समुपास्यमानः ॥ १३ ॥

यो जम्बूद्वीपः कोऽप्यद्भुतवैभवः । 'जयति मधुसहायः सर्वसंसारवल्लीजननजरठकन्दः कोऽपि कन्दर्पदेवः' इति चम्पूकथायाम् । 'कोऽप्यद्भुतवैभवः' इति तट्टिप्पनके । चक्रीव सार्वभौम इव चकास्ति शोभते । किंविशिष्टो यः । चन्द्रो विधुरर्कः सूर्यस्तावेव

चक्रे रथाङ्गे तयोर्द्वयं बिभर्तीति चक्रद्वयभृत्।पुनः किंभूतः। प्रभूतानां क्षेत्राणाम् । १ भरत २ हिमवत् ३ हरिवर्ष ४ महाविदेह ५ देवकुरु ६ उत्तरकुरु ७ रम्यक ८ ऐरण्यवत ९ ऐरावताभिधानानां नवसंख्याकानां वर्षाणां प्रकर्षेण भूरुत्पत्तिस्थानम् । पुनः किंभूतः । रत्नानां मणीनां निधानानां च वार्धिर्वार्धिनामधेया संख्या यत्र । 'शतं सहस्रमयुतं लक्षप्रयुतकोटयः । अर्बुदमब्जं खर्वं च निखर्वं च महाम्बुजम् । शङ्कुर्वार्धिरन्त्यं मध्यं परार्ध्यं चेति नामतः॥' इति हैममालायाम् । लौकिका संख्या । यद्वा रत्नैरुपलक्षितानि संपूर्णानि वा निधानानि निधयः वार्धिश्च । सगरचक्रवर्तिवचसा सुस्थितसुरानीतः शत्रुंजयशैलाद्वादशक्रोशदूरमुक्तः समुद्रो यत्र । पुनः किंभूतः । असंख्याः संख्यातीता ये द्वीपाः । १ धातुकीखण्ड २ पुष्कर ३ वारुणी ४ क्षीर ५ घृत ६ इक्षु ७ नन्दीश्वर ८ अरुण ९ अरुणवर १० अरुणवरावभास एवं त्रिप्रत्ययावतारकुण्डल–शङ्ख–रुचक–भुजग–कुश-क्रौञ्चप्रमुखा असंख्याता द्वीपास्त एवावनीं पृथ्वीं पान्ति रक्षन्ति इति कृत्वा भूपास्तैरुपास्यमानः संसेव्यमानः । चक्री तु एकचक्रभृत्तथा एकस्य भरतादेः क्षेत्रस्य प्रभुः स्वामी । तथा चतुर्दशनवनिधानवानेव, द्वात्रिंशत्सहस्रसंख्याकैरेव भूपै राजभिः सेव्यः ॥ इति जम्बूद्वीपः॥

अन्तःस्फुरन्मौक्तिकरत्नराजीविराजिकुल्येशदुकूलभाजः ।
भास्वज्जगत्यर्जुनमेखलाया निशावशाहर्मणिकर्णिकायाः ॥ १४ ॥
संध्यारुचीकुङ्कुमपङ्किलाङ्कप्राचीप्रतीचीक्षितिभृत्कुचायाः ।
द्वीपश्रियास्तारकतारहारे किंनायको राजति रत्नसानुः ॥ १५ ॥

यत्र जम्बूद्वीपे रत्नसानुर्मेरू राजति शोभते। किं०। उत्प्रेक्ष्यते—द्वीपश्रिया जम्बूद्वीपलक्ष्म्यास्तारका ज्योतींषि ता एव तारा निर्मलमौक्तिकानि । 'तारो निर्मलमौक्तिके' इत्यनेकार्थः । तेषां हारस्तत्र किंनायको मध्यमणिः । किंभूताया द्वीपश्रियाः । अन्तर्मध्ये स्फुरतां द्योतमानानां मौक्तिकानां मुक्ताफलानां रत्नानां मणीनां राजी श्रेणी तया विराजते इत्येवंशीलो यः कुल्यानां नदीनाम् । 'कुल्या तु सारिणी नद्योः' इत्यनेकार्थः । ईशः स्वामी । 'यादः स्रोतोवार्नदीशः' इति हैमीवचनात् । स[मुद्र] एव दुकूलं क्षौमवस्त्रं भजत्याश्रयते सा तस्याः । 'सागराचाग्रे स्युर्नेमी मेखलाम्बराः' इति हैमीवचनात् । समुद्रस्य वस्त्रत्वेनोपादानम् । पुनः किंभूतायाः । भास्वन्ती दीप्यमाना या जगती । कपिशीर्षकवर्जितप्रकारभित्तिः । सैवार्जुनस्य सुवर्णस्य मेखला काञ्ची यस्याः सा तस्याः । पुनः किंभूतायाः । निशा रात्रिर्वशा प्रिया यस्य स निशापतिश्चन्द्रस्तथाहर्मणिर्भास्करस्तावेव कर्णिके कर्णभूषणे यस्याः सा तस्याः । पुनः किंभूतायाः । संध्ये दिनाद्यवसानभवे तयो रुची कान्तिः । रुचीशब्दो दीर्घेकारान्तोऽप्यस्ति । यथा—'रुच्यो रुचीभिर्जितकाञ्चनाभिः' इति नैषधे । सैव कुङ्कुमं केसरं तेन पङ्किलौ व्याप्तावङ्कावुत्सङ्गौ ययोस्तथाविधौ यौ प्राची पूर्वा प्रतीची पश्चिमा तयोः क्षितिभृतौ पर्वतावुदयास्ताचलनामानौ तावेव कुचौ स्तनौ यस्यास्तस्याः॥ युग्मम् ॥

१. 'कुण्डलायाः' इति पाठः.

यत्रोल्लसद्गौरिमतुङ्गिमश्रीर्झरप्रवृत्तिः स्फुटभद्रशाली ।
करीव हेम्नः शिखरी विभाति रवीन्दुघण्टाग्रहघर्घरीमान् ॥ १६ ॥

यत्र द्वीपे हेम्नः स्वर्णस्य शिखरी पर्वतो मेरुर्विभाति । क इव । करीव हस्तीव । किंभूतो मेरुः करी च । उल्लसन्ती प्रोल्लासं प्राप्नुवन्ती स्फुरन्ती गौरिम्नः । 'गौरस्तु श्वेतपीतयोः' इत्यनेकार्थः । पीतत्वस्य श्वेततायाश्च । तथा—तुङ्गिम्न उन्नतत्वस्य श्रीः शोभा यस्मिन् सः । समासान्तविधेरनित्यत्वाद्व्यवस्थितविभाषयात्र समासान्तः कप्रत्ययो नागात् । नैषधेऽप्येवं दृश्यते । यथा—'उडुपरिषदि मध्यस्थायिशीतांशुलेखानुकरणपटुलक्ष्मीमक्षिलक्षीचकार' इति । गजविशेषणेऽप्येवमेव । पुनः किंभूतः । झराणां निर्झराणां प्रवृत्तिः प्रवर्तनं प्रसरणं यस्माद्यस्मिन्वा मेरौ । करिणि तु निर्झरप्रचारवत्सप्तधाप्रवृत्तिर्मदप्रवाहो यस्मिन् । 'मदो दानं प्रवृत्तिश्च' इति हैम्याम् । पुनः किंभूतः । स्फुटं विनिद्रमुन्मिषितं विकसितम् । 'दलितं स्फुटितं स्फुटम्' इति हैम्याम् । भद्रशालाख्यं वनं यत्र । करी तु स्फुटं प्रकटं भद्रजातित्वेन शालते शोभते इति सः । 'शाल प्रशंसायाम्' इति कल्पद्रुमे । पुनः किंभूतः । रवीन्दू सूर्याचन्द्रमसौ तावेव घण्टे तथा ग्रहा मङ्गलाद्या उपलक्षणान्नक्षत्रतारकास्त एव घर्घर्यः क्षुद्रघण्टिका यस्मिन्सः । गजोऽपि रवीन्दुवद्वृत्तघण्टाभ्यां ग्रहसदृक्किङ्किणीभिश्च युक्तो भवति ॥

यत्रार्थिनोऽर्थेशमिव प्रसार्य करान्सुवर्णं विवरीषवः किम् ।
प्रदक्षिणागोचरतां नयन्ति ज्योतिर्गणा गैरिकसानुमन्तम् ॥ १७ ॥

यत्र जम्बूद्वीपे ज्योतिर्गणा ग्रहनक्षत्रतारासमूहा गैरिकस्य । 'गैरिकं स्वर्णधात्वोः' इत्यनेकार्थः । सानुमन्तं पर्वतं सुमेरुम् । प्रदक्षिणाया दक्षिणावर्तभ्रमिक्रियाया गोचरतां नयन्ति प्रापयन्ति । 'मन्ये न मे श्रवणगोचरतां गतोऽसि' इति कल्याणमन्दिरस्तवे । तथा—'द्वीपाधिपान्नयनयोर्नय गोचरत्वम्' इति नैषधे । किं० । उत्प्रेक्ष्यते—करान्किरणान्पाणीन्प्रसार्य विस्तार्य विवरीषवः । 'वृञ् याचने' । वरीतुमिच्छवो याचितुकामाः किम् । के इव । अर्थिन इव । यथा याचकाः करान्प्रसार्य सरलीकृत्य स्वर्णमभ्यर्थयितुकामा अर्थेशं धनपतिं प्रदक्षिणयन्त्यनुकूलीकुर्वन्ति ॥ इति मेरुः ॥

सवेशकैश्यायितकूलिनीशो ललामलीलायितसिद्धशैलः ।
[1]द्वीपेन्दिराया इव भालपट्टो यस्मिन्व्यभाद्भारतनाम वर्षम् ॥ १८ ॥

यस्मिञ्जम्बूद्वीपे भारतमिति नाम यस्य तादृशं वर्षं क्षेत्रं व्यभाद्बभासे । यादृक् प्रथमाद्यरकेष्वभूत् तादृक्पञ्चमारके नास्ते । अवसर्पिणीकालानुभावात्सर्वेऽपि पदार्था अनन्तगुणपर्यादिभिर्हीयमानाः सन्त्यत एव भूतकालः । उत्प्रेक्ष्यते—द्वीपेन्दिराया जम्बूद्वीपलक्ष्म्या भालपट्टो ललाटमिव । किंभूतः । सवेशे संनिधौ श्यामत्वात्कैश्यायितः केशसमूह

१. 'द्वीपावनीन्दोरिव' इति पाठः.

इवाचरितः । 'केशानां कैश्यकेशिके' इति हैम्याम् । कूलिनीशो लवणाम्बुराशिर्यस्य । पुनः किंभूतः । ललामस्तिलकस्य लीला विलासस्तद्वदाचरितः सिद्धशैलः शत्रुंजयाद्रिर्यस्मिन् यस्य वा । ललामशब्दो नकारान्ताकारान्तोऽप्यस्ति लिङ्गानुशासनावचूर्णौ ॥

पराजितद्वीपततिप्रतीष्टचिरत्नरत्नाद्युपदागणेन ।
द्वीपेन पृथ्वीपतिनेव वर्षं व्यधायि धामोपनिधेरिवैतत् ॥ १९ ॥

द्वीपेन जम्बूनाम्ना एतद्वर्षं भारतं क्षेत्रमुपनिधेः । उत्प्रेक्ष्यते—न्यासस्य धाम गृहं व्यधायि चक्रे । केनेव । पृथ्वीपतिनेव । यथा राज्ञा निक्षेपस्य निकेतनं क्रियते । किंभूतेन द्वीपेन पृथ्वीपतिना च । पराजिता निजौजोविभवैः पराभूता स्वायत्तीकृता च । 'ओजो बले प्रतापे च' इत्यनेकार्थः । या द्वीपानां ततिः श्रेणी तस्याः सकाशात्प्रतीष्टो गृहीतश्चिरत्नानि चिरकालोत्पन्नानि रत्नानि मणयस्तदादिरुपदागणः प्राभृतप्रकरो येन स तेन । 'प्रतीष्टकामज्वलदस्त्रजालकम्', तथा 'चिरत्नरत्नाचितमुचितं चिरात्' इति नैषधे ॥ इति भरतक्षेत्रम् ॥

वैताढ्यशैलो विपुलां द्विफालां विनिर्मिमीते स्म निजेन यस्य ।
यमीभ्रमीभङ्गिविभूष्यमाणां स्त्रैणस्य सीमन्त इव प्रवेणीम् ॥ २० ॥

वैताढ्यनामा शैलः यस्य भरतक्षेत्रस्य भूमीं द्विफालां द्विभागां निर्मिमीते स्म कृतवान् । 'द्विफालबद्धाश्चिकुराः शिरःस्थितम्' इति नैषधे । केन । निजेन आत्मना । 'श्रुत्वा निजं भीमजया निरस्तम्' इति नैषधे । 'निजमात्मानम्' इति तद्वृत्तिः । क इव । सीमन्त इव । यथा स्त्रैणस्य स्त्रीणां समूहस्य सीमन्तः केशवर्त्म प्रवेणीं कबरीं द्विफालां कुरुते । किंभूताम् । भूमीं प्रवेणीं च । यमी यमुना तस्या भ्रमी भ्रमणमावर्तकृज्जलपरिभ्रान्तिस्तस्या भङ्गयो विलासाः । 'शृङ्गारभङ्गिरुचिरेऽपि' इति नैषधे। 'शृङ्गारविलासयोग्येऽपि' इति तद्वृत्तिः । रचनाश्च । ताभिर्विभूष्यमाणामलंक्रियमाणाम् ॥

वैताढ्यशैलेन विभज्यमानावुभौ विभागौ भरतस्य भातः ।
द्वीपावनीपं किमुपेत्य भूत्या जितौ भजन्तौ फणिनाकिलोकौ ॥ २१ ॥

भरतक्षेत्रस्य वैताढ्यनाम्ना शैलेन विभज्यमानौ विभागीक्रियमाणावुभौ द्वौ विभागावंशौ भातो राजतः । किमुत्प्रेक्ष्यते । भूत्या स्वलक्ष्म्या जितौ पराभूतौ सन्तौ उपेत्य समीपमागत्य द्वीपमेवावनीपं भूपं सेवमानौ भजन्तौ फणिनां नागानां नाकिनां देवानां लोकौ भुवनौ । पातालस्वर्गलोकावित्यर्थः ॥ इति भरतक्षेत्रस्य द्वौ विभागौ ॥

स्वच्छन्दकेलीतरलीभवन्त्याः स्रस्तं शिरस्तो भुवि वर्षलक्ष्म्याः ।
किमुत्तरीयं मरुतोत्तरङ्गीकृतं सितं यत्र बभस्ति गङ्गा ॥ २२ ॥

यत्र भरतक्षेत्रे गङ्गा बभस्ति भासते । 'निशानभःसदृशे रजनीगगनतुल्ये । तथा निशानैस्तेजस्विभिर्बभस्तीति । तथा सदृश इः कामो यस्य' इति चम्पूटिप्पनके । उत्प्रे-

क्ष्यते—स्वच्छन्दं स्वेच्छया केली क्रीडा । 'केलीभिरुद्धर कृशोदरि' इति नैषधे । तया तरलीभवन्त्याश्चञ्चलाजायमानाया वर्षलक्ष्म्या भरतक्षेत्रश्रियाः शिरस्तो मस्तकाद्भुवि भूमौ स्रस्तं पतितमुत्तरीयमुपर्याच्छादनवस्त्रं प्रावरणमिव । किंभूतम् । मरुता वायुना उत्प्राबल्येन तरङ्गयुक्तं कृतम् । पुनः किंभूतम् । सितमुज्ज्वलम् ॥ इति गङ्गा ॥ इतिभरतक्षेत्रम् ॥

तद्दक्षिणार्धे सुरगेहगर्वसर्वंकषो गूर्जरनीवृदास्ते ।
श्रियेव रन्तुं पुरुषोत्तमेन जगत्कृताकारि विलासवेश्म ॥ २३ ॥

तस्य भरतक्षेत्रस्य दक्षिणदिक्पार्श्ववर्तिनि अर्धे सामिभागे खण्डे सुरगेहस्य स्वर्गस्य यो गर्वः स्ववैभवाहंकारस्तस्य सर्वंकषः सर्वापहारी गूर्जर इति नामा नीवृद्देश आस्ते वर्तते । उत्प्रेक्ष्यते—पुरुषोत्तमेन नरश्रेष्ठेन । जातावेकवचनम् । विष्णुना च सार्धं रन्तुं क्रीडितुं श्रिया लक्ष्म्या कर्त्र्या जगत्कृता सर्वसृष्टिविधायिना विधात्रा विलासवेश्म केलिनिकेतनमकारि कारितमिव । ण्यन्तप्रयोगः ॥

अशेषदेशेषु विशेषितश्रीर्यो मञ्जिमानं वहते स्म देशः ।
आक्रान्तदिक्चक्र इवाखिलेषु वसुंधराभर्तृषु सार्वभौमः ॥ २४ ॥

यो देशो गूर्जरमण्डलो मञ्जुनो भावो मञ्जिमा तं चारुतां वहते स्म दधौ । किंभूतो देशः । विशेषः सर्वातिशायिता संजातोऽस्यामिति विशेषिता श्रीर्धनधान्यादिका सर्वापि संपत्तिरूपा लक्ष्मीः शोभा वा यस्य । अत्र समासान्तविधेरनित्यत्वात्कप्रत्ययाभावः । केषु । अशेषेषु समस्तेषु देशेषु जनपदेषु । पुनः किंभूतम् । आक्रान्तं महत्त्वादात्मना व्याप्तं दिशां चतसृणामुपलक्षणाद्विदिशामपि एतावता अष्टानां हरितां चक्रं मण्डलं येन । क इव । सार्वभौम इव । यथा सर्वभूमेरीश्वरश्चक्रवर्ती अखिलेषु सर्वेषु वसुंधराभर्तृषु भूपालेषु विशेषितश्रीर्भवति । किंभूतः । आक्रान्तं स्वभुजबलेन विजितं दिक्चक्रं येन ॥

सुस्वामिभाजो विबुधाभिरामाः सजिष्णवो यत्र पुरः स्फुरन्ति ।
धृता दधानेन दिवाभ्यसूयां येनामरावत्य इवाप्रमेयाः ॥ २५ ॥

यत्र देशे पुरो नगर्यः स्फुरन्ति । किंभूताः । सुशोभनं नीतिमन्तं स्वामिनं राजानं भजन्ति इति सुस्वामिभाजः । पुनः किंभूताः । विशेषेण बुधाश्चतुर्दशविद्यावेदिनः पण्डितास्तैरभिरामा मनोज्ञाः । पुनः किंभूताः । सह जिष्णुभिर्जयनशीलैः सुभटादिभिर्वर्तन्ते यास्ताः । उत्प्रेक्ष्यते—दिवा देवलोकेन सहाभ्यसूयामीर्ष्यां दधानेन वहता येन देशेन अप्रमेयाः प्रमातुमशक्या गणनातीता अमरावत्य इन्द्रपुर्य इव धृताः । किंभूता अमरावत्यः । सुस्वामिनं सहस्राक्षत्वात्सर्वप्रकृतिभाववेदिनं पुरंदरं स्वामिकार्तिकं वा भजन्तीति । पुनः किंभूताः । विबुधैर्देवै रम्याः । पुनः किंभूताः । सह जिष्णुना शक्रेण कृष्णेन वा वर्तन्ते यास्ताः । सश्रीका हरय इति चम्पूकथायाम् । अथ वा जिष्णुश्च जिष्णुश्च जिष्णू कृष्णेन्द्रौ ताभ्यां सह । सरूपाणामेकशेषे ॥

अथ कानिचित्तीर्थानि प्रतिपाद्यन्ते—

शत्रुंजयाद्रेस्तलहट्टिकायां यदार्षभिर्वासयति स्म पूर्वम् ।
द्विषन्निव क्षोणिभृतां विनीतां यस्मिंस्तदानन्दपुरं समस्ति ॥ २६ ॥

यन्नगरं पूर्वं प्रथमयात्राकरणसमये शत्रुंजयाद्रिदर्शनादुत्पन्नामन्दानन्दात् शत्रुंजयाद्रेः सिद्धाचलस्य तलहट्टिकायां सीमभूमौ । 'सम्मेतशैलतलहट्टिकायां ग्रामसत्तमे । क्षेमंकरः सार्थनामा ग्रामाध्यक्षो भवानभूत् ॥' इति प्रतिक्रमणसूत्रबृहद्वृत्तौ । ऋषभस्यापत्यमार्षभिर्भरतचक्री वासयति स्म निवेशितवान् । वार्धकिरत्नेनेति शेषः । क इव । क्षोणिभृतां द्विषन्निव । यथा पर्वतानां शत्रुरिन्द्रः पूर्वं प्रथमं श्रीऋषभस्वामिराज्यावसरे सर्वनगरपुरग्रामादिनिवेशनप्रथमप्रारम्भे विनीतां नाम्नीं नगरीं वासितवान् । धनदेनेति शेषः । यस्मिन्देशे तदानन्दपुरमधुना नु बृहन्नगरापराभिधानं पुरं विभाति ॥ इत्यानन्दपुरम् ॥

यत्तुङ्गतारङ्गगिरौ गिरीशशैलोपमे कोटिशिला समस्ति ।
स्वयंवरोर्वीव शिवाम्बुजाक्षीपाणिग्रहे कोटिमुनीश्वराणाम् ॥ २७ ॥

यस्मिन्देशे तुङ्गेऽभ्रंलिहे तारङ्गनाम्नि पर्वते कोटिशिला समस्ति विद्यते । किंभूते तारङ्गगिरौ । गिरीशस्य शिवस्य शैलः कैलाशस्तस्योपमा सादृश्यं यस्य स तस्मिन् । उत्प्रेक्ष्यते—कोटिसंख्याकानां मुनीश्वराणां शिवं सिद्धिः सैवाम्बुजाक्षी वधूस्तस्याः पाणिग्रहे विवाहे स्वयंवरोर्वी स्वयंवरमण्डपमेदिनीव ॥

यत्पर्वते कल्पितसप्तभूमी राजर्षिणाकार्यत जैनगेहः ।
इवाधिरोढुं शिवचन्द्रशालां निःश्रेणिकारोहणसप्तकाङ्का ॥ २८ ॥

यस्मिंस्तारङ्गशैले राजर्षिणा कुमारपालेन कल्पिता रचिताः सप्तसंख्याका भूमयः । पिट्टणिका । उपर्युपरि स्थितिस्थानकानि यत्र स कल्पितसप्तभूमिर्जैनगेहः प्रासादः शिल्पिभिरकार्यत निर्मापितः । उत्प्रेक्ष्यते—शिवं मोक्षस्तदेव चन्द्रशाला शिरोगृहं तामधिरोढुमुपरि चटितुम् । चटतिप्रयोग ऋषिमण्डलवृत्तौ । यथा—'चटिष्यति कथं प्रौढदेहोऽयं गजराजवत्' इति । आरोहणानां सोपानानां सप्तकमङ्के उत्सङ्गे यस्यास्तादृशी निःश्रेणिका अधिरोहणी कारितेव ॥

गभीरताधःकृतवार्धिनेवोपदीकृतं दन्तिनमुद्वहन्तम् ।
राजर्षिरस्मिन्विजयाङ्गजातं तीर्थाधिपं स्थापयति स्म चैत्ये ॥ २९ ॥

अस्मिंस्तारङ्गगिरौ चैत्ये स्वकारितप्रासादे राजर्षिः कुमारपालभूपालो विजयाया जितशत्रुनृपपत्न्या अङ्गजातं नन्दनमजितनामानं द्वितीयतीर्थकरं स्थापयति स्म निवेशयामास । किं कुर्वन्तम् । उद्वहन्तं दधतम् । कं कर्मतापन्नम् । दन्तिनमर्थाल्लाञ्छनरूपं गजम् । उत्प्रेक्ष्यते—गभीरतया गाम्भीर्येणाधःकृतेन अलब्धमध्यत्वेन पराभूतेन वार्धिना समुद्रेण उपदीकृतं ढौकितमिव । वार्धौ जलकरिणां सद्भाव[स]त्वादैरावणस्याप्यर्णवे समुत्पन्नत्वा-

चेयमुत्प्रेक्षा। अथ वा 'विन्ध्येन धैर्यैरिव धिकृतेन' इति पाठः। तत्र धैर्यैर्मन्दरादिभ्योऽप्यतिशायिस्वधीरताभिर्धिक्कृतेनातिभूतेन विन्ध्येन विन्ध्याचलेनोपदीकृतमिव। विन्ध्याचले हि करिणां सद्भावः। 'रोहणाचले रत्नानि। मलयाद्रौ चन्दनानि। विन्ध्याचले गजाः' इत्यादि काव्यकल्पलतायाम्। तथा—'स्वस्थानात्पदमात्रमप्यचलतो विन्ध्यस्य चानेकशो जायन्ते मदपालिपालितयशःश्रीलम्भिनः कुम्भिनः' इति सूक्तेऽपि॥

चैत्येन चूडामणिनेव शीर्षं विभूष्य राजर्षिरमुष्य शृङ्गम्।
सिद्धाचलस्येव सुमङ्गलाभूस्तीर्थत्वमुर्व्यां प्रथयांचकार॥ ३०॥

कुमारपालोऽमुष्य तारणगिरेः। तारण इत्यभिधानं सामसौभाग्यकाव्ये। तीर्थत्वं च सकलकर्मक्षयकरणविधिना मोक्षगमनस्थानकतामुर्व्यां पृथिव्यां प्रथयांचकार विस्तारयामास। क इव। सुमङ्गला भूरिव। यथा सुमङ्गला ऋषभदेवपत्नी तस्या तस्या वा भवतीति सुमङ्गलाभूर्भरच(त)क्री सिद्धाचलस्य शत्रुंजयाद्रेस्तीर्थतां प्रथयति स्म। किं कृत्वा। विभूष्य विभूषां शोभां लम्भयित्वा। कम्। शृङ्गं शिखरम्। अर्थात्तारणगिरेरेव। केन। चैत्येन स्वकारितविहारेण। किं केनेव। शीर्षं चूडामणिनेव। यथा कश्चित्पुमान् मस्तकं चूडामणिना विभूषयति॥

देशे पुनस्तत्र समस्ति शङ्खेश्वरोऽन्तिकस्थायुकनागनाथः।
धात्रा धरित्र्यां जगदिष्टसिद्ध्यै मेरोरिवादाय सुरद्रुरुप्तः॥ ३१॥

अपरतीर्थवर्णनाधिकारे तत्र गुर्जरदेशे पुनरन्यत् श्रीशङ्खेश्वरपार्श्वनाथः तीर्थं समस्ति जागर्ति। किं० शङ्खेश्वरः। अन्तिके समीपे स्थायुकः सेवाहेवाकितया नित्यं तिष्ठत्येवंशीलः नागानां नाथः प्रभुर्धरणेन्द्रो यस्य। अथ वा। षष्ठाशीतिसहस्रनागनायकप्राग्जन्मवर्धमानाचार्याभिधानशङ्खेश्वराधिष्ठायकनागेन्द्रो यस्य। अथ वा पुरुषादेयनामकर्माणं श्रीपार्श्वनाथं विमुच्य अन्येषां देवानां समीपे अधिष्ठातृत्वेन। अमानोना प्रतिषेधे। ना कदाचिदपि न गच्छन्तीति नागाः अष्टाचत्वारिंशत्सहस्रयक्षास्तेषां नाथः पार्श्वयक्षो यस्य सः। उत्प्रेक्ष्यते—जगदिष्टसिद्ध्यै। 'तात्स्थ्यात्तद्व्यपदेशः' इति न्यायाज्जगज्जनानामिष्टस्याभिलषितस्य सिद्ध्यै पूर्तये मेरोः सुरतरुनिवासभूमेरादाय गृहीत्वार्थात्कल्पद्रुमं धात्रा ब्रह्मणा धरित्र्यां गुर्जरमण्डलमेदिन्याम्। धरित्रीति गुर्जराभिधानम्। अथवा केवलं भूमावेव सुरद्रुः कल्पवृक्ष उप्तः प्ररोपित इव॥

विद्याधरेन्द्रौ विनमिर्नमिश्च यद्बिम्बमभ्यर्चयतः स्म पूर्वम्।
स्वर्गे ततोऽपूजि विडौजसा यत्स्वधाम्न एव स्पृहयेव सिद्धेः॥ ३२॥

नमिश्च पुनर्विनमिर्नाम विद्याधरेन्द्रौ छद्मस्थश्रीऋषभदेवसेवासंतुष्टधरणेन्द्रप्रदत्तवैताढ्यदक्षिणोत्तरश्रेणिद्वयराज्याष्टाचत्वारिंशद्विद्यालंकृतौ पूर्वं प्रथममस्याश्चतुर्विंशत्यादिसमये श्रीमद्युगादिदेवे विद्यमाने सति नमिविनमिनामानौ खेचरेन्द्रौ यस्य श्रीशङ्खेश्वरपार्श्व-

नाथस्य बिम्बं प्रतिमामभ्यर्चयतः स्म पूजयतः स्म । बिम्बशब्दः पुंनपुंसके । ततस्तदनन्तरं यद्बिम्बं विडौजसा शक्रेणापूजि पूजितम् । उत्प्रेक्ष्यते—स्वर्गे देवलोके मनुष्यावतारं विनैव देवसंबन्धिवैक्रियशरीरेणैव सिद्धेर्मुक्तेः स्पृहया वाञ्छयेव ॥

तेनाथ मुक्तं गिरिनारिशृङ्गेऽधिगम्य माणिक्यमिवामराणाम् ।
नीत्वात्मधाम्नोर्विधुपद्मपाणी यदार्चतां निर्वृतिमीहमानौ ॥ ३३ ॥

विधुपद्मपाणी चन्द्रार्कौ यत् श्रीशङ्खेश्वरपार्श्वबिम्बमात्मधाम्नोः स्वगृहयोर्निजविमानयोर्वा नीत्वा आनीय आर्चतां पूजयतः स्म । किं कृत्वा । अथ कियत्कालं पूजनात्तं तेन शक्रेण सौधर्मेन्द्रेण गिरिनारिशृङ्गे रैवताद्रेः काञ्चनबलानकाख्यशिखरे मुक्तं स्थापितम् अर्थाद्यत्पार्श्वबिम्बं सुराणां माणिक्यमिव चिन्तारत्नमिवाधिगम्य संप्राप्य । विधुपद्मपाणी किं कुर्वाणौ । ईहमानौ काङ्क्षन्तौ । काम् । निर्वृतिं मुक्तिं सुखं च ॥

ताभ्यां ततः स्थापितमुज्जयन्ते पार्श्वं स्वसर्वस्वमिवावसाय ।
आखण्डलः कुण्डलिनां क्रमेण सभाजनायानयदात्मधाम्नि ॥ ३४ ॥

कुण्डलिनां भुजंगानामाखण्डलः पुरंदरो नागेन्द्रः क्रमेण कियता कालेन श्रीपार्श्वबिम्बं सभाजनाय पूजनार्थम् । 'सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा' इति नैषधे । 'सभाजनं पूजनम्' इति तद्वृत्तिः । आत्मधाम्नि स्वमन्दिरे आनयदानयति स्म । किं कृत्वा । अवसाय ज्ञात्वा । कम् । पार्श्वनाथम् । पुनः पूर्ववदेव ताभ्यां चन्द्रार्काभ्यामुज्जयन्ते रैवताचले स्थापितं न्यासीकृतम् । किमिव । स्वसर्वस्वमिव स्वस्यात्मनः सर्वद्रव्यनिधिमिव ॥

गिराथ नेमेररविन्दनाभिरुपास्य पद्माप्रियमष्टमेन ।
आनाययत्तेन जितं तमात्मद्विषज्जयं मूर्तिमिवाश्रयन्तम् ॥ ३५ ॥

अथ कियत्कालपूजनानन्तरमरविन्दनाभिर्नारायणो नेमेः श्रीनेमिनाथस्य गिरा वाचाष्टमेनाष्टमभक्तेन पद्माप्रियं पद्मावत्याः प्राणनाथं धरणेन्द्रमुपास्य आराध्य तेन धरणेन्द्रेण तं पूर्वव्यावर्णितस्वरूपं जिनं पार्श्वनाथमानाययत् । उत्प्रेक्ष्यते—मूर्तिं शरीरमाश्रयन्तमात्मनः स्वस्य द्विषतां वैरिणां विजयमिव । 'अरविन्दनाभिः' इति माघकाव्ये । तथा 'अरविन्दनाभिर्मालिलोचनश्चक्रपाणिरित्यादयः शिष्टप्रयोगाः संमता एव' इति कातन्त्रव्याकरणवार्तिकेऽपि ॥

ततो जरा येन यदूद्वहानां न्यवारि वारा स्नपनोद्भवेन ।
बाणस्य कुष्टं वपुषस्त्विषेव राजीविनीजीवितवल्लभेन ॥ ३६ ॥

ततोऽत्रागमनानन्तरं येन श्रीपार्श्वनाथेन स्नपनोद्भवेन निजस्नानसमुत्पन्नेन वारा सलिलेन कृत्वा यदूद्वहानां यदुनन्दनानां समस्तयादवानां जरा प्रतिवासुदेवजरासंधविद्याशस्त्रसमुद्भूतविस्रसा । 'विस्रसा जरा' इति हैम्याम् । न्यवारि निवारिता । केनेव । राजी-

विनीजीवितवल्लभेनेव । यथा पद्मिनीप्राणनाथेन भानुना त्विषा स्वकिरणेन कृत्वा बाणस्य बाणनाम्नः कवेर्वपुषः शरीरात्कुष्टं दुष्टरोगविशेषो निराकृतः । एतद्व्यतिकरविस्तरभक्तामरस्तववृत्तेरवसेयः ॥

यत्रार्हताध्मायि निजध्वजिन्यास्त्राणाय कम्बुर्भ्रमता समन्तात् ।
तत्राच्युतेनारिजयप्रशस्तिरिवात्मनः शङ्खपुरं न्यधायि ॥ ३७ ॥

यत्र स्थाने निजस्या(जाया) आत्मीयाया निजस्य स्वस्य वा ध्वजिन्याः सेनायास्त्राणाय रक्षणाय समन्तात्सेनासर्वतो भ्रमता भ्रमणीं कुर्वता सता अर्हता श्रीनेमिनाथेन कम्बुः शक्रशङ्खोऽध्मायि वादितः पूर्यते स्म । तत्र तस्मिन्स्थाने अच्युतेन विष्णुना शङ्खपुरं नाम नगरं न्यधायि स्थापितम् । वासितमित्यर्थः । उत्प्रेक्ष्यते—आत्मनो निजस्य शत्रूणामरीणां जयप्रशस्तिः संग्रामे जरासंधादिद्वेषिनिषूदनाद्यक्षरमालिकेव ॥

वसुंधराया इव वैजयन्तं निर्माप्य चैत्यं सुरगोत्रमित्रम् ।
निवेशयामास सुवर्णबिन्दुरानन्दसान्द्रोऽत्र जिनेन्द्रबिम्बम् ॥ ३८ ॥

सुवर्णबिन्दुर्नारायणोऽत्र चैत्ये जिनेन्द्रबिम्बं श्रीपार्श्वनाथप्रतिमां निवेशयामास स्थापितवान् । किं कारयित्वा । निर्माप्य विधापयित्वा । किम् । चैत्यं प्रासादम् । किंभूतम् । सुराणां गोत्रस्य गिरेर्मेरोः । 'शैलोऽद्रिः शिखरी शिलोच्चयगिरी गोत्रोऽचलः सानुमान्' इति हैम्याम् । मित्रं सुराद्रिवत्तुङ्गमित्यर्थः । किं० सुवर्णबिन्दुः । आनन्दसान्द्रः प्रमोदमेदुरः । उत्प्रेक्ष्यते—वसुंधरायाः पृथिव्या वैजयन्तमिन्द्रप्रासादमिव ॥

स्वकारितेशाचलचारुचैत्ये निवेशितः सज्जनमन्त्रिणा यः ।
स रोपितः स्वःशिखरीव सौधाङ्गणेऽस्य जज्ञेऽखिलसिद्धिदायी ॥३९॥

स शङ्खेश्वरपार्श्वनाथोऽस्य सज्जनमन्त्रिणोऽखिलाः समस्ता अष्टसंख्याका अणिमाद्या अन्या वा मन्त्रतन्त्रस्वर्णरूप्यादिका हृदयाभिलाषिता सिद्धीर्ददातीत्येवंशीलो दायी दायको जज्ञे जातः । क इव । स्वःशिखरीव । यथा सौधस्य निजमन्दिरस्याङ्गणे रोपित उप्तः सुरद्रुमो निखिलार्थसिद्धिदः स्यात् । स कः । यः प्रभुः स्वेनैवात्मनैव कारितं शिल्पिभिर्निर्मापितम्, तथा—ईशाचलः कैलाशस्तद्वच्चारु तुङ्गं सुधाधवलं च यच्चैत्यं प्रासादस्तस्मिन् सज्जननाम्ना मन्त्रिणा निवेशितः स्थापितः । अथ वा सज्जनमन्त्रिणा स्वकारितोत्तुङ्गचैत्ये निवेशितस्तस्मिन् सौधाङ्गणे प्ररोपितसुरतरुरिव सकलार्थसिद्धिदातासीत् । अत्र च 'प्ररोपितः' इति पाठः ॥

निःस्वादिवैश्वर्यमनाप्य झंझूपुरार्कतो दुर्जनशल्यभूमान् ।
रूपं यतः सारमिवाप्य देवसद्मेव यच्चैत्यमचीकरच्च ॥ ४० ॥

च पुनः—कियति काले व्यतीते सति दुर्जनशल्यनामा भूमान् राजा यच्चैत्यं यस्य भगवतः प्रासादमचीकरत् शिल्पिभिः कारयामास । उत्प्रेक्ष्यते—देवसद्मेव सुपर्वविमान-

मिव । किं कृत्वा । यतः श्रीशङ्खेश्वरपार्श्वनाथात् रूपं दुष्टरोगापगमात्सर्वाङ्गसुभगतामाप्य लब्ध्वा । उत्प्रेक्ष्यते—स्मारं स्मरसंबन्धि रूपं संप्राप्य । पुनः किं कृत्वा । अनाप्य अनासाद्य । कुतः—झंझूपुरे झंझूवाडाख्यग्रामे । योऽर्कः साधिष्ठायकसूर्यप्रतिमा ततः । प्रथमं हि दुर्जनशल्यभूमीपतिः सूर्यपुर उपविष्टः । ततस्तदधिष्ठायकेन प्रोक्तं यत्—'तवाङ्गकुष्ठादिरोगामयो मयापनेतुं न शक्यते । ततस्त्वं शङ्खेश्वरपार्श्वनाथपार्श्वे प्रयाहि । स एव तव सर्वाङ्गीणान्रोगानपनेष्यति ।' तदनु शङ्खेश्वरपार्श्वनाथमाराध्य सम्यग् रूपवानासीदिति संप्रदायः । अतो झंझूपुरस्थभास्करात्सम्यक् रूपं न प्राप्तम् । कस्मादिव । निःस्वादिव । यथा दरिद्रपुरुषादैश्वर्यं नाप्यते । अत्र पूर्वाचार्यप्रणीतस्तुतिकाव्यानि यथा—'अपूपुजत्त्वां विनमिर्नमिश्च वैताढ्यशैले वृषभेशकाले । सौधर्मकल्पे सुरनायकेन त्वं पूजितो भूरितरं च कालम् ॥ १ ॥ आराधितस्त्वं समयं कियन्तं चान्द्रे विमाने किल भानवेऽपि । पद्मावतीदेवतया च नागाधिपेन देवावसरेऽर्चितस्त्वम् ॥ २ ॥ यदा जरासंधप्रयुक्तविद्याबलेन जातं स्वबलं जरार्तम् । तदा मुदा नेमिगिरा मुरारिः पातालतस्त्वां तपसा निनाय ॥ ३ ॥ तव प्रभोस्तात्रजलेन सिक्तं रोगैर्विमुक्तं कटकं बभूव । संस्थापितं तीर्थमिदं तदानीं शङ्खेश्वराख्यं यदुपुंगवेन ॥ ४ ॥ तथा कथंचित्तव चैत्यमत्र श्रीकृष्णराजो रचयांचकार । स द्वारकास्थोऽपि यथा भवन्तं ननाम नित्यं किल सप्रभावम् ॥ ५ ॥ श्रीविक्रमान्मन्मथबाणमेरुमहेशतुल्ये समये व्यतीते । त्वं श्रेष्ठिना सज्जननामकेन निवेशितः सर्वसमृद्धिदोऽभूः ॥ ६ ॥ झंझूपुरे सूर्यपुरेऽनवाप्तं त्वत्तोऽधिगम्याङ्गमनङ्गरूपम् । अचीकरद्दुर्जनशल्यभूपो विमानतुल्यं तव देवचैत्यम् ॥ ७ ॥' इति ॥

पद्मावतीप्राणपतिः प्रसूनाशनी भविष्णुश्चरणारविन्दे ।
तन्तन्यते यन्महिमानमुर्व्यां सरोजसौरभ्यमिवाहिकान्तः ॥ ४१ ॥

पद्मावत्या वैरोट्यापरनामधेयायाः प्राणपतिर्भर्ता धरणोरगेन्द्रो यन्महिमानं यस्य श्रीशङ्खेश्वरपार्श्वनाथस्य माहात्म्यमुर्व्यां धरित्र्यां तन्तन्यते अद्यापि यावदतिशयेन विस्तारयति । पद्मापतिः किंभूतः । प्रसूनं पुष्पं तदेवाशनमाहारो यस्य स प्रसूनाशनो भृङ्गः । 'भोज्यं तु पुष्पमधुनी' इति हैमीवचनात् । स भविष्णुर्भवनशीलः । कस्मिन् । अर्थाद्भगवतश्चरणारविन्दे पादपद्मे । क इव । अहिकान्त इव । यथा अहिकान्तो वायुः । 'वातोऽहिकान्तपवमानमरुत्' इति हैम्याम् । सरोजसौरभ्यं कमलपरिमलं क्षितौ तन्तनोति ॥

यो ध्वंसतेऽष्टापि दरान्नराणां व्यालान्ववायानिव वैनतेयः ।
शयेशयालूः पुनरष्टसिद्धीः प्रणेमुषां यः कुरुते कृपालुः ॥ ४२ ॥

यो भगवान्नराणामर्थादात्माश्रितमानवानां दरान् मनुष्यादुत्पन्न इह लोकभयम्, सिंहसर्पाद्युत्पन्नपरलोकभयम्, चौरराजाद्युत्पन्नादानभयम्, अग्निविद्युदाद्यकस्माद्भयम्, दुःकालजातजीविकाभयम्, मरणभयम्, अयशोभयम्, नरकतिर्यग्गत्यादिदुःखजं संसारभयमेतान्यष्टौ । अथ वा मत्तेभमृगेन्द्रदवाग्निभुजंगसंग्रामसमुद्ररोगचौराभिधानानि महाभयानि विध्वंसते ना-

शयति। क इव। वैनतेय इव। यथा वैनतेयोऽष्टसंख्यान् व्यालानां सर्पाणामन्ववायान् कुलानि वासुक्यनन्ततक्षककंकोलपद्ममहापद्मशङ्खकुलीशशिनामानि विध्वंसते । पुनर्यः कृपालुर्दयावान् प्रणेमुषां निजपादाम्बुजयोर्नम्रीभूतानां जनानां लघिमा वशिता ईशत्वं प्राकाम्यं महिमा अणिमा यत्र कामावसायित्वं प्राप्तिरित्यष्टसंख्याका अष्टनाम्न्यो वा सिद्धयः ताः शये हस्ते शयालुः शयनशीला हस्तस्थिताः कुरुते संपादयति ॥

ऊर्जस्वलत्वं कलयन्कलौ यो निधिर्महिम्नां महसामिवांशुः ।
जागर्ति शङ्खेश्वरपार्श्वनाथः श्रेयःपुरीप्रस्थितपान्थसार्थः ॥ ४३ ॥

यः श्रीशङ्खेश्वरपार्श्वनाथो जागर्ति स्फूर्जति । किं कुर्वन् । कलौ कलिकालेऽपि युगे ऊर्जस्वलत्वं स्फूर्तिमत्तां कलयन् धारयन्। किंभूतः । महिम्नां माहात्म्यानां प्रभावानां निधिराश्रयस्थानम् । क इव । अंशुरिव । यथा सूर्यो महसां तेजसां प्रतापानां वा निधानम् । पुनः किंभूतः । श्रेयः सिद्धिरेव पुरी नगरी तत्र प्रस्थिताश्चलिता ये पान्था भव्याध्वगास्तेषां सार्थ इव सार्थः ॥ इति श्रीशङ्खेश्वरपार्श्वनाथः ॥

तत्रापि च स्फूर्तिमियर्त्यपूर्वां श्रीस्थम्भने स्थम्भनपार्श्वदेवः ।
व्यध्वंसि धन्वन्तरिणेव येन कुष्टोपतापोऽभयदेवसूरेः ॥ ४४ ॥

अपि च—पुनरन्यद्वर्णनप्रस्तावे तत्र गुर्जरमण्डले श्रिया लक्ष्म्या युक्तं यत्स्थम्भनं स्थम्भतीर्थपुरं तत्र स्थम्भननामा पार्श्वदेवोऽपूर्वामसाधारणीं स्फूर्तिमियर्ति गच्छति। प्राप्नोतीत्यर्थः । येन श्रीस्थम्भनपार्श्वदेवेन नवाङ्गीवृत्तिविधोऽभयदेवसूरेः कुष्टोपतापः । अर्थात् शरीरात्कुष्ठनामा उपतापो रोगः । 'रोगो रुजा रुगातङ्को॰ आम आमय आकल्यमुपतापो गदः समः' इति हैम्याम् । व्यध्वंसि निरस्तः। केनेव । धन्वन्तरिणेव । कविसमयानुसारेण नारायणासुरसुरमथितक्षीरसमुद्रसमुद्भूतचतुर्दशरत्नमध्ये धन्वन्तरिनाम वैद्यरत्नमजायत । यथा धन्वन्तरिरत्नेन धन्वन्तरिनाम्ना वैद्यराजेन कुष्ठादिसर्वरोगो विध्वस्यते ॥

स्वक्षारतां सूनुकलङ्कितां च मार्ष्टुं क्रमाम्भोजरजोमृतेन ।
वेलाछलाद्यं जलधिर्द्विवेलमुत्कण्ठितो नन्तुमिवाभ्युपैति ॥ ४५ ॥

जलधिः समुद्रो द्विवेलं द्वे वेले वारौ यत्रेति क्रियाविशेषणम् । वारद्वयं वेलाछलाद्वारिवृद्धिव्याजात् । उत्प्रेक्ष्यते—यं स्थम्भनपार्श्वदेवं नन्तुं नमस्कर्तुमिवाभ्युपैति अभिमुखं समेति । किंभूतो जलधिः । उत्कण्ठितः कण्ठादूर्ध्वमुत्कण्ठ उत्कण्ठत्वं संजातमस्येति भावप्रधानो निर्देशः । अन्योऽप्युत्कण्ठित औत्सुक्यकलितो जिनं नन्तुमायाति । किं कर्तुम् । मार्ष्टुमपनेतुम् । काम् । स्वस्यात्मनः क्षारतां लवणतां द्रोहन्तशक्रोद्धतां च । च पुनः सूनोश्चन्द्रमसः । विधोः समुत्पन्नत्वात् । कलङ्को गुरुदाराधिगमनात्परस्त्रीलाम्पट्यापवादोऽस्यास्तीति कलङ्की तस्य भावः कलङ्किता ताम्। 'कलङ्कोऽङ्कापवादयोः' इत्यनेकार्थः । केन । क्रमादर्थाद्भगवत्पादावेवाम्भोजे कमले तयो रजो रेणुस्तदेवामृतं पीयूषं तेन । 'त्वत्पादपङ्कजरजोऽमृतदिग्धदेहा' इति भक्तामरस्तोत्रे ॥ इति स्थम्भनपार्श्वनाथः ॥

तीर्थानि तीर्थाधिपपावितानि परस्सहस्राण्यपराण्यपीह ।
स्फूर्तिं परां बिभ्रति पूर्वदेशे जिनेशकल्याणकशालिनीव ॥ ४६ ॥

अपि पुनः, इह देशे लाडणचारूपप्रमुखानि अन्यान्यपराणि परस्सहस्राणि सहस्रात्पराणि सहस्रशः अनेकसहस्रसंख्यानि तीर्थानि पुण्यस्थानानि परां प्रकृष्टां स्फूर्तिं बिभ्रति कलयन्ति । किं० । तीर्थाधिपैर्जिनेन्द्रैरर्थात् जिनप्रतिमाभिः पावितानि पावनीकृतानि । पवित्रितानीत्यर्थः । कस्मिन्निव । पूर्वदेश इव । यथा पूर्वदेशे सहस्रसंख्याकानि तीर्थानि स्फुरन्ति । किंभूते पूर्वदेशे । जिनेशास्तीर्थकरास्तेषां कल्याणकानि च्यवनजन्मदीक्षाज्ञानमोक्षगमनस्थानानि तैः शालन्ते शोभन्ते इत्येवंशीलस्तस्मिन् ॥ इति पुण्यस्थानानि ॥

अथ क्रीडास्थानकानि—

नवोदयं हीरकुमारचन्द्रं निरीक्षितुं कौतुकिनीसमेता ।
स्वयं स्वयंभूतनया किमेषा सरस्वती यत्र विभाति सिन्धुः ॥ ४७ ॥

यत्र देशे सरस्वतीनामा सिन्धुर्नदी विभाति शोभते । उत्प्रेक्ष्यते—नवो नूतनो भाविनि भूतोपचारादुदयो यस्य तं तथोक्तम् । हीरनामा कुमारेषु कुमाराणां वा मध्ये चन्द्र इव दीप्यमानत्वात् विविधनादहासवाग्विलासविश्राणनादिभिराह्लादकत्वाद्वा कुमारचन्द्रस्तं निरीक्षितुं द्रष्टुं कौतुकं विद्यते यस्याः सा कौतुकिनी कुतूहलाकलिता । एषा किं स्वयंभुवो धातुस्तनया पुत्री भारती स्वयमात्मना नदीरूपेणेत्यर्थः । 'ब्रह्मपुत्री सरस्वती नदी' इति हैमीवचनात् । समेता समागतेव । अन्यापि वशा कौतुकान्नवोदयं चन्द्रं प्रेक्षितुं समेति ॥

कपोलपालीमृगनाभिपत्रलताङ्कितैश्च द्विजचन्द्रिकाङ्कैः ।
क्रीडन्मृगाक्षीवदनैर्बभौ या सहस्रचन्द्रेव विरञ्चिपुत्री ॥ ४८ ॥

या विरञ्चिपुत्री सरस्वती सरित् क्रीडन्त्यो जलविलासं सृजन्त्यो या मृगाक्ष्यः सारङ्गनयनास्तरुण्यस्तासां वदनैर्मुखैः सहस्रचन्द्रेव दशशतमृगाङ्केव बभौ भाति स्म । किंभूतैर्वदनैः । कपोलपालीषु गण्डस्थलेषु । पालीशब्दो दीर्घोऽप्यस्ति । 'कपोलपाली जनितानुबिम्बयोः' इति नैषधे । या मृगनाभेः कस्तूरिकायाः पत्रलताः पत्रवल्लयः ताभिरङ्कितैः कलितैः । पुनः किंभूतैः । द्विजानां दन्तानां चन्द्रिका ज्योत्स्ना । कान्तिरित्यर्थः । ता अङ्के क्रोडे येषां तैः । 'दशनचन्द्रिकया व्यवभासितम्' इति रघुवंशे ॥

यूनो रिरंसोपगतान्सकान्तान्हंसस्वनैः स्वागतमुच्चरन्ती ।
तरङ्गहस्तस्थितपङ्कजैर्या विश्राणयामास किमर्घमर्घ्यान् ॥ ४९ ॥

या सरस्वती नदी यूनस्तरुणान् । तरङ्गाः स्वकल्लोला एव हस्तास्तेषु स्थितैः पङ्कजैः कमलैः कृत्वा । किम् । उत्प्रेक्ष्यते—अर्घं पूजाविधिम् । 'अर्घः पूजाविधौ मूल्ये द्रव्ये' इत्यनेकार्थः । विश्राणयामास । 'दत्ते ददाति विश्राणयति प्रयच्छति च' इति क्रियाकलापे । प्र-

दत्ते स्म। या किं कुर्वती। उच्चरन्ती कथयन्ती। पृच्छन्तीत्यर्थः। उत्प्रेक्ष्यते—उच्चरन्तीव। गर्भितोत्प्रेक्षा। किम्। स्वागतं सुखेनागतं कुशलप्रश्नं वा। कैः। हंसस्वनैर्मङ्गलरावैः। कान्प्रति। यूनस्तरुणान्। किंभूतान्। रिरंसया जलक्रीडां कर्तुमिच्छया उपगतान् स्वस्मिन् विषये समागतान्। पुनः किंभूतान्। सकान्तान्सहकान्ताभिर्वर्तन्ते ये प्रियायुक्तान्। पुनः किंभूतान्। अर्घ्यान् पूजायोग्यान्॥

विधोर्धियामन्दमरन्दलीनशिलीमुखोन्मीलितपुण्डरीकम्।
वीक्ष्याभितो यत्र चकोरिकाभिरभ्रामि पीयूषरसाभिकाभिः॥ ९०॥

यत्र सरस्वत्यां सरिति अमन्दमरन्दार्थं प्रचुरमकरन्दपानकृते लीना अन्तर्निलीय स्थिताः शिलीमुखा भ्रमराः यत्र एवंविधम्। तथा—उन्मीलितं विकसितं पुण्डरीकं सिताम्भोजं वीक्ष्य विलोक्य पीयूषस्यामृतस्य रसो निःस्यन्दस्तस्याभिकाभिः कामयित्रीभिः। 'कामुकः कमिता कम्रोऽनुकः कामयिताभिकः' इति हैम्याम्। चकोरिकाभिर्ज्योत्स्नाप्रियजायाभिर्विधोर्धिया चन्द्रबुद्ध्या अभितः समन्तादभ्रामि भ्राम्यते स्म। चकोरिकानाममृतपानमग्रे वक्ष्यते॥ इति सरस्वती॥

मुक्तालताङ्केव निजोपकण्ठश्रेणीभवल्लक्ष्मणपक्षिलक्षैः।
शिञ्जानमञ्जीरवतीव कूलानुकूलकूजत्कलहंसिकाभिः॥ ९१॥
शिलीमुखाश्लेषिसरोरुहेव सनेत्रवक्त्रश्रियमाश्रयन्ती।
रथाङ्गनामद्वितयेन तुङ्गपीनस्तनद्वन्द्वमिवोद्वहन्ती॥ ९२॥
रोमावलीं शैवलवल्लरीभिरिवादधानापि च यत्र देशे।
स्वकेलिलोलान्वरवर्णिनीव युवव्रजान्साभ्रमती तनोति॥ ९३॥

अपि च पुनः—यत्र देशे साभ्रमती नाम नदी वरवर्णिनीव प्रधानस्त्रीव युवव्रजांस्तरुणगणान् स्वस्यात्मनि विषये केलिषु जलक्रीडासु कामकेलिविलासेषु वा लोलांश्चपलानत्युत्सुकांस्तनोति। करोतीत्यर्थः। किंभूता साभ्रमती। निजस्यात्मनः स्वकीयस्य वोपकण्ठे समीपे तटपार्श्वे। 'कांठा' इति लोकप्रसिद्ध्या। श्रेणीभवतां पङ्क्त्या वितिष्ठमानानां लक्ष्मणपक्षिणां सारसविहंगमानाम्। 'सारसस्तु लक्ष्मणः स्यात्' इति हैम्याम्। लक्षैः मुक्तालताङ्केव मुक्ताफलहारोऽङ्के। 'पूर्वभागे उपस्थोऽङ्कः' इति हैम्याम्। कटेरूर्ध्वं पूर्वकायः। कण्ठादिषु यस्याः। अथवा अङ्को भूषा यस्यास्तादृशीव। 'अङ्को भूषारूपकलक्ष्मसु' इत्यनेकार्थः। पुनः किंभूता। कूले तटेऽनुकूलं कर्णयोरमृतायमानं कूजन्तीभिः शब्दायमानाभिः कलहंसिकाभिः कृत्वा शिञ्जानमञ्जीरवतीव रणभणिति निक्कणायमाननूपुरमण्डितेव। पुनः किंभूता। सह नेत्रेण नयनेन वर्तते यत्तत्सनेत्रं यद्वक्त्रं तस्य श्रियं लक्ष्मीमाश्रयन्तीवेत्युत्प्रेक्ष्यते। केन। शिलीमुखं भ्रमरमाश्लिषत्यालिङ्गतीत्येवंशीलं यत्सरोरुट् पद्मं तेन। 'तज्जलात्सरसः पङ्कात् परे रुट्रुहजन्मजैः' इति हैम्याम्। पुनरुत्प्रेक्ष्यते—उद्वहन्तीव दधतीव।

किम् । तुङ्गमुच्चं पीनं पुष्टं यत्स्तनद्वन्द्वं कुचयुग्मं तत् । केन । रथाङ्गनाम्नोश्चक्रवाकयोर्द्वितयेन युगलेन । पुनरुत्प्रेक्ष्यते—आदधाना आ ईषत्कलयन्तीव । काम् । रोमावलीं लोमलेखाम् । काभिः । शैवलवल्लरीभिः शेवालमञ्जरीभिः । 'षड्भुच्युता शैवलमञ्जरीव' इति कुमारसंभवे । स्त्रीणां प्रायो लोमलेखा स्वल्पैव प्रशस्यते । 'बहुलोमा दरिद्रा स्यात्' इति वचनात्ततोऽत्रादधानेत्युपादानम् । किं च स्त्रीणामुदरे रोमराजी वर्ण्यमाना दृश्यते। तथा—'घणपव्वयरोमरायवणगहण' इति । तथा—'वयसी शिशुता तदुत्तरे सुदृशी स्वाभिविधिं विधित्सुनी । विधिनापि न लोमलेखया कृतसीम्नी प्रविभज्य रज्यतः ॥' इति नैषधेऽपि । तथा—'वरवर्णिन्यप्युक्तविशेषणविशिष्टैव स्यात्' इति ॥ त्रिभिर्विशेषकम् ॥ इति साभ्रमती ॥

यत्रोन्नमद्वारिदवर्मिताङ्गास्तडिल्लतोपात्तनिशातशस्त्राः ।
आखण्डलेन द्विषतेव रोषाद्योद्धुं व्यवस्यन्ति विलासशैलाः ॥ ९४ ॥

यत्र देशे कुत्राप्येकस्मिन्पार्श्वे इलादुर्गपुरसवेशप्रदेशे विलासशैलाः क्रीडापर्वता रोषात् स्ववंश्यलक्षपक्षच्छेदोद्भूतात्कोपाद्द्विषता वैरिणा आखण्डलेन शक्रेण साकं योद्धुं संग्रामं कर्तुं व्यवस्यन्ति प्रगल्भन्ते प्रयतन्ते इव । किंभूताः शैलाः । उन्नमन्त उत्प्राबल्येन जलभरेण नम्रीभवन्तो वारिदा मेघास्तैर्वर्मितं वर्म संनाहः । स संजातोऽस्मिन्निति वर्मितं संनाहयुक्तं जातमङ्गं वपुर्येषां ते । संनाहानां तु जात्यलोहत्वेन श्यामत्वात् । घनोऽपि श्यामस्तत एकवर्णत्वेन तदुपमानमिति । पुनः किंभूताः । तडिल्लता विद्युद्वितानान्येव उपात्तानि गृहीतानि शाणोत्तेजितानि शस्त्राणि प्रहरणानि यैः । विद्युता निकषनिर्मलीकृतानां सांयुगीनानां शस्त्राणां झगझ्भिति दीप्तित्वात्तुल्यता । तथा—करवालंडलालइकरीषीजझबझबइझबूकइजिसीवीज' इति पूर्वाचार्यकृतजीरापल्लीपार्श्वनाथप्राकृतस्तोत्रे संग्रामाधिकारे ॥

इयत्तयानन्तमपि प्रमातुं प्रगल्भमाना इव कौतुकेन ।
शैलाः कृतव्योमवहावगाहा जगाहिरे निर्जरराजमार्गम् ॥ ९५ ॥

क्वापि यत्र देशे शैलाः पर्वता निर्जराणां राजा निर्जरराजः शक्रस्तस्य मार्गं पन्थानमेतावता गगनं यथा सुराणां मार्गस्तथा सुरेन्द्रस्यापि मार्गः। 'येनामुना बहुविगाढसुरेश्वराध्व—' इत्यादि नैषधे । जगाहिरे अवगाहन्ते स्म। व्याप्नुवन्ति स्मेत्यर्थः । किंभूताः शैलाः । कृतो निर्मितोऽत्युन्नततया व्योमवहायामाकाशगङ्गायामवगाहो जले प्रवेशो यैस्ते इवेत्युत्प्रेक्ष्यते । कौतुकेन कुतूहलेन । अनन्तमपि पाररहितमपि निर्जरनभ इयत्तया एतावत्प्रमाणत्वेन प्रमातुं प्रमाणविषयीकर्तुं प्रगल्भमाना उद्यमं कुर्वाणा इव । कौतुकिनो हि निर्विचारमत्यौत्सुक्याद्यत्र तत्राप्युत्सहन्ते ॥

सवाहिनीकाः स्मितनूत(त्न)चूतच्छत्रा झरन्निर्झररोमगुच्छाः ।
अनिह्नुवाना धरणीधरत्वमिवात्मनां यत्र बभुर्गिरीन्द्राः ॥ ९६ ॥

यत्र देशे कुत्रापि प्रदेशे गिरीन्द्रास्तुङ्गशैलाः बभुर्बभासिरे इवेत्युत्प्रेक्ष्यते। आत्मनां स्वेषां धरणीधरत्वं भूभृद्भावं गिरित्वं राजतां चेत्यर्थः । अनिह्नुवानाः प्रकटीकुर्वाणा इव । 'स्फुटं

च लब्ध्वामरयुग्माचिह्नैरनिह्नुवानं निजवाजिराजताम्' इति नैषधे । किंभूता गिरीन्द्राः । सह वाहिनीभिर्नदीभिः सेनाभिश्च वर्तन्ते ये । अत्र समासान्तः कः । पुनः किंभूताः । स्मिता विकसिता मञ्जरीपिञ्जरीकृतास्थता नूता(त्ना) नवीना ये चूताः सहकारास्त एव च्छत्राणि आतपत्राणि येषाम् । पुनः किंभूताः । झरन्तो वहन्तो ये निर्झरास्त एव रोमगुच्छाश्चामराणि येषाम् । राजानोऽपि छत्रचामरसेनासंयुताः स्युः ॥

विद्युन्मणीभूषणभूष्यमाणा मिलद्बलाकाघनपुष्पनद्धा ।
कादम्बिनी बद्धशिखानुषङ्गा यद्गोत्रलक्ष्म्याः कबरीव रेजे ॥ ९७ ॥

यत्र देशे शैलोपरि कादम्बिनी मेघमाला रेजे । प्रायो मेघा गिरौ भवन्त्येवेति 'गिरौ वर्षन्ति वारिदाः' इति सूक्तेऽपि । भाति स्म । उत्प्रेक्ष्यते—यद्गोत्राणां गुर्जरभूधराणां लक्ष्म्याः श्रियः कबरी वेणीव । किंभूता कादम्बिनी कबरी च । बद्धो रचितः शिखायामधित्यकायां शृङ्गाग्रे मस्तकोपरि वा अनुषङ्गः प्रसङ्गो यया सा । पुनः किंभूता । विद्युदेव विद्योतमानानि वा । 'विद्युन्मणिमेखलालंकारधारिण्यः' इति चम्पूकथायाम् । 'विद्योतमानरत्नकाञ्ची' इति तट्टिप्पनके । मणीनां भूषणान्याभरणानि तैर्भूष्यमाणा अलंक्रियमाणा । पुनः किंभूता । मिलन्तीभिः सङ्गं कुर्वन्तीभिर्बलाकाभिर्बककान्ताभिः । तथा घनपुष्पैर्जलैर्नद्धा युक्ता । 'क्षीरं पुष्करमेघपुष्पकमलान्यापः पयःपाथसी' इति हैम्याम् । द्व्यर्थत्वात् घनपुष्पमिति पक्षे मिलद्बलाकातुल्यैः शुभ्रत्वाद्घनैः सान्द्रैः पुष्पैः कुसुमैर्नद्धा गुम्फिता ॥

नित्यातिवाहाद्विगतावलम्बेऽम्बरेऽम्बरद्वीपवती विखिन्ना ।
प्रोत्तुङ्गयद्भूधरनिर्झराणां निभेन भूभागमिवाभ्युपैति ॥ ९८ ॥

अम्बरद्वीपवती गगनापगा आकाशगङ्गा भूभागं पृथ्वीदेशमभि लक्षीकृत्याभ्युपैति अवतरति । पृथिव्यामवतरतीत्यर्थः । उत्प्रेक्ष्यते—प्रोत्तुङ्गा अभ्रंलिहा ये भूधरा गुर्जरगिरयस्तेषां निर्झराणां निभेन कपटेनेव भूभागमभ्युपैतीति शेषः । किंभूता अम्बरद्वीपवती । विखिन्ना प्राप्तखेदेव । कस्मात् । नित्यातिवाहान्निरन्तरातिशयेन वहनात् । क्व । अम्बरे आकाशे । किंभूते अम्बरे । विगतावलम्बे सर्वथापि सर्वत्राप्यपगत आश्रयो यस्मायस्य वा ॥ इति केलिशैलाः ॥

कैदार्यमुज्जृम्भितशालि यस्मिन्विहंगवृन्दैर्व्यरुचच्चरद्भिः ।
महीन्दिराया मणिगुम्फगर्भो नीलीविनीलः किमयं निचोलः ॥ ९९ ॥

यस्मिन् देशे । क्वचिदपीत्यध्याहार्यम् । क्वापि प्रदेशे उज्जृम्भिता निर्यदङ्कुराः शालयः कलमाद्या यत्र तत्तथोक्तम् । कैदार्यं केदारसमूहः । चरद्भिर्भक्षयद्भिश्चूर्णिं कर्तुमितस्ततो विचरद्भिर्वा विहंगवृन्दैः खगणैर्व्यरुचद्भाति स्म । किमुत्प्रेक्ष्यते—महीन्दिराया भूमिलक्ष्म्या

मणीनां विविधरत्नानां गुम्फो रचना गर्भे मध्ये यस्य । तथा नीली । लोके 'गुली' इति प्रसिद्धा । तद्वन्नीलो हरितवर्णो निचोलः । असौ कञ्चुक इव ॥

कैदारिकं क्वापि समञ्जरीकशालि व्यलासीन्नदसंनिधाने ।
रोमावली नाभिविभासिमध्यदेशे किमेषा विषयेन्दिरायाः ॥ ६० ॥

यत्र क्वापि कस्मिन्नपि प्रदेशे समञ्जरीकाः कलिकाकलिताः शालयो यत्र तत्तथोक्तं कैदारिकं केदारवारो नदसंनिधाने द्रह(ह्रद)संनिधाने व्यलासीद्विलसति स्म । किमुत्प्रेक्ष्यते—विषयेन्दिरायाः देशश्रियाः नाभिना तुन्दकूपिकया । नाभिशब्दः पुंस्त्रियोः । विभासिनि शोभनशीले मध्यदेशे उदरे । एषा प्रत्यक्षलक्षा रोमावली लोमलेखेव ॥

उत्तालतालं करतालिकाभिः सृजन्ति गीतीरिह शालिगोप्यः ।
श्रिया समग्रान्विषयान्विजित्य कीर्तीः स्थितानामिह गुर्जराणाम् ॥६१॥

इह गुर्जरदेशे उत्तालतालमुत्तालास्त्वरितवादिनस्ताला यत्रैवं यथा स्यात्तथेति क्रियाविशेषणम् । करतालिकाभिर्हस्ततालाहतिध्वनितैः । शालीनां कमलक्षेत्राणां गोप्यो रक्षिका गीतीर्मधुरध्वनितालापगानानि सृजन्ति कुर्वन्ति । इवोत्प्रेक्षते—श्रिया सर्वातिशयिलक्ष्म्या समग्रान् भूमीमण्डलवर्तिसमस्तान् विषयान् मण्डलान् विजित्य स्थितानामेकस्थानस्थायुकानां गुर्जराणां गूर्जरनामदेशानाम् । देशानामग्रे बहुत्वमेव वाच्यम् । कीर्तीर्यशांसीव गायन्ति ॥ इति केदाराः ॥

कुत्रापि दम्यैरनुगम्यमानाः सरिद्वरायाः सखितां दधानाः ।
यद्गोचरद्रोणदुघाश्चरन्ति मूर्ताः समाज्ञा इव मण्डलस्य ॥ ६२ ॥

कुत्रापि कस्मिन्नपि स्थाने क्वचन गुर्जरदेशप्रदेशे यस्य देशस्य गोचरे गवां चरणस्थाने। द्रोणपरिमाणं दुग्धमासामिति द्रोणदुघा गावश्चरन्ति । 'चर गतिभक्षणयोः' अयं प्रयोगः । तृणादि भक्षयन्ति। गावः किं क्रियमाणाः। दम्यैर्वत्सतरैरनुगम्यमानाः । स्वप्रौढवत्ससहिता इत्यर्थः । पुनः किं कुर्वाणाः । सरिद्वराया गङ्गायाः सखितां श्वैत्यात्सादृश्यं दधाना बिभ्रत्यः । इवोत्प्रेक्ष्यते—मण्डलस्य गुर्जरदेशस्य मूर्ताः शरीरसंयुक्ताः समाज्ञाः कीर्तय इव ॥

गावः क्वचिद्भान्ति सुधामुधाकृत्पयःस्रवन्त्यः प्रविभाव्य वत्सान् ।
यदीर्ष्यया निष्ठितनाकभाग्यैरिवावतीर्णा भुवि देवगावः ॥ ६३ ॥

क्वचित् प्रदेशे गावो धेनवो भान्ति । किं कुर्वत्यः । सुधां पीयूषं मुधा स्वमाधुर्यातिशयान्निष्फलां करोति तादृशं पयो दुग्धं स्रवन्त्यः । किं कृत्वा । वत्सांस्तर्णकानात्मनीयवत्सरूपाणि प्रविभाव्य दृष्ट्वा । इवोत्प्रेक्ष्यते—यदीर्ष्यया गुर्जरदेशेन सममरूपया । ईर्ष्योद्भूतपापेनेति शेषः । निष्ठितैः समग्रभुक्त्या अतिदुरितोदयेन वा क्षीणैर्नाकस्य स्वर्लोकस्य भाग्यैः पुण्यैः भुवि क्षोण्यामुर्व्यामवतीर्णाः समागता देवगावः कामधेनव इव ॥

ब्रह्माण्डभाण्डोपरिभित्तिभागप्रोत्तानयानोद्भवदर्तिभाजः ।
सातं चरन्त्यः किमुपेत्य धात्र्यां स्वर्धेनवो यत्र विभान्ति गावः ॥६४॥

यत्र देशे गावो भान्ति । किमुत्प्रेक्ष्यते—ब्रह्माण्डभाण्डस्य भुवनगोलकस्योपरितनभित्तिभागे ऊर्ध्वकुड्यप्रदेशे प्रोत्तानयानमम्बुप्रतिबिम्बवदूर्ध्वपादमधोवपुरेवंविधं यद्गमनं तेनोद्भवन्तीं प्रादुर्भवन्तीमार्तिं पीडाम् । 'पीडा बाधार्तिराभीलम्' इति हैम्याम् । चिन्तां वा भजन्तीति तादृशः सत्यः धात्र्यां भूमौ उपेत्यागत्य सातं सुखं यथा स्यात्तथा चरन्त्यः स्वैरं गच्छन्त्यः । अथ वा । स्वेच्छया तृणाद्याहरन्त्यः । 'चर गतिभक्षणयोः' इति धातोर्गमनभक्षणार्थत्वात् । स्वर्धेनवः कामगव्य इव । प्रोत्तानयानं नैषधे यथा—'वैदर्भीकेलिशोभे मरकतशिखरादुज्झितैरंशुदर्भै ब्रह्माण्डाघातभग्नस्यदजमदतया ह्रीधृतावाङ्मुखत्वैः । कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशे गताग्रैर्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥' इति ॥ इति गोधेनवः ॥

यस्मिंश्च राजर्षियशोमरन्दवृन्दारविन्दैः पुटभेदनान्तः ।
द्वात्रिंशता श्रीऋषभादिसार्वचैत्यैर्विलेसे दशनैरिवास्ये ॥ ६५ ॥

यस्मिन्देशे च पुनः पुटभेदनान्तः । अणहिल्लपटकनामपत्तनमध्ये । किं च सामान्यतोऽपि पुटभेदनशब्देन नगरमुच्यते । नैषधे यथा कुण्डिनपुरम्—'द्वीपान्तरेभ्यः पुटभेदनं तत्क्षणादवापे सुरभूमिभूपैः' इति । विशेषस्तु 'पत्तनं रत्नयोनिस्तत्पत्तनं पुटभेदनम्' । द्वात्रिंशता द्वात्रिंशत्संख्याकैः श्रिया युक्तानाम् ऋषभादीनां सार्वानां जिनानां चैत्यैर्दन्तपङ्क्त्येव एकयैव श्रेण्या स्थापितैः एकस्मिन्नेव प्रासादे । द्वात्रिंशत्प्रासादा दन्तद्वात्रिंशिकाविहारः । तैर्द्वात्रिंशद्विहारैर्विलेसे शुशुभे । कैः । राजर्षेः कुमारभूपालस्य यशांसि कीर्तयस्तान्येव मरन्दानां मकरन्दानां वृन्दानि पटलानि तेषामरविन्दानि कमलानि तैः । कैः कस्मिन्निव । दशनैरास्य इव । यथा वक्त्रे दन्तैर्विलस्यते ॥

श्रीस्तम्भतीर्थं पुटभेदनं च यत्रोभयत्र स्फुरतः पुरे द्वे ।
अहम्मदाबादपुराननाया किं कुण्डले गूर्जरदेशलक्ष्म्याः ॥ ६६ ॥

यत्र देशे उभयत्र द्वयोः पार्श्वयोः द्वे पुरे नगरे विभातः शोभेते । द्वे के । एकं श्रिया जलधिनन्दनया युक्तं स्तम्भतीर्थं च पुनर्द्वितीयं पुटभेदनं बृहत्पत्तनम् । इवोत्प्रेक्षते—अहम्मदाबादपुरं सांप्रतीनसमये राजधानी राजनगरमेवाननं वदनं यस्यास्तादृश्या गूर्जरदेशलक्ष्म्या द्वे कुण्डले कर्णाभरणे इव ॥

विभूतिभाक्कालभिदङ्कदुर्गः क्रीडत्कुमारः सकलाधरश्च ।
अहीनभूषः सवृषः सुपर्वसरस्वतीभृद्भववद्बभौ यः ॥ ६७ ॥

यो देशो भववदीश्वर इव बभौ भाति स्म । किंभूतो देशो भवश्च । विशिष्टां भूतिं लक्ष्मीं विभूतिं संपदं वा भस्म च भजतीति । 'भूतिस्तु भस्मनि । मांसपाकविशेषे च सं-

पदुत्पादयोरपि' इत्यनेकार्थः। पुनः किंभूतः । कालं कलिकालं सर्वदापि सर्वसुखानुभवनत्वाद्यन्मण्डले कलियुगस्य प्रवेशमात्रमपि नास्तीति । तथा—दैत्यं कालनामानं भिनत्तीति कालभित्। पुनः किंभूतः । अङ्के क्रोडे दुर्गाः कोट्टाः पार्वती च यस्य सोऽङ्कदुर्गः । पुनः किंभूतः । क्रीडन्तो विविधबालावस्थोचितकेलिपरायणा रममाणाः कुमारा बालकाः। तथा क्रीडन् बालवयोयोग्यां यौवनसमययोग्यां वा क्रीडां विलासं कुर्वन्कुमारः स्वामिकार्तिको यस्य यत्र वा स क्रीडत्कुमारः । पूर्वं हि तारकासुराभिभूताः पुरंदरप्रमुखाः सर्वे सुराः विधातुः पार्श्वे गत्वा स्वदेवीरत्नमञ्जूषाग्रहणसुरद्रुमोन्मूलनादिममात्मपराभवं निवेदयामासुः। तदनु ब्रह्मणोक्तम्—'प्रागनेन दुस्तपस्तप्त्वा मामति प्रसन्नं प्रणीय सप्तवासराशिशुं मुक्त्वा परः कश्चित्सुरो नरो वा मां हन्तुं न शक्नुयादिति मत्तो वरं जग्राह । ततः स्वयमुप्तविषवृक्षोऽपि स्वेनैव छेत्तुमसांप्रतम् । तस्मान्ममैवायं हन्तुमनुचितः । ततो यदा ईश्वरः पार्वतीं परिणेष्यति तत्सुतः सप्तमे दिने युष्माकं सेनानीत्वमङ्गीकृत्य तारकं हनिष्यति'। ततो मुदिता देवाः । स्वस्थानमागत्य कामः प्रेषितः । स शंभुना भस्मीकृतः । ततो गौरीतपसा प्रीत ईश्वरः परिणिनाय । तत्पुत्रः स्वामिकार्तिको जातः–इति कुमारसंभवे । पुनः किंभूतः । कलाश्चतुःषष्टिर्द्वासप्ततिश्च धरन्तीति तादृशैः स्त्रीपुरुषैः सह वर्तते यः। पक्षे कला षोडशांशः षोडश कला बिभर्तीति तादृशेन शशिना सह वर्तते यः । पुनः किंभूतः। अहीनां संपूर्णाम्। तथा अहीनां सर्पाणामिनः स्वामी तेन भूषा शोभा यस्य। पुनः किंभूतः । वृषेण धर्मेण वृषभेन वर्तते यः । पुनः किंभूतः । सुशोभनानि पर्वाण्यक्षततृतीयादीनि सरस्वतीं नाम्नीं नदीं सुरसरितं वा बिभर्तीति ॥

यत्रैकदेशे वपुषीव वक्त्रः श्रीधानधाराभिधमण्डलोऽस्ति ।
स्वर्लोकजैत्रैर्विभवैरिव स्वैरधःकृतो येन भुजंगलोकः ॥ ६८ ॥

त(य)त्र गुर्जरदेशे एकदेशे एकस्मिन् भूभागे स प्रसिद्धो धानधाराभिधमण्डलोऽस्ति। क इव । वक्त्र इव । यथा वपुषि शरीरे एकदेशे मुखमास्ति। वक्त्रशब्दः पुंनपुंसकलिङ्गयोः। येन धानधारदेशेन स्वर्लोकस्य जैत्रैर्जयनशीलैः स्वैर्विभवैः स्वश्रियामातिशयैर्भुजंगलोको नागलोको बलिवेश्म अधःकृतो हीनीकृतस्तिरस्कृतः स्वाधो विहितः ॥ इति देशवर्णनम् ॥

अथ प्रह्लादनपुरवर्णनावसरः—

सवाडवे श्रीपुरुषोत्तमाङ्के नाथे नदीनामिव तत्र देशे ।
प्रह्लादनं नाम पुरं चकास्ति पुरः प्रतिच्छन्द इवाद्रिदस्योः ॥ ६९ ॥

प्रह्लादनं नाम पुरं नगरं चकास्ति दीप्यते । कुत्र । देशे । किंभूते । तत्र—गुर्जरमण्डलस्यैकपार्श्ववर्तिनि धाराधराख्यमण्डले । उत्प्रेक्ष्यते—नदीनां नाथे इव समुद्रे । किंभूते देशे समुद्रे च। सह वाडवैर्विप्रैर्वाडवेन वाडवानलेन च वर्तते यः स सवाडवस्तस्मिन्। पुनः किंभूते। श्रिया विविधविभवेन शोभया वा युक्ताः पुरुषोत्तमाः प्रकृष्टनरा व्यवहारिप्रमुखाः, लक्ष्मीकृष्णौ च, अङ्के उत्सङ्गे मध्ये यस्य स श्रीपुरुषोत्तमाङ्कस्तस्मिन् । पुरमुत्प्रे-

क्ष्यते—अद्रिदस्योरिन्द्रस्य पुरो नगर्या अमरावत्याः प्रतिच्छन्दः प्रतिबिम्बमिव । समुद्रजले प्रतिबिम्बमुचितमेव ॥

इदं पुरा सारदलैः प्रणीय त्वष्ट्रावशिष्टैरिव तद्दलांशैः ।
दृक्कर्णगीर्वाणपुरे प्रणीते न चेत्किमाभ्यामतिरिच्यते तत् ॥ ७० ॥

त्वष्ट्रा विश्वकर्मणा दृक्कर्णानां नागानां गीर्वाणानां देवानां पुरे नगरे प्रणीते निर्मिते इवोत्प्रेक्ष्यते । किंभूते । अवशिष्टैः शेषैरुद्धतैस्तस्य सारस्य दलानि तेषामंशैर्लवैरिव कृते । किं कृत्वा । पुरा पूर्वं सारदलैः प्रधानद्रव्यैरिदं प्रह्लादनाह्वं पुरं प्रणीय निष्पाद्य । एवं चेन्न तर्हि प्रह्लादनपुरमाभ्यां नाकिनागपुराभ्यां कथं केन प्रकारेण अतिरिच्यते अधिकीभवति । श्रियेति शेषः ॥

रघूद्वहोपक्रममब्धिमध्यस्थायीव सेतुः शशिकान्तक्लृप्तः ।
चन्द्रार्चिराश्लेषविनिर्यदर्णःपूर्णान्तिकः क्वापि चकास्ति यस्मिन् ॥७१॥

यस्मिन् प्रह्लादनपुरे क्वापि कुत्रापि स्थाने शशिकान्तैश्चन्द्रोपलैः क्लृप्तो रचितः सेतुः पद्या चकास्ति । नगरवर्णने च चन्द्रकान्तसूर्यकान्तमयाः सेतवो वर्ण्यमाना दृश्यन्ते । यथा नैषधे—'रविकान्तमयेन सेतुना सकलाहर्ज्वलनोहितोष्मणा' इति । किंभूतः । चन्द्रस्यार्चिषः कान्तेराश्लेषेण संपर्केण विनिर्यद्भिर्गच्छद्भिरर्णोभिः पानीयैः पूर्णे पूरिते भरिते अन्तिके समीपे द्वे पार्श्वे यस्य सः । क इव भाति । रघूद्वहोपक्रमसेतुरिव । यथा रघूद्वहेन नन्दनेन रामेण आदावुपक्रान्तः मन्दोदरीप्रमुखसपादलक्षान्तःपुरीपतित्वेऽपि परदारातिलम्पटतया स्वभगिनीशूर्पनखाव्यावर्णिताद्वितरू[प]लक्ष्मीसमाकर्णनतत्सङ्गमोत्सुकितदशमस्तकापहृतस्वकान्तासीतानयनाय लङ्कागमनावसरे रघुनन्दनेन समुद्रोपकण्ठादारभ्य लङ्कां यावन्निबद्ध इत्यर्थः । तादृशः सेतुश्चकास्ति । किंभूतः । अब्धेर्दक्षिणसमुद्रस्य मध्ये विचाले तिष्ठतीत्येवंशीलः ॥

क्वचित्पुरं प्रत्यफलत्तटाकोदरे जगत्पत्तनजित्वरश्रि ।
येनाभिभूतिं गमिता महेन्द्रपुरीव दुःखादिह दत्तझम्पा ॥ ७२ ॥

जगतां त्रयाणां भुवनानां पत्तनानां यावन्नगराणाम् । अत्र पत्तनशब्दः सामान्यतः पुरनगरवाची । न विशेषद्योतकः । जित्वरी जयनशीला पुंवद्भावे ईकारो गतः । श्रीः संपत् शोभा वा यस्य तत्तथोक्तं पुरं नगरम् । क्वचित्कुत्रापि समीपभूभागभाजि तटाकोदरे सरोमध्ये प्रत्यफलत्प्रतिबिम्बति स्म । नैषधेऽपि नगरस्य जलाशये प्रतिफलनं दृश्यते । यथा—'विललास जलाशयोदरे क्वचन द्यौरनुबिम्बितेव या' इति । इवोत्प्रेक्ष्यते—येन प्रह्लादपुरेणाभिभूतिं स्वाद्वैतश्रिया पराभवं गमिता प्रापिता सती दुःखाज्जगत्समक्षस्वविजयकरणजाता सा तादृशे तटाकोदरे दत्ता झम्पा अगाधतलमध्ये संपातपाटवं यया तादृशी महेन्द्रपूरिन्द्रनगरीव अमरावतीव ॥

कपालिमित्रं त्रिशिराः कुबेरः पिशाचकी पुण्यजनः पतिर्मे ।
तन्नाभिगम्यः किमितीत्वरीव त्यक्त्वा तमागादलकेयमुर्व्याम् ॥ ७३ ॥

यत्पुरं भातीति संबन्धः । किमुत्प्रेक्ष्यते—इयं प्रत्यक्षलक्ष्या अलका धनदपुरी उर्व्यां भूमण्डले आगादायाता। किं कृत्वा। त्यक्त्वा मुक्त्वा। कम्। तं धनदपतिम्। केव। इत्वरीव। यथा पांशुला धनदमपि स्वकान्तं विहाय स्वाभिमतेऽन्यपुंसि रता परपृथिव्यामागच्छति । किमिति हेतोः । तं हेतुं दर्शयति—यस्मान्मे मम पतिरेवंविधः कपालिनो रुद्रस्य रुण्डमालिनो योगिनो वा मित्रं सुहृत् एतावता भिक्षुकः। पुनः किंभूतः । त्रीणि शिरांसि मस्तकानि यस्य इति बीभत्सः। पुनः किंभूतः। कुत्सितं निकृष्टं बेरं शरीरं यस्येति कुरूपः। पिशाचाश्छलकारिणो देवविशेषा यस्येति छलावेशादिदोषभीतिः। पुनः किंभूतः। पुण्यजनो राक्षसः इति क्रूरः। 'यक्षो नृधर्मधनदौ नरवाहनश्च' इति यक्षापराभिधानम्, तथा 'यक्षः पुण्यजनो राजा' इति द्वयमपि हैम्याम्। तत्त्वतस्तु सर्वाण्यपि धनदनामानि। तत्तस्मात्कारणान्नाभिगम्यः न सेव्यः ॥

रामायुतैस्ताक्ष्यशतै रमाभिः प्रद्युम्नकोट्या शतशूरवंशैः ।
जितेन कृष्णेन पुरी स्वकीयोपदीकृतेयं किमु मण्डलस्य ॥ ७४ ॥

पुरं भातीति संबन्धः। किमुत्प्रेक्ष्यते—कृष्णेन नारायणेन मण्डलस्य देशस्योपदीकृता ढौकिता इयं प्रह्लादनपुरलक्षणा स्वकीया पुरी द्वारकेव। किंभूतेन कृष्णेन। जितेनार्थाद्गूर्जरदेशेन । कैः। रामाणामयुतैः। अयुतं दशसहस्री स्यात्। बहुवचनत्वाल्लक्षसंख्यैः। रामो बलभद्रः, रामाः स्त्रियः। समासान्तपदे न कोऽपि भेदः। ताक्ष्र्याणां शतैः शतसंख्यैः। उपलक्षणत्वात्सहस्रलक्षसंख्यैः। ताक्ष्र्यो गरुडो वाजी च। पुनः काभिः। रमाभिर्विविधप्रकाराभिर्धनधान्यरूपाभिर्लक्ष्मीभिः संपद्भिः। पुनः कैः। प्रकृष्टानां न्यायमार्गोपार्जितानां बहुसंततिस्थायिनां वा द्युम्नानां द्रव्याणां कोट्या शतलक्ष्या। प्रद्युम्नो मदनः। पुनः कैः। शतसहस्रसंख्यैः शूराणां सुभटानां वंशैरन्वयैः कुलैः। शूरनामा यादवपूर्वजहरिवंश्यनृपः। कृष्णस्य तु एतत्सर्वेऽप्येकैका इति पराजयः॥ इति समुदायेन प्रह्लादनपुरवर्णनम्॥

अथ पृथक्पृथग्वर्णनेषु प्रथमं प्रह्लादनपार्श्वनाथवर्णनप्रस्तावः—

प्रह्लादनाच्चन्द्र इवाङ्गभाजामन्वर्थनामाजनि यो जगत्याम् ।
प्रह्लादनः पार्श्वपतिः स तत्र प्रह्लादनाह्वे व्यलसद्विहारे ॥ ७५ ॥

तत्र प्रह्लादनपुरे प्रह्लादन इत्याह्वा नाम यस्य तस्मिन्विहारे चैत्ये । पाल्हविहार इति लोके प्रसिद्धे । स जाग्रन्महिमा प्रह्लादनो नाम पार्श्वपतिर्व्यलसद्विलसति स्म । स कः। यः पार्श्वनाथोऽङ्गभाजां प्राणिनां प्रह्लादनादानन्दोत्पादनाज्जगत्यां क्षितौ विश्वे वा। 'स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत्' इति हैमीवचनात्। अन्वर्थमनुगतार्थं सत्यार्थं नाम यस्य स तथोक्तः । अजनि संजातः। क इव। चन्द्र इव। यथा चन्द्रोऽङ्गिनामाह्लादनादनुगतार्थो जायते। 'चदि आह्लादे'। चन्दयत्याह्लादयति जनानिति चन्द्रः॥

यदीयमूर्तिर्निरमापि भक्त्या प्रह्लादनाम्ना पुरि राणकेण ।
तस्याजयस्येव नृपस्य पार्श्वोऽप्यामापहः स्नानजलेन जज्ञे ॥ ७६ ॥

प्रह्लादनाम्ना राणकेन पुरि स्वनगरे भक्त्या सेवासक्त्या । अर्बुदशैलाचलदुर्गशिखरस्थचतुर्वदनप्रासादमध्यगतैकपित्तलमयप्रतिमागालनादुत्पन्नकुष्ठादिमहामयेन निजरोगापगमनचिकित्साप्रश्नादनु नवीनश्रीपार्श्वनाथप्रतिमाप्रासादनिर्मापणात्तवाङ्गात्समग्ररोगाः शान्तिं यास्यन्तीति सातिशयज्ञानवत्साधुसिन्धुरवचसा यदीया श्रीप्रह्लादनपार्श्वनाथसबंन्धिनी मूर्तिः प्रतिमा निरमापि कारिता । अपि पुनः स पार्श्वनाथस्तस्य प्रह्लादनराणकस्य स्नानजलेन आमान् रोगान् कुष्ठादीनपहन्तीति आमापहस्तादृशो जज्ञे जातः । कस्येव । अजयस्येव । यथा पद्मावतीवचनात् जलदगर्जिततडित्प्रचण्डपवनादिविघ्नोपशान्तिकृते समुद्रसलिलान्तरालाकर्षणस्वयानपात्रे निवेशनान्निर्विघ्नद्वीपवन्दिरागतरत्नसारव्यवहारिसमानीतार्पिताजयपार्श्वनाथो दशरथपितुरजयनाम्नो नृपस्य राज्ञः सप्तोत्तरशतरोगापहन्ता जातः। एतद्विस्तरस्त्वग्रे वक्ष्यते ॥

प्रदेहि नः साक्षरतामबाह्यां बाह्यामिवाख्यातुमितीव पार्श्वः ।
भोगैर्निजैः पञ्चशतीमिताभिर्यः सेव्यते विश्वलयुक्पुरीभिः ॥ ७७ ॥

पञ्चशतीमिताभिरर्धसहस्रप्रमाणाभिः विश्वल इति पूर्वप्रयुक्तेन शब्देन युञ्जन्ति योगं प्राप्नुवन्तीति ताश्च ताः पुर्यश्च ताभिः । वीसलपुरीनामनाणकविशेषैरित्यर्थः । कर्त्रीभिर्निजैरात्मीयैर्भोगैः पूजादिप्रकारैर्यः पार्श्वनाथः सेव्यते उपास्यते । इत्याख्यातुं वक्तुमिव । इति किम् । यन्नोऽस्माकमबाह्यामन्तरङ्गां साक्षरतां प्रदेहि प्रयच्छ । कामिव । बाह्यामिव । यथास्माकं बाह्या साक्षरता अक्षरयुक्ततास्ते । एतावता प्रत्यहं पञ्चशतीवीसलपुरीणां श्रीपार्श्वनाथस्य भोगो जायते ॥

स्वचोक्षभावेन जिता जिनेन निर्मातुकामा इव तत्प्रसत्तिम् ।
यत्राक्षता मूढकसंमिता यच्चैत्येऽनिशं प्रागुपजग्मिवांसः ॥ ७८ ॥

यत्र नगरे यस्मिन्प्रह्लादनविहारे अनिशं निरन्तरं प्रतिदिनं मूढकसंमिता मूढकप्रमाणा अक्षता निस्तुषाः कलमाः प्राक् पूर्वं श्रीमजगच्चन्द्रसूरिवारके उपजग्मिवांस आगच्छन्तोऽभूवन् । उत्प्रेक्ष्यते—जिनेन श्रीपार्श्वनाथेन स्वस्यात्मनश्चोक्षभावेन निर्मलाशयत्वेन जिता अभिभूताः सन्तस्तस्य श्रीप्रह्लादनपार्श्वस्य प्रसत्तिं प्रसादनां निर्मातुकामाः कर्तुमिच्छन्त इवागताः । एतावता प्रल्हादनविहारे नित्यमेकमूढकमाना अक्षता आयान्ति स्मेत्यर्थः ॥

उद्वेगभावं स्वमिवापकर्तुं श्रीपार्श्वभर्तुः परिशीलनाभिः ।
नित्यं कलासंख्यमणप्रमाणान्यस्मिन्पुनः पूगफलान्युपेयुः ॥ ७९ ॥

अस्मिंश्चैत्ये प्रह्लादनविहारे नित्यं प्रत्यहं कलाः षोडश तत्संख्यानां मणानां चत्वारिंश-

त्सेरमितानां प्रमाणं येषां तानि पूगफलानि क्रमुकीसस्यानि। 'पूगे क्रमुकगीवाकू तस्योद्वेगं पुनः फलम्' इति हैम्याम् । उपेयुः पुरा आगच्छन्ति स्म । उत्प्रेक्ष्यते—श्रीपार्श्वभर्तुः परिशीलनाभिः सेवाभिः कृत्वा स्वं स्वकीयमुद्वेगभावं निर्वेदत्वमपकर्तुं हन्तुमिव । एतावता चैत्ये प्रत्यहं षोडशमणपूगीफलान्यागच्छन्ति स्म ॥

अशीतिरस्मिन्नधिकाश्चतुर्भिर्महेभ्यमुख्याः श्रितशीकरीकाः ।
सुरा विमानैरिव याप्यमानैः सागत्य शृण्वन्ति गिरं गुरूणाम् ॥८०॥

अस्मिन् प्रह्लादनपुरे चतुर्भिरधिका अशीतिः। चतुरशीतिरित्यर्थः । महेभ्यमुख्याः प्रकृष्टव्यवहारिणोऽर्थात् प्रह्लादनपार्श्वनाथं प्रणम्य गुरूणां धर्माचार्याणां गिरं वाणीं देशनां शृण्वन्ति स्म शुश्रुवुः । किंभूताः । श्रिताः शीकर्यो महेभ्यताया राजमान्यताया वा चिह्नविशेषा यैः आसन्नविशेषा वा छत्राकृतयो वा। फिरङ्गदेशप्रसिद्धाः । किं कृत्वा । आगत्य। कैः । याप्यमानैः शिबिकाभिः । कैरिव । विमानैरिव । यथा देवा विमानैरागच्छन्ति ॥

अथ रत्नपुरुषोत्पत्तिस्थानकतां कविर्दर्शयति—

वपुःश्रिया भर्त्सितमच्छकेतुरद्वैतवैराग्यरसाम्बुराशिः ।
लब्धीर्दधानो विविधाश्च वज्रस्वामीव विश्वागमपारदृश्वा ॥ ८१ ॥
सोमादिमः सुन्दरसूरिसिंहः प्राग्वाटवंश्यो निजजन्मना यत् ।
साकेतमिक्ष्वाकुकुलावतंसो महोक्षलक्ष्मेव पुरापुनीत ॥ ८२ ॥

प्राग्वाटानां वंशे भवः प्राग्वाटवंश्यः । सोम इति शब्द आदिमः प्रथमो यस्य स सुन्दरनामा सूरिष्वाचार्येषु सिंहो मुख्यः । 'सिंहशार्दूलनागाद्याः प्रशस्यार्थप्रकाशकाः' इति हैमीवचनात् । एतावता श्रीसोमसुन्दरसुरीन्द्रः निजस्यात्मन उत्पत्त्या कृत्वा यत्प्रह्लादनपुरं पुरा पूर्वमपुनीत पवित्रीचकार । क इव । महोक्षलक्ष्मेव । यथा इक्ष्वाकूणां कुलस्य वंशस्य अवतंसः शेखरः श्रीवृषभलाञ्छनो जिनो भाविनि भूतोपचारात् । साकेतं कोशलां नगरीं स्वजन्मना पावनीकरोति स्म । सूरिः किंविशिष्टः। वपुषः शरीरस्य श्रिया शोभया भर्त्सितो न्यकृतो मच्छकेतुर्मीनध्वजो मदनो येन । पुनः किंभूतः । अद्वैतोऽसाधारणो यो वैराग्यरसः संसारविरक्तताशान्ततादिरूपः तस्याम्बुराशिः समुद्रः । पुनः किं कुर्वाणः । दधानो बिभ्राणः । काः । विविधा नानाप्रकारा लब्धीः सामर्थ्यविशेषान् । च पुनः किंभूतः। विश्वे समस्ताः स्वदर्शनपरदर्शनसक्ता ये आगमाः शास्त्राणि तेषां पारं दृष्टवानिति पारदृश्वा । स्वसमयपरसमयपारगामी। क इव । वज्रस्वामीव यथा वज्रस्वामी पूर्वोक्तविशेषणविशिष्टोऽजनिष्ट ॥ युग्मम् ॥ इति नररत्नखनिर्नगरम् ।

अथ मुख्यतो नगरवर्णनम् । तत्रादावुपवनं वर्ण्यते—

विभाति यत्रोपवनं विनिद्रत्सान्द्रद्रुमद्रोणिमिलद्विहङ्गम् ।
भूवास्तुपौलस्त्यपुरीभ्रमेण तामन्वितं चित्ररथं किमेतत् ॥ ८३ ॥

यत्र प्रह्लादनपुरे उपवनं समीपोद्यानं विभाति शोभते । किंभूतम् । विनिद्रन्तो विकस्वरीभवन्तस्तथा सान्द्राः सच्छाया घनपत्रच्छन्ना वा ये द्रुमा वृक्षास्तेषां द्रोणिः श्रेणिः । 'भिल्ली पल्लवशङ्कया विचिनुते सान्द्रद्रुमद्रोणिषु' इति चम्पूकथायाम् । द्रोणिः श्रेणिरिति तट्टिप्पनके । तथा 'द्रोणी तु नीवृति। नौभेदे शैलसंधौ वा' इत्यनेकार्थः। 'द्रोणी द्रोणिरिदन्तः श्रेण्यामपि' इत्यनेकार्थावचूरिः । तत्र मिलन्तो विहङ्गाः पक्षिणो यत्र तत् । किमुत्प्रेक्ष्यते—भुवि पृथिव्यां वास्तु गृहं यस्याः । वास्तुशब्देन गृहमपि। यथा नैषधे—'यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमलेखोत्तरीये' इति । सा पौलस्त्यपुरी धनदनगरी तस्या भ्रमेण शङ्कया तामन्वितमनुपृष्टे समेतं तच्चक्षुर्गोचरतामगच्छत् । चैत्ररथं वैश्रवणोद्यानमिव ॥

आमुष्मिकामैहिकवत्समीहां निर्माहि नः पूरयितुं प्रभूष्णून् ।
विज्ञीप्सवः पार्श्वमितीव यत्र प्राप्ता द्रुमाङ्गा इव कल्पवृक्षाः ॥ ८४ ॥

यत्रोपवने द्रुमा वृक्षास्त एवाङ्गं शरीरं येषां ते कल्पवृक्षाः प्राप्ताः समेताः । उत्प्रेक्ष्यते—पार्श्वे प्रह्लादनपार्श्वनाथमित्यमुना प्रकारेण विज्ञीप्सवो विज्ञापितुं विज्ञप्तिकां कर्तुमिच्छव इव । इति किम् । हे पार्श्वप्रभो, त्वं नोऽस्मानैहिकवत् इहलोकसंबन्धिनीमिव आमुष्मिकां परलोकसंबन्धिनीमपि समीहां वाञ्छां पूरयितुं प्रदातुमर्थात्सुरासुरनराणां प्रभूष्णून् समर्थान् निर्माहि ॥

अथ वने षडृतूनां सत्तां दर्शयति—

श्रीनन्दनं हीरकुमाररूपं यस्यां भविष्यन्तमवेत्य मन्ये ।
साहायकायास्य समं समेत्य सर्वर्तवस्तद्विपिनं भजन्ते ॥ ८५ ॥

सर्वे वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरनामान ऋतवः समयविशेषाः समं समकालं समेत्यागत्य तस्याः पुर्यास्तदेव वा विपिनं वनं भजन्ते सेवन्ते । तत्राहमेवं मन्ये जानामि विचारयामि वा । हीरकुमारस्य रूपं स्वरूपं यस्य तादृशं श्रीनन्दनं कामं यस्यां पुर्यां भविष्यन्तं भावितमवेत्य ज्ञात्वा अस्य स्मरस्य प्राग्वत्साहायकाय सहायककार्यायेव वनं श्रयन्ते ॥ इति समुदायेन सर्वर्तवः ॥

अथ प्रथमं वसन्तऋतुः—

यत्र भ्रमद्भृङ्गरसालमाला विलोक्य कूजत्कलकण्ठबालाः ।
रतीशवीरस्तृणवत्त्रिलोकीमजीगणन्निस्तुलशस्त्रलाभात् ॥ ८६ ॥

यत्र वने भ्रमन्तो मकरन्दपानार्थमितस्ततः पर्यटन्तो भृङ्गा मधुकरा यासु तादृश्यो रसालमालाः सहकारपङ्क्तीर्विलोक्य निस्तुलानामसाधारणानां प्रतिभटकोटीभिरप्यभिभवितुमशक्यानां शस्त्राणामायुधानां लाभात्प्राप्तेः । रतीशवीरः स्मरसुभटस्त्रिलोकीं जगत्त्रयीं तात्स्थ्यात्तद्व्यपदेशान्नाकिनागनागरान् तृणवत्तृणमिव अजीगणत् गणयति स्म मन्यते स्म वा । किंभूता रसालमालाः । कूजन्त्यः पञ्चमध्वनिमुद्भावयन्त्यः कलकण्ठानां कोकिलानां बालाः स्त्रियो यासु ताः ॥

चूतप्ररोहायुधकिंशुकार्धचन्द्राशुगानां दलवर्मितानाम् ।
यद्भूरुहां स्वर्द्रुजयोद्यतानामदुन्दुभीयन्त पिकाः क्वणन्तः ॥ ८७ ॥

स्वर्भूरुहां कल्पवृक्षाणां जयाय पराभवायोद्यतानां प्रगल्भमानानां कृतोद्यमानां यस्य वनस्य भूरुहां तरूणां क्वणन्तः कूजन्तः पिकाः कलकण्ठा अदुन्दुभीयन्त दुन्दुभय इवाचरन्ति स्म । किंभूतानां भूरुहाम् । चूतानां माकन्दानां प्ररोहा अङ्कुरास्त एवायुधानि प्रहरणानि येषां ते तथा किंशुकानि पलाशकुसुमानि तान्येवार्धचन्द्राकारा आशुगा बाणा येषां पश्चात्कर्मधारयः । पुनः किंभूतानाम् । दलैः पत्रैः कृत्वा वर्मितानां संनाहितानां कवचयुक्तीभूतानां तथा दलानि सैन्यानि कर्माणि कवचास्तानि संजातानि एषामिति वा ॥

अथ ग्रीष्मः—

बभे नभस्याम्बुधरायमाणतमालधारागृहधोरणीभिः ।
तपर्तुताम्यत्तनुकुञ्जलक्ष्म्याः सुसीमतायै किमनुष्ठिताभिः ॥ ८८ ॥

नभस्यस्य भाद्रपदस्य अम्बुधरो मेघस्तद्वदाचरन्तीभिस्तमालानां तापिच्छतरूणां धाराभिर्यन्त्रविशेषकृतजलधाराभिरुपलक्षितानां गृहाणां सौधानां धोरणीभिः श्रेणीभिर्बभे रेजे । उत्प्रेक्ष्यते—तपर्तुना ग्रीष्मसमयेन ताम्यन्ती ग्लानिं खेदं वा गच्छन्ती तनुः शरीरं यस्यास्तादृश्याः कुञ्जलक्ष्म्या वनश्रियाः सुसीमतायै शीतलताकृते । 'शीते तुषारः शिशिरः सुसीमः शीतलो जडः । हिमः' इति हैम्याम् । किंभूताभिः । अनुष्ठिताभिः कृताभिरर्थाज्जनैस्तया वा ॥

अथ वर्षा—

श्रीहीरवीक्षोत्सुकिता इवान्तर्नेत्राणि विस्मेरमणीचकानि ।
धाराकदम्बा दधतेऽत्र सत्रा सान्द्रापनिद्रत्कुटजावनीजैः ॥ ८९ ॥

अत्रोपवने धाराभिर्मेघवृष्टिभिराहता आच्छोटिताः कदम्बा नीपद्रुमास्ते विस्मेराणि विकचानि मणीचकानि कुसुमानि दधते धारयन्ति । कथम् । सत्रा सार्धम् । कैः । सान्द्राः स्निग्धा अपनिद्रन्तो विकसन्तो ये कुटजा गिरिमल्लिका एवावनिजा द्रुमास्तैः । इवोत्प्रेक्ष्यते । अन्तश्चित्ते श्रीभिर्युक्तस्य हीरकुमारस्य वीक्षायां दर्शने उत्सुकिता उत्कण्ठिताः सन्तो विनिद्रनेत्राणीव दधते ॥

अथ शरत्—

सप्तच्छदान्स्पर्धितदानगन्धीन्रोलम्बरावाकुलितान्विलोक्य ।
विरोधिकुम्भिभ्रममादधाना धावन्ति मुग्धा इह सिन्धुरेन्द्राः ॥ ९० ॥

इह वने मुग्धा मूर्खा मदोद्धततया किमप्यविदन्तो वा सिन्धुरेन्द्रा गजराजा अभिमुखा धावन्त्यभिमुखं गच्छन्ति । किं कुर्वाणाः । विरोधिकुम्भिनां प्रतिभटगजानां भ्रमं भ्रान्तिं आदधाना बिभ्रतः । किं कृत्वा । सप्तच्छदान् सप्तपर्णद्रुमान् विलोक्य । किंभूतान् ।

स्पर्धितः स्पर्धाविषयीकृतो दानस्य निजमदाम्बुनो गन्धो यैस्तान् । पुनः किंभूतान् । रोलम्बानां भ्रमराणां रावैर्गुञ्जितैराकुलितान् सशब्दान्संजातान् ॥

अथ हेमन्तः—

शाखाविशेषोन्मिषितप्रसूनान्शार्दूलबालानिव लोद्रसालात् ।
दृष्ट्वा हृदुत्पिञ्जलितैर्निकुञ्जे ललङ्घिरे तत्ककुभः कुरङ्गैः ॥ ९१ ॥

निकुञ्जे उपवने नगरोद्याने कुरङ्गैर्मृगैस्तेषां लोद्रद्रुमाणां ककुभो दिशो ललङ्घिरे उल्लङ्घिताः । पलायितैरित्यर्थः । किंभूतैः । हृदि मनसि विषये उत्पिञ्जलत्वं भृशमाकुलत्वं जातं येषां तैः । किं कृत्वा । दृष्ट्वा । कान् । शाखाविशेषेषु शिखाग्रेषु उन्मिषितानि विकसितानि प्रसूनानि पुष्पाणि एषां तथोक्तान् । लोद्रा जातिविशेषा गान्धिकापणेषु प्रसिद्धाः । सालाः पादपास्तान् । कानिव । शार्दूलानां व्याघ्राणाम् । 'शार्दूलो राक्षसान्तरे । व्याघ्रेऽत्र पशुभेदे च सत्तमे तूत्तरस्थितः' इत्यनेकार्थः । बालान् डिम्भानिव ॥

अथ शिशिरः—

पङ्क्तिप्ररूढैः प्रचलत्पतङ्गपोतैः प्रियङ्गुप्रकरैर्बभेऽस्मिन् ।
वनश्रियाः प्रावरणैरिवान्तर्विच्छित्तिमद्भिस्तुहिनद्विषद्भिः ॥ ९२ ॥

अस्मिन् पुरो वने प्रियङ्गुप्रकरैः फलिनीपटलैः बभे । किंभूतैः । पङ्क्त्या श्रेण्या प्ररूढैरुद्गतैः । पुनः किंभूतैः । प्रचलन्तोऽन्तः संचन्तः पतङ्गानां विहङ्गानां पोताः शिशवो येषु ते तैः । उत्प्रेक्ष्यते—वनश्रिया उद्यानलक्ष्म्याः प्रावरणैरिव प्रच्छादनैरिव । पुनः किंभूतैः । विच्छित्तिमद्भिः रचनाञ्चितैः । पुनः किंभूतैः । तुहिनस्य हिमस्य । शीतस्येत्यर्थः । द्विषद्भिः शत्रुभिर्निवारकैः ॥

दृग्दानदासीकृतदेववन्याः प्रगल्भसे त्वं पुरतः कियन्मे ।
वनश्रियाश्चैत्ररथं किमित्थं दन्ता हसन्त्या इव भान्ति कुन्दाः ॥ ९३ ॥

कुन्दा मुचकुन्दतरवो भान्ति शोभन्ते । उत्प्रेक्ष्यते—इत्थममुना प्रकारेण चैत्ररथमलकाकाननं प्रति हसन्त्या पराभूतिगर्भं हास्यं सृजन्त्या वनश्रियाः प्रह्लादनगरोपकाननलक्ष्म्या दन्ता दशना इव । इत्थं कथम् । हे चैत्ररथ, दृग्दानेनैव संमुखावलोकनेनैव दासीकृताः किंकर्यो देवानां वन्यो यावत्काननानि यया । 'स्ववनीसंप्रवदत्पिकापिका' इति नैषधे । तादृश्या मे मम पुरोऽग्रे त्वं कियत् प्रगल्भसे कियन्तमुत्साहं वहसे । मत्पुरस्त्वं न किमपीत्यर्थः ॥

इति षडृतवः ।

क्रीडत्तुरङ्गद्विपपद्मनेत्राः क्रीडासरस्यो विपिने विरेजुः ।
उच्चैःश्रवःस्वर्द्धिरदाप्सरस्काः सुधापयोधेः प्रतिमा इवैताः ॥ ९४ ॥

यस्येति संबन्धः । विपिने क्रीडार्थं सरस्यो महान्ति सरांसि विरेजुर्भान्ति स्म । किंभूताः । क्रीडन्तो जलकेलिं कुर्वन्तस्तुरङ्गा अश्वा द्विपा हस्तिनः पद्मनेत्रा विलासवत्यश्च यासु ताः । इवोत्प्रेक्ष्यते—सुधापयोधेः क्षीरसमुद्रस्यैताः क्रीडासरस्यः प्रतिमाः प्रतिबिम्बानीव । किंभूताः। उच्चैःश्रवा इन्द्राश्वः, स्वर्द्विरद ऐरावतः, अप्सरसः उर्वश्यादयो[1] यासु ताः । सर्वेषां क्षीरसमुद्रसमुत्पन्नत्वेन ॥

मधुप्रधावन्मधुकृन्निरुद्धैर्जाम्बूनदैर्यत्र बभेऽरविन्दैः ।
सरःश्रियामाभरणैरिवान्तःसंदर्भगर्भीभवदश्मगर्भैः ॥ ९५ ॥

यत्र वने जाम्बूनदैः सौवर्णैररविन्दैः कमलैर्बभे बभासे। 'विकसितकनककमलकुवलयोच्छलितरजःपुञ्जपिञ्जरितराजहंसावतंसया' इति चम्पूकथायां स्वर्णकमलसद्भावः। किंभूतैः। मध्वर्थं मकरन्दकृते प्रधावन्तो दूरादाघ्राय त्वरितमागच्छन्तो मधुकृतो भ्रमरास्तैर्निरुद्धैर्व्याप्तैः । उत्प्रेक्ष्यते—सरःश्रियां तटाकलक्ष्मीणामाभरणैर्भूषणैरिव । किंभूतैः । अन्तर्मध्ये संदर्भो विविधरचना येषां तादृशा गर्भीभवन्तः कुक्षौ संपद्यमाना अश्मगर्भा मरकतमणयो येषु तैः ॥

पत्रान्तराजज्जलबिन्दुवृन्दैः सरःसु यस्मिन्स्मितपुण्डरीकैः ।
अदीपि मुक्ताकलितातपत्रैर्नन्दीसरःश्रीजयिनामिवैषाम् ॥ ९६ ॥

यस्मिन् वने सरःसु अर्थादुपवनमध्यस्थक्रीडातडाकेषु स्मितैर्विकसितैः पुण्डरीकैः श्वेतकमलैरदीपि व्यराजि । किंभूतैः । पत्रान्तेषु पलाशप्रान्तेषु राजन्तो झगब्भागिति कान्त्या दीप्यमाना ये बिन्दवः सलिलकणास्तेषां वृन्दानि येषु तैः । इवोत्प्रेक्ष्यते—नन्दीसरःश्रीजयिनां शक्रसरसीलक्ष्मीजित्वराणाम् । 'मघवास्य तु । (अस्येन्द्रस्य) द्विषः पत्नी सुतः' इत्याद्यारभ्य 'हाहादयस्तु गन्धर्वाः' इति यावत्सर्वेऽप्यस्य हरेरिति व्याख्येयमिति हेमचन्द्रहार्दम् । तेनेन्द्रसर इति । एषां सरसां मुक्ताकलितातपत्रैर्मुक्ताजालकयुक्तच्छत्रैरिव ॥ इति वनक्रीडातडाकाः ॥

दृक्कर्णवेणी कलकण्ठकण्ठी बिम्बाधरा सिन्धुरराजयाना ।
प्रसूननेत्रा स्तबकस्तनी च भुक्ता वनश्रीरिह गन्धवाहैः ॥ ९७ ॥

इह स्थाने पुरीबहिःपरिसरे वनश्रीरुद्यानलक्ष्मीर्गन्धवाहैर्भुक्ता विलसिता । अन्यापि स्त्री वने गन्धस्य मृगनाभिचन्दनादिसौरभस्य वाहैर्धारकैर्युवभिर्भुज्यते । किंभूता वनश्रीः स्त्री च । दृक्कर्णा भुजङ्गा एव तत्तुल्या च वेणी कबरी यस्याः सा । पुनः किंभूता । एकोऽपि चकारः सर्वत्रापि योज्यः । कलकण्ठानां कोकिलानां कण्ठो ध्वनिर्यस्याः तत्तुल्यश्च ध्वनिर्यस्याः सा। 'कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे' इत्यनेकार्थः । च पुनः किंभूता। बिम्बं बिल्वं गोह्लकं वा तदेव तत्सदृशश्च अधर ओष्ठो यस्याः । पुनः किंभूता ।

---

१. 'उर्वश्यादय इव प्रतिकृतयः' इति व्याख्येयम्.

सिन्धुरराजानां गजेन्द्राणां यानं गमनं तद्वद्वा गतिर्यस्याः । च पुनः किंभूता । प्रसूनं पुष्पमेव तत्समानं नेत्रं नयनं यस्याः । च पुनः किंभूता । स्तबकौ कुसुमगुच्छौ एव तत्स्वरूपौ स्तनौ कुचौ यस्याः सा ॥ इति प्रह्लादनपुरोपवनवर्णनम् ॥

कम्रेण वप्रेण वसुप्रभेणासतीव यूना सह संसिसृक्षुः ।
दूतीं चिकीर्षुः परिखामिवास्य स्थितानुबिम्बेन निकुञ्जलक्ष्मीः ॥ ९८ ॥

निकुञ्जलक्ष्मीर्वनश्रीरनुबिम्बेन प्रतिबिम्बितेन कृत्वा स्थिता । अर्थात् परिखापयसि तिष्ठति स्म । उत्प्रेक्ष्यते—अस्य पुरस्य परिखां दूतीं संदेशहारिकां स्वेच्छया परदारपुरुषेषु संचारभाजोरभिसारिकयोः पुरुषयोषितोर्मिथः संदेशादीनुक्त्वा दत्त्वा च मिथः संगमकारिकावार्तां चिकीर्षुः कर्तुमिच्छुरिव स्थिता । दूतीकरणे हेतुमाह—वनश्रीः किं कर्तुमिच्छुः । संसिसृक्षुः । सङ्गं कर्तुमिच्छुः । 'निर्वापयिष्यन्निव संसिसृक्षुः' इति नैषधे । केन । वप्रेण प्राकारेण । 'वप्रत्रयं चारुचतुर्मुखाङ्गता' इति हैम्याम् । तथा 'वप्रः प्राकाररोधयोः । क्षेत्रे तते चये रेणौ' इत्यनेकार्थः । किंभूतेन । कम्रेण मनोज्ञेन । 'काम्यं कम्रं कमनीयम्' इति हैम्याम् । वसूनां मणीनां प्रभा कान्तिर्यत्र । केव । असतीव । यथा पांसुला स्त्री केनापि यूना सङ्गं कर्तुकामा कामपि समीपवर्तिनीं दूतीं कर्तुमिच्छन्ती तद्गृहे उपेत्य तिष्ठति । किंभूतेन यूना । कम्रेण स्वकामुकेन । 'कामुकः कमिता कम्रः' इति हैम्याम् । पुनः किंभूतेन । वसुभिर्द्रव्यैः प्रकर्षेण भातीति । 'वसु स्वादौ रत्ने वृद्ध्यौषधे धने' इत्यनेकार्थः ॥

स्वर्जिष्णुपुर्याः परिखाप्लवङ्गरावैरुदस्यात्मतरङ्गहस्तान् ।
अदःपुरस्ते कियती विभूतिर्वस्वोकसारामिति गर्हतीव ॥ ९९ ॥

स्वः स्वर्गस्य जिष्णोर्जयनशीलायाः पुर्याः प्रह्लादननगर्याः परिखा खनिका । उत्प्रेक्ष्यते—आत्मनस्तरङ्गानेव हस्तानुद्यम्य ऊर्ध्वीकृत्य प्लवङ्गरावैर्मण्डूकशब्दैर्वस्वोकसारां धनदनगरीम् । इत्यमुना प्रकारेण गर्हेति निन्दतीव । यददःपुरः अस्या नगर्या अग्रे ते विभूतिः समृद्धिः कियती कियत्प्रमाणा । न किमपीत्यर्थः । इहाखिलेऽपि काव्ये केवलमुत्प्रेक्षैव । अन्यत्र ग्रन्थादावप्येवं क्वापि दृश्यते । यथा नैषधे—'सिन्दूरद्युति मुग्धमूर्धनि धृतस्कन्धावधि श्यामिके व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति । जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसंध्याधियेवास्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः' ॥, 'अविरलमिदमम्भः स्वच्छयोच्छालयन्त्या विकचकमलकान्तोत्तानहस्तद्वयेन । परिकलित इवार्थः कामबाणातिथिभ्यः सलिलमिव वितीर्णे बाल्यलीलासुखाय ॥' इति चम्पूकथायाम् । एवमन्यत्रापि ज्ञेयम् ॥

पिपासितं रोचकितं च रङ्कुं वाः पायितुं चारयितुं च शष्पान् ।
चन्द्रः किमागात्परिखेन्दुबिम्बपश्यैर्व्यमर्शीति जनै रजन्याम् ॥ १०० ॥

परिखायां खातिकाजले इन्दोश्चन्द्रस्य बिम्बं प्रतिबिम्बं पश्यन्तीति परिखेन्दुबिम्ब-

पश्यास्तैर्जैनैर्लोकै रजन्यां रात्रौ इत्यमुना प्रकारेण व्यमर्शि वितर्क्यते स्म । इति किम् । पिपासितं तृषितम् । च पुनः रोचकितं बुभुक्षितम् । 'बुभुक्षायामशनाया जिघत्सा रोचको रुचिः' इति हैम्याम् । रोचकः संजातोऽस्येति रोचकितस्तं रङ्कुमुत्सङ्गमृगं वाः पानीयं पायितुं च पुनः शष्पान्नीलतृणांश्चारायितुम् । किमुत्प्रेक्ष्यते—इह परिखायां चन्द्र आगादिव ॥ इति पुरपरिखा ॥

नभःपरीरम्भणलोलुभैर्यद्वप्रो मणिश्रेणिमहःप्ररोहैः ।
घनान्विनाखण्डलधन्वदण्डमकाण्डमाडम्बरयन्निवास्ते ॥ १०१ ॥

यद्वप्रो यस्य प्रह्लादनपुरस्य वप्रः प्राकार आस्ते वर्तते । उत्प्रेक्ष्यते—मणिश्रेणीनां रत्नराजीनां महःप्ररोहै रोचिरङ्कुरैर्घनान् मेघान्विना । अन्येष्वपि ऋतुषु मेघागमः कालानुभावेन भवत्येव । माघेऽपि मेघस्य दृश्यमानत्वात् । तथा प्रावृट्कालेऽपि कदाचिज्जलधारा भवन्ति न भवन्ति चेति कलियुगे नियमो न दृश्यते, अतः प्रोक्तं प्रावृषं विना मेघानपि विना चेति । अकाण्डं प्रावृषमन्तरेण आखण्डलधन्वदण्डमिन्द्रधनुर्यष्टीमाडम्बरयन् प्रकटयन्निवास्ते । रत्नकान्तिरिन्द्रधनुकारा निर्यान्ति । किंभूतैः प्ररोहैः । नभस आकाशस्य परीरम्भणमालिङ्गनं तत्र लोलुभैर्लालसैः ॥

सालोऽदसीयः ससनातनश्रीः कपाटपक्षश्च सुवर्णकायः ।
विगाहमानो गगनं कथं न लभेत तार्क्ष्येण सदृक्षभावम् ॥ १०२ ॥

अस्याः पुर्या अयमदसीयः।'नासादसीया तिलपुष्पतूणम्' इति नैषधे । सालः प्राकारः तार्क्ष्येण गरुडेन सदृक्षभावं सादृश्यं कथं केन प्रकारेण न लभेत प्राप्नुयात् । अपि तु प्राप्नोत्येवेति । किंभूतः सालो गरुडश्च । सह सनातनया अनश्वरया नित्यस्थायुकया । 'सदा सनानिशं शश्वत्' इति हैमीवचनात् । श्रिया अद्वैतशोभया विष्णुलक्ष्मीभ्यां च वर्तते यः । 'दामोदरः शौरिसनातनौ विधुः' इति हैम्याम् । स च पुनः किंभूतः । कपाटावेव तत्तुल्यौ पक्षौ यस्य सः । स च पुनः किंभूतः । सुवर्णस्य हेम्नः कायोऽङ्गं यस्य स हिरण्मयः । पुनः किं कुर्वाणः । गगनमाकाशमुच्चैस्त्वेन भ्रमणेन च विगाहमानः स्वगोचरीकुर्वाणः ॥

मणीघृणिश्रेणिधुतान्धकारैरभ्रंकषैर्यत्कपिशीर्षकौघैः ।
यानश्वरोदित्वरकर्मसाक्षिलक्षेव पूर्दक्षजनैरलक्षि ॥ १०३ ॥

दक्षजनैर्विदग्धलोकैर्या प्रह्लादनपुरी अनश्वराः शाश्वता उदित्वरा उदयशीलाः कर्मसाक्षिणो भास्करास्तेषां लक्षाः शतसहस्राणि यस्यामेवंविधे वालक्षि दृश्यते स्म । कैः । अभ्रंकषैर्गगनोल्लेखिभिर्यत्कपिशीर्षकाणामट्टालकानामोघैः समूहैः । किंभूतैः । मणीघृणीनां रत्नकान्तीनां श्रेणीभी राजीभिर्धुतानि दलितान्यन्धकाराणि यैः ॥

चन्द्राश्मवेश्मस्मितमुद्वहन्तीं कटाक्षयन्तीं सितकेतनैश्च।
युवेव जायां नगरीमिवैतां क्रोडीकरोति प्रणयेन वप्रः॥ १०४॥

वप्रः प्राकारः प्रणयेन स्नेहेन। 'प्रणयः स्नेहयाच्ञयोः। विस्रम्भे प्रसरेऽपि च' इत्यनेकार्थः। उत्प्रेक्ष्यते—एतां नगरीं क्रोडीकरोति आलिङ्गतीवेत्युत्प्रेक्षा। 'आलिङ्गनं परिष्वङ्गपरीरम्भः क्रोडीकृतिः' इति हैम्याम्। वास्तवार्थे तु मध्येकरोति इत्यर्थः। क इव। युवेव। यथा युवा तरुणः स्नेहेन जायां पत्नीं क्रोडीकरोति परिरम्भते। किंभूतां पुरीं जायां च। चन्द्राश्मवेश्मानि विधुकान्तरत्नघटितगृहाणि तान्येव तत्तुल्यं च स्मितं हसितमुद्वहन्तीं बिभ्रतीम्। पुनः किंभूताम्। सितकेतनैरुज्ज्वलपताकाभिः कृत्वा कटाक्षयन्तीं कटाक्षान्सृजन्तीं मुञ्चन्तीम्। 'कटाक्षाः कृष्णाः श्वेताश्च वर्ण्याः' इति काव्यकल्पलतायाम्॥ इति प्राकारः॥

स्वर्व्यालवेश्मावनिवास्तुशस्तवस्तुव्रजात्मंभरिगर्भगेहैः।
यत्रापणैः कुत्रितयापणानां वंश्यैरिवावाप्यत कापि लक्ष्मीः॥ १०५॥

यत्र पुर्यामापणैर्हट्टैः काप्यनिर्वचनीया लक्ष्मीः शोभा अवाप्यत प्राप्ता। उत्प्रेक्ष्यते—कुत्रितयापणानां कूनां स्वर्गनागलोकभूलोकनाम्नां भूमीनां त्रितयं त्रिकम्। त्रैलोक्यमित्यर्थः। तात्स्थ्यात्तद्व्यपदेशात्त्रिभुवने विद्यमानसकलपदार्थसार्थास्ते मन्त्रतन्त्रादिविधिनाराध्यमानैः पूर्वमित्रैर्वा देवैः संपूर्यते(पण्यन्ते) एष्विति ते कुत्रिकापणास्तेषां वंश्यैः कुलेषूद्भवैरिव। किंभूतैरापणैः। स्वः स्वर्लोके, व्यालवेश्मनि नागलोके पाताले, अवनौ भूमण्डले च वास्तु स्थानं येषां तादृशाः शस्ताः सर्वोत्कृष्टाः प्रशस्या वस्तुव्रजा धनधान्यवस्त्रादिपदार्थसार्थास्तैरात्मंभरयो भृतमध्या गर्भगेहा गर्भागाराणि अपवरकादिस्थानानि येषां तैः। 'कुमुदमकरन्दौघैः कुक्षिंभरिर्भ्रमरोत्करः' इति नैषधे। कुक्षिंभरिर्भृतमध्य इति तद्वृत्तौ॥

बाह्लीककालागुरुगन्धसारसारङ्गनाभीहिमवालुकाभिः।
सद्भिः समाज्ञाभिरिवादसीयापणैरवास्यन्त दिशोऽप्यशेषाः॥ १०६॥

अदसीयापणैः पुरीसंबन्धिभिर्हट्टैरशेषाः समस्ता अपि दिशोऽवास्यन्त सुरभीक्रियन्ते। काभिः। बाह्लिकानि कुङ्कुमानि कालागुरवः काकतुण्डा गन्धसाराश्चन्दनाः सारङ्गनाभ्यः कस्तूरिकाः। कस्तूरीवाच्यपि नाभिशब्दो दीर्घोऽप्यस्ति। यथा नैषधे—'गोरोचनाकुङ्कुमचन्दनैणनाभीविलेपान्पुनरुक्तयन्ति' इति। हिमवालुकाः कर्पूरास्ताभिः। काभिरिव। समाज्ञाभिरिव। यथा—सद्भिरुत्तमैः समाज्ञाभिः स्वकीर्तिभिर्दिशो वास्यन्ते॥

यदापणश्रेणिषु सान्द्रचान्द्रक्षोदेषु गाङ्गास्विव वालुकासु।
मौग्ध्येन नीलैरिव काचगोलैः क्रीडन्ति डिम्भाः स्फुरदिन्द्रनीलैः॥ १०७॥

यदापणश्रेणिषु पुरीविपणिपङ्क्तिषु डिम्भा महेभ्यबालकाः क्रीडन्ति रमन्ते। केषु।

सान्द्रचान्द्रक्षोदेषु स्निग्धेषु निबिडेषु वा कर्पूराणां चूर्णेषु । केन । मौग्ध्येन ज्ञानेन । कास्विव । वालुकास्विव । यथा गाङ्गासु गङ्गासंबन्धिनीषु पुलिनसिकतासु कुमाराः क्रीडन्ति, तथैव घनसारचूर्णेषु रमन्ते इति कर्पूरपारीप्राचुर्यात्तत्क्षोदास्तु बहिः क्षिप्यन्ते । कैः । स्फुरन्तो दीप्यमाना ये इन्द्रनीला नीलमणयो मरकतरत्नानि तैः । कैरिव । काचगोलैरिव । यथा—शिशवः काचानां क्षारमृद्विकाराणां गोलैर्गुटकैः शङ्का इति प्रसिद्धैः खेलन्ति । किंभूतैः । नीलैर्हरिद्वर्णैः । अनेन विशेषणेन मणिरत्नबाहुल्यमपि प्रतिपादितम् ॥ इति हट्टाः ॥

यच्चान्द्रचामीकरवेश्मचन्द्रचण्डार्चिषौ गर्भगताङ्गिरावैः ।
मिथः किमित्युन्नयतोऽभियातिर्जेयः कथं राहुरजय्यवीर्यः ॥ १०८ ॥

यस्याः पुर्याश्चान्द्राणां चन्द्रकान्तमणीनां (चान्द्राणां सौवर्णानाम् ?) । 'चन्द्रोऽम्बुकाम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च' इत्यनेकार्थः । (चामीकराणां सौवर्णानाम्) चन्द्रोपलैः स्वर्णैश्च घटिते क्वापि वेश्मनि गृहे एव चन्द्रचण्डार्चिषौ विधुभास्करौ तौ गर्भे गृहमध्ये गतानां प्राप्तानामङ्गिनां मनुष्याणां रावैर्मिथोवार्तादिशब्दैः मिथः परस्परमित्यमुना प्रकारेण । किमुत्प्रेक्ष्यते—उन्नयतः किमु । विचारयत इव । 'वितर्कः स्यादुन्नयनं परामर्शो विमर्शनम्' इति हैम्याम् । इति किम् । यत् अजय्यं जेतुमशक्यं वीर्यं पराक्रमो यस्य तादृशो राहुरभियातिः शत्रुः । कथं केन प्रकारेण आत्मभ्यामावाभ्यां वा जेयो जेतव्यः । पराभवगोचरीकर्तव्य इति ॥

शशाङ्कबिम्बं कुलिशाङ्गणान्तर्दृष्ट्वा वृणानानिह मुग्धडिम्भान् ।
विलोभ्य केलीकलहंसबालैराश्वासयन्ति स्म कथंचिदम्बाः ॥ १०९ ॥

इह पुरि मुग्धानविदग्धान् डिम्भान् बालकान् केलीकृते क्रीडार्थम् । 'नित्योद्योतपदं समस्तकमलाकेलीगृहं राजते' इति पूर्वाचार्यप्रणीतचिन्तामणिपार्श्वनाथस्तोत्रे । रक्षिता ये राजहंसबालकास्तैर्विलोभ्य लोभयित्वा अम्बा जनन्यः कथंचिन्महता कष्टेन आश्वासयन्ति । किंकुर्वाणान्बालान् । वृणानान् याचमानान् । किं कृत्वा । दृष्ट्वा प्रेक्ष्य । किम् । शशाङ्कबिम्बं चन्द्रबिम्बम् । क । कुलिशैर्हीरकैर्बद्धानाम् । 'शुचीमुखं तु हीरकः । वराटकं रत्नमुख्यं वज्रपर्यायनाम च' इति हैम्याम् । बद्धानां निर्मितानामङ्गणानां गृहाजिराणामन्तर्मध्ये ॥

चन्द्रोदये चन्दिरकान्तगर्भसंदर्भश्रृङ्गस्रवदम्बुपूरैः ।
शिरःस्फुरत्सिद्धधुनी धरेन्द्रो यत्रानुचक्रे कलधौतसौधैः ॥ ११० ॥

यत्र पुरे चन्द्रोदये विधोरभ्युद्गमकाले कलधौतसौधै रूप्यमन्दिरैः शिरसि मस्तके स्फुरन्ती प्रसरन्ती वहन्ती वा सिद्धधुनी गङ्गा यस्य तादृशो धराणां पर्वतानामिन्द्रो राजा

१. समासान्तविधेरनित्यत्वेन निर्वोढव्यम्.

हिमाचलः । 'अद्रिराण्मेनकाप्राणेशो हिमवान्' इति हैम्याम् । अनुचक्रे सदृशीकृतः । किंभूतैः सौधैः । चन्दिरकान्तानां चन्द्रोपलानाम् । चन्दिर इति चन्द्रमाः शेषनाममालायाम्, अन्येष्वपि ग्रन्थेषु दृश्यते । गर्भे मध्ये संदर्भो रचना येषां तादृशेभ्यः शृङ्गेभ्यः स्रवन्तो निःसरन्तोऽम्बुपूराः पयःप्रवाहा येषु तैः ॥

वातातिवेल्लद्ध्वजपल्लवाग्रकरेण रावेण च किङ्किणीनाम् ।
या वैभवस्पर्धितया मघोनः पुरीं स्मयादाह्वयतीव योद्धुम् ॥ १११ ॥

या नगरी वैभवेन स्वलक्ष्म्या सार्धं स्पर्धितया संहर्षिभावेन मघोनः शक्रस्य पुरीममरावतीं स्मयादहंकाराद्योद्धुं संग्रामं कर्तुम् । उत्प्रेक्ष्यते—आह्वयत्याकारयतीव । केन । वातेन वायुना अत्यतिशयेन वेल्लन्तश्चञ्चलीभवन्तो ये ध्वजपल्लवाः पताकावस्त्राणि तेषामग्रः स एव करो हस्तस्तेन । च पुनः केन । किङ्किणीनां क्षुद्रघण्टिकानां रावेण शब्देन ॥

श्रीवत्सरामाङ्गजकम्बुतार्क्ष्यचक्राङ्कितैर्मारकितैर्निकेतैः ।
जज्ञे मुकुन्दैरिव यत्र चित्रमेतत्परं धेनुकमद्विषद्भिः ॥ ११२ ॥

यत्र मरकतानामिमानि मारकतानि अश्मगर्भसंबन्धीनि तैर्निकेतैर्गृहैः । 'शङ्के स्वसंकेतनिकेतमाप्ताः' इति नैषधे । मुकुन्दैः कृष्णैरिव जज्ञे जातम् । अत्र बहुवचनं बहुवासुदेवापेक्षया, महत्त्वख्यापनार्थं वा । यथा च जिनशतके—'यत्क्रमाश्चक्रिणो वा' इति । किंभूतैर्गृहैः कृष्णैश्च । श्रीर्लक्ष्मीः, वत्सास्तर्णकाः, श्रीवत्सो हृदयचिह्नम् । उत्तमपुरुषाणां वक्षसि लक्षणविशेषः । रामाः स्त्रियः, रामो बलभद्रश्च । अङ्गजा नन्दनाः, अङ्गजः कामश्च । कम्बवः शङ्खाः, कम्बुः पाञ्चजन्यः । गृहेषु कम्बवो दृश्यन्ते । यथा नैषधे—'बहुकम्बुमणिर्वराटिका–' इति । तार्क्ष्या अश्वाः, तार्क्ष्यो गरुडश्च । तेषां चक्राणि समूहाः, चक्रं सुदर्शनं च । तैरङ्कितैः सहितैः । परं केवलमिदं चित्रमाश्चर्यम् । यन्निकेतैर्धेनुकं धेनुसमूहो गोकुलमद्विषद्भिः पालयद्भिः । 'धेनूनां धेनुकं धेन्वन्तानां गोधेनुकादयः' इति हैम्याम् । कृष्णैस्तु धेनुकनामा असुरस्तं द्विषद्भिर्द्रुह्यद्भिस्तस्य द्विषद्भिः शत्रुभिर्वा घातुकैः ॥

एतज्जगज्जित्वरलक्ष्मिवीक्षाक्षणोदितादै(द्भू)तकुतूहलेन ।
शङ्के त्रिदश्यः स्तिमितीभवन्त्यो विभान्ति यद्वेश्मसु शालभञ्ज्यः ॥ ११३॥

यद्वेश्मसु पुरीमन्दिरेषु शालभञ्ज्यः पुत्रिका विभान्ति । तत्रैवं शङ्के मन्ये । एतस्याः पुर्या जगतां त्रिभुवनपुरीणां जित्वर्या जयनशीलाया लक्ष्म्याः वीक्षा विलोकनं स एव क्षण उत्सवस्तेनोदितमुद्भूतं यत्कुतूहलं कौतुकं तेन स्तिमितीभवन्त्यो निश्चला जायमानास्त्रिदश्यो देव्य इव । लक्ष्मीशब्दः समासमध्ये ह्रस्वोऽप्यायाति । यथा ऋषभनम्रस्तवे—'वरणलक्ष्मिकरग्रहणोत्सवे' इति ॥

विष्णोर्निहन्तुं नरकं गतस्यौत्सुक्यात्क्रमान्निर्गलितेव गङ्गा ।
ज्यौत्स्नीषु यच्चान्द्रगृहच्युताम्भोधारा भुवं भूषयति स्म यस्मिन् ॥ ११४ ॥

यस्मिन् पुरे ज्यौत्स्नीषु पूर्णिमारात्रिषु यस्य पुरस्य चान्द्रगृहेभ्यः चन्द्रकान्तमणिनिर्मितमन्दिरेभ्यश्च्युतानां चन्द्रकिरणसंपर्केण निःसृतानामम्भसां पानीयानां धारा प्रवाहः । 'प्रवाहः पुनरोघः स्याद्वेणी धारा रयश्च सः' इति हैम्याम् । भुवं भूमीं भूषयति स्म अलंकुरुते स्म । उत्प्रेक्ष्यते—औत्सुक्याद्रभसान्नरकं नरकनामानं दैत्यमसुरं निहन्तुं गतस्य विष्णोः कृष्णस्य क्रमाच्चरणात् निर्गलिता निर्गत्य पतिता। 'विदत्यसव्ये मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे' इति नैषधे । गङ्गा भूमीमभ्येतीव ॥

ज्योतिस्तरङ्गीकृतयन्निकेतहरिन्मणीशालिशिखा चकासे ।
इदंपदव्येव पतङ्गपुत्री नभः प्रयान्ती मिलितुं स्वतातम् ॥ ११५ ॥

ज्योतिर्भिः कान्तिभिस्तरङ्गीकृतानां कल्लोलयुक्तीकृतानां यन्निकेतानां नगरीगृहाणां हरिन्मणीभिर्नीलरत्नैः शालते शोभते इत्येवंशीला शालिनी शिखा उपरितनप्रदेशः चकासे शुशुभे दिदीपे वा । उत्प्रेक्ष्यते—इदंपदव्या एतन्नगरं मन्दिरशिखरमार्गेण । 'इदंयशांसि द्विषतः सुधामुचे' इति नैषधे । 'अस्य कीर्तयः' इति तद्वृत्तौ । समासान्त एव इदंशब्दः । स्वतातं भास्करम् । 'सूर्यजा यमी' इति हैम्याम् । तथा 'यावद्गङ्गा तपनतनयाभारतीनां समाजे' इति पूर्वकविकृतौ । मिलितुं प्रयान्ती गच्छन्ती पतङ्गपुत्री यमुनेव ॥

गाङ्गेयगारुत्मतपद्मरागचन्द्राश्मवेश्मावलिरुल्ललास ।
प्रेयांसमुद्दिश्य महीमहेन्द्रं पुरश्रिया क्लृप्त इवाङ्गरागः ॥ ११६ ॥

गाङ्गेयानि सुवर्णानि, गारुत्मतानि हिरण्मणयः, पद्मरागा रक्तोपलाः, चन्द्राश्मानः शशिकान्तमणयः । तैर्निबद्धा घटिता वेश्मावलिः सौधश्रेणिरुल्ललास स्फुरति स्म । उत्प्रेक्ष्यते—महीमहेन्द्रं भूमीवासवं राजानं स्वप्रेयांसं निजकान्तं प्रत्युद्दिश्य पुरश्रिया नगरलक्ष्म्या अङ्गरागो विलेपनं क्लृप्तो रचितः । अन्यापि स्त्री भर्त्रा सङ्गं चिकीर्षुर्वपुष्यङ्गरागं कुरुते ॥

वेश्माश्मगर्भाङ्कसिताश्मकुम्भं निभाल्य मुग्धाभ्रधुनीरथाङ्ग्यः ।
शशी स विश्लेषयिता द्विषन्नः क्रुधेति तं घ्नन्ति किमङ्घ्रिघातैः ॥ ११७ ॥

यस्येति संबन्धात् । वेश्मनि क्वापि नगरीगृहे अश्मगर्भाणां मरकतमणिनामङ्को मध्यो यस्य तादृशं सिताश्मनां स्फटिकरत्नानां कुम्भं कलशं निभाल्य दृष्ट्वा मुग्धा अचतुरा अभ्रधुन्या गगनापगाया आकाशगङ्गायाः रथाङ्ग्यश्चक्रवाक्योऽङ्घ्रीणां पदानां घातैः प्रहारैः घ्नन्ति प्रहरन्ति । किमुत्प्रेक्ष्यते—इति क्रुधा घ्नन्ति । इति किम्—यत् नोऽस्माकं द्विषन्नहितः अत एव विश्लेषयिता वियोगकारकः स प्रसिद्धः शशी मृगाङ्क इति रुषा ॥

अर्कांशुसंपर्कचयार्ककान्तोद्भूतानलोमावनसंनिभस्य ।
गेहाग्रशृङ्गस्थगजद्विषद्भिर्द्वेष्यैरघृष्यस्य कथंचनापि ॥ ११८ ॥

भियाभ्रमूवल्लभवाहनारेः प्रणश्य शङ्के शरणं श्रयन्तः ।
लघूभवन्मन्दरमुख्यशैलाः पुरस्य रेजुर्मणिहेमगेहाः ॥ ११९ ॥

पुरस्य मणिहेममया गेहाः सौधा रेजुर्भान्ति स्म । तत्रैवमहं शङ्के विचारयामि । अभ्रमूनामा हस्तिनी । अभ्रमूशब्दो दीर्घोकारान्तोऽप्यस्ति । 'गजानामभ्रमूपतिः' इति काव्यकल्पलतायाम् । तथा 'अभ्रमूवल्लभारूढम्' इति पाण्डवचरित्रेऽपि । तस्या वल्लभो भर्ता ऐरावणः स एव वाहनं यानं यस्येन्द्रस्य स एवारिः शत्रुस्तस्य भिया भयेन प्रणश्य स्वस्थानान्नंष्ट्वा पुरस्य शरणमाश्रयन्तो भजन्तस्तथा लघूभवन्तः स्वल्पतनवः संपद्यमाना मन्दरमुख्याः । मन्दरो जैनमते मेरुः । शैवशासने तु मन्दरोऽन्य इन्द्रकीलनामा मन्था नगः स एव प्रधानं येषु ते शैलाः पर्वता इव । इह पुरे शत्रुप्रवेशाभावे कारणद्वयमाह—किंभूतस्य पुरस्य । अर्कस्य भानोरंशवः किरणास्तेषां संपर्कः संगमस्तेन चयस्य वप्रस्य प्राकारपीठभूमिकासंदृब्धेभ्योऽर्ककान्तेभ्यः सूर्यकान्तमणिभ्य उद्भूतः प्रकटीभूतो योऽनलो वह्निस्तेनोमावनसंनिभस्य बाणासुरपुरसदृशस्य । तत्र हि वह्निप्राकारोऽस्तीति ख्यातिः । तथा 'यथोह्यमानः खलु भोगिभोजिना प्रसह्य वैरोचनिपुत्रपत्तनम् । विदर्भजाया मदनस्तथा मनोऽनलावरुद्धं वयसैव वेशितः ॥' इति नैषधे । एतत्काव्योपरि पुरावृत्तमुच्यते—पूर्वं हि स्त्रीकार्यादन्यत्राजेयो भावीत्याराद्धगौरीपतिसुपर्वदत्तवरस्य बाणासुरस्य उषानाम्न्या कन्यया गौरीं कुलदेवीमाराध्य मम को भर्ता भविष्यतीति प्रश्ने कृते प्रद्युम्ननन्दनोऽनिरुद्धो भावीति गौर्या प्रोक्ते कथंचित्कुमारिकया स आनाय्य परिणीतः । तामादाय गच्छन्तं ज्ञातव्यतिकरो बाणस्तं निर्जित्य नागपाशैर्बद्धवान् । तत उषया कृष्णप्रद्युम्नादयः तद्वाचिकं विज्ञापिताः । ततः कृष्णरामप्रद्युम्ना गरुडमारुह्य पावकप्राकारेऽपि बाणपुरे गत्वा हरिर्बाणासुरं शतखण्डीकृत्योषायुक्तमनिरुद्धमादाय द्वारिकायामगादिति । पुनः किंभूतस्य । गेहानां पुरसौधानामग्रश्ङ्गाणि उपरितनशिखराणि तेषु तिष्ठन्तीति तत्स्था गजद्विषन्तः सिंहास्तैः । पुरमन्दिरेष्वपि केसरिणां सद्भावो यथा—'यदनेककसौधकंधरा हरिभिः कुक्षिगतीकृता इव' इति नैषधे । कथंचनापि महता प्रयासेनापि द्विष्यैर्वैरिभिरधृष्यस्यानाकलनीयस्य । गजयानस्य हि सिंहाङ्कितमार्गे समागमनमशक्यम् । कृशानौ तु सर्वथा प्रवेशोऽपि न स्यादत एतत्पुराश्रयणं शत्रुभयाभावात् ॥ युग्मम् ॥

बालारुणज्योतिरखर्वगर्वनिर्वासिमाणिक्यनिकाय्यकोटिः ।
व्यक्तीभवन्भात्यनुभूपकान्तं पुरश्रियोद्गीर्ण इवानुरागः ॥ १२० ॥

बालारुणस्याभ्युदयद्भानोर्ज्योतिषां कान्तीनामखर्वमतिशयितं गर्वमहंकारं निर्वासयन्ति निष्कासयन्ति निर्नाशयन्तीत्येवंशीलानि यानि माणिक्यानि पद्मरागमणयः निकाय्यानां तन्मयानां गृहाणां कोटिर्विभाति शोभते । क्वापि माणिक्यशब्देन केवलरत्नमेव । कुत्रापि माणिक्यशब्देन पद्मरागमणयः । 'रत्नं वसु मणिर्माणिक्यमपि' इति हैमीवृत्तौ । 'आघ्रातं परिचुम्बितं परिमुहुर्लीढं च यच्चर्वितं यद्दूरं निहितं च नीरसतया तत्र व्यथां

मा कृथाः । अन्तस्तत्त्वविचारणान्धबधिरे तद्दानरेणाधुना रे माणिक्य तदेतदेव सुकृतं यच्चूर्णितं नाश्मना ॥' इत्यत्र केवलमाणिक्यमेव । 'शिशुतरमहोमाणिक्यानामहर्मणिमण्डली' इति नैषधे । प्रत्यग्रकिरणपद्मरागाणामिति तद्वृत्तिः । उत्प्रेक्ष्यते—भूपं नृपतिं भर्तारमनुलक्षीकृत्य पुरश्रिया उद्गीर्णा अत एव प्रकटीभवन् प्रकटो जायमानः अनुराग इव ॥

प्रीतादुपास्त्याधिगता गिरीशान्निरङ्कनैकाङ्गविधानविद्या ।
प्रपञ्चिता कौतुकिना किमेषा चन्द्रेण यच्चान्द्रगृहच्छलेन ॥ १२१ ॥

कौतुकिना कुतूहलाकलितेन चन्द्रेण एषा प्रत्यक्षलक्ष्या । निर्गतोऽङ्को लक्ष्म येभ्यस्तानि नैकानि बहूनि यान्यङ्गानि शरीराणि तेषां विधानं निर्माणं यस्यां तादृशी विद्या । यस्या नगर्याश्चान्द्रगृहाणां चन्द्रकान्तमणिमयमन्दिराणां छलेन कपटेन । किमुत्प्रेक्ष्यते—प्रपञ्चिता विस्तारिता । किंभूता विद्या । अधिगता प्राप्ता । कस्मात् । गिरीशादीश्वरात् । किंभूतात् । उपास्त्या नित्यसेवया प्रीतात् । प्रसन्नीभूतादित्यर्थः । संतुष्टात् ॥ इति गृहाः॥

यस्मिन्दिदीपे मधुदीपरूपश्रीगर्वनिर्वासिविलासिवृन्दैः ।
रूपस्मयं वीक्ष्य जयस्य तस्य मदच्छिदे किं विधिना प्रणीतैः ॥१२२॥

यस्मिन् पुरे मधुदीपस्य मदनस्य रूपश्रिया शरीरसौन्दर्यलक्ष्म्या गर्वमभिमानं निर्वासयन्ति निर्दलयन्तीत्येवंशीला ये विलासिनो भोगिनस्तेषां वृन्दानि तैर्दिदीपे चकासे । 'मधुदीपमारौ मधुसारथिस्मरौ' इति हैम्याम् । किमुत्प्रेक्ष्यते—जयस्येन्द्रपुत्रस्य रूपस्मयं निजाङ्गचङ्गिमगर्वं वीक्ष्य दृष्ट्वा तस्य जयन्तस्य मदच्छिदे उन्मत्ततोच्छित्यै विधिना धात्रा कृतैः प्रणीतैरिव ॥

मेरोः शिखाग्रावसथव्यथाभिरुत्तीर्य सातस्थितिमीहमानाः ।
यस्मिन्समेताः किमु नाकिशाखिव्रजा वदान्या व्यलसन्युवानः ॥१२३॥

यस्मिन् युवानस्तरुणा व्यलसन् शुशुभिरे । किंभूताः । वदान्या दानशीला दानशौण्डा वा । किमुत्प्रेक्ष्यते—शिखाग्रे शिखरोपरि य आवसथो वसतिः स्थानं वासस्तेनोद्भवन्तीभिः प्रकटाभिर्जायमानाभिर्व्यथाभिरर्तिभिः कृत्वा मेरोः काञ्चनाचलादवतीर्य भूमीमण्डले समेत्य सातस्थितिं सुखनिवासमीहमाना इच्छन्तो नाकिनां शाखिनो देवतरवः कल्पद्रुमास्तेषां व्रजा गणा यस्मिन् समेता इव संगता इव ॥

जितस्मरान्पौरजनान्निपीय मा तद्वृषस्यन्त्यसती सती स्तात् ।
इतीव योषावपुषा स्ववर्ष्म द्विषा मखस्य व्यतिसीव्यते स्म ॥ १२४ ॥

मखनाम्नो दैत्यस्य द्विषा वैरिणा शंभुना । उत्प्रेक्ष्यते—इति हेतोर्योषावपुषा पार्वतीशरीरेण समं स्ववर्ष्म निजशरीरं व्यतिसीव्यते स्म परस्परं स्यूतं योज्यते स्म । इति किम् । यत् जितो रूपाभिभूतः स्मरः कामो यैस्तादृशान् पौरजनान् नगरतरुणान् निपीय सादरमवलोक्य सती पार्वती तद्वृषस्यन्ती रागोद्रेकात् कामातुरा तेषां कामुकी भवन्ती सती सती असती व्यभिचारिणी मा स्तात् भवतात् ॥ इति नागराः ॥

यस्मिन्विभान्ति स्म विलासवत्यः स्मरावरोधभ्रममुद्वहन्त्यः ।
किं शक्तयो मन्मथमेदिनीन्दोरमूरमोघास्त्रिजगद्विजेतुः ॥ १२५ ॥

यस्मिन् पुरे विलासवत्यः प्रमदा विभान्ति । किं कुर्वन्त्यः । स्मरावरोधः कन्दर्पान्तः-पुरं रतिस्तस्य भ्रमं भ्रान्तिम् । 'स्मरावरोधभ्रममावहन्ती' इति नैषधे दमयन्तीवर्णने । उद्व-हन्त्यो बिभ्रत्यः । किमुत्प्रेक्ष्यते—मन्मथमेदिनीन्दोर्मदननरेन्द्रस्य अमूः प्रत्यक्षाश्चक्षुर्लक्ष्या अमोघा अवन्ध्याः सफलाः शक्तयः प्रहरणविशेषाः । किंभूतस्य मन्मथस्य । त्रिजगतस्त्रि-भुवनस्यापि विजेतुः पराभवशीलस्य ॥

त्यक्ताश्रवःकञ्चुकिकामुकाभिः सकर्णयन्नागरराागिणीभिः ।
स्वमन्दिरात्कुण्डलिनीभिरस्मिन्किमीयुषीभिः शुशुभेऽङ्गनाभिः ॥१२६॥

अस्मिन् नगरे अङ्गनाभिः शुशुभे । किमुत्प्रेक्ष्यते—स्वमन्दिरान्निजनिकेतनान्नागलो-कादीयुषीभिरागताभिः कुण्डलिनीभिर्नागाङ्गनाभिरिव । किंभूताभिः । त्यक्ता उज्झिता अश्रवसः । अकर्णाबधिरा इत्यर्थः । कञ्चुकिनः सौविदल्लाः । कुब्जवामना इत्यर्थः । अथवा कृत्रिमक्लीबाः कामुकाः कामयितारः कान्ता याभिस्ताभिः । पुनः किंभूताभिः । सकर्णाः प्राज्ञाः श्रोतारो वा यस्याः पुर्या नागराश्छेकास्तेषु रागः स्नेहातिशयो विद्यते यासां तास्ताभिः । तेष्वनुरागयुक्ताभिरित्यर्थः ॥

भान्ति स्म यस्मिन्सुमनोभिरामा रामा रमाधःकृतकामरामाः ।
स्वस्पर्धिनं येन रुषेव देवगृहं निगृह्याप्सरसो गृहीताः ॥ १२७ ॥

यस्मिन् नगरे रामा नागर्यो भान्ति स्म । किंभूताः । सुमनोभिः कुसुममालिकाभिः, अथवा सुमनस्त्वेन सतीत्वेन निष्पापत्वेन वा अभिरामा मनोहराः । पुनः किंभूताः । रमाभिः वपुःप्रियरूपकसुषमाभिरधःकृते हीने विहिते तिरस्कृते कामस्य मदनस्य रामे रतिप्रीती याभिस्ताः । इवोत्प्रेक्ष्यते—येन प्रह्लादपुरेण रुषा क्रुधा स्वस्पर्धिनं निजसमृद्ध्या सार्धं स्पर्धाविधायिनं देवगृहं स्वर्गं निगृह्य पराजित्य वन्दीकृत्य गृहीता अप्सरसः स्वर्गवध्व इव॥

किमग्रदूत्यो मदनावनीन्दोः सख्योऽथ वा स्वर्वरवर्णिनीनाम् ।
भुजंगमीनां किमुतानुवादा यत्राब्जनेत्रा मदयन्ति चेतः ॥ १२८ ॥

यत्र पुरे अब्जनेत्राः कमललोचनाः सुदृशः चेतः अर्थाद्यूनां मनः मदयन्ति उन्मा-दयुक्तं कुर्वन्ति । किमुत्प्रेक्ष्यते—मदनावनीन्दोः स्मरराजस्य किम् अग्रदूत्यः प्रथमसंदेश-हारिका इव । अथ वा स्वः स्वर्गस्य वरवर्णिनीनां प्रधानस्त्रीणां रम्भाघृताचीतिलोत्तमा-प्रमुखाणाम् अथवा पौलोमीप्रभृतीनां सख्यो वयस्यः किमु । उत पुनः । भुजंगमीनां नागाङ्गनानामनुवादा अनुकारा इव ॥ इति नागर्यः ॥

इति प्रल्हादपुरवर्णनम् ।

तत्रास्ति भूमान्महमुन्दनामा स्थामैकभूर्भूवलयैकवीरः ।
वधूर्नवोढेव दिने दिने भूः श्रियं दधौ यत्करपीडितापि ॥ १२९ ॥

तत्र देशे महमुन्द इति नामाभिधानं यस्य तादृशो भूमान् पातिसाहिरिति म्लेच्छवंशप्रसिद्धमधिपतिनाम । सोऽस्ति तत्समयानुसारेण बभूव । किंभूतः । स्थाम्नां पराक्रमाणामेकाद्वितीया भूः स्थानम् । पुनः किंभूतः । भूवलयस्य भूमण्डले वा एकोऽसाधारणो वीरः सुभटः । स कः । यस्य करेण राजदेयांशेन पीडिता संयुक्ता जाता भूर्वसुधा दिने दिने श्रियं लक्ष्मीं धनधान्यादिकां दधौ धारयति स्म अनेकलक्ष्मीवती भवति स्म । केव । वधूरिव । यथा नवोढा नवपरिणीता वधूर्वशा करेण पीडिता आश्लेषणादिकं नीता सती दिने दिने श्रियं शरीरोपचयलक्षणां शोभां धत्ते ॥

प्रजां द्विजिह्वैरिव पीड्यमानां कलेर्विलासैरवसाय विश्वाम् ।
तां शासितुं दाशरथिः किमात्तजन्मा स्वयं साहिरसौ बभासे ॥१३०॥

असौ महमुन्दनामा साहिः पातिसाहिः बभासे राजते स्म । किमुत्प्रेक्ष्यते—तां विश्वां वसुधां शासितुं पालयितुं स्वयमात्मना पुनर्द्वितीयवारमात्तजन्मा गृहीतावतारो दाशरथी राम इव । किं कृत्वा । अवसाय विज्ञाय । काम् । विश्वां पृथ्वीम् । किं क्रियमाणाम् । कलेः कलियुगस्य विलासैर्विलसितैः पीड्यमानां संताप्यमानाम् । कामिव । प्रजामिव । यथा प्रजां प्रकृतिं पुरदेशलोकां द्विजिह्वैः पिशुनैः पीड्यमानाः कश्चित्प्रशास्ति ॥

निस्त्रिंश[1]मन्थानगमथ्यमानमहाहवक्षीरधिजन्मना यः ।
वव्रे बलिध्वंसविधानधुर्यो जयश्रिया शत्रुरिवासुराणाम् ॥ १३१ ॥

यः साहिर्जयश्रिया विजयलक्ष्म्या वव्रे वृतः । क इव । असुराणां शत्रुरिव । यथा कृष्णो जयेनोपलक्षितया श्रिया व्रियते । किंभूतः । यः बलिनां बलवताम् । बलं सैन्ये पराक्रमे च । रिपुनृपाणां बलेर्दैत्यस्य ध्वंसविधानं वधकरणं तत्र धुर्यः समर्थः शत्रुवधविधायिनां धुरि गण्यः । किंभूतया जयश्रिया । निस्त्रिंशः खड्गः स एव मन्थानगः मन्दराद्रिः । 'मन्थानगः स भुजगप्रभुवेष्टिघृष्टिलेखाचलद्धवलनिर्झरवारिधारः' इति नैषधे । वासुकेर्वेष्टनघर्षणजातासु लेखासु भ्रमन्त्यो धवला निर्झरवारिधारा यस्य स मन्थाः । मथिन्शब्दस्य 'पथिमथ्यृभुक्षामात्' इत्यात्वे थेन्थदेशे रूपम् । नगः शैलः मन्दराद्रिः—इति तद्वृत्तिः । तेन मथ्यमानो विलोड्यमानो यो महाहवो महासंग्रामः स एव क्षीरधिः दुग्धसमुद्रः तस्माज्जन्मोत्पत्तिर्यस्याः सा तया ॥

अश्यामितास्यं कमलातिदानैर्जितैः प्रसत्तिप्रणिनीषयास्य ।
अभ्रैरिवाभ्राद्भुवमभ्युपेतैर्यद्भूभुजो गन्धगजैर्विरेजे ॥ १३२ ॥

यस्य भूभुजः साहेर्गन्धगजैः गन्धोपलक्षितैः सिन्धुरैः विरेजे शुशुभे । उत्प्रेक्ष्यते—अभ्रादाकाशाद्भुवं भूमीमभ्युपेतैः समागतैर्भूमीमभिलक्षीकृत्य । 'अभिरभागे' भागवर्वर्जितेऽर्थेऽभिः

---

१. 'मन्थानग' इत्यस्य समासघटकत्वेन सुपरत्वाभावादात्वानुपपत्तेश्चिन्त्यमेतत्. नैषधे तु समासाभावान्न कोऽपि दोषः.

कर्मप्रवचनीयः स्यात्तत्र द्वितीया । हरिमभीति प्रक्रियायाम् । पृथिव्यामायातैरभ्रैर्मेघैरिव। कया । अस्य भूभुजः प्रसत्तेः प्रसादस्य प्रणिनीषया कर्तुमिच्छया । किमभ्रैः । जितैरभिभूतैः । कैः । कमलानां लक्ष्मीनामुत्सर्गपयसां च दानैर्विश्राणनैः । कथम् । अश्यामितास्यमुज्ज्वलीकृतं वक्त्रं यत्रैवंविधं यथा स्यात्तथा ॥

अजय्यवीर्यं निजनिर्जयायोद्यतं यमालोक्य विपक्षलक्षैः ।
स्वक्षत्रवृत्तीरपहाय भेजे क्षेत्रस्य वृत्तिः कृषिकैरिवात्र ॥ १३३ ॥

अत्र भुवि विपक्षाणां साहिशत्रूणां लक्षैः स्वस्यात्मनः क्षत्रवृत्तीः क्षत्रियत्वेन या आजीविकाः। 'क्षत्रं तु क्षत्रियो राजा' इति हैम्याम् । ता अपहाय साहितः स्वमारणभीतेस्त्यक्त्वा क्षेत्रस्य केदारस्य वृत्तिर्जीवनं भेजे सिषेवे । कैरिव । कृषिकैरिव । यथा कृषिकारकैः क्षेत्रवृत्तिर्विधीयते । किं कृत्वा । निजस्यात्मनो निर्जयायाभिभवायोद्यतं प्रगल्भीभूतम्, तथा अजय्यं जेतुमशक्यं वीर्यं पराक्रमो यस्य तादृशं पातिसाहिमालोक्य दृष्ट्वा ॥

जम्बालयद्भिर्जलदैरिवोर्वीं मदाम्बुभिर्यस्य बभे द्विपेन्द्रैः ।
दिग्जैत्रयात्रासु जितैर्दिगीशैर्दिग्वारणेन्द्रैरुपदीकृतैः किम् ॥ १३४ ॥

यस्य साहेर्द्विपेन्द्रैर्गजराजैर्बभे व्यराजि । किं कुर्वद्भिः । जम्बालान्कुर्वन्तीति जम्बालयन्ति, जम्बालयन्तीति जम्बालयन्तः, तैर्जम्बालयुक्ता विदधद्भिः। काम् । उर्वीं पृथ्वीम्। कैः। मदाम्बुभिः दानवारिभिः । कैरिव । जलदैरिव । यथा मेघैर्भूर्जम्बालकलिता क्रियते । किमुत्प्रेक्ष्यते—दिशां हरितां जैत्रीषु जयनशीलासु यात्रासु अभिषेणनेषु । सेनासमुदायेन रिपून् प्रत्यभिगमनेष्वित्यर्थः । जितैः स्ववशीकृतैर्दिगीशैर्दिग्यतिभिरुपदीकृतैर्ढौकितैर्दिग्वारणेन्द्रैर्दिग्गजैरिव ॥

विश्वैकधन्वी शरसान्नृपोऽसौ मा क्वापि कुर्यात्परराजवन्माम् ।
जिजीविषुर्भीत इतीव राजा नभो भ्रमीगोचरयांचकार ॥ १३५ ॥

राजा चन्द्रो नभो गगनं भ्रमण्या भ्रान्तेः । 'अपि भ्रमीभङ्गिभिरावृताङ्गम्' इति नैषधे। गोचरीकरोति स्म गोचरयांचकार । नभसि बभ्रामेत्यर्थः । राजा किं कर्तुमिच्छुः । जीजीविषुः साहेः सकाशाज्जीवितुमिच्छुः । इवोत्प्रेक्ष्यते—इत्यमुना प्रकारेण भीतश्चकित इव। इति किम् । विश्वे जगति पार्थ इवैकोऽद्वितीयो धन्वी धनुर्धरोऽसौ नृपः, परे शत्रवः, अन्ये च ये राजानस्तानिव मां राजानं शरसाद्बाणविद्धम्। 'प्रसूनधन्वा शरसात्करोति माम्' इति नैषधे । मा कुर्यात् । यथा साहिः विपक्षक्षितिपान्बाणैर्विध्यति तथा मामपि बाणैर्मा हतादित्यर्थः ॥

यस्य द्वेषिनिषूदनव्रतजुषः प्रत्यर्थिपृथ्वीभुजां
संत्रासेन कलिन्दभूधरगुहागर्भं किमासेदुषाम् ।

स्त्रैणस्याञ्जननीलिमाङ्कितपतद्बाष्पाम्बुपूरैरिव
क्ष्मापीठे प्रसरद्भिराविरभवत्पाथोजबन्धोः सुता ॥ १३६ ॥

यस्य साहेः प्रत्यर्थिपृथ्वीभुजां वैरिनृपाणां स्त्रैणस्य स्त्रीणां समूहस्य अञ्जनानां नयनकजलानां नीलिम्ना श्यामत्वेनाङ्कितैर्युक्तैः तथा पतद्भिः दुःखभराल्लोचनेभ्यो निःसरद्भिः बाष्पाम्बुपूरै रोदनजलप्लवैः । इवोत्प्रेक्षते—पाथोजबन्धोर्भानोः सुता पुत्री यमुना आविरभवत्प्रकटीभूता। किं वा—'अये यदि समीहसे परनृपावरोधं तदा त्वमाकलय मद्वचः किमपि रूपनारायण। प्रतीपनृपनागरीनयननीरकल्लोलिनीसमुत्तरणचातुरीं तुरगराजमध्यापय ॥' इति कविकृतकाव्यादौ बाष्पजलेभ्यो नदीप्रादुर्भावः । तथा—'राम त्वत्तरुणप्रतापदहनज्वालावलीशोषिताः सर्वे वारिधयस्तवारिवनितानेत्राम्बुभिः पूरिताः' इति खण्डप्रशस्तौ बाष्पजलैः समुद्रसद्भावोऽपि वर्णितः । किंभूतैः पूरैः । क्ष्मापीठे भूमण्डले प्रसरद्भिः पयःप्रवाहतया विस्तारं गच्छद्भिः । किंभूतस्य यस्य । द्वेषिणां निषूदने मूलादुन्मूलने व्रतं सर्वेऽपि शत्रवो मयावश्यमुच्छेदनीया इति रूपं नियमं जुषते सेवते तस्य । किंभूतानां प्रत्यर्थिपृथ्वीभुजाम् । संत्रासेनास्याकस्मिकभयेन कलिन्दनाम्नो भूधरस्य शैलस्य गुहानां कन्दराणां गर्भो मध्यभागस्तत्स्याङ्कमुत्सङ्गमासेदुषां प्राप्तवताम् । कलिन्दाद्रिकन्दरामध्यप्रविष्टानामित्यर्थः ॥

सुत्रामाम्बुधिधामदिग्गिरिकुचद्वन्द्वाब्धिनेमीधवः
पृथ्वीपाललटचुम्बितपदप्रोद्दामकामाङ्कुशः ।
द्यां स्वर्णाचलसार्वभौम इव यो निःशेषविश्वंभरां
शासच्छात्रवगोत्रजिद्विजयते श्रीगुर्जरोर्वीपतिः ॥ १३७ ॥

श्रिया सप्ताङ्गलक्ष्म्या ऐश्वर्यशोभया वा युतो गुर्जराणां गुर्जरभूमेर्नायक उर्वीपतिः पातिसाहिर्विजयते सर्वोत्कर्षेण प्रवर्तते । किंभूतः । सुत्रामा शक्रः अम्बुधिधामा वरुणस्तयोर्दिशोः प्राचीप्रतीच्योर्गिरी पर्वतौ उदयास्ताचलाभिधानौ तावेव कुचद्वन्द्वं स्तनयुगलमस्यास्तादृश्या अब्धिनेमेः समुद्रमेखलाया भूमेर्धवो भर्ता । पुनः किंभूतः । पृथ्वीपालानां राज्ञां ललाटैर्भालैश्चुम्बिताः स्पृष्टाः पदयोश्चरणयोः प्रोद्दामाः प्रकृष्टाः कामाङ्कुशा नखा यस्य। किं कुर्वन् । शासत् पालयन् । काम् । निःशेषां समग्रां विश्वंभरां पृथ्वीम् । कामिव । द्यामिव । यथा स्वर्णाचलस्य मेरोः सार्वभौमश्चक्रवर्ती दिवं शास्ति । 'जाम्बूनदोर्वीधरसार्वभौमः' इति नैषधे । यथा भूसार्वभौमस्तथैवेति यतः परसमये मेरोरुपरि स्वर्लोकः । नैषधे यथा—'दिवमङ्कादमराद्रिरागताम्' इति । मेरुर्भूमी(?)स्तत्रामरावती नगरी तस्याः पतिरिन्द्रः इति तत्त्वम् । किंभूतो राजा इन्द्रश्च । शात्रवाणामात्मवैरिणां गोत्राणि वंशान् । शात्रवा रिपव एव गोत्राः पर्वतास्तान् जयतीति ॥ इति नृपवर्णनम् ॥

यं प्रासूत शिवाह्वसाधुमथवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिवास्तोष्पतिम् ।

तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽयमाद्योऽभवत् ॥ १३८ ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये प्रथमप्रारम्भे जम्बूद्वीप-भरतक्षेत्र-गुर्जरदेश-प्रह्लादनपुर-महमुन्दपातिसाहि-वर्णनो नाम प्रथमः सर्गः ।

हीर इति शब्देन युनक्ति योगं प्राप्नोतीति हीरयुक् तादृशं सौभाग्यमिति अभिधा नाम यस्य । एतावता हीरसौभाग्यकाव्यम् । तच्च तद्धीरसूरेर्हीरविजयसूरीश्वरस्य चरितं वृत्तं च । पश्चात्कर्मधारयः । तत्र तस्मिन् हीरसौभाग्यकाव्ये अयं प्रत्यक्षलक्ष्यो वर्णनागोचरीकृतः । तथा आद्यः प्रथमः सर्वसर्गाणां धुरि अभिहितः सर्गः अधिकारविशेषः अभवत् बभूव । किंभूतः । स पूर्वोक्तश्चासौ ब्राह्म्या वाग्देवतायाः क्रमौ चरणौ सेवते आराधयतीत्येवंशीलश्च तादृशेन देवविमलेन व्यावर्णिते । विशेषवर्णनागोचरतां प्रापिते इत्यर्थः । यत्तदोर्नित्याभिसंबन्धात् स कः । यं देवविमलं शिवा इत्याह्वा नाम यस्य तादृशः साधुः साहेषु-मघवा प्रधानत्वादिन्द्रः साधुरिति वणिजां नाम प्राकृते तु अमुकसाह इत्युच्यते । तथा श्रीसुमतिसाधुसूरिकृतसोमसौभाग्यकाव्ये वणिजः साहस्य साधुरिति संज्ञा दृश्यते । सात्रापि । तथा—'अपलपति रहसि दत्तं प्रकटितदत्तेऽपि संशयं कुरुते । क्रयविक्रये च लुण्ठति तथा लोके वणिक्साधुः ॥' इति सुभाषिते । पुनः शिवासाहपत्नी नाम्ना सौभाग्यदेवी यं प्रासूत जनयामास । यं किंभूतम् । श्रीमन्तो विद्वद्वृन्दारकत्वेन शोभाभाजो ये कोविदाः पण्डितास्तेषु सिंह इव सिंहः परवादिपुञ्जकुञ्जरेन्द्रैरप्यजेयः कथमप्यनाकलनीयश्च । मुख्य इत्यर्थः । सीहविमलनामा प्रज्ञांशः । तस्यान्तेवासिनां शिष्याणां मध्ये वास्तोष्पतिरग्रणीः प्रथमशिष्यत्वेन प्रधानः ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ प्रथमप्रारम्भे जम्बूद्वीप-भरतक्षेत्र-सतीर्थसरिद्गिरिकेदारगोधनबन्धुरगुर्जरदेश-प्रह्लादनपार्श्वनाथोपवनपरिखाप्राकारगृहहट्टयुवयुवतीयुक्तप्रह्लादनपुर-महमुन्दपातिसाहिवर्णनो नाम प्रथमः सर्गः ॥

द्वितीयः सर्गः ।

पुरेऽथ तस्मिन्व्यवहारिपुंगवो बभूव कुंरा इति नाम धामवान् ।
महीरुहां स्वःशिखरीव विश्रुतो रसास्पृशां न्यक्कृतविश्वनिःस्वतः ॥ १ ॥

अथ देशग्रामादिवर्णनानन्तरं मातृपितृमातृस्वस्रादिवर्णनादि प्रारम्भे । तस्मिन्पूर्ववर्णितप्रह्लादनपुरे कुंरा इति नाम व्यवहारिषु महेभ्येषु पुंगवः श्रेष्ठो बभूव संजातः । 'पुंगवो गवि भैषज्ये प्रधाने चोत्तरस्थितेः' इत्यनेकार्थः । किंभूतः । धामवान् गृहमेधी । अथवा तेजस्वी प्रभाववान् । 'धाम स्थाने गृहे गेहे प्रभावे जन्मतेजसोः' इत्यनेकार्थतिलकः । पुनः

किंभूतः। विश्रुतो विख्यातः। केषां मध्ये। रसास्पृशां पुरुषाणाम्। क इव। स्वःशिखरीव। यथा महीरुहाणां वृक्षाणां मध्ये कल्पवृक्षो विख्यातोऽस्ति। अतएव किंभूतः कल्पद्रुः स च। न्यक्कृता निवारिता जगज्जनानां समस्तार्थिनां निःस्वता दारिद्र्यं येन॥

अरिष्टकेतुं नवभोगसङ्गिनं त्रिरेखपाणिं पुरुषोत्तमं पुनः।
भ्रमाद्विवोढुर्जलधेरिवोद्वहा महेभ्यमभ्येत्य बभाज यं मुदा॥ २॥

जलधेरुद्वहा समुद्रपुत्री लक्ष्मीर्यं महेभ्यं व्यवहारिणमभ्येत्य समागत्य मुदा प्रीत्या बभाज समाश्रिता। उत्प्रेक्ष्यते—विवोढुः स्वभर्तुः कृष्णस्य भ्रमात् भ्रान्तेरिव। किंभूतं महेभ्यम्। अरिष्टेषूपद्रवेषु अरिष्टनाम्नि वृषभरूपे दैत्ये च केतुं धूमकेतुनामग्रहस्य सदृक्षम्। तद्विध्वंसकत्वात्। पुनः किंभूतम्। नवानां नूतनानां स्तुतिसंयुक्तानां वा भोगानां सुखानां सङ्गः संगमोऽनुभवः प्राप्तिरस्येति। पक्षे—भोगः सर्पकायः अर्थात् शेषनागशरीरं तस्य सङ्गिनं तच्छयनत्वात्। पुनः किंभूतः। त्रिरेखः आकृत्या शङ्खः पाञ्चजन्यश्च पाणौ हस्ते यस्य। पुनः किंभूतः। पुरुषेषु समस्तेषु मानवेषु उत्तमं श्रेष्ठं नाम च॥

कुबेर इत्यात्मजनावमाननां व्यपोहितुं किंपुरुषेश्वरः स्वयम्।
वितीर्णसौवर्णमणीगणोऽर्थिनां प्रणीय यन्मूर्तिमिवावतीर्णवान्॥ ३॥

कुंराख्यो महेभ्यो भातीति संबन्धः। उत्प्रेक्ष्यते—किंपुरुषेश्वरो धनदः यस्य कुंरासाधोः मूर्तिं शरीरं प्रणीय निर्माय स्वयमात्मना अवतीर्णवान् प्रह्लादपुरे। अवतारं गृहीतवानिव। किं कर्तुम्। व्यपोहितुमपकर्तुम्। काम्। अयं कुबेरः कुत्सितशरीरः। कुरूप इत्यर्थः। तथा—'जातौ न वित्ते न गुणे च कामः सौन्दर्य एव प्रवणः स वामः। स्वच्छे स्वशैलेक्षितकुत्सवेरस्तां प्रत्यगान्न स्त्रितरां कुबेरः॥' इति नैषधे। स वामो वक्रः। जातावुत्तमवंशे प्रवणो न, नापि वित्ते धने, न च गुणे त्यागशौर्यादौ, किं तु स कुटिलः कामः सौन्दर्य एव तात्पर्यवान्। अत एव स्वच्छे निर्मले स्वशैले कैलाशे ईक्षितं दृष्टं कुत्सितं वेरं वपुर्येन ईदृशः कुबेरस्तां स्त्रितरां नारीश्रेष्ठां दमयन्तीं प्रति नागात्। 'घरूपकल्पं चेलड्–' इत्यत्र 'स्त्रियोऽन्यतरस्याम्' इति ह्रस्वः। कलेवरशब्दे त्वक्षरद्वयलोपे मात्राविपर्यये बेर इति प्रयोगः। सत्यभामा भामेतिवत्—इति वृत्तिः। इत्यात्मनः स्वस्य लोके जनेऽवमाननामवगणनाम्। निन्दामित्यर्थः। किंभूतः। अर्थिनां याचकानां वितीर्णः विश्राणितः प्रदत्तः सौवर्णः सुवर्णानां समूहः। तथा मणीनां रत्नानां गणो व्रजो येन। एतावता वदान्यता सूचिता॥

तमःसपत्नः श्रितशंभुशीलनः कुमुद्विकाशी वचनामृतं किरन्।
शशीव योऽशीलि कलाभिरिभ्यराट् विमुक्तदोषः स तदत्र कौतुकम्॥ ४॥

य इभ्यराट् व्यवहारिवासवः कलाभिर्द्वासप्ततिलक्षणाभिः शिल्परूपाभिर्वा अशीलि सेवितः। क इव। शशीव। यथा चन्द्रः षोडशसंख्याभिः कलाभिः शील्यते। किंभूतो यः शशी

च। तमसामज्ञानानां दुष्कृतकर्मणां वा ध्वान्तानां च सपत्न उच्छेदकृत् । पुनः किंभूतः। श्रितमर्थान्निर्मितं शंभोर्जिनेन्द्रस्य जैनश्रावकत्वात्, शिवस्य च शिरःस्थायुकत्वात्, शीलनमाराधनं सेवा येन सः। पुनः किंभूतः। कौ पृथिव्यां मुदं प्रीतिं प्रमोदं कैरवाणि कुमुन्दि विकाशयति प्रकटीकरोति विदधाति प्रबोधयतीत्येवंशीलः । पुनः किंभूतः। वचनमेव वाणीतुल्यं च अमृतं सुधां किरन् विस्तारयन् वर्षन् परं तदत्र व्यवहारिणि चित्रमाश्चर्यमस्ति। यत्स महेभ्यो मुक्तास्त्यक्ता दोषा अपगुणा येन। शशी तु सह दोषया रात्र्या वर्तते यः स सदोषः॥

अलम्भि दम्भोलिशयेभशालिनी न कीर्तिरेतस्य परश्शतैः परैः।
शरत्प्रसन्नीकृतचन्द्रगोलिका सुधामरीचेर्ग्रहतारकैरिव ॥ ५ ॥

तस्य कुंराव्यवहारिणः दम्भोलिर्वज्रं शये यस्य स शक्रः तस्य य इभ ऐरावणस्तद्वत् शालिनी श्वैत्यात् शोभमाना कीर्तिः परश्शतैः शतात्परैः परश्शतैः सहस्रलक्षकोटिसंख्यैरन्यैः परैरिभ्यैर्नालम्भि न प्राप्ता। कैरिव। ग्रहतारकैरिव । यथा सुधामरीचेरमृतकिरणस्य चन्द्रस्य शरदा घनात्ययेन प्रसन्नीकृता जलधररोधापसारणाद्विमलीकृता चन्द्रगोलिका चन्द्रिका ग्रहा मङ्गलादयः, तारका नक्षत्रतारास्तैर्न लभ्यते नैव प्राप्यते॥

वहन्सुपर्वद्रुमरामणीयकं सनन्दनो गोत्रपरार्ध्यतां दधत्।
सुजातरूपः सुमनोमनोरमोऽनुयाति यः स्वेन सुपर्वपर्वतम् ॥ ६ ॥

यो महेभ्यः स्वेनात्मना सुपर्वपर्वतं सुरगिरिं मेरुमनुयाति अनुकरोति । मेरुणा सदृशीभवतीत्यर्थः । किं कुर्वन्। वहन् कलयन् । किम् । सुपर्वद्रुमाः कल्पवृक्षाः दानरूपभूषणसुषमाभिस्तद्वत्तैश्च रामणीयकं मनोहरताम्। पुनः किंभूतः । सहनन्दनाभ्यां हीरकुमारश्रीपालाभिधाभ्यां वर्तते यः । भाविनि भूतोपचारात्। पक्षे—नन्दनवनेनान्वितः। पुनः किंभूतः। गोत्रे स्ववंशे, गोत्रेषु सर्वशैलेषु हीरसूरिपुरंदरपितृत्वेन लक्षयोजनप्रमाणतया सर्वोन्नतत्वेन च परार्ध्यतां प्रकृष्टतां महिमानं दधत् बिभ्रत्। पुनः किंभूतः। सुशोभनं जातमुत्पन्नं रूपं वपुः सुभगता यस्य । मेरौ तु सुष्ठु जातरूपं स्वर्णं यत्र। पुनः किंभूतः। सुमनोभिर्हारादिकुसुमैर्मनो हरती(?)त्येवंशीलः । सुष्ठु निष्पापं मनो येषां साधूनां तेषां मनसि सुगुणधर्मित्वेन रमते इति वा। सुमनसां महात्मनां मध्ये अभिरामो वा। सुमनस्त्वेन मनोज्ञो वा। मेरुस्तु सुमनोभिर्देवैः सुन्दरः॥

जगज्जनावाङ्मनसावगाहिना गम्भीरभावेन जितेन साधुना।
सुधास्रवन्तीपतिना हृदा दधे किमेष रोषो वडवार्चिषो मिषात् ॥ ७ ॥

येन साधुना कुंरासाहेन गम्भीरभावेन स्वगाम्भीर्येण जितेनाभिभूतेन सुधास्रवन्तीपतिना क्षीरसमुद्रेण । किमुत्प्रेक्ष्यते—हृदा हृदयेन कृत्वा वडवार्चिषो वडवानलस्य मिषात् कपटात् रोषः कोपः एष प्रत्यक्षः किं दधे धृत इव। किंभूतेन गम्भीरभावेन।

जगतां पातालभूमिस्वर्लोकानां जनानामसुरनरसुराणां न वाङ्मनसौ वचनचित्ते अवगाहते गोचरयतीत्येवंशीलस्तेन । वक्तुमशक्येनेत्यर्थः ॥

समाप्य कामान्मरुतां स्वदारुतां निरस्य तेषां च वरात्प्रसेदुषाम् ।
मिषादमुष्येप्सितदित्सया विशामिवावनौ स्वःफलदोऽवतीर्णवान् ॥ ८ ॥

इभ्यो भातीति संबन्धः । उत्प्रेक्ष्यते—अमुष्य व्यवहारिणो मिषाद्दम्भादवनौ पृथिव्यामवतीर्णवानागतः स्वःफलदः कल्पवृक्ष इव । कया । विशां नरेन्द्राणामीप्सितानां कामितानां मनोभिलाषाणां दित्सया दातुमिच्छया । किं कृत्वा । मरुतां देवानां कामान्सर्वाभिलाषान्समाप्य संपूर्णीकृत्य । दत्त्वेत्यर्थः । पुनः किं कृत्वा । प्रसेदुषां स्वाभिलषितसकलार्थाभिगमेन प्रसन्नीभूतानां तेषां देवानां वरादिष्टप्रदानवचनात्स्वस्यात्मनो दारुतां काष्ठभावं निरस्यापाकृत्य ॥

अतिस्मरैतत्तनुकामनीयकैः सहाभ्यसूयां दधतौ निजश्रिया ।
अनौचितीक्रुद्धजगत्कृतार्कजावकारिषातां वडवासुताविव ॥ ९ ॥

निजश्रिया स्वरूपसौन्दर्यलक्ष्म्या अतिक्रान्तोऽर्थान्निर्जितः स्मरः कामो यैस्तादृशैरेतस्य कुंराव्यवहारिणस्तनोः शरीरस्य कामनीयकै रमणीयताभिः । 'कामनीयकमधःकृतकामम्' इति नैषधे । सह सार्धमभ्यसूयामीर्ष्यां दधतौ बिभ्राणौ अर्कजौ अश्विनीपुत्रौ । उत्प्रेक्ष्यते—अनौचित्या अयुक्ततया क्रुद्धेन कुपितेन जगत्कृता ब्रह्मणा वडवासुतावश्वाविवाकारिषातां कृतौ ॥

मिथः परिस्पर्धितया वदान्यतागुणैर्विजित्य व्यवहारिणामुना ।
इमा अरक्ष्यन्त सुधाशधेनवः स्वगोधनस्योपधिनेव धामनि ॥ १० ॥

अमुना कुंरासाहनाम्ना महेभ्येन स्वगोधनस्य निजगोकुलस्योपधिना कपटेन धामनि अर्थादात्ममन्दिरे इमाः सकलजगज्जनदृग्गोचराः सुधाशधेनवः कामगव्य इव अरक्ष्यन्त रक्षिताः । किं कृत्वा । वदान्यता दानशीलत्वं तस्या गुणैरुत्कर्षैः स्फूर्तिभिर्वा मिथः परस्परं परिस्पर्धितया समन्तात्स्पर्धनशीलत्वेन विजित्य पराभूय गृहे रक्षिताः ॥

सुपात्रसस्नेहगुणाग्र्यवृत्तिभृत्तमःप्रतीपः स्वकुलप्रकाशकृत् ।
प्रदीपदेश्योऽपि परं न धूमभाक्कुलं न चाध्यामलयत्कदापि यः ॥ ११ ॥

यो महेभ्यः प्रदीपस्य देश्योऽपि सदृशोऽपि सन् । 'देवं देवेन्द्रदेशीयम्' इति पाण्डवचरित्रे । परं केवलं कदापि कस्मिन्नपि प्रस्तावे न धूमभाक् न निषेधे कोपयुक्तो बभूव । धूमशब्देन कोपः । यथा भक्तामरस्तोत्रे—'निर्धूमवर्तिरपवर्जिततैलपूर–' इति । दीपस्तु धूमयुक्तः । च पुनः कदाचिदपि कुलं वंशमपवादादिना नाध्यामलयन्न मलिनीचकार । दीपस्तु यत्र रक्ष्यते तद्गृहं स्थानं वा श्यामलयति । 'कुलं कुल्यगणे गेहे देहे जनपदेऽन्वये' इत्यनेकार्थः । किंभूत इभ्यः । सु शोभनानि पात्राणि

महाव्रताणुव्रतधारकादिसंघो यस्य, तथा सहस्नेहेन देवे गुरौ स्वजनादिषु प्रीत्या वर्तते यः सः, तथा गुणैरौदार्यादिभिरग्र्यां मुख्यां वृत्तिं वाणिज्यादिकामाजीविकां वा बिभर्तीति। 'वृत्तिस्तु वर्तने। कैशिक्यादौ जीवने च' इत्यनेकार्थः। सर्वेष्वप्यग्रेसरो वा। पश्चात्कर्मधारयः। पुनः किंभूतः। तमसामज्ञानानां पापानां वा प्रतीपः शत्रुः स्वयं पुण्यकर्माण्याचरन् परानपि धर्मे दृढीकरोति। पुनः किंभूतः। स्वस्यात्मनः कुलमौकेशवंशस्तत्र प्रकाशकृत् उद्योतकर्ता। स्वेन सूरिसिंहेन सूनुना वा। दीपोऽपि पात्रकलितः, स्नेहेन तैलेन युक्तः। 'तैलं स्नेहोऽभ्यञ्जनं च' इति हैम्याम्। तन्तुप्रधानदशाधारकः। 'वृत्तिर्वर्तिश्च तद्दशा' इति हैम्याम्। तथा ध्वान्तोच्छेत्ता, यस्मिन् गृहे येन वा प्रबोधितस्तदेव तस्य वा गेहं तत्रोद्योतकारकः॥

धुनीधवं येन गभीरनिःस्वनैर्विजित्य मुक्तामणिविद्रुमावलिः।
ततः समग्रा जगृहे तदाद्यसौ बभूव किं निःस्वतया जडाशयः॥१२॥

येन कुंराव्यवहारिणा गभीरैः सजलजलधरगर्जितसान्द्रमधुरैर्निःस्वनैः स्वशब्दैर्धुनीधवं नदीपतिं समुद्रं विजित्य ततः समुद्रात् मुक्ताफलानि मुक्तामणयो रत्नानि विविधजातीनि विद्रुमाः प्रवालानि तेषामावलिः श्रेणिः समग्रा समस्तापि जगृहे गृहीता। किमुत्प्रेक्ष्यते—असौ समुद्रस्तदादि तं दिनमारभ्य निर्गतं स्वं समग्रद्रव्यं यस्मात्स निःस्वस्तस्य भावस्तया निःस्वतया दरिद्रत्वेन जडः किं कर्तव्यतामूढ आशयश्चित्तं यस्य। अथ किं करिष्यते, क्व गमिष्यते, कस्य पुनः पूत्करिष्यते, कथं वा स्वं प्रत्यानेष्यते इति विमर्शानभिज्ञो बभूव। डलयोरैक्यादियं घटना॥

व्यमोचि नामुष्य कदाचिदन्तिकं रथाङ्गपाणेरिव पद्मसद्मना।
गुणव्रजेनेव नियन्त्र्य मुक्तया वितीर्णवाचेव यदृच्छयाथ वा॥ १३॥

पद्मे कमले सद्म गृहं यस्याः सा तया पद्मसद्मना लक्ष्म्या अमुष्य कुंरासाधोः कदाचिदपि कस्मिन्नपि समये अन्तिकं समीपं न व्यमोचि न मुक्तम्। कस्येव। रथाङ्गपाणेरिव। यथा रथाङ्गं चक्रं पाणौ हस्ते यस्य तस्य कृष्णस्य स्वभर्तृत्वेन कदाचिदपि काले पतिव्रतया श्रिया पार्श्वं न विमुच्यते नैव त्यज्यते। उत्प्रेक्ष्यते—अनेन व्यवहारिणा गुणानामौदार्यधैर्यगाम्भीर्यादीनां रश्मीनां वा व्रजेन समूहेन। 'गुणो भीमे हृषीके ज्यारज्जुशौर्यादितन्तुषु। सूदेऽप्रधाने संध्यादौ निर्दोषे रूपसत्त्वयोः॥' इत्यनेकार्थतिलकः। नियन्त्र्य निर्बध्येव मुक्तया रक्षितया। अथ वेति पक्षान्तरे। उत्प्रेक्ष्यते—यदृच्छया तन्महेभ्यभूरिभाग्यप्राग्भारप्रेरितस्वेच्छया वितीर्णा विश्राणिता दत्ता वाक् वाग्बधो यया तादृशयेव। वाचं दत्त्वा स्थितयेत्यर्थः॥ इति कुंरासाहः॥

मनः समुत्कण्ठयतस्तनूमतां पयःप्लवं शैवलिनीपतेरिव।
अमुष्य नाथी सुमुखी बभूवुषी कुमुद्वतीव द्विजचक्रवर्तिनः॥ १४॥

अमुष्य कुंरासाहस्य नाथीति नाम्ना सुमुखी प्रसन्नवदना पत्नी बभूवुषी संजाता।

केव । कुमुद्वतीव । यथा द्विजचक्रवर्तिनश्चन्द्रस्य । 'कन्दर्पेऽनल्पदर्पे विकिरति किरणाञ्शर्वरीसार्वभौमः' इति नाटकग्रन्थे । यथा शर्वरीसार्वभौमस्तथा द्विजचक्रवर्तीति । कुमुदिनी नाम प्रिया वर्तते । अमुष्य किं कुर्वतः । तनूमतां मनश्चित्तं समुत्कण्ठयतः सम्यगुत्कण्ठया स्वदर्शनात्मगुणगणाकर्णनविधावत्यौत्सुक्येन कलितं कुर्वतः। कमिव । पयःप्लवमिव । यथा विधुः शैवलिनीनां नदीनां पत्युर्भर्तुः समुद्रस्य पानीयपूरं कण्ठात्कूलादूर्ध्वं नयति । वृद्धिमन्तं करोतीत्यर्थः । कण्ठादूर्ध्वं करोतीत्युत्कण्ठयति । 'तत्करोति तदाचष्टे' इति णिजिति पाणिनिः । सारस्वते तु 'ञिडित्करणे' इति। 'उत्कण्ठयति मां भक्तिरिन्दुलेखेव सागरम्' इति वाग्भटालंकारे ॥

चलेति विश्वे वचनीयताश्रुतेः प्रियेण बाणद्विषता तिरस्कृता ।
उदीतदुःखादिदमात्मना जनुः परं प्रपेदे किमु पद्ममन्दिरा ॥ १९ ॥

नार्थी भातीति संबन्धः । किमुत्प्रेक्ष्यते—पद्ममन्दिरा लक्ष्मीरिदमात्मना एतत्स्वरूपेण । नाथीवपुषा इत्यर्थः । परमन्यज्जनुर्जन्म प्रपेदे प्रतिपन्नवतीव । कस्मात् । उदीतदुःखात्प्रकटीभूतासातात् । 'उदीतमातङ्कितवानशङ्कित–'इति नैषधे । किंभूता । बाणनाम्नो दैत्यस्य द्विषता वैरिणा कृष्णेन प्रियेण भर्त्रा तिरस्कृता धिक्कृता । कस्याः । इयं श्रीश्चलास्थिरातिचपला इत्यमुना प्रकारेण विश्वे लोके जगति वचनीयताया अर्थाल्लक्ष्म्या अपवादस्य श्रुतेः श्रवणात् ॥

ततं वचो यत्र घनं पदाङ्गदध्वनिश्च काञ्च्याः सुषिरं स्वनः पुनः ।
तया बभे जङ्गमरङ्गशालया किमत्र शृङ्गारनटस्य नृत्यतः ॥ १६ ॥

तया मृगदृशा नाथीदेव्या बभे शुशुभे । अत्र जगति । नृत्यतस्ताण्डवं कुर्वतः शृङ्गारनाम्नो नवरसेष्वादिभूतस्य रसस्यैव । नटस्य नर्तकस्य जङ्गमया चलन्त्या रङ्गशालया नर्तनभवनभुवेव । यत्र रङ्गशालायां वचः अर्थात्तस्या वचनं ततं वीणाप्रभृतिकं विस्तीर्णं च । च पुनर्यत्र पदाङ्गदानां नूपुराणाम्। 'नूपुरं तु तुलाकोटिः पादतः कटकाङ्गदे' इति हैम्याम्। ध्वनी रावः । घनं तालप्रभृतिकं बहलं चास्ति । पुनर्यत्र काञ्च्या मेखलायाः स्वनः शब्दः सुषिरं वंशादिकं किंकण्यादिजं च वर्तते ।'ततं वीणाप्रभृतिकं तालप्रभृतिकं घनम् । वंशादिकं तु सुषिरम्' इति हैम्याम् ॥ इति नाथीवर्णनम् ॥

जगत्त्रयीजन्मजुषां मृगीदृशां विजित्य राजीर्निजजित्वरश्रिया ।
अधारि किं मूर्धनि पद्मचक्षुषा जयाङ्कबालव्यजनं कचच्छटा ॥ १७ ॥

यया पद्मचक्षुषा कमललोचनया नाथीदेव्या मूर्धनि स्वमस्तके कचच्छटा केशपाशः । 'बालाः स्युस्तत्पराः पाशो रचना भार उच्चयः । हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः ॥' इति हैम्याम् । तथा छटाशब्दः समूहवाचकश्च । 'तटान्तविश्रान्ततुरङ्गमच्छटा' इति नैषधे । किमुत्प्रेक्ष्यते—जयाङ्कबालव्यजनं वैरिविजयसूचकचिह्नचामरं किं धृतमिव। अर्थात्स्वमस्तके । जयचिह्नं हि चामराङ्कुशादिकं मौलावेव ध्रियते । गारुडिकादीनाम-

द्यापि तथैव दर्शनात्। किं कृत्वा। विजित्य परिभूय। कया। निजस्यात्मनो जित्वर्या जयनशीलया श्रिया शोभया पुंवद्भावे ईकारलोपः। काः। राजीः श्रेणीः। कासाम्। मृगीदृशां हरिणनयनानां स्त्रीणाम्। किंभूतानाम्। जगतां नागलोकस्वर्लोकभूलोकानां त्रयी त्रिकं तत्र जन्मावतारं जुषन्ते भजन्ते तादृशीनाम्। त्रिभुवनोद्भवानामित्यर्थः। एतावता सुरासुरनररमणीश्रेणीर्निर्जित्य जयचामरं बिभर्तीत्यर्थः॥

विधुं द्विधाकृत्य विधिर्व्यधत्त यल्ललाटमर्धेन शिवे न्यधात्परम्।
न चेन्मृगाङ्कार्धधरः कथं हरः किमर्धचन्द्रोपमितं च तद्वहेत्॥ १८॥

विधिर्विधाता विधुमर्थादीश्वरमस्तकस्थसंपूर्णचन्द्रमादाय द्विधाकृत्य द्वौ खण्डौ विधाय अर्धेन विधोस्तदेकभागेन यस्या ललाटं भालं व्यधत्त चक्रे। अत्र गर्भितोत्प्रेक्षा। कृतवा-वानिव। पुनः परं द्वितीयमर्धं शिवे ईश्वरे न्यधात्स्थापयामास। एवं चेन्न स्यात्तदा हरः शिवो मृगाङ्कार्धधरो अर्धचन्द्रभृत्। 'लब्धार्धचन्द्र ईशः' इति चम्पूकथायाम्। कथं केन प्रकारेण। च पुनस्तद्भालं तस्या ललाटमर्धचन्द्रोपम(मित)मष्टमीमृगाङ्कोपमानं च कथं कया रीत्या वहेद्धरेत्॥

मृगीदृशो हेलितकेलतीश्रियो ललाटपट्टे कुरलेन निर्बभे।
स्मितारविन्दस्य धियेव तस्थुषा यदानने पौष्पपिपासयालिना॥ १९॥

तस्या मृगीदृशो नाथीदेव्या ललाटपट्टे भालस्थले कुरलेन भ्रमरालकेन निर्बभे ब-भासे। 'अक्षबाजवलयेन निर्बभे' इति रघुवंशे। किंभूताया मृगीदृशः। हेलिता अप-गणिता केलत्याः कन्दर्पपत्न्या रत्याः श्रीः शोभा यया। 'केलतीमदनयोरुपाश्रये' इति नैषधे। उत्प्रेक्ष्यते—स्मितस्य विकसितस्यारविन्दस्य पद्मस्य धिया बुद्ध्या यदानने नाथी-मुखे पौष्पस्य पुष्पानामयं पौष्पो रसः यथा पुष्पोद्भवरजस्तथा पुष्पोद्भवो मकरन्दोऽपि तस्य पिपासया पातुमिच्छया तस्थुषा स्थितवता अलिना भ्रमरेण च। किं च पौष्पं मक-रन्द इति भोजप्रबन्धादिककाव्येषु दृश्यते। तथापि सति परः पाठः—'स्मितारविन्दस्य धिया यदानने स्थितं रसस्येव पिपासयालिना'। उत्प्रेक्ष्यते—स्मितारविन्दस्येव प्रोज्जृ-म्भिताम्भोजस्य धिया यदानने नाथीवदने रसस्य मकरन्दस्य। 'रसो मधु मकरन्दो मर-न्दश्च' इति हैम्याम्। पिपासया पानस्याभिलाषेण स्थितमर्थादागत्य अलिना भृङ्गेण स्थीयत इव॥

अमूदृशाम्भोजदृशा स्म भूयते न जातुचिद्यौवतनिर्मितौ मम।
इतीव रेखामिदंमुखे मषेर्मिषाद्भ्रुवोर्नाभिभुवा व्यधीयत॥ २०॥

नाभिभुवा धात्रा इदंमुखे अस्या नाथीदेव्या वदने। उत्प्रेक्ष्यते—इति हेतोर्भ्रुवोर्मि-षाद्दम्भान्मषेर्मलिनाम्बुन इयं दृश्या रेखा व्यधीयत कृतेव। इति किम्। यन्मम यौवत-निर्मितौ त्रिभुवनस्त्रीसमूहनिर्माणे अमूदृशा एतत्सदृक्षया अम्भोजदृशा पद्मलोचनया

स्त्रिया जातुचित्कदाचिदपि न भूयते स्म न जाता। त्रैलोक्येऽप्येवंविधा मया कापि युवती निर्मिता नास्तीत्यर्थः ॥

स्वकामिनीकैरविणीतनूभवे विरञ्चिना लोचनतामवापिते ।
विधातुमङ्के किमु लोलकैरवे यदास्यभावः शरदिन्दुना दधे ॥ २१ ॥

शरदिन्दुना घनात्ययसमयसंबन्धिना चन्द्रेण यदास्यभावो नाथीवदनता दधे अङ्गीकृता । उत्प्रेक्ष्यते—लोले चपले कैरवे कुमुदे अङ्के उत्सङ्गे विधातुं कर्तुमिव । उत्सङ्गग्रहणे हेतुमाह—स्वस्यात्मनः कामिन्याः प्रियायाः कैरविण्याः कुमुद्वत्यास्तनूभवे अङ्गजाते । स्वसुतयोरुत्सङ्गे करणं तु न्याय्यमेव । पुनः किंभूते कैरवे । अवापिते नीते । काम् । लोचनताम् । अर्थान्नाथीदेव्या नेत्रत्वम् । केन । विरञ्चिना वेधसा ॥

विभाति यद्भ्रूयुगभासिनासिका विजित्य विश्वत्रितयं मनोभुवा ।
यदङ्गरुक्पुञ्जपयोधिसंनिधौ कृतो यशःस्तम्भ इव ध्वजाङ्कितः ॥ २२ ॥

यस्या भ्रुवोर्युगेन भासते दीप्यते इत्येवंशीला नासिका विभाति । उत्प्रेक्ष्यते—मनोभुवा स्मरेण यशःस्तम्भः कृतः कीर्तिस्तम्भ आरोपित इव । किंभूतः । ध्वजाङ्कितः पताकाकलितः । कस्मिन्रोपितः । यस्या नाथीदेव्या अङ्गं शरीरं तस्य रुचां कान्तीनां पुञ्जः समूहः स एव पयोधिरतिबहुलत्वात्समुद्रस्तस्य संनिधौ पार्श्वे । किं कृत्वा । विश्वानां स्वर्भूमीपाताललक्षणानां जगतां त्रयं विजित्य निजौजसा स्वाज्ञावशंवदं विधाय। अपरोऽपि विजयी राजा जगज्जित्वा समुद्रतटे कीर्तिस्तम्भानारोपयतीति स्थितिः ॥

विडम्बिताखण्डमृगाङ्कमण्डले कपोलपाली स्फुरतस्तदानने ।
मणीमये दर्पणिके यदोकसोरिमे रतिप्रीतिमृगीदृशोरिव ॥ २३ ॥

तस्या देव्या आनने मुखे विडम्बितं निजश्रिया पराभवनं विडम्बनां प्रापितमनुकृतं वा अखण्डं संपूर्णं मृगाङ्कस्य चन्द्रमसो मण्डलं बिम्बं याभ्यां तादृशे कपोलपाली गण्डस्थले स्फुरतो लसतः । उत्प्रेक्ष्यते—यदोकसोर्या नाथी एवौको गृहं ययोस्तादृश्यो रतिप्रीत्योरेव मृगीदृशोः कामस्य कान्तयोः । एतावता यां नाथीं निभाल्य(ल्य) रतिश्चित्तनिर्वृतिः, प्रीतिः स्नेहः प्रमोदश्च, संपद्यत इत्यर्थः । इमे दृग्लक्ष्ये मणीमये रत्नरचिते दर्पणिके आदर्शिके इव । 'यन्मतौ विमलदर्पणिकायाम्' इति नैषधे ॥

किमिच्छता पाशयितुं जगत्त्रयीयुवव्रजान्वागुरिकेन(ण) रज्जुवत् ।
स्मरेण यादःपतिपाशजित्वरी दधे द्विपाशी सुदृशः श्रुतिद्वयी ॥ २४ ॥

सुदृशो नाथीदेव्याः श्रुतिद्वयी श्रवणयुगली । भातीति संबन्धः । उत्प्रेक्ष्यते—स्मरेण मदनेन द्वयोः पाशयोः समाहारो द्विपाशी बन्धनग्रन्थी किं दधे धृतेव । अन्योऽप्यर्थो यथा—स्मरेण किं द्विपाशी बन्धनग्रन्थिद्वितयी किं दधे । सा का । सुदृशो नाथीदेव्याः श्रुतिद्वयी । 'ध्रुवमप्सरसोऽवतीर्य यं शतमध्यासत तत्सखीजनः' इति नैषधे । ध्रु-

वमुत्प्रेक्ष्यते—अप्सरसोऽवतीर्य यां कुण्डिनपुरीमध्यासत। कः। तत्सखीजनः–इति तद्वृत्तिः। स्मरेण किं कुर्वता। इच्छता वाञ्छता। किं कर्तुम्। पाशयितुं पाशे पतितान् पाशेन बद्धान् वा कर्तुम्। कान्। जगत्त्रयीयुवव्रजान् त्रिभुवनतरुणगणान्। किंवत्। रङ्कुवत्। यथा वागुरिकेण जालिकेन रङ्कून् जातिविशेषमृगान्। 'मृगभेदा रुरुन्यङ्कुरङ्कुगोकर्णशम्बराः' इति हैम्याम्। पाशयितुं काङ्क्षता पाशो ध्रियते। किंभूता द्विपाशी। यादःपतेर्वरुणस्य पाशस्य जित्वरी जयनशीला॥

वियोगवत्यौषधियोषया यदाननीभवत्कान्तसितद्युतिं प्रति।
स्थितस्तदङ्के प्रहितस्तनूजवत्प्रवाल आह्वातुमिवाधरोपधेः॥ २५॥

वियोगो विरहो वीनां भृङ्गप्रमुखखगानां योगः संबन्धो यस्यास्तादृश्या, औषधिरेव योषा स्त्री तया। यदाननीभवन्तं नार्यीवक्त्रसंपद्यमानं कान्तं स्वभर्तारं सितद्युतिं चन्द्रं प्रति आह्वातुमाकारयितुं प्रहितः प्रेषितस्तनूजवत् पुत्रवत्। प्रवालः प्रकृष्टो दक्षः। श्लेषे बवयोरैक्यात् बालः शिशुः, पल्लवश्च। उत्प्रेक्ष्यते—अधरोपधेरोष्ठकपटात् तदान्तिके चन्द्रोत्सङ्गे स्थित इव। बालः सुतः पितुरुत्सङ्गे तिष्ठतीति स्थितिरेव॥

निपातुकेन द्विजकान्तिमिश्रितस्मितेन यस्या रदनच्छदे बभे।
जलेन वातूलतरङ्गितात्मना सुधापयोधेरिव हेमकन्दले॥ २६॥

यस्या रदनच्छदेऽधरे निपातुकेन निपतनशीलेन द्विजानां दन्तानां कान्त्या मिश्रितेन खचितेन स्मितेनेषद्धसितेन। 'ताम्रोष्ठपर्यस्तरुचः स्मितस्य' इति रघौ। बभे शुशुभे। केनेव। जलेनेव। यथा सुधापयोधेः क्षीरार्णवस्य पयसा हेमकन्दले विद्रुमे दीप्यते। किंभूतेन। वातूलेन वातव्रजेन तरङ्गितः कल्लोलयुक्तीभूत आत्मा स्वरूपं यस्य॥

स्वकान्तवक्त्रामृतकान्तिदर्शनाद्धृदन्तरुद्वेलितरागसागरात्।
निरित्वरी विद्रुमकन्दली च यद्विलासवत्या दशनच्छदो बभौ॥ २७॥

यस्याः। 'विलासो हावे लीलायाम्' इत्यनेकार्थः। तत्र 'हावः शृङ्गारभावाप्तौ रम्योक्तस्मितवीक्षितम्। प्रियस्यानुकृतिर्लीला श्लिष्टावाग्वेषचेष्टितैः॥' इति तदवचूरिः। स विद्यते यस्याः सा तस्या विलासवत्या दशनच्छदोऽधरो बभौ भाति स्म। उत्प्रेक्ष्यते—स्वस्यात्मनः कान्तस्य भर्तुः कुंरासाधोर्वक्त्रामृतकान्तेर्मुखेन्दोर्दर्शनादवलोकनात् हृदन्तर्मनोमध्ये उद्वेलिताद्वेलामतिक्रान्त उद्वेल उद्वेलत्वं संजातमस्मिन्निति भावप्रधानो निर्देशः। तस्मादुत्कण्ठितात् कण्ठादूर्ध्वमागतात् रागसारात् निरित्वरी निर्गमनशीला विद्रुमकन्दली प्रवालाङ्कुर इव। कन्दलशब्दस्त्रिलिङ्गः॥

द्विजाधिपत्यं मुख एव मुख्यतो मृगीदृशोऽस्या न कुमुद्वतीपतौ।
द्विजैरमीभिर्यदसौ दिवानिशं निषेवणाया विषयं स्म नीयते॥ २८॥

अस्या मृगीदृशः सारङ्गलोचनाया मुखे वदने एव मुख्यतः प्राधान्याद् द्विजानामाधिपत्यमैश्वर्यमास्ते । परं कुमुद्वतीपतौ कुमुदिनीवल्लभे चन्द्रे न, यद्यस्मात्कारणात् असौ मुख एव । मुखशब्दः पुंनपुंसके । दिवानिशम् अहोरात्रम् अमीभिश्चक्षुर्लक्ष्यैर्द्विजैर्दन्तैर्निषेवणायाः सेवायाः विषयं गोचरं नीयते स्म प्रापितः । चन्द्रस्य तु नक्षत्रताराग्रहा यथा प्रत्यक्षा दृश्यन्ते, तथा न द्विजा इति ॥

यदाननान्तर्वसतेः सुधारसादिवोद्गतः पाटल एष कन्दलः ।
विलासदोलेव निखेलितुं गिरोऽथ वा मृगाक्षीरसना स्म शोभते ॥२९॥

मृगाक्ष्या नार्थीदेव्या रसना जिह्वा शोभते स्म । उत्प्रेक्ष्यते—यस्या आननं मुखं तस्यान्तर्मध्ये वसतिर्वासो यस्य तादृशात् सुधारसादमृतनिस्यन्दादुद्गतः प्ररूढः प्रकटीभूतो वा पाटलो रक्त एष जिह्वालक्षणः कन्दलो नवाङ्कुर इव । अथ वा पक्षान्तरे यद्वदनमध्यसौधाया गिरो वाग्देवताया निखेलितुमान्दोलितुं दोलान्दोलनलीनां निर्मातुं विलासदोलेव क्रीडाप्रेङ्खेव ॥

यदीयवाचं विधिना विधित्सुना सुधामुपात्तामधिगम्य निस्तुषाम् ।
सुधाशना अध्वरभोजिनस्तदादितो बभूवुस्तदभावतः किमु ॥ ३० ॥

सुधाशनाः पीयूषभोजना देवास्तदादितस्तद्दिवसप्रारम्भात् । यस्मिन्नहनि सुधा निष्ठिता तद्दिनमादौ कृत्वेत्यर्थः । किमुत्प्रेक्ष्यते—तस्याः सुधाया अभावात्क्षयादध्वरमर्थाद्यज्ञांशं भुञ्जन्तीत्येवंशीला अध्वरभोजिनो यज्ञाहारा बभूवुः संजाता इव । किं कृत्वा । अधिगम्य ज्ञात्वा । काम् । सुधाम् । किंभूतां सुधाम् । उपात्तां गृहीताम् । पुनः किंभूताम् । निर्गतस्तुषो अवशिष्टो बुशमात्रो यस्यां सा । 'तुषो बुशे' इति हैम्याम् । केन । विधिना सृष्टिकर्त्रा । विधिना किं चिकीर्षुणा । विधित्सुना कर्तुं काङ्क्षता । काम् । यदीयां नार्थीसंबन्धिनीं वाचं वाणीम् । नार्थीवचनचातुरीमित्यर्थः ॥

कुशेशयादर्शसुधांशुजित्वरं विधाय वेधाः इदमीयमाननम् ।
इदं दृशा मा कुदृशां प्रदुष्यतादितीव चक्रे चिबुकेन दन्तुरम् ॥३१॥

वेधा विधाता अस्या इदम् इदमीयमाननं वदनं विधाय निर्माय । उत्प्रेक्ष्यते—इति हेतोः चिबुकेन असिकाधःप्रदेशेन कृत्वा । 'दन्तवस्त्रं च तत्प्रान्तौ सृक्कणी असिकं त्वधः । असिकाधस्तु चिबुकम्' इति हैम्याम् । दन्तुरं विषमोन्नतं चक्रे कृतवानिव । किंभूतमाननम् । कुशेशयानि पद्मानि, आदर्शा दर्पणाः, सुधांशवश्चन्द्राः, तेषां जित्वरं जयनशीलम् । यथा द्वादशसूर्यास्तथा चन्द्रा अपि बहवः सन्ति । 'स्फुरदम्भःसरोदम्भात्सैंहिकेयभयादिव । राकामृगाङ्काः संभूय विभान्ति शरणागताः ॥' इति राघवपाण्डवीयचरित्रे । तथा—'विधोर्विधिर्बिम्बशतानि लोपं लोपं कुहूरात्रिषु मासि मासि । अभङ्गुरश्रीकमिमं किमस्या मुखेन्दुमस्थापयदेकशेषम् ॥' इति नैषधे । तत्र चन्द्राणां बहुत्वोक्तेर्न दोषः । इति किम् । यदिदमाननं कुदृशां दुष्टानां दृशा दृग्दोषेण मा दुष्यताद्विक्रातिं मा गच्छतादिति हेतुः ॥

विजित्य कान्त्या जगृहे क्रुधा यदाननेन लक्ष्मीः क्षणदापतेस्तथा ।
हृदस्फुटच्चेन्न कुतस्ततः सुधा निरित्वरी क्षुद्रतदङ्करन्ध्रतः ॥ ३२ ॥

यदाननेन नाथीमुखेन कान्त्या स्वशोभया । 'आभा राढाविभूषा श्रीरभिख्याकान्तिविभ्रमाः' इति हैम्याम् । तथा—'कान्तिः शोभाकामनयोः' इत्यनेकार्थः । कामना इच्छा । 'प्रभायां काव्यगुणे च कान्तिः' इति तदवचूरिः । विजित्य क्षणदापतेर्निशापतेश्चन्द्रस्य तथा तेन प्रकारेण क्रुधा स्वस्पर्धिभावोद्भूतकोपेन लक्ष्मीर्जगृहे आदत्ता । तथा कथम् । यथा येन स्ववैभवादानाविर्भूताद्वैतदुःखातिरेकेण तस्य चन्द्रस्य हृत् हृदयमस्फुटत् स्फुटितम् इति चेन्न भवेत्तदा कुतः कारणात् क्षुद्रो लघुर्यस्तस्य चन्द्रस्याङ्कः कलङ्कः स एव रन्ध्रं छिद्रं ततस्तस्मात्ततश्चन्द्रात्सुधा निरित्वरी निर्गमनशीला स्यात् ॥

समं यदास्येन मृधे महौजसा निरोजसाभाजि किमेणलक्ष्मणा ।
यतोऽमुनाद्यापि तदङ्कबोधिका व्यमोचि नाभ्रभ्रमणी कदाचन ॥३३॥

महौजसा महाकान्तिना महाबलेन वा महाप्रतापेन वा । 'ओजो दीप्तिप्रकाशयोः । अवष्टम्भे बले धातुतेजसोः' इत्यनेकार्थः । 'प्राणः स्थामतरःपराक्रमबलद्युम्नानि शौर्यौजसी' इति हैम्याम् । ओजःशब्देन प्रतापोऽप्युच्यते । यथा नैषधे—'तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा । तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥' इति । यदास्येन नाथीमुखेन समं सार्धं मृधे संग्रामे निरोजसा निर्बलेन एणलक्ष्मणा मृगलाञ्छनेन चन्द्रेण अभाजि भग्नम् । पलायितमित्यर्थः । यतो यस्मात्कारणात् अमुना विधुना तस्य भङ्गस्य अङ्कश्चिह्नं तस्य बोधिका ज्ञापयित्री कथयित्री वा । 'निजात्रिनेत्रावतरत्वबोधिका' इति नैषधे । कदाचनापि कस्मिन्नपि प्रस्तावे । अद्ययावदित्यर्थः । अभ्रे आकाशे भ्रमणी पर्यटनम् । 'विधेः कदाचिद्भ्रमणी विलासे' इति नैषधे । नभसि भ्रान्तिर्न व्यमोचि न मुक्ता । नेत्यव्ययं निषेधे ॥

त्रिनेत्रनेत्रानलभस्मितात्मभूप्रभोर्जगन्निर्जयवादनोचितः ।
जगत्कृतादाय यदङ्गनिर्मितौ किमेष कम्बुर्गलकन्दलीकृतः ॥ ३४ ॥

जगत्कृता विश्वविधायिना धात्रा यदङ्गनिर्मितौ नाथीदेहनिर्माणे । किमुत्प्रेक्ष्यते—एष प्रत्यक्षः कम्बुः शङ्खो गलकन्दलीकृतः कण्ठपीठतां प्रापित इव । किं कृत्वा । आदाय गृहीत्वा अर्थात् कम्बुम् । कस्य । त्रिनेत्रः शिवस्तस्य नेत्रं तृतीयलोचनं तस्यानलेन कोपवह्निना भस्मितस्य ज्वलितस्य आत्मभूप्रभोः स्मरराजस्य । 'आत्मभूः स्मरवेधसोः' इत्यनेकार्थः । किंभूतं कम्बुम् । जगतां सुरासुरनराणां निर्जये वादनस्योचितो योग्यः ॥

अनन्यलावण्यतरङ्गचङ्गतां नितम्बलीलापुलिनं च बिभ्रती ।
धुनीव रोधोविहसन्मृणालिकां भुजाद्वयीं या बिभरांबभूवुषी ॥ ३५ ॥

या नाथी भुजाद्वयीं बाहुयुगलीम् । 'अस्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः'

इति नैषधे। बिभरांबभूवुषी बिभर्ति स्म। केव। धुनीव। यथा सरित् रोधसि तटे विहसन्तीमुन्मिषन्तीं मृणालिकां बिसलतां धत्ते। या किं कुर्वती। अनन्यस्यासाधारणस्य लावण्यस्य रूपातिशयस्य तरङ्गाणां चङ्गतां चारुताम्। 'राजते जिनवचनपद्धतिरुक्तिचङ्गिममालिनी' इति पद्मसुन्दरकविकृतसंस्कृते चङ्गशब्देन मनोज्ञः। पुनः किं कुर्वती। नितम्ब आरोहः स्त्रीकट्याः पश्चाद्भागः। 'नितम्बारोहौ स्त्रीकट्याः पश्चाज्जघनमग्रतः' इति हैम्याम्। स एव लीलाकारि विलासविधायकमर्थान्मध्यपदलोपाद्वा पुलिनं तटं बिभ्रती धारयन्ती॥

सकुङ्कुमैतद्वदनेन निर्जितं जिगीषया तच्छलदर्शनोत्सुकम्।
किमागतं कोकनदं तदन्तिके चकास्ति तस्या नवपाणिपल्लवः॥ ३६॥

तस्या नाथीदेव्या नवनं नवः स्तुतिः। 'णु स्तुतौ'। सलक्षणतया दातृतया वा स्तुतियुक्तो यः पाणिपल्लवः करकिसलयं स चकास्ति। किमुत्प्रेक्ष्यते—कोकनदं रक्तोत्पलं तस्य मुखस्य समीपे पार्श्वे आगतं समेतमिव। किंभूतम्। सह कुङ्कुमेन घुसृणेन वर्तते तादृशा। रक्तीभूतेनेत्यर्थः। एतस्याः कुंराकान्ताया वदनेन मुखेन निर्जितं पराभूतम्। 'अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः' इति विदग्धमुखमण्डनकाव्ये। तथा— 'स्पर्धामिलत्कुङ्कुमरोषभासा' इति नैषधेऽपि। अत एव। पुनः किंभूतम्। तस्य मुखस्य च्छलस्य स्खलितस्य दर्शने अवलोकने उत्सुकमुत्सुकीभूतम्। कया। जिगीषया अर्थात्स्वशत्रोस्तन्मुखस्यैव जेतुमिच्छया। प्रतिपक्षो हि छले प्राप्ते परिभूयते॥

पृथक्पृथक्पञ्चमुखद्विषन्मुखान्निहन्तुकामेन रुषा मनोभुवा।
शराश्रये यत्करनाम्नि कल्पिता अमी शराः पञ्च किमङ्गुलीमयाः॥ ३७॥

मनोभुवा चेतोजन्मना स्मरेण यस्या हीरजनन्याः करः पाणिरेव नाम यस्य तादृशे तस्मिन्वा शराश्रये तूणीरे। किमुत्प्रेक्ष्यते—अङ्गुलीमयाः करशाखारूपाः पञ्च कल्पद्रुमसंख्याकाः अमी जनदृग्गोचराः कल्पिता रचिता इव। स्मरेण किं कर्तुकामेन। रुषा स्वव्यापादनापादनोदितद्वेषाकोपेन पञ्चमुखः शंभुरेव द्विषन् वैरी तस्य मुखान् पञ्चसंख्याकानि वक्त्राणि। मुखशब्दः पुंनपुंसके। पृथक् पृथक् भिन्नानि भिन्नानि कृत्वा निहन्तुकामेन छेत्तुमिच्छता। एतावता पञ्च शिरांसि छेत्तुमित्यर्थः। मुखशब्देन शिरःसमेतमेव। यथा दशमुखस्य। 'हरिहरि हरिणीदृशो निमित्तं दश दशकंधरमौलयो लुठन्ति' इति खण्डप्रशस्तौ। यथा तत्र दश मौलयस्तथात्रापि पञ्चापि मस्तकानि इति॥

यदीयपृष्ठे कनकत्विषि स्मितप्रसूनशून्येतरकुन्तलच्छटा।
शिलातले स्वर्गिगिरेरिव ग्रहाङ्किताभ्रवीथी प्रतिबिम्बिता व्यभात्॥ ३८॥

कनकत्विषि काञ्चनकान्तिनि यस्या इदं यदीयं नाथीसंबन्धि तच्च तत्पृष्ठं च तनोश्चरमः प्रदेशः। 'पृष्ठं तु चरमं तनोः' इति हैम्याम्। तत्र स्मितैर्विकसितैः प्रसूनैः पुष्पैः

शून्येतरा निर्भरभृता कुन्तलच्छटा केशश्रेणिर्व्यभाद्वभासे । केव । अभ्रवीथीव। •••-••••••••• यथा स्वर्गिगिरेर्मेरोः काञ्चनेन स्वर्णत्वेन त्विषते दीप्यते इति काञ्चनत्विट् तस्मिन् तादृशे शिलातले प्रतिबिम्बिता । 'तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजि-श्रियः' इति नैषधे। अभ्रवीथी गमनपद्धतिर्विभाति। 'वीथी वर्त्मनि पङ्क्तौ च गृहाङ्गे ना-ट्यरूपके' इत्यनेकार्थः । किंभूता अभ्रवीथी । ग्रहैरुपलक्षणान्नक्षत्रताराग्रहैः अङ्किताः सहिताः॥

परानवाप्यान्निजवासपत्तनान्मनोभिधानान्मदनावनीभुजः।
जगद्विजेतुं चलितस्य हृत्सुमस्रजा पुरो वन्दनमालिकायितम् ॥ ३९ ॥

यस्या नार्थीदेव्या हृत् हृदयं तत्र वक्षसि सुमस्रजा पुष्पमालया मदनावनीभुजः स्मर-राजस्य पुरोऽग्रे पुरस्ताद्वन्दनमालिकायितं मङ्गल्यदामवदाचरितम् । मङ्गलाय जातमि-त्यर्थः। किंभूतस्य मदनस्य। चलितस्य प्रस्थितस्य । कुतः । परैरन्यराजन्यजनैरवाप्तुं योग्यमवाप्यं न अवाप्यमनवाप्यं तस्मात्प्राप्तुमशक्यात् मनोभिधानादर्थात् नार्थीचित्त-नाम्नः निजस्यात्मीयस्य पत्तनादधिष्ठाननगरात्। राजधान्या इत्यर्थः। एतावता स्वभर्तारं विना परेण केनापि पुंसा तन्मनः सर्वथापि ग्रहीतुमशक्यम् । एतेन विशेषणेन तस्याः स-तीत्वमसूचि। चलितस्य किं कर्तुम्। विजेतुं स्ववशीकर्तुम्। किम्। जगत् त्रिभुवनम् ॥

यदीयहृत्केलिनिकेतखेलिनं झषाङ्कमाकारयितुं सुहृत्तया।
सितांशुनेव प्रहितोडुमण्डली विभाति यद्वक्षसि मौक्तिकावली ॥ ४० ॥

यस्या वक्षसि हृदये मौक्तिकावली हारलता हारमौक्तिकपङ्क्तिर्विभाति। उत्प्रेक्ष्यते— सितांशुना चन्द्रेण सुहृत्तया स्वमित्रत्वेन झषाङ्कं मच्छलाञ्छनं काममाकारयितुं स्वपार्श्वे आह्वातुं प्रहिता प्रेषितोडुमण्डली तारकश्रेणिरिव। किंभूतं झषाङ्कम्। यदीयं नार्थीसं-बन्धि हृन्मन एव केलिनिकेतं क्रीडागृहं तत्र खेलतीत्येवंशीलम् । 'भीमं कृत्वाङ्कखे-लिनम्' इति पाण्डवचरित्रे ॥

रथाङ्गलीलां दधतौ प्रभाम्भसि स्तनौ तदीयौ स्फुरतः सचूचुकौ।
मरन्दलुभ्यद्भ्रमरानुषङ्गिनौ(णौ) सुवर्णपङ्केरुहकुड्मलाविव ॥ ४१ ॥

प्रभाम्भसि यत्कायकान्तिनीरपूरे रथाङ्गयोश्चक्रवाकयोर्लीलां शोभां दधतौ धारयन्तौ तस्या इमौ तदीयौ नार्थीसंबन्धिनौ कुचौ स्फुरतः। किंभूतौ। सह चूचुकाभ्यां स्तनवृ-न्ताभ्यां वर्तेते यौ। उत्प्रेक्ष्यते—सुवर्णपङ्केरुहयोः कनककमलयोः कुड्मलौ कोशाविव। कु-ड्मलौ पुंक्लीबलिङ्गे। किंभूतौ। मरन्देषु मधुषु लुभ्यतां लोलुपीभवतां भ्रमराणामनुषङ्गः सङ्गो ययोः। उपरिभ्रमरपरीरम्भितावित्यर्थः ॥

तनूलतागाधतरङ्गितप्रभाप्रतानपाथोधिपयस्तितीर्षया।
हरिन्मणीसेतुरिवात्मजन्मना व्यधायि रोमावलिरेणचक्षुषः ॥ ४२ ॥

यस्या एणचक्षुषो मृगेक्षणाया रोमावलिर्लोमलेखा । इवोत्प्रेक्ष्यते—आत्मजन्मना स्मरेण हरिन्मणीनां मरकतरत्नानाम् । नीलरत्नघटित इत्यर्थः । सेतुः पद्येत्र व्यधायि निष्पादितः । कया । तनूलता नार्थीकाययष्टिः तस्या अगाधमतिशायि अलब्धमध्यं तथा तरङ्गितं कल्लोलितं यत् प्रभाणां कान्तीनां प्रतानं वृन्दः स एव पाथोधिः समुद्रः तस्य पानीयानां तितीर्षया तरीतुमिच्छया । अथ वा 'रिरंसया' इति पाठे तु समुद्रजले सहावरोधेन खेलितुमिच्छया । श्रूयते हि 'स्तम्भतीर्थे खासमोहल इति नाम्नः स्वमन्दिराज्जलधिजले खेलनार्थी केनापि पातिसाहिना सेतुः कारितोऽभूत्तदाकृतिरधुनापि किंचित् दृश्यते श्रूयते च' इति । अत्रोत्प्रेक्षार्थे स्मरेण, वास्तवार्थे त्वात्मजन्मना धात्रा । 'मनःशृङ्गारसंकल्पात्मनो योनिः' इति स्मराभिधानम् । तथा 'नाभिपद्मात्मभूरपि' इति धातुरभिधा । इदं द्वयमपि हैम्याम् ॥

द्रवीभवद्भूरिसिताभ्रचन्दनप्रगल्भवाल्हीककुरङ्गनाभिभिः ।
विलिप्य काचित्कुतुकात्पृथग्वलीः कदाचिदेतामिदमूचुषी सखी ॥४३॥

काचित्सखी कदाचित्प्रसाधनसमये एतां नार्थीदेवीमिदमग्रे वक्ष्यमाणमूचुषी कथितवती । किं कृत्वा । कुतुकात्कौतूहलाद्वलीरुदरवर्तिमांससंकोचलक्षणा रेखा विलिप्य लिख्वा । काभिः । द्रवीभवन्त्यः सपङ्कजलभावं भजन्त्यो याः भूरिः प्रचुरः, सिताभ्रः कर्पूरो यत्र तादृक्चन्दनं श्रीखण्डम्, तथा प्रगल्भं मनोज्ञं वाल्हीकं कुङ्कुमम्, तथा कुरङ्गनाभिः कस्तूरिका, ताभिः । कथम् । पृथक् एकां वलीं चन्दनेन, द्वितीयां वलीं कुङ्कुमेन, तृतीयां वलिं कस्तूरिकयेत्यर्थः । इदं किमुवाच तदेवोच्यते ॥

त्वया स्वकीर्त्या सुमनस्तरङ्गिणी वचोविलासेन पुनः सरस्वती ।
यमस्वसा कुन्तलभङ्गिभिर्जिता भजन्त्युपेत्य त्रिवलीछलादिव ॥ ४४ ॥

हे सखि, त्वया भवत्या स्वकीर्त्या अद्वैतपतिव्रताव्रतोद्भूतात्मयशसा सुमनस्तरङ्गिणी सुरसरिद्गङ्गा । पुनर्वचोविलासेन वचनचातुर्येण सरस्वती ब्रह्मपुत्री । पुनः कुन्तलानां केशानां भङ्गिभी रचनाभिर्यमस्वसा यमुना तिस्रोऽपि नद्यो जिताः सन्त्य उपेत्य पार्श्वे आगत्य त्रिवलिच्छलादुदरस्थवलित्रिककपटाद्भजन्तीव सेवन्ते इव । इत्यनयासाधारणयोत्प्रेक्षया तत्तनूलतायां त्रिवेणीसंगमोऽपि सूचितस्तेन च सा तीर्थभूतापि प्रतिपादिता । तीर्थे च महापुरुषागमनं संभवत्येव । तेन महापुरुषस्य हीरविजयसूरेरत्रावतरणं युक्तमेवेति ॥ युग्मम् ॥

निरीक्ष्य लक्ष्मीं निजभर्तृमातरं स्थितां सदाध्यास्य विजृम्भि पङ्कजम् ।
इवानुकर्तुं रतिरात्मनापि तां यदीयनाभीनलिने निषेदुषी ॥ ४५ ॥

रतिः कन्दर्पपत्नी यदीयनाभीनलिने नाभीतुन्दकूपिकाकमले । 'नाभिः स्यात्तुन्दकूपिका' इति हैम्याम् । 'नाभीविलेपात्पुनरुक्तयन्तीम्' इति नैषधे । निषेदुषी स्थितवती । इवोत्प्रेक्ष्यते—आत्मना स्वेन स्वयमपि लक्ष्मीमनुकर्तुं कमलायाः सदृशीं भवितुमिव ।

किं कृत्वा । निरीक्ष्य दृष्ट्वा । अर्थात् काम् । तां लक्ष्मीम् । किंभूताम् । निजस्यात्मनो भर्तुः कन्दर्पस्य मातरं जननीं स्वश्वश्रूम् । पुनः किंभूताम् । स्थितां वसन्तीम् । किं कृत्वा । विजृम्भि पङ्कजं स्मेरारविन्दं सदा नित्यमध्यास्य आश्रित्य ॥

अगण्यलावण्यतरङ्गचङ्गिमानुषङ्गिशोचिः सुरसिन्धुसंनिधौ ।
निखेलितुं किं पुलिनं स्मराभ्रमूप्रियस्य यस्या जघनं विधिर्व्यधात् ॥४६॥

विधिर्ब्रह्मा यस्या जघनं स्त्रीकट्या अग्रेतनप्रदेशः । 'पेडू' इति जने प्रसिद्धम् । तद्व्यधात् चकार । किमुत्प्रेक्ष्यते—स्मरः काम एवाभ्रमूप्रिय ऐरावणस्तस्य । अभ्रमूशब्दो दीर्घोकारान्तः । तस्य शास्त्रोक्तानि प्रागुक्तानि सन्ति । खेलितुं क्रीडितुं पुलिनं जलोज्झितं तटमिव । कुत्र । अगण्यं प्रमातुमशक्यमेतावत्तया सम्यङ्निश्चेतुमशक्यं वा यल्लावण्यं यद्यपि 'सद्गमनसन्निरीक्षणसज्जल्पनमिति वदन्ति लावण्यम् । स्पृहणीयो रतिसुभगः स्पर्शगुणो भवति सौभाग्यम् ॥' एवं प्रतिपादितमस्ति, तथाप्यत्र तु कोऽप्यद्वैतरूपातिशय एव लावण्यमुच्यते न प्राक्तनः । वपुः सुभगता । तस्य तरङ्गाणां लहरीणाम् । 'रूपचतुरपणविभवघणयौवनलहरइं जाइ । एणइ अवसरि रंडापणुं पगिपगि षडकइ माइ ॥' इति दोधकेऽप्युक्तम् । चङ्गिमश्चारुत्वस्यानुषङ्गोऽस्त्यस्य चङ्गिमस्तु प्रागुक्तम् । अत्रेमन्प्रत्ययः । तादृक् । शोचिरेव कान्तिरूपा सुरसिन्धुर्गङ्गा तस्याः संनिधौ पार्श्वे ॥

अजय्यवीर्यं मृडमन्यहेतिभिर्विजित्वरीभिर्जगतोऽपि जानता ।
स्मरेण धात्रा किमु कार्यते स्म यन्नितम्बचक्रं युवयोगिधैर्यजित् ॥ ४७ ॥

स्मरेण कामेन कर्त्रा धात्रा विश्वसृष्टिकृता पार्श्वे । किमुत्प्रेक्ष्यते—यस्या नितम्बः कटीपश्चाद्भाग आरोहः एव चक्रं कार्यते स्म । कारितम् । स्मरेण किं कुर्वता । जानता अवधारयता । किं कर्मतापन्नम् । मृडमीश्वरम् । किंलक्षणम् । अजय्यं जेतुमशक्यं वीर्यं विक्रमो यस्य तम् । काभिः । अन्याभिरपराभिर्हेतिभिर्धनुर्बाणकृपाणकुन्तशक्तिप्रमुखप्रहरणैः । किंभूताभिः । जगतः समस्तस्य विश्वजनस्य विजित्वरीभिर्जयनशीलाभिः । तर्हि चक्रेणापि किं भावि । अत एव किं चक्रं युवानो यावत्रिजगत्तरुणा योगिनः समाधिभाजः तेषां धैर्यं सत्त्वमतिशयवद्धीर्यमवष्टम्भं जयतीति । शंभुरपि योगी । अतस्तद्धैर्यविध्वंसकारकं चक्रं कारितमिति ॥

करीन्द्रहस्तात्कदलीप्रकाण्डतो निरस्य कार्कश्यमसारतां पुनः ।
इमौ किमादाय परस्परोपमं यदूरुयुग्मं विधिना विनिर्ममे ॥ ४८ ॥

विधिना विधात्रा यस्या ऊरुयुग्मं विनिर्ममे कृतम् । किंभूतम् । परस्परमन्योन्यमेवोपमा सादृश्यं यस्य तत् । किमुत्प्रेक्ष्यते—इमौ करीन्द्रहस्तकदलीप्रकाण्डौ आदाय गृहीत्वा किमु चक्रे । किं कृत्वा । निरस्य अपाकृत्य कर्षयित्वा । किम् । कार्कश्यं कठिनताम् । कस्मात् । करीन्द्रः प्रधानहस्ती भद्रजातीयगन्धसिन्धुरस्तस्य हस्तः शुण्डादण्ड-

स्तस्मात् । पुनः किं कृत्वा । निरस्य अपास्य । काम् । असारताम् । कुतः । कदली-प्रकाण्डतः रम्भाद्रुमस्य मूलशाखावधिप्रदेशस्यान्तरालभागात् ॥

यदूरुजङ्घायुगयोर्विवृत्सतोः परस्पराद्वैतविरोधिताजुषोः ।
द्विराजताया भयतस्तदन्तरानिवासिजानू किमलक्ष्यतां गतौ ॥ ४९ ॥

यस्या ऊरुजङ्घायुगयोरन्तराले मध्ये निवासिनौ नितरां वसनशीलौ जानू ऊरुपर्वणी अलक्ष्यतामदृश्यभावं गतौ प्राप्तौ । किं कर्तुमिच्छतोः । विवृत्सतोः वधितुमिच्छतोः । किंभूतयोर्यदूरुयुगयोः—परस्परमन्योन्यं या अद्वैतता असाधारणत्वं तया विरोधितावैरिभावः । ऊरू जङ्घे आक्रम्य तदुपरिस्थते । इदमेव परमविद्वेषितामूलम् । तां जुषेते सेवेते । किमुत्प्रेक्ष्यते—द्वौ राजानौ यत्र तद्विराजं द्विराजस्य भावो द्विराजता द्वैराज्यस्य भयतो भयात् किमदृश्यतां याताविव ॥

रतीशगेहेऽजनि यत्र जङ्घयोर्गृहाश्रयस्थूणिकयोरिव द्वयम् ।
यदीयगुल्फावपि गुप्ततां गताविवाङ्घ्रिशोचिः सलिले निमज्जनात् ॥ ५० ॥

यत्र देहे जङ्घयोर्द्वयमजनि । उत्प्रेक्ष्यते—रतीशस्य स्मरस्य गेहे मन्दिरे गृहाश्रययोः सौधाधारभूतयोः स्थूणिकयोः स्तम्भयोर्द्वयमिव । अपि पुनर्यदीयगुल्फौ नारीचरणग्रन्थी गुप्ततां प्रच्छन्नतां प्राप्तौ । स्त्रीणां गुल्फावदृश्यावेव वर्ण्येते । यथा नैषधे—'अरुन्धती काममपुरन्ध्रिलक्ष्मीजम्भद्विषद्दारनवाम्बिकानाम् । चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यददृश्यसिद्धिः ॥' एतद्वृत्तिः—'वसिष्ठपत्नी च, रतिश्च, लक्ष्मीश्च, जम्भद्विषद्दाराः शची सा च, नवाम्बिकानवदुर्गास्ताश्च, एतासामियं भैमी चतुर्दशी चतुर्दशसंख्यापूरिकापि चतुर्दशी तिथिश्च तत्तुल्येत्यर्थः । तदिहास्यां भैम्यामुचितैव यतो हेतोरदृश्यसिद्धिरदृश्यतयावस्थानम् अन्तर्धानविधिविद्या गुल्फद्वयेनाप्ता । अरुन्धत्यादिसंनिधाने अदृश्यसिद्धिर्युक्तैव । चतुर्दशीतिथौ चादृश्यसिद्धिर्जायते इत्यागमशास्त्रसंप्रदायः । गुल्फयोश्चानभिव्यक्तत्वं सुलक्षणम्' इति । तत्रोत्प्रेक्ष्यते—अङ्घ्योश्चरणयोः शोचिः कान्तिरेव सलिलं पानीयं तस्मिन्निमज्जनाद्ब्रुडनादिव । जले निमग्नं न दृश्यते इति प्रसिद्धिः ॥

पदारविन्दोन्नतताभिरात्मनः पराजितैः कुञ्जरराजयानया ।
अगोपि मन्दाक्षविलक्षितात्मभिर्वने वसद्भिः कमठैरिवाननम् ॥ ५१ ॥

कमठैः कच्छपैराननं स्वमुखमगोपि गुप्तीकृतम् । क्रोटिक्षेपणादिति शेषः । किं कुर्वद्भिः । वने जले विपिने वा वसद्भिस्तिष्ठद्भिः। 'वनं प्रस्रवणे गेहे प्रवासेऽम्भसि कानने । समूहे पर्वतेऽपि स्यात् (प्रस्रवणे निर्झरे)' इत्यनेकार्थः । किमुत्प्रेक्ष्यते—कुञ्जरराजयानया गजेन्द्रगमनया यया आत्मनः स्वस्य पदारविन्दयोश्चरणकमलयोरुन्नतताभिः पराजितैः सद्भिः मन्दाक्षेण लज्जया विलक्षितो विमनीभूत आत्मा चित्तं यस्य तादृशैः किमास्यमगोपि । 'आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे । परमात्मनि जीवेऽर्के हुताशनसमीरयोः ॥ स्वभावे, इत्यनेकार्थः ॥

यदीयपादौ सरलाङ्गुली द्युता करम्बितौ झांकृतिकारिनूपुरौ ।
श्रियानुयातः कमले दलद्दले मरन्दनिःस्यन्दिनदत्सितच्छदे ॥ ९२ ॥

यदीयौ पादौ नार्थीसंबन्धिनौ चरणौ श्रिया शोभया कमले पद्मे अनुयातः अनुकुरुतः। सदृशौ भवत इत्यर्थः। किंभूतौ पादौ। सरला अकुटिला अङ्गुलयः पदशाखा ययोः। पुनः किंभूतौ । द्युता कान्त्या करम्बितौ व्याप्तौ । पुनः किंभूतौ । झांकातिं रणझणितिशब्दं कुरुत इत्येवंशीलौ नूपुरौ मञ्जीरौ ययोः । कमले किंभूते । दलन्ति विजृम्भमाणानि दलानि पत्राणि ययोः । पुनः किंभूते । मरन्दं मधु निःस्यन्देते क्षरत इत्येवंशीले । तथा—नदन्तः शब्दायमानाः सितच्छदा हंसा ययोस्तौ पश्चात्कर्मधारयः ॥

प्रभाप्रथातैलकरम्बितान्तरे यदङ्घ्रिपात्रेऽङ्गुलिवर्तिवर्तिनः ।
नखाः प्रदीपा इव विस्फुरत्त्विषोऽपुषन्विभूषामभिभूततामसाः ॥ ९३ ॥

नखा अर्थान्नार्थीकामाङ्कुशाः प्रदीपा इव विभूषां शोभामपुषन् पुष्टामकार्षुः । क्व। यदङ्घ्रिपात्रे यस्याश्चरणनाम्नि अमत्रे भाजने। किंभूते । प्रभानां कान्तीनां प्रथा विस्तार एव तैलं स्नेहस्तेन करम्बितमर्थात्संपूर्णमन्तरं मध्यं यस्य तस्मिन्। नखाः किंभूताः । अङ्गुलय एव वर्तयो दशास्तासु वर्तन्ते तिष्ठन्तीत्येवंशीलाः । पुनः किंभूताः । विस्फुरन्ती विद्योतमाना त्विट् ज्योतिर्येषां ते । पुनः किंभूताः । अभिभूता ध्वस्तास्तामसास्तमसां ध्वान्तानां समूहा यैस्ते । 'तामसास्तिग्मरोचिषः' इति वीतरागस्तवे ॥

व्यलीलसत्पाटलिमा पदाम्बुजद्वयस्य यस्याः सरसीजचक्षुषः ।
स्वमार्दवेनाभिभवं विधित्सतः प्रवालपुञ्जैरुपदीकृतः किमु ॥ ९४ ॥

सरसीजं कमलं तद्वच्चक्षुर्लोचनं यस्यास्तादृश्या यस्याः पदाम्बुजयोश्चरणकमलयोर्द्वयस्य युगलस्य पाटलिमा रक्तता व्यलीलसद्भासते स्म । किमुत्प्रेक्ष्यते—स्वमार्दवेन निजसुकुमारतया अभिभवं पराभूतिं विधित्सतो विधातुमिच्छतः चरणारविन्दद्वन्द्वस्य प्रवालपुञ्जैः पल्लवपटलैः उपदीकृतः किमु । ढौकित इव ॥

असौ जयन्ती जलजं स्वपाणिना रदैश्च तारश्रियमात्मना रमाम् ।
मृगाङ्कमास्येन रुचा च चम्पकं स्मरस्य हेतिः किमु विश्वजित्वरी ९५

असौ नार्थीदेवी । किमुत्प्रेक्ष्यते—विश्वजित्वरी जगजयनशीला स्मरस्य कामस्य हेतिः किमु शस्त्रमिव । जगज्जिष्णुतां दर्शयति—असौ किं कुर्वती । जयन्ती पराभवन्ती । किम् । जलजं कमलम् । केन । स्वपाणिना निजहस्तेन । पुनः काम् । तारश्रियं तारकाणां निर्मलमौक्तिकानां वा । 'तारो निर्मलमौक्तिके' इत्यनेकार्थवचनात् । यद्वा रजतानां श्रियं शोभाम् । नक्षत्रवाची तारशब्दोऽकारान्तोऽप्यस्ति । 'प्रथममुपहृत्यार्थं तारैरखण्डिततण्डुलैः' इति नैषधे । कैः । रदैर्दन्तैः । पुनः काम् । रमां लक्ष्मीम् ।

केन । आत्मना स्वरूपेण शरीरेण वा आत्मशब्देन च वपुः । प्रागनेकार्थोक्तेन दर्शितमस्तीति । पुनः कम् । मृगाङ्कं चन्द्रम् । केन । आस्येन वदनेन । अपि पुनः किम् । चम्पकं हेमपुष्पकम् । चम्पककुसुममित्यर्थः । जातावेकवचनम् । कया । रुचा कान्त्या ॥ इति नाथीसर्वाङ्गवर्णनम् ॥

अथो मिथः प्रीतिपरीतदम्पती इमौ कलाकेलिविलासशीलिनौ ।
विलेसतुः केलिसरः सरिद्वनीगिरीन्द्रभूमीषु रतिस्मराविव ॥ ९६ ॥

अथो कुंरानाथीदेव्योर्गुणरूपवर्णनानन्तरं तयोर्विविधक्रीडावर्णनारम्भः । मिथः परस्परं प्रीत्या स्नेहेन प्रमोदेन वा परीतौ व्याप्तौ दम्पती स्त्रीभर्तारौ इमौ नाथीकुंराख्यमहेभ्यौ अथवा इमौ पूर्वं व्यावर्णितस्वरूपौ दम्पती नाथीकुंराव्यवहारिणौ केलये क्रीडार्थं ये सरांसि पद्माकराः सरितो नद्यः वन्य उद्यानानि गिरीन्द्राः सर्वक्रीडास्पदोपेताः पर्वताः तेषां भूमीषु स्थानकेषु विलेसतुः विविधक्रीडां चक्रतुः । इमौ किंभूतौ । कलाकेलेः कामस्य विलासं लीलां शीलतो भजत इत्येवंशीलौ । इवोत्प्रेक्ष्यते—इमौ रतिस्मरौ केलतीकामाविव ॥

सकाकतुण्डैणमदद्रवाङ्कितोरसोः परिक्षालनतः कदापि तौ ।
सुतामिवार्कस्य विहारवाहिनीं विनिर्मिमाते जलकेलिलालसौ ॥ ९७ ॥

कदापि कस्मिन्नपि प्रस्तावे दम्पती नाथीकुंराख्यौ सह काकतुण्डेन कृष्णागुरुणा वर्तते तादृशस्यैणमदस्य कस्तूरिकाया द्रवः पङ्कस्तेनाङ्कितयोर्व्याप्तयोरुरसोर्वक्षःस्थलयोः परिक्षालनतो धावनतः विहारवाहिनीं विलासनदीम् । 'विहारस्तु जिनालये । लीलायां भ्रमरे स्कन्धे' इत्यनेकार्थः । 'निद्रां विहारार्धपथे गतानाम्' इति रघौ । अर्कस्य सुतामिव यमुनामिव कस्तूरीद्रवैः श्यामलीकृतजलाम् अत एव यमुनोपमां निर्ममाते कुर्वाते । किंभूतौ । जलकेलौ सलिलक्रीडायां लालसौ लोलौ । 'लालसा लोलयाच्ञयोः । तृष्णातिरेके औत्सुक्ये' इत्यनेकार्थः ॥

कुमुत्स्मिता षट्पदपङ्क्तिकुन्तला स्मितोत्पलाक्षी कजकुड्मलस्तनी ।
प्रियेव पाथःप्लवने सहंसिका तरङ्गबाहुः सरिदालिलिङ्ग तम् ॥ ९८ ॥

सरित् क्रीडानदी पाथःप्लवने जलकेलिसमये स्नानविधाने तं महेभ्यं कुंरासाधुमालिलिङ्ग। केव । प्रियेव । यथा पाणिगृहीती पत्नी स्वपतिमाश्लिष्यति । किंभूता नदी प्रिया च । कुमुत्कैरवम् । जातावेकवचनम् । तदेव तद्वद्वा स्मितमीषद्धसितं यस्याः सा । भर्त्रा श्लेषणसमये स्त्रियाः किंचित्स्मितं जायते । पुनः किंभूता । षट्पदानां भ्रमराणां पङ्क्तयः श्रेणयस्ता एव तद्वच्च श्यामाः कुन्तला केशा यस्याः । पुनः किंभूता । स्मितं विकसितं यदुत्पलं तदेव तद्वद्वा अक्षिणी चक्षुषी यस्याः । 'किमु कुवलयनेत्राः सन्ति नो नाकनार्यस्त्रिदशपतिरहल्यां तापसीं यत्सिषेवे' इति चम्पूकथायाम् । पुनः किंभूता । कजकुड्मलौ कमलमुकुलौ तावेव तद्वद्वा स्तनौ कुचौ यस्याः । पुनः किंभूता । हंस एव हंसकः । 'हंसको

हंसनूपुरयोः' । सह हंसकैर्मरालैर्हंसकाभ्यां नूपुराभ्यां वा वर्तते या । पुनः किंभूता । तरङ्गौ अर्थादुभयपार्श्ववर्तिनौ कल्लोलौ तावेव च तत्तुल्यौ बाहू भुजौ यस्याः ॥

विजृम्भिजाम्बूनदपद्मनिष्पतत्परागपिङ्गीकृतवारिशालिनि ।
समं करिण्या करिणेव पङ्कजाकरेऽमुनाक्रीडि कुरङ्गचक्षुषा ॥ ५९ ॥

अमुना कुंरामहेभ्येन कुरङ्गचक्षुषा स्वमृगलोचनया आत्मस्त्रिया समं कदाचित्पङ्कजाकरे कमलकलिततटाके अक्रीडि क्रीडां चक्रे । किंभूते पङ्कजाकरे । विजृम्भीणि विस्मेराणि जाम्बूनदानि सौवर्णानि यानि पद्मानि तेभ्यो निष्पतद्भिर्निःसरद्भिर्विगलद्भिः परागै रजोभिः पिङ्गीकृतेन पीततां प्रापितेन वारिणा जलेन शालते शोभते इत्येवंशीलस्तस्मिन् । कनककमलसद्भावश्चम्पूकथोक्तेन प्राग्दर्शितोऽस्तीति । केनेव । करिणेव । यथा करिणा हस्तिना करिण्या स्वहस्तिन्या समं विन्ध्याचलजलाशये क्रीड्यते ॥

स्मितारविन्दोदयदिन्दुविभ्रमादिवाम्बुलीलासमये तयोर्मुखे ।
विमुग्धसारङ्गचकोरशावका मरन्दपीयूषपिपासयाभजन् ॥ ६० ॥

विमुग्धा अचतुराः सारङ्गाणां भृङ्गाणाम् । 'सारङ्गो हरिणे शैले कुञ्जरे चातके खगे । शबले चिञ्चिरीके च' इत्यनेकार्थतिलके । चकोराणां ज्योत्स्नाप्रियाणां शावका बाला अम्बुलीलासमये जलक्रीडाकरणव्यतिकरे तयोर्नाथीकुंरामहेभ्ययोर्मुखे वक्त्रे अभजन् सेवन्ते स्म । कया । मरन्दानां मधूनां पीयूषाणाममृतानां च पिपासया पातुमिच्छया । इवोत्प्रेक्ष्यते—स्मितारविन्दस्य विकसितकमलस्य तथा उदयत उदयं गच्छत इन्दोश्चन्द्रस्य च भ्रमाद्भ्रान्तेः । 'कणे हत्य चकोरीणां गणः पीत्वा सुधासवम् । अजायत मदेनेव गुञ्जापुञ्जारुणेक्षणः ॥' इति चकोराणां सुधापानं वस्तुपालकीर्तिकौमुद्याम् ॥

प्रफुल्लकङ्केल्लिरसालमल्लिकाकदम्बजम्बूनिकुरम्बचुम्बिते ।
अलीव साकं सुदृशा स निष्कुटे कदापि रेमे श्रितसूनशीलनः ॥ ६१ ॥

स महेभ्यः कदापि कस्मिन्नपि समये सुदृशा स्वस्त्रिया साकं सार्धं निष्कुटे गृहारामे रेमे क्रीडति स्म । क इव । अलीव । यथा भ्रमरो भ्रमर्या सममारामे रमते । किंभूतः । श्रितं निर्मितं सूनानां कुसुमानां शीलनमवचयमालाग्रन्थनप्रियावतंसीकरणादि येन । भृङ्गोऽपि पुष्पसेवी । किंभूते निष्कुटे । प्रफुल्लाः कुसुमिता ये कङ्केल्लयोऽशोकाः, रसालाः सहकाराः, मल्लिका विचकिलाः, कदम्बा नीपाः धाराकदम्बाश्च, जम्ब्वः श्यामफलाः प्रसिद्धाः तेषां निकुरम्बं वृन्दं तेन चुम्बिते कलिते ॥

रसालसालस्य तले विलासिना प्रणीय वीणां क्वणनानुवादिनीम् ।
अगीयत श्रोत्रसुधारसोपमं क्वचिन्मृगाक्ष्या सह किंनरेन्द्रवत् ॥ ६२ ॥

विलासिना क्रीडाशीलेन कुंरासाधुना मृगाक्ष्या स्वप्रियया नाथीदेव्या सह कुत्रापि कस्मिन्नपि वनप्रदेशे रसालसालस्य सहकारतरोस्तले अधोभूमौ श्रोत्रयोः कर्णयोः सुधा-

रसस्य अमृतनिस्यन्दस्य उपमा साम्यं यत्रैवंविधमगीयत गीतम् । किं कृत्वा । क्वणनं निजध्वनिमनुवदतीति अनुकरोतीत्येवंशीलां वीणां प्रणीय सज्जीकृत्य । किंवत् । किंनरेन्द्रवत् । यथा किंपुरुषेश्वरेण स्वरसेन स्त्रिया सह गीयते ॥

कदापि मन्दार इव स्मितद्रुमे विलासदोलामवलम्ब्य लीलया ।
न्यखेलि तेनोपवने मृगीदृशा समं स्वदेव्या द्युसदेव नन्दने ॥ ६३ ॥

कस्मिन्नप्यवसरे तेन व्यवहारिणा मृगीदृशा स्वदयितया सह उपवने पुरस्य वा स्वगृहस्य समीपारामे लीलया शृङ्गारभावजक्रियया न्यखेलि क्रीडितम् । 'लीला केलिर्विलासश्च शृङ्गारभावजा क्रिया' इत्यनेकार्थः । अत्र विलासः स्थानादीनां वैशद्यमित्यवचूर्णौ । किं कृत्वा । मन्दारे कल्पद्रुमे इव । कस्मिन्नपि स्मितद्रुमे विकसिततरौ । तरुशाखायामित्यर्थः । विलासार्थं दोलां क्रीडाकृते प्रेङ्खोलनमवलम्ब्याश्रित्य । केनेव । द्युसदेव । यथा देवेन स्वदेव्या समं मन्दारे मन्दारनाम्नि कल्पवृक्षे दोलां बद्ध्वा नन्दनवने क्रीड्यते ॥

कदाचिदिभ्यः कलधौतभूधरे चिखेल सार्धं परमाणुमध्यया ।
मृगाङ्कचूडामणिरद्रिचक्रिणस्तनूजयेवाद्भुतभूतिभासुरः ॥ ६४ ॥

इभ्यो व्यवहारी कदाचित्कस्मिन्नपि वासरे कलधौतभूधरे क्रीडार्थनिर्मितरजतपर्वते परमाणुमध्यया स्वकृशोदर्या नाथीदेव्या समम् । 'अध्यापयामः परमाणुमध्याः' इति नैषधे । चिखेल खेलति स्म । श्वैत्याद्रूपतुल्योरूपमयो वा । तथा चम्पूकथायाम्—'राजते राजतेनायं सानुना सानुनायकः' इति । यथा शृङ्गं तथा सर्वोऽप्यद्रिः । क इव । मृगाङ्कचूडामणिरिव । 'मृगाङ्कचूडामणिवर्जनार्जितम्' इति नैषधे । यथा—ईश्वरोऽद्रिचक्रिणो हिमाद्रेस्तनूजया पुत्र्या पार्वत्या समं रूप्याचले कैलाशे खेलति । इभ्यः किंभूतः । अद्भुतया विद्वच्चेतश्चमत्कारकारिण्या भूत्या संपदा भासुरो नागरिकेषु दीप्यमानः । शिवस्तु भस्मना शुभ्रः । 'भूतिस्तु भस्मनि । मांसपाकविशेषे च संपदुत्पादयोरपि' इत्यनेकार्थः ॥

विनोदमेवं सृजतोरहर्निशं तयोः स्मराज्ञैकवशंवदात्मनोः ।
दिनानि दोगुन्दकदेवयोरिव प्रमोदभाजोरतिचक्रमुः क्रमात् ॥ ६५ ॥

तयोर्नाथीकुंराव्यवहारिणोः क्रमाद्विविधविलासकरणपरिपाट्या दिनानि वासरा अतिचक्रमुरतिक्रामन्ति स्म । तयोः किंभूतयोः । प्रमोदभाजोरानन्दमेदुरयोः । पुनः किंभूतयोः । स्मरस्य मदनस्याज्ञा आदेशः तस्या एकोऽद्वितीयो वशंवद आयत्त आत्मा चित्तं च ययोस्तौ । पुनः किं कुर्वतोः । एवं पूर्वोक्तप्रकारेण अहर्निशं निरन्तरं विनोदं क्रीडां सृजतोः । कयोरिव । दोगुन्दकदेवयोरिव । यथा दोगुन्दकदेवयोर्विविधक्रीडाकुर्वतोर्वासरा अतिक्रामन्ति ॥ इति दम्पत्योर्वनादिक्रीडाकरणादिः ॥

कदाचिदम्भोरुहिणीव निद्रया सुखं प्रसुप्ता प्रहरेऽन्तिमे निशः ।
तदङ्गनास्वप्नसरोवगाहिनं न्यभालयज्जम्भनिशुम्भकुम्भिनम् ॥ ६६ ॥

कदाचिदाधानकाले तदङ्गना कुंरापत्नी नाथी निशो रात्रेरन्तिमे पश्चिमे चतुर्थे प्रहरे यामे जम्भनाम्नो दैत्यस्य निशुम्भो हिंसनं यस्य यस्माद्वा । स इन्द्रस्तस्य कुम्भिनमैरावणं न्यभालयत्पश्यति स्म । किंभूतम् । स्वप्न एव सरस्तटाकस्तमवगाहते भजते इत्येवंशीलः । ऐरावणोऽपि तदङ्गना इत्यतोऽकारपृथक्करणेन अस्वप्नानां सरो नन्दीसरोनामानं पद्माकरमवगाहते मध्ये प्रविश्य क्रीडया इतस्ततः स्वेच्छया गच्छतीत्येवंशीलः स्यात् । किंभूता तदङ्गना । निद्रया निरतिस्वापेन ।'अतएव सुखं यथा स्यात्तथा । सातेनेत्यर्थः । प्रसुप्ता शय्यायां शयाना । केव । अम्बुरुहिणीव । यथा पद्मिनी रात्रौ स्वपिति ॥

अथ चतुर्भिर्गजं विशिनष्टि—

श्रियेव निर्जित्य समग्रदिग्गजान्धृतैर्जयाङ्कैश्चमरैर्विराजितम् ।
प्रभुं धराणामिव धात्वधित्यकां स्वमूर्ध्नि सिन्दूररुचिं च बिभ्रतम् ॥६७॥

किंलक्षणं गजम् । चमरै रोमगुच्छैर्विराजितं शोभितम् । इवोत्प्रेक्ष्यते—श्रिया शौण्डीरिमतुङ्गिमश्वेतिमलक्षणागणितगुणगणादिमस्वलक्ष्म्या समग्रान् सर्वान् । पुण्डरीक-वामन-कुमुद-अञ्जन-पुष्पदन्त-सार्वभौम-सुप्रतीकाख्यान् सप्त दिग्गजान्निर्जित्य जित्वा जयाङ्कैस्तद्विजयसूचकैर्धृतैरिव । पुनः किं कुर्वन्तम् । बिभ्रतं धारयन्तम् । काम् । सिन्दूरस्य शृङ्गारभूषणस्य रुचिं कान्तिम् । रक्तिमानमित्यर्थः । कस्मिन् । स्वमूर्ध्नि निजमस्तके । कमिव । धराणां प्रभुमिव । यथा गिरिराजो हिमाद्रिर्धातोर्गैरिकस्य अधित्यकामूर्ध्वभूमीं धत्ते ॥

अखण्डचण्डेतरधाममण्डलान्तरालतो निर्गतमङ्कवर्त्मना ।
महीतले स्त्यानतया कथंचनावतिष्ठमानं किमु वा सुधारसम् ॥ ६८ ॥

वा अथवा । गजं किमूत्प्रेक्ष्यते—महीतले भूमण्डले स्त्यानतया स्तिमितत्वेन कथंचन केनापि प्रकारेण अवतिष्ठमानं स्थितिं कुर्वाणं सुधारसमिव । किमूत्प्रेक्षायाम् । किंभूतं सुधारसम् । अखण्डस्य संपूर्णस्य चण्डात्तीक्ष्णादितरं शिशिरं धाम तेजो यस्यैतावता चन्द्रस्य मण्डलं बिम्बं तस्यान्तरालतो मध्यान्निर्गतं निःसृतम् । केन । अङ्कवर्त्मना लाञ्छनमार्गेण ॥

सृजन्तमुच्चैः स्वकरं मदोदयात्कुलाद्रिसान्द्रप्रतिनादमेदुरैः ।
स्वगर्जितैः स्पर्धितया पयोमुचां चमूं विगायन्तमिवातिकोपतः ॥ ६९ ॥

गजं किं कुर्वन्तम् । मदस्योन्मत्ततायाः उदयादाविर्भावात्स्वकरं निजशुण्डादण्डमुच्चैरूर्ध्वं सृजन्तं कुर्वन्तम् । उत्प्रेक्ष्यते—स्वगर्जितैरात्मगर्जारावैः सार्धं स्पर्धितया हंसर्षित्वेन अतिकोपतोऽधिकक्रोधात् पयोमुचां मेघानां चमूमनीकम् । वृन्दमित्यर्थः । विगायन्तमवगणयन्तमिव । 'नवाम्बुदानीकमुहूर्तलाञ्छने' इति रघुवंशे । अनीकवच्चमूः । किंभूतैर्गर्जितैः । कुलाद्रिषु मन्दरप्रमुखकुलशैलेषु सान्द्रेण बहुलेन प्रतिनादेन प्रतिशब्देन मेदुरैः पुष्टैः ॥

कुतूहलेनेव महीविहारिणं महीधरं कैरवबन्धुधारिणः ।
किमेतयोर्भाग्यनभोमणेरहः शरद्विधोर्वा किमु पिण्डितं महः ॥ ७० ॥

अथ वा उत्प्रेक्ष्यते—कुतूहलेन कौतुकेन मह्यां पृथिव्यां विहरति खेलति इत्येवंशीलं कैरवबन्धुं चन्द्रं धरतीत्येवंशीलस्तस्य शंभोर्महीधरं शैलं कैलासमिव । अथ वा किम् । उत्प्रेक्ष्यते । एतयोर्नाथीकुंराव्यवहारिणोर्भाग्यं पुण्यं तदेव नभोमणिः सूर्यस्तस्याहर्दिनमिव । अह्नो भानोरुदयः । तथा एतस्मात्स्वप्रात्तयोर्भाग्याभ्युदयो भविष्यति । अथ वा शरद्विधोर्मेघात्ययोदितचन्द्रस्य पिण्डितं पिण्डीभूतं महः कान्तिरिव ॥ आदितः पञ्चभिः कुलकम् ॥ इति गजस्वप्नः ॥

व्यमोचि तं स्वप्नमवेक्ष्य संलये विलोचनाम्भोरुहमुद्रणानया ।
पयोरुहिण्येव पयोजबान्धवोदये शचीकान्तहरिन्महीधरे ॥ ७१ ॥

अनया नाथीदेव्या संलये निद्रायाम् । 'निद्रा प्रमीला शयनं संवेशः स्वापसंलयौ' इति हैम्याम् । तं पूर्वोक्तं गजस्वप्नमवेक्ष्य दृष्ट्वा विलोचनाम्भोरुहयोर्नयनकमलयोर्मुद्रणा निमीलनं व्यमोचि मुक्तम् । निद्रा त्यक्तेत्यर्थः । कयेव । पयोरुहिण्येव । यथा शच्या इन्द्राण्याः कान्तः शक्रस्तस्य हरित् दिक् पूर्वा तस्या महीधर उदयशैलस्तत्र पयोजबान्धवस्य भास्करस्य अभ्युदयं विभाव्य पयोजिन्या पद्मिन्या नेत्रतुल्यपयोरुहयोर्मुद्रणा मुकुलनं विमोच्यते ॥

सुखं शयाना निशि निद्रयाङ्गना निभाल्य तं स्वप्नमवाप संमदम् ।
यथा परब्रह्म समीररुन्ध(रोध)नैर्निबद्धपद्मासनयोगिमण्डली ॥ ७२ ॥

अङ्गना नाथी संमदं हर्षमवाप लेभे । किं कृत्वा । निभाल्य दृष्ट्वा । कम् । तं पूर्वव्यावर्णितस्वरूपं हस्तिस्वप्नम् । किंभूता नाथी । निशि रात्रौ निद्रया सुखं सातेन शयाना स्वपन्ती । सुप्ता सतीत्यर्थः । केव । निबद्धेति । यथा निबद्धं रचितं पद्मासनमासनविशेषो यैस्तादृशानां योगिनां योगमार्गसाधकानां मण्डली श्रेणी समीराणां प्राणापानादीनां पवनानां रुन्ध(रोध)नै रोधैः परब्रह्म परमात्मानमालोक्य परमं संमदं प्राप्नोति । योगिनो हि पद्मासनेनोपविश्य वातरुन्ध(रोध)नपूर्वकमेकताना योगध्यानं कुर्वन्तः परमात्मानमात्मनि हृदयकमलकर्णिकायां वीक्ष्य । 'त्वां योगिनो जिन सदा परमात्मरूपमन्वेषयन्ति हृदयाम्बुजकोशदेशे' इति कल्याणमन्दिरस्तवेऽपि । 'परमानन्दभाजः सन्तो ध्यानाद्विरमन्ते' इत्येष व्यतिकरः कुमारसंभवे ॥

गभीरिमाणं दधतः सपल्लवस्मितप्रसूनव्रजराजितान्तरात् ।
स्वहंसतूलीशयनोदरादसौ क्षणादुदस्थात्करिणीव सैकतात् ॥ ७३ ॥

असौ नाथी स्वस्य हंसतूलीनाम्नः शयनस्य । यद्वा आत्मनो हंसानां पक्षरोमभिर्भृता तूली । अथवा हंसनामलक्षणकेन पट्टशाटकेन । 'स्वयमेवाभरणालंकारं मुयइ' इति कल्पसू-

त्रे। 'भगवान्स्वयमेवाभरणालंकारान्मुञ्चति। तान्याभरणानि कुलमहतरिका हंसलक्षणेन पटशाटकेन प्रतीच्छति। तथा 'पञ्च मुढियं लोयं करेइ।' शक्रोऽपि हंसलक्षणेन पटशाटकेन केशान्प्रतीक्ष्य क्षीरसमुद्रे वाहयति।–इति कल्पवृत्तिः। निर्मिता तूली प्रस्तरणोपकरणविशेषः। लोके 'तुलाइ' इति प्रसिद्धा। तत्संयुक्तस्य शयनस्य वा शय्याया उदरान्मध्यात्क्षणात्तत्कालमुदस्थादुत्थिता। किं कुर्वतः स्वहंसेत्यादि। दधतो धारयतः। कम्। गभीरिमाणं मध्ये निम्नतां 'मज्झन्ने गम्भीरे' इति कल्पादिमसूत्रवचनात्। पुनः किंभूतात्। सपल्लवाः किसलयकलिताः स्मिता विकसिता ये प्रसूनव्रजाः कुसुमसमूहास्तै राजितं शोभितमन्तरं मध्यं यस्य। केव। करिणीव। यथा हस्तिनी उभयपक्षपरावर्तनादिना। कथंचिन्निम्नीभूतात्। 'शय्यां त्यजन्त्युभयपक्षविनीतनिद्राः' इति रघौ। उभयाभ्यां पक्षाभ्यां पार्श्वाभ्यां परावर्तनेन लोठनेन विनीता अपाकृता निद्रा यैः–इति तद्वृत्तिः। तथा समीपतरुनिष्पतत्पल्लवपुष्पोपचितात्सैकताज्जलोज्झिततटादुत्तिष्ठते॥

मरालबालेव विलासगामिनी क्षितौ क्षिपन्ती पदपद्मयामलम्।
ततः समुद्दिश्य पतिं पतिव्रता महेभ्यपत्नी पदवीं व्यभूषयत्॥ ७४॥

शय्याया उत्थानानन्तरं महेभ्यपत्नी नार्थी पतिं स्वभर्तारमुद्दिश्य। पतिपार्श्वे गन्तुकामेत्यर्थः। पदवीं मार्गं व्यभूषयदलंकृतवती। किंभूता। पतिरेव स्वभर्तैव व्रतं सतीत्वेन यस्याः स्वपाणिग्रहीतारं विना स्वप्नेऽपि त्रिधापि नान्यं पुमांसं कामयते सा पतिव्रता। प्रथमं तु सतीत्वसूचनमुक्तम्। अत्र काव्ये तु प्रकटत्वेन सतीत्वं प्रतिपादितम्। किं कुर्वन्ती। क्षितौ पृथिव्यां पदपद्मयोर्यामलं युग्मं क्षिपन्ती स्थापयन्ती। पुनः किंभूता। विलासेन लीलया मन्थरं गच्छतीत्येवंशीला। केव। मरालबालेव। यथा हंसस्य पत्नी हंसी विलासगामिनी भवेत्॥

क्षणादथोर्वीवलयोर्वसी मणीविभूषणध्वंसितरोदसीतमाः।
असौ पुरस्तात्प्रकटीबभूवुषी प्रियस्य मूर्तेव कुलाधिदेवता॥ ७५॥

अथ स्वप्रदर्शनोत्थाननिर्गमनानन्तरमसौ नार्थी क्षणात्स्तोककालादेव प्रियस्य कुंरासाधोः स्वभर्तुः पुरस्तादग्रे प्रकटीबभूवुषी व्यक्ता जाता समेत्याग्रे तस्थौ। किंभूता। उर्वीवलयस्य भूमण्डलस्य उर्वसी नामाप्सराः। 'विशति विशति वेदीमुर्वसी सेयमुर्व्याः' इति नैषधे। पुनः किंभूता। मणीभूषणै रत्नाभरणैर्ध्वंसितं निर्दलितं रोदस्योर्द्यावाभूम्योस्तमो ध्वान्तं यया सा। उत्प्रेक्ष्यते। तस्येत्यस्य मूर्ता तनुमती कुलाधिदेवता गोत्राधिष्ठात्री देवीव। साप्यप्सरा भूषणमाणिक्यकान्तिविध्वस्ततमाः स्यात्॥

तया क्रमादिभ्यविभावरीवरो विमुद्रणाया गमितः स गोचरम्।
वचोविलासैररुणांशुभिर्यथारविन्दवृन्दं दिवसाननश्रिया॥ ७६॥

तया नार्थीदेव्या क्रमादागमनानुक्रमेण वचोविलासैः स्ववचनचातुर्यातिशयैः स कुंरा-

ह्न इभ्येषु लक्ष्मीवत्सु विभावरीवरश्चन्द्रो मुख्यो विमुद्रणाया जागरणस्य गोचरं विषयं गमितः प्रापितः । प्रबोधित इत्यर्थः । कयेव । दिवसाननश्रियेव । यथा प्रभातलक्ष्म्यारुणांशुभिर्भानुकिरणैररविन्दानां पद्मानां वृन्दं विमुद्रणाया गोचरं गम्यते । विकाश्यते इत्यर्थः ॥

सुमध्वजोर्वीधरजैत्रशस्त्रया रहस्यवत्स्वप्न उदात्तनेत्रया ।
विनिद्रतां लोचनयोर्वितन्वते न्यवेदि तस्मै व्यवहारिभास्वते ॥ ७७ ॥

उदात्ते स्फारे कुमुदकमलकुवलयचकोरहरिणखञ्जनजयनशीले नेत्रे नयने यस्यास्तया तस्मै स्वकान्ताय स्वप्नो निद्रावस्थायां गजेन्द्रदर्शनं न्यवेदि कथितः । किंवत् । रहस्यवत् । यथा रहस्यं स्वप्रियाय निवेद्यते । तस्मै किंभूताय । व्यवहारिषु दीप्यमानत्वाद्भास्वते सूर्याय । पुनः किं कुर्वते । विलोचनयोर्नेत्रयोर्विनिद्रतां निद्राभावात्स्मेरतां तन्वते विस्तारयते । कुर्वत इत्यर्थः । तया किंभूतया । सुमध्वजोर्वीधरः स्मरराजस्तस्य जैत्रं जगज्जयनशीलं यत् शस्त्रमायुधं तद्रूपया ॥

किमावयोरेष फलं प्रदास्यति स्वपाणिसिक्तस्मयमानशाखिवत् ।
इदं निगद्य प्रमदाद्वसुंधराप्सरा व्यरंसीद्व्यवहारिवर्णिनी ॥ ७८ ॥

व्यवहारिणः कुंरासाधोर्वर्णिनी स्त्री नाथी प्रमदादानन्दात् इदमेतदुच्यमानं निगद्य कथयित्वा अर्थाद्भर्तुः पुरः । व्यरंसीद्विरमति स्म । किंभूता । वसुंधराया भूमेर्दिव्यरूपत्वादप्सराः । 'वातु जलौकोऽप्सरसः । 'सिकताः सुमनः समाः' । एतेषां शब्दानां बहुत्वं वा स्यात् । इति लिङ्गानुशासने । इदं किम् । यदेष गजस्वप्न आवयोर्दम्पत्योः किं फलं प्रदास्यति । किंवत् । स्वपाणिना निजहस्तेन सिक्तो जलेनाभिषिक्तोऽत एव स्मयमानः शाखाप्रशाखापत्रपल्लवपुष्पोपचितो जायमानः शाखिवद्वृक्ष इव ॥

तदाननेन्दोरमृतोर्मिमालिनो गिरं सुधाया भगिनीमिवोद्गताम् ।
निपीय कर्णैः पुटकैरिवान्तरा स कूणिताक्षः परमां मुदं दधौ ॥ ७९ ॥

स महेभ्यः कुंराख्योऽन्तरा हृदयमध्ये परमामुत्कृष्टां मुदं प्रीतिमानन्दं दधौ धारयति स्म । किं कृत्वा । निपीय पीत्वा । सादरं श्रुत्वेत्यर्थः । काम् । गिरं वाणीम् । कैः । कर्णैः श्रवणैः । तादृक् शुभस्वप्नश्रवणोत्कण्ठया वारंवारप्रश्ने मुहुर्मुहुः कर्णदानाद्बहुत्वम् । उत्प्रेक्ष्यते । पुटकैरिव । अन्योऽपि रसः पुटकैः पयिते । किंभूतः सः । विकूणिते निमीलिते अक्षिणी दृशौ येन । 'उत्कल्लोलां दिशि दिशि जनाः कीर्तिपीयूषसिन्धुं यस्याद्यापि श्रवणपुटकैः कूणिताक्षाः पिबन्ति' इति चम्पूकथायाम् । किंभूतां गिरम् । उद्गतां प्रकटीभूताम् । कस्मात् । तदाननेन्दोर्नाथीवदनचन्द्रात् । उत्प्रेक्ष्यते । सुधाया अमृतस्य भगिनीं जामिमिव । भगिनीं किंभूताम् । अमृतोर्मिमालिनः सुधासमुद्रात्प्रादुर्भूताम् । 'लक्ष्मीकौस्तुभपारिजातसहजः सूनुः सुधाम्भोनिधेर्देवेन प्रणयप्रसाराविधिना मूर्ध्ना धृतः शंभुना । अद्याप्युज्झति नैव दैवविहितं क्षीणं क्षपावल्लभं केनान्येन विलङ्घ्यते विधिगतिः

पाषाणरेखासखी ॥' इति भोजप्रबन्धे क्षीरसमुद्रस्य सुधासमुद्रत्वं प्रतिपादितमस्ति। तथान्यत्रापि काव्यकल्पलताग्रन्थादिष्वपि विद्यते च। अथ वा वदनेन्दोः कथंभूतात्। अमृतोर्मिमालिनः सुधासमुद्रात्। 'तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ' इति नैषधे। अथवा 'तदाननेन्दोरमृताब्धिजन्मनः' इति पाठः। सुधायाः किंभूतायाः। तदाननेन्दोर्वा किंभूताम्। अमृताब्धिः समुद्रस्तस्माज्जन्मोत्पत्तिर्यस्या यस्य वा ॥

द्विजावलीचन्द्रिकयानुविद्धया स्मितश्रिया श्वेतितसृक्कदेशया।
भुजान्तराभोगविलासिनीरिवोपचिन्वता चञ्चुरमौक्तिकावलीः ॥ ८० ॥
निगद्यते स्म व्यवहारिणा क्षणं विमृश्य सा तेन सुकेशमानिनी।
रथाङ्गनाम्नेव रथाङ्गबान्धवोदये रथाङ्गी सविधे समीयुषी ॥ ८१ ॥

(युग्मम्)

तेन व्यवहारिणा कुंरासाधुना क्षणं स्वल्पकालं विमृश्य विचार्य स्वबुद्ध्या सु शोभनाः केशाः कुन्तला यस्याः सा सुकेशी। सुकेशीं स्वां मन्यते इति सुकेशमानिनी। 'क्यङ्मानिनोश्च' एतयोः परयोः पुंवद्भावः स्यात्। सा नार्थी निगद्यते स्म भाषिता। केनेव। रथाङ्गनाम्नेव। यथा रथाङ्गबान्धवस्य भानोरुदये सविधे आत्मनः पार्श्वे समीयुषी समागता रथाङ्गी चक्रवाकी रथाङ्गेन चक्रवाकेन वाद्यते। तेन किं कुर्वता। चञ्चुराः प्रधाना मौक्तिकावलीर्हारानिव उपचिन्वता पुष्णता। किंभूताः। भुजान्तरस्य हृदयस्याभोगो विस्तारस्तत्र विलसन्तीत्येवंशीलास्ताः। तथा [स्मितश्रिया ईषद्धसितलक्ष्म्या।] किंभूतया [स्मितश्रिया।] द्विजावलीचन्द्रिकया दन्तपङ्क्तिज्योत्स्नया। 'दशनचन्द्रिकया व्यवभासितम्' इति रघौ। अनुविद्धया व्याप्तया। पुनः किंभूतया। श्वेतितो धवलीकृतः सृक्कदेश औष्ठप्रान्तदेशो यया। 'दन्तवस्त्रं च तत्प्रान्तौ सृक्कणी' इति हैम्याम्॥ युग्मम् ॥

अनेकपस्वप्ननिरीक्षणादवाप्स्यते तदन्वर्थसुतोऽचिरात्त्वया।
महोदयः केवललम्भतो मुनीसमज्ययेवाम्बुजमञ्जुलोचने ॥ ८२ ॥

हे अम्बुजं कमलं तद्वन्मञ्जुनी मनोज्ञे लोचने नयने यस्यास्तस्याः संबोधनमम्बुजमञ्जुलोचने हे प्रिये, अनेकपस्य गजस्य स्वप्नस्य निरीक्षणाद्दर्शनात् अचिरात्स्तोककालादेव तस्यानेकपस्यान्वर्थोऽनेकान् बहून् पाति रक्षति स्वामितया संसाराद्धर्मोपदेशमहाव्रताणुव्रतादिप्रदानेन तारयतीत्यनुगतार्थो यस्य तादृशः सुतः पुत्रस्त्वया भवत्या अवाप्स्यते। कयेव। मुनीसमज्ययेव। यथा मुनीनां साधूनाम्। मुनीशब्दो दीर्घोऽप्यस्ति। यथा लिङ्गानुशासने—'यानीमुन्यौ स्वातिगव्यूतिवस्त्यः' इति। भावचारित्रं विना केवलज्ञानं न स्यादिति मुनीपदोपादानम्। समज्यया सभया अर्थाद्वन्द्वेन केवलस्य एकागाकारस्य पञ्चमज्ञानस्य केवलज्ञानस्य आसादनात्तृप्तेर्महोदयो मोक्षोऽवाप्यते। य उदय आगतः कदापि न याति स एव महोदयः ॥

१. अयं पाठ उपचयने हेतुतया योज्यः.

जयन्तवज्जम्भनिशुम्भभामिनी पतिं चमूनामिव सर्वमङ्गला ।
वशेव शौरेः सुमनःशरासनं क्रमाच्च पुत्रं प्रसविष्यसि प्रिये ॥ ८३ ॥

हे प्रिये, गर्भत्वेन प्राप्तं च पुनः क्रमात्पूर्णसमयपरिपाट्या पुत्रं नन्दनं प्रसविष्यसि जनयिष्यसि । का किंवत् । जम्भनिशुम्भस्य इन्द्रस्य भामिनी प्रिया इन्द्राणी जयन्तवत् जयदत्तमिव । पुनः का कमिव । सर्वमङ्गला पार्वती चमूपतिं स्वामिकार्तिकामिव । पुनः का कमिव । शौरेर्विष्णोर्वशा लक्ष्मीः सुमनाः सुमनसो वा पुष्पं शरासनं धनुर्यस्य । सुमनः-शब्दस्य वा बहुत्वमिति लिङ्गानुशासने । 'पुष्पाण्यस्येषुचापास्त्राणि' इति हैम्याम् । कन्दर्पमिव॥

इति प्रणीय श्रुतिगोचरं वचः प्रियस्य दध्रे पुलकोद्गमस्तया ।
तडिद्वतामुर्वरयेव जीवनं निपीय सस्याङ्कुरराजिराजिता ॥ ८४ ॥

तया नाथीदेव्या पुलकोद्गमो रोमाञ्चाविर्भावो दध्रे धृतः । किं कृत्वा । इति पूर्वोक्त-प्रकारेण प्रियस्य स्वभर्तुर्वचः वचनं श्रुतिगोचरं श्रवणगतं प्रणीय कृत्वा । श्रुत्वेत्यर्थः । कयेव । उर्वरयेव । यथा सर्वसस्यया भुवा तडिद्वतां मेघानां जीवनं जलं निपीय पीत्वा सस्यानां सर्वधान्याङ्कुराणां प्ररोहाणां राजिभी राजते इत्येवंशीला तस्या भावो राजिता सस्याङ्कुरराजिराजिता । सर्वधान्यप्ररोहश्रेणिशोभनशीलत्वं ध्रियते । 'उर्वरा सर्वसस्या भूः' इति हैम्याम् ॥

धवः सुधाधामसगोत्रवक्रयेत्यवादि बद्धाञ्जलिपाणिपद्मया ।
वरे सुरेन्दोरिव कान्त तावके वचःप्रपञ्चेऽव्यभिचारितास्तु मे ॥ ८५ ॥

सुधाधाम्नोऽमृतकिरणस्य चन्द्रस्य सगोत्रं स्वजनो बान्धवः । तुल्यमिति यावत् । वक्रं मुखं यस्यास्तया चन्द्रवदनया धवः स्वभर्ता इत्यमुना प्रकारेण अवादि भाषितः । तया किंभूतया । बद्धो रचितोऽञ्जलिर्योजनं याभ्यां तादृशौ पाणिपद्मौ करकमलौ यस्याः । कमल(?)शब्दः पुंक्लीबलिङ्गयोः । इति किम् । हे कान्त, तावके त्वदीये वचःप्रपञ्चे वचनविस्तारे वाग्वैभवे वा मे मम व्यभिचरति मृषा भवतीत्येवंशीलं व्यभिचारि न व्यभिचारि अव्यभिचारि तस्य भावः अव्यभिचारिता सत्यता अस्तु भवतात् । कस्मिन्निव । वरे इव । यथा सुरेन्दोरिन्द्रस्य प्रधानदेवस्य वा वरे अभीष्टवाक्प्रदाने अव्यभिचारिता भवेत् ॥

मिथः प्रथाभिर्वचसां वचस्विनौ कियच्चिरं तस्थतुरत्र दम्पती ।
वसन्तफुल्लत्सहकारकानने पिकाविवोदीरितपञ्चमस्वनौ ॥ ८६ ॥

अत्र इभ्यशय्यागृहे वचस्विनौ विशिष्टवाग्विलासशालिनौ दम्पती स्त्रीभर्तारौ मिथः परस्परं वचसां निजनिजवचनानां प्रथाभिर्विस्तारैः । वार्ताविनोदैरित्यर्थः । कियच्चिरं कियन्तीं वेलां यावत्तस्थतुः स्थितौ । काविव । पिकाविव । यथा वसन्तेन मधुमासेन फुल्लतां विकसताम् । मञ्जरीपिञ्जरीभवतामित्यर्थः । सहकाराणाम् आम्राणां कानने उदीरितः प्रकटीकृतः

पञ्चमनाम्नो रागस्य स्वनो ध्वनिर्याभ्यां तौ । पिकी च पिकश्च पिकौ । 'पुमान् स्त्रिया तल्लक्षणश्चेदेवविशेषः । स्त्रिया सहोक्तौ पुमान् शिष्यते न स्त्री, स्त्रीपुंसलक्षणश्चेदेव विशेषः । ब्राह्मणी च ब्राह्मणश्च ब्राह्मणौ तल्लक्षणः किम् । कुकुटमयूर्यौ' इति प्रक्रियाकौमुद्याम् । तेन पिकीशब्दस्य लोपे पिकाविति । किंचिच्चिरं तिष्ठतः ॥

मुदाथ नाथी शयनीयमन्दिरं क्रमेण संक्रन्दनसद्मसुन्दरम् ।
व्यभूषयत्किंपुरुषप्रभोरिवारविन्दहङ्मन्दिरकन्दरोदरम् ॥ ८७ ॥

अथ स्वप्नार्थकथनतत्तद्वार्तानन्तरं नाथी मुदा प्रमोदेन क्रमेण भर्तृविसर्जनगृहमार्गागमनपरिपाट्या शयनीयमन्दिरं स्वशय्यागृहं व्यभूषयदलंकरोति स्म । किंभूतम् । संक्रन्दनः शक्रस्तस्य सद्म मन्दिरं तत्संबन्धि वा वैजयन्तप्रासादस्तद्वत्सुन्दरं रमणीयमिति गर्भितोपमा । केव । अरविन्दहगिव । यथा किंपुरुषाणां किंनराणां प्रभोरिन्द्रस्य प्रकृष्टकिंनरस्य कस्यचिद्वा पत्नी मन्दरस्य मेरोरिन्द्रकीलशैलस्य वा कन्दराया गुहाया उदरं मध्यं विभूषयति । किंनराणामवस्थानं मन्दरकन्दरासु वर्ण्यते । यथा चम्पूकथायाम्— 'मन्दं मन्दरकन्दरासु शयितानुत्थापयन्किंनरान्' इति ॥ इति गजस्वप्नविचारकथनस्वशयनसद्मगमनम् ॥

सुखं स्वकीये सदने निषेदुषी मुदं महास्वप्नजुषं प्रपेदुषी ।
इदं कलाकेलिमरालमानसे व्यचिन्तयत्सा विदुषीव मानसे ॥ ८८ ॥

सा नाथी मानसे स्वचित्ते इदं वक्ष्यमाणं व्यचिन्तयद् विमृशति स्म । केव । विदुषीव । यथा पण्डिता हृदये शास्त्रार्थादि विचिन्तयति । किंभूते मानसे । कलाकेलिः कामः स एव मरालो राजहंसस्तस्य क्रीडार्थं वासार्थं वा । 'मानसौकाः' इति हैमैवचनात् मानसनाम्नि सरसि । सा किंभूता । सुखं निराधिव्याधिकं यथा स्यात्तथा स्वकीये निजे शयनीयसदने मन्दिरे निषेदुषी उपविष्टा । पुनः किंभूता । महानद्भुत आश्चर्यकारी यः स्वप्नः स्वापावस्थायामैरावणवारणविलोकनं तं जुषते सेवते तादृशीं महास्वप्नसंजातां मुदं प्रीतिमानन्दं प्रपेदुषी ॥

पुनः सृजन्त्यां मयि मुद्रणां दृशोः परैरपस्वप्नविजृम्भितैरसौ ।
निहन्यतां मासहजैरिव ग्रहैस्त्रिकोणकेन्द्रोपगतः शुभग्रहः ॥ ८९ ॥

पुनर्द्वितीयवारं दृशोर्लोचनयोर्मुद्रणां निमीलनम् । निद्रामित्यर्थः । सृजन्त्यां कुर्वत्यां मयि परैरन्यैरपस्वप्नविजृम्भितैर्दुष्टस्वप्नदर्शनविलसितैरसौ गजदर्शनलक्षणः शुभः स्वप्नो मा निहन्यतां मा व्यर्थीक्रियताम् । क इव । शुभग्रह इव । यथा असहजैः शत्रुभूतैर्भौममन्दादिभिर्ग्रहैः खेटैर्नवपञ्चमं त्रिकोणं प्रथमचतुःसप्तमदशमाख्यानि केन्द्राणि तेषु भवनेषु गतः प्राप्तः शुभो गुरुबुधादिः प्रशस्यग्रहो निहन्यते निर्बलीक्रियते ॥

इदं विमृश्येयमजूहवत्ततः सखीरशेषाः स्वकपारिपार्श्विकाः ।
द्विरेफगुञ्जारवमञ्जुवादिनी वसन्तलक्ष्मीः पिककामिनीरिव ॥ ९० ॥

इदं पूर्वोक्तं विमृश्य विचार्य । इयं नार्थी मुदा हर्षेण स्वकपारिपार्श्विका निजसमीपवर्तिनीरशेषाः समस्ता अपि सखीर्वयसी(?)रजूहवदाकारयामास । केव । वसन्तलक्ष्मीरिव । यथा द्विरेफाणां भ्रमराणां गुञ्जारवेण गुञ्जितेन एव मनोज्ञं वदतीत्येवंशीला वसन्तश्रीः पिककामिनीः कोकिला आह्वयते ॥

ततो वयस्यो(?)ऽन्तिकमाश्रिता मधुव्रताङ्गनाश्चूतलतामिव स्मिताम् ।
बभाषिरे कोकिलकामिनीगणक्कणाद्वयीवादनिनादयानया ॥ ९१ ॥

ततः सखीसमागमनानन्तरमनया नार्थीदेव्या वयस्यः (?) सख्यो बभाषिरे वादिताः । वयस्यः(?) किंभूताः । अन्तिकं नार्थीसमीपमाश्रिताः सेवमानाः अर्थात्संनिधाने समागताः । का इव । मधुव्रताङ्गना इव । यथा भृङ्ग्यः स्मितां विकसितां कलिकाकलितां चूतलतां माकन्दवल्लीमाश्रयन्ते । अनया किंभूतया । कोकिलकामिनीगणानां पिकीप्रकराणां क्कणेन रावेण सह अद्वयीवाद एकीभावो यस्य क्कणः कलकूजितमिवाद्वयीवादोऽसाधारणतया यस्मिंस्तादृशो निनादो रावो ध्वनिर्यस्याः ॥

चकोरिके चन्द्रकले लवङ्गिके मृणालिके पुष्पलते कुरङ्गिके ।
कुरङ्गनाभे सुरभे शशिप्रभे विनोदिके मोदिनि वन्दि सुन्दरि ॥ ९२ ॥
तथा प्रथन्तां कथका यथा कथा ममाग्रतः श्रीजिनचक्रिसंकथाः ।
यथा शुभस्वप्नदृशा मया निशापनीयते पद्धतिवत्पथिस्पृशा ॥ ९३ ॥

(युग्मम्)

पूर्वकाव्ये केवलानि सखीनां विशेषणान्येव सन्ति । चम्पूकथायामप्येवंविधान्येव सखीनामानि दृश्यन्ते । नैषधेऽपि च । एवंविधा अभिधाना हे सख्यः, यूयं ममाग्रतो मत्पुरस्तात् जिनानामृषभादीनां चक्रिणां भरतप्रमुखाणां चक्रवर्तिनां संकथा वार्ता । 'त्वत्संकथापि जगतां दुरितानि हन्ति' इति भक्तामरस्तोत्रे । नववार्तापीति तद्वृत्तिः । तथा तेन प्रकारेण प्रथन्तां विस्तारयन्तु । कथयन्त्वित्यर्थः । क इव । कथका इव । यथा कथका वाचका वक्तारः कथाः पूर्वपुरुषचरितानि प्रथयन्ति विस्तारेण वदन्ति तथा । कथम् । यथा शुभं प्रशस्तं स्वप्नं पश्यतीत्येवंशीला तया शुभस्वप्नदृशा मया भवत्स्वामिन्या निशा अवशिष्टा रजनिरपनीयतेऽतिक्राम्यते परिपूर्णीक्रियते वा । किंवत् । पद्धतिवत् । यथा पन्थानं मार्गं स्पृशति भजतीति पथिस्पृक् पथिकी तया कथाभिर्वार्ताभिः कृत्वा पद्धतिर्मार्गोऽपनीयते उल्लङ्घ्यते तथा । 'कलहंता, भरकन्ता, भयसंतत्ता, कहाणयेलग्गा । पियहंसण ऊससिया, पञ्च वि मग्गं न याणंति ॥' इति सूक्तोक्तेः ॥ युग्मम् ॥

कथानुषङ्गेषु मिथः सखीजनोदितेषु काचिद्वयसीदमालपत् ।
परेषु गान्धर्वरसेषु पञ्चमप्रपञ्चगीतिं विदुरेव गायनी ॥ ९४ ॥

मिथोऽन्योन्यं सखीरूपैर्जनैर्लोकैरुदितेषु उक्तेषु कथितेषु कथानुषङ्गेषु वार्ताप्रस्तावेषु

सत्सु काचिद निर्दिष्टनामा वयसी सखी इदमग्रे वक्ष्यमाणमालपद्भाषे । केव । गायनीव । यथा परेष्वन्येषु गान्धर्वाणां गायनानां गीतानां वा । 'गीतं गानं गेयं गीतिर्गान्धर्वम्' इति हैम्याम् । रसेषु सत्सु विदुरा गीतिनिपुणी गायनी गान्धर्विका पञ्चमरागस्य प्रपञ्चो विस्तारो यत्र तादृशीं गीतिमालपति । गायतीत्यर्थः ॥

पुराभवन्नाभिमहीहिमद्युतेस्तनूभवः श्रीवृषभध्वजो जिनः ।
इवात्मभू राजसभावभासितः ससर्ज यो विष्टपसृष्टिमात्मना ॥ ९५ ॥

हे स्वामिनि, पुरा पूर्वं युगस्यादौ सर्वव्यवस्थाप्रादुर्भवनव्यतिकरे नवाशीतिपक्षाधिकत्र्यशीतिपूर्वलक्षावशेषे तृतीयारकपर्यन्ते नाभिर्नामा मह्यां भूमौ हिमद्युतिश्चन्द्रस्तस्य । 'इदं तमुर्वीतलशीतलद्युतिम्' इति नैषधे । तनूभवः पुत्रः श्रिया राज्यतीर्थकृल्लक्ष्म्या युक्तो वृषभः ककुद्मान् कुरुदेशे ध्वजश्चिह्नं यस्य तादृक् जिनस्तीर्थकरः एतावता ऋषभजिनोऽभवद्बभूव । स कः । यत्तदोः संबन्धात् यो राज्ञां राजन्यानामिक्ष्वाकुवंशोद्भवानां सभया समूहेन । 'सदेवमणु आसुराए परिसाए समणुगम्ममाणग्गो' इति कल्पसूत्रे । 'पर्षदा समूहेन' इति तद्वृत्तिः । 'सुरसमाजसमाक्रमणोचितः' । समाजः समूह इति रघुवंशे । 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे । नक्षत्रसमूहस्येति तद्वृत्तिः । ततः सभावाचकाः शब्दाः समूहेऽपि दृश्यन्ते । अथवा सभायां परिषदि अवभासितः शोभित उपविष्टः । तादृशः सन्नात्मना स्वेन विष्टपस्य विश्वस्य सृष्टिं सर्वव्यवहारशिल्पकलाराज्यस्थितिप्रजापालनादिसर्गं ससर्ज करोति स्म । क इव । आत्मभूरिव । यथा । ब्रह्मा राजसभावेन रजोगुणस्वभावेन भासितः सन् जगत्सर्गं चक्रे ॥

अमुष्य नाभेयजिनावनीनभोमणेरजायन्त शतं तनूरुहाः ।
पवेरिवास्राः ऋतवः शतक्रतोरिव च्छदानीव पुनः पयोरुहः ॥ ९६ ॥

अमुष्य एतस्य नाभेरपत्यं नाभेयो वृषभः स एव जिनानां सामान्यकेवलिनां मध्ये अवन्या भूमेरति तेजस्त्वेन नभोमणेः सूर्यस्य । अथवा—अवनीनभोमणी राजा । 'मध्यंदिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे । तथा 'पाण्डोरवनिमार्तण्डस्य' इति पाण्डवचरित्रे । जिनराजस्येत्यर्थः । शतं शतसंख्याकास्तनूरुहाः । 'तनूरुहस्तु पुत्रे गरुति लोम्नि वा' इत्यनेकार्थः । अजायन्त जाताः । कस्येव । पवेरिव । यथा वज्रस्य शतमस्राः कोट्यो भवन्ति स्म । पुनः कस्येव । शतक्रतोरिव । यथा इन्द्रस्य शतमिताः ऋतवः प्रतिमा यज्ञा वा आसन् । 'इन्द्रेण कार्तिकश्रेष्ठिभवे पञ्चमी प्रतिमा शतवारं व्यूढा' इति कल्पकिरणावल्याम् । पुनः कस्येव । पयोरुह इवात्र षष्ठी । यथा कमलस्य शतं छदानि पत्राणि जायन्ते ॥

जिनावनीन्दोः किल धर्मकर्मणोर्व्यवस्थयास्मादुदभावि भूतले ।
रथाङ्गपाथोरुहयोर्मुदोदितारविन्दिनीवल्लभमण्डलादिव ॥ ९७ ॥

किलेति श्रूयते निश्चितं वा। भूतले भरतक्षेत्रक्षोणीमण्डले अस्माज्जिनावनीन्दोरेतस्मादृषभतीर्थकराद्धर्मः सुकृतं कर्म कृषिवाणिज्यादि तयोर्व्यवस्थया विवेकेन उदभावि प्रकटीभूतम्। कस्मात्कयेव। उदितादभ्युदयं प्राप्तादरविन्दिनीवल्लभस्य पद्मिनीपतेर्भानोर्मण्डलाद् बिम्बात् रथाङ्गश्चक्रवाकः पाथोरुहं कमलम्। जातिवाचित्वादेकवचनम्। तयोर्मुदा हर्षेणोद्भूयते। यतो रथाङ्गानां प्रियाभिर्वियोगः कमलानां संकोचश्च रात्रौ भवेदतो दिवसे हर्षः। मुदेति कर्तृपदं तृतीयान्तम्॥

बभूव नाभेयविभुः स आदिमः क्षितौ समग्रावनिभामिनीभुजाम्।
पुलोमजाप्राणपतेर्मतङ्गजो महामृगाणामिव दानशालिनाम्॥ ९८॥

हे नार्थीदेवि, क्षितौ पृथिव्यां स पूर्वोक्तस्वरूपो नाभेय एव विभुः स्वामी ऋषभदेवः। समग्रा ये अवनीं भूमीमेव भामिनीं भुञ्जन्ति इति अवनिभामिनीभुजः। 'वसुमतीयुवतीभुजङ्गः' तथा 'यामिनीकामिनीपतिः' इत्यादि काव्यकल्पलतायाम्। राजानस्तेषां मध्ये आदिमः प्रथमः। अस्यामवसर्पिण्यां प्रथमं श्रीऋषभदेवस्यैव राज्यस्य जातत्वात्। शक्रेण प्रथमम् ऋषभदेवस्य राज्याभिषेकः कृत इति। क इव। मतङ्गज इव। यथा पुलोमजाया इन्द्राण्याः। 'हृष्यन्मुहुर्लोम पुलोमजायाः' इति नैषधे। प्राणपतिर्भर्ता शक्रस्तस्य गज ऐरावणः स महामृगाणां हस्तिनाम् आदिमो जज्ञे। तथा च चम्पूकथायाम्—'नारायणनाभ्यम्भोरुहकुहरकुटीमधिशयानस्य वेदविद्यां निगदतो भगवतः पितामहस्य बृहद्रथान्तरविकीर्णाभासनामानि सामानि गायतः सामश्लोकरसनिष्पन्दादुदपद्यन्त ऐरावतसुप्रतीकप्रभृतयोऽष्टौ दिग्गजेन्द्राः। तेभ्योऽभवन् भद्रमन्द्रमृगसंकीर्णजातयो गिरिचरनदीचरोभयचारिणः करिणः। प्रसिद्धं चैतत्सामजा गजा इति। केचित्पुनरन्यथा कथयन्ति। किल सकलसुरासुरकरपरिघपरिवर्त्यमानमन्दरमन्थानमथितदुग्धाम्भोधेरजनि जनितजगद्विस्मयोल्लसल्लक्ष्मीमृगाङ्कसुरभिसुरद्रुमधन्वन्तरिकौस्तुभोच्चैःश्रवसां सहभूः शशधरकरकान्तिरैरावतः। तत्प्रसूतिरशेषवनान्यलंकरोति' इति। किंभूतानां नृपाणां च गजानां च। दानैर्विश्राणनैर्मदाम्बुभिश्च शालन्ते शोभन्ते इत्येवंशीलाः॥

पयोधिपुत्रीतनयावनीपतेरिवानुबिम्बेषु महीविहारिषु।
शताङ्गजातेषु तदादिमप्रभोर्बभूव मुख्यो भरताभिधोऽङ्गजः॥ ९९॥

तस्य पूर्ववर्णितस्वरूपस्य आदिमप्रभोर्ऋषभदेवस्य शतसंख्येष्वङ्गजातेषु भरत इत्यभिधा नाम यस्य तादृशोऽङ्गजः पुत्रो मुख्यः प्रथमः श्रेष्ठो वा बभूव। उत्प्रेक्ष्यते। शताङ्गजातेष्वनुबिम्बेष्विव। कस्य। पयोधेः क्षीरसमुद्रस्य पुत्री नन्दना लक्ष्मीस्तस्यास्तनयः कामः स एवावनीपती राजा तस्य। किंभूतेष्वनुबिम्बेषु। मह्यां भूमौ विहरन्ति क्रीडन्तीत्येवंशीलेषु। शतमपि सुताः स्मरप्रतिकृतय इव दृश्यन्ते इत्यर्थः॥

यदीययात्रासु चमूसमुत्थितैर्दिवस्पृथिव्योः प्रविसारिपांसुभिः।
अहस्त्रियामीयति पद्मिनीपतिः पतङ्गति ध्वान्तति तत्प्रभाभरः॥१००॥

यस्येमा यदीयास्तासु भरतचक्रिसंबन्धिनीषु यात्रासु दिग्विजयकृतप्रयाणेषु चमूसमुत्थितैश्चतुरङ्गचक्रचलनादुद्धूतैरुड्डीनैर्वा दिवस्पृथिव्योराकाशभुवोः प्रविसरन्ति विस्तरन्तीत्येवंशीलैः पांसुभिर्धूलीभिरहर्दिवसस्त्रियामीयति निशेवाचरति । निःशेषतया रविप्रकाशस्य रुन्धनात् । पुनः पद्मिनीपतिः भास्वान् पतङ्गति खद्योत इवाचरति । किंचिद्दृश्यमानत्वेन । 'सर्वप्रातिपदिकात् क्विप् वा आचारे' इत्येके । तेन कृष्णवदाचरतीति कृष्णति' इति प्रक्रियाकौमुद्याम् । तथा पतङ्गति । पुनस्तस्य भानोः प्रभाभरो ध्वान्तति अन्धकार इवाचरति । भासां श्यामीभूतत्वेन ॥

हरेर्महिष्यां हरिति प्रयातवान्य आदितः सादितगोत्रशात्रवः ।
पतिः सुराणामिव दानवारियुग्गजेन्द्रसिन्धूद्भववाजिराजितः ॥ १०१ ॥

यो भरतचक्रवर्ती आदितो दिग्विजयकरणव्यतिकरे प्रथमतो हरेरिन्द्रस्य महिष्यां पत्न्यां हरिति दिशि । प्राच्यामित्यर्थः । 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति नैषधे । प्रयातवान् गतः । क इव । सुराणां पतिरिव । यथा शक्रः पूर्वां दिशं प्रति प्रयाति, तत्पतित्वात् । किंभूतो यः शक्रश्च । सादितं हतं गोत्रं वंशो येषां तादृशाः शात्रवा वैरिणो यस्य । यद्वा सादिता निर्मूलमुच्छेदिताः गोत्रसहिताः सवंशाः शात्रवा रिपवो येन । पक्षे—सादिता गोत्राः पर्वता एव शात्रवो येन । पुनः किंभूतः । दानवारिभिर्मदजलैर्युञ्जन्ति योगं प्राप्नुवन्तीति दानवारियुजो निर्यद्बहुलमदसलिला ये गजेन्द्रा भद्रजातीयगन्धोपलक्षिताः सिन्धुराः [तैः] सिन्धुदेशे उद्भव उत्पत्तिर्येषां तादृशैर्वाजिभिरश्वै[श्च] राजितः शोभितः । पक्षे—दानवानां दैत्यानामरिभिर्वैरिभिर्युनक्तीति । देवयुक्त इत्यर्थः । तथा गजेन्द्र ऐरावणः सिन्धूद्भवः समुद्रोत्पन्न उच्चैःश्रवा अश्वः तेन च राजितः । 'स सिन्धुजं शीतमहःसहोदरं हसन्तमुच्चैःश्रवसः श्रियं हयम्' इति नैषधे ॥

स सार्वभौमो ध्वजदण्डशेखरीकृतस्फुरत्काञ्चनकुम्भकान्तिभिः ।
मतङ्गजैरञ्जनशैलमांसलैः क्षितौ तनोतीव सविद्युदम्बुदम् ॥ १०२ ॥

सर्वस्या भूमेरीश्वरः सार्वभौमश्चक्रवर्ती स भरतः । उत्प्रेक्ष्यते । सविद्युदम्बुदं तडित्कलितजलधरं क्षितौ पृथिव्यां तनोतीव करोतीव । कैः । अञ्जननामा शैलः पर्वतः तद्वन्मांसलैः पुष्टैरुन्नतैश्च । तादृशैर्मतङ्गजैः स्वसेनाकुञ्जरैः । किंभूतैर्मतङ्गजैः । ध्वजानां पताकानामर्थाद्गजसंबन्धिनीनां दण्डेषु शेखरीकृतानामुत्तंसतां प्रापितानामुपरिस्थितानां वा स्फुरतां दीप्यमानानां झगझगितिकान्तीनां काञ्चनकुम्भानां हेमकलशानां कान्तिज्योतिर्येषु तैः ॥

दशामवाप्स्यन्ति यदन्तिमामिमेऽस्मदाश्रया लक्ष्मिताः क्षितिक्षितः ।
विवर्णतेतीव दिगङ्गनागणैर्मुखे निषेवेऽस्य चमूरजोभरैः ॥ १०३ ॥

दिगङ्गनागणैर्हरिद्वधूवृन्दैः कर्तृभिरस्य भरतचक्रिणश्चमूरजोभरैश्चतुरङ्गदलचलनोद्धूत-

भूरिधूलीपटलैर्मुखे वक्रे । उत्प्रेक्ष्यते । इति हेतोः विवर्णता विच्छायता श्यामत्वं निषेवे भेजे । सेवितं धृतमित्यर्थः । इति किम् । यद्यस्मात्कारणादस्मदाश्रया वयमेवाश्रयो निवासस्थानं शरणं वा येषां तादृशा इमे लक्षमिताः शतसहस्रसंख्याकाः क्षितिक्षितो राजानः । अन्ते अर्थादायुषोऽवसाने भवामन्तिमां चरमां संग्रामादिना मरणलक्षणां दशामवस्थामवाप्स्यन्ति लप्स्यन्ते ॥

चमूध्वनिः प्राग्गिरिकंदरोदरे प्रियोपगूढं सुखसुप्तकिंनरान् ।
इदं यशो गापयितुं गुहागतप्रतिस्वनैर्जागरयन्निवोद्गतः ॥ १०४ ॥

अस्य भरतचक्रिणश्चमूध्वनिर्गजवाजिरथपत्तिचतुरङ्गकटककोलाहलशब्द उद्गतः प्रादुर्भूतः । उत्प्रेक्ष्यते । प्राग्गिरेः पूर्वाचलस्योदयाद्रेः कंदराणां गुहानाम् उदरे मध्ये प्रियोपगूढं प्रियां किंनरीमुपगूह्यालिङ्ग्य । 'क्यबर्थे समासे णमुल्' इति प्रक्रियाकौमुद्याम् । चिरविरचितविविधनिधुवनविमोदखेदनिद्रालुतया क्रीडारसिकतया च स्वस्वसुखेन निरातङ्कया सुप्तान् किंनरान् प्रति इदं यशो भरतचक्रिकीर्तिं गापयितुं गानविषयां कारयितुं गुहासु गह्वरेषु गतैः प्राप्तैः प्रतिस्वनैः प्रतिशब्दैः कृत्वा जागरयन् प्रबोधयन्निव विनिद्रान् कुर्वन् उत्थापयन्निव ॥

प्रगल्भफालैर्गगने नखैः पुनर्महीतलस्योत्खननैर्हयव्रजः ।
जयं सृज स्वर्बलिवेश्मनोर्द्वयोरथेति संज्ञापयति स्वयं पतिम् ॥ १०५ ॥

हयव्रजो वाजिव्रातो गगने नभोङ्गणे प्रगल्भफालैः प्रकृष्टप्रकर्षोल्ललनैरुच्चैरुड्डयनैर्वा पुनर्नखैः खुरैर्महीतलस्य भूमेर्मण्डलस्य अधःप्रदेशस्य उत्प्राबल्येन खननैः क्षोदनैः । उत्प्रेक्ष्यते । यं पतिं भरतचक्रिणं स्वं स्वामिनमित्यमुनाकारेण संज्ञापयतीव । इति किम् । यत् हे सार्वभौम, भूमिस्त्वया सर्वापि साधिता । अथ स्वः स्वर्लोकः, बलिवेश्म पातालम्, तयोर्द्वयोस्त्वं जयं सृज साधय । स्वर्गपाताले अपि भूमिवत्स्वायत्तीकुरु इत्यर्थः ॥

पयोधिरोधःस्थलरोधिभिः प्रभोरसर्जि गर्जाञ्जनबन्धुसिन्धुरैः ।
चराचरे वर्षितुमुत्सुकैरितः किमम्बुदैरम्बुजिघृक्षयागतैः ॥ १०६ ॥

प्रभोर्भूतक्षेत्रस्वामिनो भरतभर्तुरञ्जनस्य कज्जलस्य श्यामत्वेन बन्धुभिस्तुल्यैः । अथवा अञ्जनाचलस्य श्यामत्वेन तुङ्गत्वेन वा सदृशैः । अथवा अञ्जनाद्रेः सहोदरैरन्यैरञ्जनाचलैरिवेत्यर्थः । तादृशैः सिन्धुरैः गन्धगजैर्गर्जा बृंहितं गर्जितमसर्जि चक्रे । किंभूतैः सिन्धुरैः । पयोधेः समुद्रस्य रोधस्तटस्तस्य स्थलं वेलागमनभूस्तद्रुन्धन्तीत्येवंशीलैः । उत्प्रेक्ष्यते । इतः समुद्रादम्बुजिघृक्षया पानीयानां ग्रहणेच्छया आगतैः किम् अम्बुदैर्मेघैरिव । किंभूतैः । चराचरे सर्वजगति भूमीमण्डले वर्षितुं जलवृष्टिं विधातुमुत्सुकैरुत्कण्ठितैः ॥

इवेक्षुडिम्भान्क्षितिरक्षिणो महौजसा समुत्खाय पुनः प्ररोपयन् ।
स पूर्वपाथोनिधिसैकतक्षिति(तौ) क्षितेर्विवोढा व्रजति स्म सस्मयः १०७

स क्षितेर्भूमेर्विवोढा भर्ता भरतभूपतिः पूर्वपाथोनिधेः प्राचीसमुद्रस्य । 'पूर्वपर्वततिरोहितात्मनः' इति वीरधवलनृपपुरोहितसोमेश्वरभट्टविनिर्मितवस्तुपालकीर्तिकौमुदीसोदरसुरथोत्सवकाव्ये । सैकते(तक्षितौ) जलोज्झितप्रदेशे व्रजति स्म जगाम । किंभूतः । सह स्मयेन गर्वेण वर्तते यः स सस्मयः । किं कुर्वन् । महौजसा सर्वेभ्यः सातिशायिना षट्खण्डमण्डितभरतभूमीवलयोद्भवयावद्वाजिवारणवेसरसैरभकरभवृषभयुगलमण्डलाकलितसबालवृद्धवयस्थवशासखपुरुषपौरुषानाक्रमणीयेन पराक्रमेण अधिकप्रतापेन वा । ओजःशब्देन प्रतापोऽपि कथ्यते । यथा नैषधे—'तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा । तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥' इति । क्षितिरक्षिणो भूपालान् । 'निपपि यस्य क्षितिरक्षिणः कथाः' इत्यपि नैषधे । समुत्खाय राज्याद्भ्रंशयित्वा । पुनः पश्चात्प्ररोपयन् । राज्यस्थाने वा स्थापयन् । कानिव । इक्षुडिम्भानिव । यथा कश्चित्कृषिकः इक्षूणामसिपत्रकाणां डिम्भान् प्ररोहान् उत्खाय उप्तस्थानकादुत्खन्यान्यस्मिन्स्थाने प्ररोपयति । 'पलालजालैः पिहितेक्षुडिम्भः' इत्यपि नैषधे ॥

अजिह्मता सुह्मनृपैर्बिले बिलेशयैरिवैतद्वसुधाधवे दधे ।
विनम्रता च ध्रियते स्म वेतसै रये स्रवन्त्या इव भूरिवेतसैः ॥ १०८ ॥

एतद्वसुधाधवे एतस्मिन् भरतभूपाले सुह्मनामा देशस्तन्नायकैः सुह्मराजैरजिह्मता सरलत्वं दधे धृतं तत्कालमेवागत्य प्रणेमे । कैरिव । यथा बिलेशयैः भुजङ्गैर्बिले भूगतरन्ध्रे स्वनिवसनस्थाने प्रवेशसमये अजिह्मता अवक्रत्वं ध्रियते । च पुनः अस्मिन् नृपे भूरिवैतसैर्वेतस्वद्देशभूपालैर्विनम्रता विशेषेण नमनशीलत्वं ध्रियते स्म । कैरिव । वेतसैरिव । यथा स्रवन्त्या नद्या रये प्रवाहे मध्ये तटे वा उद्गमनशीलैर्वेतसनामवृक्षविशेषैर्विनम्रता ध्रियते ॥

अवापितो गोचरतां स मागधैरिव स्तवस्य प्रमदेन मागधैः ।
सृजद्भिरिन्द्रोऽद्रिगणैः कलिं गजैरिवोपलै रुद्धनतः कलिङ्गजैः ॥१०९॥

स भरतचक्री मागधैर्मगधदेशोद्भवभूपैः प्रमदेन हर्षेण स्तवस्य स्तुतेर्गोचरतां विषयत्वम् । 'द्वीपाधिपान्नयनयोर्नय गोचरत्वम्' इति नैषधे । अवापितः लम्भितः । कैरिव । मागधैरिव । यथा मागधैर्बन्दिजनैश्चक्रवर्ती स्तूयते । पुनः कलिङ्गदेशजैर्भूपैः रुद्धनतः पूर्वं रुद्धः पश्चान्नतः नमस्कृतः । 'पीतप्रतिबद्धवत्साम्' इति रघौ । 'पूर्वं पीतः पश्चात्प्रतिबद्धो वत्सो यस्याः सा' इति तद्वृत्तिश्च । ''पूर्वकालैकजरत्पुराणनवकेवलाः सामानाधिकरणेन' एते समानाधिकरणेन समस्यन्ते स तत्पुरुषः । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे प्रवृत्तिः समानाधिकरणम् । पूर्वकालार्थस्तु अपरकालार्थेन । यथा स्नातानुलिप्तः । पूर्वं स्नातः पश्चादनुलिप्तः । तथा 'तत्पुरुषः समानाधिकरणः कर्मधारयः' । समानाभिधेयो

यस्तत्पुरुषः स कर्मधारयाख्यः स्यात् । पीतश्चासौ प्रतिबद्धश्च । तथा स्नातश्चासावनुलिप्तश्च । तथा रुद्धश्चासौ नतश्च । इत्येषोऽपि विग्रहस्तेन कर्मधारयगर्भितस्तत्पुरुषः समासः" इति प्रक्रियाकौमुद्याम् । किं कुर्वद्भिः । गजैः साधनभूतैर्हस्तिभिः कलिं संग्रामं सृजद्भिः कुर्वद्भिः । कैरिव । अद्रिगणैः । यथा पर्वतप्रकरैः उपलैः प्रस्तरैः कृत्वा । युद्धं विदधद्भिः सद्भिरिन्द्रो रुध्यते प्रणम्यते च ॥

चतुर्दिशामप्ययमर्णवावधीनिति प्रदेशान्ध्वजिनीभिरानशे ।
विभासिताभिः सितसिन्धुरश्रिया यथाभ्रिकाभिः प्रसरत्पयोधरः॥११०॥

अथ भरतसार्वभौम इत्यमुना प्रकारेण ध्वजिनीभिः सेनाभिः कृत्वा चतस्रश्च पूर्वदक्षिणपश्चिमोत्तरलक्षणास्ता दिशश्च चतुर्दिशस्तासाम् । कथम् । अपि चतसृणामपि दिशामित्यर्थः । प्रदेशान् विभागान् आनशे व्याप्नोति स्म । किंभूतान्प्रदेशान् । अर्णवः समुद्रोऽवधिर्मर्यादा यस्य । अथवा अर्णवाश्चत्वारः समुद्राः । 'पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्' इति रघुकाव्ये । तथा 'चतुः समुद्रो परिखे नृपाणामन्तःपुरे वासितकीर्तिदारे । दानं दया सूनृतमातिथेयी चतुष्टयी रक्षणसौविदल्लाः ॥' इति नैषधे । 'वासिता रक्षिताः कीर्तय एव दारा यत्र । तादृशे चतुरर्णवखातिके भूमीमण्डले एव नृपाणामन्तःपुरे दानं, कृपा, सत्यवचनम्, अतिथिसत्क्रिया, एतच्चतुष्टयी तदन्तःपुररक्षणार्थे सौविदल्लाः कञ्चुकिनः । एभिश्चतुर्भिः प्रकारैर्विना कीर्तिर्न तिष्ठति ।' इति तद्वृत्तिः । अतश्चत्वारः समुद्रा मर्यादा येषां ते । किंभूताभिर्ध्वजिनीभिः । सितानां भद्रजातित्वेन शुभ्राणां सिन्धुराणां हस्तिनां श्रिया शोभया विभासिताभिः शोभिताभिः । क इव । प्रसरत्पयोधर इव । यथा श्वेतगजेन ऐरावणेन । 'प्रावृषेण्यं पयोवाहं विद्युदैरावताविव' इति रघौ । अथ वा अभ्रस्य मेघस्य मातङ्गो हस्ती अभ्रमातङ्गः । 'ऐरावणोऽभ्रमातङ्गश्चतुर्दन्तः' इति हैमीवचनात् । विभासिताभिरभ्रिकाभिर्वर्दलैः कृत्वा गगनाङ्गणविस्तरन्मेघश्चतुर्दिक्प्रदेशान्व्याप्नोति । अत्र यथा इवार्थे ॥

अथैष वेलातटतः समं भटैर्न्यवीवृतन्नीरधिनेमिनायकः ।
गभीररावैरुदरं भरन्भुवो रयः पयोधेरिव यादसां भरैः ॥ १११ ॥

अथ चतुर्दिग्विजयानन्तरमेष वर्ण्यमानबलोत्कर्षो नीरधिनेमेरासमुद्रान्तपृथिव्या नायकः पतिर्भरतचक्रवर्ती वेलातटतः समुद्रस्य वेलाया जलवृद्धिस्थानकस्य तटात्तीराद्भटैः सेनाचरैः शूरैः समं सार्धं न्यवीवृतन्निवर्तते स्म । पश्चाद्वलते इत्यर्थः । क इव । रय इव । यथा पयोधेः समुद्रस्य रयः पयःप्रवाहः । 'प्रवाहः पुनरोघः स्याद्वेणी धारा रयश्च सः' इति हैम्याम् । यादसां नक्रचक्रपाठीनपीठादीनां भरैः व्रजैः साकं वेलातटान्निवर्तते । किंभूत एष रयश्च । गभीररावैश्चतुरङ्गतुरङ्गगजस्यन्दनपदातिप्रबलबलचलनोद्भूतैः स्वभावजैश्च गम्भीरध्वनिभिः कृत्वा भुवः पृथिव्या उदरं मध्यं भरन् पूरयन् । अथ वा 'पृथिवीं प्रपूरयन्' इत्यपि पाठः ॥

स चक्रिणां भारतभूमिभामिनीविशेषकाणां वृषभाङ्गजोऽग्रणीः ।
तदीयवप्तेव जिनावनीभुजामभूत्सुरश्रेणिनिषेवितक्रमः ॥ ११२ ॥

स जगद्विख्यातो वृषभस्यादिदेवस्याङ्गजः सूनुर्भरतचक्री भारतं भरतक्षेत्रं तस्य भूमिः सैव भामिनी स्त्री तस्या विशेषकाणां तिलकानां भरत-सगर-मघवा-सनत्कुमार-शान्ति-कुन्थु-अर-सुभूम-पद्म-हरिषेण-जय-ब्रह्मदत्ताभिधानानां द्वादशसंख्याकानां चक्रिणां मध्ये अग्रणीर्मुख्यः प्रथमो वा अभूद्बभूव । क इव । तदीयवप्तेव । यथा तस्य भरतस्यायं तदीयः वप्ता पिता युगादिदेवः । जिनानां सामान्यकेवलिनाम् । अथ वा ऋषभ-अजित-शंभव-अभिनन्दन-सुमति-पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयांस-वासुपूज्य-विमल-अनन्त-धर्म-शान्ति-कुन्थु-अर-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्व-वर्धमाननाम्नां चतुर्विंशतितीर्थकृतां मध्ये आदिमः अजायत । किंभूतो भरतस्ततपिता च । सुराणां षोडशसहस्राङ्गरक्षकयक्षमुख्यानां चतुःषष्टिदेवेन्द्रादीनां च श्रेणिभिर्निषेवितौ परिचितौ क्रमौ चरणौ यस्य ॥

य आदिमोद्धारकरो जिनालयं व्यधापयन्मूर्धनि सिद्धभूभृतः ।
समग्रतीर्थेष्वपि सार्वभौमताममुष्य वक्तुं किमु हेमशेखरम् ॥ ११३ ॥

आदौ भवः असर्पिणीतृतीयारपर्यन्ते । प्रथमस्योद्धारस्य चैत्यस्थापनारूपस्य करः कारकः अत एव यो भरतचक्री सिद्धभूभृतः शत्रुंजयस्य मूर्धनि ऋषभकूटनामनि शिखरे जिनालयम् ऋषभदेवप्रासादं व्यधापयद्रार्धकिरलपार्श्वे कारयति स्म । किमुत्प्रेक्ष्यते । अमुष्य श्रीशत्रुंजयगिरेः समग्रेषु त्रिजगद्वासिषु तीर्थेषु सार्वभौमतां चक्रवर्तित्वं वक्तुं कथयितुम् । जनानां पुर इति शेषः । हेमशेखरं सुवर्णोत्तंसं किमु कारयति स्म ॥

मृगाक्षि सोपारककुल्यपाकयोरमूल्यमाणिक्यविनीलरत्नयोः ।
स्वतातमूर्ती भरतेन कारिते दृशाविवैते भरतावनीश्रियः ॥ ११४ ॥

मृगवदक्षिणी नयने यस्यास्तस्याः संबोधने हे हरिणलोचने, तेन भरतेन अमूल्ययोर्महर्घ्ययोर्मूल्यं ज्ञातुमपि कर्तुमपि केनाप्यशक्ययोर्माणिक्यं पद्मरागमणिरन्यो वा कश्चिन्मणिविशेषः विनीलरत्नं मरकतमणिस्तयोः स्वतातस्य ऋषभदेवस्य मूर्ती प्रतिमे कारिते निर्मापिते । कयोः पुरयोः । सोपारकनाम शत्रुंजयतलहट्टिकायां पत्तनम्, कुल्यपाकनामान्यन्नगरम्, तयोः पुरयोः । अद्यापि विद्येते इत्यध्याहारः । उत्प्रेक्ष्यते । भरतावनीश्रियो भरतक्षेत्रक्षोणिलक्ष्म्या एते प्रतिमे दृशौ नेत्रे इव ॥

तथा चतुर्विंशतितीर्थकृद्गृहं धराधवोऽष्टापदभूध्रमूर्धनि ।
व्यधापयच्छाश्वतसार्ववेश्मवत्तदद्य यावद्ध्रुववद्धितिष्ठते ॥ ११५ ॥

तथा पुनः स धराधवो भरतभूपतिरष्टापदभूध्रमूर्धनि कैलाशशैलशिखरे तुल्यनासाग्रस्वस्ववर्णप्रमाणपद्मासनाद्यङ्कितचतुर्विंशतितीर्थकृत्प्रतिमालंकृतसिंहनिषद्या नाम चतु-

विंशतेस्तीर्थकृतामृषभादीनां वर्धमानान्तानां जिनानां गृहं प्रासादं व्यधापयत्कारितवान् । किं तत् । शाश्वतसार्ववेश्मवत् सिद्धायतनमिव । तच्चैत्यमद्य यावदद्यतनं दिवसं मर्यादीकृत्य वितिष्ठते स्थितमस्ति । किंवत् । ध्रुववत् । यथा ध्रुव उत्तानपादजस्तारकोऽद्याप्याकाशे विद्यते ॥

परान्परःकोटिजिनालयानयं हिरण्यमाणिक्यमयानचीकरत् ।
जिनेन्द्रमूर्तीरपि कोटिशस्तरीरिवाङ्गिनां संसृतिसिन्धुपातिनाम् ॥११६॥

अयं भरतचक्रवर्ती परान् अन्यान् परःकोटिजिनालयान् कोटेः परे परःकोट्यः । कोटिश इत्यर्थः । तादृशान् प्रासादानचीकरत् कारयामास । किंभूतान् । हिरण्यं सुवर्णं माणिक्यानि रत्नानि मणिविशेषा वा तन्मयान् तै रचितान् । अपि पुनः कोटिशो जिनेन्द्राणाम् अतीतानागतवर्तमानचतुर्विंशतितीर्थकृतां मूर्तीः प्रतिमाः कारयति स्म । उत्प्रेक्ष्यते । संसृतिः संसारः स एव सिन्धुः समुद्रः तत्र रागद्वेषादिना पतनशीलानामङ्गिनां प्राणिनां तरीस्तरीतुं नाव इव ॥

नृपोऽयमाद्योऽजनि संघनायकः कृशाङ्गि शत्रुंजयरूप्यशीलयोः ।
क्षमाभृतां भोगभृतां च योऽग्रणीरभूत्पुनः कुण्डलिनामिवाधिभूः ११७

हे कृशाङ्गि तन्वङ्गि, अयं नृपो भरतभूमीन्द्रः शत्रुंजयरूप्यशीलयोर्विमलाचलाष्टापदयोराद्यः प्रथमः संघनायकः संघपतिरजनि संजातः । पुनर्यः क्षमाभृतां राज्ञां भोगभृतां भोगिनाम् । 'भोगः श्रीभरतेश्वरे प्रतिपदं लब्धिस्तथा गौतमे' इति सूक्तवचनात् । भोगो राज्यादिसुखं सर्पदेहश्च राज्यादिसर्वसुखभाजां वा अग्रणीर्मुख्योऽभूद्बभूव । क इव । कुण्डलिनामधिभूरिव । यथा नागनाथः शेषः पृथ्वीधारिणां कुलपर्वतादीनां तथा भोगं सर्पकायं बिभ्रतीति भोगभृतस्तेषां वासुकिप्रमुखनागानामग्रणीः । शैला हि पादैर्धरां दधते, शेषस्तु सहस्रसंख्यैः स्वफणामण्डलैः सर्वां वसुंधरां धत्ते । अतोऽग्रणीत्वम् ॥

असौ प्रकामप्रमदं ददानया प्रसूतया ध्यानसुधापयोधिना ।
शिवश्रिया अग्रजयेव केवलश्रिया श्रितो दर्पणिकानिकेतने॥ ११८ ॥

असौ भरतचक्री दर्पणिकानिकेतने आदर्शगृहे । 'यन्मतौ विमलदर्पणिकायाम्' इति नैषधे । केवलश्रिया केवलज्ञानलक्ष्म्या श्रितो भेजे । किंभूतया । प्रकामं सर्वातिशायिनमनन्तं प्रमदं हर्षम् । परमानन्दमित्यर्थः । ददानया यच्छन्त्या । श्रीरपि प्रकृष्टस्य मातृपादाम्भोजभक्तस्य कामस्य प्रद्युम्नस्य स्वाङ्गजातस्य प्रमोदं दत्ते । पुनः किंभूतया । ध्यानं शुक्लप्रणिधानं तदेव सुधापयोधिः क्षीरसमुद्रः शुक्लध्यानवदुज्ज्वलत्वात्क्षीरमयत्वात् ध्यानामृताब्धिः । 'गुणश्रेणिसुधासिन्धोः पाण्डोरुज्जागरौजसः' इति पाण्डवचरित्रे । तेन प्रसूतया जनितया । श्रीरपि दुग्धाब्धेर्जाता । उत्प्रेक्ष्यते । शिवश्रिया मूर्तिलक्ष्म्या अग्रजया ज्येष्ठभगिन्येव प्रथमोत्पन्नत्वेन केवलज्ञानानन्तरं मोक्षप्राप्तेः ॥

दिगन्तवासं किमपास्य काश्यपीविलासशीलैः ककुभां पुरंदरैः ।
तदष्टपट्टक्षितिपैरवाप्यतामुनेव सीमन्तिनि केवलेन्दिरा ॥ ११९ ॥

'केशेषु वर्त्म सीमन्तः' इति हैम्याम् । प्रशस्यः सीमन्तोऽस्त्यस्यास्तस्याः संबोधनं हे सीमन्तिनि, तस्य भरतस्य अष्टसंख्याकैः पट्टेषु पदेषु क्षितिपैः । अथ वा । तत्पट्टधारिभिर्मध्यपदलोपे नृपैः। भरतादारभ्य अष्टपट्टधरै राजभिरित्यर्थः। अमुनेव भरतचक्रिणेव आदर्शगृहे केवलेन्दिरा केवलज्ञानलक्ष्मीरवाप्यत प्राप्ता । उत्प्रेक्ष्यते । दिगन्तवासं दिशां प्रान्ते वसतिमपास्य त्यक्त्वा काश्यपी भूमिस्तस्यां विलासः स्थानवैशिष्ट्यं क्रीडनं वा तत्र शीलं स्वभावो येषां तैः । 'लीला केलिर्विलासश्च शृङ्गारभावजक्रिया' इत्यनेकार्थः । केलिः क्रीडा विलासः स्थानवैशिष्ट्यमित्येवं भूरिः ककुभां पुरंदरैरष्टदिक्पालैः किंम् । 'आखण्डलो दण्डधरः शिखावान्पतिः प्रतीच्या इति दिग्महेन्द्रैः' इति नैषधे ॥

ततोऽस्य संख्यातिगपट्टपङ्क्तिभिः प्रपद्य शत्रुंजयमूर्ध्नि केवलम् ।
महोदयश्रीः समसेवि भास्करैरिवोदयं द्यौरुदयावनीधरे ॥ १२० ॥

ततः अष्टमपट्टधरदण्डवीर्यराजानन्तरमस्य भरतचक्रिणः संख्यामतिगच्छन्त्यतिक्रामन्तीति संख्यातिगाः। कर्मणि डः । ताभिः। असंख्याताभिरित्यर्थः। पङ्क्तिभिः पट्टधरराजराजीभिः शत्रुंजयमूर्ध्नि विमलाचलशिखरे केवलं केवलज्ञानं प्रतिपद्यासाद्याधिगत्य महोदयश्रीर्मुक्तिलक्ष्मीः समसेवि संसेविता । कैरिव । भास्करैरिव । यथा दिवाकरैरुदयावनीधरे पूर्वपर्वते उदयमुद्गममवाप्य द्यौर्गगनमण्डली सेव्यते ॥

बभूवुरिक्ष्वाकुकुले सहस्रशः सहस्रशोचिःसदृशा महौजसा ।
ततः क्षितीन्द्रा जगदीहितावहा महेन्द्रशैले सुरभूरुहा इव ॥ १२१ ॥

ततः संख्यातिगपट्टपरंपराप्रान्तवर्तिजितशत्रुभूपतिरासीत्तेन स्वसुताजिततीर्थकृते राज्यं विश्राणितम्, श्रीभगवता च स्वपितृभ्रातृसुमित्रधात्रीपतिपुत्राय सगरकुमाराय राज्यं प्रददे, स क्रमाच्चक्री भूत्वा चारित्रमादाय सिद्धः सगरचक्रिणोऽनन्तरम् । इक्ष्वाकुकुले सौधर्मेन्द्रेण स्वयं स्थापितस्य श्रीऋषभदेवस्य वंशे सहस्रशः अर्थादसंख्याताः क्षितीन्द्राः पृथिवीपुरंदरा राजानो बभूवुः संजाताः । किंभूताः । महौजसा अतिशायिप्रतापैः सहस्रशोचिषः सूर्यस्य सदृशास्तुल्याः । पुनः किंभूताः । जगदीहितावहाः विश्वकामितविधायकाः । क इव । सुरभूरुहा इव । यथा महेन्द्रशैले मेरौ जगदभिलषितपूरकाः कल्पवृक्षा भवन्ति ॥

इति स्वप्नजागरिकायां भरतदिग्विजयोद्धारप्रतिमाप्रासादकारापणकेवलज्ञानतत्पट्टपरंपरावर्णनम् ॥

इदं वदन्त्यामरविन्दचक्षुषः पुरोऽथ तस्यामपरा निपस्तनी ।
गिराननं योजयति स्म कौतुकान्मरालिकायामिव कीरकामिनी ॥१२२॥

अथ भरतचक्रिदिग्विजयादिकथितानन्तरम् अरविन्दचक्षुषः कमललोचनाया नाथीदेव्याः पुरोऽग्रे तस्यां प्रागुक्तायां सख्यामिदं पूर्वोक्तम् ऋषभभरतादिग्विजयचैत्यनिर्मापणादि वदन्त्यां सत्याम् अपरा अन्या काचिन्निपस्तनी कलशोच्चकुचा कौतुकात् कौतूहलाद्गिरा वाचा आननं मुखं योजयति स्म । उवाचेत्यर्थः । केव । कीरकामिनीव । यथा मरालिकायां वदन्त्यां हंस्यां भाषमाणायां सत्यां शुकी वक्ति ॥

मृगाक्षि पश्यामरसिन्धुसारिणीं त्वमभ्रवीथीं सुमनोवनीमिव ।
मयूखलेखामकरन्दितारकामणीचका मेचकिमालिमण्डलाम् ॥ १२३ ॥

मृगवदक्षिणी यस्यास्तस्याः संबोधनं हे मृगाक्षि स्वामिनि, त्वमभ्रवीथीं गगनपद्धतिं पश्य विलोकय । उत्प्रेक्ष्यते । सुमनोवनीमिव पुष्पवाटिकामिव । देववनं वा । किंभूता । अमरसिन्धुराकाशगङ्गा सैव सारिणी कुल्या यस्याम् । पुनः किंभूता । मयूखलेखा किरणश्रेणिरेव मकरन्दो मधु विद्यते येषु तादृशास्तारका एव मणीचकानि कुसुमानि यस्याम् । मेचकिमा गगनश्यामत्वम् । 'धृतगम्भीरखनीखनीलिमा' इति नैषधे । तथा 'अर्चिश्चण्डांशुरोचिर्गगनमलिनिमा कज्जलं दह्यमानम्' इति खण्डप्रशस्तौ । तदेव अलिनां भ्रमराणां मण्डलानि वृन्दानि यस्याम् ॥

मृगेन्द्रमध्ये मृगयस्व तारकाञ्श्रमोदबिन्दुस्तबकानिवाङ्कके ।
विभावरीकैरवचक्षुषोऽमुना निखेलयन्त्या दयितामृतांशुना ॥ १२४ ॥

मृगेन्द्रः केसरी तद्वन्मध्यमुदरं यस्याः, यद्वा मृगेन्द्रमध्यवन्मध्यं यस्याः । मध्यमपदलोपी समासः । कृशोदरीत्यर्थः । त्वं तारकान्(?) ज्योतिश्चक्राणि मृगयस्व पश्य । 'पयःपारावारं परमपुरुषोऽयं मृगयते' इति खण्डप्रशस्तौ । इवोत्प्रेक्ष्यते । अमुना दृश्यमानेन दयितेन भर्त्रामृतांशुना सुधाकरेण चन्द्रेण सार्धं निखेलयन्त्या सुरतादिक्रीडां कुर्वत्या विभावरीकैरवचक्षुषो रजनीकुमुदनेत्राया रात्रिस्त्रियः अङ्गमेवाङ्ककम् । 'अकिंचने किंचन नायकाङ्कके' इति नैषधे । श्रमोदबिन्दुस्तबकान् परिश्रमसंजातप्रस्वेदजलकणगुच्छानिव । 'श्रमोदबिन्दुप्रकरान्' इति पाठो वा । तदा परिश्रमसलिलकणनिकरानिव ॥

कुशेशयामोदिनि वीक्ष्यतामसौ शनैः शनैः पङ्कजकाननानिलः ।
त्वदाननाम्भोजजनुःप्रभञ्जनैर्जितान्तिके किं समुपैति सेवितुम् ॥ १२५ ॥

कुशेशयं कमलं तद्वदामोदो वपुः परिमलोऽस्त्यस्यास्तस्याः संबोधनं हे कुशेशयामोदिनि । पद्मिनीत्यर्थः । हे स्वामिनि, वीक्ष्यतां विलोक्यताम् । अवधार्यतामित्यर्थः । असौ प्रत्यक्षं शरीरस्पर्शनानुभूयमानः पङ्कजकाननानिलो नलिनवनपवनः शनैः अन्तिके श्रीमत्याः पार्श्वे उपैत्यागच्छति किम् । उत्प्रेक्ष्यते । त्वदाननाम्भोजात्तव वदनारविन्दाज्जनुरुत्पत्तिर्येषां तादृशैः प्रभञ्जनैः त्वद्वक्त्रकमलसुरभिश्वाससमीरणैर्वातैः सेवितुं त्वत्समीपे इव समुपैति ॥

करेणुकुम्भस्तनि पश्य दीप्यतेऽन्तिके मणीकुट्टिमबिम्बितारकैः।
त्वदाननस्वामिसितांशुसेवनाकृते नभस्तः किमुपागतैरिह ॥ १२६ ॥

करेणोर्हस्तिनः कुम्भौ शिरसः पिण्डाविव पीनावुच्चौ स्तनौ कुचौ यस्यास्तस्याः संबोधनं हे करेणुकुम्भस्तनि कुम्भिकुम्भपीनोच्चकुचकलशे स्वामिनि, त्वं पश्य निरीक्षस्व। अन्तिके श्रीमत्याः समीपे मणिकुट्टिमबिम्बितारकैर्विविधरत्ननिबद्धसौधप्राङ्गणभूमौ बिम्बन्ति अतिस्वच्छवस्तुनि संक्रामन्ति इति बिम्बानि बिम्बान्यस्त्ये(नि सन्त्ये)षां तादृशैस्तारकैर्ज्योतिर्भिर्दीप्यते । किमुत्प्रेक्ष्यते । त्वदाननं तव मुखमेव स्वामी पतिः सितांशुश्चन्द्रस्तस्य सेवनाकृते पर्युपासनां कर्तुं किमु नभस्तो गगनादिह त्वद्गृहाङ्गणे समागतैः समेतैरिव ॥

त्वदीयवापीतपनास्तमुद्रिताम्बुजन्मकोशव्यसनानुपातिनः।
क्षपाक्षयायोंकृतिमन्त्रवर्णकानिव द्विरेफा गणयन्ति गुञ्जितैः ॥ १२७ ॥

हे स्वामिनि, त्वदीयवाप्यां तव क्रीडागृहदीर्घिकायां तपनस्य सूर्यस्यास्तेन परद्वीपोपगमनेनादृश्यीभावेन । 'तेजोवसाने व्रजति द्वीपान्तरमहर्मणिः' इति सूक्तवचनात् । मुद्रितानां निमीलितानां मुकुलीभूतानामम्बुजन्मनां कोशेषु यद्बन्धलक्षणं व्यसनमापत् कोशान्तर्दुःखस्थितिविपत्तिस्तामनुलक्षीकृत्य ज्ञात्वैव । यत्पद्ममुद्रणायां यामिनीं यावत्कोशान्तरदुःखेन स्थातव्यमेवेति विचार्य पतन्तीत्येवंशीलाः पातिनः । पतित्वा स्थिता इत्यर्थः । द्विरेफा भ्रमराः । अत एवोत्प्रेक्ष्यते । गुञ्जितैर्गुञ्जारवैः कृत्वा क्षपाक्षयाय निशानाशाय । ओंकृतिमन्त्रवर्णकान् ओंकारपूर्वकवर्णस्तस्याक्षराणि गणयन्ति जपन्तीव ॥

नभःश्रियास्तारकमौक्तिकस्रजः किमेणनाभीशितिमाङ्कनायकः।
दृशा विनिर्दिश्य शशाङ्कमादरात्परा ददे कापि गिरं मृगेक्षणा ॥ १२८ ॥

परा अन्या कापि मृगेक्षणा सखी आदरात् तस्यां स्वस्वामिन्यामतिबहुमानाद्गिरं वाणीमाददे । जग्राहेत्यर्थः । किं कृत्वा । दृशा नेत्रेण शशाङ्कं चन्द्रं विनिर्दिश्य दर्शयित्वा । यतः । शशः अङ्के चक्षुषि उत्सङ्गे वा यस्य । 'अङ्कः क्रोडेऽन्तिकागसोः' इत्यनेकार्थः । अत एवोत्प्रेक्ष्यते । नभःश्रिया गगनलक्ष्म्यास्तारका ज्योतिर्गणा उज्ज्वलानि वा मौक्तिकानि स्थूलमुक्ताफलानि तेषां स्रजो मालायाः । हारस्येत्यर्थः । एणनाभ्याः कस्तूरिकायाः शितिमा श्यामत्वमङ्के क्रोडे यस्य कस्तूरीकलितमध्यो नायको मध्यमणिः किम् ॥

निजाक्षिलक्ष्मीहसिताब्जखञ्जनेऽधरीकृतः सुभ्रु तवास्यविभ्रमैः।
विवर्णताश्लेषिमुखस्त्रपाभरादिवास्ततां याति तमस्विनीपतिः ॥ १२९ ॥

निजस्यात्मनः । यद्वा निजयोरात्मीययोरक्ष्णोर्नयनयोर्लक्ष्म्या शोभया हसिता निर्भर्त्सिता अब्जानि उत्पलकुमुदजातियावत्कमलानि, तथा खञ्जनाः खञ्जरीटा यया तस्याः

संबोधनं हे निजाक्षिलक्ष्मीहसिताब्जखञ्जने। तथा शोभने भ्रुवौ यस्यास्तस्याः संबोधनं हे सुभ्रु, तमस्विनीपतिश्चन्द्रोऽस्ततां याति । उत्प्रेक्ष्यते । त्रपाभराल्लज्जातिशयादिव किम् अधरीकृतो हीनो हितः जित इत्यर्थः । कैः। तवास्यविभ्रमैः भवन्मुखश्रीभिः । अत एव किंभूतः । विवर्णताया विच्छायताया आश्लेषो यत्र तादृङ्मुखं यस्य ॥

निजास्यदासीकृतशारदोदयत्सितद्युते भृङ्गिततारतारके ।
विनिद्रतां वीक्ष्य तवेक्षणाम्बुजे ह्रियेव निद्राति कुमुद्वनं वने ॥१३०॥

निजेनात्मीयेनास्येन कृत्वा दासीकृतः किंकरतां प्रापितः शारदः शरत्कालसंबन्धी उदयन्नभस्युद्गच्छन् सितद्युतिश्चन्द्रो यया तस्याः संबोधने निजास्यदासीकृतशारदोदयत्सितद्युते हे स्वामिनि, वने कानने जले वा स्थलेऽपि कमलिनीकमलसद्भावो दृश्यते । यथा—'ददर्श तत्र स्थलपद्मिनीं नलः' इति नैषधे । तथा—'उत्फुल्लस्थलपद्माभमवचरणभूषिता' इति चम्पूकथायाम् । कुमुद्वनं कैरवकाननं निद्राति संकुचति । उत्प्रेक्ष्यते । भृङ्गिते भृङ्गाविवाचरिते श्यामलत्वात् तारे निर्मलतारिके कनीनिके यत्र तादृशं तव श्रीमत्या ईक्षणं लोचनमेवाम्बुजं कमलं तत्र विनिद्रतां विकाशतां वीक्ष्य विलोक्य यदा कमलं विकसति तदा कुमुदं संकुचतीति स्थितिः । ह्रियेव लज्जयेव क(त)स्मात्स्वस्य हीनश्रीकत्वात्त्रपा ॥

कृशाङ्गि राजन्यपयातवैभवेऽपराश्रये शोच्यदशावशंवदे ।
शनैः शनैस्तारगणा इवानुगा विभावयाभ्रे विरलीभवन्त्यमी ॥ १३१ ॥

हे कृशाङ्गि तन्वङ्गि, त्वमभ्रे नभसि विभावय पश्य । अपयातवैभवे गतश्रीके राजनि भूपाले चन्द्रे च अनुगाः सेवका इव अमी दृश्यमानास्तारगणा ज्योतिर्व्रजाः शनैः शनैर्विरलीभवन्ति स्तोका जायन्ते । किंभूते राजनि । अपरेषां सश्रीकाणामाश्रयो भाजनं यस्य । गताखिललक्ष्मीको हि तदर्थं सश्रीकं परं श्रयते इति स्थितिरेवेति । तत्त्वतस्तु अपरस्यां पश्चिमायामाश्रयो वेश्म यस्य । पुनः किंभूते । शोच्या शोचनार्हा दशा अवस्था तस्या वशंवदे आयत्ते ॥

प्रपूर्णपाथोरुहबन्धुगर्भिणी तनूभवत्तारकतारभूषणा ।
हरेर्हरित्पाण्डुरिमाणमानने बिभर्ति मत्तेभगतेव सुस्मिते ॥ १३२ ॥

सु शोभनं स्मितमीषद्धसनं यस्यास्तस्याः संबोधने हे सुस्मिते। एतावता बहुहासनिषेधः । हरेरिन्द्रस्य हरित् दिक् पूर्वा आनने मुखे पाण्डुरिमाणमौज्ज्वल्यं धत्ते । किंभूता। प्रपूर्णः संपूर्णीभूतः प्रसवसमयं प्राप्तः पाथोरुहाणां पद्मानां बन्धुः भास्वान् स एव गर्भोऽस्त्यस्याः । अत एव । पुनः किंभूता । तनूभवन्तः स्तोकीभावं भजन्तः प्रभातत्वात्तारकास्तारा एव ताराण्येवोज्ज्वलानि भूषणानि यस्याः सा । केव । मत्तेभगतेव । यथा आपन्नसत्त्वा स्त्री वक्त्रे पाण्डुरतां धत्ते । किंभूता । संपूर्णो भाग्यवत्तया

भानुवत्स्वयं दीप्यमानो मातुश्च दुःप्रेक्ष्यतेजः करोति। यथा—'धामैकधामगगा(ङ्गा?)या गङ्गाया इव भास्करम् । गर्भमन्तर्दधानाया दुरालोकमभूद्वपुः ॥' इति पाण्डवचरित्रे । गर्भोऽस्त्यस्या एतावता नार्थादेव्या भास्वत्संनिभो गर्भो भावीत्यसूचि । पुनः किंभूता । गर्भोद्भवात्खेदादल्पीभवत्तारकवदुज्ज्वलमौक्तिकाभरणानि यस्याः । 'शरीरसादादसमग्रभूषणा' इति रघुकाव्ये ॥

तमस्विनीशेऽस्तमिते प्रकाशतां विलोकयास्ये दधतेऽखिला दिशः ।
कलङ्किदोषाकररुद्रसङ्गिनां वहन्ति केन व्यसनोदये मुदम् ॥ १३३ ॥

हे स्वामिनि, त्वं विलोकय निरीक्षस्व । तमस्विनीशे निशानायके चन्द्रे अस्तं नाशं क्षयं वा इते प्राप्ते सति अखिलाः सर्वा अपि दिशः आस्ये मुखे प्रकाशतां प्रकटतां नक्तं तु तमिस्रवस्त्रेणाच्छादितत्वादव्यक्तता जातासीत् । प्रभाते पुनस्तमःपटोत्सारणात्प्रकटत्वं हर्षहास्यं वा दधते धारयन्ति । 'प्रकाशः स्फुटहास्ययोः' इत्यनेकार्थः । युक्तोऽयमर्थः । कलङ्किनामपवादवताम् । 'कलङ्कोऽङ्कापवादयोः । कालायसमलावपि' इत्यनेकार्थः । तथा दोषाकराणां निखिलापगुणखनीनां रुद्रस्य चण्डस्य जनसंहारकारिणः सङ्गोऽस्त्येषामिति रुद्रसङ्गिनस्तेषाम् । 'क्षये जगज्जीवपिबं शिवं वदन्' इति नैषधे । पश्चात्कर्मधारयः । पाप्मवतीपतीनां च । 'तमोऽज्ञानेऽन्धकारे च पाप्मनि' इत्यनेकार्थः । पुंसा व्यसनोदये आपत्प्रकटीभावे के जना मुदं हर्षं न वहन्ति बिभ्रति । अपि तु सर्वेऽपि मुदमावहन्ते ॥

इतः श्रियानिर्जितविश्वयौवते समुज्जिहानः सविता निपीयताम् ।
किमु स्फुरद्भाग्यभरो विभावरीवियुज्यमानद्विजसंततेरसौ ॥ १३४ ॥

हे श्रिया स्ववपुर्लक्ष्म्या निर्जितानि पराभूतानि विश्वेषां त्रयाणां जगताम् । त्रैलोक्यस्यापीत्यर्थः । यौवतानि युवतीसमूहा यया तस्याः संबोधने श्रियानिर्जितविश्वयौवते । अलुक्समासः । हे स्वामिनि, इतः अस्मिन् पार्श्वे । प्राच्यां दिशीत्यर्थः । उज्जिहानः समभ्युदयन् । 'मुखेन्दुनानेन सहोज्जिहानाम्' इति नैषधे। 'उज्जिहानामुदयन्तीम्' इति तद्वृत्तिः । सविता सूर्यस्त्वया निपीयतां सादरमवलोक्यताम् । यथा सूर्योदयः संजातस्तथा तवापि कुलदिनकरः पुत्रः संजात एवेति सादरत्वम् । किमुत्प्रेक्ष्यते । विभावर्यां निशायां वियुज्यमानानां वियोगमाप्नुवतां द्विजानां पक्षिणामर्थाच्चक्रवाकविहंगमानाम् । 'विहगयोः कृपयैव शनैर्ययोरविरहाविरहध्रुवभेदयोः' इति रघुवंशे । संततेः श्रेण्याः असौ सूर्यलक्षणः स्फुरन् प्रकटीभवन् भाग्यभरः पुण्यसमुदय इव ॥

निरित्वरीभिर्मधुपीभिरुल्लसत्सरोजकोशात्सखि मञ्जु गुञ्ज्यते ।
किं गायनीभिर्धवलस्य वासरश्रियाब्जबन्धोः करपीडनोत्सवे ॥ १३५ ॥

हे सखि, उल्लसत्सरोजकोशात् विकसत्कमलमुकुलान्निरित्वरीभिर्निर्गमनशीलाभिर्मधुपीभिर्भ्रमरीभिर्मञ्जु मनोहरं यथा स्यात्तथा गुञ्ज्यते गुञ्जारवः क्रियते । किमुत्प्रेक्ष्यते ।

अब्जबन्धोर्भास्करस्य वासरश्रिया दिनलक्ष्म्या समं करपीडनोत्सवे पाणिग्रहणमहे धवलस्य गायनीभिर्गानकर्त्रीभिः । किं धवमङ्गलगायनीभिरिवेत्यर्थः ॥

हले हिमाम्भः पतितं विहंगमव्याहारलीलायितवल्लिपल्लवे ।
गायन्मृगाक्षीदशनच्छदे द्विजज्योत्स्नास्मितश्रीरिव लक्ष्यते क्षणम् १३६

हे हले हे सखि, 'किं नन्दिः किं मुरारिः—क्रीडां कर्तुं प्रवृत्तः स्वयमपि तु हले भूपतिर्भोजदेवः' इति धनपालप्रोक्तभोजस्तुतौ । विहंगमानां पक्षिणां व्याहाराणां वचसाम् । कूजितानामित्यर्थः । 'व्याहारो भाषितं वचः' इति हैम्याम् । लीलया क्रीडया आचरितं यत्र तादृश्या वल्ल्या लतायाः पल्लवे किसलये पतितं हिमाम्भः तुहिनजलं क्षणं क्षणमात्रं लक्ष्यते दृश्यते । केव । द्विजज्योत्स्नास्मितश्रीरिव । यथा गायन्त्या गानं कुर्वत्या मृगाक्ष्याः स्त्रिया दशनच्छदे अधरे पर्यस्ता द्विजानां दन्तानां ज्योत्स्ना कान्तिस्तया कलितस्मितस्य हसितस्य श्रीर्लक्ष्मीः क्षणमीक्ष्यते ॥

हैमाब्जनिर्यासपिशङ्गितैः[1] सितच्छदैर्वतंसैरिव भान्ति पल्वलाः ।
क्रौञ्चैः किं क्रेङ्क्रियते प्रवेशे कंजाश्रये वा किमु तूर्यनिःस्वनैः ॥ १३७ ॥

हे स्वामिनि, हेम्न इमानि हैमानि अब्जानि तेषां निर्यासै रसैरर्थात् परागमकरन्दैः पिशङ्गितैः पिङ्गीकृतैः सितच्छदैर्हंसैः कृत्वा पल्वलाः सरोवराणि भान्ति । उत्प्रेक्ष्यते । वतंसैः स्वर्णशेखरैरिव । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः । अपि पुनः क्रौञ्चैः प्रसिद्धैः पक्षिविशेषैः क्रेंक्रियते प्रभातप्रथमारम्भोत्थितैः क्रेंकारवो विधीयते । किमूत्प्रेक्ष्यते । कंजाश्रये पद्माकरे पद्मसद्मनि वा प्रवेशे प्रवेशकरणमहोत्सवे तूर्यनिःस्वनैः किमु वादित्रनिर्घोषैरिव ॥

वाता वान्ति स्मितकजसरिद्वारि कल्लोलयन्तो
　मन्दं मन्दं स्खलितगतयः स्त्रैणवक्षोजशैलैः ।
जातिस्नेहात्किमिह मिलितुं कम्पितैराननाना-
　माजानेया अपि हरिहयानाह्वयन्ते विभाते ॥ १३८ ॥

हे स्वामिनि, वाताः प्रातर्वायवो वान्ति । वातास्त्रिविधाः । वर्ण्यन्ते—शीता मन्दाः सुरभयश्च । तदेव दर्शयति—किंभूता वाताः । स्मितानि विकसितानि कजानि कमलानि यत्र तादृश्याः सरितो नद्या वारि प्रवहत्पयःपूरं कल्लोलयन्तः लहरीकलितं कुर्वन्तः उत्तुङ्गरङ्गत्तरङ्गयुक्तं विरचयन्तः । एतावता कमलकलितजलकल्लोलनेन सुगन्धत्वं शीतत्वं च दर्शितम् । पुनः किंभूताः । मन्दं मन्दं शनैः । 'मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्' इति मेघदूतकाव्ये । स्खलिता मन्दीभूता भग्ना वा गतिर्येषाम् । कैः । स्त्रैणस्य युवतीजनव्रजस्य वक्षोजशैलैः विकञ्चुकितकुचाचलैः । एतावता मन्दत्वं च इति

१. अयं मूलश्लोकस्त्रुटितः पुस्तके नोपलभ्यते.

त्रिधापि वाता दर्शिताः । अपि पुनर्विभाते दिनोदये समये आजानेयाः कुलीनाश्वा आननानां वक्त्राणां कम्पितैर्वल्गनैरूर्ध्वाधःकरणैर्हरेरिन्द्रस्य रवेर्वा हयांस्तुरङ्गान् । 'हरिं विदित्वा हरिभिश्च वाजिभिः' इति रघुवंशे । इति प्रसिद्धोच्चैःश्रवस्येकस्मिन्नश्वेऽपि इन्द्रस्याश्वबाहुल्यम् । तथा—'पर्य(र्ज)न्यहर्यश्वऋभुक्षिबाहु–' इति हैम्याम् । उच्चैःश्रवाः श्वेताश्वः । हरयो नीलवर्णा अश्वा यस्येत्यन्यहरिद्वर्णवाजिसद्भावः प्रोक्तः । रवेस्तु तुरङ्गमानां सप्तत्वेन बाहुल्यमेवास्ते । आह्वयन्ते आकारयन्ति । किमुत्प्रेक्ष्यते । जातिरश्वानां कुलस्य स्नेहात्प्रीतेः मिलितुमिह भुवि उच्चैर्गमनशक्त्यभावाद्भूमीमण्डले स्वसमीपे वा किमाह्वयन्ते ॥

चन्द्राननेऽमन्दमरन्दबाष्पा कुमुद्वती मुद्रितनेत्रपत्रा ।
विधोर्वियोगादिव कोशमध्यावरुद्धगुञ्जन्मधुपैर्विरौति ॥ १३९ ॥

चन्द्रानने संपूर्णपार्वणेन्दुरिव वदनं यस्याः । अथवा चन्द्रवदाल्हादकं मुखं यस्याः संबोधने नार्थीदेवि, कुमुद्वती कैरविणी कोशमध्ये स्वकुमुदमुकुलान्तराले अवरुद्धैश्चन्द्रास्तेन बद्धमुकुलमध्य एव स्थितैः । तथा—गुञ्जद्भिः शब्दायमानैर्मधुपैर्भृङ्गैर्विरौति शब्दायते । इवोत्प्रेक्ष्यते । विधोर्भर्तुश्चन्द्रमसो वियोगाद्विरहादिव रोदिति । रोदनलक्षणमाह—किंभूता कुमुद्वती । अमन्दो बहुलो यो मरन्दो मधु स एव बाष्पो नेत्राम्बु अश्रुजलं यस्याः । पुनः किंभूता । मुद्रिते निमीलिते नेत्रे एव तत्तुल्ये वा पत्रे यस्याः सा ॥

उपगतमिहान्यस्माद्द्वीपात्प्रगेऽधिपतिं त्विषा-
मनुरतिपरीरम्भारम्भप्रसारिकरं पुरः ।
विकचवदना राजीविन्यः स्फुटोद्गतकण्टका
नयनकमलैरालोकन्ते वशा इव वल्लभम् ॥ १४० ॥

हे स्वामिनि, राजीविन्यः पद्मिन्यः प्रगे प्रभाते त्विषां पतिं सूर्यं नयनान्येव तत्तुल्यैर्वा कमलैः । कमललोचनैरित्यर्थः । आलोकन्ते पश्यन्ति । का इव । वशा इव । यथा कामिन्यो वल्लभं स्वकान्तं वीक्षन्ते । किंभूतं सूर्यं वल्लभं च । अन्यस्मादपरस्माद्द्वीपाद्वन्दिरात् । 'तेजोवसाने व्रजति द्वीपान्तरमहर्मणिः' इति सूक्तोक्तेः । तथा—'द्वीपमन्तर्जले तटम्' इत्युक्तेश्च । इतरस्मात्कस्माचिद्द्वीपान्तरात् इह द्वीपे उपगतमागमने । 'गमनार्थाः समभ्युपाङ्भ्यः पराः कथिताः ।' 'उपगतोऽपि च मण्डलनाभिताम्' इति रघुवंशे । उपगतः प्राप्त इति तद्वृत्तिः । पुनः किंभूतम् । पुरोऽग्रे अनुरत्या अनुरागेण । 'रागोऽनुरागोऽनुरतिः' इति हैम्याम् । यः परीरम्भ आलिङ्गनं तस्यारम्भाय उपक्रमार्थं प्रसारिणः प्रसरणशीलाः कराः किरणा हस्ताश्च यस्य । किंभूताः पद्मिन्यो वशाश्च । विकचवदना विकसितमुखाः । पुनः किंभूताः । स्फुटं प्रकटमुद्भूताः प्रादुर्भूताः कण्टका अङ्कुरविशेषाः । नालीतः कण्टकाः स्युः । 'कण्टकः पद्मनाले' इति वचनात् । तथा—उद्गतो रोमाञ्चो यासाम् । 'रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम्' इति हैम्याम् । स्त्रीपुरुषयोरपि विशेषणानि स्युः ॥ इति सखिकाथितरात्रिविरामाविभातादिनकरोदयवर्णनम् ॥

आनन्दाद्वयवादमेदुरमना मध्ये सखीनामिति
प्रारब्धाभिनवोक्तियुक्तिरचना वाग्देवताश्रीजुषाम् ।
देवीनां जयवाहिनीव सुमनोवल्लीव वा वीरुधां
ताराणां विधुमण्डलीव महिला कामप्यवाप श्रियम् ॥ १४१ ॥

सा महिला नाथी देवी सखीनां स्ववयसी(स्या)नां मध्ये स्थिता सती कामप्यनिर्वचनीयां श्रियं शोभामवाप लेभे । किंभूता सा । आनन्दस्य प्रमोदस्य योऽद्वयवादोऽद्वैतता तेन मेदुरं पुष्टं मनो यस्याः । किंभूतानां सखीनाम् । इति पूर्वोक्तप्रकारेणारब्धाः प्रकाशिता अभिनवा नूतना उक्तयो वार्तास्तासां युक्तीनां योजनानां न्यायानां रचनाः संदर्भास्तैः कृत्वा तासु वा वाग्देवतायाः सरस्वत्याः श्रीजुषां शोभाभाजां वाग्वादिनीवद्वा लक्ष्मीभृताम् । केव कासां मध्ये श्रियमाप्नोति । देवीनां देवाङ्गनानां मध्ये जयवाहिनी इन्द्राणीव । पुनः केव । वीरुधां वल्लीनां मध्ये सुमनोवल्ली कल्पलतेव । ताराणां तारकाणाम् । 'भकनीनिकयोस्ताराः' इति लिङ्गानुशासने । पुंस्त्रीलिङ्गे ताराशब्दः । मध्ये विधुमण्डली चन्द्रबिम्बमिव । 'कुवलयमृणालमण्डला' इति लिङ्गानुशासने मण्डलशब्दस्त्रिलिङ्गे ॥

यं प्रासूत **शिवाह्वसाधुमथवा सौभाग्य**देवी पुनः
श्रीमत्कोविदसिंह**सीहविमला**न्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदे**वविमल**व्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गो द्वितीयोऽभवत् ॥ १४२ ॥

पण्डितदेवविमलगणिव्यावर्णिते हीरसौभाग्याभिधे महाकाव्ये हीरविजयसूरिचरिते द्वितीयः सर्गोऽभवत् जातः ॥

इति पण्डितश्री**सीहविमल**गणिशिष्यपण्डित**देवविमलगणि**विरचिते **हीरसौभाग्य**नाम्नि महाकाव्ये कुंरानाथीगजस्वप्न-तज्जागरिका-ऋषभदेवभरतदिग्विजय-सखीकथितभरतदिग्विजयादि-रात्रिविरामदिनकरोदयवर्णनो नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

कल्पद्रुमाङ्कुरमिवामरशैलभूमी
रत्नं विदूरधरणीव घनस्वनोत्थम् ।
अन्तर्मदोदयमिवेभकपोलपाली
नाथी ततोऽवहत दोहदलक्षणं सा ॥ १ ॥

ततः स्वप्नदर्शनधर्मजागरिकरणानन्तरं सा कुंरामहभ्यपत्नी नाथीदेवी दोहदलक्षणं गर्भ-

मवहत धत्ते स्म। 'सुदक्षिणा दोहदलक्षणं दधौ' इति रघुवंशे। तथा 'गर्भस्तु गरभो-भ्रूणो दोहदलक्षणं च सः' इति हैम्यामपि। केव। अमरशैलभूमीव। यथा मेरुमही कल्पद्रुमाङ्कुरं सुरतरुप्ररोहं वहते। पुनः केव। विदूरधरणीव। यथा विदूरपर्वतस्य पृथिवी। 'यथा विदूरीन्दिरदूरतां गमी' इति नैषधे। घनस्तनोत्थं प्रावृट्समयप्रादुर्भूतं पयोधरधीरगर्जारवश्रवणसमुद्भूतं रत्नं वैदूर्यं नाम मणिं बिभर्ति। प्रावृट्काले हि सजलजलधरौर्जितगर्जिताकर्णनसमये एव विदूरभूधरभूमौ वैदूर्यरत्नशलाकाः प्रादुर्भवन्तीति श्रुतिः। पुनः केव। इभकपोलपालीव। यथा गजेन्द्रगण्डस्थलम्। पालीशब्दो दीर्घोऽप्यस्ति। यथा—'कालिन्दीकूलपालीषु' इति पाण्डवचरित्रे। अन्तर्मध्ये मदानां दानजलानामुदयं प्रादुर्भावं धत्ते। 'अन्तर्मदावस्थ इव द्विपेन्द्रः' इति रघौ॥

श्रीमन्महेभ्यपुरुहूतपयोरुहाक्षी
नीराज्यमानवदना शरदिन्दुबिम्बैः।
आसेदुषी शशिमुखी सुषमां दधाना
गर्भं पलालपिहितेक्षुशिशुं क्षमेव॥ २॥

शुक्ती रसोद्भवमिवाम्बु धनावलीव
माणिक्यराशिमिव शैवलिनीशवेला।
विद्याविशेषमिव विज्ञसभाप्तबिम्बं
प्रासादभूमिरिव वायुसखं शमीव॥ ३॥

रक्ताङ्कपङ्क्तिरिव कृष्णलताप्ररोह-
मात्रेयदृष्टिरिव वल्लभमौषधीनाम्।
धात्री निधानमिव शैलगुहेव सिंहं
कंसारिनाभिकजकोशकुटीव शंभुम्॥ ४॥

(त्रिभिर्विशेषकम्)

श्रीमतः शोभाभाजो गणनातीतलक्ष्मीकलितस्य वा, महेभ्यानां अत्युच्चशिलोच्चयप्रमाणवारणपरिमाणसुवर्णवतां व्यवहारिणां मध्ये पुरुहूतस्य इन्द्रस्य सर्वेभ्योऽपि लक्ष्म्या अतिशायित्वात् कुंरासाधोः पयोरुहाक्षी कमलनयना स्त्री नाथी नामा पत्नी सुषुमां सातिशायिनीं शोभामासेदुषी प्राप्तवती। लेभे इत्यर्थः। किंभूता। शशिमुखी चन्द्रानना। किं क्रियमाणा। शरदिन्दुबिम्बैः शरत्कालसंबन्धिमृगाङ्कमण्डलैः। अर्थात् वेधसा भ्रमणीक्रियाभिः। नीराज्यमानमारात्रिकं क्रियमाणं वदनं मुखं यस्याः। पुनः किं कुर्वाणा। गर्भं धारयन्ती। केव। क्षमेव। यथा पलालैर्धान्यत्वग्भिः पिहितमाच्छादि-

तमिक्षुशिशुं बालरसालप्ररोहम् । 'इक्षुः स्याद्रसालोऽसिपत्रकः' इति हैम्याम् । 'रसाल इक्षौ चूते च' इत्यनेकार्थः । 'पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः' इति नैषधे । तं धारयन्ती भूमी सुषमामासादयति इति सर्वत्र योज्यम् ॥ पुनः केव । शुक्तिरिव । यथा शुक्तिका रसोद्भवं मौक्तिकम् । पुनः केव । घनावलीव । यथा मेघमाला अम्बु जलम् । पुनः केव । शैवलिनीशवेलेव । यथा समुद्रवेला माणिक्यराजीं रत्नमण्डलीम् । पुनः केव । विज्ञसभेव । यथा विज्ञानां पण्डितानां सभा समाजः श्रेणी वा विद्यानां विशेषं रहस्यमुपनिषदं वा । 'ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला' इति चम्पूकथायाम् । पुनः केव । प्रासादभूमिरिव । यथा प्रासादस्य जैनविहारस्य भूमिः गर्भागारक्षोणी आप्तस्यार्हतो बिम्बं प्रतिमाम् । बाहुल्येऽपि मूलनायकस्यैवैक्येनैकमेवाप्तबिम्बमिति । पुनः केव । शमीव । यथा शमी 'खेजडी'नामातरुर्वायुसखं कृशानुम् ॥ पुनः केव । रक्ताङ्गपङ्क्तिरिव । यथा विद्रुममालिका कृष्णलतायाः 'कालीवेलि' इति प्रसिद्धायाः प्ररोहमङ्कुरम् । पुनः केव । आत्रेयदृष्टिरिव । यथा अत्रेर्मुनिविशेषस्येयमात्रेयी सा चासौ दृष्टिश्च । अत्रिनामतापससंबन्धिनी दृक् । औषधीनां वल्लभं विधुम् । 'विधुरत्रिदृग्जः' इति हैम्याम् । 'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इति रघौ । 'अत्रिजातस्य या मूर्तिः शशिनः सज्जनस्य च' इति चम्पूकथायाम् । पुनः केव । धात्रीव । यथा भूमिर्निधानम् । पुनः केव । शैलगुहेव । यथा गिरिकन्दरा केसरिणं सिंहम् । पुनः केव । कंसारिनाभिकजकोशकुटीव । यथा कंसारेः कृष्णस्य नाभिस्तत्रोद्भूतं यत्कजं कमलं तस्य कोशः कुड्मलं स एव कुटी पर्णतृणाच्छादितसदनं सा शंभुं ब्रह्माणम् । 'शंभुर्ब्रह्मार्हतोः शिवे' । 'नारायणनाभ्यम्भोरुहकुहरकुटीमधिशयानस्य' इति चम्पूकथायाम् । प्रागुक्तमस्ति । नाभिभवत्वेनेयमुपमा । 'नाभिपद्मात्मभूरपि' इति हैम्याम् ॥ इति गर्भाधानम् ॥

एकातपत्रमिह यत्तनुजो विधाता
साम्राज्यमिन्दुविशदं जिनशासनस्य ।
शीतांशुमण्डलमितीव सितातपत्री-
कर्तुं स्वमूर्धनि तया स्पृहयांबभूवे ॥ ५ ॥

तया नाथीदेव्या स्वमूर्धनि निजमस्तके । उत्प्रेक्ष्यते । इति हेतोः शीतांशुमण्डलं चन्द्रबिम्बं सितातपत्रीकर्तुं श्वेतच्छत्रं विधातुं स्पृहयांबभूवे आचकाङ्क्षे । इति किम् । यत्तनुजो यस्यास्तनुजः पुत्रो जिनशासनस्य इह भूमण्डले एकमद्वितीयमातपत्रं छत्रं विधाता करिष्यतीति । किंभूतम् । इन्दुविशदं चन्द्रकलोज्ज्वलम् ॥

प्रेम्णा गुणाननुगुणीकृतवेणुवीणा
एणीदृशः सुमनसामदसीयसूनोः ।
गास्यन्ति ताभिरिति कीव(?)तया विधातुं
सौहार्दमम्बुजदृशा हृदि काम्यते स्म ॥ ६ ॥

तया अम्बुजदृशा नलिननयनया । उत्प्रेक्ष्यते । इति किं कारणात्ताभिः सुरीभिः सार्धं सौहार्दं मैत्र्यं विधातुं कर्तुं हृदि चित्ते काम्यते स्म वाञ्छयते स्म । इति किम् । यददसीयसूनोर्नाथीनन्दनस्य गुणान् शमदमसंयमगाम्भीर्यधैर्यौदार्यस्थैर्यादिकान् सुमनसां देवानां तादृशापरानन्यागण्यग्रामगानश्रवणेन निजश्रेणोपरि नाभ्यसूयन्ति प्रत्युत प्रमोदन्ते इति सुमनसः । तेषामेणीदृशो वशादेव्यः प्रेम्णा हृदयहार्देन स्नेहेन गास्यन्ति । किंभूता देव्यः । अनुगुणीकृताः स्वस्वरानुयायिनीविहिता निजालापसदृशीकृता वेणवो वंशास्तथा वीणा याभिः ॥

शौण्डीर्यचङ्क्रमणचारिमदानलीला-
श्रीभिर्यतो मम सुतस्तमधो विधाता ।
आरोढुमन्तरिति जम्भनिशुम्भकुम्भि-
कुम्भस्थले किमनया हृदि काम्यते स्म ॥ ७ ॥

अनया नाथीदेव्या । किमुत्प्रेक्ष्यते । इति हेतोः जम्भनिशुम्भस्य शक्रस्य कुम्भिन ऐरावणस्य कुम्भस्थले स्कन्धप्रदेशे आरोढुं चढितुं काम्यते स्म चकमे । कुम्भस्थले चढित्वा उपवेष्टुं वाञ्छयते स्मेत्यर्थः । यतो यस्मात्कारणात् । शौण्डीर्यस्य पराक्रमस्य । 'पौरुषं विक्रमः शौर्यं शौण्डीर्यं च पराक्रमे' इति हैम्याम् । तथा—चङ्क्रमणचारिम्णो मन्थरगतिविलासमञ्जुलत्वस्य, तथा—दानस्य विश्राणनस्य मदवारिणो वा, लीला आधिक्यातिशयविलासास्तासां श्रीभिः कृत्वा मम सुतो नन्दनस्तमैरावणमधो विधाता अधः कर्ता । तिरस्करिष्यतीत्यर्थः ॥

यत्तत्सुतो मधुरिवावनिजव्रजानां
कर्ता यशःसुरभिदिग्वलयः प्रबोधम् ।
प्रीतिं प्रणेतुमृतुना किमिति स्मितास्या
ग्रीष्माग्रजेन सह कामयते स्म चित्ते ॥ ८ ॥

यद्यस्मात्कारणात् तत्सुतस्तस्या नाथीदेव्याः सुतः पुत्रः, मधुरिव वसन्तसमयवत् अवनौ पृथिव्यां जाता अवनिजा जना द्रुमाश्च । 'भुविदिविजमहि(ही ?)यम्' इत्यजितशान्तिस्तववचनात् । भुविजा जना दिविजा देवाः अलुक्समासेन नामानि यथा 'दिविषदो देवाः' 'क्षितिरुहः कारस्करो विष्टरः' इति हैम्याम् । तथा 'नृत्यन्ति भीमानुजगोजभाजः' । भीमानुजोऽर्जुनः स एव गोजः शाखी तं भजन्ते इति विदग्धमुखमण्डने । तेषां व्रजास्तेषां प्रबोधं प्रतिबोधं विकाशं कर्ता करिष्यति । किंभूतस्तत्सुतः । यशोभिः कीर्तिभिः सुरभि सुगन्धं वासितं दिग्वलयं दिशां विभागो यस्मात् । अथ वा । यशःसुरभीकृतदिग्वलयः यशसा स्वकीर्त्या सुरभीकृतं सकलदिङ्मण्डलं येन । कृतमध्यमपदस्य लोपे निमित्ताभावे नैमित्तिकस्याप्यभावः । कृधातौ परे च्विप्रत्ययनिमित्ते गते दीर्घस्याप्यभावो जात

इति । सुरभिदिग्वलयो वसन्तोऽपि । विविधविकसिततरुकुसुमपरिमलैः सुगन्धीकृताखिलदिक्चक्रः स्यात् । इति हेतोः स्मितास्या हसितवदना नाथीदेवी ग्रीष्माग्रजेन निदाघसमयवृद्धभ्रात्रा उष्णकालात्प्रथमजत्वेन वसन्तानन्तरं हि ग्रीष्मसमयोद्भवनात् । ऋतुना वसन्तऋतुना समं सार्धं प्रीतिं स्नेहं प्रणेतुं कर्तुं हृदि चित्ते कामयते स्म ईहते स्म ॥

तस्याः सुतो रविरिवाम्बुजपाणिविश्व-
　चक्षुः प्रबोधकरकृत्ततमा महस्वी ।
भावी यतः किमिति पद्मदृशा च काङ्क्षे
　तन्मण्डलं स्वसदनेऽनिशमुज्जिहानम् ॥ ९ ॥

यतः कारणात्तस्या नाथीदेव्याः सुतः पुत्रो रविर्भानुमानिव अम्बुजे पद्मे इव पाणी हस्तौ यस्य । तथा—अम्बुजमाकृत्या कमलं पाणौ यस्य । तथा—विश्वस्य जगज्जनस्य धर्ममार्गप्रकाशकत्वेन चक्षुरिव चक्षुः । तथा प्रबोधं तत्त्वज्ञानं तस्य करः कारकः । प्रतिबोधदायक इत्यर्थः । तथा कृत्तं छिन्नं तमः पापमज्ञानं वा येन स तादृशो भावी भविष्यति । रविस्तु—कमलकलितकरः जगच्चक्षुर्नामा । प्रबोधो विनिद्रता जागरणं तत्कारकः दलितान्धकारश्च वर्तते । पुनः किंभूतः । महस्वी प्रतापवान् । कुदृशामधृष्यः । अथ वा—उत्सववान् । उत्सववाच्यपि महःशब्दः सकारान्तोऽप्यस्ति । यथा नैषधे—'एनं महस्विनमुपैहि सदारुणोच्चैः' इति । महस्विनमुत्सववन्तमिति तद्वृत्तिः । यत्र यत्रैष व्रजति तत्र तत्रोत्सवपरम्पराः पदे पदे भविष्यन्तीत्यर्थः । रविरपि तेजस्वी इति हेतोः किमुत्प्रेक्ष्यते । पद्मदृशा कमललोचनया नाथीदेव्या तया तन्मण्डलं रविबिम्बमनिशमहोरात्रं स्वसदने निजमन्दिरे उज्जिहानमुदयमानं चकाङ्क्षे वाञ्छितम् ॥

स्वः सानुमन्तमधिरोढुमथात्मदर्शी-
　कर्तुं विधुं पुनरपांपतिमुत्तरीतुम् ।
सिद्धालयेष्वपि सभाजयितुं जिनान्सा
　गर्भानुभावत इयेष यथार्हदम्बा ॥ १० ॥

सा नाथी गर्भानुभावतः शुभगर्भप्रभावात् स्वः सानुमन्तं सुमेरुम् । 'रत्नसानुः सुमेरुः स्वः स्वर्गिकाञ्चनतो गिरिः' इति हैम्याम् । अधिरोढुमध्यासितुं चढितुम् । अथ पुनर्विधुं चन्द्रमसमात्मदर्शीकर्तुं दर्पणं विधातुम् । स्वाननविलोकनायेति शेषः । पुनरन्यत् । अपांपतिं समुद्रमुत्तरीतुं स्वभुजाभ्यामखिलमपि जलमाक्रम्य तीर्त्वा परतटे प्रयातुम् । अपि पुनः सिद्धालयेषु शाश्वतजिनप्रासादेषु जिनान् शाश्वतनामभाज ऋषभवर्धमानचन्द्राननवारिषेणान् तीर्थकृत्प्रतिमाः सभाजयितुं पूजयितुम् । 'सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा' इति नैषधे । सभाजनं पूजनमिति तद्वृत्तिः । 'सभाजनार्थे

सभाजयति' इति क्रियाकलापे। तथा 'भ्रुवा विनिर्दिश्य सभा सभाजितम्' इत्यपि नैषधे। सभया सभाजनेन सभाजितं पूजितमिति तद्वृत्तिः। अथ प्रस्तुतम्। इयेष पूर्वोक्तं मन्दराधिरोहणादि सर्वमपि वाञ्छति स्म। केव। अर्हदम्बेव। यथा जिनजननी श्रीजिनगर्भानुभावात् पूर्वोक्तप्रकारानन्यानपि शुभदोहदोद्भूतप्रकारान् काङ्क्षति स्म॥ इति दोहदाः॥

तद्दोहदप्रकरपूर्तिविधौ सुपर्व-
वल्ल्या विधेरिह तथा स्पृहया व्यलासि।
श्रेयोवतामिव ततिः परिपूर्णकामा
जज्ञे यथानतिचिरादियमायताक्षी॥ ११॥

इहास्मिञ्जगति तस्या गर्भवत्याः दोहदानां गर्भानुभावोद्भूताभिलाषाणां प्रकरस्य समूहस्य प्रपूर्तिविधौ प्रकर्षेण संपूर्णीकरणप्रकारे सुपर्ववल्ल्या कल्पलतातुल्यया विधेर्जगत्स्रष्टिकर्तुः स्पृहया वाञ्छया तथा तेन प्रकारेण व्यलासि विलसितं प्रवृत्तम्। तथा कथम्। यथा आयताक्षी आयते प्रसृतिप्रमाणे कर्णान्तं यावत्प्रसृते वा अक्षिणी नेत्रे यस्याः सा इयं नार्थी अनतिचिरात्स्तोककालादेव परिपूर्णकामा संपूर्णीभूताभिलाषा निवृत्तमनोरथा जज्ञे जाता। केव। श्रेयोवतां ततिरिव। यथा पुण्याढ्यानां जनानां श्रेणी अभिलाषाविर्भवनानन्तरं त्वरितं प्रबलपुण्यवत्त्वात्पूर्णमनोरथा जायते॥

सा दोहदोदयकृशीकृततत्प्रपूर्ति-
संप्रापितोपचयसंचरचारिमश्रीः।
भाति स्म फाल्गुनविपत्रितचैत्रसान्द्री-
भूतावनीरुहततिर्विपिनस्थलीव॥ १२॥

सा नार्थी भाति स्म। किंभूता। पूर्वं तेषां दोहदानां जगत्प्रशस्यानामुदयेनाविर्भावेन कृशीकृता दुर्बला विहिता पश्चाच्च तेषां दोहदानां प्रपूर्त्या प्रकर्षेण पूरणेन संपूर्णीभवनेन संप्रापितः सम्यक्प्रकारेण लम्भित आसादितो वा उपचयः पुष्टिर्यस्य येन वा तादृशस्य संचरस्य देहस्य चारिम्णो मनोहरतायाः श्रीर्यस्याः, चारुत्वयुक्ता लक्ष्मीर्यस्याः सा वा, समासान्तविधेरनित्यत्वात्। केव। विपिनस्थलीव यथा वनभूमिर्भाति। किंभूता वनस्थली। प्रथमं फाल्गुनेन फाल्गुनिकमासेन विगतानि पत्राणि पर्णानि येभ्यस्ते विपत्राः। विपत्रान् करोतीति विपत्रयति। 'तत्करोति तदाचष्टे' इतीञ्प्रत्ययः। विपत्र्यन्ते स्म इति विपत्रिताः। अथवा। विपत्रत्वं संजातमेष्वेषां वा। 'इतो जातार्थे' इतीत प्रत्ययेऽपि। विपत्रिताः पत्ररहिताः कृता इत्यर्थः। पश्चाच्चैत्रेण मधुमासेन सान्द्रीभूताः पल्लवपुष्पफलैर्घनच्छाया जाता अवनीरुहा वृक्षास्ते विद्यन्ते यस्यां सा॥

निस्तीर्य दोहदभवार्तिमथैणचक्षु-
र्मेदस्वितामवयवेषु बभौ वहन्ती।

स्मेरद्दलैरुपचिता नवशारदीन-

नालीकिनीवदतिवाहितवारिवाहा ॥ १३ ॥

अथ दोहदपूर्णीभवनानन्तरम् । एणचक्षुर्मृगनेत्रा नाथी अवयवेष्वङ्गेषु मेदस्वितां पुष्टिं वहन्ती बिभ्रती सती बभौ राजते स्म । किं कृत्वा । दोहदेभ्यो गर्भानुभावोत्पन्नविविधाभिलाषेभ्यो भवामुत्पन्नामर्तिं पीडां चिन्तां वा निस्तीर्य निरस्य । किंवत् । नवशारदीननालीकिनीवत् । यथा नवा नूतना शारदीना शरत्कालसंबन्धिनी नालीकिनी कमलिनी स्मेरद्भिर्विकसद्भिः । 'स्मेरदम्भोरुहाराम' इति पाण्डवचरित्रे । दलैः पत्रैरुपचिता पुष्टा कृता । पुनः किंभूता । अतिवाहितो वारिवाहो मेघसमयो यया । 'वर्षासु कमलानि शीर्यन्ते विद्राणपङ्कजसरसि' इति चम्पूकथायाम् । 'त्रिदिवसमुद्भवन्ति प्रोन्मीलत्सु नीलनीरजेषु शरच्छ्रीकटाक्षेष्विव' इत्यपि चम्पूकथायाम् ॥

शुद्धां क्रियां विदधतामधिभूर्यदेष

भावीरितः किमिति भागवतैः प्रतापैः ।

आनन्दपूर्वविमलव्रतिवासवस्तां

प्राग्जन्मनः समय एव समुद्दधार ॥ १४ ॥

आनन्द इति शब्दः पूर्वं यस्य तादृशो विमलः एतावता आनन्दविमलनामा व्रतिनां साधूनां मध्ये वासवः शक्रः सुरीन्द्रः जन्मनः प्राक्समये एवार्थात् श्रीहीरविजयसूरिजन्मकालात्प्राक् पूर्वकमेव निर्दोषां निरवद्यां क्रियामनुष्ठानमुद्दधार समुद्धरति स्म । एतावता हीरकुमारे गर्भेऽवतीर्णमात्र एवानन्दविमलसूरिः क्रियोद्धारं कृतवानित्यर्थः । किमुत्प्रेक्ष्यते । भागवतैर्भविष्यत्सूरिसंबन्धिभिः प्रतापैः प्रभावैर्माहात्म्यैः । 'स प्रतापः प्रभाववत्' इति हैम्याम् । इति हेतोः ईरितः प्रेरितः किम् । यत्कारणात् एष हीरविजयसूरिः शुद्धां निर्मलां क्रियामनुष्ठानं विदधतां साधूनामधिभूरधिपतिर्भावी स्वामी भविष्यति । प्रागित्यव्ययम् ॥

कालागुरुद्रवकरम्बितगन्धधूली-

पत्रावलीकलितपाण्डुरगण्डभाजा ।

छायाधरः शरदपास्तपयोदरोधो-

ऽवश्याय दीधितिरहस्यत तन्मुखेन ॥ १५ ॥

तन्मुखेन नाथीवदनेन अवश्यायदीधितिर्हिमद्युतिः । 'अवश्यायस्तु तुहिनं प्रालेयं मिहिका हिमम्' इति हैम्याम् । अहस्यत हसितः । तिरस्कृत इत्यर्थः । किंभूतेन तन्मुखेन । कालागुरुद्रवेण काकतुण्डस्य पयसा पङ्केन वा करम्बिताया व्याप्ताया गन्धधूल्याः कस्तूर्याः पत्रावलीभिः कलितौ संयुतौ । तथा—गर्भानुभावात्पाण्डुरौ विशदौ गण्डौ कपोलौ भजतीति भाक् तेन भाजा उल्लसद्बहलमृगमदजललिखितविचित्रपत्रभङ्गभव्यविपुलकपोलमण्डलेन मुखेन । 'शशाङ्कमन्तःस्फुरत्कलङ्कमुपहसन्ती' इति चम्पूकथायाम् ।

किंभूतश्चन्द्रः। छायामन्तःश्यामतां धरतीति। पुनः किंभूतः। शरदा घनात्ययेन अपास्तो निराकृतः पयोदानां मेघानाम्। 'प्रावृषेण्यो घनो जलदायी न शारदः'। यत उक्तम्—'अन्ये ते [खलु नीरदा] जलधरास्तृष्णां विनिघ्नन्ति ये भ्रातश्चातक किं वृथात्र रटितैः खिन्नोऽसि विश्राम्यताम्। मेघः शारद एष काशधवलः पानीयरिक्तोदरो गर्जत्येव हि केवलं भृशमपां नो बिन्दुमुद्यच्छति॥' इति वर्ष्पीहाष्टके। अतः पयोदनाम सार्थकम्। रोधो रुन्धनं यस्याः॥

लीलाचलद्दलगणा विगलन्मरन्द-
लुभ्यन्निलीनमधुपा सितपद्मपङ्क्तिः।
प्रस्पन्दमाननयनेन सविभ्रमभ्रू-
भाजा यदीयवदनेन विडम्ब्यते स्म॥ १६॥

यदीयवदनेन गर्भसमयत्वात् पाण्डिममण्डितेन नाथीमुखेन सितपद्मपङ्क्तिः कुमुदमण्डली। 'श्वेते तु तत्र कुमुदम्' इति हैम्याम्। विडम्ब्यते स्म अनुक्रियते स्म। 'पुण्डरीकातपत्रस्तं विकसत्कासचामरः। ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्॥' इति रघौ। शरदृतुस्तं रघुं राजानं विडम्बयामास। अत्र चामरादिभिरनुचकार, परं तल्लक्ष्मीं न प्रापेति तद्वृत्तिः। किंभूतेन वदनेन। प्रस्पन्दमाने स्वभावचपले नयने लोचने यस्मिन्। 'प्रस्पन्दमानपरुषेतरतारमन्तश्चक्षुस्तव प्रचलितभ्रमरं च पद्मम्' इति रघौ। पुनः किंभूतेन मुखेन। सह विभ्रमेण विलासेन वर्तते तादृशीं भ्रुवं नयनोर्ध्वरोमपद्धतिं भजतीति। किंभूता सितपद्मपङ्क्तिः। लीलया नातिशयेन मन्दमरुत्प्रेरणया चलतां लोलीभवतां दलानां पत्राणां गणो यत्र। पुनः किंभूता। विगलन्तो निष्पतन्तो ये मरन्दा मधूनि तदर्थं लुभ्यन्तो लोलुपीभवन्तोऽत एव निलीनाः कोशान्तर्निश्चलीभूय स्थिता मधुपा भ्रमरा यस्याम्। तादृशी कुमुदावली सगर्भत्वेन पाण्डुरमुखस्योपमानमिदम्। स्वभावमुखस्यान्योऽर्थः। निःसरन्मधुकृते लुब्धीभवतां निलीनानां च भृङ्गाणामासितमवस्थितं यत्र तादृक् पद्मपङ्क्तिः हसिता॥

नीलारविन्दनयना कलमावदाता
बन्धूकदन्तवसना सितकान्तिवक्त्रा।
कासस्मिता कुमुदिनी सुरभिर्मराल-
लीलागतिः सरसि वाजनि सा तदानीम्॥ १७॥

सा नाथी तदानीं तस्मिन् गर्भाधानसमये शरदिव घनात्ययसमय इव अजनि संजाता। किंभूता नाथी देवी शरच्च। नीलारविन्दे इन्दीवरे। 'नीले तु स्यादिन्दीवरम्' इति हैम्याम्। उत्पले तद्वत्ते एव वा नयने यस्याः। पुनः किंभूता। कलमा कलमनामशालयः तद्वत्तैश्चावदाता गौरकान्तिः। पुनः किंभूता। बन्धूकानि बन्धुजीवकतरुकुसुमानि म-

ध्याह्न एव विकसनशीलानि 'विपोरियां' इति लोके प्रसिद्धानि । 'बन्धूकप्रसवारुणाम्बरधराम्' इति लघुस्तवे । तथा 'बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहानाम्' इति नैषधेऽपि । तद्वत्तान्येव वा दन्तवसनमधरो यस्याः । पुनः किंभूता । सिता उज्ज्वला कान्तिर्यस्य तादृक् वक्त्रं मुखं यस्याः । पक्षे सितकान्तिश्चन्द्र एव वदनं यस्याः । पुनः किंभूता । काशः ईषीकाः कासाः प्रसिद्धास्तद्वत्ते एव स्मितमीषद्धसितं यस्याः । पुनः किंभूता । कुमुदिन्यः कैरविण्यस्तंथा ताभिश्च सुरभिः सुगन्धिः । पुनः किंभूता । मराला राजहंसास्तद्वत्तेषां च लीलया मन्थरतया गतिर्गमनं यस्यां वा । वर्षासु हंसा मानससरसि यान्ति । 'प्रोषितकलहंसवयसि' इति चम्पूकथायां मेघवर्णने । प्रोषिता मानसं प्रति प्रस्थापिताः कलहंसा एव वयांसि पक्षिणो येनेति तट्टिपनके । तथा 'शरदि पुनरत्रायान्ति' इति कविसमयः ॥

माणिक्यभूषणगणैर्न तदा कदाचि-
त्खेदोदयाद्वपुरभूष्यत चन्द्रमुख्या ।
क्रीडागतामरकरावचिताम्बुजातां
जानेऽनुयातुमनसा सरितं सुराणाम् ॥ १८ ॥

तदा गर्भसमये चन्द्रमुख्या नाथीदेव्या विधुवदनया कदाचिदपि माणिक्यानां मणीनामुपलक्षणात्स्वर्णरजतादीनां भूषणानामाभरणानां गणैः समूहैः वपुः स्वशरीरं नाभूष्यत न भूषितं नालंकृतवती(?) । अल्पशब्दस्त्वभावस्यैव वाची। नालंचक्रे । कस्मात् । खेदोदयात् गर्भधारणनिर्वेदाविर्भावात् । तत्राहमेवं जाने उत्प्रेक्ष्यते वा । क्रीडार्थं जलावगाहलीलाकृते आगतानाममराणामर्थाद्देवीसखानां देवानां करैर्हस्तैरवचितानि स्वप्रियाहारावतंसादिक्रियाकृते चुण्टितानि । गृहीतानीत्यर्थः । अम्बुजानि कमलानि यस्यां तादृशीं सुराणां सरितं देवनदीं स्वर्गङ्गामनुयातुं स्वेनानुकर्तुकामयेव । अत्र जाने इवार्थे ॥

रेजे स्तनाननविनीलिममञ्जुलेन
यस्याः समुज्ज्वलपयोधरयामलेन ।
केलीकृते मरकिताङ्कितसानुनेव
रौप्येण शैलयुगलेन मनोभवस्य ॥ १९ ॥

यस्या गर्भवत्याः समुज्ज्वलेन गर्भानुभावात्पाण्डुरीभूतेन पयोधरयामलेन स्तनद्वन्द्वेन रेजे । तथा—'ऐरावतमस्तकपिण्डपाण्डुरमुच्चचूचुकश्यामलिम्नालंकृतम् आपूर्यमाणमन्तःक्षीरेण क्षणमखिद्यत पयोधरद्वन्द्वमुद्वहन्ती' इति चम्पूकथायाम् । किंभूतेन । स्तनाननयोश्चूचुकयोर्विनीलिम्ना प्रकृष्टश्यामत्वेन मञ्जुलेन मनोज्ञेन । इवोत्प्रेक्ष्यते । मनोभवस्य कामस्य केलीकृते क्रीडार्थं रौप्येण रजतसंबन्धिना शैलयुगेन गिरियुग्मेनेव । किंभूतेन । मरकतैरश्मगर्भिनीलमणिभिरङ्कितं कलितम् । रचितमित्यर्थः । सानु शिखरं यत्र ॥

यस्याः समेचकिमचूचुकचञ्चुरेण
व्यभ्राजि शुभ्रिमभृता स्तनयोर्द्वयेन ।
यन्मानसाश्रयनिवासिरतीशरत्यो-
र्विप्रो विनोदमधुपाङ्ककुमुद्युगेन ॥ २० ॥
प्रेम्णा प्रणेतुमजरामरतां प्रसद्य
विश्राणितेन विधिना कुसुमायुधेन ।
रौप्येण नीलदृषदां दधता पिधानं
पीयूषपूर्णकलशीयुगलेन किं वा ॥ २१ ॥

यस्या गुर्विण्याः स्तनयोर्द्वयेन व्यभ्राजि शुशुभे । किंभूतेन । सह मेचकिम्ना श्यामलत्वेन वर्तेते ये ते समेचकिमनी कृष्णत्वकलिते तादृशे चूचुके स्तनवृन्ते ताभ्यां चञ्चुरेण मनोहारिणा । पुनः किंभूतेन । शुभ्रिमाणं पाण्डुरतां बिभर्तीति । तत्र वयमेवं विद्मः । उत्प्रेक्षामहे वा । यन्मानसं नार्थीचित्तं तदेवाश्रयः स्थानं गृहं वा तत्र निवसनशीलयो रतीशरत्योः स्मरतद्भार्ययोः विनोदार्थं क्रीडाकृते मधुकरा भ्रमरा अङ्के क्रोडे सन्त्यस्येति तादृशा कुमुद्युगेन कैरवद्वयेनैव किं वा । अथ वा प्रसद्य प्रसन्नीभूय विधिना ब्रह्मणा कुसुमायुधस्य मदनस्य विश्राणितेन प्रदत्तेन रौप्येण राजतेन रजतसंबन्धिना पीयूषपूर्णेन अमृतभृतेन सुधारसपरिपूरितेन कलशीयुगेन कुम्भीद्वयेनेव । कुम्भकलशशब्दौ पुंस्त्रीलिङ्गे । 'अवलम्बितकर्णशष्कुलीकलशी कं रचयन्नवोचत' इति नैषधे । कलशीयुगेन किंकुर्वता । नीलदृषदां हरिन्मणीनां पिधानं दधता बिभ्रता । किं कर्तुं दत्तेन । प्रेम्णा पितामहत्वस्नेहेन अजरामरतां जरामरणराहित्यं प्रणेतुं कर्तुम् ॥ युग्मम् ॥

पीनस्तनद्वयममेचकितं पयोभि-
स्तस्याः क्षणं क्षणमपूर्यत गर्भवत्याः ।
सान्द्रै रसैरिव विकस्वरकैरविण्याः
कोशद्विकं विशदिमश्रियमुद्वहन्त्याः ॥ २२ ॥

तस्या गर्भवत्या गुर्विण्याः पीनं पुष्टं तथा अमेचकितं पाण्डुरीभूतं स्तनद्वयं कुचद्वन्द्वं क्षणं क्षणं पयोभिः स्तन्यैः । दुग्धैरित्यर्थः । अपूर्यत पूर्णं जायते स्म । निभृतं भ्रियते स्म । किमिव कोशद्विकमिव । यथा विकस्वराया विकसनशीलायाः । 'प्रभातेऽम्भोजिनीवासि किं चाकस्माद्विकस्वरा' इति पाण्डवचरित्रे । कैरविण्याः कुमुदिन्याः मुकुलयुगलं क्षणं क्षणं सान्द्रैर्बहलैर्घनै रसैर्मकरन्दैः संपूर्यते । किं कुर्वत्याः कैरविण्याः । विशदिम्नः श्वेततायाः श्रियं शोभां तस्या अप्यर्थध्वनिः । विशदिम्ना सतीत्वेन । 'असूर्यंपश्या राजदाराः' इति वचनात् । नैर्मल्येन पावित्र्येण वा युक्तां श्रियं लक्ष्मीमिन्दिरां वा उद्वहन्त्या बिभ्राणायाः ॥

दम्भोलिभूषणभरोद्भवदंशुचाप-
　चक्राङ्कितेन पयसा परिपूरितेन ।
आदीयते किमु समुन्नमता चकोर-
　चक्षुःपयोधरयुगेन पयोधरश्रीः ॥ २३ ॥

चकोरी चकोरश्च चकोरौ । 'पुमान् स्त्रिया' स्त्रिया सहोक्तौ पुमान् शिष्यते न स्त्री इति प्रक्रियासूत्रेण चकोरौ तयोश्चक्षुषी इव रक्ते चक्षुषी नेत्रे यस्यास्तस्याः । पयोधरयुगेन स्तनद्वन्द्वेन । किमूत्प्रेक्ष्यते । पयोधराणां जलवाहानां मेघानां श्रीः लक्ष्मीः शोभा वा आदीयते किमु गृह्यते इव । किंभूतेन पयोधरयुगेन । दम्भोलीनां वज्ररत्नानामाभरणानां भराद्वृन्दादुद्भवन्तः प्रकटाः जायमाना ये निःसरन्तो वा अंशवः किरणास्तैः । अर्थात् प्रारब्धेन चापचक्रेण धनुर्मण्डलेन अङ्कितेन कलितेन । 'उल्लसन्मयूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि' इति चम्पूकथायाम् । तथा 'वृता विभूषामणिरश्मिकार्मुकैः' इति नैषधेऽपि । पुनः किंभूतेन । सं सम्यक् समीचीनं यथा स्यात्तथा उन्नमता उच्चैर्भवता उन्नतीभवता च । पुनः किंभूतेन । पयसा स्तन्येन पानीयेन च परि सामस्त्येन पूरितेन भृतेन ॥ इति कपोलस्तनादिपाण्डिमा स्तनयोः पयःपूर्णत्वं च ॥

संपूर्णचन्द्रवदना प्रसवोन्मुखत्वं
　पूर्णेऽथ गर्भसमये बिभरांबभूव ।
वर्षाभिमुख्यमुपकण्ठवितिष्ठमान-
　ज्येष्ठोन्मुखीकृतजनाम्बुदमण्डलीव ॥ २४ ॥

अथ सार्धसप्तदिनाधिकनवमासपूर्णीभवनोत्तरं संपूर्णः षोडशकलाकलितः पूर्णिमासंबन्धी । चेदेकयापि कलया यत्रेन्दुर्हीनः स्यात्सा तिथिरनुमितिरित्युच्यते । 'कलाहीने त्वनुमितिः' इति हैमीवचनात् । पूर्णिमायामेव संपूर्णश्चन्द्रः स्यादतः संपूर्णचन्द्रवदनेति । तेन पूर्णिमायामभ्युदितो यश्चन्द्रस्तद्वद्वदनं वक्त्रं यस्याः पार्वणेन्दुमुखी सा नाथी गर्भस्य समये काले पूर्णे परिपूर्तिभावं प्राप्ते सति सार्धसप्तदिनाधिकनवसु मासेषु संपूर्णीभूतेषु सत्सु प्रसवस्य संतानजननस्य उन्मुखतां बिभरांबभूव धारयामास दधाति स्म । केव । अम्बुदमण्डलीव । यथा मेघमाला कादम्बिनी वर्षणं वर्षः वृष्टिस्तस्याभिमुख्यं वर्षणसंमुखतां धत्ते । किंभूता सा कादम्बिनी च । उपकण्ठे समीपे वितिष्ठमानाः स्थितिं कुर्वाणा ज्येष्ठाः कुलवृद्धस्त्रियो ज्येष्ठमासश्च यस्याः । पुनः किंभूता । उन्मुखीभूता गर्भानुभावावगतलोकोत्तरप्रभावसंतानावलोकनार्थमुत्कण्ठीकृता उच्चमुखाश्च कृताः । वर्षाकाले हि लोका उन्मुखीभूय मेघागमं विलोकन्ते । यथा चम्पूकथायाम्— 'तिरस्कृतशशाङ्ककान्तिकलापोच्चमुखमण्डलाः' । अथ तट्टिप्पनकम्—स्त्रियः वर्षाश्च किंभूताः । तिरस्कृतः शशाङ्कस्य कान्तिकलापः शोभासमुदायो येन तादृशमुच्चमुन्नतं

मुखमण्डलं यासां तथा तिरस्कृता आच्छादिता शशाङ्कस्य चन्द्रस्य कान्तिश्चन्द्रिका याभिस्तथा काय पयोवाहपानीयाय लापाः कुटुम्बीजनजेगीयमानरासकास्तैरुच्चं मेघागमविलोकनार्थमूर्ध्वं मुखं वदनं येषां तादृशा मण्डला देशा यासु इति। तादृशा जना विश्वलोकाश्च यया॥

वंश्यैः सुधाशनचिकित्सकयोरिवार्भ-
भूत्याविनिर्मितिविशारदतां दधानैः।
अध्यूषिरेऽखिलभिषग्वृषभैर्महेभ्य-
जम्भद्विषद्भवनगर्भभुवः प्रदेशाः॥ २५॥

अर्भस्य बालकस्य भूत्याया विनिर्मितौ करणे विशारदतां पाण्डित्यं दधानैर्बिभ्रद्भिः अखिलेषु समग्रेषु भिषक्षु वैद्येषु प्रधानत्वादृषभाः पुङ्गवास्तैः। दायीप्रमुखैरित्यर्थः। तथा 'कुमारभृत्याकुशलैरधिष्ठिते भिषग्भिराप्तैरथ गर्भवेश्मनि' इति रघौ। महेभ्येषु महाव्यवहारिषु जम्भद्विषतः शक्रस्य सर्वोत्कृष्टत्वात्कुंरासाहस्य भवनस्य गेहस्य गर्भभुवो मध्यभूमेः प्रदेशा विभागा अध्यूषिरे। आशिश्रियिरे। संश्रिताः। उत्प्रेक्ष्यते। वैद्यैः सुधाशनानां देवानां चिकित्सकयोर्वैद्ययोर्दस्रयोः स्वर्लोकवैद्ययोर्वंश्यैर्गोत्रे समुत्पन्नैरिव॥ इति प्रसवसमयः॥

लग्नं गुरौ शिखिनि शीलति युग्मनाम
भूमीभवे भजति खिङ्ग इवाथ कन्याम्।
याते तुलां सितमरीचिसुते सिते च
सूरेऽपि सारस इवालिविलासशीले॥ २६॥

राहौ पुनः सुकृतिनीव धनं प्रपन्ने
पत्यौ रतेरिव विधौ मकराश्रयेव।
मीनं शनौ सलिलवन्मदयत्यदीन-
मित्थं ग्रहेषु तदयाभ्युदयावहेषु॥ २७॥

विश्वावनीधरशिलीमुखपूषसंख्ये
संवत्सरेऽवनिपुरंदरविक्रमार्कात्।
मासः सहस्य विशदश्रियमाश्रयन्त्यां
जन्मानुभावत इवास्य तिथौ नवम्याम्॥ २८॥

लग्नोदयेऽथ शुभशंसिनि सार्वभौम-
जन्मोचितेऽहनि ससाधिमधिष्ण्ययोगे।

कूलंकषा मखभुजामिव केकियान-
　माखण्डलामृतमयूखमुखी जयं वा ॥ २९ ॥
आमोदमम्बुरुहिणीव विजृम्भमाणा
　पञ्चार्चिषं शुचिमरीचिचकोरचक्षुः ।
सौदामनीवलयमम्बुदमालिकेव
　पृथ्वीव तीर्थमनघं कृषिमुर्वरेव ॥ ३० ॥
पीयूषकान्तिमिव दुग्धपयोधिवेला
　सिंहं महामृगरिपोरिव वा महेला ।
विश्वावबोधमिव वासरवक्त्रलक्ष्मीः
　श्रीखण्डसालमिव वा मलयाचलोर्वी ॥ ३१ ॥
शृङ्गारयोनिमिव नीरजनाभपत्नी
　राज्ञः प्रतापमिव वा जगतीजयश्रीः ।
आचार्यमध्वरभुजामिव फाल्गुनी सा
　नाथी क्रमेण तनयं जनयांचकार ॥ ३२ ॥
(सप्तभिः कुलकम्)

सा नाथी क्रमेण परिपाट्या तनयं नन्दनं जनयांबभूव जनयति स्म । कस्मिन्सति । लग्नं मूर्तं तनुभवनं गुरौ बृहस्पतौ, तथा शिखिनि केतुग्रहे । 'अश्लेषाभूः शिखी केतुः' इति हैम्याम् । शीलति भजति सति । किंभूतं लग्नम् । युग्मं मिथुनमिति नाम यस्य इति गुरुकेतूलग्ने । पुनः कस्मिन्सति । भूमीभवे मङ्गले कन्यां भजत्याश्रयति सति । कस्मिन्निव । खिङ्ग इव । यथा विटः कन्यां कुमारिकामपरिणीतां स्त्रियं भजते । इति कन्यायां मङ्गलः । पुनः कस्मिन्सति । सितमरीचेश्चन्द्रस्य सुते बुधे च पुनः सिते शुक्रे सति । किंभूते बुधे शुक्रे च । याते प्राप्ते । काम् । तुलां तुलानामलग्नम् । अर्थात्तुलायां बुधे शुक्रे च सति । अपि पुनः । सूरे सूर्ये अलिनाम वृश्चिकलग्नं तत्र यो विलासः । 'लस श्लेषणक्रीडनयोः' इति धात्वर्थात् । श्लेषणमाश्रयणं स्थितिः तत्र शीलं स्वभावो यस्य । क इव । सारस इव । यथा सारसपक्षी आल्या श्रेण्या-कृत्वा यो विलासः क्रीडया[1] गमनमासनं च तत्र स्वभावो यस्य यथा । 'श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥' इति रघौ । इति चतुर्थे वृश्चिके सूर्यः । पुनः । राहौ विधुंतुदे धनं धनलग्नं प्रपन्ने सति । कस्मिन्निव । सुकृतिनि । यथा पुण्यवान् धनं द्रव्यं प्रपद्यते प्राप्नोति । इति धने राहुः । च पुनः । विधौ चन्द्रे मकरो मकरलग्नं

स आश्रयोऽधिष्ठानं यस्य । कस्मिन्निव । पत्याविव । यथा रतेः पत्यौ भर्तरि मकरे ध्वजरूपत्वाद्वाहने आश्रय आश्रयणं यस्य । इति मकरे चन्द्रमाः । पुनः शनौ शनैश्चरे मीनं मीनलग्नं मदयति सति । किंवत् । सलिलवत् । यथा पानीयं मीनं समदं कुरुते पयस्येव मीनाः समदाः । इति मीने शनैश्चरः । इति नवापि ग्रहा जन्मकुण्डल्याम् । इत्थममुना प्रकारेण जन्मसमये ग्रहेषु सूर्यादिखेचरेषु तस्य हीरकुमारस्य अयस्य शुभकर्मणः पुण्यस्य अभ्युदयस्य वर्धमानकीर्तिप्रतापसंपद्रूपस्य महोदयस्य आवहेषु कारकेषु सत्सु । पुनः कस्यां सत्याम् । नवम्यां तिथौ विद्यमानायां सत्याम् । किंलक्षणायाम् । विशदश्रियं श्वैत्यलक्ष्मीमाश्रयन्त्यां सत्याम् । उत्प्रेक्ष्यते—हीरकुमारस्य जन्मानुभावतः जननप्रभावादिव । तिथिः कस्य सहस्य मार्गशीर्षनाम्नो मासस्य । कस्मिन् । विश्वानि त्रीणि, जगन्ति अवनीधरा अष्टौ महाकुलशैलाः, शिलीमुखाः पञ्च स्मरबाणाः, पूषा भानुरेकः, इति संख्या यस्य तादृशे संवत्सरे । कस्मात् । अवनेः पृथिव्याः पुरंदरो यो विक्रमार्कस्तस्मात् । एतावता संवत् १५८३ विक्रमादित्यसंवत्सरे मार्गशीर्षमासे नवम्यां तिथौ सोमवासरे पूर्वाभाद्रपदभे हर्षणनामयोगे घटी १२ उपरान्तवज्रयोगे मिथुनलग्ने प्रवहमाने तद्दिने प्रह्लादनपुरवास्तव्य ओकशवंश्यसाहकुंरापत्नी नाथी देवी सुतरत्नमजीजनत् । इति संवत्सरादिः । पुनः कस्मिन्सति । अस्य हीरकुमारस्य शुभशंसिनि श्रेयः कथयितरि लग्नोदये मिथुनलग्नोद्गमे सति । पुनः कस्मिन्सति । सर्वभूमेरीश्वरः सार्वभौमश्चक्रवर्ती तस्य जन्मनोऽवतारस्य उचिते योग्ये अहनि वासरे सति । पुनः कस्मिन्सति । सह साधिम्ना प्रधानत्वेन वर्तते तादृशे धिष्ण्यस्य नक्षत्रस्य योगे सति । 'त्वयादृतः किं नरसाधिमभ्रमः' इति नैषधे । नाथी नन्दनमसूत इति संबन्धः । अथोपमानान्याह—केव । कूलंकषेव । यथा मखभुजां देवानां कूलंकषा नदी गङ्गा केकियानं स्वामिकार्तिकं जनयतीति सर्वत्र योज्यम् । पुनः केव । आखण्डलामृतमयूखमुखीव । यथा आखण्डलस्य शक्रस्य अमृतमयूखमुखी पीयूषकान्तिवक्त्रा चन्द्रवदना इन्द्राणी जयं जयन्तनामानमङ्गजम् । पुनः केव । अम्बुरुहिणीव । यथा विजृम्भमाणा विकसन्ती कमलिनी आमोदं परिमलम् । पुनः केव । शुचिमरीचिचकोरचक्षुरिव । यथा श्वेतद्युतेश्चन्द्रस्य चलचञ्चुलोचना पत्नी रोहिणी पञ्चार्चिषं बुधम् । पुनः केव । अम्बुदमालिकेव । यथा कादम्बिनी सौदामनी वलयं विद्युन्मण्डलम् । पुनः केव । पृथ्वीव । यथा वसुंधरा अनघं संसारापारपारावारपारप्रापकत्वेन सर्वजगज्जनश्लाघनीयं तीर्थं शत्रुंजयशैलादिसिद्धगमनस्थानम् । 'पृथ्वीव पुण्यतीर्थं सा' इति चम्पूकथायाम् । पुनः केव । उर्वरेव । यथा सर्वसस्या क्षेत्रधरित्री कृषिं कर्षणम् । पुनः केव । दुग्धपयोधिवेलेव । यथा क्षीरसमुद्रवेला पीयूषकान्तिं चन्द्रम् । पुन केव । महेलेव । यथा महामृगाणां गजानां रिपोर्वैरिणः केसरिणो महेला स्त्री सिंही । 'महिला स्यान्महेलया' इति शब्दप्रभेदे । तथा 'यश्च परमहेलारतोऽप्यपारदारिकः' इति चम्पूकथायाम् । सिंहं मृगेन्द्रम् । पुनः केव । वासरवक्त्रलक्ष्मीरिव । यथा दिनाननस्य प्रभातस्य श्रीर्विश्वस्य जगतोऽवबोधं जागरणम् । पुनः केव । मलयाचलोर्वीव यथा मलयशैलस्य वनभूमिः श्रीखण्डं चन्दनद्रुमाङ्कुरम् । पुनः केव । नीर-

जनाभस्य पद्मं ब्रह्मोत्पत्तिकमलं नाभौ यस्य स कृष्णस्तस्य पत्नी जाया लक्ष्मीरिव। यथा कृष्णकान्ता श्रीः शृङ्गारयोनिं मदनम्। पुनः केव। जगतीजयश्रीरिव। यथा राज्ञो विजयिनृपस्य जगत्या भूमेर्विजयलक्ष्मीप्रतापम्। पुनः केव। फाल्गुनीव। यथा पूर्वाफाल्गुनी अध्वरभुजां यज्ञभाजिनां देवानामाचार्यं गुरुं बृहस्पतिम्॥ सप्तभिः कुलकम्। इति जन्मसमयः॥

श्यामीकृतानि कुदृशामपकीर्तिपङ्कै-
　रस्मन्मुखानि विशदानि विधास्यते यत्।
एष स्वकीर्तिविमलत्रिदशस्रवन्ती-
　विस्फूर्तिभिः किमिति दिक्प्रमदाः प्रसेदुः॥ ३३॥

दिक्प्रमदा दिगङ्गनास्तज्जन्मसमये प्रसेदुः प्रसन्नीबभूवुः। निर्मला जाताः। किमुत्प्रेक्ष्यते—इति हेतोः। इति किम्। यदेष हीरकुमारः कुदृशां दुर्वादिनां कुमतीनां वा अपकीर्तिभिः अपयशोभिरेव पङ्कैः कर्दमैः श्यामीकृतानि मलिनीकृतानि अस्मन्मुखानि स्वीयकीर्तिरेव विलसन्त्यास्त्रिजगति प्रसरन्त्यास्त्रिदशस्रवन्त्या गङ्गाया विस्फूर्तिभिर्विलासैर्विशदान्युज्ज्वलानि विधास्यते करिष्यतीति। पङ्ककलुषितानां हि गङ्गासलिलक्षालनेन निर्मलीभवनं युक्तिमदेव। पङ्कोऽघे कर्दमे च। गङ्गास्नानात्पापगमनेन निर्मलीभवत्वेन प्रसन्नता स्यादेव॥

भावी यदेष पृथुकः सुमनोनिषेव्य-
　स्तद्वृष्टयो दिव इतीव गृहे निपेतुः।
हन्ता यतः स तमसां तमसामिवारिः
　प्रागेव तैः किमिति भीतिवशात्प्रणेशे॥ ३४॥

यद्यस्मात्कारणात् नाथीनन्दनः पृथुकः बालकः सुमनोभिर्देवैर्निषेव्य उपास्यो भावी भविष्यति। उत्प्रेक्ष्यते—इति हेतोः तद्वृष्टयः सुमनोवर्षणानि पुष्पवृष्टयः दिवो व्योममण्डलात् गृहे अर्थात्तद्भवने निपेतुः पतिताः। 'चित्रीयितमतिबहलपतत्पुष्पवृष्ट्या' इति नलजन्मसमये चम्पूकथायाम्। पुनर्यत्कारणात्स कुमारस्तमसामज्ञानानां पापानां वा अरिर्हन्ता निवारकः भावी भविष्यति। क इव। तमसामरिरिव। यथा ध्वान्तानां शत्रुर्भास्वान् तमसामन्धकाराणां हन्ता घातको भवति। किमुत्प्रेक्ष्यते—इति भीतिवशाद्भयाधीनत्वात् प्रागेव पूर्वमेव तद्वपुःप्रभाभरैरर्थान्निरस्तैस्तमोभरैः सूतिकागृहात्प्रणेशे प्रणष्टम्। पलायितमित्यर्थः। 'सुमनसः पुष्पे देवे महात्मनि च' 'तमोऽज्ञाने पापे ध्वान्ते राहौ च' इत्यनेकार्थाः॥

लब्धश्रियानुसरता वसुभूतिपुत्रं
　सारूप्यमाकलयता च युगप्रधानैः।

जज्ञे चिराद्यदमुना विभुना ममान्तः-
प्रीत्येत्यनृत्यदिव शांभवशासनश्रीः ॥ ३५ ॥

शंभोर्जिनस्येदं शांभवं शासनं मतं तस्य श्रीजिनशासनलक्ष्मीरनृत्यत् नृत्यति स्म। इवोत्प्रेक्ष्यते—इति कारणादन्तश्चित्ते प्रीत्या हार्देन स्नेहेन प्रमोदेन वा। इति किम्। यच्चिरादनल्पकालादमुना कुमारेण मम जिनशासनश्रिया विभुना स्वामिना जज्ञे संजातम्। अमुना किं कुर्वता। लब्धानां विविधानां क्षीरास्रवादिकानां श्रिया शोभया संपदा वा वसुभूतिपुत्रम्। 'श्रीइन्द्रभूतिं वसुभूतिपुत्रं पृथ्वीभवं गौतमगोत्ररत्नम्' इति पूर्वसूरिस्तवोक्तेः। वसुभूतिनाम्नो ब्राह्मणश्रेष्ठस्य पुत्रं नन्दनं गौतमस्वामिनमनुसरता अनुकुर्वता। च पुनः किं कुर्वता। युगप्रधानैः वज्रस्वाम्यादिभिः सूरिभिः सारूप्यं सादृश्यमाकलयता बिभ्रता॥

विश्वत्रयीश्रुतिपुटैकवतंसिकाना-
मस्माकमेष समजायत वासवेश्म।
गम्भीरधीरिममुखाभिरधःकृतेन्दु-
श्रीभिश्च वल्गितमितीव गुणावलीभिः ॥ ३६ ॥

गम्भीरिमा गाम्भीर्यं भावप्रधानो निर्देशः। धीरिमा धैर्यं तावेव मुखे आदौ यासाम्। अथवा गम्भीरश्च धीरश्च गम्भीरधीरौ गम्भीरधीरयोर्भावो गम्भीरधीरिमाणौ तावेव मुखौ प्रथमौ यासां तादृशीभिर्गुणानामावलीभिः श्रेणीभिः वल्गितं प्रोल्लसितम्। 'सुविकासहाससहकारिकारणोपलम्भपूर्णमनोरथेन वल्गितमिव वसन्तमासेन' इति चम्पूकथायाम्। किंभूताभिर्गुणावलीभिः। अधःकृता तिरस्कृता निर्मलत्वेन इन्दुश्रीश्चन्द्रिकाशोभा याभिः। इवोत्प्रेक्ष्यते। इति हेतोर्वल्गितमिव। इति किम्। यद्विश्वेषां त्रिभुवनानां तात्स्थ्यात्तव्यपदेशात्त्रिजगज्जनानां श्रुतिपुटेषु कर्णपालीषु एकानामद्वैतानां वतंसिकानामुत्तंसानाम्। 'वष्टि भागुरिरल्लोपम्' इत्यलोपाद्वतंसिकानाम्। 'विदर्भपुत्रीश्रवणावतंसिका' इति नैषधे। त्रैलोक्याद्वैतकर्णाभरणानामस्माकं गुणावलीनामेष हीरकुमारः वासवेश्म निवसनसदनं समजायत संजातः॥

आजन्म यद्विधुरिवैष उदेति कीर्ति-
ज्योत्स्नाः किरन्कुवलयैकविकाशकारी।
अस्मादृशैः किमयशोऽञ्जनमादधानैः
किंचित्प्रकाशितनिशान्तदशान्तदीप्रैः ॥ ३७ ॥

भास्वन्मयूखविजिगीषुयदङ्गजात-
नैसर्गिकाङ्गभयभास्वदभीषुजालैः

तत्कालमल्पतमतैलदशैरिवोप-
दीपैरितीव समजायत दीप्तिदुःस्थैः ॥ ३८ ॥

(युग्मम्)

उपदीपैः सूतिकासद्मनि समीपे प्रदीपितः प्रदीपैर्दीप्तिभिर्ज्योतिर्भिर्दुःस्थैर्दरिद्रैः । विच्छायैरित्यर्थः । समजायत जातम् । कैः कृत्वा । भास्वतो भानोर्मयूखाः किरणास्तानपि विजिगीषुभिः स्वस्फूर्त्या विजेतुमिच्छुभिस्तादृशैर्यस्या नाथीदेव्या अङ्गजातस्य पुत्रस्य नैसर्गिकैः स्वाभाविकैः । 'तदेव नैसर्गिकमुन्नतत्वम्' इति रघौ। अङ्गात् काययष्टेर्भवैः समुत्पन्नैर्भास्वतां दीप्यमानानामभीषूणां कान्तीनां जालैर्वितानैर्वृन्दैः । इवोत्प्रेक्ष्यते । तत्कालं स एव कालो यत्र तत्तत्कालं तस्मिन्नेव समय अल्पतमा अतिशयेन स्तोकास्तैलदशाः स्नेहवर्तयो येषाम् । 'वृत्तिर्वर्तिश्च तद्दशा' इति हैम्याम् । तादृशैरिव । पुनरुत्प्रेक्ष्यते—इति हेतोः । इति किम् । यदेष हीरकुमार आजन्म जन्मसमयादारभ्य विधुश्चन्द्र इव कुवलयस्य भूमण्डलस्य, उत्पलस्य च एकमद्वितीयं यथा स्यात्तथा विकाशं(सं) प्रतिबोधं विकचतां च करोतीत्येवंशील उदेति प्रादुर्भवति । किं कुर्वन् । कीर्तिरेव औज्ज्वल्याद्विस्तारवत्तया वा ज्योत्स्नाश्चन्द्रिकाः किरन् विस्तारयन् । तर्हि किंचित्स्वल्पं प्रकाशितमुद्द्योतितं प्रकटीकृतं निशान्तं गृहं रात्रेरन्तो वा यैस्तथा दशाया अवस्थाया वर्तेश्च अन्ते प्रान्ते अवसाने दीप्रैर्दीपनशीलैरेवंविधैरस्मादृशैर्दीपैः किमिति प्रयोजनं न किमपीह कार्यम् । किं कुर्वाणैः । अयशोऽपकीर्तिः श्यामलत्वात्तदेवाञ्जनं कज्जलमादधानैः कुर्वाणैरुद्गिरद्भिः । अथवा—आ सामस्त्येन दधद्भिः ॥ युग्मम् ॥

स्वःकूलिनीजलविलोलनकॢप्तकेलिः
पाटच्चरो विकचवारिजसौरभाणाम् ।
उत्फुल्लवल्लिनवनाटकसूत्रधार-
स्तं प्रेक्षितुं किमु ववौ पवनोऽनुकूलः ॥ ३९ ॥

अनुकूलस्तज्जन्मसमये जनानानुकूलत्वाद्रोचमानः पवनो वायुर्ववौ वाति स्म । किंभूतः । स्वःकूलिन्या गगनगङ्गाया जलस्य पयःपूरस्य विलोलनेन मध्ये प्रविश्यावगाहनादुल्लसत्कल्लोललोलीकरणेन कॢप्ता रचिता केलिर्विलासो येनेति शीतलता । पुनः किंभूतेन । विकचवारिजानाम् । अर्थात्स्वःकूलिन्या एव । स्मेराम्भोरुहाणां सौरभाणां परिमलानां पाटच्चरस्तस्करोऽपहर्ता । 'स्मेराम्भोरुहपत्तने परिमलस्तेयी वसन्तानिलस्तत्रत्यैरिव यामिकैर्मधुकरैः प्रारब्धकोलाहलः । निर्यातस्त्वरया चलन्निपतितः श्रीखण्डपङ्कद्रवैर्लिप्ते केरलकामिनीकुचतटे खञ्जञ्शनैर्गच्छति ॥' इति भोजप्रबन्धे वाग्वादिन्या पानीयहारिणीरूपं विधाय कालिदासगर्वापहारार्थमुक्तम् । इति सुरभिता । पुनः किंभूतेन । उत्फुल्लवल्लीनां विकसितलतानां नवे नूतने नाटके नृत्यकरणे चपलीभवने सूत्रधारः सूचकः ताण्डवप्रारम्भकारको रङ्गकर्ता च । 'लतावलालास्यकलागुरुः' इति नैषधे । 'असौ ते बन्धुविध्वं-

सनवनाटकसूत्रभृत्' इति पाण्डवचरित्रे । इति मन्दता । त्रिविधोऽपि समीरणो वर्णितः । किमूत्प्रेक्ष्यते—तं कुमारं प्रेक्षितुं किमु अवलोकयितुमिव ववौ ॥

आसीदसौ कलियुगे युगबाहुरस्मि-
न्नर्हन्निवातिशयितातिशयाश्रितत्वात् ।
एतस्य जन्मनि जिनाधिपतेरिवान्तः-
प्रीतेरितीव दिवि दुन्दुभयः प्रणेदुः ॥ ४० ॥

हीरकुमारस्य जन्मनि जननसमये दिवि आकाशे दुन्दुभयो मदन(ङ्गल)भेर्यो निःस्वना वा प्रणेदुर्वाद्यन्ति स्म । 'उन्नदितं वियत्यदृष्टमङ्गलवादित्रैः' इति नलजन्मनि चम्पूकथायाम् । तथा 'निःशेषदिविषद्वर्गप्रमोदपिशुनास्तदा । समाकर्ण्यन्त सानन्दं दुन्दुभिध्वनयो दिवि ॥' इति युधिष्ठिरजन्मनि पाण्डवचरित्रे च । जिनाधिपतेरिव यथा श्रीजिनेश्वरस्य जन्मनि व्योमनि दुन्दुभयः प्रणदन्ति इवोत्प्रेक्ष्यते । इत्यमुना प्रकारेण अन्तः स्वमनसि प्रीतेर्मुदः । इति किम् । यदस्मिन् कलियुगे अतिशयितैः स्फूर्तिप्राप्तैरतिशयैर्महिमविशेषैराश्रितत्वादसौ शिशुः अर्हन्निव तीर्थंकर इवासीत् । किंभूतः । युगवद्बाहू यस्य धूसरप्रमाणभुजः । आजानुबाहुरित्यर्थः ॥

एकांशवानपि कलौ शिशुनामुनाह-
मङ्गैश्चतुर्भिरुदयीह पुरा भवामि ।
धर्मेण पल्लवितमन्तरितीव जाते
विश्वासुमत्प्रमददायितदङ्गजाते ॥ ४१ ॥

विश्वेषां त्रयाणां सप्तानां वा चतुर्दशानां वा एकविंशतेर्वा । 'भुवनानि निबध्नीयात्त्रीणि सप्त चतुर्दश' इति वाग्भटालंकारे । वृत्त्यादावेकविंशतिरपि । जगतामसुमन्तो जन्तवः तेषां प्रमोदं हर्षं ददातीत्येवंशीलस्तादृशे तदङ्गजाते नाथीकुंराव्यवहारिणोरङ्गजाते पुत्रे जाते सति धर्मेण अन्तश्चित्ते पल्लवितम् । प्रहृष्टमित्यर्थः । 'चिरात्पल्लवितमिव राजवंशेन' इति चम्पूकथायां नलजन्माधिकारे । इति हेतोरिव । इति किम् । यद्यस्मात्कारणात्कलौ कलिकाले एको न द्वितीयः अंशो भागोऽर्थाच्चतुर्थपादो विद्यते यस्य स एकांशवानप्यहं धर्मः । 'पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना केन तपः प्रपेदिरे । भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन् दधावधर्मोऽपि कृशस्तपस्विताम् ॥' इति नैषधे । कृतयुगे किल धर्मश्चतुर्भिः पादैर्विजयी भवेदधर्मः पुनरेकांशेन स्यात्, कलियुगे तु अधर्मश्चतुर्भिः पादैर्धर्मस्त्वेकांशमात्रः एतदेव तपस्विनां महत्तपः यद्भूमौ एकपादकनिष्ठाङ्गुल्या स्पृशन् तिष्ठति तथा कृतयुगेऽधर्मः कलियुगे तु धर्मस्तपस्वी कृशत्वं भजते । प्रस्तुतम् । अमुना कुमारेण चतुर्भिरङ्गैः संपूर्णावयवैः सर्वात्मनैव इह भरतभूमौ उदयी

अभ्युदयवान् पुरा भवामि । भविष्यामीत्यर्थः । यावत्पुरानिपातयोर्योगे भविष्यत्काले वर्तमानाः इति प्रक्रियासूत्रेण पुरायोगे वर्तमानयोर्विभक्त्योर्भविष्यदर्थः प्रकाश्यते । 'पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे ॥

एतद्गुणाभिनवगानविधानपूर्व-
　प्रारब्धताण्डवतरङ्गिरसाङ्गरङ्गः ।
प्रारप्स्यते विबुधराजसमाजरङ्गे-
　ऽस्माभिर्मुदेति दिवि किं ननृतेऽप्सरोभिः ॥ ४२ ॥

रम्भातिलोत्तमोर्वशीघृताचीप्रमुखाभिरप्सरोभिः स्वर्गाङ्गनाभिः । किमुत्प्रेक्ष्यते । इत्यमुना प्रकारेण कृत्वा मुदा किं हर्षेणेव दिवि आकाशे ननृते नर्तितं ताण्डवममण्डि । इति किम् । विबुधानां पण्डितानां राज्ञामत एव पण्डितराजत्वान्नवस्वपि शृङ्गारादि-रसेषु कुशलत्वं ज्ञातृत्वं च यस्य तादृक् । वास्तवार्थे देवानां नायकस्तस्य समाजः समास एव रङ्गो नर्तनस्थानं तत्र एतस्य भाविसूरेः कुमारस्य गुणानां शमदमसंयमाकि (दि)कानां षट्त्रिंशत्षट्त्रिंशिकासंख्यानां गणनातीतानां वा अभिनवानां पूर्वगीतापेक्षया नूतनानां गानानां गीतीनां प्राक्श्रुतगीतिश्रवणे तादृक् रसो न स्याद्यादृक् नवीनगानश्रवणे रसः समुत्पद्यते । तस्मादेतस्य ध्रुवपदगानानां विधानं निर्माणं तदेव पूर्वमादिर्यत्र तादृशं प्रारब्धमुपक्रान्तम् । 'प्रारम्भः प्रोपतः क्रमः' इति हैम्याम् । यत्ताण्डवं नाट्यं तस्य तत्र वा तरङ्गयुक्ता जातास्तरङ्गिताः कल्लोलिता ये रसाः शृङ्गारादयो नव आस्वादो वा । 'रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥' इत्यनेकार्थः । त एव अङ्गमवयवः शरीरं वा तादृशो रङ्गः अस्माभिरप्सरोभिः अवाप्स्यते उपक्रंस्यते । 'तदनन्तरमाकाशे संगीतमुदजृम्भत । रम्भोर्वशीप्रभृतयो नृत्यमप्सरसो व्यधुः ॥' इति पाण्डवचरित्रेऽर्जुनजन्माधिकारे । तथा 'स्वकान्तिसर्वस्वापहारभयादिव दिवि ननृतुरप्सरसः' इति चम्पूकथायां दमयन्तीजन्मनि ॥ इति हीरकुमारजन्ममाहात्म्यम् ॥

प्रल्हादनाह्वनगरं पुरमप्यमुष्य
　मूर्त्या पवित्रयितुमन्तरिवेहमानः ।
श्रीसोमसुन्दरयतिक्षितिशीतकान्ति-
　र्जन्मापरं स्वयमसौ ग्रहयांबभूव ॥ ४३ ॥

असौ सोमसुन्दरनामा यतीनां साधूनां मध्ये क्षितेः पृथिव्याः शीतकान्तिश्चन्द्र एतावता राजा श्रीसोमसुन्दरसूरिः स्वयमात्मना परमन्यजन्मावतारं ग्रहयांबभूव जग्राह । उत्प्रेक्ष्यते । अमुष्य कुमारस्य मूर्त्या शरीरेण पुनरपि द्वितीयवारं प्रल्हादनमिति आह्वा नाम यस्य तादृशं नगरं पवित्रयितुं पावनीकर्तुमीहमानो वाञ्छन्निव । एकवारं सोमसुन्दरसूरिवपुषा प्रल्हादनपुरं पवित्रितं द्वितीयवारं हीरविजयसूरिमूर्त्या कृत्वा पवित्रीचिकीर्षुरिव ॥

चक्रस्य चक्रिवदुदित्वरदीप्रदीप्ति-
दण्डौघचण्डिमविखण्डितचण्डभासः ।
इभ्यः स्वभृत्यजनराजिभिरुत्सुकाभिः
संवर्ध्यते स्म जननेन तनूभवस्य ॥ ४४ ॥

इभ्यः कुंराह्वव्यवहारी उत्सुकाभिरुत्कण्ठाकलिताभिः स्वस्य कुंरामहेभ्यसंबन्धिनं भृत्यजनानां सेवकलोकानां राजिभिः श्रेणिभिः तनूभवस्य पुत्रस्य जननेन जन्मना संवर्ध्यते स्म वर्धाप्यते । 'अत्रान्तरे प्रियभाषिताभिधाना चेटी राजानं वर्धापयति' इति कल्पकिरणावल्याम् । वर्धित इत्यन्यत्र । वर्धापनिका दत्तेत्यर्थः । किंवत् । चक्रिवत् । यथा चक्रवर्ती चक्रस्योत्पत्त्या वर्धते स्म वर्धाप्यते स्म । किंभूतस्य सूनोश्चक्रस्य च । उदित्वरा उदयनशीलाः प्रादुर्भवन्त्यो वा । तथा दीप्रा दीपनशीला झलझलायमाना दीप्यमाना वा, दीप्तयः कान्तयः सरलतया निर्गमनाम् दृश्यमाना वा दण्डाकारा अत एव दण्डा इव दण्डाः प्रसरा वा तेषामोघो निकरः तस्य चण्डिमभिरत्युग्रताभिर्विशेषेण खण्डितोऽभिभूतश्चण्डभाः सूर्यो येन तस्य ॥

सूनोर्जनेरुपनतेरिव सेवधीना-
मुद्गत्वरान्स्वजनवक्रसुधाकरेभ्यः ।
वर्णान्स्वकर्णपुटकेन सुधायमाना-
न्पीत्वा तदा प्रमुमुदे हृदये महेभ्यः ॥ ४५ ॥

तदा तस्मिन् काले महेभ्यः कुंराह्वव्यवहारी हृदये मनसि प्रमुमुदे जहर्ष । किं कृत्वा । पीत्वा सादरं श्रुत्वा । कान् । वर्णान् अक्षराणि । किंभूतान् । सुधायमानान् अमृतवदाचरतः । केन पीत्वा । स्वस्यात्मनः कर्ण एव पुटकः पत्रभाजनं तेन । अन्यदप्यमृतं पुटकेन पीयते । पुनः किंभूतान् । उद्गत्वरान् प्रकटीभवनशीलान् । 'उद्गत्वरामृतकरार्धपरार्ध्यमालाम्' इति नैषधे । केभ्यः । स्वजनानां बन्धुवर्गाणां ज्ञातिजनानां वा आत्मीयभृत्यलोकानां वा वक्राणि वदनानि एव सुधाकराश्चन्द्रास्तेभ्यः । सुधानामाकरात्सुधापि निर्गच्छेदिति । वर्णान् कस्याः । सूनोः पुत्रस्य जनेर्जन्मनः । कस्या इव । उपनतेरिव यथा सेवधीनां नवनिधीनां स्वर्णरत्ननिधानानां वा आगमनस्य वर्णान् पीत्वा कश्चिन्मोदते ॥

सूनोर्जनिं निगदतामनुगव्रजाना-
मासीददेयमिह तस्य किरीटमेव ।
भूभर्तृभावककुदं विशदातपत्रं
धात्रीपतेरिव मुदं दधतो हृदन्तः ॥ ४६ ॥

तस्य कुंरामहेभ्यस्य इह पुत्रवर्धापनिकासमये सूनोः स्वपुत्रस्य जनिं जन्म निगदतां

कथयतामनुगव्रजानां सेवकलोकप्रकराणां किरीटं मुकुटमेवादेयं दातुमनर्हमासीत् । एतावता मुकुटवर्जं सर्वाङ्गीणान्यप्याभरणानि प्रदत्तवानित्यर्थः । कस्येव । धात्रीपतेरिव पथा भूमीभर्तुः राज्ञः भुवः पृथिव्या भर्तृभावस्य स्वामित्वस्य ककुदं चिह्नं सूचकं वा । 'नृपतिककुदं दत्त्वा यूने सितातपवारणम्' इति रघौ । विशदातपत्रं श्वेतच्छत्रमदेयं भवति । किं कुर्वतस्तस्य । राज्ञश्च हृदन्तर्मनोमध्ये मुदं नन्दनजन्माविर्भूतां प्रीतिं प्रमोदं दधतो धारयतः ॥

लक्ष्मीवतामधिपतेरनुजीविवृन्दैः
　पुत्रप्रसूतिममितं मधु निर्दिशद्भिः ।
पाणिप्रदेशनविधौ ददृशेऽस्य पञ्च-
　शाखोऽपि लेखशिखरीव सहस्रशाखः ॥ ४७ ॥

अनुजीविनां सेवकानां बृन्दैः प्रदेशनविधौ पुत्रवर्धापनिकाप्रदानप्रमोददानसमये लक्ष्मीवतां धनधान्यादिविविधसमृद्धिभाजां व्यवहारिणामधिपतेर्नायकस्य अस्य कुंराख्यस्य पञ्चैव शाखाः शिखा अङ्गुलयो यत्र तादृशः पाणिर्हस्तः स एव लेखशिखरी कल्पशाखीव सहस्रसंख्याकाः शाखा लता यस्य । 'शिखाशाखालताः समाः' इति हैम्याम् । स सहस्रशाखो ददृशे दृष्टः । अनुजीविवृन्दैः किं कुर्वद्भिः । पुत्रस्य नाथीनन्दनस्य प्रसूतिं जन्मैव अमितं मानरहितं मधु माध्वीकमस्य महेभ्यस्य निर्दिशद्भिः कथयद्भिः । 'अमितं मधु तत्कथा मम' इति नैषधे ॥ इति पुत्रवर्धापनिकादानादि ॥

आसाद्य तत्प्रसववेश्म समं सगोत्रैः
　सूनोरतृप्ति स पिबन्वदनारविन्दम् ।
अद्वैतसंमदपरम्परयालिलिङ्गे
　लक्ष्म्या पुमानिव पचेलिमपुण्यशाली ॥ ४८ ॥

स महेभ्यः न विद्यते द्वैतं युगलं येषाम् । 'युगं द्वैतं यमं युग्मम्' इति हैम्याम् । असाधारणानामित्यर्थः । तादृशानां संमदानां प्रमोदानां परम्परया आलिलिङ्गे आश्लिष्टः । कयेव । लक्ष्म्येव । यथा पचेलिमेन परिपाकं प्राप्तेन उदयाचलिकायामागतेन पुण्येन सुकृतेन शुभकर्मणा शालते शोभते इत्येवंशीलः पुमान् श्रिया क्षीरार्णवनन्दिन्या आलिङ्ग्यते आश्लिष्यते । आश्रीयते इत्यर्थः । महेभ्यः किंविशिष्टः । न विद्यते तृप्तिः सौहित्यमत्यादरतया यत्र, तृप्तिरहितं यथा स्यात्तथा क्रियाविशेषणम् । सूनोः स्वपुत्रस्य वदनारविन्दं मुखकमलं पिबन् सादरमवलोकयन् । किं कृत्वा । सगोत्रैः स्वजनैः समं तस्या नाथीदेव्याः प्रसववेश्म सूतिकासदनमासाद्य संप्राप्य समागत्य ॥

तस्याङ्गजास्यशशिदर्शनतोऽम्बुराशे-
　र्वारामिवोल्लसदमन्दमुदामियत्ताम् ।

हृत्सद्मसूत्रितजगत्त्रयविस्तरापि
विज्ञावली प्रभुरभून्न तदा प्रमातुम् ॥ ४९ ॥

तदा तस्मिन् काले पुत्रप्रसवसूतिकासदनागमननन्दनावलोकनसमये तस्य कुंरासाधोः अङ्गजः स्वनन्दनस्तस्यास्यं वदनमेव शशी संपूर्णपार्वणचन्द्रः । पूर्णचन्द्र एव शशी लक्ष्यते नान्यथा । अत एव शशी तस्य दर्शनतोऽवलोकनादम्बुराशेः समुद्रस्येव वारां जलानामिव उल्लसन्तीनां प्रकटीभवन्तीनाममन्दानामकुण्ठानामनल्पानाममेयानां वा मुदामानन्दानामियत्ता इयत्परिमाणत्वमेतावन्मात्रतां प्रमातुं प्रमाणीकर्तुं विज्ञावली प्राज्ञश्रेणी न प्रभुरभूत् न समर्थीबभूव । ज्ञातुं कदाचिन्न शक्नोति स्मेत्यर्थः । किंभूता विज्ञावली । हृत्सद्मसु स्वेषां विज्ञानां मनोमन्दिरेषु सूत्रितः सूत्रतामानीतः गोचरीकृतः । विज्ञात इत्यर्थः । जगत्त्रयस्य त्रिभुवनस्य विस्तरः प्रपञ्चो यया । 'प्रक्रियां नातिविस्तराम्' इति सारस्वतप्रथमश्लोके । त्रैलोक्यसकलस्वरूपवेदनविदुरापीत्यर्थः । 'तेजःपालश्च विष्णोश्च कः स्वरूपं निरूपयेत् । स्थितं जगत्त्रयीसूत्रं यदीयोदरकन्दरे ॥' इत्यर्बुदाचलल्लणिगवसतिमध्यस्थवस्तुपालप्रशस्तौ ॥

आस्वादयंल्लवणिमामृतमेतदास्या-
वश्यायभासि वसतिं गवि चानुतिष्ठन् ।
पश्यन्सुतं द्युसदिवाजनि निर्निमेष-
नेत्रारविन्दयुगलः स महेभ्यकुम्भी ॥ ५० ॥

स कुंरानामा महेभ्यकुम्भी व्यवहारिकुञ्जरः सुतं स्वनन्दनं पश्यन् विकचलोचनाभ्यामवलोकयन् दिवि स्वर्गे सीदति तिष्ठतीति द्युसत् देव इव निर्गतो निमेषो मीलनं ययोस्तादृशे नेत्रे लोचने एवारविन्दे कमले तयोर्युगलं द्वन्द्वं यस्य । मेषोन्मेषरहितनयनामल इत्यर्थः । तादृशोऽजनि संजातः । किं कुर्वन् । एतस्यात्मनन्दनस्य आस्ये वदने एवावश्यायभास्तुहिनकिरणः चन्द्रस्तस्मिन् । 'अवश्यायस्तुहिनं प्रालेयं मिहिका हिमम्' इति हैम्याम् । लवणिमा लावण्यमेवामृतं सुधारसमास्वादयन् पिबन् । पुनः किंभूतः । गवि भूमौ स्वर्गे च वसतिं वासमनुतिष्ठन् कुर्वन् । देवोऽपि चन्द्रामृतं पिबति । ['असितमेकसुराशितमप्यभून्न पुनरेष पुनर्विशदं विशम् । अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम् ॥' इति नैषधे । अस्यार्थः—'अर्णवादागतमार्णवं कृष्णं विषमेकेन सुरेण हरेण अशितं जग्धं पुनर्नाभूत् । पुनर्न जातमित्यर्थः । एष चन्द्रः पुनः श्वेतं विषं सुरैर्वह्न्यादिभिर्देवैर्निपीड्य जनितक्षयम् । 'प्रथमां पिबते रविः' इत्यादि श्रुतेः । 'ईदृशमपि पुनर्जायते' इति । 'इज्येव देवप्रजभोज्यऋद्धिः शुद्धा सुधादीधितिमण्डलीयम्' इत्यपि नैषधे ।] स्वर्गे च तिष्ठति निर्निमेषश्च स्यात् ॥

पूर्वाद्रिपाटलशिलावलये शशीव
लीलामराल इव कोकनदच्छदे वा ।

पारीन्द्रपोत इव गैरिकशृङ्गिशृङ्गे
तत्पाणिपल्लवतले विललास बालः ॥ ९१ ॥

तस्य कुंरामहेभ्यस्य पाणिरेव शोणत्वात्पल्लवः किसलयमिव पल्लवस्तस्य तले उदरे मध्ये स बालः शुशुभे । क इव । पूर्वाद्रेरुदयाचलस्य पाटले लोहिते शिलावलये उपलोत्सङ्गे विस्तीर्णप्रस्तरमध्ये वा । मिलिता एकतयैव दृश्यमाना वलयाकाराः शिलाः शिलावलयं तस्मिन् शशी सौम्यश्चन्द्र इव । पुनः क इव । कोकनदं रक्तोत्पलं तस्य पत्रे दले लीलायुक्तः क्रीडाकारी वा मरालः राजहंस इव । पुनः क इव । गैरिके धातुमये शृङ्गाणि सन्त्यस्मिन्निति शृङ्गी तस्य शृङ्गिणः शैलस्य शृङ्गे शिखरे पारीन्द्रस्य मृगेन्द्रस्य पोतः बालः केसरिकिशोरक इव ॥

जन्मोत्सवं विदधता तनयस्य तेन
कामाधिकं प्रदिशतार्थिकृतेऽर्थजातम् ।
श्रीदस्तदावगणनां गमितो निकेतं
कैलाशमूर्ध्नि विदधे किमपत्रपिष्णुः ॥ ९२ ॥

तदा तस्मिन् नन्दनजननसमये तेन कुंराव्यवहारिणा अवगणनां दानशौण्डत्वेनावहेलनां गमितः प्रापितः सन् श्रीदः धनदः । किमुत्प्रेक्ष्यते । अपत्रपिष्णुर्लज्जाशीलः सन् कैलाशस्य स्फटिकाचलस्य मूर्ध्नि उपरि शिखायां निकेतं स्वसदनं विदधे कृतवानिव । महेभ्येन किं कुर्वता । तनयस्य निजनन्दनस्य जन्मोत्सवं जननस्य महामहं विदधता कुर्वता । पुनः किं कुर्वता । कामान्मनोभिलषितादप्यधिकमतिशयितमर्थानां द्रविणानां जातं समूहमर्थिकृते याचकजनार्थम् । याचकायेत्यर्थः । प्रदिशता यच्छता ददता ॥

सूनोर्जनेर्महमसौ विभवानुरूपं
श्रीमन्महेभ्यमघवा घटयांबभूव ।
संजातजातविधिरप्यदसीयसूनु-
र्निर्धूतदर्पण इव स्फुरयांबभूव ॥ ९३ ॥

असौ कुंराख्यः श्रीमन्तो लक्ष्मीकेलिनिकेतना ये महेभ्या महाव्यावहारिणस्तेषु तेषां मध्ये वा मघवा पुरंदरः प्रथमगणनीयत्वात्सर्वोत्कृष्टत्वाच्च विभवानुरूपं स्वद्रव्यस्योचितं योग्यं सदृशं सूनोः पुत्रस्य जनेर्जन्मनः महमुत्सवं घटयांबभूव चकार । 'सृजति करोति प्रणयति घटयति निर्माति निर्मिमीते च' इति क्रियाकलापे करणार्थाः क्रियाः । अपि पुनः संजातः संपन्नः निर्वर्तितः जातस्य जन्मसंस्कारादेः प्रथमे दिवसे स्थितिपदिका तृतीये वासरे चन्द्रसूर्यदर्शनादिको विधिः प्रकारो यस्य तादृशोऽदसीयसूनुर्नाथीकुंरामहेभ्यनन्दनः निर्धूतदर्पण इव शाणाग्रोत्तेजितात्मदर्श इव । 'निर्धूतहारगुलिकाविशदं

हिमाम्भः' इति रघुवंशे । स्फुरयांबभूव दीप्यते स्म । 'स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरोधसाकृते' इत्यपि रघौ ॥

अर्थिव्रजेन मिलितुं स्वककामुकेन
संकेतसौधमिव वारिधिनन्दनायाः ।
गीतिप्रतिध्वनितनर्तितकेलिकेकि
षष्ठीदिने रजनिजागरणं प्रणीय ॥ ९४ ॥

पातालभूतलसुरालयलोककोटी-
कोटीरहीर इव बालक एष भावी ।
उन्नीव नीतिकृतिनान्तरितीव पित्रा
सत्रा स्वगोत्रिभिरकारि स हीरनामा ॥ ९५ ॥

पित्रा कुंराख्यव्यवहारिणा अन्तः स्वचित्ते । उत्प्रेक्ष्यते । इत्यमुना प्रकारेण उन्नीय विचार्यैव। 'वितर्कः स्यादुन्नयनम्' इति हैम्याम् । उन्नयनम् । पूर्वमुन्नीय गोत्रिभिः सत्रा स्वस्वजनैः सार्धं स नाथीजनितः शिशुर्बालकः हीर इति नाम यस्य तादृशोऽकारि कृतः । हीरकुमारो नाम निर्मितः । किंभूतेन पित्रा । नीतौ न्याये योग्यताप्रापणे कृतिना कोविदेन । चतुरेणेत्यर्थः । योग्यत्वनयनमेव दर्शयति । इति किम् । यदेष बालकः अग्रे पातालस्य बलिवेश्मनः भूतलस्य क्षोणीमण्डलस्य सुरालयस्य देवलोकस्य लोकानां नागनागरनाकिनां कोटीनां शतलक्षलक्षितानां कोटिशः संख्याकानां कोटिकोटीनां कोटीरेषु मुकुटेषु हीरक इव सर्वोत्तममणिरिव । लोकप्रसिद्ध्या 'नगीनो' तद्वदसौ शिशुर्भावी भविष्यति इति वितर्क्यैव । किं कृत्वा । प्रणीय विधाय । किम् । षष्ठ्या दिने दिवसे रजन्यां रात्रौ जागरणमुत्सवविशेषम् । किंभूतम् । गीतीनां सोत्कण्ठकलकण्ठकण्ठीकण्ठालपितमधुरगानानां प्रतिध्वनितैः प्रतिशब्दितैः कृत्वा नर्तितास्ताण्डवाडम्बरकलिता जाताः कृता वा केलिकेकिनः क्रीडार्थस्वसद्मपालितबालमयूरा यत्र । उत्प्रेक्ष्यते । षष्ठीदिनरजनिजागरं स्वककामुकेन निजाभिलाषुकेण अर्थिव्रजेन याचकचक्रेण समं मिलितुं सङ्गं कर्तुं वारिधिनन्दनाया लक्ष्म्याः संकेतः 'अमुकस्मिन् स्थाने त्वया समेतव्यम्, मयापि तत्र समागम्यते' इति संकेतः । यूनो युवत्याश्च । तस्य सौधं गृहमिव । 'विशेषतीर्थेष्विव जह्नुनन्दना' इति नैषधे ॥ इति जन्मोत्सवनामकरणादिः ॥

पूर्वापराम्बुनिधिमञ्जुलमेखलाया
भूमेः स भर्तुरुचितैः समभूषि चिह्नैः ।
दानानुकम्पनसभाजननीरसिक्ता-
प्राचीनपुण्यविटपिप्रसवैरिवैतैः ॥ ९६ ॥

स हीरकुमारः पूर्वा प्राची अपरा प्रतीची सृष्टिभ्रमणेन पूर्वस्या दक्षिणस्यां गमनाद्दक्षिणा गृहीता पश्चिमाया उत्तरस्यां गमनादुत्तरापि गृहीतैव एतावता चतसृणां दिशां ग्रहणात् तासामम्बुनिधयश्चत्वारोऽपि समुद्राः । 'पयोधरीभूतचतुःसमुद्राम्' इति रघुवंशवचनात् । एवं मञ्जुला बन्धुरा स्वर्णमणिमौक्तिकमण्डिता मेखला काञ्ची यस्या मेखला तु वलयाकारतया कटीजघनादिप्रदेशे परिधीयते ततश्चतुर्दिग्वर्तिसमुद्रोपादानम् । अथवा अपरोऽपि पाठः । यथा 'अर्भश्चतुर्जलधिमञ्जुलमेखलायाः' । चत्वारः प्राची प्रतीची अवाची उदीचीति चतुर्दिग्वर्तिनो जलधयः समुद्रा एव मञ्जुला मनोहरा मेखला रसना यस्यास्तादृश्या भूमेः पृथिव्याः भर्तुः स्वामिनः चतुर्दिक्पाथोनिधिपर्यन्तभूमीपालस्य चक्रिवर्तिनः उचितैर्योग्यैः चिह्नैः सामुद्रककथितैर्लक्षणैः समभूषि अलंकृतः । अर्थात् हस्तपादाद्यङ्गोपाङ्गेषु शोभितः । उत्प्रेक्ष्यते । दानमभयसुपात्रपाणिप्रमुखविश्राणनम्, अनुकम्पनं मार्यमाणप्राणिमोचनदुःखितदीनकष्टापनयनादिदया, सभाजनं देवगुर्वादिपूजनभक्तिः, तद्रूपैर्नीरैः सलिलैः सिक्तस्य प्राचीनं पूर्वजन्मावतीर्णं यत्पुण्यं स एव विटपाः शाखाविशेषाः सन्त्यस्यास्मिन् वा इति विटपी वृक्षस्तस्य प्रसवैः पुष्पैरिव । 'पुष्पं सूनं सुमनसः प्रसवश्च मणीचकम्' इति हैम्याम् ॥

सज्ञातिलोचनचकोरनिपीयमानै-
　र्लावण्यचञ्चदमृतैरुपचीयमानैः ।
वृद्धिं दधार पृथुकोऽप्रतिमैः प्रतीकै-
　र्द्वैतीयिकेन्दुरिव सान्द्रकलाकलापैः ॥ ९७ ॥

स पृथुकः हीरकुमारः न विद्यते प्रतिमा प्रतिबिम्बं सदृशं वस्तु केनापि सादृश्यं वा येषाम् । 'न तन्मुखस्य । प्रतिमा चराचरे' इति नैषधे । तैरसाधारणैः प्रतीकैरवयवैः । 'एकदेशे प्रतीकोऽङ्गावयवापघना अपि' इति हैम्याम् । कृत्वा वृद्धिं पुष्टिं दधार धत्ते स्म । किंभूतैः प्रतीकैः । सज्ञातीनां स्वजनानां लोचनान्येव चकोरा ज्योत्स्नाप्रियास्तैर्निपीयमानैः सादरमतृप्तं च अवलोक्यमानैः । पुनः किंभूतैः । लावण्यानि सुन्दरतातिशया एव चञ्चन्ति पुण्यानि चेतोहराणि वा अमृतानि सुधारसास्तैः पुष्टिं प्राप्यमानैः नीयमानैः । क इव । द्वैतीयिकेन्दुरिव । यथा श्वेतपक्षे द्वितीयायां भवो द्वितीयिकः द्वितीयासंबन्धी वा चन्द्रः सान्द्राणां स्निग्धानां बहुलानां वा कलानां षोडशांशलक्षणानां भागानां कलापैः कृत्वा वृद्धिं धत्ते । 'केनेथका' इति कप्रत्ययः । णित्वं त्वेषां विकल्पकमिति क्वापि वृद्धिः । द्वितीयाया अयं द्वैतीयकः ॥

पित्रोर्मनोरथगणान्कुटजावनीजा-
　न्प्रावृट्पयोद इव पल्लवयन्कुमारः ।
उत्सङ्गयोरुदलसत्कलयन्विलासं
　फुल्लताफलदयोरिव केलिकीरः ॥ ९८ ॥

आनन्दमेदुरितमानसपद्मचक्षु-
रङ्कान्तरं परिचरन्स महेभ्यसूनुः ।
अभ्राभ्रिकान्तरमिवार्भकभानुमाली
कस्तूरिकामृगशिशुर्विपिनान्तरं वा ॥ ५९ ॥

जननीजनकयोः उत्सङ्गयोर्विलासं बालक्रीडां कलयन् कुर्वन् उदलसत् उल्लसति स्म शुशुभे । क इव । केलिकीर इव । यथा केलिकलितः क्रीडाकरः कीरः । अर्थात् बालशुकः । उल्लसतोर्विकसतोर्लताफलदयोरुत्सङ्गयोरुल्लसति । कुमारः किं कुर्वन् । मनोरथगणान् । अर्थात् पित्रोः । वाञ्छाशतानि पल्लवयन् नवीकुर्वन् फलयन् वा । क इव । प्रावृट्पयोद इव । यथा वर्षाकालसंबन्धी मेघः कुटजावनीजान् नीपद्रुमान् पल्लवयति किशलयकलितान् करोति । स महेभ्यसूनुः कुंराव्यवहारिनन्दनः स हीरकुमारः आनन्देन हर्षेण मेदुरितं पुष्टीभूतं मानसं मनो यासां प्रमोदप्रपूरितानां पद्मचक्षुषां कमललोचनानामेकस्मादङ्कादन्योऽङ्क उत्सङ्गः अङ्कान्तरं परिचरन् सेवमानः । 'भजते श्रयत्युपास्ते शीलत्युपतिष्ठते च शीलयति । उपचरति परिचरति च निषेवते च प्रसादयति॥' इति क्रियाकलापे । आबभासे शुशुभे । क इव । अर्भकभानुमालीव । यथा अभ्रस्य मेघस्य अभ्रिकान्तरमेकस्या अभ्रिकाया अपरा अभ्रिका वार्दलिका अभ्राभ्रिकान्तरं भजन् डिम्भभास्करो भासते । 'जरीजृम्भड्डिम्भद्युमणिरमणीयांशुलहरी' इति खण्डप्रशस्तौ । पुनः क इव । कस्तूरिकामृगशिशुरिव । यथा कस्तूरिकाहरिणा बालकाः विपिनान्तरमेकस्माद्विपिनाद्वनादन्यद्विपिनं विपिनान्तरं शीलन् । पुनः क इव । द्विरदेन्द्रबाल इव । यथा गजराजस्य । 'पञ्चवर्षो गजो बालः' इति हैम्याम् । बालः शिशुः विन्ध्योपलान्तरमेकस्माद्विन्ध्योपलाज्जलबालकशैलशिलायाः अन्यं विन्ध्योपलं शिलोत्सङ्गम् । 'विन्ध्यस्तु जलबालकः' । तथा 'ग्रावा शिलोपलो गण्डः' इति द्वयमपि हैम्याम् । पुनः क इव । अर्भककाकपुष्ट इव । यथा क्षीरकण्ठकलकण्ठः कोकिलबालकः चूतद्रुमान्तरमेकस्माच्चूतद्रुमात्सहकारतरोरपरश्चूतद्रुमः अन्यो माकन्दपादपः । पुनः क इव । भ्रमर इव । यथा मधुकरः स्मेराम्बुजान्तरमेकस्मात्स्मेराम्बुजाद्विकचकमलादपरं स्मेराम्बुजं विकसितपद्मं शीलयत् । पुनः क इव । कलहंस इव । राजमरालबालकः तरङ्गोत्सङ्गान्तरम् एकस्मात्तरङ्गस्य कल्लोलस्य उत्सङ्गादपरं तरङ्गोत्सङ्गं लहरीक्रोडमुपचरन् भासते ॥

स्वर्णेऽद्रिशृङ्ग इव चन्द्रिकयानुविद्धः
कायः शिशोर्विकचगन्धफली विलासी ।
संचारिचन्द्रमलयद्रुमसान्द्रपङ्कै-
र्लिप्तः कयाचन चकोरदृशा चकासे ॥ ६० ॥

कयाचन अनिर्दिष्टनाम्न्या चकोरदृशा बलचञ्चुचक्षुषा धात्र्या अन्यस्त्रिया वा क्रीडाकारिण्या संचरतीति सर्वत्र मध्ये प्रसरतीत्येवंशीलः संचारी तादृशश्चन्द्रः कर्पूरो यत्र। 'चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च ॥' इत्यनेकार्थः। एतावता। घनकर्पूरमिश्रितैरित्यर्थः। मलयद्रुमस्य चन्दनतरोः सान्द्रैर्निबिडैः पङ्कैर्द्रवैः लिप्तः अङ्गरागकलितः कृतः। शिशोर्हीरकुमारस्य कायो देहश्चकासे विराजते स्म। 'चकास्ति चञ्चति भासते भ्राजते लसत्यपि शोभते। विलसत्येवमाद्याः स्युर्भ्राजनार्थप्रकाशकाः ॥' इति क्रियाकलापे। कायः किंभूतः। विकचा विकसिता या गन्धफली चम्पकपादपकुसुमं तद्वद्विलसतीत्येवंशीलः। 'इति चम्पकगौरागः कृतां विधोर्गन्धफली बलिश्रियम्' इति नैषधे। क इव। स्वर्णाद्रिशृङ्ग इव। यथा कनकाचलस्य मेरोः शिखरं चन्द्रिकया चन्द्रज्योत्स्नया अनुविद्धो व्याप्तः शोभते। 'भगयुगमथ शृङ्गोद्योगसंघा निदाघः' इति लिङ्गानुशासने शृङ्गशब्दः पुंनपुंसकलिङ्गे ॥

नीलांशुकाकलितबालककामपाल-
　मूर्तेरिवोपमितिमानयितुं कुमारे ।
काचित्कदाचन कुरङ्गमदाङ्गरागं
　कौतूहलेन कुरुविन्ददती ततान ॥ ६१ ॥

कुरुविन्दाः पद्मरागमणयः तद्वद्दशना दन्ता यस्याः सा कुरुविन्ददती। 'को दर्शयेत्स्वां कुरुविन्दमालाम्,' 'चित्ते कुरुष्व कुरुविन्दसकान्तदन्ति' इति च। 'अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च' इति दन्तस्य दद्वा। स्त्रीलिङ्गत्वादीप्।' इति नैषधवृत्तौ पाणिनिसूत्रम्। पदद्वयमपि च नैषधीयम्। काचित्तादृशी धात्री कदाचन कस्मिन्नपि समये कौतूहलेन कुरङ्गमदेन कस्तूरीद्रवेण कृत्वा अङ्गरागमर्थात्कुमाराङ्गे विलेपनं ततान कृतवती। उत्प्रेक्ष्यते। नीलेन अंशुकेन वसनेन कलितस्य आवृतस्य। परिहितनीलवस्त्रस्येत्यर्थः। तथा बालकस्य कुमारावस्थालंकृतस्य कामपालस्य बलभद्रस्य मूर्तेः शरीरस्योपमितिमुपमानं कुमारे स्वाभाविककनककेतकगौरशरीरहीरकुमारे आनयितुम्। प्रदापयितुमिवेत्यर्थः ॥

काचिच्चकोरनयना व्यवहारिसूनो-
　र्वक्त्राम्बुजं विकचनेत्रपुटैर्निपीय ।
चेतस्तमीदयितनिर्मलितात्मदर्श-
　स्मेराब्जदर्शनविधौ शिथिलीचकार ॥ ६२ ॥

काचिदज्ञाताभिधाना धात्री परा वा गता चकोरनयना कामिनी व्यवहारिसूनोः कुंरामहेभ्यनन्दनस्य वक्त्राम्बुजं मुखारविन्दं विकचैर्विकस्वरैर्नेत्रपुटैर्नयनपत्रपुटकैर्निपीय सादरमवलोक्य तमीदयितः पूर्णिमाचन्द्रः। तथा निर्मलितः शाणोत्तेजितः आत्मदर्शः दर्पणस्तथा स्मेराब्जं विकचकमलं तेषां दर्शनविधौ अवलोकनप्रकारे चेतः स्वमनः शिथिलीचकार मन्दीकरोति स्म। पार्वणेन्दुदर्पणपद्मेभ्योऽप्यधिकं यन्मुखमित्यर्थः ॥

एनं हिरण्यमणिभूषणभूषिताङ्ग-
मिभ्याङ्गजं नयनयोरतिथिं प्रणीय ।
सोऽयं स्मरो हरहुताशहतोऽवतीर्ण
एतन्मिषेण समशायि कयाचिदेवम् ॥ ६३ ॥

हिरण्यमणिभूषणैः स्वर्णरत्नालंकारैर्भूषिताङ्गमलंकृतकायमिभ्याङ्गजं कुंराव्यवहारितनयमेनं हीरकुमारं नयनयोरात्मलोचनद्वन्द्वस्य अतिथिं प्राघुणकं प्रणीय कृत्वा । यतः 'नयनातिथिं विधत्ते नेत्रप्राघुणकमातनोत्यपि च,' तथा 'दृग्गोचरीकरोति च लोचनविषयं च निर्माति,' तथा 'दृग्गोचरतां नयति च लोचनविषयत्वं च आनयति' इत्यादिः क्रियाकलापे । कयाचिद्धात्र्या कामिन्या वा एवमनुना प्रकारेण समशायि संशयश्चक्रे । 'नैषधेन समशायि चिराय' इति नैषधे । एवं किम् । हरहुताशहतः । त्रिलोचनेन स्वभालप्रादुर्भूततृतीयलोचनज्वलनज्वालाज्वालितः । अत एव एतन्मिषेण । हीरकुमारव्याजेन एतद्रूपेणेत्यर्थः । गृहीतावतारः आदत्तापरजन्मा सोऽयं प्राक्श्रवणगोचरीकृतः स्मरः काम इव मकरध्वजरूपावतारः । हीरकुमार इत्यर्थः ॥

काचिद्वशा विकचचम्पकसूनशालि-
मालां विलम्बितवती शिशुकण्ठपीठे ।
तस्मिंश्चिकीर्षुरिव कौतुकिनाकिमुक्त-
प्रालम्बिकाङ्किनवकल्पतरूपमानम् ॥ ६४ ॥

काचिद्वशा धात्री परा वा वनिता शिशोर्हीरकुमारस्य कण्ठपीठे विकचानां कुसुमितानां चम्पकानां हेमपुष्पकाणां सूनैः कुसुमैः कृत्वा शालते शोभते इत्येवंशीलां मालां विकसितचम्पककुसुमाकलितहारलतां विलम्बितवती चिक्षेप । स्थापयति स्मेत्यर्थः । उत्प्रेक्ष्यते । तस्मिन् हीरकुमारे कौतुकिना कुतूहलाकलितेन नाकिना केनापि देवेन मुक्ता अवलम्बिता स्थापिता प्रालम्बिका हेमदामदीनारमालिका सुवर्णझुम्बनकमंङ्के कण्ठेऽस्यास्तीति तादृशस्य नवस्य बालकस्य कल्पतरोर्देवद्रुमस्य उपमानं साम्यं चिकीर्षुरिव कर्तुमिच्छुः किमु ॥

चूडामणिस्त्रिभुवनस्य यदेष भावी
चूडामणिं किमिति कापि दधार मूर्ध्नि ।
सूरिश्रियास्तिलकवद्भविता कुमारी
भालेऽपरास्य तिलकं किमतश्चकार ॥ ६५ ॥

यद्यस्मात्कारणात् एष हीरकुमारस्त्रिभुवनस्य त्रैलोक्यस्य चूडामणिरिव चूडामणिः शिरोरत्नं भावी भविष्यति । किंत्प्रेक्ष्यते । इति हेतोः कापि कान्ता धात्री वा अस्य शि-

शोर्मूर्ध्नि मस्तके चूडामणिं शिखारत्नं दधार धृतवती स्थापितवती वा। पुनरयं हीरकुमारः यद्यस्मात्कारणात् सूरिश्रिया आचार्यलक्ष्म्यास्तिलक इव विशेषक इव भविता भविष्यति। किमुत्प्रेक्ष्यते। अपरा धात्री अस्य कुंरानाथीनन्दनस्य अतः कारणात् भाले ललाटे तिलकं कुङ्कुमादिकस्य स्वर्णरत्नमयं भूषणं पुण्ड्रकं चकार रचयामास ॥

तत्कर्णयोर्मणिविनिर्मितकर्णपूर-
द्वन्द्वं कयाचन विलम्बितमुद्दिदीपे।
नित्योदयः कथमभूस्त्वमिदं मुखेन्दुं
प्रष्टुं किमित्युपगतं शशिसूर्ययुग्मम् ॥ ६६ ॥

कयाचन मण्डनकारिण्या धात्र्यान्यया वा स्त्रिया तत्कर्णयोर्हीरकुमारश्रवणयोः अवलम्बित न्यस्तं क्षिप्तं मणिविनिर्मितमर्थात्स्वर्णरजतचन्द्रिकान्तपीतरत्नमयं कर्णपूरद्वन्द्वं कुण्डलयुग्ममुद्दिदीपे। शुशुभे। किमुत्प्रेक्ष्यते। इदं मुखेन्दुमस्य हीरकुमारस्य वदनचन्द्रं प्रति इति प्रष्टुमिवोपगतं समेतं शशिसूर्ययुग्मं चन्द्रदिवाकरद्वयम्। इति किम्। हे हीरमुखेन्दो, त्वं नित्योदयः अहर्निशमभ्युदयोऽस्तराहित्यं यस्य तादृशः कथं केन प्रकारेण अभूः संजातः तत्कारणमावयोर्वद। यथा आवामपि नित्योदयौ भवावः ॥

नेत्रामृताञ्जनमसौ जगतां यदस्या-
नञ्जाक्षिणी किमिति काचन कज्जलेन।
सर्वाङ्गसूत्रमिह धास्यति येन तस्यो-
रःसूत्रिकां किमिति काचिदुरस्यधत्त ॥ ६७ ॥

यत्कारणादसौ हीरकुमारः जगतां त्रिभुवनजनानां नेत्राणां नयनानाममृताञ्जनं सुधाया अञ्जनमिवास्ति भावी वा। किमुत्प्रेक्ष्यते। इति हेतोः काचन मण्डनकारिणी अस्य शिशोः अक्षिणी लोचने कज्जलेन आनञ्ज। पुनर्येन कारणेन असौ बालकः इह हृदये सर्वैः समग्रैरङ्गैराचाराङ्गादिभिरुपलक्षितं सूत्रं सिद्धान्तम्। जातिवाचित्वादेकवचनम्। धास्यति धारयिष्यति। किमुत्प्रेक्ष्यते। इति हेतोः कापि धात्री तस्य हीरकुमारस्य उरसि हृदये उरःसूत्रिकां मौक्तिकजालिकाम्। 'उरःसूत्रिका तु मौक्तिकैः'। देशविशेषप्रसिद्धा बहुसरमुक्ताहारलतां वा अधत्त क्षिपति स्म ॥

पादारविन्दयुगलोपरिलम्बिनीनां
क्वाणै रणज्झणितराजतकिंकिणीनाम्।
वीङ्खाविशेषललितेन मरालबाल-
स्तम्बेरमाविव विगायति यः कुमारः ॥ ६८ ॥

यः कुमारो वीङ्खायाः स्वगमनस्य विशेषेणातिशयस्य ललितेन चारुतया विलासेन

वा। बालशब्दो लालाघण्टान्यायेन उभयत्र संबध्यते। मरालबालस्तम्बेरमौ हंसबालं बालगजं च। उत्प्रेक्ष्यते। विगायति निन्दतीव। कैः। क्वाणैः शब्दैः। कासाम्। रणझण इति शब्दो जात आसु इति। रणत्कारकलिता इत्यर्थः। तादृश्यो राजता रूप्यसंबन्धिन्यः। 'रौप्यघनघर्घटीजर्जरस्वरम्' इति हंसविशेषणं चम्पूकथायाम्। तथाविधाः किंकिण्यः लघुघुर्घुरिकास्तासाम्। किंभूताः। पादारविन्दयोरर्थात्कुमारचरणकमलयोर्युगलं तस्योपरि लम्बन्ते गुणप्रोताः कृत्वा ऊर्ध्वं लम्बायमानाः संजायन्ते। अथवा पदोपरिप्रदेशमाश्रयन्ते इत्येवंशीलाः। चरणोपरिबद्धानामित्यर्थः। इति धात्रीपरिपालनशृङ्गारकरणादि॥

कुंराह्वयस्य हरति स्म मनो मनोज्ञं
तन्मुन्मुनालपनमिभ्यगभस्तिभर्तुः।
किंचिद्विजृम्भियुवभावनवोढबाला-
नातिप्रगल्भकिलकिञ्चितवत्प्रियस्य॥ ६९॥

मनोज्ञं जनमनोहरं तस्य हीरकुमारस्य यन्मुन्मुनालपनमस्पष्टभाषणं तत्कुंरा इति आह्वयो नाम यस्य तादृशस्य इभ्येषु व्यवहारिषु मध्ये तत्पुत्रप्रतापेन कृत्वा भास्कर इव दीप्यमानत्वात् भास्करस्य। सूर्यतुल्यस्येत्यर्थः। मनश्चित्तं हरति स्म। किंचित्किमपि स्तोकमात्रं विजृम्भी प्रकटीभवनशीलो युवभावस्तारुण्यं यस्यास्तथा नवोढा नवपरिणीता बाला वधूस्तस्या नातिप्रगल्भं न अतिशयेन प्रगल्भं परिणतीभूतं नातिचातुर्यं वा किलकिञ्चितं विलासविशेषः। 'लीला विलासो विच्छित्तिर्विब्वोकः किलकिञ्चितम्। मोट्टायितं कुट्टिमितं ललितं विधृतं तथा। विभ्रमश्चेत्यलंकाराः स्त्रीणां स्वाभाविका दश॥' इति हैम्याम्। तद्वत्प्रियस्य भर्तुश्चेतो यथा हरति। 'त्वयि वीर विराजते परं दमयन्तीकिलकिञ्चितं किल' इति नैषधे॥

इक्ष्वाकुवंश इति नाभिमहीमघोना
विश्वप्रशस्यवृषभाङ्कतनूभवेन।
उत्केश इत्युदयवांस्तनयेन तेन
मेने महेभ्यवृषभेण निजान्ववायः॥ ७०॥

महेभ्यवृषभेण कुंराव्यवहारिपुङ्गवेन तेन हीरनाम्ना तनयेन पुत्रेण उत्केश इति नाम्ना निजान्वयः स्ववंशः उदयवानभ्युदयः युद्धे मानितः ज्ञातः। केनेव। नाभिमहीमघोनेव यथा नाभिनरेन्द्रेण विश्वेषां त्रिभुवनजनानां प्रशस्येन श्लाघार्हेण वृषभोऽङ्कः उरुप्रदेशे लाञ्छनं यस्य स वृषभाङ्कस्तेन वृषभदेवनाम्ना तनूभवेन नन्दनेन इक्ष्वाकुनामा वंश उदयवानमानि॥

धात्र्योदितां प्रथमतः पृथुकप्रकाण्डः
कीरस्य शाव इव चारुमुवाच वाचम् ।
तस्याः पुनः समवलम्ब्य कराङ्गुलीः स
लीलायितं वितनुते स्म गतौ स्विकायाम् ॥ ७१ ॥

स पृथुकप्रकाण्डः बालशार्दूलः प्रथमतः पूर्वम् । सार्वविभक्तिकस्तस् । सर्वाभ्योऽपि विभक्तिभ्यस्तस् स्यादित्येके । धात्र्या उपमात्रा उदिताम् उच्चरितां कथितां चारुं मनोहरां वाचं वाणीम् उवाच वक्ति स्म । क इव । कीरस्य शाव इव । यथा शुकस्य बालकः प्रथमतः कथितां चार्वीं मनोज्ञां वाचं वदति । पुनः स कुमारः तस्या धात्र्याः कराङ्गुलीः हस्तस्य तर्जन्यादिका अङ्गुलीः समवलम्ब्य आश्रित्य । गृहीत्वेत्यर्थः । स्विकायामात्मीयायां गतौ गमने लीलायितं लीलया आचरितं चारुचङ्क्रमणविलासं तनुते स्म । लीलागमनमदर्शयदित्यर्थः । हंसं तनौ संनिहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ॥

चूलाक्रियामहमथाङ्गभवस्य तस्य
संतन्वता पुलककोरकितेन तेन ।
श्रीदायितं प्रदिशता मणिहेमजात-
माढ्यायितं समुदयेन च मार्गणानाम् ॥ ७२ ॥

अथ वाग्गमनपाटवभवनानन्तरं पुलकेन रोमहर्षेण कृत्वा कोरकाः कुड्मलाः संजाता अस्येति । 'पुलककोरकिततनुः' इति चम्पूकथायाम् । रोमाञ्चकञ्चुकितेन कुंराव्यवहारिणा तस्य हीरनाम्नोऽङ्गभवस्य स्वपुत्रस्य चूलाक्रियामहं शिखण्डिकाकरणाद्युत्सवं संतन्वता कुर्वता श्रीदायितं धनदेनेवाचरितं वदान्यतातिशयेन । तेन किं कुर्वता । प्रदिशता ददता । किम् । मणयो रत्नानि हेमानि सुवर्णानि तेषां जातं समूहम् । च पुनः मार्गणानां समुदयेन याचकनिकरेण आढ्यायितं स्वाभाविकमहेभ्य इवाचरितम् । ईश्वरीभूतमित्यर्थः॥

शावः शुभैरवयवैः सवितुः प्रयत्ना-
द्वृद्धिं दधावनुदिनं स्वजनैरुपास्यः ।
भूमीभृतो बहलनिर्झरतस्तरङ्गैः
सिन्धुप्रवाह इव पत्त्ररथैर्निषेव्यः ॥ ७३ ॥

शावो हीरकुमारः सवितुस्तातस्य प्रयत्नात् समाहितमार्गितप्रदानपोषणप्रकारात् शुभैः प्रशस्तैरवयवैः अङ्गोपाङ्गैः अनुदिनं निरन्तरं वृद्धिं पुष्टिं दधौ वर्धते स्म । किंभूतः शावः । स्वजनैर्ज्ञातिवर्गमानवैर्निजजनैर्वा उपास्यः कृतसेवनः । क इव । सिन्धुप्रवाह इव । यथा भूमीभृतः पर्वतस्य बहुलादनल्पात् निर्झरतः । सार्वविभक्तिकत्वात्तस्प्रत्ययः । शतशो

निर्झराणां प्रवेशात्तरङ्गैः कल्लोलैः नदीप्रवाहो वृद्धिं धत्ते । किंभूतः सिन्धुप्रवाहः । पत्ररथैर्विहङ्गमैरभिगम्यः खगसेव्यः ॥

वाचस्पतेर्दिवि विधाय सुरान्विनेया-
नुर्व्यां नरानपि विधातुमुपेयुषः किम् ।
वप्रा व्यमोचि पठितुं सविधे द्विजस्य
कस्यापि वाङ्मयविदः समहं कुमारः ॥ ७४ ॥

हीरकुमारः समहं महोत्सवपुरःसरं कस्यापि अनिर्दिष्टनाम्नो द्विजस्य ब्राह्मणस्य सविधे समीपे पठितुमध्येतुं वप्रा कुंराव्यवहारिणा व्यमोचि मुक्तः । किंभूतस्य द्विजस्य । वाङ्मयं शिक्षाकल्पव्याकरणादिशैवशास्त्रं वेत्तीति वाङ्मयवित् तस्य । किमुत्प्रेक्ष्यते । स्वर्गे सुरान् देवान् विनेयान् शिष्यान् विधाय अपि पुनर्नरान् मनुष्यान् अध्यापनादिभिः शिष्यान् विधातुं कर्तुमुर्व्यामवन्यामुपेयुष आगतस्य वाचस्पतेर्बृहस्पतेरिव ॥

तस्यार्भशक्र इव चित्रशिखण्डिसूनो-
र्लब्ध्वोपकण्ठमशठः स पठन्नकुण्ठम् ।
पोतः श्रुतिं स विधिवल्लिपिसंग्रहेण
प्रेम्णा विवेश नगरीमिव गोपुरेण ॥ ७५ ॥

स पोतो हीरकुमारः प्रेम्णा हार्देन हृदयाभिप्रायेण विधिवत् शास्त्रोक्तप्रकारेण लिपेरक्षरात्मिकायाः संग्रहेण आगमनेन । शिक्षणेनेत्यर्थः। श्रुतिं शास्त्रं विवेश प्रविष्टः। शास्त्राभ्यासं कर्तुं प्रारब्धवानित्यर्थः। कामिव । नगरीमिव । यथा कश्चित् बालो गोपुरेण प्रतोल्या कृत्वा पुरीं प्रविशति । पोतः किं कुर्वन् । अशठः सरलाशयः सन् । अकुण्ठं घोषात्यभ्यसनादिना तीक्ष्णं सोत्साहं वा सु अतिशयेनात्मनः सर्वप्रयत्नेन पठन्नधीयमानः । किं कृत्वा । तस्याध्यापकस्य उपकण्ठं लब्ध्वा संप्राप्य । क इव । अर्भशक्र इव यथा बालक इन्द्रः । 'शैशवावधिगुरुर्गुरुरस्य' इति नैषधे । एतेन काव्येन इन्द्रस्य बालत्वं तथा गुरुपार्श्वे अध्ययनमपि प्रोक्तम् । चित्रशिखण्डिसूनोर्बृहस्पतेः । 'विचित्रवाक्चित्रशिखण्डिसूनोः' इत्यपि नैषधे । पार्श्वं प्राप्य पठति ॥

छायां तनोरिव न लङ्घयितापि वाचं
प्रासादि तेन विनयावनतेन सूरिः ।
सर्वैरभावि च गुरोः सफलैः प्रयत्नै-
स्तस्मिन्ननूषरभुवीव कृषीवलस्य ॥ ७६ ॥

तेन हीरकुमारेण सूरिः कलाचार्यः प्रासादि प्रसन्नीकृतः । तेन किंभूतेन । विनयेन अवनतेन नम्रेण । तेन पुनः किं कुर्वता । गुरोः स्वाध्यापकस्य वाचं वाणीम् । वचनमा-

त्रमपीत्यर्थः। नोल्लङ्घयता नातिक्रामता। कामिव। छायामिव। यथा कोऽपि स्वतनोश्छायां नोल्लङ्घयति गुरोस्तस्याध्यापकस्य सर्वैः सकलैः प्रयत्नैरुद्यमैस्तस्मिन् हीरकुमारे सफलैः फलवद्भिरभावि संजातं संपन्नैः। कस्येव। कृषीवलस्येव। यथा कृषिकस्य कर्षणकारिणः अनूषरभुवि सर्वसस्योत्पत्तिस्थानक्षेत्रभूमौ प्रयत्नैः प्रयासैः सफलैर्भूयते॥

तं साक्षिणं प्रणयवान्स्वगुरुं प्रणीय
स्वल्पैर्दिनैः स वहनैरिव धीविशेषैः।
संप्राप पारमखिलागमसागरस्य
साधुः समाधिभिरिवानुपमैर्भवस्य॥ ७७॥

प्रणयः स्नेहो गुरुजनेषु विद्यते यस्य स हीरकुमारस्तं स्वगुरुं निजकलाचार्यं साक्षिणं प्रतिभुवम्। साक्षिमात्रमित्यर्थः। प्रणीय कृत्वा स्वल्पैरतिस्तोकैर्दिनैर्वासरैः अखिलागमसागरस्य समस्तशास्त्रसमुद्रस्य पारं परतीरं प्रान्तं संप्राप लेभे। गृहमेधिवासोचितं सर्वशास्त्रमधीतवानित्यर्थः। कैः। धीविशेषैः स्वप्रज्ञोत्कर्षैः। बुद्धिविशिष्टगुणातिशयैः। कैरिव। वहनैरिव। यथा यानपात्रैः कृत्वा सांयान्त्रिकः समुद्रस्य पारमभिलषितवेलाकूलं प्राप्नोति। अथ पृथगुपमापि। क इव। साधुरिव। यथा यती अनुपमैरसाधारणैः समाधिभिर्ध्यानविशेषैः। 'ध्यानं तु विषये तस्मिन्नेकप्रत्ययसंततिः। समाधिस्तु तदेवार्थमात्राभासनरूपकः॥' इति हैम्याम्। एतावता योगैः कृत्वा भवस्य संसारस्य। 'भवः सत्तात्मजन्मसु। रुद्रे श्रेयसि संसारे' इत्यनेकार्थः। पारं मोक्षणं प्राप्नोति॥

अध्याप्य तेन विधिवत्सकलाः स विद्याः
प्रत्यर्प्यते स्म गुरुणा जनकस्य तस्य।
श्रीमान्मुरारिरिव तेन हिरण्यरत्न-
कोटीर्वितीर्य सुतसूरिरपि व्यधायि॥ ७८॥

तेन गुरुणा कलाचार्येण विधिवत् शास्त्रोक्तप्रकारेण द्विसप्ततिकलानामादिमा कला लिखितगणितादिरन्तिमा कला शकुनरुतमित्युक्तप्रकारेण। अथवा मातृकादिकचाणिक्याङ्क(न्त)पाठैकविधिना सकलाः समस्ता अपि विद्या अध्याप्य पाठयित्वा तस्य कुमारस्य कुंराख्यस्य वा जनकस्य पितुः स हीरकुमारः प्रत्यर्प्यते स्म पश्चादर्पितः। अपि पुनः तेन तज्जनकेन कुंरामहेभ्येन सुतसूरिः स्वपुत्रहीरकुमारस्य कलाचार्यः हिरण्यानां रत्नानां मणीनां कोटीर्बहुशो लक्षशतानि वितीर्य दत्त्वा मुरारिः कृष्ण इव श्रीमान् लक्ष्मीपतिर्व्यधायि विहितः॥

चित्रामिवेन्दुरनवद्यतमां स विद्यां
लब्ध्वा श्रिया तदवधि व्यरुचत्कुमारः।

आसीदसीममहिमाप्यनयार्भकस्य
प्रोल्लेखितस्य निकषेण मणेस्त्विषेव ॥ ७९ ॥

स कुमारः अनवद्यतमाम् अतिशयेन श्लाघनीयां विद्यां लब्ध्वा संप्राप्य तदवधि विद्याधिगमदिवस एवावधिर्मर्यादा यत्रेति क्रियाविशेषणम्। तद्दिनमारभ्येत्यर्थः। श्रिया शोभया लक्ष्म्या वा व्यरुचत् शुशुभे। 'सहस्रधात्मा व्यरुचद्विभक्तः' इति रघुवंशे। क इव। इन्दुरिव। यथा चन्द्रः अनवद्यतमामतिनिर्मुक्तमेघोपरोधां चित्रां त्वाष्ट्रीं नक्षत्रविशेषं प्राप्य श्रिया शारदीनकौमुदीलक्ष्म्या विरोचते। द्युद्भ्यो लुङि द्युतादिभ्यः परस्मैपदं वा स्यात्। 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' श्यन्विकरणपुषादेर्द्युतादेर्ॢदितश्च परस्य च्लेरङ् स्यात् परस्मैपदेषु। अद्युतत्। अद्योतिष्ट। अरुचत्। अरोचिष्ट।' इति प्रक्रियाकौमुद्याम्। अपि पुनस्तस्यार्भकस्य हीरकुमारस्य तया विद्यया कृत्वा न विद्यते सीमा मर्यादा यस्य सः असीमः। अद्वैत इत्यर्थः। तादृशो महिमा माहात्म्यं यस्य तथाविध आसीत् बभूव। कस्येव। मणेरिव। यथा निकषेण शाणेन उल्लेखितस्य उत्तेजितस्य निर्मलीकृतस्य मणे रत्नविशेषस्य त्विषा कान्त्या कृत्वा अनन्यं महत्त्वं मूल्यं महर्घ्यता भवति॥ इति बालक्रीडा॥

नाभीभवेन तदुदाहरणीकृतैः किं
सामुद्रशास्त्रगदितैर्नरलक्षणौघैः।
नालम्भि तत्र कुमरे व्यभिचारिभावः
प्रामाणिकैः सदुपमानविधाविवेह ॥ ८० ॥

नाभीभवेन विधात्रा। किमुत्प्रेक्ष्यते। 'हाराग्रजाग्रद्गरुडाश्मरश्मिपीनाभनाभीकुहरान्धकाराम्' इति नैषधे। नाभीशब्दो दीर्घ ईकारान्तोऽस्तीति। तदुदाहरणीति। स हीरकुमार एव उदाहरणं निदर्शनं दृष्टान्तो येषां ते तदुदाहरणाः। न तदुदाहरणास्तदुदाहरणाः कृतास्तदुदाहरणीकृतास्तैः। समुद्रेण कविना कृतं शास्त्रं ग्रन्थविशेषः। सामुद्रशास्त्रं तत्र गदिताः कथितास्तैर्नराणां मनुष्याणां लक्षणानां स्वस्तिकचक्राङ्कुशादीनामोघैः समूहैस्तत्र कुमरे हीरकुमारे व्यभिचारिभावः परस्परविरोधित्वं नालम्भि न प्राप्तम्। 'कुमारः कुमरोऽपि च' इति शब्दप्रभेदे। अन्यत्रापि चरित्रादौ च। कस्मिन्निव। सदुपमानविधाविव। यथा। इह जगति प्रामाणिकैस्तार्किकैः सति सर्वप्रकारैर्योग्ये विद्यमाने उपमानविधौ अन्यपदार्थस्य सादृश्यीकरणप्रकारे व्यभिचारित्वं न लक्ष्यते॥

तस्याभवल्लवणिमातिशयः स कोऽपि
प्रोत्तारयन्यदुपरि स्थविरः शिवाय।
मुक्ताः क्षिपत्यनुदिनं पवमानमार्गे
ता एव तत्र किमु तारगणा भवन्ति ॥ ८१ ॥

कुमारस्य स कोऽपि अद्वैतवैभवः लवणिमातिशयः लावण्याधिक्यं अभवत् बभूव। स कः। यदुपरि यस्य लावण्यातिशयस्योपरि स्थविरः पितामहः। 'स्थविरः शतानन्दपितामहौकः' इति हैम्याम्। 'प्रवयाः स्थविरो जरन्' इत्यपि हैम्याम्। शिवाय कल्याणकारणाय नित्यं प्रतिवासरं प्रोत्तारयन् उत्तारणं सृजन् न्युञ्छनीकुर्वन्वा मुक्ता मौक्तिकानि पवमानमार्गे आकाशे क्षिपति। किमुत्प्रेक्ष्यते। ता एव मुक्तास्तत्राम्बरे तारगणा ज्योतिर्मण्डलानि भवन्ति संजायन्ते ॥

स्पर्धोदयादिव मिथः प्रवयं सृजद्भि-
　रङ्गैः सचङ्गिमवपुर्विभवेन तेन ।
ईर्ष्यां तमीप्रियतमः प्रणयन्विजित्य
　लक्ष्मच्छलेन मुमुचे किमु लाञ्छयित्वा ॥ ८२ ॥

तेन हीरकुमारेण ईर्ष्याम्। अर्थात् स्ववपुश्चारिम्णा सममसूयाम्। प्रणयन् कुर्वन् तमीप्रियतमः रजनीजानिः चन्द्रः विजित्य। अर्थात्पराभूय। गृहीत्वा वा। किमुत्प्रेक्ष्यते—लक्ष्मच्छलेन लाञ्छनकपटेन लाञ्छयित्वा लाञ्छनं मष्या अभिज्ञानं मुखे कृत्वा मुमुचे नभसि मुक्तः। 'किं नन्दिः किं मुरारिः किमु रतिरमणः किं विधुः किं विधाता' इति धनपालोक्तोपमानादत्र विधोरुत्प्रेक्षा। तेन किम्। अङ्गैः शरीरावयवैः कृत्वा सह चङ्गिम्ना मनोहरत्वेन वर्तते यत्तादृशस्य वपुषः शरीरस्य विभवः शोभातिशयो यस्य। अथ वा वपुर्विभवेति साधनेन जित्वेति। किं कुर्वद्भिरङ्गैः। इवोत्प्रेक्ष्यते—मिथः परस्परं स्पर्धायाः संघर्षस्य उदयात् प्रादुर्भावादिव प्रवयं पुष्टिं सृजद्भिर्विदधद्भिः ॥

केशोच्चयः स्फुरति यस्य स नीलकण्ठ-
　पृष्ठे प्रविष्ट इव येन जितः कलापः ।
आबाल्यतः कुटिलता मनसोपनीता
　यं भेजुषी पुनरिवैत्य कचच्छटासु ॥ ८३ ॥

तस्य कुमारस्य स चामरादिप्रतिपक्षलक्षजित्वरः प्रसिद्धः केशोच्चयः केशपाशः। 'बालाः स्युस्तत्पराः पाशो रचना भार उच्चयः। हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकः ॥' इति हैम्याम्। स्फुरति भासते। स कः। येन केशोच्चयेन जितः अभिभूतः कलापः शिखण्डिकम्। उत्प्रेक्ष्यते—नीलकण्ठः शंभुर्मयूरश्च तस्य पृष्ठे प्रविष्टः शरणे गत इव। पुनर्येन कुमारेण आबाल्यतः शैशवं मर्यादीकृत्य मनसः स्वचित्तात् कुटिलतावक्रत्वम् अपनीता निष्कासिता सती। उत्प्रेक्ष्यते—उपेत्यागत्य यं कुमारं कुटिलता कचच्छटासु कुन्तलावलीषु भेजुषीव श्रितवतीव। 'तटान्तविश्रान्ततुरङ्गमच्छटा' इति छटाशब्दः समूहवाची नैषधे। तथा 'वक्रोक्तिकुशलस्य तस्य [नलस्य] केशकलापोऽपि वक्रतां भेजे' इति चम्पूकथायाम्। इति पुरुषाणां केशकलापे वक्रता वर्णितास्तीति ॥

स्वध्यानलोपभवकोपपिनाकिजाग्र-
दातङ्कशङ्कितमनः सुमनःशरस्य ।
त्यागं तनोर्विदधतः कृतवान्विधाता
छत्रेण यस्य किमु मौलिमवाङ्मुखेन ॥ ८४ ॥

विधाता ब्रह्मा यस्य कुमारस्य मौलिं मस्तकं कृतवांश्चक्रे । किमुत्प्रेक्ष्यते—स्वस्येश्वरसंबन्धिनो ध्यानस्य एकाग्रमनस्त्वेन परमात्मस्वरूपचिन्तनरूपस्य प्रणिधानस्य लोपेन भङ्गेन कुमारिकावस्थायां पाणिग्रहणकरणकृते सेवार्थं समागतायां गौर्यां विषये रागोत्पादनलक्षणविघ्नविधानेन पञ्चमी वा सर्वत्रभवः समुत्पन्नः कोपः व्यापादनकारणक्रोधो यस्य तादृग्विधात् पिनाकिनः शंभोर्जाग्रता प्रकटीभवता आतङ्केन भयेन । 'भयं भीर्भीतिरातङ्कः' इति हैम्याम् । शङ्कितं स्वहननलक्षणशङ्कां प्राप्तं मनो यस्य तथाविधस्य । अतएव प्रतिपक्षपराभवात्प्रागेव तनोः स्वदेहस्य त्यागं विनाशं विदधतः कुर्वतः सुमनःशरस्य पुष्पबाणस्य कामस्य अवाङ्मुखेन अधोवक्त्रेण छत्रेण किमु कृतवान् । निःस्वामिकतया मदनश्वेतातपत्रोपादानं युक्तमेव ॥

उत्तुङ्गभावमथ वर्तुलतां दधान-
मुष्णीषमस्य सुषमां स बिभर्ति मौलौ ।
यस्मिन्समाजिगमिषोस्तरुणत्वलक्ष्म्या
माङ्गल्यकुम्भ इव केशरुहाश्रिताङ्कः ॥ ८५ ॥

अस्य कुमारस्य मौलौ मूर्धनि उष्णीषमाकारविशेषः सुषुमां सातिशायिशोभां बिभर्ति स्म दधार । 'सोष्णीषमूर्धा ध्वजचिह्नपाणिः' इति चम्पूकथायां नलविशेषणम् । अत एव तीर्थकृद्भ्य इतरेषामप्युत्तमपुरुषाणामुष्णीषं वर्ण्यते । उष्णीषं किं कुर्वाणम् । दधानं बिभ्राणम् । कम् । उत्तुङ्गभावम् उन्नतत्वम् । अथ पुनर्वर्तुलतां वृत्ताकारत्वं च । इवोत्प्रेक्ष्यते—यस्मिन्हीरकुमारे समाजिगमिषोः सम्यक्प्रकारेण आगन्तुकामायास्तरुणत्वलक्ष्म्या यौवनश्रियः केशा एव रुहा दुर्वा । 'दुर्वा त्वनन्ता शतपर्विका । हरिताली रुहा' इति हैम्याम् । ताभिराश्रित आकलितः अङ्क उत्सङ्गे यस्य तादृशो माङ्गल्यः कल्याणकारी कुम्भः कलश इव ॥

यश्चन्द्रिकाङ्कितचतुर्द्विजराजराज-
द्बालार्धशीतमहसो वहते स्म शश्वत् ।
शुद्धाशयोऽमृतरसायितवाग्विलासो
द्वासप्ततिः कलयतात्स कलाः कथं न ॥ ८६ ॥

यो हीरकुमारः शश्वन्निरन्तरं चन्द्रिकया ज्योत्स्नया अङ्कितान् कलितान् । 'दशनच-

न्द्रिकया व्यवभासितम्' इति रघौ। इति चन्द्रिकाशब्देन दन्तद्युतिश्चन्द्रिका च। चतुः-संख्याका द्विजानां राजानो द्विजराजा राजदन्ताश्चन्द्रश्च तथा राजत् दीप्यमानं यद्भालं ललाटमेवार्धशीतमहाः सामिसोमस्तान्। सार्धचतुश्चन्द्रानित्यर्थः। वहते स्म दधार। स कुमारो'द्वासप्ततिसंख्याकाः कलाः कथं न कलयतात् धत्ताम्। अपि तु सार्धचतुश्च-न्द्रधारी गणनया द्वासप्ततिकलाकलित एव स्यात्। किंभूतः। शुद्धो निर्मलः निष्पापः विशदश्च आशयश्चित्तं मध्यं च यस्य। पुनः किंभूतः। अमृतरसवत्सुधानिस्यन्द इवा-चरितो वाग्विलासो वचनवैचित्री यस्य। चन्द्रा अपि श्वेता अमृतयुताश्च स्युः॥

भालस्थलप्रसृमरांशुपयःप्रवाहो-
　　पान्तप्ररूढलतिकेव विभाति यद्भ्रूः।
शङ्खोऽप्यभूद्वदनवारिजपार्थिवस्य
　　चन्द्रादिवैरिविजये किमु वादनार्हः॥ ८७॥

यद्भ्रूर्यस्य कुमारस्य भ्रूर्नयनयोरुपरि रोमपद्धतिर्भाति स्म रराज। उत्प्रेक्ष्यते—भा-लस्थलस्य ललाटपट्टस्य प्रसृमरा विस्तरणशीला ये अंशवः किरणास्त एव पयःप्रवाहः सलिलानामोघस्तस्योपान्ते तटप्रदेशे प्ररूढा प्रोद्गता लतिका। अथवा फलिनी वल्ली स्वभावलतिका वा। अपि पुनर्यद्वक्त्रे शङ्खः भालश्रवणयोरन्तराले कश्चित् प्रदेशविशेषः अभूज्जज्ञे। 'शङ्खः कम्बौ निधिभेदे स्यान्नख्यामलिकास्थनि' इत्यनेकार्थः। ललाटप्रान्त-वर्तिनि अस्थनीति तदवचूर्णिः।'शङ्खो भालस्रवोऽन्तरे' इति हैम्याम्। उत्प्रेक्ष्यते—वद-नमर्थात् कुमारमुखमेव वारिजानां कमलानां राजा पार्थिवस्तस्य। चन्द्रादीनां विधुदर्प-णप्रमुखाणां वैरिणां शत्रूणां विजये जयप्राप्तौ पराभवनावसानसमये वा वादनस्य पूर-णस्य अर्हो योग्यः शङ्खः कम्बुः किमु। विजयिराजानो हि रिपून्निर्जित्य स्वविजयसूचकं शङ्खं वादयन्तीति प्राक्तननृपरीतिः। यथा—स्वाविनयकरणप्रकुपितमतङ्गतापसप्रदत्त-मतङ्गजीभवनशापापनयनप्रादुर्भूतस्वाभाविकस्वरूपप्रसन्नीभवद्गान्धर्वदेवविश्राणितप्रयुक्त-संहारविभक्तमन्त्रप्रस्वापनशस्त्रानुभावपराभूतसमस्तप्रतिपक्षक्षितिपतिपताकिनीप्रारब्ध-दुर्धरमहायोधनपयोनिधिमध्यसमुद्भूतविजयश्रीस्वीकरणावसरे अजकुमारः 'ततः प्रियो-पात्तरसोऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः' इत्येतत्सर्वविस्तारो रघुवंशे॥

लावण्यनीरनयनाब्जयदीयवक्त्र-
　　कासारपालिरिव कर्णयुगं विभाति।
द्वीपेषु सूचयति किं स्वमितेषु भावि-
　　श्लोकं शिशोः श्रवणयोश्च नवद्वयाङ्कः॥ ८८॥

कर्णयुगं कुमारश्रवणयुगं विभाति शोभते। उत्प्रेक्ष्यते—लावण्यं ममोज्ञता स्वरूप-सौन्दर्यं वा एव नीरं सलिलं यत्र तथा नयने लोचने एवाब्जे कमले यत्र तादृशस्य

यदीयवक्त्रकासारस्य कुमारसंबन्धिवदनसरसः पालिः सेतुरिव सरसो जलरुन्धनस्थानं पालिः । 'सेतौ पाल्यालिसंवराः' इति हैम्याम् । च पुनः श्रवणयोः कर्णयोर्नवानां नवेति संख्यानां द्वयस्य युगलस्य अङ्कः अष्टादशसंख्यावाची अङ्को लिपिविशेषः स्वेन नवद्वयलक्षणेनात्मना मितेषु प्रमाणीकृतेषु अष्टादशसु द्वीपेषु ।'अष्टादशद्वीपनिखातयूपः' इति रघुवंशे।'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे। इति द्वीपानामष्टादशतापि । शिशोर्हीरकुमारस्य भाविनमग्रे भविष्यन्तं श्लोकं यशः सूचयति कथयति किमु । कर्णयोराकृतिरूपो नवाङ्को दृश्यते । यथा 'कर्णान्तरुत्कीर्णगभीरलेखः किं तस्य सख्यैव न वा नवाङ्कः' इति नैषधे । एतावता हीरकुमारयशोऽष्टादशद्वीपेषु भविष्यतीति सूचा ॥

विद्वेषिभावमपहाय परस्परेण
केशच्छटास्फटिकहाटककुण्डलाङ्गाः ।
स्वर्भाणु[1]शुभ्रकिरणाम्बुजबन्धवोऽमी
यस्मिन्विधातुमिव साप्तपदीनमीयुः ॥ ८९ ॥

यस्मिन्कुमारे सम्यक्स्थाने केशच्छटा केशपाशः स्फटिकं श्वेतरत्नं तथा हाटकं काञ्चनं तयो रचनाविशेषेण सदृशीकृते कुण्डले कर्णाभरणे ते अङ्गानि कायारूपाणि वा येषां तादृशा अमी प्रत्यक्षलक्षाः । स्वर्भाणू राहुः, शुभ्रकिरणश्चन्द्रः, अम्बुजबन्धुर्भास्करः, राहुचन्द्रार्काः । उत्प्रेक्ष्यते—मिथः परस्परं साप्तपदीनं मैत्र्यं सौहार्दम् । 'सख्यं तु सौहृदं सौहार्दं साप्तपदीनम्' इति हैम्याम् । विधातुं कर्तुम् ईयुरागता इव । किं कृत्वा । परस्परेण अन्योन्येन विद्वेषिभावं विरोधिताम् अपहाय त्यक्त्वा ॥

सक्तः श्रुतौ शिशुशशी यदसावितीव
तच्चक्षुषी श्रुतियुगं परिषस्वजाते ।
नीलोत्पले उदयतः कुमुदोर्यदाक्ष्णो-
र्लक्ष्मीं तदा तरलतारिकयोः श्रयेते ॥ ९० ॥

यद्यस्मात्कारणादसौ अयं वर्ण्यमानः शिशुषु कुमारेषु दृश्यमानो नयनानामाह्लादकत्वात् शशी चन्द्र इव शिशुशशी श्रुतौ शास्त्रे सक्तः प्रह्व आसक्तोऽस्ति । उत्प्रेक्ष्यते—इति हेतोस्तच्चक्षुषी कुमारलोचने श्रुतियुगं श्रवणयामलं परिषस्वजाते आलिङ्गतः स्म । च पुनर्यदा यदि नीलोत्पले कुवलये कुमुदोः कैरवयोर्मध्ये उदयेते उद्गमं लभेते तदा तरले चपले तारिके कनीनिके ययोस्तादृशयोस्तदक्ष्णोः कुमारलोचनयोर्लक्ष्मीं श्रियं शोभां श्रयेते भजेते । कुमुदे कुमारलोचनतुलामाकलयतः ॥

---

१. 'पूर्वपदात्संज्ञायाम्' इति हैमाभिधानचिन्तामणिः. 'क्षुभ्नादित्वान्न णत्वम्' इति नामालिङ्गानुशासनव्याख्यानामाशयः.

दृग्दोषखण्डनकृते भ्रमरं तदीये
चिह्नं मषेरिव मुखे कृतवान्विरञ्चिः ।
विश्वप्रदीपसदृशो यदसौ तदीया
नासापि किं भजति दीपशिखोपमानम् ॥ ९१ ॥

विरञ्चिर्ब्रह्मा तदीये हीरकुमारसंबन्धिनि मुखे वदने भ्रमरं कुरलं भ्रमरालकः अन्यो वा आकारविशेषस्तं कृतवान् चकार। उत्प्रेक्ष्यते—दृग्दोषखण्डनकृते शाकिन्यादीनामितरेषां वा दृष्टिदोषनिवारणार्थं मषेर्मलिनाम्बुनः । 'मलिनाम्बु मषी मसी' इति हैम्याम्। चिह्नं लाञ्छनमिव कृतवानिति । इदानीमपि बालकानां दृग्दोषच्छिदे मुखे कज्जलचन्द्रकं मातरः कुर्वन्तीति प्रसिद्धमेतत् । पुनर्यत्कारणादसौ विश्वे जगति प्रदीपस्य पदार्थसार्थप्रकाशकत्वेन गृहमणेः सदृशस्तुल्योऽस्ति यत्तदोः संबन्धात्तेन हेतुना । उत्प्रेक्ष्यते—तदीया तस्य कुमारस्य इयं तदीया नासा गन्धज्ञापि दीपशिखोपमानं कज्जलध्वजकलिकातुलनां भजति कलयति ॥

चापल्यकेलिकलिते असिताशये य-
न्नेत्रे मिथः सदृशवैभवभाजिनी तत् ।
मा द्रुह्यतां कजभुवेति तदन्तराले
नासानिभेन विदधे किमु सीमदण्डः ॥ ९२ ॥

यत्कारणात् यन्नेत्रे कुमारनयने चापल्यं चपलता सैव केलिः क्रीडा तया कलिते युक्ते चञ्चलतया वा यत्क्रीडनमितस्ततः परिस्फुरणं तेन सहिते । पुनः असितः श्याम आशयो मध्यं स्वभावो वा ययोस्तादृशे स्तः वर्तेते तत्तस्मात्कारणात् सदृशं तुल्यं वैभवं शोभातिरेकं भजत इत्येवंशीले भाजिनी कुमारलोचने मिथः परस्परं मा द्रुह्यतां मा द्रोहं कुर्वाताम् इति हेतोः कजभुवा ब्रह्मणा तदन्तराले तयोर्नेत्रयोरन्तराले मध्यभागे नासानिभेन नक्रकपटेन । उत्प्रेक्ष्यते—सीमदण्डो विभागयष्टिः किमु विदधे कृत इव ॥

स्थाणोः शिरोनिवसनानशनाम्बुपानं
संतप्य दुस्तपतपो मणिदर्पणेन ।
प्रापे परं जनुरिवेदमगण्यपुण्य-
संप्रापणीयमदसीयकपोलरूपम् ॥ ९३ ॥

मणिदर्पणेन रत्नादर्शेन अस्य कुमारस्य इमौ अदसीयौ कपोलौ गण्डौ तयो रूपं स्वरूपमिदं प्रत्यक्षम् । उत्प्रेक्ष्यते—परमन्यज्जनुरवतारः प्रापे प्राप्तमिव । किंभूतं जनुः । अगण्येन गणयितुं प्रमाणीकर्तुमशक्येन पुण्येन भाग्येन संप्रापणीयं सम्यक्प्रकारेण लब्धुं योग्यम् । किं कृत्वा । दुःखेन कष्टेन तप्यते विधीयते इति दुस्तपं तादृक् तप

उपवासादिकष्टं संतप्य तप्त्वा यथाविधि[ना] विधाय । किम् । तपः । 'स्थाणुः स्तम्भकीलकशंभुषु' इत्यनेकार्थः । तस्य शिरसि मस्तके निवसनं सदा स्थितिस्तथा न विद्यते अशनं भोजनम्, अम्बुनो जलस्य पानं धीतिर्यत्र । 'धीतिः पानेऽथ शोषणम्' इति हैम्याम् ॥

यस्य प्रशस्ययशसः श्रुतिपाशमध्य-
निष्पातिनक्रशुकचञ्चुपुटात्कथंचित् ।
बिम्बीफलं विगलितं स्खलितं च वक्र-
पद्मोदरे किमु रदच्छदनीबभूव ॥ ९४ ॥

बिम्बीफलं गोल्हकं यस्य कुमारस्य उत्प्रेक्ष्यते । रदनच्छदनीबभूव किमु अधरः संजात इव । किंभूतम् । कथंचित्केनापि प्रकारेण बलात्कारेण वा स्वबन्धनभयाकुलितत्वेन विगलितं निष्पतितम् । कस्मात् । श्रुती कर्णावेव पाशौ बन्धनग्रन्थी तयोर्मध्ये निष्पातितो निष्पतनशीलस्य नक्रशुकस्य नासिकारूपकीरस्य चञ्चुपुटात् श्टपाटिकासंपुटतः । वक्त्रोदरादित्यर्थः । पुनः किंभूतं बिम्बीफलम् । स्खलितं पतित्वा स्थितम् । कस्मिन् । वक्त्रं वदनमेव पद्मं कमलं तस्योदरे मध्ये यस्य । किंभूतस्य । प्रशस्यं विश्वश्लाघनीयं यशः कीर्तिर्यस्य ॥

रक्ताङ्करक्तमणिपल्लवपाटलश्री-
पाटच्चरो यदधरः श्रियमश्नुते स ।
आस्थानवेदिरिव वाङ्मयदेवताया
आवासवेश्मनि कुमारमुखारविन्दे ॥ ९५ ॥

यदधरो हीरकुमारस्यौष्ठः श्रियं शोभामश्नुते व्याप्नोति । बिभर्तीत्यर्थः । किंभूतः । रक्ताङ्का विद्रुमाः रक्तमणयः पद्मरागाः पल्लवाः किशलयानि तेषां पाटलश्रियो भावप्रधाननिर्देशाद्रक्तत्वलक्ष्म्याः स्वभावशोभाया वा पाटच्चरस्तस्करः अपहर्ता । उत्प्रेक्ष्यते—अधरः वाङ्मयदेवतायाः श्रीसरस्वत्याः आस्थानवेदिः सभायामुपवेशनार्थं वेदिकेव । कस्मिन् । कुमारस्य मुखमेवारविन्दं कमलं तत्र । किंभूते कुमारमुखारविन्दे । आवासवेश्मनि । वाग्देवताया आवासार्थं निवसनकृते वेश्मनि गृहे । कुमारवदनारविन्दरूपे मन्दिरे निवसन्त्या इत्यर्थः ॥

अभ्युद्गतैर्मुखखनेरिव वज्ररत्नै-
र्दन्तैरदीप्यत कुमारपुरंदरस्य ।
वक्त्राब्जधाम्न इव वा श्रुतदेवतायाः
सेवासुखानुभवनागतगौरपत्रैः ॥ ९६ ॥

कुमारेषु बालकेषु रूपेण श्रिया वा पुरंदर इव पुरंदरस्तस्य दन्तैर्दशनैरदीप्यत शुशुभे । उत्प्रेक्ष्यते—मुखखनेर्वदनाकरादभ्युद्गतैः प्रकटीभूतैर्वज्ररत्नैर्हीरकमणिभिरिव । वाथवा उत्प्रेक्ष्यते । वज्राब्जधाम्नः कुमारवदनकमलमेव धाम मन्दिरं यस्यास्तादृश्याः श्रुतदेवतायाः सरस्वत्याः सेवया अर्थात् तद्वाहनत्वात्स्वस्वामिन्या उपासनया कृत्वा यत्सुखं तस्यानुभवनार्थं तद्वा प्राप्तुमागतैः समकालं समेतैर्गौरपत्रैः राजहंसैरिव ॥

विम्बाधरे निपतिताभिरभासि यस्य
निर्धौतमौक्तिकशुचिद्विजचन्द्रिकाभिः ।
कॢप्तेन्दुदर्पणपयोजजये कृताभि-
र्नाभीभुवेव सुमवृष्टिभिरेतदास्ये ॥ ९७ ॥

यस्य कुमारस्य निर्धूतानि उत्तेजितानि यानि मौक्तिकानि तानीव शुचिभिरुज्ज्वलाभिर्द्विजानां दन्तानां चन्द्रिकाभिर्ज्योत्स्नाभिरभासि निर्बभे । किंभूताभिश्चन्द्रिकाभिः । निपतिताभिः आगत्य स्थिताभिः । कस्मिन् । बिम्बाधरे गोल्हकतुल्ये ओष्ठे । उत्प्रेक्ष्यते—एतदास्ये कुमारवक्त्रे नाभीभुवा नारायणनाभ्यम्भोरुहजन्मना वेधसा कृताभिः कुसुमवृष्टिभिरिव । कदा । कॢप्ताभिर्निर्मितो य इन्दोश्चन्द्रस्य दर्पणानामादर्शानां पयोजानां पद्मानां जयः परस्परविरोधाद्युद्धे पराभवः तत्र । तत्समय इत्यर्थः । 'नाभीमथैष श्लथवाससोऽनु' इति नैषधे नाभीशब्दो दीर्घोऽप्यस्ति ॥

पूर्णामृतैररुणरत्नमनोज्ञमध्या
पङ्क्तीभवद्विजविराजिसवेशदेशा ।
यस्याननान्तरनिकेतनवाक्त्रिदश्या
वापीव खेलनकृते रसना बभासे ॥ ९८ ॥

यस्य कुमारस्य रसना जिह्वा बभासे रेजे । उत्प्रेक्ष्यते—आननमर्थात्कुमारवदनं तस्यान्तरं मध्यं तत्र निकेतनं सदनं यस्यास्तादृश्याः वाक्त्रिदश्या भारत्याः खेलनकृते जलक्रीडार्थं वापी दीर्घिकेव । किंभूता वापी । अमृतैः पीयूषैः सलिलैश्च पूर्णामृतमध्या । पुनः किंभूता वापी । अरुणरत्नैः पद्मरागमणिभिः मनोज्ञं रमणीयं बद्धं रचितं मध्यं यस्याः । मध्यमलोपीसमासः । पुनः किंभूता । पङ्क्त्या श्रेण्या भवद्भिर्वितिष्ठमानैर्द्विजैर्दन्तैर्विहंगमैश्च । अर्थात् विशदतया राजहंसपक्षिभिः विराजी शोभनशीलः सवेशदेशः समीपविभागो यस्याः । वापी अपि जलाकीर्णा रत्नबद्धमध्या विहंगमकलिता च स्यात् ॥

पूज्येषु रञ्जितमना यदसौ कुमार-
स्तस्य स रज्यत इतीव रसज्ञयापि ।

शुद्धाशयस्य दशनैरिव धार्यते स्म
श्रीमत्कुमारवृषभस्य विशुद्धिमत्ता ॥ ९९ ॥

तस्य कुमारस्य रसज्ञया जिह्वया । उत्प्रेक्ष्यते—इति रज्यते स्म रक्तीभूतमिव । इति किम् । यत्कारणादसौ कुमारः पूज्येषु गुर्वादिषु अभ्यर्चनीयेषु विषये रङ्गितं रागयुक्तं जातं मनश्चित्तं यस्य तादृग्वर्तते । 'रङ्गः स्यान्नृत्ययुद्धवो रागेऽपि' इत्यनेकार्थः । पुनः शुद्धाशयस्य शुद्धो निर्मलो निष्पाप आशयश्चित्तं मध्यं च यस्य श्रीमतो लक्ष्म्या शोभया वा शालिनः कुमारेषु बलवत्तया धर्मकर्मादिषु धुरीणतया वा वृषभ इव वृषभः प्रशस्यो वा तस्य दशनैर्दन्तैरपि विशुद्धिमत्ता अत्यौज्ज्वल्यं धार्यते स्म धृता ॥

रक्ताङ्कपल्लवमुखान्द्विषतो जिगीषु-
र्धत्तेऽसिकं किमधरः सविधेऽदसीयः ।
भावी शिशुर्भुवि यदेष सुवृत्तशाली
भेजे तदस्य चिबुकोऽपि सुवृत्तभावम् ॥ १०० ॥

अदसीयः कुमारसंबन्धी अधरः ओष्ठः असिकम् अधराधःप्रदेशविशेषं धत्ते धारयति । उत्प्रेक्ष्यते—रक्ताङ्कपल्लवमुखान् विद्रुमकिसलयादिमान् द्विषतो वैरिणो जिगीषुर्जेतुमिच्छुः किम् । असिकं असिरेव असिकः । स्वार्थे कः । स्वं खड्गं बिभर्ति । अन्योऽपि वीरो रिपून् निर्जेतुं करवालं कलयति यत्कारणाद्भुवि पृथिव्यामेष शिशुर्बालकः सुवृत्तेन शोभनाचारेण शालते शोभते इत्येवंशीलो भावी । तत्कारणादस्य कुमारस्य चिबुकोऽपि असिकाधःप्रदेशोऽपि सु शोभनं वृत्तमाचारो यत्र । तादृशं भावमाशयं सदाचारतां वा । वास्तवार्थे तु शोभनवर्तुलतां भेजे सिषेवे । 'तत्प्रान्तौ सृक्किणी असिकं त्वधः । असिकाधस्तु चिबुकम्' इति हैम्याम् ॥

द्वात्रिंशताजनि रदैरपि लक्षणानि
द्वात्रिंशदाकलयतः शिशुवासवस्य ।
पीयूषवर्षिसितरोचिरसूययान्त-
र्वाग्भिः सुधामिव ववर्ष मुखं तदीयम् ॥ १०१ ॥

करचरणयोश्छत्रचामरादीनि द्वात्रिंशत्संख्याकानि लक्षणानि आकलयतः बिभ्रतः । लक्षणानि यथा—'छत्रं तामरसं धनू रथवरो दम्भोलिकूर्माङ्कुशा वापी स्वस्तिकतोरणानि च सरः पञ्चाननः पादपः । चक्रं शङ्खगजौ समुद्रकलशौ प्रासादमध्या यवा यूपस्तूपकमण्डलून्यवनिभृत्सच्चामरो दर्पणः ॥ उक्षा पताका कमलाभिषेकः सुदामकेकी घनपुण्यभाजाम्' इति षट्पदी । अथवा 'इह भवति सप्तरक्तः षडुन्नतः पञ्चसूक्ष्मदीर्घश्च। त्रिविपुललघुगम्भीरो द्वात्रिंशल्लक्षणः स पुमान् ॥' इति । शिशुषु महर्धिकत्वेन वासवस्य शक्रतुल्यस्य दन्तैर्वदनदशनैरपि द्वात्रिंशता द्वात्रिंशत्संख्याकैरजनि संजातम् । उत्प्रेक्ष्यते—

द्वात्रिंशत्त्वे स्पर्धयेव इति गर्भितोत्प्रेक्षा। पुनस्तदीयं कुमारसंबन्धि वदनं वाग्भिर्वाणीभिः कृत्वा सुधां पीयूषं ववर्ष वर्षति स्म। उत्प्रेक्ष्यते—पीयूषममृतं वर्षतीत्येवंशीलस्तस्य सितरोचिषश्चन्द्रस्य अन्तश्चित्तमध्ये असूयया ईर्ष्ययेव सुधामवर्षत्॥

उद्धृत्य कण्टकगणान्किमु वारिजन्म
किं वात्मदर्शमपहृत्य विचेतनत्वम्।
संतक्ष्य लक्ष्मशितिमानमुतामृतांशुं
राजीवभूरकृत हीरकुमारवक्त्रम्॥ १०२॥

राजीवभूर्वेधाः किमु इति वितर्कयामि विचारं कुर्वे। 'वितर्के किमूत च' इति हैम्याम्। वारिजन्म विकसितकमलम्। अर्थादादाय। कर्मद्वयं वा। कृधातोर्द्विकर्मकत्वेन हीरनाम्नः कुमारस्य वक्त्रं मुखमकृत विरचयांचकार। किं कृत्वा। कण्टकानां गणान् व्रजानुद्धृत्य निष्कास्य। 'शशिनि खलु कलङ्कं कण्टकाः पद्मनाले जलधिजलमपेयं पण्डिते निर्धनत्वम्। दयितजनवियोगो दुर्भगत्वं स्वरूपे धनपतिकृपणत्वं रत्नदोषी कृतान्तः॥' इति सूक्तवचनात् पद्मे कण्टकाः। वा अथवा विचेतनत्वं चेतनाराहित्यम् अपहृत्य अज्ञानतां मुषित्वा आत्मदर्शं दर्पणं किमादाय, हीरमुखं चक्रे। उत अथवा लक्ष्मणो लाञ्छनस्य शितिमानं कृष्णतां संतक्ष्योत्तार्य किम् अमृतांशुं सुधाकरं हीरवदनं विधिर्विदधे॥ इति मुखम्॥

निःशेषभूवलयकुण्डलिवेश्मनाकि-
लोकत्रिके प्रसृमरैर्यशसां विलासैः।
रेखा भविष्यति महत्सु यदस्य कण्ठे
रेखात्रिकं किमिति निर्मितवान्विधाता॥ १०३॥

विधाता ब्रह्मा अस्य कुमारस्य कण्ठे गलकदले। उत्प्रेक्ष्यते—इति हेतो रेखात्रिकं निर्मितवान् किमु कृतवानिव। इति किम्। यत् निःशेषं समग्रं भूवलयं मेदिनीमण्डलम्, तथा कुण्डलिनां नागानां वेश्म गृहं पातालम्, तथा नाकिनां देवानां लोको विश्वं स्वर्गस्तेषां त्रिके त्रयेऽपि प्रसृमरैः प्रतिस्थानं विस्तरणशीलैर्यशसां कीर्तीनां विलासैर्वैचित्रीभिरस्य हीरकुमारस्य महत्सु उत्तमजनेषु रेखा भविष्यति। एतस्मात्परः कोऽप्येतादृग्गुणगणकलितस्त्रिभुवनेऽपि नास्तीति प्रसिद्धिर्भाविनी॥

भावी यदेष वृषवज्जिनधर्मधुर्यः
स्कन्धोऽप्यभूत्किमिति तत्ककुदोपमेयः।
अर्भः पुरा भवति येन युगप्रधानो
जज्ञेऽस्य बाहुरपि तेन युगप्रधानः॥ १०४॥

यत्कारणादेष कुमारः वृषवद्वृषभ इव जिनस्यार्हतो धर्मे सुकृतकर्मणि धुर्यो धौरेयो धुरंधुरो भावी भविष्यति। इति हेतोः अस्य कुमारस्य स्कन्धोऽप्यंसोऽपि। उत्प्रेक्ष्यते— तस्य वृषभस्य ककुदेनांसकूटेन उपमेय उपमातुं योग्यः । किमभूद्बभूव। च पुनर्येन कारणेन अर्भो हीरकुमारो युगे कलिकाले विशिष्टातिशयमाहात्म्याभ्युदयात् प्रधानः प्रकृष्टः पुरा भवति अग्रे भविष्यति। पुरायोगे भविष्यदर्थे वर्तमाना 'यावत्पुरानिपातयोर्योगे लट्' आभ्यां निपाताभ्यां योगे भविष्यत्काले वर्तमाना स्यादिति प्रक्रियाकौमुद्याम् । 'पुरेदमूर्ध्वं भवतीति वेधसा' इति नैषधेऽपि । तेन हेतुना । उत्प्रेक्ष्यते— अस्यार्भकस्य बाहुर्भुजोऽपि युगवद्धूसरवत्प्रधानो व्यायतः आजानुबाहुत्वात् जज्ञे संजातः॥

उद्दामदुर्गतिपुरेऽर्गलतांगमी य-
त्तद्दोरितीव लभतेऽर्गलयोपमानम् ।
यस्येभशङ्खमकरान्कलयन्प्रवाल-
शाली पुनः श्रियमसूत शयः समुद्रः ॥ १०५ ॥

यत्कारणात्कुमारः उद्दाममनेकलोकानामातङ्ककारत्वादुत्कटम् । 'अबाधोच्छृङ्खलोद्दामान्ययन्त्रितमनर्गलम्' इति हैम्याम् । उच्छृङ्खलं यद्दुर्गतिर्नरकादिकुगतिः सैव पुरं नगरं तत्रार्गलतां परिघभावम् । 'द्वारेषु परिघोऽर्गला' इति हैम्याम् । अयं गमी गमिष्यति । 'यथा विदूराद्रिरदूरतांगमी' इति नैषधे । ये जनाः अमुं सं सम्यक् त्रिधा सेविष्यन्ते तां दुर्गतिं गन्तुं न दास्यत्यसौ तत इदं विशेषणम् । उत्प्रेक्ष्यते—इतीव हेतोः । तस्य कुमारस्य दोर्बाहुदण्डोऽपि अर्गलया नगरपरिघेण उपमानं सादृश्यं लभते प्राप्नोति । 'अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता' इति नैषधे । पुनर्यस्य सह मुद्रिकया उर्मिकया साक्षराङ्गुलीयकेन वा वर्तते यः समुद्रः शयः पाणिः श्रियं शोभामसूताजीजनत् । किं कुर्वन् । दधत् । कान् । कृतिभाजः रेखाकारीभूतान् इभा गजाः, शङ्खाः कम्बवः, मकरा यादोविशेषाः, तान् । पुनः किंभूतः । प्रवालाः पल्लवास्तद्वत् शालते रक्तत्वेन सुकुमारत्वेन शोभते इत्येवंशीलः समुद्रोऽपि जलगजवारिजमकरकलितस्तथा विद्रुमविभ्राजी लक्ष्मीं सूते च इत्युत्प्रेक्षा । उपमा वा ॥

तस्य स्फुरद्द्युतिपयःपरिपूर्णबाहु-
मूलालवालविलसद्भुजगण्डिभाजः ।
रेजुः शयावनिरुहोऽङ्गुलयोऽनुशाखाः
कामाङ्कुशैः किसलयैरिव शालमानाः ॥ १०६ ॥

तस्य कुमारस्याङ्गुलयः करशाखा रेजुः शुशुभिरे । नु इति अव्ययं वितर्के विचारे प्रश्ने पृच्छायां वा । शयावनिरुहः पाणिरूपपादपस्य शाखाः शिखाः । किंभूतस्य शयावनिरुहः । स्फुरन्त्यो दीप्यमाना विस्तरन्त्यो वा द्युतयः कान्तय एव पयांसि स-

लिलानि तैः परिपूर्णं सामस्त्येन पूरितं व्याप्तं बाहुमूलं भुजकोटरः स एवालवालं स्थानकं तत्र विलसन्नाश्लिष्यन् । 'लस श्लेषणक्रीडनयोः' इति धातुः । अर्थात् प्रकटीभवन् यो भुजो बाहुः स एव गण्डिः प्रकाण्डं मूलात् शाखावधिप्रदेशः तं भजतीति । किंभूताः शाखाः । कामाङ्कुशैर्नखैः शालमानाः । उत्प्रेक्ष्यते—किसलयैः पल्लवैरिव । अत्र गर्भितोत्प्रेक्षा ॥

जानुस्पृशौ शिशुभुजौ विनियन्त्रणाय
पाशाविवाब्धिदुहितुस्तरलाशयायाः ।
हस्तौ समस्तकजराजतयाप्यमुष्या
धात्राक्षतैरिव यवैः समपूजिषाताम् ॥ १०७ ॥

शिशुभुजौ कुमारबाहू जानू ऊरुपर्वणि स्पृशत इति जानुप्रलम्बौ अभूताम् । उत्प्रेक्ष्यते—तरलश्चपलः आशयश्चित्तं स्वभावो वा यस्यास्तादृश्या अब्धिदुहितुर्लक्ष्म्या विनियन्त्रणाय विशेषेण बन्धनाय एकत्रावस्थितिनिर्मापणाय पाशौ बन्धनग्रन्थी इव । अपि पुनः । अमुष्य कुमारस्य करौ हस्तौ धात्रा ब्रह्मणा अक्षतैरखण्डैर्यवैः समपूजिषाताम् अर्चिताविव । समस्तानि सकलानि यानि कजानि कमलानि तेषां राजत्वेन स्वामितया आकृत्या तत्सेव्यत्वेन आधिपत्यम् ॥

वक्षःशिलाकलितमञ्जुलजातरूपो
नक्षत्रभूषिततनुश्च नभोगयुक्तः ।
स्वःशाखिरुङ्महिमधीरिमराजमानः
शावः सुपर्वशिखरीव पुपोष भूषाम् ॥ १०८ ॥

शावः हीरकुमारः सुपर्वशिखरी मेरुरिव भूषां शोभां पुपोष । शुशुभे इत्यर्थः । किंभूतः शावः मेरुश्च । वक्षो हृदयं तदेव विस्तीर्णत्वात्तदुपमेयत्वाच्च शिला पृथुलप्रस्तरः तया कलितः युतः, तथा मञ्जुलं मनोज्ञं जातमुत्पन्नं रूपं तनुवैभवः सुवर्णं च यस्य पश्चात्कर्मधारयः । पुनः किंभूतः । न निषेधे क्षत्रियत्वेन राजन्यतया । 'क्षत्रं तु क्षत्रियो राजा राजन्यो बाहुसंभवः' इति हैम्याम् । तथा—'क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः' इति रघौ । वणिग्जातित्वात् । नक्षत्रैर्ज्योतिश्चक्रैर्भूषिता अलंकृता तनुर्वपुर्यस्य । पुनः किंभूतः । न नैव भोगेन वैषयिकसुखेन बालत्वाद्राज्यादिसुखेन वा व्यवहारित्वाद् युतः । पक्षे—नभसि आकाशे गच्छन्तीति नभोगा विद्याधराः सुराश्च तैः कलितः तेषां क्रीडास्पदत्वात् । च पुनः स्वःशाखिनः कल्पवृक्षास्तद्वत्तेषां वा रुक् कान्तिर्यस्य यत्र वा । पुनः किंभूतः । महिम्ना माहात्म्येनाग्रे भविष्यता । भाविनि भूतोपचारात् । धीरिम्णा स्वाभाविकेन धैर्येण अग्रेऽपि उदेष्यता धीरत्वेन देवदानवमानवप्रभुविभीषिकायामपि निश्चलत्वात् शोभमानः ॥

प्रामाण्यमस्य वहतो महतां सदस्य-
प्रामाण्यमाश्रयदुरस्तदिहास्ति चित्रम् ।
श्रीवत्स उल्लसति तस्य पुनः स वक्षः
स्थायी गभीरिमविलोकनकौतुकीव ॥ १०९ ॥

इह जगति । तदिति कर्तृपदम् । चित्रमाश्चर्यं विस्मयोऽस्ति यदस्य उरो हृदयमप्रामाण्यं प्रमाणातीततामतिविशालतामनुपादेयतामाश्रयत्सेवते स्म । अस्य किं कुर्वतः । महतां महात्मनां सदसि सभायाम् । समूहे इत्यर्थः । 'उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती' इति नैषधे । परिषद्शब्दः समूहवाची प्रामाण्यं यथार्थवादितां मुख्यतां वा यदयं वक्तयाचरति । सन्मार्गे तदस्माकं महतां प्रमाण एवेति प्रमाणतां वहतो बिभ्रतः । पुनस्तस्य कुमारस्य श्रीवत्सः उत्तमपुरुषाणां हृदयमध्ये कश्चिदाकारविशेषः । उल्लसति शोभते । उत्प्रेक्ष्यते—स श्रीवत्सः गभीरिम्णः अर्थात्कुमारस्य गाम्भीर्यस्य विलोकने विभावने कौतुकं कौतूहलमस्त्यस्येति कृत्वा वक्षसि गाम्भीर्याश्रये हृदये तिष्ठत्येवंशीकः स्थायी बभूवेव ॥

सान्द्रीभवत्तनुविभाभरनिर्झरिण्याः
सावर्तशोण इव नाभिरमुष्य रेजे ।
वक्षःस्थलेन विपुलेन सहाभ्यसूया-
माबिभ्रतीव कटिरप्यभवद्विशाला ॥ ११० ॥

अमुष्य कुमारस्य नाभिस्तुन्दकूपिका रेजे भाति स्म । उत्प्रेक्ष्यते—सान्द्रीभवन्नीरन्ध्रो जायमानो यस्तनोर्वपुषो विभाभरः कान्तिसमूहः स एव निर्झरिणी नदी तस्याः सहावर्तेन पयोविभ्रमविशेषेण युक्तः शोणः ह्रद इव । अपि पुनरमुष्य कटिः श्रोणिर्विशाला विस्तीर्णा अभूद्बभूव । उत्प्रेक्ष्यते—विपुलेन विशालेन वक्षःस्थलेन हृदयेन सह सार्धमभ्यसूयामीर्ष्यां बिभ्रती दधानेव ॥

कार्कश्यसंहृतिलघूकृतहस्तिहस्ता-
वूरू कृताविव शिशोर्नलिनासनेन ।
स्थम्भोपमो जिनमतावसथे स भावी
स्थम्भोपमां किमिति तस्य बिभर्ति जङ्घा ॥ १११ ॥

नलिनासनेन वेधसा कार्कश्यस्य कठिनतायाः संहृत्या संहरणेनापनयनेन कृत्वा लघू अल्पौ ह्रस्वौ कृतौ यौ हस्तिनः करिणः हस्तौ शुण्डादण्डौ । उत्प्रेक्षते—शिशोः कुमारस्य ऊरू सक्थिनी कृतौ निर्मिताविव । पुनस्तस्य कुमारस्य उत्प्रेक्ष्यते—इति हेतोः किमु जङ्घा स्थम्भोपमां स्थूणासादृश्यं बिभर्ति । इति किम् । यत्स हीरार्भः जिनमतमर्हच्छासनमेवा-

वसथः सौधं तस्मिन् तद्धारधरणेन स्थम्भोपमः स्थम्भस्य तुल्यः भावी भविष्यति । यथा स्थम्भो गृहाधारभूतो भवति, तथायमपि श्रीजिनशासनस्याधारभूतो भविता । 'वज्रस्तम्भाविवैते' इति जिनशतके जङ्घायाः स्थम्भसादृश्यम् ॥

स्पर्धोदयान्निजविवृद्धिकृतौ यदूरू
जङ्घे पुनः सरसिजन्मभुवा विभाव्य ।
तद्द्वन्द्वविग्रहनिषेधविधिप्रभूष्णु-
सीमाकरं विरचितं किमु जानुयुग्मम् ॥ ११२ ॥

स्पर्धायाः परस्परं संहर्षस्य उदयादाविर्भावान्निजनिजयोरात्मात्मनोर्विशेषेण वृद्धिमुपचयं कुरुतः सृजत इति निजविवृद्धिकृतौ यस्य कुमारस्य ऊरू पुनरर्थात्कुमारजङ्घे विभाव्य दृष्ट्वा सरसिजभुवा विधिना । उत्प्रेक्ष्यते—तयोर्द्वन्द्वयोर्युगलयोर्विग्रहस्य मिथः कलहस्य निषेधविधौ निवारणप्रकारे प्रभूष्णुः समर्थम् । अत एव सीमाया अवधेर्विभागस्य करं विधायकं जानुयुग्मं विरचितं कृतम् ॥

शुश्रूषयासनतयानिशमाप्रसादा-
ल्लब्ध्वा प्रसन्नमनसो वरमात्मयोनेः ।
विश्वाङ्ककारविजयप्रभविष्णुलक्ष्मि
स्मेराम्बुजन्म किमु यत्पदतामवाप ॥ ११३ ॥

स्मेराम्बुजन्म विकचकमलम् । उत्प्रेक्ष्यते—यत्पदतां कुमारस्य चरणत्वम् । पादावतारमित्यर्थः । किमवाप लभते स्मेव । किंभूताम् । विश्वेषु जगत्सु ये अङ्ककारा जैत्रप्रतिमल्लाः स्वश्रीपरिस्पर्धिनः । 'संकीर्णशंकरशशाङ्ककलाङ्ककारैः' इति नैषधे । तेषां विजये प्रभविष्णुः समर्था लक्ष्मीर्यस्यास्ताम् । किं कृत्वा । वरं स्वाभिलषितवाचं लब्ध्वा प्राप्य । कस्मात् । आत्मयोनेर्विधातुः । किंभूतात् । प्रसन्नं प्रसादोपेतं हृष्टं मनो हृदयं यस्य । कया । आप्रसादात् प्रसादं मर्यादीकृत्य अनिशं निरन्तरमासनतया विष्टरभावेन शुश्रूषया । 'सेवा भक्तिः परिचर्या प्रसादना । शुश्रूषाराधनोपास्तिः वरिवस्यापरिष्टयः ॥' इति हैम्याम् । आसनीभूय प्रसादसमयं यावन्नित्यं सेवां विधाय ॥

यत्पादपङ्कजयुगाङ्गुलिभिः स्वकीय-
लक्ष्म्या पराभवपदं गमिताः प्रवालाः ।
दुःखादिव द्रुमशिखाशिखरान्तरेषु
तित्यक्षवस्तनुलतां निजमुद्बबन्धुः ॥ ११४ ॥

प्रवालाः पल्लवा द्रुमाणां वृक्षाणां शिखास्तासां शिखराणि अग्राणि तेषामन्तरेषु मध्येषु । उत्प्रेक्ष्यते—निजमात्मानम् । 'श्रुत्वा निजं भीमजया निरस्तम्' इति नैषधे । निज-

शब्देनात्मा उत् ऊर्ध्वं बबन्धुः बध्नन्ति स्म। स्वं पाशपतितं कुर्वते स्मेत्यर्थः। किं कर्तुमिच्छवः। तित्यक्षवः त्यक्तुमिच्छवो विहातुं कामाः। कस्मात्। दुःखात्। काम्। तनुलतां स्वशरीरयष्टिम्। किंभूताः प्रवालाः। पराभवपदमभिभूतिस्थानं गमिताः प्रापिताः। कया। स्वकीयया आत्मीयया लक्ष्म्या श्रिया शोभया वा। काभिः। यत्पादपङ्कजयुगाङ्गुलिभिः यस्य कुमारस्य पादौ चरणाविव पङ्कजे पद्मे तयोर्युगलं द्वन्द्वं तस्याङ्गुलीभिः पदशाखाभिः॥

कामद्विपेऽङ्कुश इवोद्भवितायमेव
कामाङ्कुशैः किमिति सूचयति स्म वेधाः।
रत्नं यदेष भुवि सूरिभरेषु भावी
रत्नश्रियं किमु पुनर्निदधे स तेषु॥ ११५॥

वेधा ब्रह्मा एतस्य कुमारस्य कामाङ्कुशैरिति नामभिर्नखैः। 'कामाङ्कुशो महाराजकरजो नखरो नखः' इति हैम्याम्। उत्प्रेक्ष्यते—इति सूचयति स्म किम्। लोकपुरः कथयति स्मेव। इति किम्। यदयं हीरकुमारः कामद्विपे स्मरहस्तिनि विषये अङ्कुशः सृणिरिवोद्भविता प्रादुर्भविष्यति। सर्वथापि दुर्दमं मदनं यौवनेऽप्येष दमिष्यतीत्यर्थः। पुनः स ब्रह्मा तेषु कामाङ्कुशेषु। उत्प्रेक्ष्यते—इति हेतोः। अत्र इतिशब्दः पूर्वपदादेव ग्राह्यः। एककाव्यत्वात्। रत्नश्रियं माणिक्यलक्ष्मीं निदधे स्थापितवान्। इति किम्। यदेष कुमारो भुवि पृथिव्यां सूरिभारेष्वाचार्यव्रजेषु रत्नं माणिक्यमिव भावी भविष्यति। 'नगीनो' इति प्रसिद्धः॥

यन्मूर्तिदीधितिझरेषु किमु प्ररोहा
रोमाणि कामपि रमां कलयांबभूवुः।
ईदृग्विधा वयमिहैव न चापरत्र
वक्तुं गुणैः किमिति यत्रकृताः स्वरेखाः॥ ११६॥

रोमाणि यस्य लोमलेखाः कामप्यसाधारणीं रमां श्रियं कलयांबभूवुः धारयन्ति स्म। उत्प्रेक्ष्यते—यस्य कुमारस्य मूर्तिः शरीरं तस्य दीधितयः परितः प्रसरत्कान्तयः ता एव झरा निर्झरप्रवाहास्तेषु हस्तपहृदयादिबहुङ्गत्वाद्बहुवचनम्। तेषु प्ररोहा नीलतृणाङ्कुराः किमु। पुनर्यत्र कुमारे औदार्यधैर्यगाम्भीर्यादिगुणैः उत्प्रेक्ष्यते। इति वक्तुं किमु जनानां पुरः कथयितुमिव स्वाः स्वाः सरूपाणामेकशेषे एक एव स्वशब्दस्तिष्ठति रेखा लघुरूपाः कृताः किमु इति किम्। यत् ईदृशी विधा प्रकारो येषाम् अनन्यसामान्यमाहात्म्येन सकललोकचेतश्चमत्कारिणस्तादृशा वयं सर्वेऽपि गुणा इहैव हीरकुमारे एव स्मो वर्तामहे, च पुनर्नापरत्र अपरस्मिन् स्थाने। एवंविधा वयं सर्वथापि न स्मः॥

स्कन्धोपधेः ककुदढौकनकं विधाय
यस्माच्छिशोर्गतिरशिक्षि ककुद्मतेव ।
अभ्यस्यते गतिरिवास्य गतानुकार-
कामेन विन्ध्यविपिनेष्वपि हास्तिकेन ॥ ११७ ॥

यस्मात् हीरनाम्नः शिशोः कुमारात्। उत्प्रेक्ष्यते—ककुद्मता वृषभेन गतिर्गमनमशिक्षि शिक्षितेव । किं कृत्वा । स्कन्धोपधेरंसकपटात्ककुदस्य नैचिकशिरसः ढौकनकं प्राभृतं विधाय कृत्वा । अपि पुनर्गजव्रजेन विन्ध्यस्य जलवालकशैलस्य विपिनेषु काननेषु गह्वरेषु वा । उत्प्रेक्ष्यते—गतिर्मन्थरगमनविलासः अभ्यस्यते अभ्यास इव क्रियते । शिक्ष्यते वा । किंभूतेन हास्तिकेन । अस्य कुमारस्य गतस्य विलासेन मन्थरत्वेन वा गमनस्य अनुकरणमनुकारः सदृशीभवनं तत्र कामोऽभिलाषो यस्य तेन ॥

लिप्ता द्रवैरिव विलीनहिरण्यराशेः
संकल्पितेव नवगन्धकलीदलैर्वा ।
किं रोचनाभिरथ वा रचिता सिताब्ज-
गर्भैरिवाथ घटितास्य तनुश्चकाशे ॥ ११८ ॥

अस्य कुमारस्य तनुः शरीरं चकाशे दिदीपे । उत्प्रेक्ष्यते—विलीनस्य खादिराङ्गाराग्निगालितस्य हिरण्यस्य राशेः कनकनिकरस्य द्रवै रसैः लिप्यते स्मेति लिप्ता दिग्धेव । वा अथवा नवैः सद्यस्कैर्नवीनैर्गन्धकलीदलैश्चम्पककलिकापत्रैः । 'न षट्पदो गन्धकलीमजिघ्रत्' इति सूक्ते । संकल्पितेव विरचितेव । अथ वा पक्षान्तरे रोचनाभिर्गोरोचननामगोपित्तविशेषद्रव्यैः किमुत्प्रेक्ष्यते—रचिता निर्मितेव । अथ पुनः सिताब्जानां विकचकमलानां गर्भैरन्तर्वर्तिसारदलैर्घटिता कल्पितेव ॥ इति हीरकुमारसर्वाङ्गवर्णनम् ॥

तस्मिन्पदं प्रविदधे गुणधोरणीभिः
सर्वाभिरर्णव इवार्णववर्णिनीभिः ।
आलोक्यते स च कदाचन नैषदोषै-
र्दोषातनैरिव तमोभिरभीश्रुमाली ॥ ११९ ॥

तस्मिन् हीरकुमारे सर्वाभिः समस्ताभिरौदार्यधैर्यादिगुणधोरणीभिः पदं स्थानं प्रविदधे कृतम् । कस्मिन्निव । अर्णव इव । यथा सर्वाभिरर्णववर्णिनीभिः समुद्रपत्नीभिर्नदीभिरर्णवे जलनिधौ पदं स्थानं प्रविधीयते । च पुनरेष कुमारः दोषैरपगुणैः कदाचन कस्मिन्नपि समये न आलोक्यते स्म न दृष्टः । क इव । अभीश्रुमालीव यथा भास्वान् दोषातनै रात्रिजातैस्तमोभिरन्धकारैर्नालोक्यते न प्रेक्ष्यते ॥

स्वस्पर्धिनः शरभवप्रमुखानशेषा-
न्कान्त्या विजित्य विजयीव निजप्रतीपान् ।
स व्यानशे विसृमरैः स्वयशोभिराशा-
देशान्मिलत्परिमलैरिव पुष्पकालः ॥ १२० ॥

स हीरकुमारः विसृमरैः प्रसरणशीलैः स्वस्यात्मनो यशोभिः कीर्तिभिः आशादेशान् दिग्विभागान् व्यानशे व्याप्नोति स्म । क इव । पुष्पकाल इव । यथा वसन्तर्तुः मिलद्भिः परस्परं सङ्गं कुर्वद्भिः परिमलैः विकसितविविधविशेषजातितरुलतोल्लसत्कुसुमसंभवैरामोदैर्दिशां प्रदेशान् व्यश्नुते । किं कृत्वा । शरभवप्रमुखान् प्रतीपान् विजित्य पराजित्य । किंभूतान् । स्वेनात्मना सह श्रिया स्पर्धनशीलान् । क इव । विजयीव यथा जैत्रः । सर्वत्रापि जयवान् राजा समस्तान् प्रतिपक्षान् परिभूय विस्तरन् स्वयशोभिः सर्वाशा व्याप्नोति ॥

भूषाशनिस्फुरितशक्रधनुः समुद्य-
द्धाराङ्कितश्च जलमुक्श्रितजैनपादः ।
युक्तं यदा स सघनः कमलोदयेन
चित्रं तदेव सुदिनेन यदत्र जज्ञे ॥ १२१ ॥

कमलोदयेन लक्ष्म्या अभ्युद्गमेन प्रादुर्भावेन घनो दृढ आस बभूव । अथ च कमलानां पानीयानामागमेन मेघो भवति । किंभूतः स मेघश्च । भूषाणामाभरणानामशनिभ्यो वज्ररत्नेभ्यः स्फुरितानि प्रकटीभूतानि शक्रधनूंषि इन्द्रचापचक्राणि यत्र । 'वृता विभूषा मणिरत्नकार्मुकैः' इति नैषधे । तथा 'एतान्युल्लसन्मणिमयूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि' इति चम्पूकथायाम् । भूषाशब्दो भूषणवाची । 'न भूषयैषाधिचकास्ति किं तु सा' इति नैषधे । भूषणैः कृत्वा एषा अधिका न चकास्तीति तद्वृत्तिः । तथा समुद्यता दीप्यमानेन हारेण मुक्ताकलापेन अङ्कितः कलितः । भूषायाः शोभायाः कारिणी अशनिर्विद्युद्यत्र । तथा प्रकटीभूतमिन्द्रधनुर्यत्र । तथा समुद्यन्त्यो निष्पतन्त्यो धारा जलवृष्टयस्ताभिरङ्कितः । पुनः किंभूतः । डलयोरैक्यात् जडानज्ञान् अज्ञानभाजो वा मुञ्चन् दूरं त्यजन् । घनस्तु जलानि पानीयानि वर्षन् । पुनः किंभूतः । श्रित आश्रितः जिनस्यार्हतो विष्णोश्च अयं जैनः पादश्चरणः तीर्थकृत्पादौ विष्णुपदं च येन एतद्युक्तमुक्तम् । परं तदेव चित्रमाश्चर्यमासीत् । यदत्र कुमारे सुदिनेन शासनदिवसेन जातं जज्ञे । घने मेघे तु दुर्दिनेन जायते ॥ इति कुमारगुणलक्षणभूषणादिवर्णनम् ॥

क्रीडञ्जयन्त इव यज्ञभुजां कुमारैः
पौराङ्गजैः सह वयोविभवानुरूपैः ।

कालक्रमेण परिवर्तमसौ दिनानां
श्रीमत्कुमारमघवा गमयांबभूव ॥ १२२ ॥

असौ हीरनामा श्रीमत्सु धनाढ्येषु शोभावत्सु वा कुमारेषु अपरिगृहीतकलत्रेषु मघवा सर्वोत्कृष्टविभूत्याधिक्यादिन्द्रः कालक्रमेण समयपरिपाट्या दिनानां दिवसानां परिवर्तं क्षेपम् । अतिक्रमणमित्यर्थः । गमयांबभूव अतिवाहयति स्म । वासरानतिक्रामति स्मेत्यर्थः । किं कुर्वन् । क्रीडन् खेलन् नानाविधबाललीलां कलयन् । कथम् । सह कैः सह । पौराङ्गजैर्नागरिककुमारैः । किंभूतैः । वयो यादृक्षं हीरकुमारस्य वयः बाल्यशेषरूपं तथा विभवो द्रव्यं तयोरनुरूपैः कथंचित्सदृशैः । क इव । जयन्त इव । यथा पुरंदरनन्दनो जयन्तः यज्ञभुजां देवानां कुमारैः पुत्रैः समं क्रीडति ॥

तस्यानुजो गजगतेः शतकोटिपाणेः
श्रीपाल इत्यजनि विष्णुरिवाद्रिदस्योः ।
द्वे अग्रजे स्म भवतः पुनरस्य जामी
राणी परा च विमला कमलानुरूपे ॥ १२३ ॥

तस्य हीरकुमारस्य श्रीपाल इति नाम्ना अनुजो लघुभ्राता अजनि संजातः । तस्य किंभूतस्य । गजगतेः गजवन्मत्तगजराज इव गतिर्गमनं यस्य । पुनः किंभूतस्य । शतं शतशः कोटयः द्रव्याणां शतलक्षाः पाणौ हस्ते यस्य शतैर्मिता वा कनककोटयो हस्तप्राप्या यस्य तदधिपत्वात् । कस्येव । अद्रिदस्योरिव । यथा गजेनार्थादैरावणेन गमनं प्रस्थानं यस्य तथा शतकोटिर्वज्रं पाणौ यस्य तादृशस्य अद्रिदस्योः पर्वतरिपोरिन्द्रस्य विष्णुः कृष्णनामा लघुसहोदरो जज्ञे । किंभूतः । श्रियं लक्ष्मीं भर्तृत्वेन पालयतीति श्रीपालः । कुमारोऽप्याकृत्या वज्रपाणिः । पुनः कुमारस्य द्वे उभे जामी भगिन्यौ भवतः स्म संजाते । किंभूते । अग्रजे ज्येष्ठे वृद्धे । द्वे के । एका 'राणी', च पुनः परा अन्या विमला इति नाम्नी द्वे । किंभूते । कमलाया रूपश्रिया लक्ष्म्या अनुरूपे सदृशे ॥

कृत्वा विलासमवनीवलये यथेच्छं
सोत्कण्ठयोर्विलसितुं सुरसद्मनीव ।
पित्रोरथ त्रिदशपद्मदृशां क्रमेण
दृग्गोचरं गतवतोर्भजतोः समाधिम् ॥ १२४ ॥

कृत्वौर्ध्वदेहिकमसौ विधिना विधिज्ञो
वंश्यैर्निजैः सह चिरस्य निरस्य शोकम् ।
उत्कः कदापि मिलितुं विमलां स्वजामिं
जज्ञे महेभ्यकलभो जयवज्जयन्तीम् ॥ १२५ ॥

अथानन्तरं कदापि कस्मिन्नपि समये असौ वर्ण्यमानः महेभ्यस्य कुंराव्यवहारिणः कलभः कुमारः। इभाद्गजाद्भव इभ्यः कलभः यथा कुले भवः कुल्यस्तथायमपीति। विमलां नाम्नीं निजभगिनीं मिलितुमुत्कण्ठित उत्सुको जज्ञे जातः। किंवत्। जयवत्। यथा जयो वासवसूनुः जयन्तीं स्वजामिं शक्रपुत्रीं मिलितुमुत्कण्ठावान् भवति। किं कृत्वा। चिरस्य चिरकालेन शोकं प्रेमबन्धाज्जातं परितापं निरस्य त्यक्त्वा। शोकहेतुमाह—किं कृत्वा। कृत्वा विधाय। किम्। और्ध्वदेहिकं परलोकगमनदिवसे दानजलाञ्जलिप्रमुखम्। कयोः। पित्रोः स्वजननीजनकयोः। कथम्। सह। कैः। वंश्यैर्गोत्रिभिः। किंभूतैः। निजैरात्मीयैः। केन। विधिना यथोक्तलोकप्रकारेण। असौ किंभूतः। विधिमाचारं जानातीति विधिज्ञः। पित्रोः किं कुर्वतोः। समाधिं धर्मध्यानं भजतोः सेवमानयोः। पुनः किंभूतयोः। गतवतोः प्राप्तवतोः। कम्। दृग्गोचरं नयनविषयम्। कासाम्। त्रिदशानां देवानां पद्मदृशां स्त्रीणां देवाङ्गनानाम्। स्वर्गतयोरित्यर्थः। केन क्रमेण। आयुःपर्यन्तसमयपरिपाट्या। उत्प्रेक्ष्यते—सुरसद्मनि देवलोके विलसितुं क्रीडितुं सोत्कण्ठयोः सह उत्कण्ठया वर्तेते यौ तौ तादृशयोरिव। औत्सुक्ययुक्तयोरित्यर्थः। किं कृत्वा। अवनीवलये भूमण्डले विलासं भोगोपभोगादिक्रीडां निर्माय। कथम्। यथेच्छं स्वाभिलाषपूरणपर्यन्तम्। कुमारावस्थायामपि तस्य शौण्डीर्यातिशयं दर्शयितुं कलभशब्दग्रहणम्। कलभस्त्रिंशदब्दकः॥

गन्तुं ततः स्पृहयता प्रति पत्तनं स्व-
भृत्येन तेन सतुरङ्गयुगः शताङ्गः।
आनाय्यते स्म नमुचेर्दमनेन जम्बू-
द्वीपं विमानमिव पालकनिर्जरेण॥ १२६॥

ततो भगिनीमिलनोत्कण्ठानन्तरं तेन हीरकुमारेण कर्त्रा स्वभृत्येन निजसेवकेन कृत्वा शताङ्गो रथ आनाय्यते स्म आनायितः। किंभूतः शताङ्गः। सह तुरङ्गयोरश्वयोर्युगेन युगलेन वर्तते यः सः। तेन किं कुर्वता। पत्तनमणहिल्लनाम पुटभेदनं गन्तुं प्रस्थातुं स्पृहयता इच्छता। केनेव। नमुचेर्दमनेनेव। यथा नमुचिनामा दैत्यविशेषस्तस्य हन्त्रा पुरंदरेण जिनेन्द्राणां जन्मादिकल्याणकेषु महोत्सवकरणार्थी जम्बूद्वीपं प्रति गन्तुमिच्छता पालकनाम्ना निर्जरेण पालकाख्यं विमानमानाय्यते॥

तं पारियानिकमसावधिरुह्य भूमी-
मार्गे नभस्वदतिपातिरथाश्ववाह्यम्।
हैमं शताङ्गमथ सारथिना सनाथं
पाथोजपाणिरिव नाकिपथे प्रतस्थे॥ १२७॥

अथ जामिमिलनोत्कण्ठया अनुसेवकपार्श्वे रथानयनानन्तरम् असौ कुमारः भूमी-

मार्गे पृथ्वीपथे प्रतस्थे प्रचलितः । किं कृत्वा । तं प्राक् सेवकेनानायितं पारियानिकमध्वरथमधिरुह्य अध्यास्य । किंभूतं पारियानिकम् । नभस्वन्तं वायुम् अर्थाद्वायुवेगमतिपतति अतिक्रामतीत्येवंशीलो वातादप्यधिको रयो वेगो ययोस्तादृशाभ्यामश्वाभ्यां तुरङ्गाभ्यां वाह्यम् वहनयोग्यम् । पुनः किंभूतम् । सारथिना सूतेन सनाथं सहितम् । पुनः किंभूतम् । हैमं स्वर्णमयम् । क इव । पाथोजपाणिरिव । यथा भास्वान् सुवर्णसंबन्धिनं स्यन्दनमाश्रित्य नाकिपथे गगने प्रतिष्ठते । सूर्यरथस्यापि विशेषणानि वायुरंहोविजयि वेगवाजि वहनीयं काञ्चनमयमरुणसारथियुक्तं च पाथोजे कोकनदे इवारुणौ मृदुलौ च सुकुमारौ पाणी हस्तौ यस्येति कुमारस्यापि विशेषणम् ॥

कालं कियन्तमुदयान्तरितं तपस्या-
　साम्राज्यसंग्रहविधौ प्रविलम्बमानः ।
संप्राप्य पत्तनमसौ मुदितः स्वजामे-
　श्चौलुक्यवद्भवनभूमिमलंचकार ॥ १२८ ॥

असौ हीरकुमारः पत्तनमणहिल्लपुरं संप्राप्य आसाद्य मुदितो हृष्टः सन् स्वजामेः स्वभगिन्याः भवनभूमिं गृहभूमिमलंचकार भूषयति स्म । किंवत् । चौलुक्यवत् । यथा कुमारपालः पत्तनमागत्य प्रमुदितः स्वभगिन्या गेहमलंकृतवान् । किं कुर्वाणः । प्रविलम्बमानः प्रविलम्बं विदधानः कालक्षेपं निर्मिमाणः । कं कर्मतापन्नम् । कियत्परिमाणमस्येति कियान् तं कियन्तं कालं कियत्समयं यावत् किंकालम् । उदयः सूरिपदलक्षणो महोदयः अन्तरितः अन्तरं व्यवधानं संजातमत्रेत्यन्तरितः । कस्मिन् । तपस्या दीक्षा सैव साम्राज्यं सकललोकैश्वर्यं तस्य संग्रह उपादानं तस्य विधौ प्रकारे । चौलुक्यस्यापि गुर्जरमण्डलराज्यसंग्रहे ॥

तं जङ्गमं त्रिदशसालमिव स्वपुण्य-
　प्राग्भारमङ्गिनमुतागतमात्मधाम्नि ।
दृष्ट्या निवातसरसीजसगर्भया स्वं
　बन्धुं निपीय विमला मुमुदे हृदन्तः ॥ १२९ ॥

तं हीरकुमारं स्वबन्धुं निजसहोदरं दृष्ट्या नयनेन निपीय सादरमवलोक्य विमला विजयसिंहमहेभ्यमहिला हृदन्तर्मनोमध्ये मुमुदे जहर्ष प्रीता । किंभूतया दृष्ट्या । निवातं वातरहितं यत्सरसीजं पद्मं तस्य सगर्भया सदृशाया सहोदरया वा । 'निवातपद्मस्तिमितेन चक्षुषा' इति रघुवंशे । तं किंभूतम् । आत्मधाम्नि स्वगृहे विमलामन्दिरे समागतम् । उत्प्रेक्ष्यते—जङ्गमं प्रचलन्तं त्रिदशसालं कल्पवृक्षमिव । उत अथवा अङ्गिनं मूर्तिमन्तं स्वपुण्यस्य निजसुकृतस्य प्राग्भारमतिशयमिव ॥

कादम्बिनीव सलिलैः सुरशैलशृङ्गं
हर्षाश्रुभिः स्वसहजं स्नपयत्यमन्दम्।
संबिभ्रतं कनककेतककान्तकायं
तं स्वागतादि भगिनी परिपृच्छति स्म ॥ १३० ॥

भगिनी विमला तं स्वसहजं निजभ्रातरं प्रति स्वागतादि सुखागमनकुशलप्रश्नालापप्रमुखं परिपृच्छति स्म प्रश्नयामास । तं किं कुर्वन्तम्। कनककेतकवत् काञ्चनक्रकचच्छद इव कान्तं मनोज्ञं कायं गाङ्गेयगौराङ्गयष्टीं संबिभ्रतं धारयन्तम्। भगिनी किं कुर्वती। अमन्दं बहु यथा हर्षाश्रुभिः प्रमोदनिष्पतन्नयनबाष्पपानीयैः स्नपयन्तीव इति गर्भोत्प्रेक्षा। केव। कादम्बिनीव। यथा मेघमाला सलिलैर्निजजलैः सुरशैलस्य मेरोः शृङ्गं शिखरं स्नपयति। 'चामीकराद्रिशिरसीव नवाम्बुवाहम्' इति कल्याणमन्दिरस्तोत्रे मेरावपि मेघसद्भावः ॥

विज्ञातपूर्वजननीजनकप्रवृत्तेः
प्रेम्णा निगद्य कुशलादिकमात्मजामेः।
विद्याभृतां कुमरवत्कलधौतकान्तं
वैताढ्यशृङ्गमयमासनमध्युवास ॥ १३१ ॥

अयं कुमारः आसनं विष्टरमध्युवास उपविशति स्म। किंभूतमासनम्। कलधौतेन रजतेन काञ्चनेन वा कान्तं मनोज्ञम्। तद्धटितमित्यर्थः। 'कलधौतं स्वर्णरूप्ययोः' इत्यनेकार्थः। किंवत्। विद्याभृतां विद्याधराणां कुमरवत् यथा खेचराणां कुमारो रूप्यमयं वैताढ्यस्य भरतादिक्षेत्रोभयभागकारिमध्यवर्तिपर्वतस्य शृङ्गं शिखरमधिवसति। किं कृत्वा। कुशलप्रमुखस्ववृत्तान्तमात्मनः स्वस्य जामेर्भगिन्याः प्रेम्णा स्नेहेन निगद्य कथयित्वा। किंभूताया भगिन्याः। विज्ञातपूर्वा पूर्वमेवावबुद्धा जननी माता जनकः पिता तयोः प्रवृत्तिः परलोकगमनवार्ता यया तस्याः ॥

अनेन गोष्ठीमनुतिष्ठतात्मजामेर्मनोव्याहृतिवैदुषीभिः।
अनन्यवृत्ति क्रियते स्म विज्ञै रसातिरेकै रसिकस्य यद्वत् ॥ १३२ ॥

अनेन हीरकुमारेण आत्मजामेर्निजभगिन्या मनश्चित्तमनन्यवृत्ति न विद्यते अन्या परा वृत्तिर्व्यापारो यस्य। अथ वा न विद्यते अन्यस्मिन् स्थानके वर्तनं श्रवणेक्षणादिलक्षणं यस्य यत्र वा तत्। एकतानमित्यर्थः। क्रियते स्म। काभिः। व्याहृतिभिर्वैदुषीभिर्वचनचातुरीभिः। अनेन किं कुर्वता। गोष्ठीमात्मीयामन्यां वा वार्तामनुतिष्ठता विदधता। कैरिव। पण्डितैः। शृङ्गारादीनां नवानां रसानामतिरेकैराधिक्यैरतिशयैश्च कृत्वा रसिकस्य सर्वरसवेत्तुरतिचातुरीभाजः मनोऽनन्यव्यापारं विधीयते ॥

पदे पदे यत्पुरकौतुकानि निरीक्षमाणः क्षणदाकरास्यः ।
निजैर्गुणैर्हार इवैष हीरो व्यधत्त वासं हृदये मनस्विनाम् ॥१३३॥

एष कुंरानाथीनन्दनो हीरो निजैरात्मीयैर्गुणैः सौन्दर्यादिभिर्मनस्विनां महतां चतुराणां हृदये मनसि वासं वसतिं व्यधत्त चकार । क इव । हार इव । यथा मुक्ताकलापो गुणैस्तन्तुभिः सूत्रप्रोतत्वेन हारस्य मनस्विनां हृदये वक्षसि । 'हृदयं मनो वक्षश्च' इत्यनेकार्थः । 'परस्य हृदये लग्नं न घूर्णयति यच्छिरः' इति चम्पूकथायाम् । काव्यं परस्यान्यप्राज्ञस्य हृदये लग्नं चमत्कृतं बाणं परस्य वैरिणो हृदये वक्षसि लग्नं मर्मप्रविष्टमिति तट्टिपनकम् । वासं स्थानं कुरुते । किंभूतः हीरः । क्षणदाकरश्चन्द्रस्तद्वदाननं मुखं यस्य संपूर्णचन्द्रवदनः । किं कुर्वाणः । पदे पदे स्थाने स्थाने यत्पुरस्याणहिल्लवाटकपत्तनस्य कौतुकान्याश्चर्याणि निरीक्षमाणः विलोकमानः ॥

हरिरिव गिरिकुञ्जे मानसैर्मानसौका
　इव करकमले वा श्रीपतेः पाञ्चजन्यः ।
मुररिपुरिव वार्धौ स स्वसुर्धाम्नि तिष्ठ-
　न्कमपि कलयति स्म श्रीभरं शावसिंहः ॥ १३४ ॥

स हीरनामा शावेषु कुमारेषु शौर्यस्फूर्त्या सिंह इव सिंहः पञ्चाननः श्रीभरं शोभातिशयं कलयति स्म दधार । किं कुर्वन् । स्वसुर्वृद्धभगिन्या विमलानाम्न्या धाम्नि मन्दिरे तिष्ठन् वसन् स्थितिं कुर्वन् । क इव । हरिरिव । यथा केसरी गिरेः पर्वतस्य कुञ्जे गह्वरे वने वा निवसति । पुनः क इव । मानसौका इव । यथा राजहंसो मानसनामनि सरसि स्थितिं विधत्ते । वा पुनः क इव । पाञ्चजन्य इव । यथा देवतादत्तो हरिणैव वादनयोग्यः पाञ्चजन्यनामा शङ्खः श्रीपतेर्नारायणस्य करकमले पाणिपद्मे तिष्ठति । अत्र इवशब्दो लालाघण्टावदुभयत्र योज्यः । पुनः क इव । मुररिपुरिव । यथा नारायणो वार्धौ अर्थात् क्षीरसमुद्रे वसतिं विधत्ते ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
　श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
　क्सौभाग्याभिधहीरसूरिचरिते सर्गस्तृतीयोऽभवत् ॥ १३५ ॥

यं प्रासूतेति । देवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये हीरविजयसूरीश्वरचरित्रे तृतीयः सर्गः ॥

इति पण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनामकाव्यवृत्तौ गर्भधारणदोहदगर्भसमयलक्षणाविर्भावनजन्मजन्मपत्रिकाजन्ममहोत्सवबालक्रीडापठनसर्वाङ्गलक्षणमातृपितृपरलोकगमनपत्तनस्थभगिनीगृहागमवर्णनो नाम तृतीयः सर्गः ॥

चतुर्थः सर्गः।

अथो पुरासन्भरते वृषाङ्कमुखाश्चतुर्विंशतितीर्थनाथाः।
बाह्यान्यबाह्यानि तमांसि हन्तुं कृतद्विरूपा इव भानुमन्तः॥ १॥

अथेति चतुर्थसर्गप्रारम्भे अथवा श्रीविजयदानसूरिसमागमनप्रक्रमसमये तत्पूर्वपट्टावलीप्रकटनप्रस्तावे पुरा पूर्वं तृतीयारकपर्यन्तचतुर्थारकमध्ये भरते भरतनाम्नि क्षेत्रे वृषाङ्कप्रमुखा ऋषभदेवादिकाः। यथा ऋषभ-अजित-शंभव-अभिनन्दन-सुमति-पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयांस-वासुपूज्य-विमल-अनन्त-धर्म-शान्ति-कुन्थु-अर-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्व-वर्धमान-नामानश्चतुर्विंशतिसंख्याकास्तीर्थनाथा जिनेन्द्रा आसन्नभूवन्। उत्प्रेक्ष्यते—कृते द्वे द्वे मूर्ती रूपे यैरेतावता चतुर्विंशतिरूपा द्वादश भानुमन्तः सूर्या इव द्वादशानां द्विर्वारं गणनया चतुर्विंशतिः स्यात्। किं कर्तुम्। बाह्यानि बहिर्लोकान्तर्वर्तीनि अबाह्यानि प्राणिनामन्तरङ्गवर्तीनि हृदयस्थानि तमांस्यन्धकाराणि अज्ञानानि पापानि वा हन्तुं व्यापादयितुं भानवो हि नामभिर्ध्वान्तारातयः॥

इक्ष्वाकुवंशाम्बुधिशीतभासां द्वाविंशतिस्तीर्थकृतां बभूव।
यया तमःपङ्कमपास्य पन्थाः प्राकाशि सिद्धेः शरदेव विश्वे॥ २॥

तेषां जिनानां मध्ये इत्यध्याहारः। ऋषभदेवस्य शक्रप्राभृतानीतेक्षुयष्टेरास्वादनाशयेन शक्रप्रतिष्ठापितेक्ष्वाकुवंशः स एवाम्बुधिः समुद्रस्तत्र क्षीरभासश्चन्द्रास्तादृशानां तीर्थकृतां जिनानां द्वाविंशतिर्द्वाभ्यामधिका विंशतिर्बभूव जाता। द्वाविंशतिर्जिनेन्द्रा इक्ष्वाकुकुले समुत्पन्ना इत्यर्थः। यया जिनद्वाविंशत्या विश्वे जगति सिद्धेर्मोक्षस्य पन्था मार्गः प्राकाशि प्रकाशितः प्रकटीकृतः। किं कृत्वा। तमोऽज्ञानं पापं वा तदेव मालिन्यकारित्वात्पङ्कं कर्दमम् अपास्य निराकृत्य। कयेव। शरदेव। यथा घनात्ययेन पङ्कं विशोष्य पन्थाः प्रकटः क्रियते॥

बभूवतुर्द्वौ भुवनप्रदीपौ जिनौ यदूनां पुनरन्ववाये।
अरिष्टनेमिर्मुनिसुव्रतश्च स्फूर्जद्भुजाविन्द्रियवेश्मनीव॥ ३॥

पुनर्द्वौ जिनौ तीर्थकरौ यदूनां यादवानामन्ववाये वंशे बभूवतुर्जातौ। किंभूतौ जिनौ। भुवनेषु त्रिषु सप्तसु वा चतुर्दशसु वा एकविंशतौ वा। 'भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश' इति वाग्भटालंकारे। वृत्तौ एकविंशतिरपि इति वचनात्। तत्प्रमितेषु जगत्सु प्रकाशकारकत्वेन प्रदीपाविव प्रदीपौ। द्वौ कौ। एकः अरिष्टनेमिर्द्वाविंशतितमस्तीर्थनाथः। च पुनरपरो मुनिसुव्रतनामा विंशतितमस्तीर्थकरः। पदयोजनया कथंचित्पश्चानुपूर्व्या समानीतौ स्तः। काविव। स्फूर्जद्भुजाविव। यथा ऊर्जस्वलौ दोर्दण्डौ इन्द्रियवेश्मनि शरीरे स्याताम्। अत्र हेमाचार्योक्तस्य इन्द्रियायतनमिति परपर्यायस्य परावर्तनम्। 'जुहाव यन्मन्दिरमिन्द्रियाणाम्' इति नैषधोक्तवचनादिदमपि॥ इति जिनाः॥

सिद्धार्थभूकान्तसुतो जिनानामपश्चिमोऽजायत पश्चिमोऽपि ।
शशी व्यभात्पङ्किलपङ्कजास्यकादम्बवद्यस्य यशःसुधाब्धौ ॥ ४ ॥

सिद्धार्थनामा भूकान्तः पृथ्वीपतिः तस्य सुतो नन्दनः महावीरदेवः सः अजायत जज्ञे । किंभूतः । पश्चिमोऽपि सन् जिनानां सामान्यकेवलिनां मध्ये अपश्चिम आद्यः । तत्तीर्थे प्रथमं वीरस्यैव केवलज्ञानोत्पन्नत्वेन । 'अपश्चिमो विपश्चिताम्' इति चम्पूकथायाम् । स कः । यस्य यशःसुधाब्धौ कीर्तिरेव सुधाब्धिः क्षीरसमुद्रस्तस्मिन् शशी चन्द्रः । पङ्किलं कर्दमाकलितं पङ्कजं कमलमास्ये मुखे यस्यैवंविधकादम्बवत् राजहंस इव व्यभात् भाति स्म ॥

बाल्येऽपि हेमाद्रिरकम्पि येन प्रभञ्जनेनेव निकेतकेतुः ।
श्रीद्वादशाङ्गी च यतः प्रवृत्ता गुरोर्गिरीणामिव जह्नुकन्या ॥ ५ ॥

येन महावीरेण बाल्ये शैशवेऽपि जातमात्रावस्थायामपि जन्माभिषेकसमये हेमाद्रिर्मेरुरकम्पि कम्पितः । णिगन्तोऽयं प्रयोगः । केनेव । प्रभञ्जनेनेव । यथा वायुना निकेतकेतुः । 'निकेतं परितो भ्रमन्' इति पाण्डवचरित्रे । गृहोपरिध्वजः कम्प्यते । च पुनर्यतो महावीरात् द्वादशाङ्गी गणिपिटकं प्रवृत्ता प्रावर्तत । कस्मादिव । गुरोरिव यथा गिरीणां गुरोर्हिमाचलात् जह्नुकन्या गङ्गा प्रवर्तते स्म ॥ इति महावीरः ॥

एकादशासन्गणधारिधुर्याः श्रीइन्द्रभूतिप्रमुखा अमुष्य ।
आर्योपयामे पुनराप्तमूर्तिं रुद्राः स्मरं हन्तुमिवेहमानाः ॥ ६ ॥

अमुष्य महावीरदेवस्य श्रिया शोभया लब्धिलक्ष्म्या वा युक्ता इन्द्रभूतिर्गौतमनामा प्रमुख आद्यो येषां तादृशा एकादशसंख्याकाः इन्द्रभूति-अग्निभूति-वायुभूति-व्यक्त-सुधर्मस्वामि-मण्डित-मौर्यपुत्र-अकम्पित अचलभ्राता-मतार्य-प्रभासाभिधाना गणधारिणां गच्छं बिभ्रतीति गणधारिणस्तेषां मध्ये धुर्या धुरंधराः आसन् जज्ञिरे । उत्प्रेक्ष्यते— पुनर्द्वितीयवारं स्मरं मदनं निहन्तुं जीविताद्व्यपरोपयितुमीहमानाः काङ्क्षन्तः । एकादशसंख्याका रुद्रा इव प्रकटीभूता इत्यर्थः । किंभूतं स्मरम् । पूर्वशरीरापेक्षया दाहानन्तरमपरवारमार्यायाः पार्वत्या उपयामे पाणिग्रहणसमये आप्ताः स्मरोपरि प्रसन्नीभवनविज्ञप्तिकारि सुराननुगृह्य प्रसन्नीभूतभूतपतिवरात् लब्ध्वा मूर्तिः शरीरं येन तम् ॥

बभूव मुख्यो वसुभूतिसूनुस्तेषां गणीनामिह गौतमाह्वः ।
यो वक्रभावं न बभार पृथ्वीसुतोऽपि नो विष्णुपदावलम्बी ॥ ७ ॥

इह जगति महावीरशिष्येषु वा तेषामेकादशानां गणीनां गणधारिणां मध्ये वसुभूतिनाम्नो ब्राह्मणस्य सूनुः पुत्रो मुख्यः विविधलब्धिसंपन्नत्वात्प्रकृष्टः अथ वा मुखे आदौ भवो मुख्यः प्रथमः सर्वेषां पूर्वं दीक्षितत्वात् प्रथमगणधरत्वाद्वा बभूव । किंभूतो वसुभूतिसूनुः । गौतम इत्याह्वा नाम यस्य सः । यो गौतमः पृथ्व्या ब्राह्मण्याः क्षितेश्च सु-

तोऽपि पुत्रोऽपि सन् वक्रभावं कुटिलस्वभावं न बभार धत्ते स्म । पुनर्विष्णोर्नारायणस्य पदं चरणमालम्बते आश्रयते सेवते इत्येवंशीलोऽपि न नैव विष्णुभक्तः । महावीरगणधारित्वात् । अथ च पृथिव्याः सुतो मङ्गलनामा ग्रहः स तु वक्रभावं वक्रनामत्वम् । 'आरो वक्रो लोहिताङ्गो मङ्गलोऽङ्गारकः कुजः' इति मङ्गलनामानि हैम्याम् । अथ च विष्णुपदमाकाशमवलम्बते भजते इत्येवंशीलोऽस्ति । ज्योतिश्चक्रस्य नभःस्थत्वात् ॥

यत्पाणिपद्मः स पुनर्भवोऽपि दत्ते नतानामपुनर्भवं यत् ।
शिष्यीकृता येन भवं विहाय शिवं श्रयन्ते च तदत्र चित्रम् ॥८॥

तत्प्रसिद्धमत्र जगति चित्रं महदाश्चर्यं दृश्यते । तत्किम् । यत् यस्य गौतमस्वामिनः पाणिपद्मः करकमलः सह पुनर्द्वितीयवारं भवनमुत्पत्तिस्तेन सह वर्तते यस्तादृशोऽपि सन् न विद्यते पुनरन्यवारं भवोऽवतारो यत्र तं नतानां प्रणमज्जनानां दत्ते विश्राणयति । तत्त्वतस्तु कामाङ्कुशकलितो मोक्षं ददाति । 'कामाङ्कुशो महाराजः करजो नखरो नखः । करशूको भुजाकण्टः पुनर्भवपुनर्नवौ ॥' इति हैम्याम् । तथा तत्रैव 'महानन्दोऽमृतं सिद्धिः कैवल्यमपुनर्भवः' इति च । पुनर्येन गौतमेन शिष्यीकृताः स्वविनेया विहिताः सन्तो नरा भवमीश्वरं विहाय त्यक्त्वा शिवं शंभुं श्रयन्ते भजन्ते भवः स एव शिवश्च । तत्त्वतस्तु भवं संसारं त्यक्त्वा शिवं मोक्षं यान्ति गौतमदीक्षितानां सर्वेषामपि केवलज्ञानोत्पादात् ॥

सूर्यस्य रश्मीनवलम्ब्य वज्रावलम्बरश्मीनिवयः शयाभ्याम् ।
नन्तुं जिनानार्षभिकृप्तमूर्तीनष्टापदोर्वीधरमारुरोह ॥ ९ ॥

यो गौतमस्वामी स्वलब्ध्या योऽष्टापदमारोहति सोऽवश्यं तद्भवे एव सिद्धिगामीति देववाचं निशम्य प्रश्नानन्तरं भगवतापि तथैव प्रतिपादिते भगवदाज्ञादानपूर्वकमष्टापदनामानमुर्वीधरं कैलाशशैलमारुरोहाधिरूढवान् चढितः । किं कृत्वा । अवलम्ब्य आश्रित्य । काभ्याम् । शयाभ्यां स्वहस्ताभ्याम् । कान् । सूर्यस्य रश्मीन् किरणान् । लूता उर्णनाभः कोलिकस्तस्यास्याद्वदनाद्विनिर्गता जालतन्तवः तान् वा । 'तपःकृशाङ्गास्तं शैलमारोढुं न वयं क्षमाः । चढिष्यति कथं प्रौढदेहोऽयं गजराजवत् ॥ पश्यत्सु तेषु मार्तण्डकरानालम्ब्य गौतमः । गणभृन्निजलब्ध्यैवाष्टापदोर्ध्वं ययौ ध्रुवम् ॥' इति ऋषिमण्डलवृत्तौ । 'सूर्यस्यांशून् समाश्रित्य तेषामुत्पश्यतामपि । स गरुत्मानिवोड्डीय ययौ मङ्क्षु गिरेः शिरः ॥' इति वृन्दारवृत्तौ । रविकिरणावलम्बनम् । तथा 'भयवं गोयमो जङ्घाचारणलद्धीपलूतापुडगंमिनिस्साए उड्ढुंप्पयइ जाव ते पलायन्ति' इत्यावश्यकद्वाविंशतिसहस्र्याम् । मलयगिरिवृत्तावप्ययमेव पाठः । लूतातन्तववलम्बनमिति पाठद्वयमपि शास्त्रानुसारि । अथ प्रस्तुते । उत्प्रेक्ष्यते—वज्रस्य वज्ररत्नविनिर्मितानित्यर्थः । अवलम्बार्थमालम्बनकृते रश्मीन् गुणान् रज्जूरिव । किमर्थमारुरोह—नन्तुं नमस्कर्तुम् । कान् । जिनांश्चतुर्विंशतितीर्थकृतः । किंभूतान् । ऋषभस्यापत्यमार्षभिर्भरतचक्रवर्ती तेन

क्लृप्ता निर्मिता मूर्तयः प्रतिमा येषाम् । स्वस्ववर्णप्रमाणोपेतचतुर्विंशतिजिनबिम्बान्नमसितुमित्यर्थः ॥

कथं लभेतास्य तुलां सुरद्रुर्यद्यस्य नामापि पिपर्ति कामान् ।
तपस्वितोऽप्यभ्यवहारयन्यो द्विधामृतास्वादजुषः पुपोष ॥ १० ॥

अस्य गौतमस्वामिनः तुलां साम्यं सुरद्रुः कल्पवृक्षः कथं केन प्रकारेण लभेत । यत्कारणात् यस्य गौतमस्य नामापि अभिधानमपि कामान् जनानां मनोरथान् पिपर्ति पूरयति । 'यस्याभिधानं मुनयोऽपि सर्वे गृह्णन्ति भिक्षाभ्रमणस्य काले । मिष्टान्नपानाम्बरपूर्णकामाः स गौतमो यच्छतु वाञ्छितं मे ॥' इति पूर्वाचार्यकृतस्तुत्युक्तेः । तथा गृहमेधिनोऽपि व्यापारादिकार्यं कुर्वाणा गौतमस्वामिनी लब्धिरित्युच्चरन्ति च । अथ कल्पवृक्षाभिधानग्रहणेन कोऽप्यर्थो न सरीसर्ति तस्मात्कल्पतरूपमानं न स्यादस्येति अपि पुनर्यस्तपस्विनस्तापसानभ्यवहारयन् पायसं भोजयन् सन् द्विधा द्वाभ्यां प्रकाराभ्यां कृत्वा अमृतस्य सुधाया मोक्षस्य वा स्वादं भोगं जुषन्ते सेवन्ते तादृशान् पुपोष । चकारेत्यर्थः । प्रथममन्नममृतोपमं पायसमाकण्ठं भोजयित्वा ततः सिद्धिवधूविलासरसिकांश्च कृतवान्, एतदपि महदाश्चर्यमस्ति ॥ इति गौतमस्वामी ॥

आसीत्सुधर्मा गणभृत्सु तेषु श्रीवर्धमानप्रभुपट्टधुर्यः ।
विहाय विश्वे सुरभीतनूजं कः स्तात्परो धुर्यपदावलम्बी ॥ ११ ॥

तेषु गौतमादिषु गणभृत्सु गणधरेषु श्रीवर्धमानप्रभोः श्रीमहावीरस्वामिनः पट्टे पदे धुर्यः धुरंधरः सुधर्मानामा गणधर आसीत् । युक्तोऽयमर्थः । सुरभीतनूजं सुरभीशब्दो दीर्घईकारान्तोऽपि दृश्यते । यथा कल्पकिरणावल्याम्—'स्वप्ने मानवमृगपतितुरङ्गमातङ्गवृषभसुरभीभिः' इति । तथा पाण्डवचरित्रेऽपि—'दक्षिणस्या दिशः सर्वे नीयन्ते सुरभीगणाः' इत्युक्तेः । विहाय त्यक्त्वा परोऽन्यः को धुर्यपदावलम्बी धुर्यस्य धौरेयस्य पदं युगं लक्षणं स्थानं तस्यावलम्ब आश्रयोऽस्त्यस्य ईदृशः कः स्तात् । अपि तु वृषभं विना न कोऽपि धुरीणः स्यात् ॥

यः पञ्चमोऽभूद्गणपुङ्गवानां किं पञ्चमीं स्वेन गतिं यियासुः ।
यत्रोक्तिभिस्तीर्थकृतां दिदीपे शुक्तिव्रजे वारिमुचामिवाद्भिः ॥ १२ ॥

यः सुधर्मनामा गणानां गच्छानां प्रधानानां मध्ये पञ्चानां संख्यापूरणः पञ्चमः अभूत् बभूव । उत्प्रेक्ष्यते—स्वेनात्मना पञ्चमीं मुक्तिलक्षणां गतिं यियासुः किमु गन्तुमिच्छुरिव । पञ्चमो जज्ञे । यत्र सुधर्मस्वामिनि तीर्थकृतां पूज्यत्वख्यापनार्थं बहुत्वम् । महावीरस्य । अथवा 'वीरविभोः' इति पाठः । तत्र वीरो महावीरः । देशैकग्रहणेन देशिनो ग्रहणम् । भीमो भीमसेनः, भामा सत्यभामा, इत्यादिवत्तथा वीरपदोपादानेन महावीरग्रहणं स चासौ विभुः स्वामी जगदीश्वरस्तस्य उक्तिभिर्वाक्यैरागमैराप्तोक्तित्वात्तेषां दिदीपे । कस्मिन्निव । शुक्तिव्रजे इव । यथा शुक्तिकानां निकरे वारिमुचां मेघानामद्भिः

पानीयैर्दीप्यते मौक्तिकीभूय दीप्तिमतीभिर्जायते । 'शुक्तिव्रजे वारिमुचो यथाद्भिः' इति पाठः । यथा इवार्थे । शेषं प्राग्वत् ॥

सरस्वतीशालिलसज्जिनश्रीरगाधमध्यो रसभासमानः ।
सिद्धान्त आस्ते यदुपज्ञमुद्यदभङ्गभङ्गः सरितामिवेशः ॥ १३ ॥

यदुपज्ञं यः सुधर्मस्वामी उपज्ञा आद्यं ज्ञानं यत्र तत्कर्तृकत्वात् । 'उपज्ञोपक्रमं तदाचिख्यासायाम्' । उपज्ञोपक्रमयोरादेरा(चि)[1]ख्यानेच्छायां तदन्तस्तत्पुरुषो नपुंसकः स्यात् । पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः तेनादौ कृत इत्यर्थः । नन्दस्य उपक्रमं नन्दोपक्रमं द्रोणः तेनादौ उपक्रान्त इत्यर्थः । इति प्रक्रियाकौमुद्याम् । सिद्धान्त आगमः सरितां नदीनामीशः पतिः समुद्र इवास्ते विद्यते । किंभूतः सिद्धान्तः समुद्रश्च । सरस्वत्याः श्रुतदेव्याः सरः प्रसरणं मुखे अस्त्यस्यास्तत्त्वेन तदधिष्ठापकत्वात् । तया वा शालते शोभते इत्येवंशीलस्तथा लसन्ती दीप्यमाना जिनानां तीर्थकृतां श्रीरतिशयादिलक्षणा शोभा वा यत्र । पक्षे—नदीभिस्तत्पतित्वात् शालमानस्तं तथा लसन्तौ क्रीडन्तौ श्लिष्यन्तौ वा । 'लस श्लेषणक्रीडनयोः' इति धात्वर्थत्वात् । जिनश्रियौ कृष्णलक्ष्म्यौ यत्र विष्णोर्जलधिशयनत्वेन तत्र क्रीडा । अथवा स्फुरन्त्यौ जिनो विष्णुस्तत्साहचर्याद्वार्धिपुत्रीत्वाद्वा लक्ष्मीश्च यत्र । समासान्तविधेरनित्यत्वान्न कः । 'उडुपरिषदि मध्यस्थायिशीतांशुलेखानुकरणपटुलक्ष्मीमक्षि लक्षीचकार' इति नैषधे । पश्चात्कर्मधारयः । पुनः किंभूतः । अगाधो महार्थतया अलब्धं मध्यमतलस्पृक् च मध्यं यस्य । पुनः किंभूतः । रसैः शान्तादिभिर्जलैश्च भासमानः । पुनः किंभूतः । समुद्यन्तः प्रकटीभवन्तः अभङ्गाः संपूर्णाः भङ्गा परमाणुप्रमुखानां श्राद्धव्रतादीनामेकद्वित्रिविधादयो भङ्गजालानि तरङ्गाश्च यत्र ॥

गणीन्दुना पाट्टरमा गणीन्दुः पट्टश्रिया च व्यतिभासते स्म ।
निशा निशेशेन निशा निशेश इवापि शंभोः परिचारिचेताः ॥ १४ ॥

अनूचानचन्द्रेण सुधर्मस्वामिना पट्टरमा महावीरदेवपट्टलक्ष्मीस्तथा गणी साङ्गप्रवचनाधीतिनां मध्ये दीप्यमानत्वेन परमैश्वर्यभाक्त्वेन इन्दुश्चन्द्रः पट्टश्रिया वर्धमानस्वामिपट्टलक्ष्म्या कृत्वा व्यतिभासते स्म परस्परं शोभते स्म । केनेव का । कया क इव । निशा निशेशेनेव । निशा निशेश इव यथा रात्रिश्चन्द्रमसा शोभते । यथा । निशा रात्र्या कृत्वा चन्द्रमा व्यतिभासते परस्परं राजते । 'पद्दन्नोमास्हृद्निश्' इति प्रक्रियोक्तसूत्रेण निशाया निश आदेशः । किंभूतो गणीन्दुः चन्द्रश्च । शंभोर्जिनस्येश्वरस्य च परिचरणशीलं सेवाहेवाकिस्वभावं चेतो मनो यस्य सः ॥ इति सुधर्मास्वामी ॥

यशःश्रियाधःकृतकुन्दकम्बुर्जम्बूकुमारोऽजनि तस्य पट्टे ।
लघोरपि स्वस्य यतोऽभिभूतिं पश्यन्ह्रियादृश्य इव स्मरोऽभूत् ॥ १५ ॥

---

१. लेखकप्रमादपतितः.

तस्य सुधर्मस्वामिनः पट्टे जम्बूकुमारोऽजनि जज्ञे । किंभूतः । यशःश्रिया कीर्तेरवदाततालक्ष्म्या अधःकृतास्तिरस्कृता जिताः कुन्दानि कुन्दतरुकुसुमानि कम्बवः शङ्खाश्च येन सः । लघोः शिशोरपि यतो जम्बूकुमारात् स्वस्यात्मनः पराभूतिं तिरस्कारं पश्यन् विलोकमानः स्मरः । उत्प्रेक्ष्यते—ह्रिया लज्जयेव अदृश्यः दृशोरगोचरः अनङ्गत्वात् अभूत् ॥

उज्झांचकारैष महेभ्यकन्या मदेन्दिरामूर्तिमतीरिवाष्टौ ।
नवाधिकां यो नवतिं हिरण्यकोटीर्नु चेटीरिव दोषराजाम् ॥ १६ ॥

एष जम्बूकुमारः अष्टौ अष्टसंख्याका महेभ्यानां स्वस्वकन्यानां पाणिमोचनपर्वणि जम्बूकुमाराय नवनवकोटीप्रदानलक्षणतो महाव्यवहारिणां कन्याः कुमारिकाः उज्झांचकार त्यजति स्म । उत्प्रेक्ष्यते—मूर्तिमतीः शरीरभाजो मदेन्दिराः कुलजातिरूपश्रुतैश्वर्यतपोलब्धिबलरूपाष्टमदलक्ष्मीरिव जहौ । च पुनर्यो जम्बूः नवभिरधिकां नवतिं नवनवतिमिता हिरण्यानां सुवर्णानां कोटीरुज्झांचकार तत्याज । उत्प्रेक्ष्यते—दानान्तरायलाभान्तरायवीर्यान्तरायभोगान्तरायोपभोगान्तरायहास्यरत्यरतिजुगुप्साशोककाममिथ्यात्वाज्ञाननिद्राविरतिरागद्वेषरूपाणामष्टादशसंख्याकानां दोषाणामेव राज्ञां भूपानाम् । राज्शब्दो व्यञ्जनान्तः । 'राजा राट् पृथ्वीशक्रः' इति हैमीवचनात् । चेटीर्दासीरिव जहाति स्म । साधुः पुमान् दासीसङ्गं न कुर्यात् ॥

वशंवदीभूतजगत्त्रयस्य न पुस्फुरेऽस्मिन्कमनस्य शक्त्या ।
हविर्भुजो भस्मितकाननस्य विस्फूर्ज्यते किं महसाम्बुराशौ ॥ १७ ॥

अस्मिन् जम्बुकुमारे । जम्बूशब्दो दीर्घो ह्रस्वोऽप्यस्ति । 'मत्कृते जम्बुना त्यक्ता नवोढा नवकन्यका' इति कल्पवृत्तौ । कमनस्य कन्दर्पस्य शक्त्या स्फूर्त्या सामर्थ्येन पराक्रमेण न पुस्फुरे न स्फुरितं नालंबभूवे । किंभूतस्य कामस्य । वशंवदीभूतं वश्यं स्वाज्ञाकारिसंजातं जगत्त्रयं त्रैलोक्यं यस्य सः । युक्तोऽयमर्थः । हविर्भुजो वह्नेर्महसा प्रतापेन किं किमिति प्रश्ने । अम्बुराशौ समुद्रे स्फूर्ज्यते समर्थीभूयते । अपि तु न । किंभूतस्य हविर्भुजः । भस्मितं भस्मीकृतं भस्मावशेषं विहितं ज्वालितं काननं वनम् । उपलक्षणत्वात्पुरादि येन तस्य ॥

पश्यन्तु वैदुष्यममुष्य जम्बूप्रभोर्वपुर्भर्त्सितमत्स्यकेतोः ।
विश्वं वृषस्यन्त्यपि पांशुलेव वशीकृता येन शिवस्मितास्या ॥ १८ ॥

हे प्राज्ञाः अमुष्यास्य जम्बूप्रभोर्जम्बूस्वामिनः वैदुष्यं विदुषो भावश्चातुर्यं पश्यन्तु विलोकयन्तु । किंभूतस्य जम्बूप्रभोः । वपुषा अर्थात् शरीरसौन्दर्येण भर्त्सितस्तिरस्कृतोऽधिकृतो मत्स्यकेतुर्मकरध्वजः कामो येन । पांशुलेव स्वैरिणी व्यभिचारिणीव विश्वमखिलमपि जगज्जनं वृषस्यन्ती कामयमाना । 'वृषस्यन्ती कामुकी स्यात्' इति हैम्याम् । अत्यर्थमभिलषन्त्यपि शिवाख्या मुक्तिनाम्नी स्मितास्या विकसितकमलवदना

वधूरद्वैतप्रागल्भ्यभाजा येन जम्बूप्रभुणा वशीकृता स्वायत्ता निर्मिता । त्वया सह सङ्गं विधाय एतस्यामवसर्पिण्यां नान्यं भारतभवं जनमभिलषामीति वाग्बन्धप्रदानपूर्वमात्मसात्कृता ॥ इति जम्बूस्वामी ॥

अलंचकार प्रभवप्रभुस्तत्पट्टश्रियं पुण्ड्र इवेन्दुवक्राम् ।
स्तेनापि सार्थेश इवाङ्गिनो यः श्रेयःश्रियं प्रापयदत्र चित्रम् ॥ १९॥

प्रभवनामा प्रभुः स्वामी तस्य जम्बूस्वामिनः पट्टश्रियं पट्टलक्ष्मीमलंचकार भूषयति स्म । क इव । पुण्ड्र इव । यथा चित्रकं तिलकम् इन्दुवक्रां चन्द्रमुखीं वशामलंकरोति । यः प्रभवप्रभुः स्तेनापि तस्करीभूयापि सार्थेशः सार्थपतिरिवाङ्गिनो जनान् श्रेयःश्रियं कुशलकलितां कमलां मोक्षलक्ष्मीं च प्रापयत् लम्भयति स्म । तल्लक्ष्मीप्रदानमत्र(प्र)भवप्रभौ चित्रमाश्चर्यकारकमस्ति । 'श्रेयःपुरीम्' इति पाठे मुक्तिनगरीं नयति स्म ॥

किं वर्ण्यते वर्ण्यगुणस्य चौर्यचातुर्यमस्य प्रभवस्य भर्तुः ।
अहार्यमप्येष मनोऽभिधानमपाहरद्यस्त्रिदिवेन्दिरायाः[1] ॥ २० ॥

अस्य जम्बूपट्टधरस्य प्रभवस्य प्रभवनाम्नो भर्तुः स्वामिनो गणधरस्य चौर्यस्य वा चातुर्यं कौशल्यं तस्करताप्रागल्भ्यं किं कया रीत्या विस्मयकृत्तया कथं वा वर्ण्यते प्रशस्यते स्तूयते वा । अस्य किंभूतस्य । वर्ण्या जगज्जनैर्लोकोत्तरतया श्लाघनीया गुणाः शमदमसंयमरूपा यस्य । यत्कारणादेष प्रभवप्रभुः त्रिदिवेन्दिरायाः स्वर्गलक्ष्म्याः अहार्यं देवताश्रयत्वान्न केनापि हर्तुं शक्यमपि मनोभिधानं निधिमपाहरज्जहार । मुक्तिगमनाभावात् स्वर्लोकमेवालंकृतवानित्यर्थः ॥ इति प्रभवस्वामी ॥

शय्यंभवोऽभूषयदस्य पट्टं सिंहासनं पित्र्यमिवावनीन्द्रः ।
कलिन्दिका मौक्तिकमालिकेव यत्कण्ठपीठे विलुठत्यकुण्ठा ॥ २१ ॥

शय्यंभवनामा भट्टः अस्य प्रभवस्वामिनः पट्टम् अभूषयत् पदमलंकरोति स्म । क इव । अवनीन्द्र इव । यथा नवाभिषिक्तभूपतिः पितुरिदं पित्र्यं पितुः संबन्धि सिंहासनं केसरिणोपलक्षितमासनं सिंहासनं भूषयति । यस्य शय्यंभवगणधरस्य कण्ठपीठे मुख एव कलिन्दिकाः सर्वविद्याः चतुर्दशापि पूर्वाणि वा लुठति तिष्ठति । समायातीत्यर्थः । किंभूता कलिन्दिका । अकुण्ठा स्फुरद्रूपा । केव । मौक्तिकमालिकेव । यथा मुक्ताहारलता कस्यापि भाग्यवतः पुंसो गलकन्दले लुठति । किंभूता । अकुण्ठा दीप्यमाना । आमलकप्रमाणमुक्ता ॥

यूपादधस्तः प्रतिमां जिनेन्द्रोर्वाचा स वाचंयमपुङ्गवस्य ।
दृक्संज्ञयेव स्वगुरोः किरीटी नाराचगङ्गां प्रकटीचकार ॥ २२ ॥

यः शय्यंभवभट्टः वाचंयमपुङ्गवस्य प्रभवप्रभोर्वाचा गिरा यूपात्स्वप्रारब्धयज्ञस्तम्भात्

---

1. 'त्रिदिवाङ्गनायाः' इति मूलपाठः.

अधस्तः अधोभूमिभागात् सकोपप्रश्नोत्तरकालं यज्ञवृत्तबृहद्द्विजोक्त्या जिनेन्दोः श्रीशान्तिनाथस्य प्रतिमां मूर्तिं प्रकटीचकार कर्षति स्म । 'सिज्जंभवं गणहरं जिणपडिमादंसणेण पडिबुद्धम्' इति दशवैकालिके । अन्यत्तु वृत्त्यादौ । क इव । किरीटीव । यथा अर्जुनः स्वस्य गुरोः पितामहस्य वृद्धस्य वा । 'मातापिता कुलाचार्य एतेषां ज्ञातयस्तथा। वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥' अथ वा गुरुगाङ्गेय इति लोकोक्त्यापि गाङ्गेयस्य परशासनेऽपि गुरुगाङ्गेय इति प्रसिद्धत्वाद्गुरुरिति पदोपादानम् । दृक्संज्ञया दृष्टिचेष्टया वा नाराचस्य बाणस्य मोचनसमय एव प्रादुर्भूतस्वच्छसुरभिस्वादुशीतलविशदपयःप्रवाहस्य लोके बाणगङ्गेति प्रसिद्धिर्जाता । तां बाणगङ्गां प्रकटीकरोति स्म । अयं व्यतिकरः पाण्डवचरित्रे ॥

वगाह्य शास्त्रं मनकाह्वसूनोः कृते कृतश्रीदशकालिकं यः ।
हरिः सुधामुद्धृतवान्सुपर्ववर्गस्य निर्मथ्य यथाम्बुनाथम् ॥ २३ ॥

यः शय्यंभवगणधारी मनक इत्याह्वा नाम यस्य तादृशस्य सूनोः स्वनन्दनस्य कृते कार्याय परलोकसाधनार्थं दशाध्ययनयुक्तं विकाले दिनावसानवेलायां कृतमतो दशवैकालिकं नाम सूत्रमकृत चक्रे । किं कृत्वा । वगाह्य [अव]गाहयित्वा । किम् । शास्त्रं सर्वसिद्धान्तसाङ्गोपाङ्गचतुर्दशपूर्वलक्षणम् । क इव । हरिरिव । यथा नारायणः सुपर्ववर्गस्य देववृन्दस्य कृते सुधापीयूषमुद्धृतवान् । किं कृत्वा । अम्बुनाथं समुद्रं निर्मथ्य विलोड्य यथा इवार्थे । 'पूर्वापरौ तोयनिधी वगाह्य' इति कुमारसंभवे । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः । 'यादःस्रोतोवार्नदीशः' इति हैम्याम् । वार्धेर्जलपतित्वमुभयत्र पर्यायपरिवर्तनं च ॥ इति शय्यंभवस्वामी ॥

संपूरयन्कीर्तिनभोनदीभिर्दिशो यशोभद्रगणाधिराजः ।
व्यभूषयत्पट्टममुष्य भूभृदधित्यकां दस्युरिव द्विपानाम् ॥ २४ ॥

यशोभद्रनामा गणाधिराजो गच्छपतिरमुष्य शय्यंभवगणभृतः पट्टं व्यभूषयत् । किं कुर्वन् । कीर्तयः स्वयशांसि ता एव नभोनद्यो गङ्गाः । अर्थात् गङ्गाप्रवाहाः । त्रैलोक्यां त्रिश्रो(स्रो)तोभिः प्रवहमानत्वेन त्रिपथगा अतो बहुवचनम् । ताभिः कृत्वा दिशो दशाप्याशाः संपूरयन् । निर्झरं भरन् व्याप्नुवन् व्यभूषयत् । क इव । दस्युरिव । यथा द्विपानां हस्तिनां शत्रुः केसरी भूभृतः शैलस्य अधित्यकामूर्ध्वभूमीं विभूषयति ॥

एतद्यशःक्षीरधिनीरपूरैः संपूरितायां परितस्त्रिलोक्याम् ।
अबुध्यमानोऽम्बुनिधिं स्वशय्यां पद्मेशयोऽभूदिव पद्मनाभः ॥ २५ ॥

पद्मं नाभौ यस्य स पद्मनाभः कृष्णः । उत्प्रेक्ष्यते—पद्मे कमले शेते स्वपितीति

---

१. 'शय्यंभवं गणधरं जिनप्रतिमादर्शनेन प्रतिबुद्धम्' इति संस्कृतम्. २. 'समुद्रम्' इति मूलपाठः. ३. प्रक्षिप्तम्; ल्यबादेशापत्तेः.

पद्मेशयः। अलुक्समासोऽयम्। अभूत् बभूवेव। किं कुर्वाणः पद्मनाभः। अबुध्यमानो न जानन्। अपश्यन्नित्यर्थः। कं कर्मतापन्नम्। अम्बुनिधिमर्थात् क्षीरसमुद्रम्। किंभूतम्। स्वस्यात्मनः शय्यां पर्यङ्कं तत्र शायित्वात् अब्धिशयनत्वेन विष्णोः। कस्यां सत्याम्। एतस्य यशोभद्रसूरेः यशः प्रसरत्कीर्तिनिकरः स एव क्षीरधिर्दुग्धवारिधिस्तस्य नीरपूराणि पयःप्रवाहास्तैः परितः सर्वत्रापि संपूरितायां निर्झरभृतायां धवलीकृतायां त्रिलोक्यां सत्याम्॥ इति यशोभद्रसूरिः॥

संभूतिपूर्वो विजयो गुरुस्तत्पट्टं श्रिया पल्लवयांचकार।
कदम्बजम्बूकुटजावनीजकुञ्जं नभोम्भोद इवाम्बुवृष्ट्या॥ २६॥

संभूतिरिति शब्दः पूर्वं यस्य तादृशो विजय एतावता संभूतिविजयनामा गुरुः सूरिस्तस्य यशोभद्रसूरेः पट्टं श्रिया स्वशोभया पल्लवयांचकार अलंकारयति स्म। क इव। नभोम्भोद इव। यथा श्रावणमेघः अम्बुवृष्ट्या जलवर्षणेन कृत्वा कदम्बा धाराकदम्बा नीपाः, जम्बूः श्यामफलाः, कुटजा गिरिमल्लिकाः 'कुडउ' इति प्रसिद्धाः, त एवावनीजा वृक्षाः तेषां कुञ्जं काननं पल्लवयति किशलयकलितं कुरुते। पूर्वोक्तास्त्रयोऽपि तरवः प्रावृष्येव पुष्यन्ति॥

संहर्षरोषात्स्वजिघांसुमेतत्प्रतापमार्तण्डमवेक्ष्य साक्षात्।
युयुत्सया हैहयवत्सहस्रं सहस्रभासेव करा ध्रियन्ते॥ २७॥

सहस्रभासा सूर्येण सहस्रं दशशती करा हस्ताः किरणाश्च ध्रियन्ते धार्यन्ते। उत्प्रेक्ष्यते—युयुत्सया योद्धुमिच्छयेव। किंवत् हैहेयवत्। यथा कार्तवीर्यनृपो युयुत्सया सहस्रसंख्यान् करान् पाणीन् धत्ते। 'संग्रामनिर्विष्टसहस्रबाहुर्बभूव योगी किल कार्तवीर्यः' इति रघुवंशे। तथा 'बाहुसहस्रार्जुनः पिशुनः' इति सूक्ते च। हैहयस्तु कार्तवीर्यः दोःसहस्रभृदर्जुनः' इति हैम्याम्। किं कृत्वा। एतस्य संभूतिविजयस्य प्रताप एव चण्डत्वान्मार्तण्डो भानुस्तं साक्षात्प्रत्यक्षमवेक्ष्य विलोक्य। किंभूतम्। संहर्षेण स्पर्धया कृत्वा यो रोषः क्रोधस्तस्मात्स्वमात्मानं जिघांसुं हन्तुं काङ्क्षन्तम्॥ इति संभूतिविजयः॥

स तत्सतीर्थ्योऽजनि भद्रबाहुः सूरिः समग्रागमपारदृश्वा।
दशाश्रुतस्कन्धत उद्दधार वज्राकराद्वज्रमिवात्र कल्पम्॥ २८॥

स प्रसिद्धो बाहुभद्रनामा सूरिस्तस्य संभूतिविजयस्य सतीर्थ्य एकगुरुभ्राता। 'सतीर्थ्यास्त्वेकगुरवः' इति हैम्याम्। किंभूतः। समग्राणां सर्वेषामङ्गोपाङ्गपूर्वादीनामागमानां पारं दृष्टवान् इति पारदृश्वा पारगामी चतुर्दशपूर्वधरत्वात्। स कः। यो भगवान् अत्र पञ्चमारके कलियुगे वा दशाश्रुतस्कन्धतः प्रत्याख्यानाभिधनवमपूर्वदशाश्रुतस्कन्धाध्ययनतः कल्पं कल्पनाम सूत्रमुद्दधार उद्धृतवान्। कमिव। वज्रमिव। यथा कश्चिद्भाग्यवान् वज्राणां हीरकाणामाकरात् खनेर्वज्रं रत्नमुख्यमुद्धरति॥

उपप्लवो मन्त्रमयोपसर्गहरस्तवेनावधि येन संधात्।
जनुष्मतो जाङ्गुलिकेन जाग्रद्गरस्य वेगः किल जाङ्गुलीभिः ॥ २९ ॥

येन भगवता मन्त्रमयेन विषधरस्फुलिङ्गनाममन्त्रतद्विधमन्त्रयन्त्रधानेन उपसर्गहर इति नाम्ना श्रीपार्श्वनाथस्य स्तवेन स्तोत्रेण कृत्वा संधात् साधुसाध्वीश्राद्धश्राद्धीलक्षणात् उपप्लवः मिथ्यान्विव्यन्तरीभूतभ्रातृवराहमिहिरनिर्मितमान्यमरकाभिधोपद्रवोऽवधिहतो निवारितः। अत्र किलेति इवार्थे। 'उत्प्रेक्षाद्योतकाः शङ्के मन्ये नूनमिव ध्रुवम्। जाने किलादयो ज्ञेया प्रायेणैव क्रियोद्भवाः ॥' इति काव्यकल्पलतायाम्। केनेव। जाङ्गुलिकेन किल। यथा विषभिषजा जाङ्गुलीभिः समग्रभुजगविषापहारणीभिः विद्याभिः जनुष्मतो विषवेगघूर्णितजनात् जाग्रत्प्रत्यङ्गोपाङ्गं प्रसरतो गरस्य विषधरविषस्य वेगः प्रसरो हन्यते निराक्रियते। हन्तेर्वधिरादेशः भूते सिविषये ॥

यत्कीर्तिगङ्गां प्रसृतां त्रिलोक्यामालोक्य किं षण्मुखतां दधानः।
जगद्भ्रमीभिर्जननीं दिदृक्षुर्गङ्गासुतोऽध्यास्त मयूरपृष्ठम् ॥ ३० ॥

गङ्गासुतः स्वामिकार्तिकः। 'गङ्गोमाकृत्तिकासुतः' इति हैम्याम्। मयूरस्य केकिनः पृष्ठं तनोश्चरमं भागं प्रदेशम् अध्यास्त आरुरोह। किं कुर्वाणः। षट्संख्याकानि मुखानि यस्य तस्य भावस्तां दधानो बिभ्राणः। उत्प्रेक्ष्यते—जगत्सु त्रिभुवनेषु भ्रमीभिर्भ्रमणैः पर्यटनैः कृत्वा जननीं मातरं मन्दाकिनीं दिदृक्षुर्द्रष्टुमिच्छुः किमु। भ्रमीशब्दो दीर्घोऽप्यस्ति। 'अपि भ्रमीभङ्गिभिरावृताङ्गीम्' इति नैषधे। किं कृत्वा। व्यालोक्य दृष्ट्वा। काम्। यत्कीर्तिगङ्गाम्। यस्य भद्रबाहुस्वामिनः कीर्तिरेव मन्दाकिनीम्। किंभूताम्। त्रिलोक्यां स्वर्लोकपाताललोकभूलोकत्रिके निरन्तरतया प्रसृता अतिधवलीकृतत्रिभुवनामित्यर्थः ॥ इति श्रीभद्रबाहुस्वामी ॥

श्रीस्थूलभद्रेण निजान्ववायश्रो(स्रो)तस्विनीनायककौस्तुभेन।
विश्वत्रयी तद्यशसेव शोभामलम्भि तत्पट्टपयोधिपुत्री ॥ ३१ ॥

श्रिया शोभया युक्तेन स्थूलभद्रेण तयोः संभूतिविजयभद्रबाहुस्वामिनोः पट्टस्य पयोधिपुत्री लक्ष्मीः शोभामलम्भि प्रापिता। केनेव। तद्यशसेव। यथा तस्य श्रीस्थूलभद्रस्य यशसा श्लोकेन विश्वत्रयी त्रिलोकी शोभां लम्भिता। किंभूतेन स्थूलभद्रेण। निजः स्वकीयो यो नागरनामा ब्राह्मणवंशः स एव स्रोतस्विनीनायकः नदीपतिः समुद्रः तत्र कौस्तुभेन नारायणबाहुमध्यस्थास्तुर्मणिविशेषस्तत्सदृशस्तेन ॥

प्रवालमुक्तामणिमञ्जिमश्रीचित्राप्सरःस्वर्द्धिरदाश्वदृश्यम्।
कोशागृहं प्रावृषि यः सिषेवे हरिर्घनच्छायमिवाम्बुराशिम् ॥ ३२ ॥

यः श्रीस्थूलभद्रः प्रावृषि वर्षाकाले कोशानाम्न्या वेश्याया गृहं मन्दिरं सिषेवे भेजे। प्रथमं चतुर्मासमकार्षीदित्यर्थः। केचित्तु कदाचिदपि चकारेत्यूचुः। क इव। हरिरिव।

यथा कृष्णो जलदसमये समुद्रं सेवते । किंभूतं कोशागृहमम्बुराशिम् । प्रवाला विद्रुमा मुक्ता मौक्तिकानि मणयो रत्नानि तेषां मञ्जिमश्चारुतायाः शोभा यत्र । चित्रैश्चित्रितै-रालेख्यीकृतैरप्सरोभिः सुराङ्गनाभिरथ वा रम्भातिलोत्तमाघृताचीमेनकाउर्वशीप्रमु-खाभिः स्ववेंश्याभिः तथा स्वः स्वर्गस्य द्विरदैरैरावणैरश्वैरुच्चैःश्रवोभिः ऐरावणस्य उच्चैः-श्रवसश्च शतशो रूपनिर्माणादथ वा । द्विरदेन हस्तिमल्लेन अश्वेन उच्चैःश्रवसा सर्वेषामपि समुदाये बहुवचनं तैर्दृश्यं दर्शनार्हम् । पक्षे—हेमकन्दलमुक्ताफलमाणिक्यानां मञ्जिमा चारुता यत्र तथा श्रीर्लक्ष्मीस्तथा चित्रा विविधा आश्चर्यकारका वा अप्सरसः श्वेतगजोच्चैः-श्रवसौ तैर्विलोकयितुं योग्यं तेषां तत्रोत्पन्नत्वेन पश्चात्कर्मधारयः । पुनः किंभूतः । घ-ना निबिडा छाया बह्वी शोभा यत्र । तथा घना सान्द्रा घनानां मेघानां जलग्रहणागतानां छाया प्रतिच्छायिका सूर्यातपमुक्तप्रदेशः । 'छांहडी' इति लोके प्रसिद्धा यत्र । 'विभाषा सेनासुराछायाशालानिशानाम्' । एतदन्तस्तत्पुरुषो वा क्लीबं स्यात् । 'द्विजसेनं यवसुरं कुड्यच्छायं गोबालं श्वनिशं पक्षे द्विजसेना' इति प्रक्रियाकौमुद्याम् ॥

पण्याङ्गनायाः किलकिञ्चितानि न लेभिरे यस्य हृदि प्रवेशम् ।
धनुर्भृतः सानुमतः शिलायां पृषत्कपङ्क्तेः प्रहृतानि यद्वत् ॥ ३३ ॥

पण्याङ्गनायाः कोशावेश्यायाः किलकिञ्चितानि प्रमोदगदिततालीवादनगीतादिव्यामि-श्रक्रीडालीककपोलात्मपाणिनिवेशनाश्रुपातघातहर्षभियादिसंकराः । यस्य श्रीस्थूलभद्रस्य हृदि मानसे प्रवेशं स्थानं न लेभिरे न प्राप्नुवन्ति । यद्वद्यथा धनुर्भृतो धनुर्धरस्य पृष-त्कानां बाणानां पङ्क्तेः श्रेण्याः प्रहृतानि प्रहाराः सानुमतः पर्वतस्य शिलायामुपलक्षणात् गण्डोपले प्रवेशं न लभन्ते ॥

प्राङ्निर्जितश्रीरथनेमिमुख्यवीरावलीनामिव वैरशुद्धेः ।
विधित्सयाध्यास्य तदाश्रयं यो ध्यानासिनानङ्गनृपं जघान ॥ ३४ ॥

यः स्थूलभद्रो ध्यानं प्रणिधानं तदेव असिः खड्गस्तेन कृत्वा अनङ्गनामानं नृपं रा-जानं जघान हतवान् । किं कृत्वा । अध्यास्य आश्रित्य । प्रविश्येत्यर्थः । कम् । तस्य अनङ्गस्यैव कोशावेश्यामन्दिररूपमाश्रयं स्थानं गृहं वा । 'पस्त्यं संस्त्याय आश्रयः । ओको निवास आवासो वसतिः शरणं क्षयः ॥' इति हैम्याम् । उत्प्रेक्ष्यते—वैरशुद्धेर्वि-रोधशोधनस्य विधित्सयेव कर्तुमिच्छयेव। कासाम्। प्राक् पूर्वकाले निर्जिताः पराभूता ये । श्रीमान् महावीरत्वलक्ष्मीकलितः श्रीनेमिनाथसहोदररथनेमिः । स एव प्रमुखो मुख्यः आदिमो येषु । नन्दिषेणार्द्रकुमाराषाढभूतिमुखाः । परेऽपि वीराः पश्चात् पराक्रमकार-कत्वात् सुभटास्तेषामावल्यः श्रेण्यस्तासाम् ॥

चक्रीव रत्नानि चतुर्दशापि पूर्वाणि धत्ते स्म पतिर्यतीनाम् ।
यश्च क्वचिद्देवकुले स्वजामी चित्रीयितुं सत्य इवास सिंहः ॥ ३५ ॥

यः स्थूलभद्रः चतुर्दशापि पूर्वाणि क्वचित्सूत्रतः क्वचित्सूत्रार्थतः । इति प्रघोषः ।

धत्ते स्म धारयति स्म । किंभूतः । यः यतीनां साधूनां पतिः स्वामी गणधरः । क इव । चक्रीव । यथा चक्रवर्ती चतुर्दशरत्नानि धत्ते । च पुनर्यः क्वचित्कुत्रचिद्देवकुले यक्षायायतने । क्वचित्सिंहगुहायामपीति श्रूयते । यक्षाः, यक्षदिन्नाः, भूताः, भूतदिन्नाः, सेना, वेना, रेणा । क्वचिदेणापि नामद्वन्द्वम् । एतन्नाम्नीः स्वजामीः सप्तापिनिजभगिनीः। क्वचिदेकामेकैवभूतां स्वसारं चित्रीयितुमाश्चर्ययुक्ताः कर्तुमाश्चर्यमुत्पादयितुं सिंहः केसरिरूपधारक आस बभूव । क इव । सत्य इव । यथा सत्यः अवितथः पञ्चाननो भवति ॥

येनोपदेशच्छलतः स्वपाणिसंज्ञाज्ञया स्तम्भतलाददर्शि ।
निधिः स्वनिक्षिप्त इव प्रवासिसुहृद्गृहिण्याः सदने समेत्य ॥ ३६ ॥

येन श्रीस्थूलभद्रेण सदने अर्थान्मित्रमन्दिरे समेत्यागत्य प्रवासिनः परदेशाध्वनीनस्य। व्यापारार्थं याचनाकृते वा परमण्डले यातस्य । ब्राह्मणत्वाद्याचनाया न दोषः । एतादृशस्य सुहृदः स्वमित्रस्य गृहिण्याः पत्न्या निधिर्निधानमदर्शि दर्शितः । कस्मात् । स्तम्भतलात् । स्तम्भादधःप्रदेशात् । कया । संसारासारताप्रकटनसुहृत्करणानुभावस्वर्गापवर्गादिप्रापकलक्षणस्य उपदेशस्य धर्मदेशनादानन्त्यस्य च्छलतो मिषतः स्वस्यात्मनः पाणेर्हस्तस्य संज्ञा दर्शनादिचेष्टा सैवाज्ञा आदेशस्तया । क इव । स्वनिक्षिप्त इव । यथा आत्मनो हस्तेन भूमौ गुप्तीकृत्य रक्षितः निधिः स्वेष्टस्य दर्श्यते ॥ इति स्थूलभद्रस्वामी ॥

पट्टेऽथ तस्यार्यमहागिरिश्चापरः क्रमादार्यसुहस्तिसूरिः ।
बभूवतुर्धर्मधुरं दधानौ रथे यथा सारथिकस्य रथ्यौ ॥ ३७ ॥

अथ श्रीस्थूलभद्रे स्वर्गमलंकुर्वाणेऽनन्तरं तस्य स्थूलभद्रस्य पट्टे क्रमात् द्वौ पट्टधरौ बभूवतुः संजातौ । द्वौ कौ । एक आर्यमहागिरिः च पुनरपर आर्यसुहस्तिसूरिः । द्वावपि किं कुर्वाणः । धर्मस्य श्रीमन्महावीरप्रणीतस्य मोक्षमार्गसाधकस्य सुकृतस्य धुरं दधानौ धर्मकर्मणि कर्मठौ । यथा अत्र इवार्थे । कस्मिन् काविव । रथे रथ्याविव । यथा सारथिकस्य रथे स्यदने रथ्यौ रथस्य वोढारौ द्वौ वृषभौ भवतः ॥

मरुद्गृहादार्यसुहस्तिमूर्तिर्भूमौ मरुद्वृक्ष इवोत्ततार ।
कृपार्णवेन द्रमकोऽपि येन त्रिखण्डभूमीप्रभुतामलम्भि ॥ ३८ ॥

आर्यसुहस्तिनामा सूरिस्तस्य मूर्तिः शरीरं यस्य तादृशः । उत्प्रेक्ष्यते । मरुद्गृहात् स्वर्गलोकात् मरुद्वृक्षः कल्पद्रुमः भूमौ पृथिव्यामुत्ततार अवतीर्णवान् आगतवानिव । कृपार्णवेन दयासमुद्रेण येनार्यसुहस्तिसूरिणा द्रमको भिक्षुकोऽपि त्रिखण्डभूमेः षोडशसहस्रदेशक्षोणेः प्रभुतामाधिपत्यमलम्भि प्रापितः ॥

भूसुभ्रुवो भर्तृतया प्रगल्भभूषाविशेषानिव शातकौम्भान् ।
सपादलक्षानिह संप्रतिर्यो निर्मापयामास महाविहारान् ॥ ३९ ॥

यो द्रमकजीवः संप्रतिनृपतीभूय इह स्वभुजबलसाधितत्रिखण्डभूमीमण्डले महाविहारान् उत्तुङ्गशृङ्गाङ्गणोल्लिखितगगनतलान् प्रासादान्निर्मापयामास शिल्पिभिः कारयति स्म । किंभूतान् । सह पादेन एकेनांशेन पञ्चविंशतिसहस्रमितभागेन वर्तते यत्तादृशं लक्षं शतसहस्राणि येषु तान् । सपादलक्षप्रमितानित्यर्थः । उत्प्रेक्ष्यते । भर्तृतया स्वामित्वेन भूरेव सुभ्रूः भूमीभामिनी तस्याः शातकुम्भानां स्वर्णानामिमे शातकौम्भास्तान् । हिरण्मयानित्यर्थः । प्रगल्भान् मनोज्ञान् भूषार्थं शोभाकृते विशेषान् तिलकानिव । अथ वा अतिशयिनोऽलंकारानिव ॥

यः संप्रतिक्षोणिपतिः सपादकोटीर्नु पेटीः स्वयशोनिधीनाम् ।
स्याद्वादिनां सद्मसु शिल्पिसंघैरचीकरत्पारगतीयमूर्तीः ॥ ४० ॥

यः संप्रतिर्नाम क्षोणिपतिः राजा शिल्पिनां सूत्रधाराणां संघैः समूहैः । 'संघसार्थौ तु देहिनां वृन्दे' इति हैम्याम् । स्याद्वादिनामर्हतां सद्मसु गृहेषु स्वकारितप्रासादेषु अन्यत्रापि च पारगतानामिमाः पारगतीया मूर्तीः प्रतिमा जिनेन्द्रबिम्बानि अचीकरत् निर्मापयामासिवान् । किंभूताः । सह पादेनैकेन पञ्चविंशतिलक्षरूपेण अंशेन युक्ताः कोटीः शतलक्षी इति संख्या यासु ताः इति व्युत्पत्त्या बहुत्वम् । अन्यथा तु एकत्वमेव स्यात् । नु इति वितर्के । स्वस्यात्मनो यशांस्येव निधयः निधनानि सारद्रव्याणि तेषां पेटीर्मञ्जूषा इव ॥

नक्तं नलिन्यादिगुल्मनामविमानमार्गः प्रभुणा च येन ।
स्नेहप्रियेणेव महेभ्यसूनोरदर्श्यवन्तीसुकुमालनाम्नः ॥ ४१ ॥

च पुनर्येनार्यसुहस्तिनाम्ना प्रभुणा सूरिणा अवन्तीसुकुमाल इति नाम यस्य तादृशस्य महेभ्यसूनोर्व्यवहारिपुत्रस्य नक्तं निशायाः प्रथमे यामे नलिनीतिपदमादौ यस्य तादृशस्य गुल्मनाम्नः एतावता नलिनीगुल्माभिधानस्य विमानस्य मार्गः तपस्याग्रहणपूर्वकं कन्थेरिकाश्मशानकायोत्सर्गघोरपरीषहसहनलक्षणः पन्थाः दर्शितः प्रकाशितः । केनेव । स्नेहप्रियेणेव । यथा प्रदीपेन नक्तं मार्गः प्रदर्श्यते प्रकाश्यते ॥

स्थाने स्ववप्तुस्त्रिदिवं गतस्य व्यधादवन्तीसुकुमालसुनुः ।
नाम्ना महाकाल इतीह पुण्यपानीयशालामिव सार्वशालाम् ॥ ४२ ॥

इहावन्तीपुरीपरिसरवर्तिकन्थेरिकावनश्मशाने अवन्तीसुकुमालस्य सूनुर्नन्दनः त्रिदिवं स्वर्गं गतस्य प्राप्तस्य स्ववप्तुः निजतातस्य स्थाने नवप्रसूतबुभुक्षितसर्वापत्ययुक्तविकरालशृगाली सर्वाङ्गभक्षणसमयानशनपूर्वकपरलोकगमनभूमिप्रदेशे महाकाल इति नाम सार्वशालां श्रीमदवन्तीपार्श्वनाथप्रसादं व्यधाच्चकार । अर्थात्सूत्रधारैरकारयदित्यर्थः । उत्प्रेक्ष्यते। पुण्यमेव पानीयं तस्य शालां प्रपामिव । लोकेऽपि पुण्यार्थं पानीयशाला प्रपा कार्यते ।। इति आर्यमहागिरि-आर्यसुहस्तिसुरीन्द्रौ एकपट्टधरौ ॥

श्रीमत्सुहस्तिव्रतिवासवस्य श्रीसुस्थितः सुप्रतिबद्धसूरिः ।
पदं विनेयौ नयतः स्वलक्ष्मीं क्रमं मुरारेरिव पुष्पदन्तौ ॥ ४३ ॥

श्रीमत्सुहस्तिनाम्नो व्रतिवासवस्य मुनीन्द्रस्य विनेयौ उभौ शिष्यौ पदं पट्टं श्रियं शोभां नयतः स्म प्रापयतः स्म । द्वौ कौ । एकः श्रीयुक्तः शोभाकलितः सुस्थितनामा सूरिः, अपरः सुप्रतिबद्धनामा आचार्यः । काविव । पुष्पदन्तौ । 'पुष्पदन्तावेकोक्त्या शशिभास्करौ' इति हैम्याम् । यथा सूर्याचन्द्रमसौ मुरारेः क्रममाकाशं लक्ष्मीं लम्भयतः ॥

प्रीतिं सृजन्ती पुरुषोत्तमानां दुग्धाम्बुराशेरिव पद्मवासा ।
हृदा जिनं बिभ्रत आविरासीत्तत्सूरियुग्मादिह कौटिकाख्या ॥ ४४ ॥

इह दक्षिणभरतार्धभूमौ तत्सूरियुग्मात् सुस्थितसुप्रतिबद्धनामाचार्यद्वन्द्वात् गणस्य गच्छस्य कौटिका इति आख्या नामाविरासीत् प्रकटीबभूव । पूर्वं तु सुधर्मस्वामिनमारभ्य सुहस्तिसूरिं यावत्साधूनां निर्ग्रन्था इत्यभिधानमासीत् । सुस्थितसुप्रतिबद्धसूरियुगलात् द्वितीयं कौटिकगण इति नाम बभूव । कोटिशः सूरिमन्त्रजापात् कोट्यंशसूरिमन्त्रधारित्वाद्वा कौटिकः । केव । पद्मवासेव । यथा दुग्धाम्बुराशेः क्षीरसमुद्राल्लक्ष्मीराविर्बभूव । सूरियुग्मात् दुग्धाम्बुराशेश्च किं कुर्वतः । हृदा हृदयेन मनसो मध्येऽन्तरेण जिनमर्हन्तं विष्णुं च बिभ्रतो धारयतः । कौटिकाख्या पद्मवासा च किं कुर्वती । पुरुषेषूत्तमानां श्रेष्ठानां धार्मिकाणां विष्णोश्च प्रीतिमानन्दं तुष्टिं स्नेहं सृजन्ती कुर्वती ॥ इति सुस्थितसुप्रतिबद्धौ सूरी एकपट्टधरावेव ॥

श्रीइन्द्रदिन्नव्रतिसार्वभौमस्तत्पट्टलक्ष्मीतिलकं बभूव ।
निशुम्भ्यते दाम्भिकता स येन कलिन्दकन्येव हलायुधेन ॥ ४५ ॥

श्रिया त्रिंशत्सूरिगुणलक्ष्म्याकलितसुप्रसिद्धिमान् इन्द्रदिन्ननामा व्रतिनां वाचंयमानां मध्ये सार्वभौमश्चक्रवर्ती तयोः सुस्थितसुप्रतिबद्धाचार्ययोः पट्टलक्ष्म्यास्तिलकं विशेषको बभूव संजातः । स कः । येन भगवता दाम्भिकता दम्भवारिता कापट्यं निशुम्भ्यते स्म निर्दलितम् । केनेव । हलायुधेनेव । यथा बलभद्रेण कलिन्दकन्या यमुना निशुम्भिता । पराभूतेत्यर्थः । 'रुक्मिप्रलम्बयमुनाभिदनन्तभाल–' इति हैम्यां रामनामसु ॥

पक्षद्वयं भिन्नतमोभरेण पित्रोः पवित्रीक्रियते स्म येन ।
कुबेरदिग्दक्षिणयोः पदव्योर्द्वन्द्वं प्रियेणेव पयोजिनीनाम् ॥ ४६ ॥

येन इन्द्रदिन्नसूरिणा पित्रोर्जननीजनकयोः पक्षद्वयं वंशद्वन्द्वम् । मातृवंशः पितृवंशश्चेत्यर्थः । पवित्रीक्रियते स्म पावनीचक्रे । केनेव । प्रियेणेव । यथा पयोजिनीनां कमलिनीनां भर्त्रा भानुना कुबेरदिग्दक्षिणयोः उत्तरायाम्योः पदव्योर्मार्गयोर्द्वन्द्वं युगलं

पवित्र्यते । येन भानुना च किंभूतेन । भिन्नो निर्दलितस्तमसामज्ञानानां पाप्मनां वा ध्वान्तानां च भरः समूहो येन ॥ इति श्रीइन्द्रदिन्नसूरिः ॥

श्रीदिन्नसूरिर्गुणभूरिरस्मात्सप्तर्षिभूरङ्गिरसो यथासीत् ।
येनानुरागोऽवधि कालनेमिः कल्लोलिनीवल्लभशायिनेव ॥ ४७ ॥

अस्मात् श्रीइन्द्रदिन्नसूरेः श्रीदिन्नसूरिरासीत् । किंभूतः । गुणा भूरयो बहुला यस्मिन् । कस्मात्क इव । अङ्गिरसः सप्तर्षिभूरिव । यथा । अङ्गिरा नाम तापसविशेषस्तस्मात् बृहस्पतिर्जातः । 'बृहस्पतिः सुराचार्यो जीवश्चित्रशिखण्डिजः । सप्तर्षयश्चित्रशिखण्डिनः' इति हैम्याम् । तथा । 'गीर्बृहत्योः पतिरुतथ्यानुजाङ्गिरसौ गुरुः' इत्यपि हैम्याम् । येन दिन्नसूरिणा अनुरागो हतः । केनेव । कल्लोलिनीवल्लभशायिनेव । यथा नारायणेन कालनेमिर्नामा दैत्यो निहन्यते स्म ॥

पञ्चाशुगान्यः समितीर्विधाय बभञ्ज पञ्चाशुगपञ्चबाणीम् ।
शरेण केनापि न चेत्कदाचित्कस्मान्न तं स प्रभवेद्धनुष्मान् ॥ ४८ ॥

यो दिन्नसूरिः पञ्च ईर्या-भाषा-एषणा-आदाननिक्षेपपा-पारिष्ठापनिकाख्याः पञ्चसंख्याकाः समितीराचारविशेषान् पञ्च प्रमाणान् आशुगान् बाणान् विधाय पञ्चाशुगस्य कामस्य पञ्चानां बाणानां समाहारः पञ्चबाणी तां पञ्चापि सायकान् बभञ्ज भनक्ति स्म । 'चिच्छेद' इत्यपि पाठः । तत्र छिनत्ति स्मेत्यर्थः । एवं चेत्तर्हि स धनुष्मान् स्मरधनुर्धरः कदाचित् कस्मिन्नपि प्रस्तावे केनापि संमोहन-उन्माद-तापन-शोषण-मारणाख्यानां पञ्चानां विशिखानां मध्ये केनचित् शरेण कृत्वा तं दिन्नसूरिं कस्मात्कारणात् न प्रभवेत् प्रहरेत् । 'आद्यौ संमोहनोन्मादौ परौ तापनशोषणौ । तथा मारण इत्याहुः पञ्च बाणा मनोभुवः ॥' इति स्मरबाणनामानि सूक्ते ॥ इति दिन्नसूरिः ॥

सूरीश्वरः सीहगिरिः क्रमेण व्यभासयत्तत्प्रभुपट्टलक्ष्मीम् ।
जिनस्य पादं शिरसा स्पृशन्तीं निकाय्यराजीमिव केतुवारः ॥ ४९ ॥

क्रमेण पट्टपरिपाट्या सीहगिरिर्नामा सूरीश्वरः स चासौ प्रभुश्च तत्प्रभुस्तस्य दिन्नसूरेः पट्टलक्ष्मीं व्यभासयत् कान्तिमतीं चकार । भूषयति स्मेत्यर्थः । क इव । केतुवार इव । यथा ध्वजव्रजो निकाय्यराजीं सौधधोरणीं विभासयति । पट्टलक्ष्मीं निकाय्यराजीं च किंभूताम् । शिरसा मस्तकेन आदिना च । 'माथासिरऊं' इति लोकप्रसिद्धित्वात् । शृङ्गेण च जिनस्यार्हतः पादं पट्टपरम्पराया आदिभूतत्वाज्जिनस्य विष्णुपदमाकाशं च । स्पृशन्तीमाश्रयन्तीम् ॥

विन्ध्यं निपीताब्धिरिव व्रतीन्द्रो य एधमानं निषिषेध कोपम् ।
यद्वाक्तरङ्गैश्च जिताभ्रसिन्धुस्त्रपातिरेकादिव निम्नगासीत् ॥ ५० ॥

यः सीहगिरिर्नाम व्रतीन्द्रो मुनिपुरंदर एधमानं जगज्जनाश्रयत्वेन वर्धमानं कोपं क्रोधं निषिषेध न्यवारयत् । क इव । निपीताब्धिरिव । यथा अगस्तितापसः कथंचित् सूर्यमार्गरुन्धनाय वर्धितुं प्रवृत्तविन्ध्याचलं निषेधते स्म । च पुनर्यस्य सीहगिरिसूरेर्वाक्तरङ्गैर्वचनचातुर्यरसकल्लोलैः कृत्वा जिताभिभूता सती अभ्रसिन्धुर्गगनगङ्गा । उत्प्रेक्ष्यते । त्रपातिरेकात् लज्जातिशयात् निम्नं नीचैर्गच्छतीति निम्नगेवासीदधोवदना जाता ॥ इति सीहगिरिसूरिः ॥

तमोभरोर्वीधरभेदवज्रिवज्रोऽथ वज्रप्रभुरेतदीयम् ।
पट्टं परां प्रापयति स्म भूषां माणिक्यकोटीर इवोत्तमाङ्गम् ॥ ९१ ॥

अथानन्तरं वज्रप्रभुर्वज्रस्वामी एतदीयं सीहगिरिसंबन्धिनं पट्टं परां प्रकृष्टां भूषां लक्ष्मीं प्रापयति स्म । किंभूतो वज्रप्रभुः । तमसामज्ञानानां पापानां च भरः समुदायः स एवोर्वीधरः पर्वतस्तस्य भेदे व्यापादने दलने वज्रिणः शक्रस्य वज्र इव कुलिशः । हीरमणिशङ्कामपाकर्तुं वज्रीति पदोपादानम् । तथा च नैषधे—'स्फुलिङ्गाः स्फुटं भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः' इति । क इव अलंकृतवान् । कोटीर इव । यथा माणिक्यानां मणिविशेषाणां कोटीरो मुकुटः उत्तमाङ्गं भूपालमौलिं नृपमस्तकं श्रियं नयति ॥

आशैशवादेव जहौ निजाम्बां वेलामिव क्षीरनिधेः सुधांशुः ।
अध्यैष्ट यः पालनके शयानोऽप्येकादशाङ्गी स्मृतपूर्वजन्मा ॥ ९२ ॥

यो वज्रस्वामी आशैशवादेव । किंचिन्न्यूनषण्मास्यवस्थामारभ्य रोदनदम्भेनेत्यर्थान्तरं निजामात्मीयामम्बां सुनन्दानाम्नीं मातरं जहौ त्यजति स्म । क इव । सुधांशुरिव । यथा चन्द्रो बाल्यादेव सहरिसुरासुरकरैर्मन्दरेण मथ्यमानक्षीरनीरनायकान्तरोत्पत्तिसमये एव क्षीरनिधेर्दुग्धवारिधेर्वेलां जहाति स्म । च पुनर्यः पालनके बालकानामन्दोलनस्थानकविशेषे शयानोऽपि स्वपन्नपि एकादशानामाचाराङ्ग-सूत्रकृदङ्ग-स्थानाङ्ग-समवायाङ्ग-भगवत्यङ्ग-ज्ञाताधर्मकथाङ्ग-उपासकदशाङ्ग-अन्तकृद्दशाङ्गाङ्ग-अनुत्तरोपपातिकादशाङ्ग-प्रश्नव्याकरणाङ्ग-विपाकश्रुताङ्ग-रूपाणामङ्गाणां समाहार एकादशाङ्गी तामध्यैष्ट अधीतवान् कण्ठपीठीकरोति स्म । स्वसंनिधिस्थितबहुश्रुतार्यिकागण्यमानैकादशाङ्गसूत्रश्रवणादेव पूर्वाधीतामेकादशाङ्गीं स्मृतवानित्यर्थः । अत एव किंभूतम् । स्मृतं स्वहृद्गोचरीकृतं पूर्वं प्राक्तनं जन्मावतारो येन । जातिस्मरणेनाविज्ञातप्राचीनजन्मा ॥

यः पुष्पदः पल्लवलीलयेव वैराग्यलक्ष्म्यालमकारि बाल्ये ।
प्राग्जन्ममित्रात्त्रिदशान्नभोगविद्यां पुनर्वैक्रियलब्धिमापत् ॥ ९३ ॥

यो वज्रस्वामी बाल्ये शैशवे वैराग्यलक्ष्म्या संयमग्रहणबुद्ध्या संसारासारताभावनधिया वा अलमकारि अलंकृतः भूष्यते स्म । क इव । पुष्पद इव । यथा पादपः प-

ल्लवानां किशलयानां लीलया बिलासेनालंक्रियते । पुनर्यो वज्रस्वामी प्राग्जन्मनः पूर्वदेवभवसंबन्धिनो मित्रात् सुहृद्भावमासादितात् त्रिदशात् तिर्यक्जृम्भकनिर्जरात् नभोगविद्यामाकाशगामिनीं विद्यां मन्त्रविशेषं पुनरन्यां वैक्रियलब्धिं नवीनरूपादिविकुर्वाणां शक्तिं च आपल्लेभे ॥

दुर्भिक्षवर्षेषु सुभिक्षभूमीं संघं कृपानीरनिधेर्निनीषोः ।
वज्रप्रभोर्यस्य पटः पटीयान्विमानवद्व्योमनि दीप्यते स्म ॥ ९४ ॥

यस्य वज्रप्रभोः पटो वस्त्रं वपुराच्छादनवसनं कल्पः व्योमनि आकाशे विमानवत् दिव्ययानमिव दीप्यते स्म शुशुभे । किंभूतः पटः । अतिशयेन पटुः पटीयान् पटुर्महतीं बहुसंघजनोपवेशनोचितां वृद्धिं प्राप्तः । ईप्सितस्थानं प्रापयितुं समर्थो वा । किंभूतस्य वज्रप्रभोः । कृपायाः दुर्भिक्षसीदत्संघजनोपरिदयाया नीरनिधेः समुद्रस्य । अत एव किं कर्तुमिच्छोः । निनीषोर्नेतुमिच्छोः प्रापयितुकामस्य । कम् । संघसाधुसाध्वीश्रावकश्राविकारूपजैनवर्गम् । काम् । सुभिक्षभूमीं प्रभूतनिष्पन्नधान्यशतशोऽनुभावसुकालवसुधां बौद्धनगरीम् । केषु । दुर्भिक्षवर्षेषु कालानुभावाद्वादशवत्सरीं यावन्मेघजलबिन्दुमात्रवृष्टेरभावेन अन्नपानदौर्लभ्याद्दुःकालसंवत्सरेषु ॥

सहैव देहेन समग्रसंघं नयत्यसौ सिद्धिपुरीमिवैनम् ।
जनैरिति व्योमनि तर्क्यमाणः पटः प्रभोर्बौद्धपुरीमवाप ॥ ९५ ॥

प्रभोर्वज्रस्वामिनः पटः कल्पः वस्त्रं वा बौद्धपुरीं सुगतनगरीमवाप गतः प्राप्तः । पटः किं क्रियमाणः । इति अमुना प्रकारेण जनैर्लोकैर्व्योमनि आकाशे अर्थाद्गच्छन् वितर्क्यमाणो विचार्यमाणः । इति कथम् । यदसौ वज्रस्वामिपटो देहेन वर्तमानेन उदारिकशरीरेणैव सह एनं दृश्यमानं समग्रमखिलं संघं सिद्धिपुरीं भुक्तिनगरीं नयति प्रापयतीव ॥

ध्यातुर्वरं श्रीः श्रुतदेवतेव यस्यादरात्पद्ममदत्त पद्मा ।
वनात्पितुर्मित्रहुताशनस्याग्रहाच्च यो विंशतिलक्षपुष्पान् ॥ ९६ ॥

पर्युषणदिनेषु अष्टाह्निकामहोत्सवं कर्तुमिच्छोः जैनद्विष्टतया बौद्धनृपतिवारितमालितमण्डलात् पुष्पमात्रमप्यनाप्नुवतः संघस्य कृते कुसुमानयनार्थं प्रस्थितस्य पद्महृदे यातस्य यस्य वज्रस्वामिनः पद्मा लक्ष्मीः आदरात् भक्तिभरतः स्तवनवन्दनपूर्वकं पद्मं स्वहृदा सहस्रपत्रमादाय भगवत्पूजार्थं प्रयान्ती श्रीस्तत्सहस्रदलकमलं पद्मार्थोपगतायास्मै अदत्त दत्तवती । केव । श्रुतदेवतेव । यथा सरस्वती ध्यातुर्ध्यानकर्तुः पुंसः वरमभिमतार्थसिद्धिं दत्ते । च पुनर्यो वज्रस्वामी पितुर्धनगिरेर्मित्रस्य हुताशननामदेवस्य वनात्काननात् तत्सुरेणैवावचित्यानीय ढौकितान् विंशतिलक्षमितान् पुष्पान् कुसुमान्यग्रहीत् गृहीतवान् । मित्रतिर्यक् जृम्भकदेवविनिर्मितविमाने स्थापितवानित्यर्थः । पुष्पशब्दः पुंनपुंसके ॥

मूर्तैरिव स्वस्य गुणैः प्रफुल्लत्पुष्पोत्करैः पर्युषणाक्षणेषु ।
समुन्नतिं शाम्भवशासनस्य तस्यां सुनन्दातनयस्तातान ॥ ९७ ॥

सुनन्दा नाम्नी धनगिरिपत्नी तस्यास्तनयो नन्दनो वज्रस्वामी पर्युषणाक्षणेषु वार्षिकपर्वाष्टाह्निकादिवासरमहोत्सवेषु तस्यां बौद्धनगर्यां शाम्भवस्य जैनस्य शासनस्य उन्नतिं प्रभावनां ततान चकार । कैः । प्रफुल्लत्पुष्पोत्करैः विकसत्कुसुमसमूहैः । उत्प्रेक्ष्यते । मूर्तैरङ्गयुतैः स्वस्य वज्रस्वाम्यात्मनः प्रशमादिभिर्गुणैरिव ॥

प्राबोधयद्बौद्धपुरीप्रभुं यः समं समग्रैरपि पौरलोकैः ।
साकं शकुन्तैरिव पङ्कजानां कुञ्जं समुद्यद्गगनाध्वनीनः ९८ ॥

यो वज्रस्वामी बौद्धपुरीप्रभुं सुगतनगरीस्वामिनं प्राबोधयत् प्रतिबोधयति स्म । जैनं चकारेत्यर्थः । कथम् । सार्धम् । कैः । समग्रैः समस्तैरपि पौरलोकैर्नागरिकजनैः समम् । क इव । समुद्यद्गगनाध्वनीन इव यथा अभ्युदयं प्राप्नुवन् भास्करः शकुन्तैर्विहंगमैः साकं सह पङ्कजानां पद्मानां कुञ्जं वनं कमलपटलं प्रबोधयति । जागरयति विकाशयति च ॥

अपास्यति स्माढ्यसुतां सरागां यो रुक्मिणीं काञ्चनकोटिभिश्च ।
क्रीडन्मृगेन्द्रां स्मितसल्लकीभिर्निकुञ्जराजीमिव कुञ्जरेन्द्रः ॥ ९९ ॥

यो वज्रस्वामी काञ्चनानां सुवर्णकानां कोटिभिः । 'कोडीसए धणसंचियस्स गुणस्स भरियारा कन्नाए' इत्युपदेशमालावचनात् । कोटीनां शतैः सममाढ्यस्य महाव्यवहारिणः सुतां पुत्रीं रुक्मिणीति नाम्नीं कन्याम् अपास्यति स्म त्यक्तवान् । किंभूताम् । सरागां स्वसौधसंनिधिस्थितसाध्वीगीयमानयद्गुणग्रामा कर्णनोद्भूतानुरागवशंवदतया 'अस्मिन् भवे मम प्राणनाथो वज्रस्वाम्येव नान्यः' इति कृतनिश्चयतया सस्नेहां जहौ । क इव । कुञ्जरेन्द्र इव । यथा गजराजः स्मितसल्लकीभिर्विकसितगजप्रियातरुपङ्क्तिभिः सार्धं 'सल्लकी तु गजप्रिया' इति हैम्याम् । निकुञ्जराजीं वनमालामपास्यति । किंभूतां निकुञ्जराजीम् । क्रीडन्मृगेन्द्रां स्वेच्छया रममाणपञ्चाननाम् ॥ इति वज्रस्वामी ॥

श्रीवज्रसेनोऽथ तदीयपट्टं व्यभासयत्प्रीणितजन्तुजातः ।
स्फुरन्मदोद्भेद इव द्विपेन्द्रकपोलमानन्दितचञ्चरीकः ॥ ६० ॥

अथानन्तरं वज्रसेननामा सूरिस्तदीयपट्टं वज्रस्वामिसंबन्धिपदं व्यभासयत् भूषयति स्म । किंभूतो वज्रसेनः । प्रीणितानि प्रतिबोधप्रदानेन तृप्तियुक्तानि कृतानि जन्तूनां प्राणिनां जातानि समूहा येन । क इव । स्फुरन्मदोद्भेद इव । यथा प्रकटीभवन् दानोदकोदयः दीप्यमानः शोभाकारी दानजलाविर्भावो वा द्विपेन्द्रस्य गजराजस्य कपोलं गण्डस्थलमलंकुरुते । किंभूतः । आनन्दिता यथाकामं कुसुमामोदाभिभावुकमदाम्भःपातेन प्रमोदिताश्चञ्चरीका मधुकरनिकरा येन ॥

दुर्भिक्षके पायसमेक्ष्य लक्षपक्कं महेभ्यस्य गृहे प्रभुर्यः ।
दिने द्वितीये कुलदेवतेव न्यवेदयद्भाविसुकालमस्य ॥ ६१ ॥

यः वज्रसेनः प्रभुर्गणस्वामी दुर्भिक्षके द्वितीयवारं द्वादशहायनजलवाहावृष्टेरुद्भूतदुःकालसमये श्रीवज्रस्वामिना दक्षिणस्यां दिशि प्रेषितः सन् अस्य महेभ्यस्य द्वितीये आगामिनि दिने वासरे भावि भविष्यत्सुभिक्षं सुकालं न्यवेदयत् कथयामास । केव । कुलदेवतेव । यथा सम्यगाराधिता गोत्रदेवी सुभिक्षं निवेदयति । किं कृत्वा । एक्ष्य आलोक्य । किम् । पायसं परमान्नम् । किंभूतं पायसम् । लक्षेण सुवर्णटङ्कानां शतसहस्र्या पक्कं शालिदुग्धादि मेलयित्वा राद्धं निष्पन्नम् । कस्मिन् । यस्य कस्यचिन्महेभ्यस्य व्यवहारिणः गृहे मन्दिरे । तस्यैव चतुर्नन्दनस्येभ्यस्य दीक्षाग्रहणवाग्बन्धपूर्वकं स्वस्तनदिने याममध्ये पञ्चशतीयुगंधरीधान्यभृतवहनागमनैर्भाविसुकालमावेदितवानित्यर्थः ॥

चत्वार एतत्तनया विनेयाः शाखाभृतस्तस्य विभोर्बभूवुः ।
इवामरद्वेषिचमूजयश्रीजुषः सुरेन्द्रद्विरदस्य दन्ताः ॥ ६२ ॥

चत्वारः चतुःसंख्याका एतस्य महेभ्यस्य तनया नन्दनास्तस्य वज्रसेनस्य विभोः स्वामिनः विनेयाः शिष्या बभूवुः । नागेन्द्र-चन्द्र-निर्वृति-विद्याराख्याः शाखा बिभ्रति धारयन्तीति तादृशाः । कस्य के इव । सुरेन्द्रद्विरदस्य दन्ता इव । यथा शक्रगजस्य ऐरावणस्य दन्तकोशाश्चत्वारो भवन्ति । किंभूता दन्ताः । अमरद्वेषिणां दानवानां चमूनां सेनानां जयस्य विजयस्य श्रियं लक्ष्मीं जुषन्ते सेवन्ते ॥ इति वज्रसेनसूरिः ॥

भर्त्रा सुराणामिव लोकपालेष्वेतेषु सौदर्ययतीश्वरेषु ।
श्रीचन्द्रनाम्ना मुनिपुङ्गवेन तत्पट्टपूर्वा प्रमदेन भेजे ॥ ६३ ॥

एतेषु नागेन्द्र-चन्द्र-निर्वृति-विद्याराभिधेषु चतुर्षु सौदर्येषु भ्रातृषु यतीश्वरेषु सूरिषु मध्ये चन्द्रनाम्ना मुनिपुङ्गवेन सुरीन्द्रेण तस्य वज्रसेनसूरेः पट्ट एव पूर्वा प्राचीदिक् भेजे सिषेवे । केन । प्रमोदेनानन्देन । केनेव । भर्त्रेव । यथा इन्द्र-यम-वरुण-कुबेराख्येषु लोकपालेषु मध्ये सुराणां देवानां भर्त्राधिपतिना शक्रेण पूर्वाशा सेव्यते ॥

राजा स्वयं राजनतं सदोषो निर्दोषमङ्कोपगतो निरङ्कम् ।
सास्तो निरस्तं च निजाधिकं यं समीक्ष्य चिक्षाय शशी किमर्त्या ॥६४॥

यं चन्द्रसूरिं निजादात्मनः सकाशात् अधिकं समीक्ष्य दृष्ट्वा शशी चन्द्रः । उत्प्रेक्ष्यते । अर्त्या दुःखेन किमु चिक्षाय क्षीणो जात इव । आधिक्यमेव दर्शयति । किंभूतः शशी । स्वयमात्मना एको राजा । यं किंभूतम् । राजभिर्भूमीन्द्रैर्नतं नमस्कृतम् । 'राजा तु नृपचन्द्रयक्षेषु' इति अनेकार्थः । पुनः किंभूतः शशी । सह दोषैः कलङ्कादिकैर्दोषया रात्र्या च तत्पतित्वाद्वर्तते यः । यं किंभूतम् । निर्गता दोषा अपगुणा

यस्मात्सः । पुनः किंभूतः शशी । अङ्केन मध्यवर्तिश्यामतालक्षणेन लाञ्छनेन गुरुदाराधिगमनात्कलङ्केनापवादेनोपगतो युक्तः । यं किंभूतम् । निर्गतोऽङ्कः संयममालिन्यादिकलङ्को मन्तुर्वा यस्मात् । 'अङ्को भूषारूपकलक्ष्मसु । चित्राजौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसोः ॥' इत्यनेकार्थः । पुनः किंभूतः शशी । सहास्तेन वर्तते यः । यं किंभूतम् । निर्गतोऽस्तः क्षयो यस्मात्सदाभ्युदयत्वात् ॥

श्रीचन्द्रसूरेरथ चन्द्रगच्छ इति प्रथा प्रादूरभूद्गणस्य ।
भागीरथीनाम भगीरथाख्यमहीमहेन्द्रादिव देवनद्याः ॥ ६५ ॥

अथ चन्द्रसूरिपट्टभवनानन्तरं श्रीयुक्ताचन्द्रनामसूरेर्गणस्य कौटिकगच्छस्य चन्द्रगच्छ इति प्रथा ख्यातिः प्रादुरभूत् प्रकटीभूता । कस्मात्कस्या इव । भगीरथाख्यमहीमहेन्द्राद्देवनद्या इव । यथा सगरचक्रिज्येष्ठनन्दनजह्नुकुमारसूनुर्भगीरथ इत्याख्या नाम यस्य तादृशान्महीमहेन्द्राद्वसुधावासवात् एतावता भगीरथभूपात् देवनद्या गङ्गाया भागीरथीति नाम प्रकटीभूतम् ॥ इति चन्द्रसूरिः ॥ इति गच्छस्य चन्द्रगच्छ इति तृतीयं नाम ॥

कल्लोलिकारुण्यरसान्वितस्य सामन्तभद्रप्रभुरस्य पट्टम् ।
व्यराजयद्वारिरुहाकरस्य मध्यं यथोन्निद्रितपुण्डरीकम् ॥ ६६ ॥

अस्य चन्द्रसूरेः पट्टं सामन्तभद्रप्रभुर्व्यराजयत् विभूषयामास । अस्य किंभूतस्य । कल्लोलास्तरङ्गा बाहुल्येन वृद्धिः संजातास्मिंस्तादृशेन कारुण्याख्येन कृपानाम्ना रसेनान्वितो युक्तः । तस्य । अत्रापि यथा इवार्थे । किमिव । मध्यमिव । यथा वारिरुहाकरस्य तटाकस्य मध्यमन्तरालमुन्निद्रितं विकस्वरीभूतं पुण्डरीकं श्वेतकमलविशेषं विराजयति ॥

वैमुख्यभाग्यो विषयात्कुरङ्गद्वेषीव जज्ञे विपिने निवासी ।
तस्मान्मुनीन्दोर्वनवासिसंज्ञा परा पुनः प्रादुरभून्मुनीनाम् ॥ ६७ ॥

यः सामन्तभद्रप्रभुः विपिने वन एव निवसति तिष्ठतीति एवंशीलो जज्ञे जातः । प्रायो वनवास्येवासीदित्यर्थः । किंभूतः । विषयात् शब्दरूपगन्धरसस्पर्शसंज्ञात् गोचरात् वैमुख्यं पराङ्मुखतां भजते सेवते । सर्वथापि तेषु मनोमात्रमकुर्वन् । क इव । कुरङ्गद्वेषीव । यथा मृगेन्द्रो विपिने निवासी स्यात् । किंभूतः । विषयाद्देशात् अथ वा वसद्भूमेर्विमुखतामाश्रयेत् । तस्मात्सामन्तभद्रात्सूरेर्मुनीन्दोः सूरेर्मुनीनां साधूनां पुनश्चतुर्थवारं परा अन्या वनवासीति चतुर्थी संज्ञा नाम प्रादुरभूत् प्रकटीबभूवुषी ॥ इति सामन्तभद्रसूरिः ॥ इति गच्छस्य वनवासीति चतुर्थं नाम ॥

कोरण्टके वीरजिनेन्द्रमूर्तिं दृक्पान्थवृत्तिं कृतपुण्यपाकाम् ।
यः प्रत्यतिष्ठत्किमु सत्रशालां स वृद्धदेवोऽजनि तस्य पट्टे ॥ ६८ ॥

स प्रसिद्धो वृद्धदेवनामा सूरिः सामन्तसूरेः पट्टेऽजनि जज्ञे । यत्तदोर्नित्याभिसंबन्धात्स कः । यो वृद्धदेवसूरिः कोरण्टके कोरण्टकनाम्नि नगरे वीरजिनेन्द्रस्य महावीर-

देवस्य मूर्तिं प्रतिमां प्रत्यतिष्ठत्प्रतिष्ठितवान् । किंभूतां मूर्तिम् । दृशोऽर्थाद्भव्यनेत्राण्येव पान्था इतस्ततः भ्रमणशीलत्वात्पथिकाः तेषां वृत्तिर्वर्तनमाजीविका यत्रातिप्रह्लाददातृत्वात् विश्रामस्थानम् । पुनः किंभूताम् । कृतो निर्मितः पुण्यस्य सुकृतस्य पाकः फलप्रदानाभिमुखता यया । उत्प्रेक्ष्यते—सत्रशालां किमु दानशालामिव । कीदृशी । दृग्वत् पर्यटनकारिणः पान्था मार्गचारिणः तेषां वृत्तिराजीविका यस्याम् । पुनः किंभूताम् । कृतः कल्पितः पुण्यः पवित्रः सम्यक् पाकः अन्नादिसंस्कारो यस्याम् ॥ इति वृद्धदेवसूरिः ॥

प्रद्योतनाह्वप्रभुणाप्यमुष्य पट्टं परं वैभवमाबभार ।
त्रैलोक्यलक्ष्मीतिलकायितेन पितुः स्वपुत्रेण यथान्ववायः ॥ ६९ ॥

अपि पुनरमुष्य श्रीवृद्धदेवसूरिशक्रस्य पट्टः प्रद्योतन इत्याह्वा नाम यस्य तादृशेन प्रभुणा सूरीन्द्रेण कृत्वा परं प्रकृष्टं वैभवं शोभामाबभार धत्ते स्म । यथा पितुस्तातस्यान्ववायो वंशः स्वपुत्रेण निजनन्दनेन स्वस्य पितुरेव पुत्रेणेति । औरसेनेत्यसूचि । परमां श्रियं बिभर्ति । प्रद्योतनसूरिणा पुत्रेण च किंभूतेन । त्रैलोक्यस्य भुवनत्रयस्य लक्ष्म्याः श्रियस्तिलकवद्विशेषक इवाचरितेन । 'तैस्तैरात्मगुणैर्येन त्रिलोक्यास्तिलकायितम्' इति चम्पूकथायाम् ॥

प्रबोधयन्भव्यसरोजराजी संशोषयन्दुर्नयकर्दमांश्च ।
दोषोदयं निर्दलयन्महस्वी प्रद्योतनोऽन्यः किमभूद्भुवोऽयम् ॥ ७० ॥

अयं प्रद्योतनसूरिः भुवः पृथिव्या अन्यो व्योमापेक्षया अपरः प्रद्योतनः सूर्यः अभूत् संजातः । किंभूतः । भव्याः प्राणिन एव सरोजराज्यः कमलमालास्ताः प्रबोधयन् सम्यक्त्वशालिनः सृजन् । पुनः किंभूतः । दुर्नया मिथ्यादृश एव पङ्कास्तान् शोषयन् विरलयन् मूलादुच्छिन्दन् वा । पुनः किंभूतः । दोषाणामपगुणानामुदयमाविर्भावं निर्दलयन् विध्वंसयन् मूलतोऽपि निवारयन् । पुनः किंभूतः । महस्वी । 'पडिरूवो तेअस्सी' इत्युपदेशमालावचनात् । तेजस्वी परवादिभिरसह्यः । सूर्योऽपि भव्याः स्वाभिमता मैत्र्यात्पद्मपङ्क्तीर्विकाशयति, तथा दुष्टो नयो जनादियातनासंचारलक्षणो येषां तादृक् जम्बालान् शोषं नयति, तथा दोषाणां रात्रीणामुदयं निर्दलयति । तथा महस्वी प्रतापवांश्च भवति । 'स राशिरासीन्महसां महोज्वलः' इति नैषधे । महसां भूयसः प्रतापानां राशिरिव राशिरिति तद्वृत्तिः ॥ इति प्रद्योतनसूरिः ॥

धिया जयंश्चित्रशिखण्डिसूनुं गङ्गातरङ्गायितवाग्विलासः ।
श्रीमानदेवः पदमेतदीयं सभ्यः सभास्थानमिवाध्युवास ॥ ७१ ॥

श्रिया विशिष्टशोभया युक्तो मानदेवनामा सूरिः एतदीयं प्रद्योतनसूरिसंबन्धि पदं पट्टमध्युवासाश्रितवान् । किं कुर्वन् । धिया प्रतिभाप्राग्भारेण चित्रशिखण्डिनां सप्तर्षीणां सूनुं पुत्रं बृहस्पतिम् । 'सप्तर्षयश्चित्रशिखण्डिनः' तथा 'जीवश्चित्रशिखण्डिजः' इति हैम्याम् । तथा 'विचित्रवाक् चित्रशिखण्डिनन्दनः' इति नैषधे । जयन् पराभवन् ।

पुनः किंभूतः । गङ्गायास्तरङ्गाः कल्लोलास्तद्वदाचरिता वाचां वाणीनां विलासा वैचित्र्यो यस्य । 'असकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः' इति चम्पूकथायाम् । 'निरन्तरसुधारसाविष्करिण्या वचनवैचित्र्या' इति चम्पूटिप्पनके । क इव । सभ्य इव । यथा पार्षद्यः साधुर्वा सभारूपं स्थानं गृहं पदं वा आश्रयति । सभ्योऽपि किंभूतः । प्रज्ञया सुराचार्यं जयन्, मन्दाकिनी वीचीयमानवचनचातुर्यः, सभायां साधुः सभ्यः ॥

पदप्रदानावसरे समीक्ष्य साक्षात्तदंसोपरिवाणिपद्मे ।
राज्यादिव क्षोणिपुरंदरस्य भ्रंशोऽस्य भावी नियमस्थितेर्हा ॥ ७२ ॥
इत्थं गुरुं स्वं विमनायमानमालोक्य लोकेश्वरगीतकीर्तिः ।
तत्याज यः षड्विकृतीर्व्रतीन्द्रः षडान्तरारीनिव जेतुकामः ॥ ७३ ॥

ये लोकानां पातालभूमिस्वर्गलक्षणानामीश्वरैरिन्द्रैर्नागेन्द्रनरेन्द्रसुरेन्द्रैर्गीता गानविषयीकृता कीर्तिता वा कीर्तिर्यस्य तादृशो व्रतिनां साधूनामिन्द्रः स्वामी श्रीमानदेवसूरिः षट्संख्याका घृतपक्वान्नतैलगुडदधिदुग्धाभिधा विकृतीस्तत्याज जहाति स्म। उत्प्रेक्ष्यते—षट्संख्याकान् कामक्रोधमदमत्सरमायालोभादिकान् आन्तरान् अन्तरङ्गान् रिपून् विजेतुकामः पराभवितुमिच्छुरिव । किं कृत्वा । इत्थममुना प्रकारेण विमनायमानं विरुद्धं मनो यस्य स विमनाः, न विमना विमनाः स्यादिति विमनायते, विमनायते इति विमनायमानस्तम् । 'भृशादिभ्यो भुव्यर्थे च्वेर्लोपश्च हलः। भृशादिभ्यश्च्व्यर्थे भवत्यर्थे क्यङ् स्यात् न तु च्व्यन्तेभ्यः अन्तहल्लोपश्च । अभृशो भृशो भवतीति भृशायते उन्मनायते' इति प्रक्रियाकौमुद्याम् । स्वमात्मीयं गुरुं प्रद्योतनसूरिमालोक्य दृष्ट्वा।इत्थं कथं पदस्य सूरिपदस्य प्रदानावसरे विश्राणनव्यतिकरे तदंसोपरि मानदेवसूरिस्कन्धोपरिष्टात् साक्षात्प्रत्यक्षलक्ष्ये वाणिपद्मे सरस्वतीलक्ष्म्यौ । वाणिशब्दो ह्रस्वोऽप्यस्ति । 'अन्तर्वाणिस्तु शास्त्रवित्' इति हैम्याम् । अन्यत्रापि—'व·········' । हा इति खेदे । सरस्वतीलक्ष्मीसंश्रितत्वेन राजादिसत्कारजनितप्रमादाचरणवशादित्यध्याहार्यम् । नियमस्थितेश्चारित्रादस्य मम पट्टधरस्य भ्रंशो भावी व्रताद्भ्रष्टो भविष्यतीति । कस्येव । क्षोणिपुरंदरस्येव । यथा कस्यचिद्राज्ञः अन्यायासेवनरूपप्रमादाद्राज्याद्भ्रंशो भवति । युग्मम् ॥

चमूभिरुर्वीन्द्रमिवामरीभिरुपास्यमानं यमवेक्ष्य कश्चित् ।
किं स्त्रीयुतोऽसाविति संशयानो नड्डूलकेऽशिक्ष्यत ताभिरेव ॥ ७४ ॥

चमूभिर्गजवाजिरथपत्तिलक्षणाभिश्चतुरङ्गिणीभिः सेनाभिः उर्वीन्द्रं क्षोणीशक्रमिव । पद्मा-जया-विजया-अपराजिताभिधाभिश्चतसृभिर्देवीभिः प्रत्यक्षमुपास्यमानं सेव्यमानं नड्डूलनगरोपाश्रयापवरके यं मानदेवसूरिमवेक्ष्य दृष्ट्वा असौ आचार्यः किं स्त्रीयुतो वनिताकलितोऽस्तीति संशयानः संदेहं कुर्वाणः । कश्चित् स्वयं संतिष्ठासुतया दुष्टयवनप्रकरैः प्रणुन्नतन्निकृष्टनिर्जरनिर्मितजनमार्युपप्लवोपद्रुतेन तिक्षशिलानगरीसंघेन कृतकायोत्सर्गप्र-

---

१. 'तक्षशिला' इति पाठो भवेत्.

भावादागत(या)नड्डूलपुरस्थितश्रीमानदेवसूरयो यद्यत्रायान्ति तदा शान्तिर्भवेत्, परमत्र म्लेच्छा आगत्य स्थास्यन्ति, ततः संघेन त्रिवर्षीमध्येऽन्यत्र कुत्रापि गत्वा स्थातव्यमिति जिनशासनदेव्या गिरा श्रीमानदेवसूरीन्द्राकारणार्थं तत्समय एव स्वजनमरकोपद्रवप्रशमनोत्सुकीभूततत्संघेन प्रेषितः । अज्ञातसूरिस्वरूपः कोऽपि श्राद्धः । ताभिर्विजयाप्रमुखसूरीभिरेवाशिक्षि । शिक्षां ताडयित्वा कुट्टयित्वा दृढबन्धनबद्धः पूत्कुर्वाणः कृपापारावारश्रीगुरुवाचैव मुक्तः । यत्रैवंविधाः शङ्काभाजः श्राद्धास्तत्र सर्वथापि श्रीपूज्यपादैर्न गन्तव्यमिति विजयादेवतया निषिद्धाः सन्तः श्रीगुरवस्तत्संघे शान्त्यर्थं शान्तिं 'शान्तिनिशान्तम्' इति विजयादेवीमन्त्रमयलघुशान्तिं विधाय तच्छ्राद्धेन सार्धं प्रेषयित्वा तत्र मरकोपद्रवं निवारितवानिति शेषः ॥ इति श्रीमानदेवसूरिः ॥

तदीयपट्टाम्बरभानुमाली श्रीमानतुङ्गश्रमणेन्दुरासीत् ।
य औजिढत्साधुजनान्निजाज्ञां नाथान्पृथिव्या इव सार्वभौमः ॥ ७५ ॥

श्रीमानतुङ्गनामा श्रमणानां मुनीनां मध्ये इन्दुरिवाह्लादकत्वादिन्दुः सूरिरासीत् बभूव । किंभूतः । तदीयो मानदेवसूरिसंबन्धी यः पट्टः स एवाम्बरमाकाशं तत्र प्रकाशकत्वादुद्द्योतकारित्वाद्भानुमाली भास्वान् यो मानतुङ्गसूरिः साधुजनान् वाचंयमव्रजान् अन्यदर्शनकदाग्रहाग्रस्तत्वेन समीचीनान् लोकान् निजाज्ञां भगवत्प्रणीतसाध्वाचारलक्षणां निजस्यात्मन आज्ञामादेशमौजिढद्ग्राहयामास धारयांचकार । क इव । सार्वभौम इव । यथा चक्रवर्ती पृथिव्या नाथान् भूपतीन् स्वाज्ञां ग्राहयति ॥

भक्तामराह्वस्तवनेन सूरिर्बभञ्ज योऽङ्गान्निगडानशेषान् ।
प्रवर्तितामन्दमदोदयेन गम्भीरवेदीव करी धरेन्दोः ॥ ७६ ॥

यो मानतुङ्गसूरिः भक्तामर इत्याह्वा नाम यस्य तादृशेन स्तवेन स्तोत्रेण कृत्वा अङ्गात् स्वशरीरादशेषान् अष्टचत्वारिंशदपि निगडान् शृङ्खलान् बभञ्ज भनक्ति स्म । क इव । करीव । यथा धरेन्दो राज्ञः गम्भीरवेदी अवमताङ्कुशः अवगणिततीक्ष्णाङ्कुशप्रहारो हस्ती प्रवर्तितोऽतिप्रवहमानो यो मदोदयो दानवारिप्रादुर्भावस्तेन कृत्वा पादादिनियमनशृङ्खलान् भनक्ति त्रोटयति । 'त्वग्भेदाद्रुधिरस्रावादामांसव्यथनादपि । संज्ञां न लभते यस्तमाहुर्गम्भीरवेदिनम्' ॥

श्रीमानतुङ्गः करणेन भक्तामरस्तुतेस्तं क्षितिशीतकान्तिम् ।
चकार नम्रं फलपुष्पपत्रभारेण यद्वत्फलदं वसन्तः ॥ ७७ ॥

येन नृपतिना मार्तण्डचण्डीस्तुतिशतककरणापगतकुष्ठबाणकविकृतचतुरङ्गनवीनाङ्गीभूतमयूरकविमहिमालोकनोद्भूतचमत्कारेण पुनर्जैनदर्शनमाहात्म्यदर्शनोत्कण्ठितचेतसा अष्टचत्वारिंशता शृङ्खलैरापादकण्ठमङ्गं निगडनिबद्धं कृत्वा प्रदत्तमहत्तालकापवरके निक्षिप्तः श्रीमानतुङ्गसूरिः 'भक्तामरप्रणतमौलिमणिप्रभाणाम्' इति नामादिदेवस्तुतेः स्तोत्रस्य करणेन निर्माणेन तं पूर्वोक्तं स्वपरीक्षाकारिणं क्षितिशीतकान्तिं राजानं नम्रं स्वचरण-

प्रणमनप्रवणं चकार कृतवान् । यः क इव । वसन्तो यद्वत् अत्र यद्वदितीवार्थे । यथा वसन्तो मधुसमयः फलानि सस्यानि पुष्पाणि कुसुमानि पत्राणि पर्णानि तेषां भारेण वीवधेन कृत्वा फलदं वृक्षं नम्रं भूमीमण्डलोपगतं कुरुते ॥

भयादिमेनाथ हरस्तवेन यो दुष्टदेवादिकृतोपसर्गान् ।
श्रीभद्रबाहुः स्वकृतोपसर्गहरस्तवेनेव जहार संघात् ॥ ७८ ॥

अथ पुनर्यो मानतुङ्गसूरिर्भयमिति पदमादिमं प्रथमं यत्र तादृशेन हरस्तवेन एतावता 'नमिऊण पणयसुरगण' इति नाम्ना भयहरस्तवेन कृत्वा संघाचातुर्वर्ण्यश्रीसंघमध्याद्दुष्टाः क्रूरा ये देवा व्यन्तरभवनपतिज्यौतिष्का आदिशब्दाद्देव्यादीनां संग्रहस्तत्कृतोपसर्गान् तन्निर्मितविविधोपप्लवान् जहार हृतवान् । क इव । श्रीभद्रबाहुरिव । यथा श्रीभद्रबाहुस्वामी स्वेनात्मना कृतं रचितं यत् 'उवसग्गहरं पासं' इति नाम्ना स्तवनं श्रीपार्श्वनाथस्तोत्रं तेन कृत्वा चारित्रभ्रंशात्संघापमानितार्तध्यानाद्व्यन्तरीभूतवराहमिहिरविहितोपसर्गे हरति स्म ॥ इति मानतुङ्गसूरिः ॥

सद्ध्याननागेश्वररश्मिसाम्यमन्थाद्रिणालोड्य मदाम्बुराशिम् ।
तत्पट्टलक्ष्मीरथ वीरनाम्नाचार्येण वव्रे वनमालिनेव ॥ ७९ ॥

अथ मानसूरेरनन्तरं वीर इति नाम यस्य तादृशेनाचार्येण सूरिणा । वीराचार्येणेत्यर्थः । तस्य मानतुङ्गसूरेः पट्टलक्ष्मीः वव्रे वृता । केनेव । वनमालिनेव । यथा कृष्णेन श्रीः समुद्रपुत्री वृता । किं कृत्वा । मद उन्मोहसंभेदः स एवाथ वा अष्टौ कुल-जाति-बल-श्रुत-ऐश्वर्य-रूप-तप-लब्धिरूपा मदास्त एव समुद्रस्तं सत् शोभनं ध्यानं धर्मशुक्लरूपं प्रणिधानं तदेवोज्ज्वलत्वान्नागेश्वरः शेषनागः स एव रश्मिर्मथनरज्जुः तद्युक्तो यः साम्यं समता तदेव मन्थाद्रिर्मन्दराचलः तेनालोड्य निर्मथ्य कृष्णेनापि क्षीरसमुद्रं मथित्वा तदुद्भूता श्रीः परिणीता ॥ इति वीराचार्यः ॥

ततोऽजनि श्रीजयदेवसूरिर्दूरीकृताशेषकुवादिवृन्दः ।
यद्वाग्विलासैरवहेलितश्रीः सुधा किमु क्षीरनिधौ ममज्ज ॥ ८० ॥

ततो वीराचार्यादनन्तरं स श्रीजयदेवनामा सूरिरजनि संजज्ञे । किंभूतः । दूरीकृता वादे निर्जित्य निर्वासिता अशेषाः समग्रा अपि कुत्सितं जिनशासनविरुद्धं वदन्तीत्येवंशीलाः कुवादिनः सौगतादयः निह्नवादयो वा तेषां वृन्दः समुदायो येन । स कः । यस्य श्रीजयदेवस्य सूरेर्वाग्विलासैर्वचनविलसितैरवहेलिता अवगणनां गमिता श्रीर्माधुर्यशोभा यस्यास्तादृशी सुधा पीयूषम् । उत्प्रेक्ष्यते—क्षीरनिधौ दुग्धसमुद्रे इव ममज्ज ब्रूडितेव ॥ इति श्रीजयदेवसूरिः ॥

स्वःकामिनीकीर्तितकीर्तिदेवानन्दश्चिदानन्दमना मुनीन्द्रः ।
तारुण्यमेणाङ्कमुखीमिवैतत्पट्टश्रियं वैभवमानिनाय ॥ ८१ ॥

स्वःकामिनीभिः सुराङ्गनाभिर्नृत्यादिकारित्वादप्सरोभिः स्वर्वेश्याभिर्वा कीर्तिता पदे पदे गीता अथवा गीतिभिर्विस्तारिता कीर्तिर्यस्य। 'कीर्तिर्यशसि विस्तारे' इत्यनेकार्थः। तादृशो देवानन्दो नाम मुनीन्द्रस्तस्य जयदेवसूरेः पट्टश्रियं पट्टवैभवं शोभामानिनाय प्रापयति स्म। किं कृत्वा। चिदानन्दे मोक्षे मनो यस्य। कः कामिव। तारुण्यमेणाङ्कमुखीमिव। यथा यौवनं चन्द्रवदनां श्रियं लम्भयति॥ इति देवानन्दसूरिः॥

श्रीविक्रमः सूरिपुरंदरोऽभूत्तत्पट्टदुग्धाब्धिसुधामरीचिः।
तमश्चमूं हन्तुमनाः समग्रां किं विक्रमोऽङ्गीकृतकाययष्टिः॥ ८२॥

ततो देवानन्दसूरेरनन्तरं श्रीविक्रमनामा सूरिषु पुरंदरः इन्द्रो बभूव। किंभूतः। तस्य देवानन्दसूरेः पट्ट एव दुग्धाब्धिः क्षीरसमुद्रस्तत्र तस्य वा वृद्धिकारित्वात्सुधामरीचिश्चन्द्रः। उत्प्रेक्ष्यते—समग्रां समस्तामपि तमसामज्ञानानां पापानां चमूं सेनां समूहं वा हन्तुं व्यापादयितुमङ्गीकृता गृहीता काययष्टिः शरीरं येन तादृशो विक्रमः किमु। मूर्तिमान् पराक्रम इवेत्यर्थः॥ इति विक्रमसूरिः॥

आसीत्ततः श्रीनरसिंहसूरिः स वाङ्मयाम्भोनिधिपारदृश्वा।
अत्याजि यक्षः किल येन मांसं स्वापं जगद्वारिजबन्धुनेव॥ ८३॥

ततो विक्रमसूरेः पट्टे श्रीनरसिंहनामा सूरिरासीत्संजातः। किंभूतः। वाङ्मयं सिद्धान्तः स एवाम्भोनिधिः समुद्रस्तस्य पारं दृष्टवानिति पारदृश्वा पारगामी। 'क्वनिप् वनिप् वा' इति सारस्वतसूत्रेण वनिप्प्रत्ययः। किलेति श्रूयते। येन नरसिंहसूरिणा कश्चिदनिर्दिष्टनामा यक्षो वटवासी मांसमत्याजि त्याजितः। प्रतिबोध्य मासाशनितामभोचयदित्यर्थः। केनेव। वारिजबन्धुनेव। यथा सूर्येण जगद्विश्वं स्वापं निद्रावस्थां त्याज्यते॥ इति नरसिंहसूरिः॥

महर्घ्यमाणिक्यमिवाङ्गुलीयं षोमाणभूपालकुलप्रदीपः।
पट्टश्रियं श्रीनरसिंहसूरेरलंकरोति स्म समूद्रसूरिः॥ ८४॥

श्रीनरसिंहसूरेः पट्टश्रियं समुद्रनामा सूरिरलंकरोति स्म। किंभूतः। खोमाणनामानो ये भूपाला राजानस्तेषां कुले वंशे गृहे वा उद्योतकारित्वात्प्रदीप इव प्रदीपः। किमिव। महर्घ्यमाणिक्यमिव। यथा बहुमूल्यं रत्नमङ्गुलीयं मुद्रिकामलंकुरुते॥

दिग्वाससो येन विजित्य वादे नागह्रदे नागनमस्यतीर्थम्।
स्ववश्यमानीयत भूमिभर्त्रा दुर्गः प्रतीपानिव संपराये॥ ८५॥

येन समुद्रसूरिणा नागहृदाख्ये नगरे वादे शास्त्रचर्चासमये दिग्वाससोऽनेकान्दिगम्बरान्विजित्य निरुत्तरीकृत्य नागेन धरणोरगेन्द्रेण नमस्यं नमस्करणीयं तीर्थं पार्श्वनाथबिम्बं स्ववश्यं जैनश्वेताम्बरसंघायत्तमानीयत। केनेव। भूमिभर्त्रेव। यथा संपराये संग्रामे प्रतीपान्वैरिणो निर्जित्य दुर्गः कोट्टः स्ववश्यः क्रियते॥ इति श्रीसमुद्रसूरिः॥

स मानदेवोऽजनि तस्य पट्टे वाग्देवता यन्मुखपद्मसद्म।
तृप्तामृतैश्चारुवचोविलासच्छलादिवोद्गारमिवातनोति ॥ ८६ ॥

तस्य समुद्रसूरेः पट्टे स भुवि विख्यातो यशोभिः प्रथितः श्रीमानदेवसूरिरजनि। स कः। यस्य मानदेवसूरेर्मुखपद्मं वदनकमलमेव सद्म वसतिर्यस्यास्तादृशी वाग्देवता सरस्वती सुधाशनत्वादमृतैः सुधारसैः तृप्ता आकण्ठपानादतितृप्तिं प्राप्ता सती चारवो मनोज्ञा ये वाग्विलासा वचोवैचित्र्यः तेषां छलात्कपटात्तदुद्गारममृतोद्गारमिवातनोति कुरुते ॥ इति द्वितीयश्रीमानदेवसूरिः ॥

पदे तदीये विबुधप्रभेण स भूयते सूरिपुरंदरेण।
येनाभिभूतः किल पुष्पधन्वा पुनर्युयुत्सुर्विषमायुधोऽभूत् ॥ ८७ ॥

तदीये मानदेवसूरिसंबन्धिनि पदे पदे विबुधप्रभेण सूरिपुरंदरेण आचार्यशक्रेण भूयते स्म संजातम्। येन श्रीविबुधप्रभसूरिणा अभिभूतः पराजितः पुष्पधन्वा कामः। किलेत्युत्प्रेक्षायाम्। काव्यकल्पलतायामुक्तत्वात्। पुनर्युयुत्सुर्द्वितीयवारं प्रभुणा समं योद्धुमिच्छुः सन् विषमानि तीक्ष्णानि दुर्जेयान्यायुधानि शस्त्राणि यस्य तादृशोऽभूदिव। मृदुलास्त्रोऽभिभूयते न विषमास्त्रः ॥ इति विबुधप्रभसूरिः ॥

तत्पट्टपङ्केरुहमानसौकाः श्रीमाञ्जयानन्दविभुर्बभूव।
यस्याशयेऽमात्समयोऽप्यशेषः कुम्भोद्भवस्य प्रसृताविवाब्धिः ॥ ८८ ॥

श्रीर्लक्ष्मीः शोभा वा विद्यते यस्मिन् स श्रीमान् जयानन्दनामा विभुर्गच्छाधिपः तस्य विबुधप्रभसूरेः पट्टः स एव पङ्केरुहं कमलं तत्र मानसौका हंसो बभूव। स कः। यस्याशये हृदये अशेषः समग्रोऽपि समयः सिद्धान्तोऽमान्ममौ। आशयशब्देन हृदयमपि यथा। 'दयासमुद्रे स तदाशयेऽतिथी चकार कारुण्यरसापगा गिरः' इति नैषधे। आशयो मन इति तद्वृत्तिः। कस्यामिव। प्रसृताविव। यथा कुम्भोद्भवस्यागस्तिमुनेः प्रसृतौ प्रसारिताङ्गुलौ पाणौ अब्धिः समुद्रो भाति स्म ॥ इति जयानन्दसूरिः ॥

यदाननं चन्द्रति दन्तकान्तिर्ज्योत्स्नायते भ्रूयुगमङ्कतीह।
वाचां विलासोऽपि सुधायते तत्पदे मुनीन्द्रः स रविप्रभोऽभूत् ॥८९॥

तस्य जयानन्दसूरेः पदे स रविप्रभनामा मुनीन्द्रोऽभूत्। स कः। यस्य रविप्रभसूरेराननं मुखं चन्द्रति चन्द्र इवाचरति। 'सर्वप्रातिपदिकेभ्यः क्विप् वा आचारे इत्येके' इति क्विप्प्रत्यये तदुदाहरणानि कृष्ण इवाचरतीति कृष्णति स्वति कृष्णामास स्वामासेति प्रक्रियाकौमुद्याम्, तथात्रापीति। यस्य दन्तानां कान्तिर्ज्योत्स्नायते चन्द्रिकेवाचरति। 'कर्तुः क्यङ् सलोपश्च'। उपमानात्कर्तुः सुबन्तादाचारेऽर्थे क्यङ् स्यात्सलोपश्च। 'अकृत्सार्वधातुके इति दीर्घः' इति प्रक्रियायाम्। इह मुखचन्द्रे भ्रूयुगमङ्कति लाञ्छनवदाचरति। अत्राप्याचरणार्थे क्विप्। अपि पुनरिह वक्रविधौ वाचां

वचनानां विलासो वैचिञ्यं वैदुषी वा सुधायते पीयूषवदाचरति ॥ इति रविप्रभसूरिः ॥

वर्धिष्णुयत्कीर्तिसुधार्णवेन व्यलुम्पि नामाप्यसितादिभावैः ।
अर्हन्महिम्नेव जगत्यजन्यैः सोऽभूद्यशोदेवविभुः पदेऽस्य ॥ ९० ॥

अस्य रविप्रभसूरेः पदे स यशोदेवनामा विभुर्गणाधिपोऽभूज्जज्ञे । स कः । वर्धिष्णुर्वर्धनशीलः । 'दूरवर्धिष्णुपापर्धिः' इति पाण्डवचरित्रे । यशोदेवसूरेः कीर्तिरेव सुधार्णवः क्षीरसमुद्रस्तेन कृत्वा करणपदम् । असितादिभावैः कृष्णनीलपदार्थैः स्वनामापि व्यलुम्पि लुप्तम् । तद्यशोभिर्धवलीकृते सर्वविश्वे नीलादिपदार्थाः क्वापि नावसीयन्ते इति लोपः । केनेव । अर्हन्महिम्नेव यथा तीर्थकृन्माहात्म्येन करणपदेन कृत्वा जगति भूलोके अजन्यैः ईतिभिः स्वनामापि लुप्यते । 'अजन्यमीतिरुत्पातः' इति हैम्याम् ॥ इति यशोदेवसूरिः ॥

प्रद्युम्नदेवोऽथ पदे तदीये प्रद्युम्नदेवोऽभिनवो बभूव ।
भिन्दन्भवं मुक्तरतिर्दवीयो भवन्मधुर्विश्वविभाव्यमूर्तिः ॥ ९१ ॥

अथानन्तरं तदीये यशोदेवसंबन्धिनि पदे प्रद्युम्नदेवनामा सूरिर्बभूव । किंभूतः । अभिनवो नवीनः प्राचीनो द्विसहस्रलक्षणः प्रद्युम्नदेवः कन्दर्पदेवः । अभिनवत्वमेव दर्शयति । किं कुर्वन् । भवं संसारं भिन्दन् उच्छेदयन् । स्मरस्तु भवेन शंभुना भिन्नः, अयं स्वयं भवं भिनत्ति । पुनः किंभूतः । मुक्ता त्यक्ता रतिः विश्वे स्त्र्यादिपदार्थेषु प्रीतिरासक्तिर्वा येन । स्मरस्तु रतिप्रियः । पुनः किंभूतः । दवीयः अतिशयेन दूरे भवत्संपद्यमानं मधु मद्यं वा यस्मात् । स्मरस्तु मधुर्वसन्तः सहायो यस्य । पुनः किंभूतः । विश्वेन जगज्जनेन विभाव्या लोचनकच्चोलकैर्निपीयमानलावण्यामृता सादरमवलोक्यमाना वा मूर्तिः शरीरं यस्य । स्मरस्त्वनङ्गः ॥ इति प्रद्युम्नदेवसूरिः ॥

श्रीमानदेवेन पुनः स्वकीर्तिज्योत्स्नावदातीकृतविष्टपेन ।
एतत्पदश्रीरगमि प्रतिष्ठां शक्तित्रयेणेव नरेन्द्रलक्ष्मीः ॥ ९२ ॥

पुनर्नाम्ना तृतीयवारं श्रीमानदेवेन सूरिणा एतस्य प्रद्युम्नदेवस्य पदश्रीः पट्टलक्ष्मीः प्रतिष्ठां सातिशायिशोभां विख्यातिं वा अगमि प्रापिता । 'ण्यादयो ण्यन्तनिष्कर्मगत्यर्था मुख्यकर्मणि । प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि ॥ अस्योदाहरणानि यथा—निन्ये विजनमजागरि रजनिमगमि मदमयाचि संभोगम् । गोपी हावमकार्यत भावश्चैनामनन्तेन ॥' इति प्रक्रियाकौमुद्याम् । अयं ण्यन्तः गम्धातुप्रयोगः । किंभूतेन मानदेवेन । स्वस्यात्मनः कीर्तिरेव ज्योत्स्ना कौमुदी तया अवदातीकृतं धवलितं विष्टपं त्रिभुवनं येन प्रतिष्ठां प्रापिता । केनेव । शक्तित्रयेणेव । यथा प्रभुत्वोत्साहमन्त्रलक्षणेन शक्तित्रिकेण नरेन्द्रस्य राज्ञः श्रीः राज्यलक्ष्मीः प्रतिष्ठां प्राप्यते ॥ इति तृतीयमानदेवसूरिः ॥

वाचंयमेन्द्राद्विमलादिचन्द्रात्पदाब्जभृङ्गीभवदिन्द्रचन्द्रात् ।
अमुष्य पट्टः श्रियमश्नुते स्म परंतपाद्भूप इव प्रतापात् ॥ ९३ ॥

विमलमिति पदमादौ यस्य तादृशाच्चन्द्रात् एतावता विमलचन्द्रात् सुरीश्वरात् अमुष्य श्रीमानदेवसूरेः पट्टः श्रियं शोभामश्नुते स्म । किंभूतो विमलचन्द्रः । पदाब्जयोश्चरणकमलयोर्भृङ्गीभवन्तो भ्रमराः संपद्यमाना इन्द्राः शक्राश्चन्द्राः शशाङ्का यस्य । कस्मादिव । प्रतापादिव । यथा—भूपो राजा परं वैरिणं तापयतीति सत्यार्थात्परंतपात्प्रतापात् सकाशाल्लक्ष्मीं शोभामश्नुते ॥ इति विमलचन्द्रसूरिः ॥

रेजेऽस्य पट्टे स्मररूपधेयः सूरीन्दुरुद्द्योतननामधेयः ।
दिग्वारणेन्द्रा इव सूरिचन्द्राः संजज्ञिरे यत्पदधारिणोऽष्टौ ॥ ९४ ॥

अस्य विमलचन्द्रसूरेः पदे पदे उद्द्योतननामा सूरीन्दुः रेजे बभासे । किंभूतः । स्मरः कामः तद्वद्रूपधेयं प्रशस्तं रूपं यस्य । 'यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य' इति नैषधे । यस्य उद्द्योतनसूरेः पदधारिणः पट्टधराः अष्टौ अष्टसंख्याकाः संजज्ञिरे संजाताः। के इव । दिग्वारणा इव। यथा—ऐरावत–पुण्डरीक–वामन–कुमुद–अञ्जन–पुष्पदन्त–सार्वभौम–सुप्रतीक–इति नामानः अष्टौ दिग्गजेन्द्राः भवन्ति॥

मुहूर्तमद्वैतमवेत्य टेलीग्रामस्य यः सीम्नि बृहद्वटाधः ।
अस्थापयच्चैत्यतरोस्तलेऽष्टौ पार्श्वे गणेन्द्रानिव काशिकुञ्जे ॥ ९५ ॥

य उद्द्योतनसूरिः अद्वैतं समग्रग्रहगोचरोच्चग्रहनवांशादिविशुद्धमुहूर्तमसाधारणवेलामवेत्य ज्ञात्वा टेलीनाम्नो ग्रामस्य सीम्नि सीमायां बृहद्वटाधो महतो न्यग्रोधद्रुमस्य तले अधस्ताद्भूमौ अष्टौ गणेन्द्रानाचार्यानस्थापयत् स्थापयति स्म । क इव। पार्श्व इव । यथा श्रीपार्श्वनाथः काशिकुञ्जे वाराणसीपुरीपरिसरवने समवसरणमध्यस्थितसर्वजनच्छायाकारिकेवलज्ञानोत्पत्तिकपादपश्चैत्यतरुस्तस्य तले अष्टौ गणधरान् स्थापितवान् ॥

शाखा प्रशाखाभिरमुष्य वृद्धिर्बृहद्वटस्यैव यतो भवित्री ।
ततो बृहद्गच्छ इतीह नामापरं गणस्य प्रकटीबभूव ॥ ९६ ॥

यतो यस्मात्कारणात् शाखा वयरीमुख्याः प्रशाखास्तदुद्भवा अपरापरनामधेयरूपास्ताभिः कृत्वा अमुष्य गणस्य वृद्धिर्भवित्री विस्तारो भावी । कस्येव । बृहद्वटस्येव । यथा बृहतो महतो वृद्धस्य वा वटस्य न्यग्रोधस्य प्लक्षवृक्षस्य शाखाप्रशाखाभिर्वृद्धिर्महान् विस्तारो भवति । ततः कारणात् इह जगति भूमीमण्डले चन्द्रगच्छस्य बृहद्गच्छः लोकोक्त्या 'वडगच्छ' इत्यपरं पञ्चमं नाम प्रकटीबभूव । विख्यातं जातम् ॥ इति श्रीउद्द्योतनसूरिः । अत्र गच्छस्य बृहद्गच्छस्यवडगच्छा इति पञ्चमं नाम जातम् ॥

माहात्म्यनम्रीकृतसर्वदेवः पदे तदीयेऽजनि सर्वदेवः ।
तारापतिस्तारकपर्षदेव गुणश्रिया यः प्रभुरन्वयायि ॥ ९७ ॥

तदीये उद्द्योतनसूरिसंबन्धिनि पदे सर्वदेवो नाम्ना सूरिरजनि । किंभूतः । माहात्म्येन स्वप्रभावेन कृत्वा नम्रीकृता नमनशीला विहिताः सर्वे समस्ता अपि देवा इन्द्रचन्द्रादयः सुरा येन । स कः । यः प्रभुः सर्वदेवसूरिर्गुणश्रिया शमदमसंयमधैर्यगाम्भीर्याद्यनेकगुणलक्ष्म्या अन्वयायि अनुगतः । आश्रित इत्यर्थः । क इव । तारापतिरिव । यथा चन्द्रस्तारकपर्षदा ताराश्रेण्या अनुगम्यते आश्रीयते । अत्र पर्षद्शब्दः श्रेणीवाची । 'उडुपरिषदः किं नार्हन्ती निशा किमनौचिती' इति नैषधे । अर्हतो भावः आर्हन्ती । 'अर्हतो नुम्वा' इति विभाषया नुम्विधानात् आर्हन्ती आर्हती रूपद्वयसिद्धिरिति प्रसङ्गाद्दर्शिता ॥

यो रामसेनाह्वपुरे व्रतीन्दुर्लब्धिश्रियं गौतमवद्दधानः ।
नाभेयचैत्ये महसेनसूनोर्जिनस्य मूर्तेर्विदधे प्रतिष्ठाम् ॥ ९८ ॥

यो व्रतीन्दुः सर्वदेवसूरिः रामसेना इत्याह्वा नाम यस्य तादृक् पुरे रामसेणिनगरे नाभेयदेवस्य श्रीऋषभनाथस्य चैत्ये प्रासादे महसेननाम्नो नृपस्य सूनोर्नन्दनस्य श्रीचन्द्रप्रभस्वामिनः मूर्तेः प्रतिमायाः प्रतिष्ठां विदधे कृतवान् । सूरिः किं कुर्वाणः । गौतमवद्गौतमस्वामीव लब्धीनां तपःशक्तिविशेषाणां क्षीरास्रवादिकानां श्रियं शोभां दधानो धारयन् ॥

चन्द्रावतीशस्य नृपस्य नेत्र इवास योऽशेषविशेषदर्शी ।
तं कॢप्तचैत्यं प्रतिबोध्य वाचा प्राव्राजयत्कुङ्कुणमन्त्रिणं यः ॥ ९९ ॥

यः सर्वदेवसूरिः कुङ्कुणनामानं मन्त्रिणं प्रधानं वाचा स्ववाणीविलासेन प्रतिबोध्य संसारविरक्तं कृत्वा प्राव्राजयद्दीक्षयामास । किंभूतं कुङ्कुणम् । कॢप्तं निर्मापितं चैत्यं जिनप्रासादो येन । यः कुङ्कुणो मन्त्री चन्द्रावत्याः पुर्या ईशस्य स्वामिनः चण्डाउलिनगरनाथस्य नृपस्य राज्ञः नेत्र इवास नयनमिव बभूव । तद्द्वारैव सर्वकार्यार्थानां विलोकनत्वेन । किंभूतो यः । अशेषाः समस्ता ये विशेषाः षड्गुणशक्तित्रिकसामादिचतुष्कोपायादिकार्योपनिषदस्तान् पश्यति सम्यक्तया जानाति वक्तीत्येवंशीलः समग्रराजकार्यकुशल इत्यर्थः ॥ इति श्रीसर्वदेवसूरिः ॥

कुर्वन्निवासं गवि गौरवश्रीर्गिरामधीशो विबुधैरुपास्यः ।
श्रीदेवसूरिः किमु देवसूरिः पदे तदीयेऽप्यजनि क्रमेण ॥ १०० ॥

अपि पुनः तदीये सर्वदेवसंबन्धिनि पदे क्रमेण महावीरपट्टपरिपाट्या श्रीदेवसूरिरजनि जातः । उत्प्रेक्ष्यते—देवसूरिः देवसूरिर्बृहस्पतिः किमु देवानां सुराणामाचार्योऽध्यापकः । द्वयोरपि साधर्म्यं दर्शयति—किं कुर्वन् । गवि पृथिव्यां स्वर्गे च निवासं वसतिं कुर्वन् । पुनः किंभूतः । गौरवेण माहात्म्येन गुरुत्वेन शक्रादीनामध्यापकत्वेन । अथ वा गुरुर्बृहस्पतिर्जीवो देवाचार्यस्तत्त्वेन श्रीः शोभा यस्य । पुनः किंभूतः । गिरां

वाचामधीशः । 'वागीशो वाक्पतौ वाग्ग्मी' इति हैम्याम् । 'गीर्बृहत्योः पतिः' इत्यपि च । वाचस्पतित्वात् । पुनः किंभूतः । विबुधैः पण्डितैः सुरैश्च उपास्यः सेव्यः । 'विबुधः पण्डिते सुरे' इत्यनेकार्थः ॥ इति श्रीदेवसूरिः ॥

दोषोदयोदीततमःप्रपञ्चव्यापादनव्यापृतिदीक्षितेन ।
श्रीसर्वदेवेन पदं तदीयमदीपि दीपेन यथा निकेतम् ॥ १०१ ॥

श्रीसर्वदेवेन तदीयं देवसूरिसंबन्धिपदमदीपि उद्द्योतितम् । केनेव । दीपेनेव । अत्र यथा इवार्थे । यथा कज्जलध्वजेन निकेतं मन्दिरं दीप्यते । किंभूतेन सर्वदेवेन दिपेन च । दोषाणामपगुणानां निशानां च उदयेनाविर्भावेन उदीतानि समेत्य स्थितानि अथवा दोषाणां संभवेन प्रकटीभूतानि यानि तमांसि पापानि अन्धकाराणि च तेषां प्रपञ्चो विस्तारः तस्य व्यापादनं तदेव व्यापृतिर्व्यापारस्तत्र दीक्षितेन गृहीतव्रतेन । सज्जेनेत्यर्थः । 'उदीतमातङ्कितवानशङ्कत' इति नैषधे । 'संकेतनिकेतमाप्ता' इत्यपि तत्रैव । ईङ् गत्यर्थधातुः ॥ इति द्वितीयश्रीसर्वदेवसूरिः ॥

श्रीमद्यशोभद्रगणावनीन्द्रः श्रीनेमिचन्द्रव्रतिपुङ्गवश्च ।
तत्पट्टमाकन्दमुभौ भजेते शुकोऽन्यपुष्टश्च यथा विहंगौ ॥ १०२ ॥

उभौ सूरीन्द्रौ तस्य सर्वदेवसूरेः पट्ट एव माकन्दः सहकारस्तं भजेते संश्रयेते । उभौ कौ । एको यशोभद्रनामा गणावनीन्द्रः गच्छाधिराजः । च पुनः परः श्रीनेमिचन्द्रनामा व्रतिनां साधूनां मध्ये पुङ्गवः प्रधानो धुरंधरत्वाद्वृषभो वा । यथेत्युपमाने । काविव । विहंगाविव । यथा उभौ विहंगौ माकन्दं भजेते । उभौ कौ । एकः शुकः कीरः, अपरोऽन्यपुष्टः कोकिलः ॥ इति यशोभद्रनेमीचन्द्रसूरीन्द्रौ ॥

तयोः पदे श्रीमुनिचन्द्रसूरिरभूत्ततो निर्मितनैकशास्त्रः ।
शास्त्रे न कुत्रापि तदीयबुद्धिश्चस्खाल वीङ्खेव समीरणस्य ॥ १०३ ॥

ततोऽनन्तरं तयोर्यशोभद्रनेमिचन्द्रमुनीन्द्रयोः पदे पट्टे श्रीमुनिचन्द्रसूरीन्दुरभूत् । किंभूतः । निर्मितानि नवीनानि कृतानि स्वयं नैकानि बहूनि शास्त्राणि ग्रन्था येन । नवीनग्रन्थनिष्पादनमसाधारणमेधां विना न स्यादत एवोच्यते । तदीया श्रीमुनिचन्द्रसूरिसंबन्धिनी बुद्धिर्मतिः कुत्रापि कस्मिन्नपि शास्त्रे न चस्खाल न स्खलिता न कुण्ठीभूता । अस्खलितानुस्यूतशास्त्रव्याख्याने प्रागल्भ्यवतीत्यर्थः । केव । वीङ्खेव । यथा समीरणस्य पवनस्य वीङ्खा गतिः कुत्रापि वनगहनादौ न स्खलति ॥

भूपीडखण्डानिव चक्रवर्ती यतीभवन्षड्विकृतीर्जहौ यः ।
कदापि काये न दधन्ममत्वं पपौ पुनर्यः सकृदारनालम् ॥ १०४ ॥

यः श्रीमुनीन्द्रचन्द्रसूरिः षट्संख्याका घृत-तैल-दुग्ध-दधि-पक्वान्न-गुड-नाम्नीर्विकृतीर्मदादिविकारकारिणीर्जहौ तत्याज । कदाचिदपि न भुनक्ति (भुङ्क्ते) स्मेत्यर्थः ।

क इव। चक्रवर्तीव। यथा द्वात्रिंशत्सहस्रदेशाधिपतिश्चक्रवर्तीत्युच्यते। स सार्वभौमः वैताढ्यशैलद्विभागीकृतोत्तरार्धदक्षिणार्धभरतक्षेत्रस्य द्वयोरप्यर्धयोः गङ्गासिन्धुनदीभ्यां त्रिभिर्भागैर्विभक्तत्वात्। एको गङ्गातः प्राच्यां दिशि, द्वितीयो गङ्गासिन्धुमध्यवर्ती, तृतीयः सिन्धुनदीतः पश्चिमायाम्। एवं भूपीठस्य भारतक्षेत्रक्षोणीमण्डलस्य षट् खण्डान् जहाति। किं कुर्वन्। यतीभवन्। संसारोद्विग्नः साध्वाचारमङ्गीकुर्वन्। दीक्षां गृह्णन्नित्यर्थः। च पुनर्यः सूरिः सकृदेकवारमेवारनालं काञ्जिकं पपौ पिबति स्म। किं कुर्वन्। कदापि कस्मिन्नपि ऐश्वर्यमहत्त्वानुभवसमयेऽपि काये स्वशरीरे मम इत्यस्य भावो ममत्वं नैव दधत्॥ इति श्रीमुनिचन्द्रसूरिः।

निर्जीयते स्म क्वचनापि नायं कृतोपसर्गैरपि देववर्गैः।
इतीव नाम्ना भुवि विश्रुतेन जज्ञेऽस्य पट्टेऽजितदेवसूरिः॥ १०५॥

अस्य मुनिचन्द्रसूरेः पट्टे अजितदेव इति नाम्ना सूरिर्जज्ञे। उत्प्रेक्ष्यते—इतीव हेतोर्भुवि पृथिव्यां नाम्नाभिधानेन विख्यातेन। इति किम्। यदयं सूरिः कृता विहिता उपसर्गा विविधमनोवचनकायक्षोभनप्रकारा उपद्रवा यैस्तादृशैरपि देववर्गैः सुरसार्थैः क्वचनापि कुत्रापि काले देशे वा न निर्जीयते स्म नाभिभूत इति हेतोरजितदेव इति नाम्ना आसीत्॥ इति श्रीअजितदेवसूरिः॥

जगत्पुनानः सुमनःस्रवन्तीरयो जटाजूटमिवेन्दुमौलेः।
अमुष्य पट्टं विजयादिसिंहो ध्यासांबभूवाथ तपस्विसिंहः॥ १०६॥

अथानन्तरममुष्याजितदेवसूरेः पट्टं विजय इति पदमादौ यत्र तादृशः सिंहः एतावता विजयसिंहसूरिः अध्यासांबभूव आश्रयति स्म। किंभूतः। तपस्विषु तपःकारकेषु साधुषु वा सिंहः पञ्चाननः। क इव। सुमनःस्रवन्तीरय इव। यथा सुमनसां देवानां स्रवन्ती नदी गङ्गा तस्या रयः प्रवाहः इन्दुमौलेरीश्वरस्य जटाजूटं कपर्दम्। 'शंभोः कपर्दस्तु जटाजूटः' इति हैम्याम्। श्रयते। विजयसिंहो गङ्गाप्रवाहश्च किं कुर्वाणः। जगद्विश्वं पुनानः पवित्रीकुर्वाणः॥

सोमप्रभः श्रीमणिरत्नसूरी अमुष्य पट्टं नयतः स्म लक्ष्मीम्।
इक्ष्वाकुवंशं भरतश्च बाहुबलिस्तनूजाविव नाभिसूनोः॥ १०७॥

अमुष्य विजयसिंहसूरेः पट्टमेकः सोमप्रभनामा अपरो मणिरत्ननामा सूरी आचार्यौ लक्ष्मीं शोभां नयतः प्रापयताम्। काविव। तनूजाविव। यथा नाभिनाम्नः सप्तमकुलकरस्य सूनोर्नन्दनस्य श्रीऋषभदेवस्य पुत्रौ। एको भरतचक्री च पुनर्द्वितीयो बाहुबलिर्द्वौ तनयौ श्रीऋषभदेवस्य बाल्यावस्थायां वंशस्थापनार्थं समेतस्य पुरंदरस्य पाणिस्थितेक्षुयष्टेरवलोकनात्प्रभोस्तद्ग्रहणाभिलाषादिन्द्रेण स्थापितमिक्ष्वाकुवंशं भूषां नयतः॥ इति सोमप्रभमणिरत्नसूरीन्द्रौ॥

श्रीमज्जगच्चन्द्र इदंपदश्रीललामलीलायितमाततान ।
येनोज्झि शैथिल्यपथस्तटाको घनाविलो मानसवासिनेव ॥ १०८ ॥

श्रीमानतिशायिशोभाभाजनं जगच्चन्द्र इति नाम्ना सूरिरिदं पदस्य इदमदः एतदित्यादिशब्दाः समासान्ता अपि दृश्यन्ते । यथा नैषधे—'इदं यशांसि द्विषतः सुधारुचः' इति । अनयोः सोमप्रभमणिरत्नसूरीन्द्रयोः पट्टस्य श्रियो लक्ष्म्या ललाम्नस्तिलकस्य ललामस्य वा । ललामशब्दो नान्तोऽदन्तश्च । लीलायितं लीलावदाचरितं लीलयाचरितं वा आततान कुरुते स्म । गुरुपट्टलक्ष्मीतिलकमासीदित्यर्थः । येन श्रीजगच्चन्द्रसूरिणा शैथिल्यपथः स्वगच्छवासिसाधुजनानां कलिकालानुभावात्संयमपालने हीनतमाध्यवसायभाजां शिथिलताकलितो मार्ग औज्झि त्यक्तः । प्राचीनमुनीनां मार्ग आदृत इत्यर्थः । त्यक्तः केनेव । मानसवासिनेव । यथा हंसेन घनेन मेघदृष्ट्या आविलः कलुषीभूतजलस्तटाक उज्झ्यते । वर्षाकाले हि हंसा जलदजलागमनजम्बालबहुलीभूतपयांसि सरांसि संत्यज्य मानसमेवाद्रियन्ते । 'क्रुद्धोलूकनखप्रपातविगलत्पक्षा अपि स्वाश्रयं ये नोज्झन्ति पुरीषपुष्टवपुषस्ते केचिदन्ये द्विजाः। ये तु स्वर्गतरङ्गिणीबिसलतालेशेन संवर्धिता गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम् ॥' इति सूक्ते ॥

द्वात्रिंशदाशावसनैरभेद्यो वादं सृजन्हीरकवद्यदासीत् ।
आघाटभूपेन स हीरलाद्यो नाम्ना जगच्चन्द्र इति न्यगादि ॥ १०९ ॥

यद्यस्मात्कारणाद्यः श्रीजगच्चन्द्रसूरिः द्वात्रिंशत्संख्याकैराशावसनैर्दिगम्बराचार्यैर्वादिभिः सार्धं वादं सृजन् कुर्वन् हीरकवद्वज्रमणिरिव अभेद्यो भेत्तुमशक्यः अजेय आसीत् तत्कारणादाघाटनामनगरस्य भूपेन राज्ञा संप्रति लोके आहडनगरमिति प्रसिद्धपुरस्य स्वामिना स सूरिः इदमेतन्न्यगादि प्रोक्तः । इदं किम् । यदयं सूरीन्द्रो नाम्ना हीरला इति पदमाद्यं यत्र तादृशो जगच्चन्द्र एतावता हीरलाजगच्चन्द्रसूरिरिति कथितः ॥

आचाम्लकैर्द्वादशहायनान्ते तपेत्यवापद्विरुदं मुनीन्दुः ।
महाहवैर्वैरिविनिर्जयान्ते भर्तेव भूमेर्जितकाशिसंज्ञाम् ॥ ११० ॥

यो मुनीन्दुः श्रीजगच्चन्द्रसूरिः निरन्तरनिर्मितैराचाम्लकैः केवलजलान्तर्भक्तभक्षणलक्षणतपोविशेषैः कृत्वा द्वादशसंख्याकानां हायनानां वर्षाणामन्तेऽवसाने तपा इति विरुदमवापत् प्राप । द्वादशवत्सरीं यावन्निरन्तरमाचाम्लान् कुर्वाणं यं प्रेक्ष्य नृपेण प्रोक्तं यदमी महातपा दृश्यन्ते तदा तपा इति बिरुदवान् प्रभुरभूदित्यर्थः । क इव । भूमिभर्तेव । यथा पृथ्वीपतिर्महद्भिर्गुरुभिराहवैः संग्रामैः कृत्वा वैरिणां शत्रूणां विनिर्जयस्य पराभवनस्य प्रान्ते पर्यन्ते जितकाशी जिताहव इति संज्ञां प्राप्नोति ॥

अस्मात्ततः प्रादुरभूत्तपाख्या नेत्रादिवात्रेर्द्विजराजलेखा ।
अदीपि यस्माच्च मुमुक्षुलक्ष्म्या वसन्तमासादिव भानुभासा ॥ १११ ॥

ततस्तपा इति नामकथनानन्तरं तद्दिनमारभ्य च अस्माजगच्चन्द्रसूरेर्बृहद्गच्छस्य तपागच्छ इत्याख्या नाम प्रादुरासीत्प्रकटीबभूव। कस्मादिव। नेत्रादिव। यथा अत्रेस्तापसविशेषस्य नयनाद्विजराजस्य चन्द्रस्य लेखा मण्डली प्रादुर्भूता। च पुनर्यस्मात्प्रभोर्मुमुक्षुलक्ष्म्या यतिश्रिया अदीपि अधिकं दीप्यते स्म। कस्मादिव। वसन्तमासादिव। यथा मधुसमयाद्भानोर्भास्करस्य भासा प्रभया दीप्यते॥ इति श्रीजगच्चन्द्रसूरिः॥ इति बृहद्गच्छस्य तपागच्छ इति षष्ठं नाम संजातम्॥

देवेन्द्रकर्णाभरणीभवद्भिर्यशोभिरुद्भासितविष्टपेन।
देवेन्द्रदेवेन बभेऽस्य पट्टे विष्णोर्यथा वक्षसि कौस्तुभेन॥ ११२॥

अस्य श्रीजगच्चन्द्रसूरेः पट्टे देवेन्द्र इति नाम यस्य तादृशेन देवेन भट्टारकेण। 'पादा भट्टारको देवः प्रयोज्याः पूज्यनामतः' इति हैमीवचनात्। बभे शुशुभे। किंभूतेन। देवेन्द्राणां सुरसार्वभौमानां कर्णयोः श्रवणयोराभरणीभवद्भिर्भूषणैः संपद्यमानैः कर्णपूरायमाणैः गीतगोष्ठीषु तुम्बुरुप्रमुखसुरगन्धर्वगणजेगीयमानयद्गुणश्रवणैकतानाः सुरेन्द्राः संजायन्ते इत्यर्थः। यशोभिः कृत्वा उद्भासिनं शोभां नीतं विष्टपं विश्वं येन। केनेव। कौस्तुभेनेव। यथेत्युपमाने। इवार्थे वा। यथा विष्णोर्नारायणस्य वक्षसि हृदये कौस्तुभेन समुद्रोत्पन्नरत्नविशेषेण उद्भास्यते॥ इति श्रीदेवेन्द्रसूरिः॥

निजाङ्गनोद्गीतयदीयकीर्तिं शुश्रूषुरक्षिस्र(श्र)वसामृभुक्षाः।
चक्षुःसहस्रे रसिकः किमाधात्पट्टे स तस्याजनि धर्मघोषः॥ ११३॥

तस्य देवेन्द्रसूरेः पट्टे स मन्त्रादिशक्तिमान् मुनीनां विघ्नहर्ता प्रसिद्धः धर्मघोषसूरिरजनि जातः। यस्य निजस्य शेषनागात्मनः अङ्गनाभिः कामिनीभिः धर्मगीतगोष्ठ्यामुत्प्रावल्येन हर्षोत्कृष्टतया वा गीतां गानविषयं नीतां यदीयां श्रीधर्मघोषसंबन्धिनीं कीर्तिं शुश्रूषुः श्रोतुमिच्छुः रसिकः जगदद्वैतगुणगणप्रगुणयद्गीतगानाकर्णनो···लः सन् अक्षिणी नेत्रे एव स्र(श्र)वसी कर्णौ येषां तेषामक्षिश्रवसां नागानामृभुक्षा इन्द्रः। नागानां हि चक्षूंष्येव कर्णाः, न तु पृथक् श्रवणेन्द्रियभाजः। यतः 'अश्रोत्राः फणिनस्तदेव रुचिरं नो चेदहिस्वामिना' इति खण्डप्रशस्तौ। उत्प्रेक्ष्यते—नागेन्द्रः चक्षुःसहस्रे नयनविंशतिशती(?) आधाचकार दधार वा। 'शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः' इति हैम्याम्। भोगिनो हि नयनैः पश्यन्ति शृण्वन्ति च यतः। 'अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्' इति नैषधे॥

मिथ्यामतोत्सर्पणबद्धकक्षं प्रेक्ष्य क्षितौ जीर्णकपर्दिनं यः।
प्रबोध्य वाचा जितराजबिम्बाधिष्ठायकं पूर्वमिव व्यधत्त॥ ११४॥

यः श्रीधर्मघोषसूरिः जावडिनिर्मितं श्रीशत्रुंजयोद्धारसमये वज्रस्वामिमाहात्म्यान्नवीनकपर्दियक्षेण त्याजितशत्रुंजयं जीर्णकपर्दिराजं गोमुखापरपर्यायं वाचा स्वमधुरया गिरा

प्रतिबोध्य सम्यक्त्वधारिणं विधाय जिनराजस्य तीर्थकृतो बिम्बस्य प्रतिमाया अधिष्ठायकं व्यधत्त चकार । कमिव । पूर्वमिव । यथा पूर्वं विमलाचले ऋषभमूर्तेरधिष्ठायकोऽभूत्तथैव तत्राप्यकृत । किं कृत्वा । प्रेक्ष्य दृष्ट्वा । अर्थात्तं कपर्दिनम् । किंभूतम् । मिथ्यामतस्य विमलाद्रेर्निष्कासनान्यकपर्दिस्थापनेर्ष्यारोषेण मिथ्यात्वस्योत्सर्पणे वृद्धिविधाने बद्धा कक्षाङ्गीकारो येन । कस्याम् । क्षितौ देवकपत्तनादिभूमौ ॥

शिष्यार्थनानिर्मितसंस्तवस्यानुभावतो देवकपत्तनेऽब्धिः ।
भूपस्य शुश्रूषुरिवास्य रत्नं तरङ्गहस्तैरुपदीचकार ॥ ११९ ॥

कौतुकान्मणिदर्शनोत्कण्ठया वा निजशिष्याणामर्थनया याच्ञया आग्रहेण वा निर्मितो रचितोऽर्थान्मन्त्रमयः संस्तवः स्तोत्रं तस्यानुभावतः प्रभावात् देवकपत्तनसमीपसमुद्रः अस्य श्रीधर्मघोषसूरेस्तरङ्गाः कल्लोला एव हस्तास्तै रत्नं मणिमुपदीचकार ढौकयामास । तेषां च स निर्ग्रन्थत्वेनाग्रहणाभावादम्बुधिः स्वतरङ्गहस्तोपरि रत्नं दर्शयामासेत्यर्थः । कस्येव । भूपस्येव । यथा शुश्रूषुः सेवां कर्तुमिच्छुः पुमान् राज्ञो रत्नमुपदीकुरुते ॥

विद्यापुरे योऽखिलशाकिनीनामुपद्रवं द्रावयति स्म सूरिः ।
श्रीहेमचन्द्रो भृगुकच्छसंज्ञे पुरे यथा दुर्धरयोगिनीनाम् ॥ ११६ ॥

यः श्रीधर्मघोषसूरिः प्राक् साधुजनसंतापकारिकाणां स्वागमने पट्टकादिमण्डनं मांसलोहकटकीभूतपायसवटकविहारणं च गुरुशयनपट्टिकोत्पाटनचच्चरानयनमित्याद्युपद्रवविधायिकानां श्रीविकानामधारिकाणामखिलानां सर्वासां शाकिनीनां सिद्धसीकोत्तरिकाणामुपसर्गमुपद्रवं द्रावयति स्म । चच्च(त्व)रे गमनानन्तरं गुरुभिरुच्छायाभिमन्त्रितचतुःसूचीनां पट्टिकाचतुःपादोपरिक्षेपणेन स्तम्भितानां विभातप्रायविभावर्यां विवसनानां तासां बहुविलपनाननाङ्गुलीक्षेपणनृपतिमृतिभीतिनिवेदनब्रह्मादिसप्तवाग्बन्धप्रदाननगरजनविज्ञप्त्यवधारणालयान्तःपट्टिकानयनपूर्वकं निवारितान् साधुजनान् निरुपद्रवांश्चक्रे। क इव । श्रीहेमचन्द्र इव । यथा श्रीहेमाचार्यः भृगुकच्छ इति संज्ञा नाम यस्य तादृशे पुरे स्वनिर्मापितश्रीमुनिसुव्रतस्वामिप्रासादे प्रह्लादाद्भगवत्पूजां प्रणीय सायं चैत्याकाशभूमौ नृत्यं कुर्वतस्तदवसरे कुत्रचित् प्रयान्तीनां दुर्धराणामुत्कटानां दुष्टानां चतुःषष्टिमितानां योगिनीनामव्यन्तरीविशेषाणां दोषे संजाते सति निश्चेष्टकाष्ठीभूताम्रमन्त्रिणो ज्ञानवृत्तान्तःपवनसाधनया गगनमार्गेण क्षणेनागतः श्रीहेमचन्द्रसूरिः समेत्य सार्धं समेतयशोभद्रगणिता सिन्धुदेवीप्रासादे गत्वा हक्कादानात्सिन्धुदेवतया भाषणकृते जिह्वाकर्षणादतिरोषजुषा गणिनो दूष(ख)लमध्ये कर्करोपरिमुशलप्रहारप्रदानात्त्राहि त्राहीति सिन्धुदेवीशरणीभूताभिस्ताभिः समं सिन्धुदेवी सयशोभद्रश्रीहेमचन्द्रसूरिं सानुनयं पदयोः प्रणनाम । तद्वाग्बन्धकपूर्वकं सर्वदेवानामुपद्रवं विद्रावितवान् आम्रभटं च सज्जीकृतवान् ॥

यो योगिनं पुष्पकरण्डिनीस्थं दुश्चेष्टितैर्भापनबद्धकक्षम् ।
पादावनम्रं विदधेऽन्तिमोऽर्हन्निवास्थिकग्रामिकशूलपाणिम् ॥ ११७ ॥

यः श्रीधर्मघोषसूरिः पुष्पकरण्डिन्यामुज्जयिन्याम् । 'उज्जयिनी स्याद्विशालावन्ती पुष्पकरण्डिनी' इति हैम्याम् । तिष्ठतीति पुष्पकरण्डिनीस्थस्तं कमपि सिद्धचेटकपेटकमत एव दुष्टचेष्टितैर्भयंकरप्रकारैः साधूनां भापने भयोत्पादने बद्धकक्षं सज्जीभूतं कोऽपि साधुस्तं प्रतिकर्तुं न शक्नोति अतएव तद्भयकरणप्रकारमाह—प्राक् साधुविहारनिषेधकं गुर्वागमने च गोचरीगतसाधूनां प्रश्ने स्थास्यथ । गुरुशिक्षितैस्तैरुक्तम् । स्थिताः स्म । ततो महत्कुद्दालतुल्यदन्तानदर्शयद्योगी । साधवः कपोणिकां दर्शयित्वा गुरुपार्श्वे गताः । तत उपाश्रयेऽपि अतिभयंकरप्रचुरोन्दरबिडालकुक्कुरश्रृगालश्वापदवृश्चिकभुजगादिदर्शनादिना गुरुमपि भापनोद्यतं प्रभुणा च जैनमन्त्रस्मरणानुभावेन पुरजननृपतच्छिष्यसमक्षं मन्त्राधिष्ठायकेन बद्धा पुरप्रासादशिखरसंघट्टनास्फालनपूर्वकं घनघृष्यमाणप्रवहच्छोणितशरीरं शिष्या अहं म्रिये म्रिये कोऽपि मामवत्विति पुनः पुनर्दीनभाषिणं वेदनया पूत्कुर्वाणं गगनेनोपाश्रये नीतं योगिनं पदावनम्रं स्वचरणयोर्नमनशीलं विदधे कृतवान् । कः इव । अर्हन्निव । यथा अन्तिमश्चरमश्चतुर्विंशतितमोऽर्हन् जिनः श्रीमन्महावीरदेवः अस्थिकग्रामस्थायुकश्शूतपाणिनामानं यक्षं स्वचरणसेवापरायणं चक्रे । सोऽपि किंभूतः । दुष्टैर्जीवप्रणाशनकरैश्चेष्टितैरुपसर्गैर्भगवतो भापनोद्यतम् (?) ॥

यस्योपदेशान्नृपमन्त्रिपृथ्वीधरश्चतुर्भिः सहितामशीतिम् ।
ज्ञातीरिवोद्धर्तुमिदंमिताः स्वा व्यधापयत्तीर्थकृतां विहारान् ॥ ११८ ॥

यस्य श्रीधर्मघोषसूरेरुपदेशाद्वाचा नृपस्य मालवमण्डलपतिमण्डलं पाचलस्थपातिसाहेर्मन्त्री प्रधानः पृथ्वीधरः लोकोक्त्या च पेथडदे इति नाम्ना चतुर्भिः सहितां युतामशीतिमेतावता चतुरशीतिं तीर्थकृतां श्रीजिनानां विहारान् प्रासादान् व्यधापयत्कारितवान् । उत्प्रेक्ष्यते—इदंमिताः प्रासादसंख्याश्चतुर्विंशतिप्रमाणाः स्वाः स्वकीयाः वणिक्संबन्धिनीश्चतुरशीतिज्ञातीरुद्धर्तुं संसारान्निस्तारयितुमिव । तथा तस्योपदेशाच्च श्रीशत्रुंजयगिरिनारिसंघपतीभवन् रैवतगिरौ च इदमस्माकं तीर्थमिदमस्माकं तीर्थमिति मिथो दिगम्बरैः सह विवादे 'य इन्द्रमालां परिधत्ते तस्येदं तीर्थम्' इति संघवृद्धैः प्रोक्ते सुवर्णसिद्ध्याम्नायेन स्वकृतसुवर्णषट्पञ्चाशद्घटीभिः इन्द्रमालां परिहितवान्, तथा शत्रुंजयोज्जयन्तमूलप्रासादशिखरदण्डयोरेकसौवर्णध्वजाधिरोपणादिना चाष्टौ घटीर्व्ययितवांश्चेति शेषः ॥

दंशादहेर्ग्राहितकाष्ठभारविषौषधीसज्जतनुर्निशान्ते ।
महात्मवद्यो विकृतीर्विहाय वृत्तिं व्यधादेव युगंधरीभिः ॥ ११९ ॥

यो धर्मघोषसूरिः युगंधरीभिरेव वृत्तिमाहारं व्यधात् । अन्यधान्यप्रत्याख्यानं चकारेत्यर्थः । किं कृत्वा । घृतादिकाः षड्विकृतीर्विहाय त्यक्त्वा विमुच्य । किंवत् । महात्मवत् । यथा महात्मा सुजनोविकृतीः परद्रोहादिप्रकारान् पिशुनता वा विजहाति । किंभूतः । अहेर्भुजङ्गमस्य दंशाद्भक्षणात् निशान्ते रात्र्यवसाने प्रभाते ग्राहिता श्राद्धपार्श्वे समानायिता या काष्ठभाराद्विषस्यौषधी वल्ली विषापहारिणी लता तया सज्जा निर्विषा तनुः

शरीरं यस्य । अत्रायं संप्रदायः—कदाचिन्नक्तं दुष्टसर्पस्य दंशाद्विषवेगोद्भवन्मूर्छया घूर्णितं गुरुमालोक्य कमपि तदुपायमजानन्तं किंकर्तव्यतामूढं संघं विज्ञाय प्रभुः संघं प्रत्याचख्यौ—'प्रातर्या प्रथमं काष्ठभारिका समेति तन्मध्यादमुकाभिज्ञानेन विषापहारिणीमौषधीं गृहीत्वा धृष्ट्वा च मृदुंको(मद्दंशे) देया सज्जो भविष्यामि' इति गुरुगिरमाकर्ण्य हृष्टेन संघेन तथाकृते सज्जीभूतः प्रभुस्तदादिषड्विकृतीः प्रत्याख्याय युगंधर्यैव केवलमाहारमकरोदिति ॥ इति धर्मघोषसूरिः ॥

यस्माद्दिदीपे चरणस्य लक्ष्मीर्ज्योत्स्नेव चान्द्री शरदोऽनुषङ्गात् ।
सोमप्रभाख्यो जनदृक्चकोरीसोमप्रभः सूरिरभूत्पदेऽस्य ॥ १२० ॥

अस्य धर्मघोषसूरेः पदे सोमप्रभ इत्याख्या नाम यस्य तादृशः सूरिरभूत् । किंभूतः । जनानां लोकानां दृशो दृष्टयः ता एव चकोर्यो ज्योत्स्नाप्रियप्रियास्तासां प्रह्लादकत्वेन सोमस्य चन्द्रस्य प्रभेव चन्द्रिकेव यः । यस्मात्सूरेश्चरणस्य चारित्रस्य लक्ष्मीर्दिदीपे अतीव शोभितवती । केव । ज्योत्स्नेव । यथा शरदो मेघात्ययस्यानुषङ्गादाश्लेषात्संगमाच्चन्द्रस्येयं चान्द्री कौमुदी दीप्यते ॥ इति श्रीसोमप्रभसूरिः ॥

तेनापि सोमतिलकाभिधसूरिरात्म-
पट्टे न्यवेशि वशिलक्ष्मिलसल्ललामम् ।
वादेषु येन परवादिकदम्बकस्या-
नध्यायता प्रतिपदेव मुखे न्यवासि ॥ १२१ ॥

अपि पुनस्तेन श्रीसोमप्रभसूरिणा आत्मपट्टे स्वपदे सोमतिलक इत्यभिधा नाम यस्य तादृशः सूरिराचार्यः न्यवेशि स्थापितः । 'न्यवेशि रत्नत्रितये जिनेन यः' इति नैषधे । किंभूतः । वशिनां जितात्मनां श्रमणानां या लक्ष्मीस्तस्या लसद्दीप्यमानं ललामं तिलकम् । ललामशब्दो नकारान्तोऽकारान्तोऽप्यस्ति । येन सोमतिलकसूरिणा वादेषु पारे नैयायिकादयः पारे जैनाभासाः परपक्षीयास्त एव वादिनो वादं कर्तुमुद्यतास्तार्किका वा तेषां कदम्बकस्य वृन्दस्य मुखेऽनध्यायता तूष्णीकता मौनमेव न्यवासि वासिता । कयेव । प्रतिपदेव । यथा प्रतिपत्तिथिना छात्राणां मुखेऽनध्यायता अध्ययनाभावो मुखे वास्यते । 'प्रतिपत्पठनाशिनी' इत्युक्तेः ॥ इति सोमतिलकसूरिः ॥

संस्थापितो निजपदे गुरुणाथ तेन
श्रीदेवसुन्दरगुरुः सुरसुन्दरश्रीः ।
अह्नोमुखेन तिमिरेण तमस्विनीव
येन व्यपास्यत समं मदनेन माया ॥ १२२ ॥

अथानन्तरं तेन प्रभुणा श्रीसोमतिलकसूरीन्द्रेण निजस्यात्मनः पदे पट्टे श्रीदेवसुन्दरगुरुः संस्थापितः । किंभूतः । देववत्सुर इव सुन्दरा जनमनोहरा श्रीः शरीरशोभा

यस्य। येन श्रीदेवसुन्दरगुरुणा मदेन(दनेन) मुन्मोहसंभेदेन गर्वेण वा। अथ वा जातावेकवचनम्। अष्टभिर्मदैः समं माया शठता दम्भचारिता वा व्यपास्यत निरस्ता। केनेव। अह्नोमुखेनेव यथा प्रभातेन तिमिरेणान्धकारेण सार्धं तमस्विनी रात्रिर्व्यपास्यते। अह्नोमुखेनेत्यत्रालुक्समासः, पृथक् पदद्वयी वा॥ इति श्रीदेवसुन्दरसूरिः॥

घूकैरर्कमिव द्विषद्भिरुदये हन्तुं परैः प्रेषितं
कंचिच्चन्द्ररुचा प्रमादविमुखं स्वापेऽपि दृष्ट्वा प्रभुम्।
क्षाम्यन्तं गदिताखिलव्यतिकरं संबोध्य योऽदीक्षय-
त्स श्रीमानथ सोमसुन्दरगुरुर्भेजे तदीयं पदम्॥ १२३॥

अथानन्तरं स प्रसिद्धमहिमा श्रीमान् जगति संयमसंवेगादिगुणैः कृत्वा शोभावान् सोमसुन्दरनामा गुरुस्तदीयं देवसुन्दरसूरिसंबन्धि पदं भेजे श्रितवान्। स कः। यः श्रीसोमसुन्दरसूरिः कंचिदनिर्दिष्टनामानं घातुकं घातकारिणं पुमांसं संबोध्य प्रतिबोधयित्वादीक्षयत् संघस्यादेशपूर्वकं तत्समक्षं च प्राव्राजयत्। कंचित् किंभूतम्। उदये उद्गमनसमये अर्कं सूर्यं घूकैः कौशिकैरिव उदये सूरिमाहात्म्यदर्शनचमत्कृतचेतोभिर्जगज्जनैः प्रतिपदं प्रणीतातिश्लाघाकर्णनव्यतिकरे द्विषद्भिः वैरायमाणैः परैः परपक्षीयैर्दुर्वादिभिर्वा हन्तुं गुरुं व्यापादयितुं प्रेषितं प्रहितम्। पुनः किं कुर्वन्तम्। चन्द्रोदये चन्द्रे गगनमण्डलमवगाहमाने सति जालान्तरागतसान्द्रचन्द्रिकया स्वापे निद्रावस्थायामपि प्रमादादनवधानताया विमुखम्। प्रमादरहितमित्यर्थः। रजोहरणेन संस्तारकं स्वस्य पार्श्वं च पृष्ठं च प्रमार्ज्य पार्श्वं परावर्तयन्तं दृष्ट्वा दृग्गोचरीकृत्य 'अहो अमी निद्रायामपि क्षुद्रजन्तुजातरक्षाकारिणो दृश्यन्ते, तत्कथमेते कृपापीयूषपारावाराः परेभ्यो द्रुह्यन्तो भविष्यन्ति। ततो महापातकिभिरेतद्दुष्कर्मकारणार्थं प्रेषितेन मया परलोके शुभोदर्ककाङ्क्षिणा सर्वथाप्येते महानुभावा न घात्याः, प्रत्युत रक्षणीयाः, आत्मनोऽप्यैहिकलौकिकपारलौकिकशिवाय शरणमाश्रयणीयाश्च' इति वितर्कपूर्वकं गुरुं जागरयित्वा मनोजनितमपि स्वापराधं पादयोर्लगित्वा क्षाम्यन्तं गर्हन्तं च। अत एव किंभूतम्। गदितः कथितः स्वस्यात्मनोऽखिलः समस्तोऽपि व्यतिकरः परप्रेषणादिकः व्यापारः समयो वा येन॥ इति श्रीसोमसुन्दरसूरिः॥

पट्टश्रियास्य मुनिसुन्दरसूरिशक्रे
संप्राप्तया कुवलयप्रतिबोधदक्षे।
कान्तेव पद्मसुहृदः शरदिन्दुबिम्बे
प्रीतिः परा व्यरचि लोचनयोर्जनानाम्॥ १२४॥

श्रीमुनिसुन्दरनाम्नि सूरिशक्रे संप्राप्तया समागतया अस्य श्रीसोमसुन्दरसूरेः पट्टश्रिया जनानां भविकलोकानां लोचनयोर्नेत्रयोः परा प्रकृष्टा प्रीतिः प्रमोदो व्यरचि।

कस्मिन्निव। शरदिन्दुबिम्ब इव। यथा शरदः शरत्कालसंबन्धिनि चन्द्रमण्डले समेतया पद्मसुहृदः सूर्यस्य कान्त्या दीप्त्या जनदृशां परा प्रीतिर्विरचय्यते। 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघुवंशे। हरिदश्वो भास्वांस्तस्य दीधितेः कान्तेरनुप्रवेशात्संक्रमणाल्लघुचन्द्रो द्वितीयां प्रारभ्य वर्धते—इति तद्वृत्तिः। किंभूते मुनिसुन्दरसूरीन्द्रे चन्द्रबिम्बे च। कुवलयं भूमण्डलमुत्पलं च तस्य प्रतिबोधे बोधिबीजदेशविरतिसर्वविरतिप्रमुखप्रदाने विकाशने च दक्षे चतुरे॥

योगिनीजनितमार्युपप्लवं येन शान्तिकरसंस्तवादिह।
वर्षणादिव तपर्तुतप्तयो नीरवाहनिवहेन जघ्निरे॥ १२५॥

येन श्रीमुनिसुन्दरसूरिणा इह शिवपुर्यां भूमीमण्डले दुष्टयोगिनीभिर्दुराशयव्यन्तरीदेवीविशेषाभिर्जनिता उत्पादिता मारेर्जनमरकस्योपप्लवा उपद्रवाः 'सन्तिकरं सन्तिजिणम्' इत्यादि शान्तिकरनाम्नः संस्तवात्स्तोत्रात्स्तुतिप्रभावाज्जघ्निरे निहता निवारिताः। केनेव। नीरवाहेनेव। यथा मेघेन वर्षणाज्जलवृष्टिविधानात्तपर्तोर्ग्रीष्मसमयस्य तप्तयस्तापा निहन्यन्ते॥

बाल्येऽपि रश्मीन्सरसीजबन्धुरिवावधानानि वहन्सहस्रम्।
अष्टोत्तरं वर्तुलिकानिनादशतं स्म वेवेक्ति धियां निधिर्यः॥ १२६॥

यो मुनिसुन्दरसूरिर्बाल्येऽपि शैशवे क्षुल्लकत्वेऽपि अष्टाभिरधिकं वर्तुलिकानां कच्चोलिकानां 'वाटका कच्चोली' इति प्रसिद्धानां निनादानां शब्दानां शतं क्वचित्सहस्रमपि वेवेक्ति पृथक् पृथक् कृत्वा कथयति स्म। पत्तनसमागतैरभुक्तदेशोपेतपण्डितद्विजं पत्रावलम्बनं विधाय प्रतिपत्तनपण्डितस्थानं जलभृतकुण्डलकं तृणपूलकं च स्वशिष्यैर्मोचयन्तं तच्छिष्यनिद्रुटिनपूर्वकं मुनिसुन्दरशिशुना राजसभायां स्वेन सार्धं समागतचतुरशीतिपौ(?)षधशालासत्काचार्यैर्वादे जायमाने षण्मास्यन्ते राजकथनपूर्वं स्वादृष्टाष्टोत्तरशतवर्तुलिकानां पृथक् पृथक् शब्दान् कथयित्वा तं विजिग्ये। पदप्रणम्रीचक्रे चेति भावः। किंभूतः। धियां विशिष्टबुद्धीनां निधिर्निधानम्। किं कुर्वन्। सहस्रं दशशतीमवधानानि बहुप्रकारधारणाविशेषान् वहन् बिभ्रत्। क इव। सरसीरुहबन्धुरिव। यथा भास्वान् बाल्येऽपि रश्मीन् सहस्रं रश्मीन् वहते धारयति॥

अलम्भि याम्यां दिशि येन काली सरस्वतीदं बिरुदं बुधेभ्यः।
रवेरुदीच्यामिव तत्र तेजोऽतिरिच्यते यत्पुनरत्र चित्रम्॥ १२७॥

येन श्रीसुन्दरसूरिणा याम्यां दक्षिणस्यां दिशि अयं काली सरस्वती इदमेतद्बिरुदं नाम विशेषोऽलम्भि प्राप्तम्। केभ्यः। बुधेभ्यः दाक्षिणात्यपण्डितेभ्यः। पुनर्यदु[दी]च्यामुत्तरस्यां दिशि रवेर्भानोरिव तत्र दक्षिणस्यां दिश्यपि अस्य सूरेस्तेजः प्रतापः। 'एतस्योत्तरमय नः समजनि त्वत्तेजसां लङ्घने साहसैरपि पङ्गुराङ्घ्रिभिरभिव्यक्तीभवन्भानुमान्' इति नैषधे। तेजसां प्रतापानां लङ्घनेऽतिक्रमणे—इति तद्वृत्तिः। अतिरिच्यते

अतिशायी भवति। तदत्र जगति महच्चित्रमस्माकं जायते। सूर्यस्य दक्षिणस्यां तु तेजोहानिरुत्तरस्यां तु तेजोवृद्धिः। एतद्गुरोस्तु दक्षिणस्यामपि प्रतापः केनापि सोढुं न शक्यत इत्याश्चर्यम्॥ इति श्रीमुनिसुन्दरसूरिः॥

सूरेस्ततोऽजायत रत्नशेखरः श्रीपुण्डरीको वृषभध्वजादिव।
वाम्बीति नाम्ना द्विजपुङ्गवेन न्यगादि यो बालसरस्वतीति॥१२८॥

ततस्तस्मात् श्रीमुनिसुन्दरसूरीन्द्रात् रत्नशेखर इति नामा सूरिरजायत। क इव। यथा भरतचक्रवर्तिप्रथमसुतः श्रिया गणभृल्लक्ष्म्या कलितः पुण्डरीकनामा श्रीवृषभध्वजात् वृषभलाञ्छनात्। 'ध्वजश्चिह्ने पताकायां शिश्ने पूर्वदिशो गृहे। खट्वाङ्गे शोण्डिके माने' इत्यनेकार्थतिलके। आदिदेवाज्जज्ञे। यः श्रीरत्नशेखरसूरिः स्थम्भतीर्थे वाम्बीनाम्ना द्विजपुङ्गवेन ब्राह्मणश्रेष्ठेन अयं बालसरस्वती इति न्यगादि कथितः। तदादि बालसरस्वतीति बिरुदं दधार॥ इति रत्नशेखरसूरिः॥

लक्ष्मीसागरसूरिशीतमहसा लक्ष्मीरवापे ततो
दीपेनेव गुणोदयं कलयता ज्योतिर्बृहद्भानुतः।
गायन्तीः सुरसुन्दरीगुणगणान्यस्याष्टदिक्सङ्गिनी-
र्विज्ञायाष्ट विनिर्ममे किमु विधिः श्रोतुं श्रुतीरात्मनः॥१२९॥

ततः श्रीरत्नशेखरसूरेः सकाशात् लक्ष्मीसागर इति नाम्ना सूरिशीतमहसा आचार्येषु भविकाह्लादकत्वेन चन्द्रेण लक्ष्मीः पट्टश्रीरवापे प्राप्ता। केनेव। दीपेनेव। यथा गृहमणिना बृहद्भानोर्वह्नेः सकाशात् ज्योतिर्दीप्तिरवाप्यते। किं कुर्वता सूरिणा दीपेन च। गुणानां शमदममार्दवार्जवगाम्भीर्यधैर्यादीनां वृत्तेः सूत्रमय्याश्चोदयमाविर्भावं च कलयता बिभ्रता। यस्य गुरोर्गुणानां गणान् समूहान् अष्टसु पूर्वाग्नियामीनैर्ऋतप्रतीचीवायूदीचीशानीदिक्षु विदिक्षु च सङ्गोऽस्त्यासामित्यष्टदिक्सङ्गिनीरष्टदिक्षु संतिष्ठमानाः सुरसुन्दरीर्देवाङ्गना गायन्तीः कलकण्ठीकण्ठानुकरणप्रवणाकुण्ठकण्ठकुहरप्रेङ्खोलनापूर्वकमपूर्वगीतिमातन्वतीर्विज्ञाय ज्ञात्वा विधिर्ब्रह्मा तान् गुणान् श्रोतुं स्वश्रवणगोचरीकर्तुम्। उत्प्रेक्ष्यते—आत्मनः स्वस्याष्टसंख्याकाः श्रुतीः कर्णान्किमु निर्ममे कृतवानिव सृष्टिकर्तृकत्वात्। 'द्रुहिणो विरञ्चिर्द्रुघणो विरञ्चः परमेष्ठ्यजोऽष्टश्रवणः स्वयंभूः' इति हैम्याम्॥ इति श्रीलक्ष्मीसागरसूरिः॥

सुमतिसाधुरभूदथ तत्पदे त्रिजगतीजननेत्रसुधाञ्जनम्।
समकुचत्रपया हृदि यद्गिरां मधुरिमाधरिता किमु गोस्तनी॥१३०॥

अथानन्तरं तस्य श्रीलक्ष्मीसागरसूरेः पदे सुमतिसाधुरिति नामा सूरिरभूद्बभूव। किंभूतः। त्रिजगत्यास्त्रैलोक्यस्य 'त्रिजगतीं पुनन्ती कविसेविता' इति सप्तशतीस्तोत्रकर्तृजिनप्रभसूरिकृत ऋषभनाम्नः स्तोत्रे तथा जगतीशब्देन विश्वमप्युच्यते। यथा—

'स्याल्लोको विष्टपं विश्वं भुवनं जगती जगत्' इति हैम्याम् । तेन त्रित्वसंख्योपलक्षिता जगती भुवनं त्रिजगतीति संभाव्यते । जना लोका अर्थात् सुरासुरोरगनरास्तेषां नेत्राणां सुधाञ्जनं नयनासेचनकत्वेनामृतमयश्रोताञ्जनं यद्गिरां यस्य वचनविलासानां मधुरिम्ना माधुर्यातिशयेनाधरिता हीनीकृता तिरस्कृता सती गोस्तनी द्राक्षा हृदि मनसि त्रपया लज्जोदयेन । उत्प्रेक्ष्यते—समकुचत्किमु संकोचं प्राप्तवतीव ॥ इति श्रीसुमतिसाधुसूरिः ॥

शीलेन जम्बुगणनाथ इवात्र वज्र-
　स्वामी परः किमथ वा महिमोदयेन ।
जज्ञे नवद्वयशतव्रतिसेव्यमाना
　नाम्नाथ हेमविमलः प्रभुरस्य पट्टे ॥ १३१ ॥

अथानन्तरमस्य सुमतिसाधुसूरेः पट्टे नाम्ना अभिधानेन हेमविमलः गच्छाधिराजो जज्ञे जातः । किंभूतः । नवानां नवसंख्यानां द्वयं नवद्वयमेतावताष्टादश तन्मितानि शतानि नवद्वयशतानि । तानीव ते व्रतिनश्च साधवस्तैः सेव्यमानो नित्यमुपास्यमानः । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । अष्टादशशतश्रमणपरिवार इत्यर्थः । यः श्रीहेमविमलसूरिः शीलेन दृढब्रह्मचर्येण कृत्वा अत्र जगति । उत्प्रेक्ष्यते—अपरोऽन्यः किमु वज्रस्वामी जज्ञे ॥ इति हेमविमलसूरिः ॥

विभूषामद्वैतामकलयदथानन्दविमले
　व्रतीन्द्रे विद्राणाखिलकुदृशि तत्पट्टकमला ।
वसन्ते वासन्तीततिरिव पुनर्धर्मजयिनि
　क्षितीन्द्रे राज्यश्रीरिव विजितविश्वप्रतिभटे ॥ १३२ ॥

अथानन्तरं तस्य श्रीहेमविमलसूरेः पट्टकमला पदलक्ष्मीः आनन्दविमलनाम्नि व्रतिनां साधूनामिन्द्रे पुरंदरे सूरिशक्रे न विद्यते द्वैतं युगलमर्थादपरं वस्तुतुल्यं यस्याः सा द्वैता ताम् । असाधारणीमित्यर्थः । विभूषां शोभामकलयत् दधार । किंभूता । विद्राणाः पलायिताः । 'विद्राणे रणचत्वरात्' इति नैषधे । अखिलाः समग्रा अपि कुदृशः परपाक्षिकाः कुमतभाजः परवादिनो वा यस्मात् । पुनः केव । वासन्तीततिरिव । यथा मधुसमये माधवी अतिमुक्तकी नाम लतापङ्क्तिरनन्यां श्रियं बिभर्ति । पुनः केव । राज्यश्रीरिव । धर्मेणोपलक्षितः । अथ वा । धर्मेण कृत्वा जयोऽस्यास्तीति धर्मजयी तादृशे क्षितीन्द्रे पृथ्वीपुरंदरे राज्यश्रीर्भूपत्वलक्ष्मीः शोभां धत्ते । किंभूते नृपे । विजिताः पराभूताः विश्वे सर्वे प्रतिभटा वैरिणो येन ॥

त्यक्त्वाशेषकुपक्षिकांश्च कुदृशः किंपाकभूमीरुहा-
　न्रोलम्बैरिव पारिजातशिखरी यो जन्मिभिः शिश्रिये ।

येनात्मा शिथिलीभवन्मुनिपथादप्युद्धृतः सूरिणा
संसाराम्बुनिधेरिवोद्धतकुदृग्यादोव्रजव्याकुलात् ॥ १३३ ॥

यः श्रीआनन्दविमलसूरिः जन्मिभिर्भविकैः शिश्रिये श्रितः। किं कृत्वा। कुदृशः सौगतादीन् च पुनरशेषान् समस्तान् कुपक्षिकान् लुम्पाकप्रमुखान् त्यक्त्वा विमुच्य श्रितः। कैरिव। रोलम्बैरिव। यथा भ्रमरैः किंपाकनामानो महीरुहा महाकालपादपाः विषवृक्षास्तान्विहाय दूरेणापास्य पारिजातशिखरी मन्दारनामा द्रुमो वृक्षविशेषः कश्चित्सेव्यते। अथ वा कल्पवृक्षविशेषः। कल्पः, पारिजातः, मन्दारः, हरिचन्दनः, संतान, एते पञ्चापि देवद्रुमाः। कल्पद्रुमेष्वपि विशेषः पारिजातः। यथा रघौ—'कल्पद्रुमाणामिव पारिजातः' इति। अपि पुनर्येन भगवता शिथिलीभवन् प्रमादपदवीं परिगच्छन् यो मुनीनां साधूनां पन्था मार्गस्तस्मादात्मा स्वजीव उद्धृतः। उत्प्रेक्ष्यते—उद्धता उत्कटा ये कुदृशो दुर्वादिनः नैयायिकादयः परपक्षिकाः कुमतमतोद्बोधका वा त एव यादोव्रजा दुष्टजलचरनिकराः मकरादयस्तैर्व्याकुलात्संकीर्णपरिपूर्णीभूताद्भयंकराद्वा संसारोऽनन्तधाभवपरम्पराभ्रमणरूपः स एवापारत्वादम्बुधिः समुद्रस्तस्मादिवोद्धृतः पारं प्रापितः॥

शुद्धां क्रियामुद्धरतोऽस्य भाविनीमद्वत्प्रवृद्धिस्तमितीव शंसितुम्।
स्वप्नेऽनुयुक्तेरनु कस्यचिज्जिनध्यातुर्द्वितीयेन्दुरदर्शयन्निजम् ॥ १३४ ॥

जिनस्य श्रीपार्श्वनाथस्य ध्यातुर्ध्यानकर्तुः। पार्श्वनाथमन्त्राराधकस्येत्यर्थः। कुमरगिरिसत्कस्य कस्यचित् श्राद्धस्यानुयुक्तेः प्रश्नादनु पश्चात्स्वप्ने स्वापजागरावस्थायामुपविष्टस्यैव प्रभोः पुरः किंचिन्निद्रानिमीलितनयनस्य द्वितीयेन्दुः उदयद्वितीयादिनचन्द्रः निजमात्मानमदर्शयत् दर्शयति स्म। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण शंसितुं कथयितुमिव। इति किम्। मद्वद्यथाद्य विविधातोद्यवादनजननमस्करणमहोत्सवविधानपूर्वकमहमुदितो दिने दिने चन्द्रिकाकलादिभिर्मम वृद्धिर्भाविनी। तथा—शुद्धां निर्दोषां क्रियां यथावत्साधुमार्गानुष्ठानमुद्धरतोऽनुतिष्ठतः। विशुद्धक्रियोद्धारं विदधत इत्यर्थः। अस्य श्रीआनन्दविमलसूरेः प्रकर्षेण शिष्यप्रशिष्यमाहात्म्यादिभिर्वृद्धिर्भवित्री भविष्यतीति। तथा—क्रियोद्धारविधित्सुना सूरीन्द्रेण कश्चित्सिद्धश्रीपार्श्वनाथमन्त्रः श्राद्धः प्रथमं पृष्टस्तेन च ध्यानं विदधता किंचिन्निद्रामुद्रितनेत्रेणाभ्युदयमानं द्वितीयाचन्द्रं दृष्ट्वा समेत्य प्रभुपुरः प्रोचे। यद्यूयं द्वितीयाचन्द्र इव दिने दिने वर्धमानाभ्युदयभाजो भविष्यथ, तच्चरितमेव क्रियोद्धारं कुरुत, विलम्बो नैव विधेयः। ततः श्रीआनन्दविमलसूरिणा श्रीहेमविमलसूरिशासनपूर्वं शुद्धक्रिया उद्धृता इति वादः॥

जैनार्चाश्रमणाद्यभावभणनाम्भःप्लाव्यमानात्मनां
जज्ञे द्वीप इव व्रतीशितुरिहोद्धारः क्रियाया नृणाम्।

विद्यासागरनामवाचकवरो यस्याथ दुर्दृग्गणा-
न्सेनानीरिव चक्रिणो रिपुनृपान्प्राक्स्वस्य वश्यान्व्यधात् ॥ १३५ ॥

इह भरतक्षेत्रदक्षिणार्धमध्यखण्डे व्रतीशितुः श्रीआनन्दविमलसूरेः क्रियायाः शुद्धानुष्ठानस्योद्धारो विधानं नृणां भव्यजनानां द्वीप इवान्तर्जले तटमिव जज्ञे जातः । किंभूतानां नृणाम् । जैनार्चानां तीर्थकृत्संबन्धिनीनां प्रतिमानां, तथा श्रमणानां साधूनामभावमसत्तां सिद्धान्ते क्वापि प्रतिमा प्रोक्ता नास्ति, गुर्जरादिदेशेषु साधवः सर्वथा न सन्तीति भणनं लुम्पाककटुकमतीनां कथनम् । इत्याद्यपरापरकुपक्षिपक्षस्वस्वकपोलकल्पितकुमतवादरूपैरम्भोभिः प्रवर्धमाननीरपूरैः प्लाव्यमान उपद्रूयमाणो विविधोद्धतकुमतिमतसंततसलिलप्लवे । ब्रुडन्नित्यर्थः । आत्मा येषाम् । अथ क्रियोद्धारानन्तरं कियति समये व्यतिक्रान्ते सति अथ पुनर्यस्य सूरेर्विद्यासागर इति नाम यस्य तादृशो वाचकवरः उपाध्यायश्रेष्ठः दुर्दृग्गणान् कुमतिसमूहान् स्ववश्यानात्मायत्तान् सूरिशासनविधायिनो व्यधात् कृतवान् । क इव । सेनानीरिव । यथा चक्रिणश्चमूपतिः रिपुनृपान् प्राक् प्रत्यक् खण्डादिम्लेच्छभूपालान् स्ववश्यान् चक्रवर्तिनिर्देशकारिणः कुरुते ॥

प्रातः साधुवृतस्त्वदापणपुरो यो याति सूरीशिता
सम्यक्संयमवान्स पूर्वगणिवत्सेव्यस्त्वयाहर्निशम् ।
स्वप्नेऽस्वप्नगिरेति यं निजगृहे नीत्वातिभक्त्या प्रभुं
श्राद्धः कश्चन मण्डपाद्रिवसतिर्भेजे सगोत्रैः समम् ॥ १३६ ॥

कश्चन कोऽपि मण्डपाद्रौ मण्डपाचले वसतिर्गृहं यस्य तादृक् श्राद्धः कटुकमतिरास्तिकः स्वप्ने स्वापावस्थायामित्यमुना प्रकारेणास्वप्नगिरा पूर्वजसुरवचनेन अतिभक्त्या कृत्वा निजगृहे स्वसौधे नीत्वा समानीय यं प्रभुं स्वगोत्रैः स्वस्वजनैः समं भेजे श्राद्धीभूयाराधयति स्म । इति किम् । हे वत्स, त्वं तु दुर्वादिव्रातविविधविरुद्धालपनाकर्णनाकलितानेककल्पनाजनितसंशीतिव्याकुलीकृतनैकलोककलियुगानुभावात्कटुमतिरसि । तथापि प्रातः प्रभाते यामानन्तरमष्टभिः साधुभिः श्रमणैः परिवृतः परिकलितः यः सूरीशिता सूरीन्द्रः त्वदापणस्य तव हट्टस्य पुरोऽग्रे याति गच्छति, स सूरिरस्मिन् कलियुगे सम्यक् संयमवान् । विशुद्धचारित्रकलितः त्वया भवताहर्निशं निरन्तरं पूर्वगणिवत् प्राचीनाचार्य इव सेव्य उपासनीयः । 'साङ्गे प्रवचनेऽधीती गणिरनूचानश्च' इति हैम्याम् । तस्याभिज्ञानं तव हस्ते कुसुमान्यर्पयामीति जागरणेऽपि पाणौ पुष्पाणि दृष्टवान् स्वजनानां च स्वप्ननिवेदनपूर्वं दर्शितवांश्चेति काव्येऽनुक्तमपि जातत्वाद्वृत्तौ प्रोक्तम् ॥

तमःस्तोमप्राये कुनयनगणैर्दारुणतमे
कलौ श्रीसूरीन्दुः शरणमभवद्यो जनिमताम् ।

मृगारातिव्यालद्विरदशबरव्यूहबहुले
गिरेर्दुःसंचारे गहन इव सार्थः पथिजुषाम् ॥ १३७ ॥

यः श्रीसूरीन्दुरानन्दविमलसूरिसुधांशुः कलौ पञ्चमारककाले जनिमतां प्राणिनामाश्रयोऽभवद्बभूव । कलौ किंभूते । तमसामज्ञानानां पापानां च स्तोमः समूहस्तेन प्रायो बहुलः । पुनः किंभूते । कुनयनानां दुर्वादिनां कुपक्षिकाणां च गणैः परिवारैः दारुणतमे अतिशयेन सुदृशां भयकारिणि । ते हि संगताः सन्तोऽनन्तभवपरम्परा वर्धयन्तीति भीतिहेतवः । क इव । सार्थ इव । यथा सार्थः जनसमुदायः गिरेः पर्वतस्य दुःखेन संचरणं यत्र स दुःखेनोल्लङ्घयितुं शक्ये तादृशे गहने कान्तारे रविकिरणाप्रवेशे शाखाप्रशाखाभिरेकीभूतविविधवृक्षलक्षप्रदेशे पन्थानं जुषन्ते सेवन्ते इति कृत्वा पथिजुषः पान्थास्तेषामाश्रयो विश्रामस्थानं शरणं भवति । किंभूते गहने । मृगारातयः सिंहाः, व्याला भुजगा दुष्टा गजा वा, द्विरदाः पारे हस्तिनः, शबरा भिल्लाः, तेषां व्यूहैः समूहैर्बहुले निर्भरभृते । पुनः किंभूते । तमःस्तोमप्राये अन्धकारभृते । पुनः किंभूते । कुनयनानां दृष्टिविषसर्पाणां गणैर्दारुणतमे अतिभीषणे ॥

गभीरिम्णा पाथोनिधिरिव महिम्नापरमरु-
द्गिरिश्चेतोजन्मप्रतिभटतया वा गगनजित् ।
प्रसारै रश्मीनां सरसिरुहिणीनामिव पतिः
पवित्रीचक्रे यो विहृतिभिरशेषा अपि दिशः ॥ १३८ ॥

यो भगवान् गभीरिम्णा गाम्भीर्येण कृत्वा। उत्प्रेक्ष्यते—पाथोनिधिः समुद्र इव वर्तते। पुनर्महिम्ना माहात्म्येन कृत्वा महतो भावो महिमा । 'लोहितादेर्डित् इमन्' इति सारस्वतसूत्रेण इमन्प्रत्ययः । उत्प्रेक्ष्यते—अपरोऽन्यो मरुतां देवानां गिरिः पर्वतः । अन्यो मेरुरिव । वा पुनरुत्प्रेक्ष्यते—चेतसि जन्मोत्पत्तिर्यस्य स स्मरस्तस्य प्रतिभटतया शत्रुत्वेन गगनजिद्बुद्ध इव । 'बुद्धस्तु सुगतो धर्ममारलोकखजिद्धर्मराजो विज्ञानमातृकः' इति हैम्याम् । समुद्र इव गम्भीरः मेरुरिव महिमावासः । बुद्ध इव कामजेतेत्यर्थः । तथा यो गुरुर्विहृतिभिः स्वविहारैः कृत्वा अशेषाः समस्ता अपि चतस्रः पूर्वापश्चिमादक्षिणोत्तरालक्षणा दिशः पवित्रीचक्रे पावनीकृतवान् । क इव । पतिरिव । यथा सरसिरुहिणीनां पद्मिनीनां पतिर्भर्ता सूर्यः रश्मीनां स्वकिरणानां प्रसारैर्विस्तारणैः कृत्वा सर्वाशाः पुनाति पवित्रयति ॥

यो दक्षिणावर्त इव स्रवन्तीपतिप्लवे कम्बुकदम्बकेन ।
वाचंयमानां निवहेन पृथ्वीपीठे परीतो विजहार सूरी ॥ १३९ ॥

यः श्रीआनन्दविमलसूरिः वाचंयमानां मुनीनां निवहेन वृन्देन परीतः परिवृतः सन् पृथ्वीपीठे भूमण्डले विजहार विहारं कृतवान् । क इव । दक्षिणावर्त इव दक्षिणे

पार्श्वे आवर्तः कुण्डलनालक्षणो यस्य तादृशः शङ्खः कम्बूनां वामावर्तवतां शङ्खानां कदम्बेन गणेन परिवृतः स्रवन्तीनां नदीनां पत्युर्भर्तुः समुद्रस्य पयःप्लवे नीरपूरे विहरति विचरति ॥

भागीरथीव यद्ब्राह्मी पुनीते भुवनत्रयम् ।
परं विशेषः कोऽप्यस्या निम्नगा न कदाचन ॥ १४० ॥

यद्ब्राह्मी यस्य वाणी भुवनत्रयं त्रैलोक्यं पुनीते त्रिजगज्जनान् पवित्रीकुरुते । केव । भागीरथीव । यथा गङ्गा त्रिभिर्निजैः प्रवाहैः त्रिस्रोतस्त्वेन त्रिभुवनं स्वर्गपातालभूमीत्रयं पवित्रयति । यथा—'विबुधानन्दमन्दिरं वन्दे रसान्तरप्रौढम्' इति चम्पूकथायाम् । विबुधानां देवानामानन्दमन्दिरं प्रमोदनमित्यर्थात्स्वर्गमार्गप्रवृत्तम् । 'नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजैः' इत्यपि रघौ । तथा रसायां पृथिव्याम्, तथा अन्तरे स्वभ्रे अर्थात्पाताले प्रकर्षेण ऊढम्–इति चम्पूवृत्तिः । एतद्विशेषणेन त्रैलोक्येऽपि त्रिभिः प्रवाहैर्गङ्गा प्रवहतीति कविसमयः । परमस्य ब्राह्म्या कोऽप्यद्भुतवैभवः अस्या विशेषोऽस्ति यत्कदाचन कस्मिन्नपि काले निम्नगा निम्नं नीचैरवद्यं गच्छतीति तादृशी न, गङ्गा तु निम्नगा । अथ च यस्य ब्राह्मी सरस्वती सरित् गङ्गेव त्रिभुवनं पुनीते । परं केवलमस्याः कोऽप्याश्चर्यकारी विशेषः । यद्गङ्गा त्रिभिः स्रोतोभिः त्रिभुवनम् । इयं तु एकेन स्रोतसा वचोनैरन्तर्येऽपि स्रोतःशब्दः–इति टिप्पनके । पवित्रयति निम्नगापि नेत्यर्थध्वनिः ॥

ये कर्णाभरणीबभूवुरनिशं विश्वत्रयीजन्मिनां
सान्द्रोन्निद्रितचन्द्रिका इव शुचीचक्रुस्त्रिलोकीमपि ।
यान्संस्तोतुमिवाभवद्भुजगराड्जिह्वासहस्रद्वय-
स्तेषां सूरिपुरंदरः स समभूदेको गुणानां निधिः ॥ १४१ ॥

स विशुद्धक्रियोद्धारकारकत्वेन जगद्विख्यातः सूरिपुरंदरः श्रीआनन्दविमलसूरीन्द्रः तेषां विश्वाह्लादविधायिनां पूर्वोक्तविशेषणविशिष्टानां वा गुणानामेकोऽद्वितीयत्वेन निधिर्निधानं समभूत् सम्यक् जातः । ते के । ये गुणा अनिशं निरन्तरं विश्वत्रयीजन्मिनां त्रैलोक्योत्पत्तिभाजां सुरासुरनराणां कर्णाभरणीबभूवुः कर्णपूरतां प्रापुः । त्रैलोक्यलोकाः सोत्कण्ठमहर्निशमाकर्णयन्ति स्मेत्यर्थः । पुनर्ये गुणास्त्रिलोकीं जगत्रयीमपि शुचीचक्रुः धवलयन्ति स्म । का इव । सान्द्रा नीरन्ध्रा बहला उन्निद्रिताः दिवस्पृथिव्योर्विस्तृताः चन्द्रिकाश्चन्द्रज्योत्स्ना इव । यथा चन्द्रिका भुवनं श्वेतयति । पुनर्यान् गुणान्संस्तोतुं स्तुतिगोचरीकर्तुं भुजगराट् शेषनागेन्द्रः जिह्वानां रसज्ञानां सहस्रयोर्दशशत्योर्द्वयं युगलं विंशतिशती यस्य तादृश आसीत् ॥

अश्रोत्रैः श्रोतुकामैर्भुजगपरिवृढैर्यज्जगद्गीतकीर्ति
शब्दाधिष्ठानसृष्ट्यै शतदलनिलयो याचितस्तां चिकीर्षुः ।

न्याय्या नासौ मयातिक्रमितुमिह जगत्सर्गभङ्गीव्यवस्था
शक्तिं शब्दं ग्रहीतुं किमिति स कृतवानेव तद्दृष्टिसर्गैः ॥ १४२ ॥

स जगत्सृष्टिनिर्माणकर्मकर्मठत्वेन प्रसिद्धः शतानि शतसंख्याकानि दलानि पत्राणि यत्र तादृशं 'परं शतसहस्राभ्यां पत्रं राजीवपुष्करे' इति हैमीवचनात् कमलं निलयं गृहं यस्य । 'ताम्यंस्तामरसान्तरालवसतिर्देवः स्वयंभूरभूत्' इति खण्डप्रशस्तौ । ब्रह्मा तद्दृष्टिसर्गैः तेषां नागेन्द्राणां दृष्टीनां लोचनानां सर्गे सृष्टौ निर्माण एव । उत्प्रेक्ष्यते—इति हेतोः किमु शब्दं ग्रहीतुं श्रोतुमित्यर्थः । शक्तिं सामर्थ्यं कृतवानिव । दृक्कर्णाः कृता इत्यर्थः । इति किम् । यदिह जगति असौ मत्कृता जगतो विश्वस्य सर्गस्य सृष्टेर्भङ्गी रचना तस्या व्यवस्था स्थापना परिपाटी वा मयैव ब्रह्मणा कर्त्रा अतिक्रमितुमुल्लङ्घयितुं न न्याय्या न युक्तिमती उचिता । योग्येति यावत् । ब्रह्मा किं चिकीर्षुः । तां कर्णसृष्टिं चिकीर्षुः कर्तुमिच्छुः । अश्रोत्रैः श्रवणरहितैर्भुजगपरिवृढैर्नागनायकैः शब्दाधिष्ठानानां कर्णानाम् । 'श्रुतौ श्रवः शब्दाधिष्ठाना पैंजूषमहानादध्वनिग्रहाः । श्रोत्रं श्रवणं च' इति हैम्याम् । सृष्ट्यै नवीननिर्माणाय याचितोऽभ्यर्थितः सन् । किंभूतैर्नागेन्द्रैः किं कर्तुकामैः । यस्य श्रीआनन्दविमलसूरेर्जगद्भिस्तात्स्थ्यात्तद्व्यपदेश इति न्यायाज्जगतां जनैः सुरासुरनागनागरकिंनरविद्याधरसिद्धसमाजमिथुनैः सानन्दं गीतां मधुरध्वनिभिर्गानगोचरीकृतां कीर्तिं श्रोतुकामैराकर्णयितुमभिलषद्भिः ॥

भूरेषा किमु चन्द्रचन्दनरसैरालिप्यते सर्वतो
दुग्धाब्धिप्रसरत्तरङ्गितपयःपूरैरिवाप्लाव्यते ।
क्षोदैर्मौक्तिकजैर्विलीनतुहिनैः कुन्दैरुतापूर्यते
यत्कीर्तिं प्रसृतां विभाव्य विबुधैरित्यन्तरारेक्यते ॥ १४३ ॥

यस्यानन्दविमलसूरेः प्रसृतां भूमण्डले विस्तृतां कीर्तिं विभाव्यालोक्य विबुधैः पण्डितैरित्यमुना प्रकारेण अन्तश्चित्तमध्ये आरेक्यते विचार्यते । 'रेकृङ् शकुङ् शङ्कायाम्' इत्यस्य धातोः प्रयोगः । इति किम् । एषा भूर्भूमी । उत्प्रेक्ष्यते—चन्द्रचन्दनरसैः कर्पूराकलितश्रीखण्डद्रुमद्रवैः सर्वतः सर्वेष्वपि प्रदेशेषु आलिप्यते किमु धवलीक्रियत इव । अथवा—दुग्धाब्धेः क्षीरसमुद्रस्य प्रसरद्भिर्विस्तारं गच्छद्भिस्तरङ्गितैः कल्लोलमालाकलितैर्भवद्भिस्तरङ्गाः संजाता एष्विति वा तादृशैः पयःपूरैर्जलप्लवैः उत्प्रेक्ष्यते । आप्लाव्यत इव । स्वमध्यगतेव क्रियते । सर्वापि सर्वेलमयी विधीयते । उताथवा मौक्तिकेभ्यो मुक्ताफलेभ्यो जायन्ते स्मेति मौक्तिकजैः क्षोदैश्चूर्णैरिव । चूर्णीकृतमुक्ताभिः पूरितेव । उताथ वा विलीनैर्द्रवीभूतैस्तुहिनैर्हिमैर्वा आपूर्यते । अथ वा कुन्दैर्विनिद्रमुचकुन्दकुसुमैर्वा आपूर्यते निर्भरं भ्रियते इत्यारेकास्वान्ते क्रियते । 'संदेहद्वापरारेका' इति हैम्याम् । यत्र संदेहस्तत्रैव विचारः ॥ इति श्रीआनन्दविमलसूरिः ॥

विजयदानमुमुक्षुपुरंदरः पदममुष्य ततः समभूषयत् ।
उदयभूमिभृतः शिखरं शरद्विशददीप्तिरिवाम्बरकेतनः ॥ १४४ ॥

ततोऽनन्तरं विजयदाननामा मुमुक्षूणां श्रमणानां मध्ये पुरंदर इन्द्रः अमुष्य श्रीआनन्दविमलसूरेः पदं पट्टं समभूषयत्सम्यक्प्रकारेणालंकरोति स्म । क इव । अम्बरकेतन इव । यथा भास्वानुदयाचलस्य शृङ्गं शिखरं भूषयति । 'गगनाध्वजाध्वगा' इति हैम्याम् । पर्यायपरिवर्तनात् । अम्बरकेतनः किंभूतः । शरदा मेघापगमेन विशदा निर्मला जलधररोधाभावादतिदीप्ता दीप्तिः कान्तिर्यस्य ॥

आज्ञां यस्य विधाय मूर्धनि मुदा शीर्षामिवाप्तप्रभोः
सौराष्ट्रेषु जगर्षिनामविबुधाधीशा विहारैर्निजैः ।
लुम्पाकान्परिवर्तमारुत इव प्रोन्मूल्य मूलाद्द्रुमा-
न्सम्यक्त्वाख्यकृषिं सुखं कुलवतीं चक्रे नभोम्भोदवत् ॥१४५॥

जगर्षिनामानः जग उत्कृषिरिति नामाभिधानं येषां तादृशा विबुधाधीशाः पण्डितमण्डलाखण्डलाः सौराष्ट्रेषु सम्यक्त्वमित्याख्या नाम यस्यास्तादृशीं कृषिं कर्षणं सुखं निरुपद्रवं यथा स्यात्तथा फलवतीं सफलां चक्रे । करोति स्म । क इव । नभोम्भोद इव । यथा श्रावणमेघः कृषिं कर्षणं विशेषात्षष्टिक्यव्रीहिजातिसफलां कुरुते । किं कृत्वा । लुम्पाकान् 'लूंका' इत्यभिधानान् कुपाक्षिकान् मूलात्पादादारभ्य प्रोन्मूल्य मूलादुन्मूलयित्वा । कानिव । द्रुमानिव । यथा परिवर्तस्य कल्पान्तकालस्य मारुतः पवनः तरून् मूलाद्बुध्नादुन्मूलयति । स्थानकात् कृष्ट्वा बहिः क्षिपति । कैः । निजैरात्मीयैर्विहारैर्विचरणैः। पवनोऽपि स्वप्रचाररंहोभिः द्रुमाणां क्षुद्रतरूणां तृणानामुन्मूलनेन ससार । अथ वा 'नींदण' इति लोकप्रसिद्धेन कृत्वा कृषिः सफला स्यात् । विहाराः । किं कृत्वा । यस्य श्रीविजयदानसूरेः आज्ञामादेशं मुदा हर्षेण मूर्धनि स्वमस्तके विधाय कृत्वा । कामिव । शीर्षामिव । यथा आप्तप्रभोरर्हद्भाद्दारकस्य आप्तस्तीर्थकरः स चासौ प्रभुश्च स्वामी भुवनाधीशस्तस्य शीर्षां 'शेषा' इति प्रसिद्धां कश्चिद्भाग्यवान् लब्ध्वा मौलौ धत्ते ॥

प्राबोधयद्दुःशकनैकतीव्रतपोमिहाप्तोक्तिकृतोक्तियुक्तिभिः ।
स तत्र लुम्पाकजनं यतीन्द्रो भास्वानिवाम्भोजवनं मरीचिभिः ॥१४६॥

स यतीन्द्रो जगर्षिप्रज्ञांसस्तत्र सौराष्ट्रमण्डले लुम्पाकजनं लुंकामतभावितलोकं प्राबोधयत् बोधयति स्म । काभिः । आप्तोक्तिः सिद्धान्तस्तेन कृता निर्मिता या उक्तीनां युक्तयस्ताभिः । किंभूतः । सतीव्राण्यतिदुष्कराणि चतुर्विधारप्रत्याख्यानरूपपञ्चषष्ठसप्ताष्टनवदशाद्युपवसनरूपाणि तपांसि तान्येव प्रतापस्तेषां वा प्रतापस्तमाबिभ्रत्कलयन् । क इव । भास्वानिव । यथा भानुभान् मरीचिभिः कान्तिभिः कृत्वा अम्भोजवनं कमलकाननं प्रबोधयति विकासयति ॥

यद्वाचा गलराजमन्त्रिमुकुटो निर्माप्य षाण्मासिकीं
मुक्तिं सिद्धगिरौ व्यधाद्भरतवद्यात्रां समं यात्रिकैः ।
पञ्चाक्षीं दमितुं च पञ्चविकृतीस्तत्याज यः सर्वदा
प्राणश्यंस्तरणेर्ग्रहा इव पुनर्यस्योदये दुर्दृशः ॥ १४७ ॥

यस्य श्रीविजयदानसूरेर्वाचा अर्थादुपदेशेन कृत्वा गलराज इति नाम्ना मन्त्रिषु प्रधानेषु मुकुटः कोटीरः गलराजः । अथ वा 'गलो महतो' इति लोके प्रसिद्धः । स षट्सु मासेषु भवा षाण्मासिकी । षण्मासान् यावदित्यर्थः । मुक्तिं 'मुगतउ' इति प्रसिद्धां केनापि कस्यापि पार्श्वे शुल्कद्रविणं न मार्गणीयम् अहमेव श्रीमदुक्तं यथेप्सितं द्रव्यं दास्यामीत्यधिपस्य प्रोक्त्वा या यात्रिकाणां यात्रा कार्यते सा मुक्तिरिति तां निर्माप्य कारयित्वा सिद्धगिरौ श्रीशत्रुंजये भरतवत् ऋषभदेवनन्दनप्रथमचक्रवर्तिसंघपतेरार्षभिरिव यात्रिकैर्यात्रां कर्तुमागतैः संघजनैः समं सार्धं यात्रां व्यधाच्चकार । च पुनर्यः सूरिः सर्वदा यावज्जीवं पञ्चविकृतीस्तत्याज । अहासीज्जहौ । उत्प्रेक्ष्यते—पञ्चानामक्षाणां समाहारः पञ्चाक्षी पञ्चेन्द्रियाणि तां दमितुं यन्त्रयितुम् अथवा स्ववशीकर्तुं किमु । इति गर्भितोत्प्रेक्षा । पुनर्यस्य सूरेरुदये माहात्म्यप्रादुर्भावे समागमनसमये वा दुर्दृशः कुपाक्षिकाः प्राणश्यन् पलायिताः । क इव । ग्रहा इव । यथा तरणेर्भानोरुदये ग्रहा उपलक्षणान्नक्षत्रताराः प्रणश्यन्ति ॥

रत्नानामिव रोहणोऽम्बुरुहिणी प्रेयानिव ज्योतिषां
विन्ध्याद्रिः करिणामिवामरगिरिः स्वर्भूरुहाणामिव ।
लब्धीनां वसुभूतिनन्दन इवाम्भोधिः सुधानामिव
श्रीमत्सूरिशतक्रतुर्भुवि चिरं जीयाद्गुणानां गृहम् ॥ १४८ ॥

श्रीमन्तो गणलक्ष्मीशालिनः शोभाभाजो वा ये सूरय आचार्यास्तेषु तेषां मध्ये वा अद्वैतैश्वर्यकलितत्वेन शतक्रतुरिन्द्र इव । इन्द्रः श्रीविजयदानसूरिर्भुवि पृथिव्यां चिरं गलितावधिकालं जीयाद्विजयताम् । किंभूतः । गुणानां शमदमादीनां गृहं वासः वेश्म । क इव । रोहण इव । यथा रोहणो रत्नाचलो रत्नानां मणीनां गृहम् । 'ये रत्नाचलवासिनो हि पुरुषास्तेषां न रत्नोद्यमः' इत्युक्तेः । पुनः क इव । अम्बुरुहिणीनां प्रेयानिव यथा कमलिनीनां भर्ता भानुर्ज्योतिषां किरणानां गृहम् । पुनः क इव । विन्ध्याद्रिरिव । यथा विन्ध्याचलः करिणां गजानां गृहं स्थानम् । पुनः क इव । अमरगिरिरिव । यथा देवानां पर्वतो मेरुः स्वर्भूरुहाणां कल्पवृक्षाणां स्थानम् । पुनः क इव । वसुभूतिनन्दन इव । यथा वसुभूतिनाम्नो ब्राह्मणस्य पुत्रः श्रीगौतमस्वामी लब्धीनामक्षीणमहानसीप्रमुखाणां तपःसिद्धिविशेषाणां स्थानम् । पुनः क इव । अम्भोधिरिव । यथा समुद्रः सुधानां समुद्रमध्योत्पन्नत्वेन पीयूषाणां स्थानम् ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मी क्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गश्चतुर्थोऽभवत् ॥ १४९ ॥

इति श्रीसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये श्रीमन्महावीरदेवपट्टपरम्परावर्णनो नाम चतुर्थः सर्गः ॥

तेन ब्राह्मया वाग्वादिन्याः क्रमौ सेवते आराधयतीत्येवंशीलेन विशेषेण आसामस्त्येन जन्मादिप्रारम्भं मर्यादीकृत्य वर्णनागोचरीकृते विरचिते हीरसौभाग्यनाम्नि महाकाव्ये श्रीमन्महावीरपट्टपरम्परावर्णनो नाम चतुर्थः सर्गः अभवद्बभूव ॥

इति पण्डितश्रीसीहविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ श्रीमन्महावीरदेवमारभ्य विजयदानसूरीन्द्रं यावत्पट्टपरम्पराप्रादुर्भवनो नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः ।

आजगाम विहरन्स धरित्र्यां पत्तने विजयदानमुनीन्द्रः ।
राजहंस इव जह्नुसुतायाः प्रोल्लसत्कमलशालिनि नीरे ॥ १ ॥

अथ चतुर्थसर्गानन्तरं पञ्चमसर्गप्रारम्भे स पूर्वं व्यावर्णितस्वरूपो विजयदाननामा मुनीन्द्रः साधुशक्रो धरित्र्यां गुर्जरदेशविशेषोऽभिधानं तत्र विहरन् ग्रामानुग्रामं विचरन् सुखं सुखेन विहारं कुर्वन् पत्तने अणहिल्लपाटकाभिधाने पुटभेदने आजगाम आगत्य समवसृतः । किंभूते पत्तने । प्रोल्लसन्ती वृद्धिं प्राप्नुवन्ती कमला लक्ष्मीस्तया शालिनि शोभनशीले । तत्पुरुषे ह्रस्वत्वम् । अथ वा प्रकर्षेण निरन्तरतया वासस्थानत्वादुल्लसन्ती हृष्यमाणा कमला श्रीर्यत्र तथा शोभनशीले । क इव । राजहंस इव । यथा राजमरालो जह्नुसुताया गङ्गाया नीरे आगच्छति समायाति । किंभूते नीरे । प्रोल्लसन्ति विजृम्भमाणानि यानि कमलानि तैः शालते इत्येवंशीले शोभाकलिते । 'महानन्दसाराराजमरालायार्हते नमः' इति सकलार्हत्प्रतिष्ठाने ॥

सांप्रतीनयुगजन्तुपवित्रीकर्तुरर्हत इव व्रतिभर्तुः ।
आगमं श्रवणगोचरयित्वा नागरा हृदि ननन्दुरमन्दम् ॥ २ ॥

नागराः पत्तनश्राद्धजना हृदि हृदये अमन्दं बहु ननन्दुर्जहृषुः । 'परिचरणामन्दनन्दन्नखेन्दुः' इति नैषधे । किं कृत्वा । आगममागमनं श्रवणयोः कर्णयोर्गोचरयित्वा गोचरं विधाय । श्रुत्वेत्यर्थः । कस्य । व्रतिभर्तुर्विजयदानसूरेः । उत्प्रेक्ष्यते—सांप्रतीन आधुनिको

युगः कलिकालः तस्य तस्मिन् वा ये जन्तवः प्राणिनस्तान् पवित्रीकर्तुः पावनीकरणशीलस्य । शीले तृन् । अर्हतस्तीर्थकरस्येव ॥

व्याहृता मितमधु स्पृहयद्भिर्नागरैरुपगतैर्गणधारी ।
दानवारि मधुकृन्निकुरम्बैर्गन्धसिन्धुर इवैष नि(सि)षेवे ॥ ३ ॥

आगतैः समायातैर्नागरैः पत्तनसक्तजनैरेष विजयदानसूरिर्निषेवे(?)भेजे । किं कुर्वद्भिः । व्याहृतं सूरिवचस्तदेवामितं प्रमाणरहितं मधु क्षौद्रं स्पृहयद्भिः । 'अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः' इति नैषधे । कैरिव । मधुकृन्निकुरम्बकैरिव । यथा भृङ्गगणैः गन्धेनोपलक्षितः सिन्धुरो वारणो गन्धहस्ती निषेव्यते । किं कुर्वद्भिः । दानवारि मदाम्भः काङ्क्षद्भिः ॥

सूरिशक्रपरिषत्कृतभूषैस्तद्गवेषणरसादनिमेषैः ।
वाक्सुधारसपिबैः पुरलोकैर्भूगतैरिव बभे सुरलोकैः ॥ ४ ॥

पुरलोकैर्नागरजनैर्बभे शुशुभे । किंभूतैः पुरलोकैः । सूरिशक्रस्याचार्यपुरंदरस्य परिषत्सभा । 'पर्षत्परिषदा सह' इति शब्दप्रभेदे । तत्र कृता निर्मिता भूषा शोभा यैस्तैः । पुनः किंभूतैः । तस्य सूरीन्द्रस्य अर्थाद्गुरुमुखस्य यद्गवेषणं दर्शनं तस्य रसादनुरागान्न विद्यते निमेषो नेत्रनिमीलनं येषाम् । पुनः किंभूतैः । वाक् गुरोर्वाणी सैव सुधारसोऽमृतनिःस्यन्दः तं पिबन्तीति । उत्प्रेक्ष्यते—भूगतैः पृथ्वीप्राप्तैर्भूमौ समेतैर्वा पुरा देवी एवं जनास्तैरिव । तेऽपि शक्रसभाविहितशोभा निमेषरहिताः पीयूषपायिनश्च भवन्ति ॥

आत्मनामिव वतंसविधित्सात्युत्सुकैर्विकचकोकनदेन ।
पौरमौलिभिरचुम्ब्यत सूरेः संमदात्पदयुगं युगबाहोः ॥ ५ ॥

पौरमौलिभिर्नागरोत्तमाङ्गैः संमदादानन्दात्सूरेर्विजयदानगुरोः पदयुगं चरणद्वन्द्वमचुम्ब्यत । पदयोर्नम्रीभूतः इत्यर्थः । किंभूतस्य गुरोः । युगवद्धूसर इव दीर्घौ बाहू यस्य । आजानुबाहुत्वादिदं विशेषणम् । उत्प्रेक्ष्यते—आत्मनां स्वेषां विकचेन स्मितेन कोकनदेन रक्तोत्पलेन वतंसस्य शेखरस्य या विधित्सा कर्तुमिच्छा तत्रातिशयेन उत्सुकैरुत्कण्ठितैरिव । 'वष्टि भागुरिः—' इति सूत्रेण अवोपसर्गस्याकारस्य लोपः ॥ इति गुरोः पौरागमनवन्दने ॥

आगमं गणधरस्य कुमारो ज्ञातवानथ मिथो जनवाग्भिः ।
कोकपोत इव नक्तविरामे ताम्रचूडवचनैस्तपनस्य ॥ ६ ॥

अथ गुरोरागमनानन्तरं पूर्वव्यावर्णितस्वरूपो हीरकुमारो मिथः परस्परं जनानां नागरिकलोकानां वाग्भिर्वचनरचनाभिर्गणधरस्य विजयदानसूरेर्गच्छनायकस्यागमं पत्तनोपाश्रयसंसरणं ज्ञातवान् बुबुधे । क इव । कोकपोत इव । यथा चक्रवाकबालकः नक्तविरामे निशात्यये ताम्रचूडानां कुक्कुटानां वचनैर्भाषितैस्तपनस्यागममुदयं जानाति ॥

बालसाल इव कोरकभूषामुद्वहन्वपुषि कण्टकलेखाम्।
तं मुदा नमसितुं स्पृहयन्सोऽध्यास सारथिसनाथरथाङ्कम् ॥ ७ ॥

स हीरकुमारः सारथिना सूतेन सनाथः संयुक्तो यो रथः स्यन्दनस्तस्याङ्कमुत्सङ्गम्। मध्यमित्यर्थः। अध्यास अधिरोहति स्म। किं कुर्वन्। स्पृहयन् काङ्क्षन्। किं कर्तुम्। तं गुरुं नमसितुं नमस्कर्तुम्। 'नमसितुमना यन्नाम स्यान्ननाम न पूषणम्' इति नैषधे। कया। मुदा हर्षेण। किं कुर्वन्। वपुषि शरीरे कण्टकलेखां रोमाञ्चराजीम्। 'रोमाञ्चः कण्टको रोमविकारो रोमहर्षणम्' इति हैम्याम्। उद्वहन् धारयन्। क इव। बालसाल इव। यथा नवतरुः कोरकाणां कलिकानां मञ्जरीणां भूषां शोभामुद्वहते॥

रंहसास्य मनसो विभुवीक्षोत्कण्ठितस्य दधता किमु मूर्तिम्।
संचरन्पथि रथेन स तेन प्राप्तवानुपमुनीन्द्रनिकेतम् ॥ ८ ॥

स हीरकुमारस्तेन पत्तनागमनसमये व्यावर्णितेन रथेन शताङ्गेन पथि पत्तनमध्यमार्गे संचरन् प्रचलन्नुपमुनीन्द्रनिकेतं गुरोरुपाश्रयसमीपं प्राप्तवान् समायातः। उत्प्रेक्ष्यते—मूर्तिं शरीरं दधता बिभ्रता विभोः सूरेर्वीक्षा दर्शनं तत्रोत्कण्ठितस्यात्युत्सुकितस्यास्य कुमारस्य मनसश्चित्तस्य रंहसा वेगेनेव रथेनेत्यसावुत्प्रेक्षा॥

स्यन्दनान्मणिहिरण्यवरेण्यश्रीजुषः प्रमदमेदुरिताङ्गः।
स्वर्गिवर्ग इव नाकिविमानादुत्ततार भुवि हीरकुमारः ॥ ९ ॥

हीरकुमारः स्यन्दनाद्रथाद्भुवि पृथिव्यामुत्ततार उत्तरति स्म। गुरुं वन्दितुमिति शेषः। किंभूतः कुमारः। प्रमदेन हर्षेण मेदुरितं पुष्टिप्राप्तं पुष्टं जातं वा अङ्गं शरीरं यस्य। स्यन्दनात्कस्मात्क इव। नाकिविमानात् स्वर्गिवर्ग इव। यथा देवयानाद्देवव्रजो भूमौ उत्तरसामवसरणस्थं जिनं नन्तुमिति शेषः। किंभूताद्रथाद्विमानाच्च। मणिभी रत्नैर्हिरण्यैः सुवर्णैर्वरेण्यां प्रकृष्टां श्रियं जुषन्ते सेवते इति॥

सूरिवक्त्रविधुवीक्षणजन्मानन्ददुग्धनिधिफेन इवोद्यन्।
चन्द्रिकाच्छुरितरुग्दशनानामानने स्मितमनेन वितेने ॥ १० ॥

अनेन हीरकुमारेण आनने स्वमुखे स्मितमीषद्धसितं वितेने विदधे चक्रे। किंभूतं स्मितम्। दशनानां दन्तानां चन्द्रिकया दीप्त्या छुरिता व्याप्ता। 'दशनचन्द्रिकया व्यवभासितम्' इति। तथा 'चन्द्रच्छुरितं वपुः' इति पाण्डवचरित्रे। रुक्कान्तिर्यस्य तत्। उत्प्रेक्ष्यते—उद्यन् प्रकटीभवन् सूरेर्विजयदानगुरोर्वक्त्रं मुखमेव विधुश्चन्द्रस्तस्य वीक्षणाद्दर्शनाज्जन्मोत्पत्तिर्यस्य तादृशो य आनन्दो हर्षः स एव दुग्धनिधिः क्षीरसमुद्रस्तस्य फेनो डिण्डीर इव॥

सूरिराजचरणाम्बुजयुग्मे नेमुषो मुखममुष्य बभासे।
आगतो मिलितुमत्र वसन्तीं जामिमात्मन इव श्रियमिन्दुः ॥ ११ ॥

अमुष्य हीरकुमारस्य मुखं वदनं बभासे राजते स्म। अमुष्य किं चक्रुषः। नेमुषः प्रणतस्य। क। सूरिराजस्य विजयदानमुनीन्द्रस्य चरणौ पादावेवाम्बुजे कमले तयोर्युग्मे द्वन्द्वे। उत्प्रेक्ष्यते—अत्र गुरुपादाम्बुजे वसन्तीं नित्यस्थायुकां वासिनीमात्मनः स्वस्य जामिं भगिनीं श्रियं लक्ष्मीं मिलितुमिन्दुश्चन्द्र इवागतः समायातः। हीरकुमारवदनस्य पार्वणरोहिणीरमणस्य समानत्वादियमुपमा। चन्द्रलक्ष्म्योर्द्वयोरपि समुद्रोत्पन्नत्वेन भ्रातृभगिन्योर्व्यवहारः। 'रत्नाकरस्तव पिता कमले निवासो भ्राता सुधामयतनुः पतिरादिदेवः। किं देवि केन कमले वद शिक्षितासि सारङ्गशृङ्गकुटिलानि विचेष्टितानि॥' इति सूक्ते॥

भाति तत्पदरजोऽस्य ललाटे पूर्वमेव तिलकं कृतमेतत्।
त्वय्यथ त्वरितमेव समेष्ये भाषितुं किमिति तत्पदलक्ष्म्या॥ १२॥

तस्य गुरोः पदस्य चरणस्य रजो रेणुः अस्य हीरकुमारस्य भाले ललाटपट्टे राजते। उत्प्रेक्ष्यते—तत्पदलक्ष्म्या विजयदानसूरिपट्टश्रिया इत्यमुना प्रकारेण भाषितुं वक्तुं पूर्वं प्रथममेव एतत्प्रत्यक्षलक्ष्यं किमु तिलकं विशेषकं कृतं रचितमिव। इति किं यत् अथ एतस्मात्सूरेः सकाशादहं त्वयि विषये त्वरितं शीघ्रमेव समेष्ये समागमिष्यामि समेष्ये। अयम् 'ईङ्च्' गतौ दिवादिको धातुरात्मनेपदी च॥

तस्य लोचनपथे पृथुकेन्द्रस्तस्थिवानथ यथासनमेषः।
सत्क्रियेव विधिना परिषत्सा तेन कांचिदपुषच्च विभूषाम्॥ १३॥

अथ वन्दनविधेरनन्तरम् एष हीरकुमारलक्षणः पृथुकेन्द्रः कुमारपुरंदरस्तस्य सूरेर्लोचनयोर्नयनयोः पथे मार्गे। पथशब्दोऽकारान्तोऽप्यस्ति। 'यथा कः पथः स्मृतः' इति। 'तथापथः पथि स्मृतः' इति शब्दप्रभेदे। नकारान्तो वायम्। तत्र टाडका इति डप्रत्ययः। गुरोरग्रे इत्यर्थः। तस्थिवानुपविष्टः। कथम्। यथासनं यथास्थानम् आस्यते उपविश्यते अस्मिन् प्रदेशे इत्यासनम्। पुनः—सा परिषत् सभा तेन हीरकुमारेण कांचिदपूर्वां विभूषां शोभामपुषत् पुष्णाति स्म। केव। सत्क्रियेव। यथा शोभनमनुष्ठानं विधिना शास्त्रोक्तप्रकारेण कृत्वा शोभते॥ इति हीरकुमारागमनगुरुवन्दने॥

देशनां शमवतां शतमन्युः स प्रबोधयितुमङ्गिसमाजम्।
प्रादिशद्वरयिता वसतीनां कौमुदीमिव वनं कुमुदानाम्॥ १४॥

स महावीरपट्टपरम्परायातो विजयदानसूरिः नामा शमवतामुपशमिनां साधूनां मध्ये शतमन्युः शतक्रतुः शक्रः देशनां धर्मोपदेशं प्रादिशद्ददौ। व्याख्यानं करोति स्मेत्यर्थः। किं कर्तुम्। अङ्गिनां भव्यप्रगणिनां समाजं सभां प्रबोधयितुं धर्मे स्थापयितुम्। क इव। वरयितेव। यथा वसतीनां रात्रीणां कान्तश्चन्द्रः कुमुदानां कैरवाणां वनं काननमाकरं वा प्रतिबोधयितुं विकाशयितुं कौमुदीं चन्द्रिकां प्रदिशति। विस्तारयतीत्यर्थः॥

इन्द्रवारणमिवेयमसारा संसृतिः कृतदुरन्तविकारा।
पङ्किलावट इवात्र निमग्ना निर्गमेन भविनः प्रभवन्ति ॥ १५ ॥

भो भव्याः, इयं संसृतिः संसार इन्द्रवारणनाम कटुकं फलं तद्वदसारा। इन्द्रवारणफलं हि बहिर्दृश्यमानं रम्यं परं मध्ये निःसारम् अतिकटुकतया केनापि खादितुमशक्यत्वाद्विषफलवत् तथा संसृतिरपि। किंभूता संसृतिः। कृतो निष्पादितो दुर्दुष्टोऽनन्तदुःखदायकत्वेन अन्तोऽवसानं यस्य तादृशो विकारो विकृतिर्यया। फलमपि दुष्टविकृतिकृत्। तथा अत्र संसारे निमग्ना ब्रूडिताः। पतिता इत्यर्थः। भविनो जीवा निर्गमे निःसरणे विषये न प्रभवन्ति नैव समर्थीभवन्ति। निगोदादिष्वनन्तपुद्गलपरावर्तकर्तृत्वेन। कस्मिन्निव। पङ्किलावट इव। यथा जम्बालजालाकलितकूपे निमग्ना निमज्य स्थिता जन्तवो निर्गन्तुं न प्रभवन्ति ॥

नारकादिगतयोऽत्र चतस्रः संस्फुरन्त्यसुमतामिव पुर्यः।
सन्ति भूपतिपथा इव लक्षा योनयश्चतुरशीतिरमूषु ॥ १६ ॥

भो भव्याः, अत्र संसृतौ असुमतां जन्तूनां चतस्रश्चतुःसंख्याका नारकादिगतयः। 'नरकस्तु नारकः स्यान्निरयो दुर्गतिश्च सः' इति हैम्याम्। आदिशब्दात्तिर्यङ्नरसुरलक्षणा गतयो गमनस्थानानि संस्फुरन्ति प्रकाशीभावं भजन्ति। का इव। पुर्य इव। यथा जन्तूनां वासस्थानां नगर्यो दृश्यन्ते। पुनरमूषु चतुर्गतिषु चतुरशीतिलक्षा योनयो जीवानामुत्पादस्थानकानि सन्ति वर्तन्ते। क इव। भूपतिपथा इव। यथा नगरीषु चतुरशीतिप्रमाणा राजमार्गा भवन्ति। 'चतुराशी चहुटा' इति लोकप्रसिद्धिः ॥

मर्त्यजन्मनगरीमधिगत्य प्राणिनो भ्रमिवशेन कथंचित्।
दर्शनादिवरवस्त्वनवाप्तेरायुरेव धनवत्क्षपयन्ति ॥ १७ ॥

प्राणिनो जीवा दर्शनं सम्यक्त्वमादौ येषां देशविरतिसर्वविरतिप्रमुखाणां वरवस्तूनां प्रधानपदार्थानामनवाप्तेरलाभात् धनवदर्थान्नीवीद्रव्यमिवायुर्जीवितकालमेव क्षपयन्ति निष्ठापयन्ति। किं कृत्वा। भ्रमिवशेन भवपरम्परारण्यपरिभ्रमणप्रकारेण कथंचिद्दशदृष्टान्तैर्महता कष्टेन कृत्वा मर्त्यजन्म मनुष्योत्पत्तिर्नाम नगरीमधिगत्य प्राप्य। 'अधिगत्य जगत्यधीश्वरात्' इति नैषधे। अधिगत्य। लब्ध्वा इत्यर्थः ॥

निर्गतायुरखिलद्रविणास्ते रङ्कवन्नरकवर्त्म भजन्तः।
हा दुरागतदशा अशरण्या नित्यदुःखमनुभूय म्रियन्ते ॥ १८ ॥

हा इति खेदे। ते पूर्वोक्ताः प्राणिनः न विद्यते शरणागतसाधुः रक्षिता पालयिता वा येषां ते अशरण्या। शरणरहिता इत्यर्थः। तथा दुर्दुष्टा शोचनार्हा आगता दशा अवस्था येषां तादृशाः सन्तो नित्यमनिशं दुःखं क्लेशपरम्परामनुभूय विषह्य प्राप्य वा म्रियन्ते। किं कुर्वन्तः। निर्गतं निष्ठितं क्षयं प्राप्तमायुर्जीवितकालस्तदेवाखिलं

समस्तं द्रविणं धनं येभ्यो येषां वा तथाविधाः सन्तो नरकस्य दुर्गतवर्त्ममार्गं भजन्ते आश्रयन्ते। किंवत्। रङ्कवत्। यथा द्रमकानिष्ठापितसमस्तस्वधनाः सन्तो मार्गं नगरध्वानं भजन्तः केनचिदप्यकृतरक्षा दुष्टावस्थापतिता नित्यमनुभूय म्रियन्ते॥

धर्ममार्हतमतो जनिमन्तो यानपात्रमिव संग्रहयध्वम्।
तस्थुषीं भवपयोनिधिपारे मुक्तिनामनगरीं च जिहीध्वम्॥ १९॥

हे जनिमन्तो भव्याः, अतोऽस्मात्कारणाद्यानपात्रं वहनमिवार्हतं जिनप्रणीतं धर्मं संग्रहयध्वम्। धर्मसंग्रहं कुरुतेत्यर्थः। 'ग्रह्णाति ग्रहयते लाति' इति क्रियाकलापे ग्रहणार्थाः क्रियाः। पुनर्यूयं भवन्तः भवः संसारः स एव पयोनिधिरगाधत्वात्समुद्रः तस्य पारे परस्मिंस्तटे तस्थुषीं स्थितिमतीं मुक्तिः सिद्धिरेव नाम यस्यास्तादृशीं नगरीं जिहीध्वं गच्छत। यानपात्रसंग्राहिणो जना हि पाथोधिपरपारपुरीमासादयन्तीति स्थितिः॥

द्वे महोदरपुरस्य पदव्यौ प्रध्वरा च विषमा च जिनोक्ते।
आदिमा ननु महाव्रतनामा पश्चिमा पुनरणुव्रतरूपा॥ २०॥

भो भव्याः, महोदयपुरस्य मुक्तिनामनगरस्य द्वे उभे पदव्यौ मार्गौ स्तः भगवता कथितौ वर्तेते। द्वे के। एका प्रध्वरा सरला च, पुनरपरा विषमा कुटिला। तत्र द्वयोर्मध्ये आदिमा पदवी प्रथमो मार्गः ननु निश्चितं महान्ति सर्वसावद्यव्यापारनिषेधरूपाणि। सर्वप्राणातिपातविरमण–सर्वमृषावादविरमण–सर्वादत्तादानविरमण–सर्वमैथुनविरमण–सर्वपरिग्रहविरमण–इति पञ्च महाव्रतानीति नाम यस्याः सा। 'साक्षादप्सरसो विमानकलितव्योमान एवाभवान्' इति नैषधे। तेन महाव्रतनामा इति प्रयोगः। पुनः पश्चिमा तयोरन्तिमा अणुव्रतानि देशविरतिभाजाम्। स्थूलप्राणातिपातविरमण–स्थूलमृषावादविरमण–स्थूलादत्तादानविरमण–स्वदारसंतोषपरस्त्रीविधवावेश्याकन्याविरमण–स्थूलपरिग्रहपरिमाण–दिग्विरमण–भोगोपभोगविरमण–अनर्घदण्डविरमण–सामायिकव्रत–देशावगासिक–पौषधोपवासव्रत–अतिथिसंविभागव्रतरूपाणि द्वादशसंख्याकानि रूपं यस्याः सा॥

तूर्णमस्ति यदि तत्र यियासा प्रध्वरे पथि ततः प्रयतध्वम्।
सौगतोदितपदार्थ इवास्ते यद्भवः स्फुरदशाश्वतभावः॥ २१॥

भो भव्याः, यदि भवतां तत्र महोदयपुरे तूर्णं शीघ्रं यियासा गन्तुमिच्छास्ति वर्तते, ततस्तर्हि प्रध्वरे साधुमार्गरूपे सरले पथि पदव्यां प्रयतध्वं प्रयत्नं कुरुध्वम्। यद्यस्मात्कारणात् भवः संसारः स्फुरन् प्रकटीभवन् अशाश्वतभावः विनश्वरता यत्र एतादृश आस्ते। क इव। सौगतादिपदार्थ इव। यथा बौद्धकथितवस्तुव्रजे 'सर्वं क्षणिकम्' इति वाक्यात् यावत्पदार्थसार्थे अनित्यता वर्तते॥

अनित्यतामेव दर्शयति—

सांध्यराग इव जीवितमास्ते यौवनं च सरितामिव वेगः ।
यत्क्षणेव कमला क्षणिकेयं तत्त्वरध्वमनिशं जिनधर्मे ॥ २२ ॥

यत्कारणात् सांध्यरागः संध्यासमयसंबन्धी रागः उपलक्षणान्नीलपीतकृष्णश्वेतरक्ताभ्रिकाप्रकरस्तद्वज्जीवितम् । यथा संध्यारागः क्षणात् प्रध्वंसं भजते तथा जीवितव्यमपीति । च पुनर्यौवनं तारुण्यं सरितां प्रावृषेण्यनदीनां वेग इवास्ति । यथा नदीनां पूरं त्वरितं प्रयाति । यतः 'यौवन जाइ वेगिनदी युंजलवहइ इन्दचन्दनागेन्द कहो कुण थिट रहइ' इति सूक्तोक्तेः । तथा यौवनमपि । पुतर्यत्कारणात् इयं कमला लक्ष्मीः क्षणेव विद्युदिव क्षणशब्दो वेश्मरत्नशान्तिचरित्रेऽस्ति । क्षणिका क्षणमात्रस्थायुका । 'करिकर्णचला कमला' इति वचनात् । तत्कारणादनिशं जिनधर्मे त्वरध्वं त्वरां कुरुध्वम् । शीघ्रं जिनधर्ममेव कुरुतेत्यर्थः ॥ इति गुरुदेशना ॥

भारतीमिति निशम्य शमीन्दोः कल्पिताप्लव इवामृतकुण्डे ।
उल्लसत्पुलकपल्लविताङ्गश्चेतसीति वितर्क कुमारः ॥ २३ ॥

कुमारो हीरनामा चेतसि स्वमनसि इति वक्ष्यमाणं वितर्कं चिन्तयामास । किंभूतः कुमारः । उल्लसन् प्रकटीभवन् यः पुलको रोमाञ्चस्तेन पल्लवितमङ्गं वपुर्यस्य । उत्प्रेक्ष्यते— अमृतस्य सुधायाः कुण्डे कल्पितः कृतः आप्लवः स्नानं येन तादृश इव । किं कृत्वा । शमीन्दोर्मुनिचन्द्रस्येत्याद्युक्तप्रकारेण भारतीं वाणीम् । देशनामित्यर्थः । निशम्य श्रुत्वा ॥

अस्ति कश्चन न कस्यचनापि भ्रातृपुत्रपितृमित्रजनादि ।
संसृतौ क्षणिकतां कलयन्त्यां नानुयाति परलोकजुषं यत् ॥ २४ ॥

कस्यचनापि पुंसो भ्राता बन्धुः, पुत्रः सुतः, पिता जनकः, मित्रं सुहृत्, जनः कुटुम्बवर्गः, स आदौ पूर्वं यस्य तादृक्कश्चिन्नास्ति यत्कारणात् क्षणिकतां क्षणमात्रस्थायित्वं 'जे पुव्वह्ने दिट्ठा ते अवरह्ने न दीसन्ति' इति वचनात् क्षणविध्वंसिभावं कलयन्त्यां दधत्यां संसृतौ संसारे परलोकजुषं भवान्तरभाजं स्वजनं कोऽपि नानुयाति न पश्चात्पृष्ठे वा व्रजति । अन्यस्मिन् भवेन कोऽपि सार्धं याति । एक एव जीवो यातीत्यर्थः । यतः 'परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम्' इति रघौ ॥

वल्लभीभवति यद्भवभाजां स्वार्थ एव न तथात्र परार्थः ।
पर्वणीन्दुरपि पङ्कजपाणिं यात्यसौ वसुकृतेऽपरथा नो ॥ २५ ॥

यत्कारणादत्र जगति भवभाजां जन्तूनां यथा येन प्रकारेण स्वार्थ एव केवलं निजकार्यमेव वल्लभीभवति इष्टो जायते, तथा तेन प्रकारेण प्राणिनां परेषामर्थः अन्यकृत्यं न वल्लभः स्यात् । उक्तमर्थं दृष्टान्तेन द्रढयति—असौ प्रत्यक्षो महत्सु विख्यातिमान् इन्दुश्चन्द्रोऽपि पर्वणि अमावास्यायां वसुकृते रत्नकृते । वसु कान्तिधनयोः । तदर्थं

पङ्कजपाणिं सूर्यं प्रतिभानुपार्श्वे याति । क्षीणश्चन्द्रः पर्वणि भास्करपार्श्वे गत्वा कान्तिमादायाभ्युदयते इति कविसमयः । अपरथा अन्यसमये अर्थे सृते स्वाभ्युदये संजाते न कदाचिद्गच्छति । एवमन्योऽपि कमलाङ्कितकरं धनिनं प्रति द्रव्यार्थं प्रयाति । कार्ये सृते तत्पार्श्वमपि नोपैति । तस्मात्कोऽपि कस्यापि नास्ति । 'प्रकारवचने थाल्' । 'सामान्यस्य भेदको विशेषं प्रकारस्तद्वृत्तेः किमादेस्थाल् स्यात् सर्वप्रकारेण इति सर्वथा इतरथा अपरथा' इति प्रक्रियाकौमुद्याम् ॥

कार्यकाल इतरोऽपि नरेणादीयते तदनु मुच्यत एव ।
विभ्रमाय विधृतो हृदि हारो हीयते रहसि सोममुखीभिः ॥ २६ ॥

नरेण मनुष्येण कार्यकाले स्वकृत्यसमये इतरोऽप्यन्योऽपि स्वकार्यकृते आदीयते स्वीक्रियते । तदनु कार्यकरणानन्तरं सृते कृते मुच्यते त्यज्यत एव । उक्तमर्थमर्थान्तरेण दृढीकरोति—सोममुखीभिः स्त्रीभिः विभ्रमाय विलासार्थं शोभाकृते वा हृदि वक्षसि हृदये धृतः परिहितो हारो मुक्ताकलापो रहसि सुरतक्रीडाकरणसमये । 'संभोगश्च रहो रतिः' इति हैम्याम् । हीयते उत्तार्यते हृदयात् पृथक्क्रियते । ततः सर्वेषां स्वार्थ एवाभीष्टः ॥

जन्मिनामयमकृत्रिममित्रं श्रेयसे तदुदयेज्जिनधर्मः ।
वैभवाय परिशीलनभावं लम्भितः क्षितिशशीव कृतज्ञः ॥ २७ ॥

तत्कारणात् असारे संसारे अयं स्वर्गापवर्गसाधकत्वेन प्रसिद्धः अकृत्रिममित्रं स्वाभाविकसुहृत् जिनोक्तो भगवत्प्रणीतो धर्मः परिशीलनभावमुपासनागोचरतां लम्भितः प्रापितः सन् श्रेयसे ऐहलौकिकमुक्तिकृते च उदयेत् प्रकटीभवेत् । किंभूतः । कृतं निर्मितं जानातीति कृतज्ञः । क इव । क्षितिशशीव । यथा कृतज्ञो नृपः सेवितः सन् वैभवाय विभूतिकृते भवेत् ॥

स्वानुजन्मभगिनीकुलवृद्धानाददे तदनुयुज्य तपस्याम् ।
पारलम्भनविभुर्भववार्धेर्यत्तरीव नियमस्थितिरेषा ॥ २८ ॥

यत्कारणादेषा मुक्तिनगरप्रध्वरप्रद्धतिः प्रसिद्धा नियमे पञ्चमहाव्रतादिमूलगुणोत्तरगुणसम्यक्पालनरूपे यावज्जीवावस्थानं नियमस्थितिर्दीक्षा तरीव नौरिव संसारसमुद्रस्य पारलम्भने परतटप्रापणे विभुः समर्था आस्ते । 'तां तृतीयपुरुषार्थवारिधेः पारलम्भनतरीमरीरमत्' इति नैषधे । तत्कारणात् स्वो ज्ञातिवर्गः । अनुजन्मा कनीयान् श्रीपालाख्यभ्राता राणीविमलासख्ये द्वे भगिन्यौ जामी कुलवृद्धान् गोत्रमहत्तराननुयुज्य पृष्ट्वा अहं तपस्यां संयममाददे गृह्णामि ॥ इति हीरकुमारस्य संसारासारताविचारः ॥

सूरिसिन्धुरपुरः स कुमारो व्याजहार मनसीति विमृश्य ।
दन्तकान्तिमुचुकुन्दसुमैस्तत्पादयोरिव सृजन्नुपहारम् ॥ २९ ॥

स हीरकुमारः मनसि स्वचित्ते इति पूर्वोक्तं विमृश्य विचार्य सूरिषु सिन्धुरः शौण्डीरत्वेन गजस्तस्य पुरोऽग्रे व्याजहार वदति स्म। उत्प्रेक्ष्यते—दन्तानां कान्तय एव मुचकुन्दा द्रुमविशेषास्तेषां सुमैः पुष्पैस्तस्य सूरेः पादयोश्चरणयोरुपहारं पूजाम्। 'पूजार्हणासपर्यार्चा उपहारबली समौ' इति हैम्याम्। सृजन् कुर्वन्निव॥

प्राप्य तावककरादिह दीक्षामाहितायतिहितामिव शिक्षाम्।
सेवितुं चरणतामरसं ते मानसं मुनिप कामयते मे॥ ३०॥

हे मुनिप सूरीन्द्र, ते तव चरणतामरसं पादपद्मं सेवितुं मे मम मनः कामयते वाञ्छति। किं कृत्वा। इहास्मिन्नेव समये तावकात् त्वदीयात्करात् पाणेर्दीक्षां प्राप्य समासाद्य। उत्प्रेक्ष्यते—आहितं स्थापितमायतौ उत्तरकाले हितं पथ्यं यया तादृशीं शिक्षामिव॥

एवमुक्तवति हीरकुमारे सूरिशीतकिरणः स्म गृणाति।
मथ्यमानमकराकररावं ह्रेपयन्निव गभीरविरावैः॥ ३१॥

सूरिषु मध्ये शीतकिरणः सौम्यगुणेन चन्द्रो गृणाति स्म बभाषे। कस्मिन् सति। एवममुना प्रकारेण उक्तवति कथितवति हीरकुमारे सति। उत्प्रेक्ष्यते—सूरिर्गभीरविरावैर्मन्द्रध्वनिभिर्मथ्यमानो नारायणेन मन्दरगिरिणा विलोड्यमानो यो मकराकरः समुद्रस्तस्य रावं गम्भीरनिर्घोषं लज्जयन् लज्जायुक्तं कुर्वन्निव॥

मा कृथाः क्वचन तत्प्रतिबन्धं बान्धवस्वजनमित्रजनेषु।
गन्धवाह इव भूधरसिन्धुग्रामसीमपुरभूमिधुनीषु॥ ३२॥

हे कुमार, यद्येवं तवाशयस्तत्तदा तर्हि क्वचन केष्वपि बान्धवा भ्रातरः, स्वजनाः सगोत्राः ज्ञातयः, मित्राणि सुहृदः, तत्प्रमुखेषु जनेषु लोकेषु प्रतिबन्धं ममत्वेन स्नेहेन कृत्वा संसारे स्थायिभावं मा कृथा मा कुर्याः। क इव। गन्धवाह इव। यथा वायुर्भूधराः पर्वताः, सिन्धवः समुद्राः, ग्रामाः संनिवेशाः, सीमा ग्रामनगरसमीपबहिःप्रदेशाः, पुराणि नगराणि, भूमयोऽखिलवसुंधरा, धुन्यो नद्यः, तासु प्रतिबन्धं न विदधाति॥

यैरवर्धि जिनधर्मसुरद्रुः पूर्वजन्मनि जनैरिह तेषाम्।
तद्दलानि कमलाकमलाक्षी सार्वभौमपदवीप्रमुखानि॥ ३३॥
तत्सुमानि सुरवैभवलम्भः कीर्तयः परिमलोऽप्यदसीयः।
सिद्धिमुग्धमृगदृक्परिरम्भारम्भणानि पुनरस्य फलानि॥ ३४॥
(युग्मम्)

हे हीरकुमार, यैर्जनैः पूर्वजन्मनि प्राचीने भवे जिनधर्मरूपः सुरद्रुः कल्पवृक्षोऽवर्धि वृद्धिं प्रापितः, तेषां जनानामिह जन्मनि कमला लक्ष्मीः। अथ च कमला श्रीस्तत्तुल्या कमलाक्षी अरविन्दलोचना स्त्री, यया परिणीतमात्रया गृहे चागतया सत्या

सर्वतः सौधधनधान्यद्विपदचतुष्पदादिभिः परिपूर्यते सा लक्ष्मीसदृशा पद्माक्षी तथा सार्वभौमः सर्वस्या भूमेरीश्वरश्चक्रवर्ती तस्य पदवी एताः प्रमुखाः आदिमाः प्रकृष्टा वा येषु तादृशानि तस्य सुरद्रोर्दलानि पत्राणि सन्ति । तथा सुराणामुपलक्षणादिन्द्रादीनां वैभवानां संपदां लम्भः प्राप्तिः सा तस्य सुमानि पुष्पाणि । 'प्रसूनं कुसुमं सुमम्' इति हैम्याम् । तथा कीर्तयः सुरासुरनरखेचरकिंनरमिथुनगीयमानयशांसि अपि पुनरस्याय-मदसीयः परिमलः आमोदः सौरभम् । तथा सिद्धयो लघिमा, वशिता, ईशत्वम्, प्राकाम्यम्, अणिमा, महिमा, यत्र कामावसायित्वम्, प्राप्तिः, इत्यष्टौ अन्या अपि मन्त्रतन्त्रविद्यातपःशक्तिप्रमुखाः सिद्धय एव मुग्धमृगदृशो रम्याङ्गना । अथ वा सिद्धिर्मुक्तिरेव प्रधानवधूस्ताभिस्तया वा सार्धमालिङ्गनानि परिरम्भणानि आसादनानि तेषामारम्भाः प्रक्रमास्तानि पुनरस्य कल्पद्रोः फलानि वर्तन्ते ॥

धर्म एव मनुजैरिह मन्त्रः सार्वकामिक इवैष निषेव्यः ।
येन वाङ्मनसपारगतं यत्तत्करोति करसात्तरसासौ ॥ ३५ ॥

इह जन्मनि मनुजैर्मानवैरेष पूर्वव्यावर्णितस्वरूपः धर्म एव निषेव्यः सेवनीयः आराध्यः । क इव । मन्त्र इव । यथा कैश्चित्पुंभिर्विनयादिना प्रसन्नीभवद्गुरुप्रदत्तः सर्वान् समस्तान् कामान्मनोभिलषितान् करोति पूरयतीति सार्वकामिको मन्त्रो निषेव्यते सम्यगुपासनागोचरीक्रियते । येन कारणेनासौ धर्मो यद्वस्तु वाङ्मनसयोः पारगतं वचनमनसोर्गोचरातीतं यत्र पदार्थे वाचो मनसश्च गोचरो न भवति तदपि वस्तु तरसा शीघ्रं करसात्करप्राप्तं करोति । 'का नाम तत्र चिन्ता प्रभवति पुरुषस्य पौरुषं यत्र । वाङ्मनसयोरविषये विधौ च चिन्तान्तरं किमिह ॥' इति चम्पूकथायाम् ॥ इति कुमारमुद्दिश्य गुरुवाक्यम् ॥

तां निपीय मुनिवासववाचं स्मेरदृक्प्रबुबुधे स कुमारः ।
कैरवोत्कर इव स्मितकोशश्चन्द्रिकां कुमुदिनीरमणस्य ॥ ३६ ॥

स कुमारः प्रबुबुधे प्रतिबुद्धः । किंभूतः । स्मेरदृक् हर्षेण हसितनयनः । तां पूर्वोक्तां मुनिवासवस्य सूरीन्द्रस्य वाचं वाणीं निपीय सादरं श्रुत्वा पीत्वा । क इव । कैरवोत्कर इव । यथा कुमुदिनीरमणस्य विधोश्चन्द्रिकां ज्योत्स्नां निपीय कुमुदप्रकरः प्रबुध्यते विकाशं लभते । किंभूतः । स्मिता विकसिताः कोशाः कुड्मला यस्य ॥

निश्चिकाय विनयानतकायस्तत्पुरः शिशुशशी स्वतपस्याम् ।
शंभुसुभ्रुव इवाम्बुजनाभः प्रत्यगाच्च भवनं निजजामेः ॥ ३७ ॥

शिशुशशी कुमारचन्द्रः तस्य सुरेः पुरोऽग्रे स्वस्यात्मनस्तपस्यां दीक्षाग्रहणं निश्चिकाय अहमवश्यं श्रीमत्पार्श्वे परिव्रजां गृहीष्यामिति निश्चयं कृतवान् । किंभूतः । विनयेन आ सामस्त्येन नतो नम्रीभूतः कायः शरीरं यस्य । च पूनर्निजजामेर्विमलाया भवनं गृहं प्रत्युज्जगाम । क इव । अम्बुजनाभ इव । यथा कृष्णः शंभुसुभ्रुवः पार्वत्या

भवनं प्रति गच्छति । भवानी हि कृष्णभगिनीति कविसमयः । 'भवानी कृष्णमेनाकस्वसा' इति हैम्याम् । अम्भोजनाभः अम्बुजनाभः इत्यादयः प्रयोगाः पाण्डवचरित्रे सन्तीति ॥ इति विजयदानसूरिपुरो हीरकुमारस्य दीक्षाग्रहणनिश्चयकरणम् ॥

इच्छता हृदि महोदयलक्ष्मीसङ्गदूतिमिव जैनतपस्याम् ।
भाष्यते स्म भवनं प्रविभूष्यानेन भावयतिना निजजामिः ॥ ३८ ॥

अनेन निजजामिः स्वभगिनी भाष्यते स्म भाषिता वादिता । अनेन किंभूतेन । भावेन परिणामेन यतिना साधुना । अथ वा भावे आशये मनसि यतित्वं चारित्रमस्येति तेन भावयतिना । किं कृत्वा भाषिता । भवनमर्थाद्भगिनीभवनं प्रकर्षेण विभूष्य शोभां नीत्वा गृहे आगत्येत्यर्थः। अनेन किं कुर्वता । जिनानां तीर्थकृतामियं जैनीं तपस्यां दीक्षामर्थाद्ग्रहीतुमिच्छता हृदये वाञ्छता । उत्प्रेक्ष्यते—महोदयलक्ष्म्या मुक्तिश्रिया महाभ्युदयसंपदो वा सङ्गे संगमे मिलने दूतिमिव संदेशहारिकामिव। 'तस्याः स्वयंवरपरिग्रहदूतिरेषा मुक्तावली हृदिपदं भवतः करोतु' इति चम्पूकथायाम् । 'दूत्यां दूतिरपि स्मृता' इति शब्दप्रभेदे ॥

धारिणीसुत इवाद्य सुधर्मस्वामिनं विजयदानमुनीन्द्रम् ।
वन्दितुं विजयसिंहमहेभ्याम्भोजदृग्गत इतोऽहमभूवम् ॥ ३९ ॥

विजयसिंहनामा यो महेभ्यो व्यवहारी तस्याम्भोजदृक् प्रियतमे हे जामे अद्याहमितो भवत्या गृहाद्विजयदाननामानं मुनीन्द्रं सूरिं वन्दितुं नमस्कर्तुं गतोऽभूवम् । क इव । धारिणीसुत इव धारिणीनामा ऋषभव्यवहारिपत्नी तस्याः सुतो जम्बुकुमारः सुधर्मस्वामिनं श्रीमहावीरपञ्चमगणधरं नन्तुं गतोऽभूत् ॥

कीलनैकललितं कलयन्ती या कशेव तुरगस्य भवस्य ।
देशनाश्रवणगोचरभावं लम्भिता श्रमणशीतमरीचेः ॥ ४० ॥

हे जामे, श्रमणशीतमरीचेर्विजयसूरीन्द्रस्य सा परमशान्तरसमयी धर्मकथा मया त्वद्भ्रात्रा श्रवणयोः कर्णयोः गोचरभावं विषयतां लम्भिता नीता । श्रुतेत्यर्थः । 'नूनं न मे श्रवणगोचरतां गतोऽसि' इति कल्याणमन्दिरस्तोत्रे । सा का । या धर्मदेशना भवस्य संसारस्य कीलने ताडने अथ वा कीलनायां पराभवविधानविषये । 'व्रजते हेलिहयालिकीलनाम्' इति नैषधे । एकमद्वितीयं ललितं विलासं व्यवसायं कलयन्ती बिभ्रती वर्तते । केव । कशेव । यथा कशा चर्मदण्डः 'चाबखो' इति लोके प्रसिद्धा तुरगस्याश्वस्य ताडने अद्वैतं व्यापारं बिभर्ति ॥

उन्नमज्जलधरादिव जामे सूरिराजवदनादुदयद्भिः ।
वाणिवैभवरसैर्द्वयमेतत्पूर्यते स्म मम कर्णकलश्योः ॥ ४१ ॥

हे जामे हे विमले, सूरिराजस्य वदनान्मुखादुदयद्भिः प्रकटीभवद्भिः वाणीनां वाचां

विलासा वैचित्र्यास्त एव रसा जलानि तैर्ममेदं मदीयमेतत्प्रत्यक्षशब्दविषयगोचरं कर्णौ श्रवणावेव कलश्यौ कुम्भ्यौ तयोर्द्वयं युगलं पूर्यते स्म पूर्णीभूतम्। श्रवणशब्दः पुंनपुंसके। 'आलोचनान्तात् श्रवणौ वितत्य' इति लिङ्गानुशासनावचूर्णौ। तथा 'अवलम्बितकर्णशष्कुलीकलशीकं रचयन्नवोचत' इति नैषधे। कस्मादिव। उन्नमज्जलधरादिव। यथा उन्नमतो जलभरैर्नम्रीभवन्तो जलधरान्मेघादुदितैः प्रादुर्भूतैर्नीरैः सलिलैः कलशीद्वन्द्वं परिपूर्णीभवति। वाणिशब्दो ह्रस्वोऽप्यस्ति। यथा 'अन्तर्वाणिस्तु शास्त्रवित्' इति हैम्याम्। तथा भर्तृहरशतके प्रोक्तं च—'केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः। एका वाणिरलंकरोति पुरुषं या संस्कृता पठ्यते क्षीयन्ते किल भूषणानि सततं वाग्भूषणं भूषणम् ॥' इत्यत्रापि वाणिशब्दो ह्रस्वः ॥

सूरिभर्तुरमृतादपि वाचो दृश्यते जगति कोऽपि विशेषः।
त्यक्तमन्यव इदंरसिका यन्मन्युबद्धमनसस्त्वमृताशाः ॥ ४२ ॥

हे जामे, जगति विश्वे अमृतात्पीयूषात्सूरिभर्तुर्वाचो वाण्याः कोऽप्यद्भुतवैभवो विशेषः अतिशायित्वमनिर्वचनीयमहिमा दृश्यते अवलोक्यते ज्ञायते वा। यद्यस्मात्कारणात् इदंरसिका गुरुवचनसुधापानरसवन्तो जनास्त्यक्तमन्यव उज्झितकोपा जायन्ते। अस्यां वाण्यां रसिकाः इदंरसिकाः। 'इदं यशांसि द्विषतः सुधारुचः' इति नैषधे। तु पुनः। अमृताशाः सुधापायिनो देवा मन्युबद्धमनसः कोपकलितान्तःकरणाः तत्त्वतस्तु यज्ञोत्कण्ठहृदयाः तदशनत्वात्। 'स्वाहा स्वधा क्रतुसुधाभुज आदितेयाः' इति हैम्याम् ॥

सांप्रतं भगिनि तेन मुनीन्दोः संनिधौ ग्रहयितुं व्रतलक्ष्मीम्।
उत्सुकोऽहमभवं भवमग्नो धारिणेय इव वीरजिनेन्दोः ॥ ४३ ॥

हे भगिनि, तेन एतादृग्गुरुवचनामृतपानौत्सुक्येन कारणेन सांप्रतमधुना मुनीन्दोर्विजयदानसूरेः पार्श्वे व्रतलक्ष्मीं चारित्रश्रियं ग्रहयितुमादातुमहमुत्सुक उत्कण्ठितोऽभवं संजातः। 'गृह्णाति ग्रहयते लाली' इति क्रियाकलापे। ग्रहयते इत्यस्य ण्यन्तस्य तुमुप्रत्ययप्रयोगः। अहं किंभूतः। भवात्संसारात्पुनः पुनः पर्यटने भग्न उद्विग्नः। क इव। धारिणेय इव। यथा श्रेणिकनृपपत्नी धारिणी तस्या नन्दनो मेघकुमारः श्रीमहावीरजिनवरस्य पार्श्वे व्रतं ग्रहीतुमुत्सुको जज्ञे ॥

सेतुबन्धमिव संसृतिसिन्धोस्तद्व्रताय मम देहि निदेशम्।
विघ्नयेन्न हि महोदयलक्ष्मीसंमुखं निजजनं हितकाङ्क्षी ॥ ४४ ॥

हे जामे, तत्कारणात्त्वं मम व्रताय चारित्रग्रहणार्थं निदेशमाज्ञां देहि। कमिव। सेतुबन्धमिव पद्याविरचनमिव। लोके 'पाज' इति प्रसिद्धा। कस्य। संसृतिः संसारः स एवागाधत्वात्सिन्धुः समुद्रस्तस्य। हि यस्मात्कारणान्महानुदयोऽस्यैश्वर्यं मोक्षश्च तस्य

लक्ष्मीस्तत्राभिमुखं संमुखीभूतं निजजनं स्वकीयबन्धुवर्गं हितकाङ्क्षी स्वजनहिताभिलाषुको जनः को विघ्नयेद्विघ्नं कुर्यात्, अपि तु न कोऽपि नान्तरायी भवेत् ॥ इति विमलाभगिनीं प्रति हीरकुमारस्य दीक्षादेशमार्गणवचनम् ॥

तद्वचो विचरितं सहजेन प्राप्तमात्रमपि कर्णपुटान्तः ।
क्षिप्ततप्तगुरुपत्रमिवास्या दुःखमप्रतिममातनुते स्म ॥ ४५ ॥

सहजेन भ्रात्रा । ['भ्राता तु स्यात्सहोदरः । समानोदर्यः सोदर्यः सगर्भसहजा अपि ॥' इति हैम्याम् ।] विरचितं कथितं तद्वचो दीक्षादेशमार्गणरूपं तत्पूर्वोक्तं वाक्यं कर्णपुटान्तः श्रोत्रपात्रमध्ये प्राप्तमात्रमपि केवलमेकवारं गतमपि अस्या विमलाया हीरकुमारस्य बृहद्भगिन्या अप्रतिमसाधारणं दुःखमातनुते स्म चक्रे । किमिव । क्षिप्ततप्तगुरुपत्रमिव । यथा—क्षिप्तं स्थापितं तप्तमुष्णीकृतं गुरुपत्रं कर्णयोरतिदुःखदं स्यात् ॥

डिम्भलम्भितविडम्बनभाजा दुःखतः परभृतेव भगिन्या ।
स न्यगादि मृदुगद्गदवाचा साधिमाधरितपुष्पधनुःश्रीः ॥ ४६ ॥

स हीरकुमारो भगिन्या विमलास्वस्रा न्यगादि भाषितः । किंभूतया । मृद्वी कोमला तथा बाष्पैरस्पष्टा तादृशी वाग्वाणी यस्याः । अथवा साधनभूतया वाचा कृत्वा । कुतः । कुतस्तादृग्भ्रातृप्रव्रज्या परिणामोद्भूतदुःखतः । स किंभूतः । साधिम्ना शरीरसौन्दर्येण । 'साधुरम्यमनोज्ञानि' इति हैम्याम् । अधरिता हीनीकृता तिरस्कृता वा पुष्पधनुषः कामस्य श्रीर्वपुः शोभा येन । 'त्वयादृतः किं नरसाधिमभ्रमः' इति नैषधे ॥ उत्प्रेक्ष्यते—परभृतेव[1] । यथा कोकिलया भाष्यते विस्वरमुच्यते । किंभूतया । डिम्भेन अव्यक्तबालकेन लम्भितं प्रापितं यद्विडम्बनं संतापनं तद्भजतीतिपरान् काकबालकान् पुष्णन्तीति परभृतः । 'कोकिलैः पालितः काकस्तथा चाम्रैस्तु पोषितः' इति वचनात् । तथा परभृत् व्यञ्जनान्तः । 'परभृतां मदनालसचेतसाम्—' इत्यादि रघुकुमारयोरपि ॥

सांप्रतं व्यतिकरस्तव कोऽयं वार्धकोचितविधेश्चरणस्य ।
लीढि वत्स विषयस्य रसालस्येव पक्रिमफलस्य रसांस्त्वम् ॥४७॥

हे वत्स, सांप्रतमिदानीं बाललीलायां तव भवतश्चरणस्य चारित्रस्य कोऽयं व्यतिकरः क एष प्रस्तावसमयः । किंभूतस्य चरणस्य । वार्धके वृद्धावस्थायामुचितो योग्यो विधिराचरणं यस्य । किं च हे बन्धो, अधुना त्वं विषयस्य शब्दादिगोचरस्य रसानास्वादान् लीढि आस्वादय । रागाननुभव । कस्येव । पक्रिमफलस्येव । यथा कोऽपि रसालस्य सहकारतरोः परिपक्वफलस्य रसान्निस्यन्दानास्वादयति जनः ॥

---

१. वस्तुतस्तु परभृता काक्येव । कोकिलडिम्भो रूपसादृश्यविडम्बनातः काकाभ्यां पाल्यते इत्येव संप्रदायः.

भाग्यभाजि जलजन्मगृहेवागन्तुका तरुणता त्वयि वत्स ।
कामकेलिवसतौ रतिसख्यां त्वं रमस्व युवतीभिरमुष्याम् ॥ ४८ ॥

हे वत्स, त्वयि विषये तरुणता यौवनावस्था आगन्तुका आगमनोत्सुकशीला वर्तते। केव । जलजन्मगृहेव । यथा भाग्यभाजि पुण्यवति पुरुषे जलजन्ममन्दिरा लक्ष्मीरागमनशीला भवेत् । पुनर्हे बन्धो, त्वममुष्यां तारुण्यावस्थायां युवतीभिर्यौवनवतीभिः स्त्रीभिः सार्धं रमस्व विलासं कुरु । 'युवतीकरनिर्मलनिर्मथितम्' इति दीर्घोऽपि युवतीशब्दः । किंभूतायाममुष्याम् । कामस्य कन्दर्पस्य केलिवसतौ क्रीडार्थगृहे । पुनः किंभूतायाम् । रते रागस्य सख्यां वयस्याम् । 'रतिः स्मरस्त्रियां रागे रते' इत्यनेकार्थः ॥

यौवनेऽर्जय यशोगुणलक्ष्मीः क्षोणिमानिव महःक्षितिकोशान् ।
आर्हतं तदनु धर्ममयि त्वं स्थाविरे स्थिरतया विदधीथाः ॥ ४९ ॥

हे वत्स, यौवने तारुण्ये यशांसि कीर्तीर्गुणान् महत्त्वौदार्यादिलक्षणान् लक्ष्मीरमिताः श्रियश्च अर्जय स्वायत्तीकुरु । क इव । क्षोणिमानिव । तथा भूपतिस्तारुण्ये महः प्रतापं क्षितिं परदेशमण्डलं कोशान् बहून् भाण्डागारोत्करानुपार्जयति । 'स्वात्पालधनमुक्नेतृपतिमत्त्वर्थकादयः' इति हैम्यामुक्तत्वेन क्षोणिमानित्यत्र मत्वर्थीयप्रत्ययः । अयि पुनर्हे वत्स, अनु तारुण्यावस्थायां पश्चात्स्थाविरे वार्धके वृद्धवयसि स्थिरतया स्थैर्येण अचपलचित्तत्वेन आर्हतमर्हदुक्तं तं चारित्रलक्षणं धर्मं विदधीथाः कुर्वीथाः ॥

मौक्तिकेन किल सोदर सर्वैः श्लाघ्यतेऽत्र भवता पितृवंशः ।
भ्रातृवत्यहमपि त्वयकास्मि श्रीरिवामृतकरेण वरेण ॥ ५० ॥

हे सोदर, अत्र लोके भवता त्वया कृत्वा । अथ वा अत्रभवता पूज्येन । भाविनि भूतोपचाराज्जनानां माननीयेन वा भवता । अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थे निपात्येते इति वचनात् । पितृवंशस्तातान्वयः कुंरासाहकुलम् । सर्वैर्जनैः श्लाघ्यते प्रशस्यते स्तूयते । केनेव । मौक्तिकेनेव । अत्र किलेति इवार्थे । यथा मौक्तिकेन मुक्ताफलेन कृत्वा मुक्ताफलानां पिता तस्मादुत्पन्नत्वात्तेषां तादृशो वंशो वेणुः शतपर्वा जनैः श्लाघ्यते । 'उत्प्रेक्षाद्योतकाः शङ्के मन्ये नूनमिव ध्रुवम् । जाने किलादयो ज्ञेयाः प्रायेणेयं क्रियोद्भवाः॥' इति कविशिक्षायाम् । अपि पुनर्हे बन्धो, अहं त्वयका कृत्वा भ्रातृमती सोदरवती अस्मि वर्ते । केव । श्रीरिव । यथा लक्ष्मीरमृतकरेण चन्द्रेण बन्धुमत्यस्ति । द्वयोरपि समुद्रोत्पन्नत्वेन । किंभूतेन त्वया चन्द्रेण च । वरेण जनेषु ज्ञातिषु श्रेष्ठेन ॥

त्वद्वधूमुखसुधांशुसुधायाः पानमुत्सुकतया प्रविधित्सू ।
मद्विलोचनचकोरशकुन्तौ चापलं रचयतश्चिरमेतौ ॥ ५१ ॥

हे बन्धो, एतौ दृश्यमानौ मद्विलोचने मम नेत्रे एव चकोरशकुन्तौ ज्योत्स्नाप्रियपक्षिणौ चिरं बहुकालं यावच्चापलं चञ्चलताम् । उत्कण्ठतामित्यर्थः । रचयतः कुर्वते । किं-

कर्तुमिच्छू। उत्सुकतया उत्कण्ठितत्वेन त्वद्वध्वास्तव जायायाः। 'दाराः क्षेत्रं वधूर्भार्या जनी जाया परिग्रहः' इति हैम्याम्। मुखं वदनमेव सुधांशुस्तस्य सुधां दर्शनामृतं तस्याः पानं पीतिं प्रविधित्सू कर्तुमिच्छू। 'कणे हत्यचकोरीणां गणः पीत्वा सुधासवम्। अजायत मदेनेव गुञ्जापुञ्जारुणेक्षणा॥' इति वस्तुपालकीर्तिकौमुद्यां चकोराणां ज्योत्स्नापाने प्रसिद्धेऽपि इत्यमृतपानमपि॥ इति विमलायाः प्रथमोक्तिः॥

वाङ्मयैर्विरचितैरिदमाद्यैः श्रोत्रपत्रपथिकैः स्वभगिन्याः।
प्रेरितो निगदति स्म कुमारो गर्जितैरिव शिखी घनपङ्क्तेः॥ ९२॥

कुमारो हीरनामा बालको निगदति स्म बभाषे। किंलक्षणः। प्रेरितः प्रणोदितः। कैः। इदं पूर्वोक्तमाद्यं प्रथमं येषु तादृशैर्वाङ्मयैर्वाचां प्रपञ्चैः। 'इतीदृशैस्तं विरचय्य वाङ्मयैः' इति नैषधे। किंभूतैर्वाङ्मयैः। विरचितैः प्रणीतैः। उक्तैरित्यर्थः। कया। भगिन्या स्वबृहत्स्वस्रा। पुनः किंभूतैः। श्रोत्रयोरर्थात् कुमारस्य कर्णयोः पथिकैः प्राघुणीभूतैः। श्रुतैरित्यर्थः। बभाषे। क इव। शिखीव। यथा मयूरो घनपङ्क्तेः मेघमालाया गर्जितैर्गर्जारवैः प्रेरितो वक्ति केकारवं कुरुते॥

जीवितं कुशशिखास्थमिवाम्भः पांशुलेव तरला कमलापि।
ऐक्षवाग्रमिव यौवतमेतत्प्रेक्षणक्षण इव स्वजनोऽपि॥ ९३॥

हे जामे, जीवितमायुर्जीवितव्यं कुशशिखास्थं दर्भाग्रस्थायुकमम्भो नीरमिव वर्तते। दर्भाग्रस्थमम्भः कियत्कालमवतिष्ठते तथा जीवितमपि। अपि पुनः—कमला पांसुलेव व्यभिचारिणीव तरला चपला। अस्थिरा आस्ते। पुनरेतत्संसारिजनैराद्रियमाणं यौवतं युवतीनां समूहः स्त्रीगुणः ऐक्षवाग्रमिव इक्षूणामिदमैक्षवं तादृशमग्रं प्रान्तं तद्वत्। यथा इक्षूणामग्रे नीरसता तथा विचार्यमाणमनुभूयमानं च स्त्रैणं प्रान्ते नीरसमेव जायते। अपि पुनः स्वजनो ज्ञातिवर्गः परिजनो वा प्रेक्षणक्षण इव रामलक्ष्मणादिरूपदर्शननाटकप्रस्ताव इव क्षणदृष्टनष्टः स्यात्॥

यद्गमिष्यति ममार्भकभावोऽलंकरिष्यति तनुं च युवश्रीः।
वार्धकं पुनरमात्यमिव स्वं भूषयिष्यति क इत्यवगच्छेत्॥ ९४॥

हे जामे, यन्मम मदीयोऽर्भकभावः शैशवं गमिष्यति यास्यति। च पुनर्युवश्रीः भावप्रधाननिर्देशात्तारुण्यलक्ष्मीः। अथ वा युवत्वेन श्रीर्लक्ष्मीः शोभा मम तनुः शरीरमलंकरिष्यति। पुनर्वार्धकं वृद्धावस्था स्वमर्थादात्मीयात्मानं भूषयिष्यति। कमिव। अमात्यमिव। यथा प्रधानं वार्धकं भूषयति। 'वार्धकं भूषयत्यत्र राजामात्यभिषङ्मुनीन्' इति वचनात् कः पुमानित्यवस्थात्रयं भावीदमवगच्छेत् अवबुध्येत। अपि तु न कोऽपीत्यर्थः॥

जन्तुरेष इह जामिकलत्रभ्रातृमातृपितृपुत्रविशेषैः।
बम्भ्रमीति परमाणुरिवैको नीलिमारुणिमपीतिमरागैः॥ ९५॥

हे भगिनि, एष जन्तुः प्राणी इह जगति एक एव जामिर्भगिनी, कलत्रं पत्नी, भ्राता बन्धुः, माता जननी, पिता जनकः, पुत्रः सुतः, एतेषां विशेषैः प्रकारैः बम्भ्रमीति संसारचक्रे अतिशयेन पर्यटति । क इव । परमाणुरिव । यथा एक एव परमाणुर्नीलत्वपीतत्वरक्तत्वादिरागैरङ्गैर्भुवने भ्राम्यति ॥

सौरभेण मलयद्रुरिवात्मा यस्य धर्मविधिना स विभाति ।
तेन विष्टपमशेषमभूषि प्रोच्यते स्म किमुताभिजनादि ॥ ९६ ॥

हे जामे, यस्यात्मा धर्मविधिना जैनधर्माचरणप्रकारेण विभाति स्म शोभितः । क इव । मलयद्रुरिव । यथा चन्दनतरुः सौरभेण परिमलेन विभाति तेन पुंसा अशेषं समस्तमपि विश्वमभूषि भूषितम् । तर्हि अभिजनादि किमुत प्रोच्यते । निखिलेऽपि भुवने स्ववंशादि तु सुतरामेव भूषितमिति बोध्यम् ॥

निम्नगेव परिसर्पति निम्नं या दधाति पितृसूरिव रागम् ।
भोगिनीव कुटिला कमलाक्षी सा सतामनुचिताभ्युपगन्तुम् ॥ ९७ ॥

हे जामे, या स्त्री निम्नगेव नदीव निम्नं नीचैः परिसर्पति गच्छति । नीचगामिनी । 'कामिन्यो नीचगामिन्यः' इति वचनात् । तथा—या स्त्री पितृसूः संध्येव क्षणं रागं दधाति । यथा संध्या क्षणं पश्चाप्यतिशायिवर्णविशेषान् दर्शयित्वा नीरागा स्वयमपि क्वापि याति तथैव स्त्री । तथा या कान्ता भोगिनीव भुजङ्गीव कुटिला । वक्रगामिनी वक्ति अन्यदन्यच्च कुरुते सा कमलाक्षी वनिता सतामुत्तमानामभ्युपगन्तुमङ्गीकर्तुमनुचिता सर्वथापि नैव योग्या ॥

या जहाति न कदाप्यनुषङ्गं या विरागवति चाधिकरागा ।
तां जगज्जनमनःकमनीयां लिप्सते शिवकनीं मम चेतः ॥ ९८ ॥

हे जामे, या वधूः कदापि कस्मिन्नपि समये भर्तुरनुषङ्गं सङ्गम् । पार्श्वमित्यर्थः । न जहाति न मुञ्चति । च पुनर्या विरागवति वैराग्यभाजिनि नीरागेऽपि पुंसि अधिकरागा उत्कृष्टरङ्गा भवति । तां शिवकन्यां जगद्विख्यातां मुक्तिकन्यां मम चेतश्चित्तं लिप्सते वाञ्छति । किंभूतानां जगताम् । भूर्भुवःस्वस्त्रयीजन्मिनां सुरासुरनराणां मनोभिरन्तःकरणैः कमनीयामभिलषणीयाम् ॥ इति प्रव्रज्यादृढतायां भगिनीं प्रति कुमारवचः ॥

निश्चिकाय वचनैरथ तैस्तैस्तस्य सा व्रतविधौ द्रढिमानम् ।
मौक्तिकस्रजमिवाश्रुकणौघैस्तन्वती हृदि पुनस्तदवोचत् ॥ ९९ ॥

अथ भ्रातुर्वचनश्रवणानन्तरं सा विमला तैस्तैः पूर्वोक्तवचनैस्तस्य हीरकुमारस्य व्रतविधौ दीक्षाग्रहणविषये द्रढिमानं दृढतां निश्चिकाय निर्धारयामास । निर्धारं कृतवती । पुनः सा जामिः तं भ्रातरमवोचद्वक्ति स्म । किं कुर्वती । अश्रुकणौघैः बाष्पबिन्दुवृन्दैः ।

उत्प्रेक्ष्यते—हृदि हृदये वक्षसि मौक्तिकस्रजं मुक्ताफलमालिकामिव तन्वती कुर्वती विस्तारयन्तीव ॥

वत्स वत्सलतया तव किंचिद्वच्मि कर्णपथिकीकुरु तत्त्वम् ।
यद्रसायनमिव स्वजनानामस्ति वाग्विरचना हितगर्भा ॥ ६० ॥

हे वत्स लघुभ्रातः, तव भवतः वत्सलतया हितकृत्त्वेन यत्किंचिद्भविनामायतिहितविधायकं विचार्याहं वच्मि कथयामि, तत्त्वं तवाप्यायतिसुखदं मदुक्तं कर्णपथिकीकुरु श्रवणप्राघुणं प्रणय। शृण्वित्यर्थः । यद्यस्मात्कारणात्स्वजनानां बन्धुवर्गाणां हितं पथ्यमायतौ सुखकारकोपायो गर्भे मध्ये यस्यास्तादृशी वाग्विरचना वचनक्रमः । हितशिक्षेत्यर्थः । रसायनं सिद्धौषधमिवास्ति । प्राणिनां तुष्टिपुष्टिकृद्भवति ॥

अङ्गनाङ्गपरिरम्भहसन्तीगर्भगेहनिवहान्प्रविहाय ।
मर्षयिष्यसि कथं वद सैष्यं भूमिमानिव भटानरिसैन्यम् ॥ ६१ ॥

हे भ्रातः, त्वं वद कथय अङ्गनानां स्वपाणिगृहीतगृहिणीनामङ्गस्य कायस्य परिरम्भ आश्लेषः स्वकामिनीकायेन सममालिङ्गनम्। शीतकाले तस्योष्णस्पर्शत्वात्। तथा—हसन्त्यः कृशानुशकटिकाः, तथा—गर्भगेहा अपवारकाः। 'उरडा' इति लोके प्रसिद्धा। एतेषां निवहान् समूहान् प्रविहाय त्यक्त्वा त्वं सैष्यं शिशिरर्तुम् । उपलक्षणाद्धेमन्तमपि । एतावता शीतकालं कथं केन प्रकारेण मर्षयिष्यसि सहिष्यते । 'सहते मृष्यति मर्षति मृषयति मर्षयति मर्षते चैव । क्षमते तितिक्षते च क्षाम्यति चेति क्षमाविषयाः ॥' इति क्रियाकलापे सहनार्थाः क्रियाः । क इव । भूमिमानिव । यथा राजा भटान्वीरान् विहाय मुक्त्वा अरिसैन्यं शत्रुसेनां कथं सहते ॥ इति शीतकालकाव्यम् ॥

चन्द्रचन्दनशिरोगृहशय्यावारवामनयनावनकेलीः ।
अन्तरेण तरणीरिव सिन्धुर्ग्रीष्म एष किमु निस्तरणीयः ॥ ६२ ॥

चन्द्रः शीतरुचिः, चन्दनं श्रीखण्डविलेपनं शिरोगृहम्, चन्द्रशाला। उष्णकाले हि युवानो गृहोपरितनाकाशभूमौ शेरते शीतलत्वात्। तथा—शय्या हंसार्कतूल्यः पल्यङ्का वा। तथा—वारवामनयनाः एकैकस्य राजादेरन्यस्यापि पुण्यवतः पुंसो बह्वीषु गृहिणीषु या स्वकीयवारके स्वस्यावसरे समेत्य पत्या समं विलसति सा अथ वा चक्रवर्त्यादीनामिव वारविलासिन्यः एकैकस्याः स्त्रियोऽनु द्वे द्वे वाराङ्गने । 'सहेलिका' इति प्रसिद्धा । तास्तु चक्रवर्त्यादिभिरेव भुज्यन्ते । नान्यैः पाणिगृहीतिवत्। इति ता वारवर्णिन्यः । तथा—वनकेलयः उद्याननिखेलनानि तमालधारा जलयन्त्रमन्दिरादिषु क्रीडा । एता अन्तरेण विना हे भ्रातः, त्वया भवता एष लूकाझलादिभिः सकलजगत्संतापहारको ग्रीष्म उष्णकालः । वसन्तग्रीष्मौ द्वावप्युष्णसमयः । स किमु कथं निस्तरणीयः अतिक्रमणीयः । क इव । सिन्धुरिव । यथा तरणीर्बेडा विना समुद्रः कथं निस्तीर्यते उत्तीर्यते ॥ इति ग्रीष्मसमयकाव्यम् ॥

क्रीडितुं रतिपतेरिव गेहाः प्रावृषेण्यदिवसाः कथमेते ।
गीतनृत्ययुवतीजनलीलामुख्यसौख्यविमुखेन विषह्याः ॥ ६३ ॥

हे भ्रातः, एते व्रजनप्रसिद्धा जगज्जीविका हेतवः प्रायेण हि विजयदशमीं यावज्जनाः घनं समीहन्ते तेन शरदपि वर्षान्तरे वोच्यते । प्रावृषेण्या वर्षासमयसंबन्धिनो दिवसा दिनानि कथं कया रीत्या त्वया विषह्याः सहनीयाः । किंभूतेन त्वया । गीतं गानम्, नृत्यं नाटकम्, युवतीजनैस्तरुणीभिः सार्धं लीला विलासः दोलान्दोलनप्रमुखाः क्रीडाः, ता मुख्याः प्रकृष्टा मुखे आदौ भवा मुख्या आद्या यत्र तादृक् यत्सौख्यं सांसारिकसुखं तस्माद्विमुखेन पराङ्मुखेन । तत्त्यक्तकामत्वात् । प्रावृषेण्यदिवसा उत्प्रेक्ष्यन्ते—रतिपतेः कामस्य क्रीडितुं विलसितुं गेहा मन्दिराणीव ॥ इति वर्षाऋतुकाव्यम् ॥

जृम्भमाणजलजद्वितयीवाङ्घ्रिद्वयी प्रदधती म्रदिमानम् ।
क्षोणिचङ्क्रमणदुःखमियं ते मर्षयिष्यति कथं कथयैतत् ॥ ६४ ॥

हे सहोदर, त्वमेतन्मया प्रोच्यमानं कथय निवेदय । इयं शङ्खचक्राङ्कुशातपवारणादिलक्षणैर्लक्षिता अङ्घ्रिद्वयी चरणयुगली क्षोणिचङ्क्रमणस्य कठिनभूमीपीठे पर्यटनस्य पर्यटनेन वा दुःखमसातं कथं मर्षयिष्यति सहिष्यते । किं कुर्वती । म्रदिमानं सौकुमार्यं प्रदधती प्रकर्षेणातिशयेन बिभ्राणा । केव । जृम्भमाणजलजद्वितयीव । यथा स्मेरत्कमलयामलं म्रदिमानं धत्ते ॥

वक्त्रवारिजधिया समुपेतां षट्पदावलिमिवालकमालाम् ।
लुञ्चयिष्यसि कथं मुखलक्ष्मीन्युञ्छितामृतमयूख सगर्भ ॥ ६५ ॥

हे मुखलक्ष्म्या वदनशोभाया उपरि न्युञ्छितो न्युञ्छनीकृत्य क्षिप्तोऽमृतमयूखश्चन्द्रो यस्य [अर्थाद्विधिना] स तस्य संबोधनं हे मुखलक्ष्मीन्युञ्छितामृतमयूख, समानो गर्भो यस्य । 'सहादेः' इति समानस्य स आदेशः । हे सगर्भ एकमातृगर्भोत्पन्नभ्रातः, त्वमलकमालां चिकुरच्छटां केशपाशं कथं लुञ्चयिष्यसि उत्पाटयिष्यसि । उत्प्रेक्ष्यते—वक्त्रे वदने वारिजस्य पद्मस्य धिया बुद्ध्या भ्रमेण समुपेतां समागतां षट्पदावलीं भृङ्गमालिकामिव ॥

राशिना सुमनसामिव सर्पिस्तर्पितोद्धतधनंजयकीलाः ।
तत्परीषहततिः किमसह्या विग्रहेण मृदुना तव सह्या ॥ ६६ ॥

हे भ्रातः, तव भवतो मृदुना सुकुमारेण विग्रहेण शरीरेण असह्या कातरचित्तेन सोढुमशक्या । तादृशी चासौ कातरीकृतानेकजना द्वाविंशतिमाना प्रसिद्धा जिनशासने विख्याता परीषहाणाम् [क्षुधा-पिपासा-शीत-उष्ण-दंश-मशक-अचेल-अरति-स्त्री-चर्या-निषद्या-शय्या-आक्रोश-वध-याचना-अलाभ-रोग-तृण-स्पर्शन-सत्कार-मेल-प्रज्ञा-अज्ञान-सम्यक्त्वनाम्नां] ततिः श्रेणी कथं केन प्रकारेण सह्या मर्षणीया सोढव्या । केनेव । राशि-

नेव । यथा सुमनसां कुसुमानां निकरेण सर्पिषा घृतेन तर्पितो य उत्कट उच्छिखो वा धनंजयो वह्निस्तस्य कीला ज्वाला कथं क्षम्यते ॥ इति विमलाया द्वितीयवारं वाक्यानि ॥

कुन्दकुड्मलजयं सृजतेवाभीशुभिः प्रसृमरैर्दशनानाम् ।
प्रत्यवादि वदतां विदुरेणानेन जामिरिति नीतिमता सा ॥ ६७ ॥

अनेन कुमारेण जामिर्विमलाभगिनी इति वक्ष्यमाणं प्रत्यवादि प्रत्युत्तरीकृता। प्रत्युत्तरो दत्त इत्यर्थः । अनेन किंभूतेन । वदतां वक्तॄणां मध्ये विदुरेण विदग्धेन अतिचतुरेण । पुनः किंभूतेन । नीतिमता न्यायशालिना नययुक्तेन । उत्प्रेक्ष्यते—दशनानां स्वदन्तानां प्रसृमरैर्विस्तरणशीलैरभीशुभिः किरणैः कृत्वा कुन्दकुड्मलानां मुचकुन्दकलिकानां पराभवं सृजता कुर्वतेव ॥

[1]वर्णिनीव विरतिः कृतसङ्गा ध्यानसंततिरसौ हसनीव ।
शान्ततापवरकः किमु जामे शर्मणे शमवतां तुहिनर्तौ ॥ ६८ ॥

हे जामे, तुहिनर्तौ हिमसमये शीतकाले शमवतामुपशमिनां मुनीनाममी शर्मणे सुखाय भवन्ति । अमी के तान् प्रतिपादयति—कृतो विहितः सङ्गः सर्वाङ्गानुषङ्गो यया तादृशी विरतिः सर्वसङ्गपरित्यागलक्षणा सदापार्श्ववर्तिनी वरवर्णिनीव कान्तेवास्ते । तथा असौ संसारं मुमुक्षुभिरहर्निशं ध्यायमाना ध्यानसंततिः प्रणिधानानामेकाद्यंशैः क्रियमाणत्वात् परम्परा हसनी अङ्गारशकटीव ध्यानलीलानां न शीतं न तापश्च लगति । तथा शान्तता शमपरिणामः अपवरक इव वर्तते । किमु इवार्थे । गर्भागारः किमु । 'गर्भागारेऽपवारकः' इति हैम्याम् ॥ इति कुमारोक्तं यतिसातकृच्छीतकालकाव्यम् ॥

अङ्गरागमिव सद्गुरुशिक्षा श्रीजिनस्य च विधोरिव सेवा ।
केलिरब्जसरसीव च योगे प्रीणयन्ति शमिनोऽपि निदाघे ॥ ६९ ॥

हे जामे, एते पदार्था निदाघे ग्रीष्मसमयेऽपि शमिनः शान्तमानसान् मुनीन् प्रीणयन्ति तोषयन्ति । तानेव प्रदर्शयति—एकः सन् शोभनो गुरुर्हिताहितोपदेशकः तस्य शिक्षा स्वर्गापवर्गमार्गैकसाधनविधायिकानुशास्तिः अङ्गरागो विलेपनमिवास्ते । च पुनः श्रीभिश्चतुस्त्रिंशदतिशयलक्ष्मीभिः कलितो जिनो वीतरागस्तस्य विधोश्चन्द्रमस इव सेवा परिचर्या । च पुनर्योगे यम-नियम-करण-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिरूपाष्टाङ्गलक्षणे अब्जसरसि कमलकलिततटाके इव केलिर्जलक्रीडा प्रीणातीति शेषः ॥ इति कुमारोक्तं मुनिमनः सुखकृत् ग्रीष्मसमयकाव्यम् ॥

यत्र गीतय इवागमघोषास्ताण्डवा इव पुनर्भवभावाः ।
वारिवाहदिवसाः शमभाजां नित्यमुत्सवमया इव सन्ति ॥ ७० ॥

हे भगिनि, वारिवाहदिवसा वर्षाकालवासराः शमभाजां शान्तरसशालिनां श्रमणानां

---

१. आदर्शपुस्तके त्रुटितोऽयं सार्धश्लोकः स्वकल्पनयास्माभिः संभावितः.

नित्यं सदोत्सवमयाः महामहप्रचुराः सन्ति। तदेव दर्शयति—यत्र प्रावृषि वर्षाकाले आगमानां सिद्धान्तानां घोषाः पठनध्वनयः गीतयोगानामिव श्रूयन्ते। पुनर्यत्र भवभावाः सर्वे संसारपदार्थाः संसारस्वरूपाणि वा ताण्डवा नृत्यानीव नाटकानीव विलोक्यन्ते। ताण्डवशब्दः पुंनपुंसके। 'पूर्वत्रिदिवताण्डवाः' इति लिङ्गानुशासने ॥ इति कुमारोक्तं श्रमणस्वान्तविश्रामकारि वर्षर्तुकाव्यम् ॥

यो विजेतुमिव वारिजराजीं पश्यतस्तत इतः क्रमणेन।
पल्लवांश्च विभवैरतिदृप्तौ तौ क्रमौ कलयतः किमसातम् ॥ ७१ ॥

हे भगिनि, तौ क्रमौ चरणौ असातं दुःखं कथं कलयतः धत्तः। यौ क्रमौ विभवैर्लक्ष्मीभिः कृत्वा अतिदृप्तौ अधिकमदाध्मान्तौ सन्तौ वारिजराजीं कमलमालां च पुनः पल्लवान् प्रवालान् जेतुं पराभवितुं तत इतः इतस्ततः क्रमणेन पर्यटनेन पश्यतः विलोकयतः। यौ परान् विजिगीषतस्तौ[1] सातासातं न गणयतः ॥

द्वेषिणामिव गणाः शितिमानं वक्रभावमपि ये कलयन्ति।
को महाभट इवात्महितैषी नोच्छिनत्ति ननु तानिह केशात् ॥७२॥

ननु इति प्रश्ने। हे स्वसः, तान् केशान् कुन्तलान् कः प्राज्ञः पुमान्नोच्छिनत्ति नोच्छेदयति। कः किंभूतः। आत्मनः स्वस्य हितमायतिकालं सुखमिच्छतीत्येवंशील आत्महितैषी स्वसुखाभिलाषुकः। क इव। महाभट इव। यथा सर्वाङ्गीणबलवान् सुभटः राजादिकः स्वाभ्युदयकाङ्क्षी सन् कुत्सितान् ईशानधिपतीन् केशान् कुग्रामवासिनः पल्लीपतिप्रमुखानथ वा सीमालाभूपालान् स्वस्पर्धित्वेन शत्रूनुच्छेदयति। तान् कान्। ये द्वेषिणां वैरिणां गणा व्रजा इव शितिमानमर्थान्मनसि श्यामतां कालुष्यम्। द्रोहमित्यर्थः। अपि पुनर्वक्रभावं कुटिलतां कपटिभावं कलयन्ति बिभ्रति। प्रायः सत्पुरुषाणां स्त्रीणां च केशेषु वक्रत्वं वर्ण्यते। यथा चम्पूकथायाम् 'वक्रोक्तिकुशलस्य नलस्य केशकलापोऽपि वक्रतां भेजे'। तथा 'अरालकेशी वशा' ॥

जैमिनीयमनुजा इव दैवे विग्रहे न शमिनः कृतयत्नाः।
क्षेत्रमत्र हि तपोविधिसीरक्षेडितं दिशति निर्वृतिसस्यम् ॥ ७३ ॥

हे सहोदरे, शमिनश्चारित्रिणो विग्रहे शरीरे मेघकुमार इव न कृतयत्ना नैव विनिर्मितपालनाः ममत्वपरिणामरहिता भवन्ति। के इव। जैमिनीयमनुजा इव। यथा जैमिनीयमतानुयायिनो मनुजा जना दैवे देवतासंबन्धिनि शरीरे न कृतोद्यमा नैव निर्मितप्रयत्नाः ते हि देवानां शरीरं न मन्यन्ते। 'विग्रहं मखभुजामसहिष्णुस्तस्य जैमिनिमुनित्वमुदीये' इति नैषधे। हि यस्मात्कारणात्तपसां विधिभिः एकावल्यादिबहुविधप्रकारैरेव सीरैर्हलैः क्षेडितं गृहीतसारं त्रिसतीकृतं च सत् क्षेत्रं वपुः कृषिभूमिश्च।

---

१. परस्मैपदं चिन्त्यम्.

'क्षेत्रं भरतादौ भगाङ्गयोः। केदारे सिद्धभूपत्न्योः' इत्यनेकार्थः। अत्र जगति निर्वृतिसस्यं मोक्षफलं सुखेन सुखकृद्वा धान्यं दिशति ददाति । सस्यं धान्यफलयोरिति ॥

इन्द्रियाण्यनिशमुत्पथगानि शूकलानिव वहञ्शमरश्मीन् ।
यो नियन्त्रयति जन्तुरविघ्नां प्राप्य निर्वृतिपुरीं स सुखी स्यात्॥७४॥

हे भगिनि, स जन्तुः प्राणी अविघ्नां निरन्तरायां निर्वृतिपुरीं मुक्तिनगरीं प्राप्यासाद्य सुखी स्यात् । स कः । यः पुमान् अनिशं नित्यमुत्पथगानि उन्मार्गप्रवृत्तानि इन्द्रियाणि । श्रोत्रेक्षणनासारसनास्पर्शनरूपाणि पञ्चापि हृषीकानि नियन्त्रयति निरुध्य स्वायत्तानि कुरुते स्ववशीकरोति । किं कुर्वन् । शमरश्मीन् शमतापरिणामरूपकशा वहन् धारयन् । कानिव । शूकलानिव । उपमाने लिङ्गविपर्ययः । 'लिङ्गभेदं तु मेनिरे' इति वाग्भटालंकारे । यथा उत्पथगान् दुर्विनीतानश्वान् कशा दधत्कशा प्रहारैः सादी अश्ववारो नियन्त्रयति दमयति ॥

मानवान्स्वयमसौ छलदर्शी छाययास्त्यनुसरन्निव कालः ।
आयतौ हितमतः करणीयं तज्जिनक्रमयुगं शरणीयम् ॥ ७५ ॥

हे सोदरे, असौ प्रत्यक्षः चर्मचक्षुर्भिरपि लक्ष्यमाणः स्वयमात्मना छलदर्शी छिद्रावलोककः रन्ध्रान्वेषी कालो यमः छायया वपुःप्रतिच्छायिकया । छायाछलेनेत्यर्थः । मानवान्प्रति मनुष्यान् प्रति मनुष्याननुसरन्ननुगच्छन्निवास्ति । यदुक्तम्—'छायामिसेण कालो सव्वजियाणं छलं गवेसन्तो। पासं कहवि न मुञ्चइ ता धम्मे उज्जमं कुणह ॥' इति वचनात् । अतोऽस्मात्कारणान्मानवैरायतौ उत्तरकाले हितम् । येन कृत्वा जन्तुः इहलोकपरलोकयोः सुखी स्यात् तद्धितं पथ्यं करणीयं विधातव्यम् । तत्कारणात्तद्धितकर्तृजिनक्रमयुगं श्रीवीतरागचरणयुगलं शरणीयं शरणीकरणीयमाश्रयितव्यम् ॥ इति हीरकुमारस्य भगिनीं प्रति द्वितीयवारं प्रत्युत्तरवचांसि ॥

वाङ्मयैर्जितसुधामधुदुग्धैर्निर्जयं विदधतीव शुकीनाम् ।
इत्थमुक्तवति हीरकुमारे सा बिभेद वदनाम्बुजमुद्राम् ॥ ७६ ॥

हीरकुमारे इत्थममुना प्रकारेण उक्तवति भाषितवति सति सा विमला वदनाम्बुजमुद्रां मुखकमलमुद्रणं मौनलक्षणां बिभेद त्यक्तवती । बभाषे इत्यर्थः । उत्प्रेक्ष्यते—जितानि पराभूतानि सुधा पीयूषं मधु क्षौद्रं दुग्धं पयो यैस्तादृशैर्वाङ्मयैर्वचनविलासैः कृत्वा शुकीनां कीरकान्तानां निर्जयं विदधतीव कुर्वतीव ॥

नार्हती व्रतविधौ तव तेनाद्यापि यत्स्फुरति शैशवमङ्गे ।
योद्धुराहव इवापटुतायां तेन तिष्ठ कियतीः शरदस्त्वम् ॥ ७७ ॥

हे सहोदर, तेन कारणेन तव भवतो व्रतविधौ संयमग्रहणप्रकारे नार्हती न योग्यता अर्हतो भावः आर्हती । 'अर्हतो नुम्वा' इति विभाषया नुम्विधानादार्हन्ती आर्हतीति

रूपद्वयं स्यात्। 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे। यद्यस्मात्कारणात्तवाङ्गे भवतः शरीरे शैशवं बालभावः स्फुरति दीप्यते। बाल्यावस्थायां हि संयमग्रहणमनुचितं शिशुत्वेनायोग्यत्वात्। कस्येव। योद्धुरिव। यथा भटस्यापद्गुतायां सत्यामसामर्थ्ये सति आहवे संग्रामे अनौचिती। 'योद्धारस्तु भटा योधाः' इति हैम्याम्। तेन हेतुना हे वत्स, त्वं कियतीः कियत्प्रमाणाः शरदो वर्षाणि तिष्ठ गृहे स्थितिं कुरु प्रतीक्षस्व। स्वसौध एव वैराग्यवान् वासं विधेहि॥ इति विमलायास्तृतीयवारं वाक्यम्॥

शैशवेऽपि मदमोहमहेभान्सिंहशाव इव हिंसितुमीशः।
तत्समादिश ममास्य निदेशं तामिदं तदनु सोऽपि जगाद॥ ७८॥

तदनु भगिनीभाषितस्य पश्चात् सोऽपि हीरकुमारोऽपि तां विमलां प्रति इदमस्मिन्नेव काव्ये प्रोच्यमानं जगाद बभाषे। हे जामे, शैशवे बाल्येऽप्यहं मदाः जाति-कुल-रूप-बल-श्रुत-लाभ-तप-ऐश्वर्य-नामानोऽष्टौ, तथा मोहो मौढ्यं रागो वा, त एव महेभा मत्तहस्तिनस्तान् हिंसितुं निहन्तुं समर्थोऽस्मि। क इव। सिंहशाव इव। यथा केसरिकिशोरकः शिशुत्वेऽपि गजेन्द्रान् दलयितुमलंभूष्णुर्भवेत्। 'विश्वव्यापि तमो हिनस्ति तरणिर्बालोऽपि कल्पाङ्कुरो दारिद्राणि गजावलिं हरिशिशुः काष्ठानि वह्नेः कणः।' इति पूर्वाचार्यप्रणीतश्रीचिन्तामणिपार्श्वनाथस्तुतौ। तथा 'सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु। न पुनर्नखमुखविलिखितभूतलकुहरस्थिते नकुले॥' इति सूक्तेऽपि तत्कारणात्त्वं मम लघुभ्रातास्य संयमस्य ग्रहणस्य निदेशमाज्ञां देहि॥ इति विमलां स्वसारं प्रति कुमारस्यापि तृतीयवारं प्रतिवचः॥

तस्य वीचिभिरिवामरसिन्धोरुक्तियुक्तिभिरितोऽप्यपराभिः।
ओमिति प्रवदति स्म कथंचित्सापि बाष्पभरगद्गदवाग्भिः॥ ७९॥

अमरसिन्धोर्देवनद्याः गङ्गाया वीचिभिः रङ्गत्तरङ्गैः इव तस्य कुमारस्य इतोऽप्येतत्पूर्वोक्तादप्यपराभिरन्याभिरुक्तियुक्तिभिर्वचनप्रपञ्चैः सा विमला जामिरपि कथंचिन्महता कष्टेन बाष्पाणां दुःखाश्रूणां भरेण निरन्तरप्रवाहेण कृत्वा गद्गदाभिरस्पष्टाक्षराभिर्वाग्भिर्वाणीभिः कृत्वा। ओमिति एवमस्त्विति प्रवदति स्म कथयति स्म। दीक्षादेशं ददावित्यर्थः॥ इति विमलाया दीक्षादेशप्रदानम्॥

पूर्वमेव नियमस्थितिकालात्सा गलद्बहुलदृग्जलपूरैः।
भ्रातरं स्वयमिव स्नपयन्तीदं पुनर्गदितुमारभते स्म॥ ८०॥

सा विमला पुनरिदं वक्ष्यमाणं गदितुं वक्तुमारभते स्म उपचक्रमे। किं कुर्वती। नियमस्थितिकालात्संयमग्रहणसमयात्पूर्वं प्रथममेव गलतां लोचनद्वन्द्वान्निःसरतां बहुलानामविच्छिन्नानां प्रवाहानां दृशोश्चक्षुषोर्जलानामस्रुसलिलानां पूरैर्धारावर्षप्लवैः कृत्वा। उत्प्रेक्ष्यते—भ्रातरं स्वबान्धवं स्नपयन्ती स्नानं कारयन्तीव॥

यादसां भवधुनीधवमध्ये मादृशामतिदुराकलनीयः ।
संयमः सुकृतविप्रयुतानां भ्रातरल्पतरसामिव दुर्गः ॥ ८१ ॥

हे भ्रातः, सुकृतविप्रयुतानां पुण्यरहितानां मादृशामस्मद्विधानां संयमश्चारित्रमतिदुराकलनीयः अतिशयेन दुरधिगमः दुःखेनादरणीयः । मादृशां किंभूतानाम् । भवः संसारः स एव धुनीधवो नदीपतिः समुद्रस्तस्य मध्ये क्रोडे यादसां जलचराणां नक्राणाम् । क इव । दुर्ग इव । यथाल्पतरसां स्वल्पबलानाम् । 'प्राणस्थामतरः पराक्रमबलद्युम्नानि शौर्यौजसी' इति हैम्याम् । स्तोकं सैन्यं भुजबलं वा येषां तेषां नृपाणां दुर्गः कोट्टः दुष्प्रापः ग्रहीतुमशक्यः ॥

संततोपचितकर्मगणस्यानादिधाभवपरम्परयास्ते ।
क्रीतभृत्य इव भर्तृजनस्यायत्तधीरिह सुधीरपि बन्धो ॥ ८२ ॥

हे बन्धो, इह जगति अनादिधा न विद्यते आदिर्यस्याः सा अनादिः अनादिप्रकारा इत्यनादिधा तादृशी भवपरम्परा संसारे संसारता अवतारसंततिस्तया कृत्वा संततं निरन्तरमुपचितः प्रचुरीकृतो यः कर्मणां पुण्यपापरूपाणां गणस्य व्रजस्य सुधीरपि पण्डितोऽपि जानन्नप्यायत्तधीर्वश आस्ते । क इव । क्रीतभृत्य इव । यथा मूल्यगृहीतः सेवको भर्तृजनस्य स्वामिनोऽधीनः स्यात् । 'अनादिधा विश्वपरम्परायाम्' इति नैषधे ॥

कर्मसंततितिरोहितभावश्चेष्टतेऽत्र निरवग्रहचेष्टः ।
लोक एष निखिलोऽपि पिशाचावेशिताशय इव व्रतकाङ्क्षिन् ॥ ८३ ॥

हे व्रतकाङ्क्षिन् संयमाभिलाषुक हे भ्रातः, एष जगति दृश्यमानः निखिलः समस्तोऽपि लोको जनः पिशाचेन व्यन्तरजातिविशेषेण देवेनावेशितोऽधिष्ठित आशयश्चित्तं परिणामो वा यस्य तादृश इव निरवग्रहा स्वतन्त्रा चेष्टा हास्यविनोदक्रीडाकरणादिस्वभावो यस्य तथाविधः सन् चेष्टते विलसति । किंभूतो लोकः । कर्मणां प्राचीनजन्माचीर्णानां शुभाशुभपुद्गलपरिणामरूपाणां संतत्या प्रकृतिपरम्परया तिरोहित आवृतो भावः सम्यग्ज्ञानरूपो जीवस्वभावो यस्य ॥

संसृतेः सुखमशेषममुष्या बान्धवामृतमिवानुभवन्ति ।
हीनसंगममिवारमणीयं जानते न तु जनाः परिणामे ॥ ८४ ॥

हे बान्धव हीरकुमार, लोकाः समस्ता अपि संसारिजनाः अमुष्याः संसृतेः अस्य संसारस्याशेषं समग्रमपि सुखं शर्म अमृतमिव सुधारसस्वादमिवानुभवन्ति भुजन्ते । तु पुनः हीनसंगममिव नीचजात्या कर्मणा वा पिशुनत्वेन वा निकृष्टैर्मिलनं सौहार्दादिकरणमिव परिणामे प्रान्ते अवसाने विरसं महादुःखदं जना न जानते नैव विदन्ति । यदुक्तं सूक्तम्—'नीचसरीसो कीजइ संग चढइ कलङ्क हुइ जसभङ्ग । हाथि अङ्गार करइ जइ कोइ कइ दाझइ कइ कालो होई ॥' इति ॥

संसृतेर्मतिमतां वर तस्यास्त्वं पृथग्भवितुमिच्छसि वत्स।
पुण्डरीकमिव पल्वलपङ्कात्तत्सगर्भ भुवि धन्यतमस्त्वम्॥ ८५॥

हे मतिमतां वर सुबुद्धिभाजां श्रेष्ठ हे वत्स, लघुभ्रातः। 'वत्सा उरस्तुग्वर्षतर्णकाः' इत्यनेकार्थः। तुकू अपत्यमुपलक्षणाल्लघुभ्रात्रादावपि इत्यवचूर्णिः। तस्याः पूर्वव्यावर्णितस्वरूपायाः संसृतेः संसारात्सकाशात्त्वं पृथग्भवितुम्। त्यक्तुमित्यर्थः। इच्छसि वाञ्छसि। किमिव। पुण्डरीकमिव। यथा पल्वलपङ्कात्तटाककर्दमात्कमलं भिन्नं भवति। भूमीपीठे जम्बालः, तदुपरि जलम्। द्वे अपि मुक्त्वा द्वयोरुपरि पद्मं तिष्ठेत्। पुण्डरीकशब्देन तस्य श्रेष्ठत्वख्यापनं तत्कारणात्। हे समान, एको गर्भो यस्य तस्य संबोधनं हे सगर्भ बान्धव, भुवि पृथिव्यां त्वमेव धन्यतमः अतिशयेन पुण्यवान्। 'सुकृती पुण्यवान् धन्यः' इति हैम्याम्॥ इति दीक्षानुज्ञादानानन्तरं धर्मकारकत्वेन भगिनीस्तुतिः॥

एतदालपितमात्मभगिन्याः श्रोत्रपत्रपुटकेन निपीय।
सातमाप मृदुतित्तिरपिच्छस्पर्शजातमिव हीरकुमारः॥ ८६॥

आत्मभगिन्या निजजामेः एतत्पूर्वोक्तं भ्रातृप्रशंसाकरणात्मकमालपितं भाषितं श्रोत्रं कर्णस्तदेव पत्रस्य पर्णस्य पुटको भाजनविशेषः। 'दुंदडो' इति लोकप्रसिद्धः। तेन निपीय पीत्वा। सादरं श्रुत्वेत्यर्थः। हीरकुमारः सातं सुखमाप लेभे। उत्प्रेक्ष्यते—मृदु सुकुमारं यत्तित्तिरः खरकोणः पक्षिविशेषः। लोके 'गणेश' इति प्रसिद्धः। तस्य पिच्छं पतत्रं तनूरुहं तस्य स्पर्शः संघट्टस्तेन जातमुत्पन्नमिव सुखम्। अर्थात् कर्णयोः तित्तिरपक्षिणोऽतिमृदुलपिच्छस्य परावर्त्यमानस्य कर्णेऽतीव सातं जायते। यदुक्तं चम्पूकथायाम्—'कोष्णं किं नु निषिच्यते तव बलात्तैलं सखि श्रोत्रयोरन्तस्तित्तिरपक्षिपत्रमथ वा मन्दं मृदु भ्राम्यति। येनाङ्गेषु निखातमन्मथशरप्रस्फारपिच्छच्छविर्नीलीमेचकितोच्चकञ्चुकरुचा रोम्णां वहत्युद्गमः॥' इति॥

रोमहर्षणमिषात्तदनुज्ञोद्वेलहर्षजलधौ शिशुकाये।
उत्स्वसन्ति किमु किंचन लोलद्बालशालिशफराः परितोऽमी॥८७॥

शिशुकाये हीरकुमारशरीरे रोमहर्षणस्य रोमाञ्चस्य मिषाच्छलादमी प्रत्यक्षलक्षाः किंचन किमपि लोलन्तश्चञ्चलीभवन्तः। 'कावेरीतीरभूमीरुहभुजगवधूभुक्तमुक्तावशेषः कर्णाटीचीनपीनस्तनवसनदशान्दोलनस्पन्दमन्दः। लोलल्लाटीललाटालकतिलकलतालास्यलीलाविलोलः कष्टं भो दाक्षिणात्यः प्रसरति पवनः पान्थकान्ताकृतान्तः॥' इति भोजप्रबन्धे। बाला लघवः शालिनः शोभाकलिताः शफरा मीनाः। परितः सर्वतः। उत्प्रेक्ष्यते—उत्स्वसन्ति उच्छलन्ति। किंभूते शिशुकाये। तस्या विमलानाम्न्या भगिन्या अनुज्ञा संयमादानादेशस्तेनोद्वेलो वेलामतिक्रम्य प्रसरन् यो हर्षः प्रमोदः स एव जलधिः समुद्रो यत्र। यादःपतित्वान्मकराकरत्वाच मीनानां संभवो युक्त एव जलनिधौ॥

एतया ध्वनिनिरस्तविपञ्च्या भूतलोपगतयेव घृताच्या ।
त्वं गृहाण च सगोत्रजनेभ्यः शासनं स पुनरेतदवादि ॥ ८८ ॥

एतया भगिन्या पुनरेतदित्थममुना प्रकारेण स कुमारोऽवादि भाषितः । किंभूतया एतया। ध्वनिना मधुरस्वरेण निरस्ता तिरस्कृता विपञ्ची वीणा यया । उत्प्रेक्ष्यते—भूतले क्षोणीमण्डले उपगतया प्राप्तया । 'उपगतोऽपि च मण्डलनाभिताम्' इति रघुवंशे । मण्डलनाभितां द्वादशराजचक्रवर्तितां प्राप्त इति तद्वृत्तिः । आगतया वा । 'आगमने च गमनार्थाः समभ्युपाङ्भ्यः पराः कथिताः' इति क्रियाकलापे । घृताच्या घृताचीनामाप्सरसा इव । 'अवतरति घृताचीस्कन्धविन्यस्तहस्तः' इति चम्पूकथायामिन्द्रविशेषणम् । तथा—'इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमितेन' इति नैषधे । इदं किम् । तदाह—हे वत्स, च पुनस्त्वं सगोत्राः स्वजना एव जनास्तेभ्यः शासनं दीक्षादेशं गृहाण आदत्स्व ॥

भारतीं श्रुतियुगाञ्जलिना तां स्वस्वसुर्मधुसखीं विनिपीय ।
शैक्षवन्निजगुरोर्हितशिक्षां स[1] स्म भूत्प्रमदमेदुरिताङ्गः ॥ ८९ ॥

स हीरकुमारः स्वस्वसुर्निजभगिन्या विमलायास्तां स्वजनादेशादानरूपां भारतीं वाणीं श्रुतियुगं कर्णयुगमेवाञ्जलिस्तेन विशेषेण सादरं निपीय पीत्वा प्रमदेन हर्षेण मेदुरितं पुष्टीभूतमङ्गं वपुर्यस्य तादृशः स्म भूत्संजातः । किंवत् । शैक्षवत् । यथा शैक्षः प्राथमकल्पिकः निजगुरोर्हितामैहिकामुष्मिकसाधनकारिणीं शिक्षां सादरं श्रुत्वा हृष्टो भवति । किंभूतां भारतीम् । मधुनः क्षौद्रस्य सखीं वयसीं मधुमृष्टाम् ॥

स्वानुजादिनिखिलस्वजनेभ्यः शासनं व्रतविधेः पृथुकोऽपि ।
आददे पुनरसौ व्यवहारी लाभवद्विविधवस्तुगणेभ्यः ॥ ९० ॥

अपि पुनः पृथुको हीरकुमारः स्वस्यात्मनोऽनुजो भ्राता श्रीपालनामा स आदौ येषां तादृशाः निखिलाः समस्ताः स्वजनाः गोत्रिवर्गमनुष्यास्तेभ्यः सकाशाद्व्रतविधेः संयमाचरणस्य शासनमादेशमाददे गृहीतवान् । किंवत् । लाभवत् । यथा व्यवहारी व्यापारकारको विविधानां नानाप्रकाराणां वस्तूनां क्रियाणकाणां गणेभ्यः समुदायेभ्यो लाभमधिकफलं गृह्णाति । 'लाभोऽधिकं फलम्' इति हैम्याम् ॥ इति भगिनीवचनान्तरं स्वजनवर्गादेशग्रहणम् ॥

भूचरानिव विधेरनुवादान्सोपवीतकृतवेदनिदानान् ।
राजहंसगकमण्डलुपाणीनाजुहाव गणकान्स सुवाणीन् ॥ ९१ ॥

स हीरकुमारो गणकान् ज्योतिःशास्त्रविदः । 'सांवत्सरो ज्यौतिषिको मौहूर्तिको निमित्तवित् । दैवज्ञगणकादेशिज्ञानिकार्तान्तिका अपि ॥' इति हैम्याम् । आजुहाव आ-

---

१. 'सोऽभवत्' इत्येवमेव पाठः साधुः.

कारयामास । किंभूतान् । सहोपवीतेन यज्ञसूत्रेण वर्तन्ते ये । पुनः किंभूतान् । कृतो निर्मितो वेदानां निनाद उच्चारो यैस्ते । पश्चात्कर्मधारयः । पुनः किंभूतान् । राजहंसवद्गच्छन्तीति । पुनः किंभूतान् । कमण्डलुः कुण्डिका पाणौ हस्ते येषाम् । 'कुण्डिका तु कमण्डलुः' इति हैम्याम् । ततः कर्मधारयः । पुनः किंभूतान् । सुवाणीन् शोभना वाचो येषां ते । उत्प्रेक्ष्यते—भूचरान् क्षोणीचारिणः विधेर्ब्रह्मणोऽनुवादा अनुवदन्ति सदृशीभवन्तीति स्वरूपाणीव । ब्रह्मणो ब्राह्मणत्वेन सोपवीतता वेदैककर्तृत्वाद्वेदोच्चारित्वं कमण्डलुकरत्वं सुवाक्त्वं च युक्तम् ॥

आत्मकामितमुखानिव मूर्तान्पुष्पपल्लवफलाक्षतपुञ्जान् ।
तत्पुरोऽयमुपहृत्य सगोत्रैः पृच्छति स्म चरणस्य मुहूर्तम् ॥ ९२ ॥

अयं हीरकुमारः सगोत्रैः स्वजनैः समं चरणस्य चारित्रस्य मुहूर्तं पृच्छति स्म । किं कृत्वा । उपहृत्य ढौकयित्वा । कान् । पुष्पाणि कुसुमानि, पल्लवाः किशलयानि, फलानि तरुसस्यानि, अक्षता लाजा अक्षततण्डुला वा, तेषां पुञ्जान् व्रजान् । कथम् । तत्पुरस्तेषां मौहूर्तिकानामग्रे । उत्प्रेक्ष्यते—आत्मनः स्वस्य कामितानामभीप्सितपदार्थानां मुखान् प्रारम्भानिव ॥

पूर्वनिर्मितपरस्परतर्कैर्निश्चितोच्चपदसंपदुदर्कैः ।
तैरथौच्यत महोदयसद्मद्वारवद्व्रतदिनं पृथुकेन्दोः ॥ ९३ ॥

अथ प्रश्नानन्तरं तैर्ज्यौतिषिकैर्व्रतदिनं संयमग्रहणवासरः औच्यत कथितम् । किंवत् । पृथुकेन्दोः कुमारचन्द्रस्य महानुदयो मोक्षो वा महोदयः स एव सद्म गृहं तस्य द्वारवद्द्वारमिव । तैः किंभूतैः । पूर्वं प्रथमं निर्मितः कृतः परस्परमन्योन्यं तर्को दोषराहित्यग्रहगोचरांशोच्चनीचादीनां विचारो यैः । पुनः किंभूतैः । निश्चितो निश्चयं नीतो निर्धारितोऽर्थात्कुमारस्यैव उच्चस्यातिशयिनः पदस्य गणधरत्वलक्षणस्य संपदो लक्ष्म्याः उदर्कः उत्तरकाले फलं यैः ॥

स्वर्णरूप्यमणिमौक्तिकदानैरीश्वरानिव विधाय विधिज्ञः ।
निश्चितव्रतमुहूर्तदिनस्तान्वर्णिनः स विससर्ज कुमारः ॥ ९४ ॥

स हीरकुमारः वर्णिनो ब्राह्मणानधिकारान्मौहूर्तिकान् विससर्ज यथागतं प्रैषीत् । किं कृत्वा । विधाय निर्माय । अर्थात् ज्यौतिषिकानेव । कानिव । ईश्वरानिव महेभ्यानिव । कैः । स्वर्णानि काञ्चनानि । रूप्याणि रजतानि मणयो रत्नानि मौक्तिकानि मुक्ताफलानि तेषां दानैर्विश्राणनैः । किंभूतः कुमारः । विधिमुचितकरणादिकं जानातीति विधिज्ञः सदाचारचतुरः । पुनः किंभूतः । निश्चितो निर्धारीकृतः व्रतस्य दीक्षामुहूर्तस्य दिनो दिवसो येन सः ॥ इति दीक्षामुहूर्तदिवसावलोकनम् ॥

आगतेऽह्नि सुहृदीव तदुक्ते शुद्धगोचरनवांशकयुक्ते ।
संमदाद्विजयसिंहमुखेभ्याः प्रारभन्त चरणक्षणमस्य ॥ ९५ ॥

विजयसिंहनामा हीरकुमारस्य भगिन्या विमलाया भर्ता स मुख आदिर्येषां तादृशाः इभ्या व्यवहारिणः अस्य कुमारस्य चरणक्षणं चारित्रमहोत्सवं प्रारभन्त उपक्रामन्ति स्म । कस्मात् । संमदात्प्रमोदात् । कस्मिन्सति । तैर्गणकैरुक्ते कथिते अह्नि दिवसे आगते संप्राप्ते सति । कस्मिन्निव । सुहृदीव । यथा विवाहादावाकारिते मित्रे महोत्सवाः प्रारभ्यन्ते । किंभूतेऽह्नि । शुद्धा निर्दोषा गोचरा रेखादानादयः नवांशका लग्नमध्यगतविशिष्टतमवेलास्तैर्युक्ते सहिते ॥

केचिदुच्चमणिपीठनिषण्णं गन्धबन्धुरपयोभृतकुम्भैः ।
निर्जरा इव जिनावनिजानिं दीक्षणस्य समयेऽस्नपयंस्तम् ॥ ९६ ॥

केचित्पुरुषा दीक्षणस्य संयमग्रहणस्य समये प्रस्तावे अर्थान्मुहूर्तवासरे तं हीरकुमारमस्नपयन् स्नानं कारयन्ति स्म । कैः । गन्धैर्वासनार्थमन्तर्मुक्तकुसुमादिपरिमलैर्बन्धुरैर्मनोज्ञैः पयोभिः सलिलैर्भृताः पूरिता ये कुम्भाः कलशास्तैः । किंभूतं तम् । उच्चमुन्नतं तथा मणिमयं रत्नघटितं यत्पीटमासनम् । स्नानचतुष्किका इत्यर्थः । तत्र निषण्णमुपविष्टम् । के कमिव । निर्जरा जिनावनिजानिमिव । यथा दीक्षाग्रहणावसरे देवा अर्थाच्चतुःषष्टिप्रमितेन्द्रादयोऽमरा जिनानां सामान्यकेवलिनां मध्ये अवनिर्जाया भूमिरेव पत्नीर्यस्य । 'जायाया निङ्' । जायाशब्दान्निङ्प्रत्ययो भवति । 'लोपो व्योर्वलि' । वकारयकारयोर्वलिप्रत्यये परे लोपो भवति । सस्वरयोरिति शेषः । यकारलोपे । अवनिजानी राजा एतावता जिनराजं तीर्थोदकपूर्णकलशैः ॥

सांप्रतं कथममुष्य जडेनाश्लेषणं विबुधकैरवबन्धोः ।
कोऽप्यरूक्षयदितीव तदीयं वाससातिमृदुलेन शरीरम् ॥ ९७ ॥

कोऽपि पुमान् अतिमृदुलेनाधिकसुकुमारेण वाससा वस्त्रेण तदीयं हीरकुमारसंबन्धि शरीरं कायम् । उत्प्रेक्ष्यते—इतीव हेतोः अरुक्षयन्निर्नीरयामास । इति किम् । यद्विबुधेषु विचक्षणपुरुषेषु कैरवबन्धुश्चन्द्रस्तस्य पण्डितपुरंदरस्यामुष्य हीरकुमारस्य जडेन मूर्खेण डलयोरैक्याज्जलेन पानीयेन सममाश्लेषणं संगमनं कथं केन प्रकारेण सांप्रतं युक्तम् । अपि तु न कथमपीति । पण्डितो हि मूर्खसङ्गं कदापि न कुर्यादिति ख्यातिः । 'मूरखसरिसी गोठडी पगि पगि कर न बुधीज' इति सूक्तोक्तेः ॥

काञ्चनप्रतिमयेव नितान्तोत्तेजनादनुपमप्रभयास्य ।
मार्जनान्मृदुलगन्धदुकूलैर्निर्मलेन वपुषा पुपुषे श्रीः ॥ ९८ ॥

मृदुलानि कोमलानि गन्धेनोपलक्षितानि दुकूलानि क्षौमानि गन्धकाषाय्यः तैर्मार्जनान्निर्नीरीकरणाद्रुक्षणान्निर्मलेन शुचिना अस्य कुमारस्य वपुषा देहेन श्रीः शोभा पुपुषे पुष्टा कृता । उत्प्रेक्ष्यते—काञ्चनप्रतिमयेव यथा सुवर्णमूर्त्या नितान्तमतिशयेनोत्तेजनादुद्दीपनान्निर्मलीकरणादनुपमा असाधारणा प्रभा कान्तिर्यस्यास्तादृशी श्रीः पुष्यते ॥

तत्कलाकुशलमानववर्गस्तं प्रसाधयितुमारभते स्म।
स्वस्तरूनिव निपातयितुं श्रीगर्वपर्वतशिखामधिरूढान् ॥ ९९ ॥

तस्य प्रसाधनस्य मण्डनस्य कलायां विज्ञाने कुशलश्चतुरः। 'तथैव तत्कालमथानुजीविभिः प्रसाधनासञ्जनशिल्पपारगैः। निजस्य पाणिग्रहणक्षणोचिता कृता नलस्यापि विभोर्विभूषणा ॥' 'विभूषणा प्रसाधना कृता' इति नैषधे, तद्वृत्तौ च। इति पुरुषस्यापि प्रसाधना दृश्यते। मानवानां मनुष्याणां वर्गः समुदायः तं कुमारं प्रसाधयितुं मण्डयितुमंशुकाभरणादि परिधापयितुमारभते स्म उपक्रामति स्म। उत्प्रेक्ष्यते—श्रीणां विशिष्टशोभानां यो गर्वोऽहंकारः स एव पर्वतो गिरिस्तस्य शिखाम्। उपरितनभूमीशिखरमित्यर्थः। तामधिरूढानध्याश्रितान् स्वस्तरून् कल्पवृक्षान् निपातयितुमधःक्षेप्तुं जेतुमिव ॥

सान्द्रचन्द्रनिकुरम्बकरम्बीभूतनूत(त्न)घुसृणद्रवचर्चा।
तत्तनौ विलसति स्म सुमेरौ चन्द्रिकाखचितसांध्यरुचीव ॥ १०० ॥

सान्द्राः स्निग्धा बहला वा ये चन्द्राः कर्पूरास्तेषां निकुरम्बः समूहस्तेन करम्बीभूतो मिश्रो जातो यो नूतो(त्नो) नवीनो घुसृणानां कुङ्कुमानां द्रवो बहलपङ्कः तस्य चर्चा विलेपनम्। 'चन्द्रो विधौ च कर्पूरे स्वर्णे च' इत्यनेकार्थः। तस्य कुमारस्य तनौ काये विलसति स्म शुशुभे। केव। चन्द्रिकाखचितसांध्यरुचीव। यथा सुमेरौ सुराचले चन्द्रज्योत्स्नया मिश्रिता संध्यासमयसंबन्धिनी कान्तिः। [सांध्यराग इत्यर्थः।] शोभते। 'रुच्यो रुचीभिर्जितकाञ्चनाभिः' इति नैषधे रुचीशब्दो दीर्घोऽप्यस्ति ॥

सौरभं सुमनसां समुदायोऽध्यापयेद्यदि महारजतस्य।
अङ्गरागललिताभकमूर्तेस्तल्लभेत तुलनां कलयापि ॥ १०१ ॥

सुमनसां कुसुमानां समुदायः सर्वजातिजातपुष्पप्रकरः यदि महारजतस्य सुवर्णस्य सौरभं सुगन्धितां स्वपरिमलमध्यापयेत् पाठयेत् शिक्षयेत्। दद्यादित्यर्थः। विद्याप्रदानं हि अध्यापननिजामोदं दत्ते। तत्तदा अङ्गरागेण श्रीखण्डविलेपनेन ललिताया मनोज्ञाया अर्भकस्य हीरकुमारस्य मूर्तेः शरीरस्य कलया अंशेनापि तुलनां सदृशीभावं लभेत प्राप्नुयात्। महारजतमित्यर्थः ॥

विश्वजैत्रमिव मोहमहीन्द्रं हन्तुमर्भधरणीरमणेन।
खङ्गरत्नमिव केशकलापो धूपधूमपटलीभिरधूपि ॥ १०२ ॥

अर्भो हीरकुमारः स एव धरणीरमणो राजा तेन केशकलापः केशपाशः धूपस्य कृष्णागुरुकुन्दरुष्कतुरुष्कप्रमुखसुगन्धवस्तुनः धूमपटलीभिर्धूमश्रेणीभिरधूपि धूपितः सुगन्धीकृतः। वासित इत्यर्थः। उत्प्रेक्ष्यते—विश्वेषां सुरासुरोरगनराणां जैत्रं जयनशीलं मोहनामानं महीन्द्रं राजानं हन्तुं व्यापादयितुमिव खङ्गरत्नं धूपितम्। राज्ञापि वैरिणं व्यापादयितुं स्वखङ्गरत्नं धूप्यते इति रीतिः ॥

स्वं क्षणात्क्षयमवेक्ष्य सृजद्भिः पारलौकिकसुखाय तपांसि ।
धूमपानमिव धूपजधूमव्याजतस्तदलकैः क्रियते स्म ॥ १०३ ॥

तदलकैः कुमारस्य केशैः । उत्प्रेक्ष्यते—धूपात् केशधूपनाद्यो जातो धूमस्तस्य व्याजात्कपटेन धूमपानमिव क्रियते विधीयते । किं कुर्वद्भिः । परलोके भवत्पारलौकिकं तच्च तत्सुखं च तस्मै तदर्थं कष्टानि तपांसि सृजद्भिः कुर्वद्भिः । किं कृत्वा । क्षणात्स्वल्पकालात्स्वमात्मीयं क्षयं विनाशं लोचलक्षणमवेक्ष्य ज्ञात्वा ॥

मानिनीजनमनोनयनस्वं यैरनीयत हृतेर्विषयत्वम् ।
पारिपन्थिकभरैरिव लेभे बन्धनं किमिति तच्चिकुरैस्तैः ॥ १०४ ॥

तैस्तस्य कुमारस्य चिकुरैः केशैः । [उत्प्रेक्ष्यते—] इति पश्यतोहरत्वाद्धेतोर्बन्धनं नियन्त्रणं लेभे प्राप्तम् । कैरिव । पारिपन्थिकभरैरिव । यथा तस्करगणैश्चौरिकाकरणाद्बन्धनं प्राप्यते । तैः कैः । यैश्चिकुरैर्मानिनीजनानां नागरिककामिनीलोकानां मनांसि हृदयानि तथा नयनानि विलोचनानि तान्येव स्वं विभवो हृतेरपहरणस्य विषयत्वं गोचरताम् । 'मन्ये न मे श्रवणगोचरतां गतोऽसि' इति कल्याणमन्दिरस्तवने । अनीयत लम्भितं प्रापितम् । अपहृतमित्यर्थः ॥

सूनसंगतशिलीमुखलेखासूनसायकधनुःशरराशेः ।
संश्रयञ्छ्रियमिवार्भकमल्लीकुड्मलाकलितकुन्तलहस्तः ॥ १०५ ॥

अर्भकस्य हीरकुमारस्य मल्ल्या मल्लिकायाः कुड्मलाः कोरकाः । 'मल्लीभिः प्रतिमल्लीभावं दधती विभाति भावत्की' इति राजवर्णने । तैराकलितो युक्तो यः कुन्तलहस्तः केशपाशः सूनेषु कुसुमेषु संगता मकरन्दपानार्थमागता ये शिलीमुखा भ्रमरास्तेषां लेखा श्रेणिः सैव सूनसायकस्य धनूंषि कार्मुकाणि शरा बाणास्तेषां राशेः समूहस्य श्रियं शोभां श्रयन्निवास्तीत्युत्प्रेक्षा ॥

मूर्ध्नि तस्य मुकुटेन दिदीपेऽनर्घ्यरत्नपटलीललितेन ।
बर्हचामरजयं चिकुराणां विभ्रमैरिव विधाय धृतेन ॥ १०६ ॥

तस्य कुमारस्य मूर्ध्नि मस्तके मुकुटेन किरीटेन दिदीपे रेजे । किंभूतेन । अनर्घ्याणां बहुमूल्यानां रत्नानां विविधमणीनां पटली श्रेणी तया ललितेन मनोज्ञेन । उत्प्रेक्ष्यते—चिकुराणामर्थात्कुमारकेशानां विभ्रमैः शोभाभिः । 'आभा राढा विभूषा श्रीरभिख्याकान्तिविभ्रमाः' इति हैम्याम् । विलासैर्वा । बर्हाणि मयूरपिच्छानि । 'अस्य वाकेका पिच्छबर्हशिखण्डकम्' इति हैम्याम् । तथा चामराणि बालव्यजनानि तेषां जयं पराभवं विधाय कृत्वा धृतेनेव कलितेनेव ॥

पट्टिकार्भकविभोः कनकस्यालीकमण्डलमलंकुरुते स्म ।
विभ्रमेण चिहुराम्बुधराणां ह्रादिनीव निकटे विलुठन्ती ॥१०७॥

कनकस्य हेम्नः पट्टिका भूषणविशेषः कोऽपि ललाटस्य । नलस्य भाले पट्टिका । तथा दमयन्त्या अपि । 'धृतैकया हाटकपट्टिकालके' । स्त्रीपुरुषयोरपि पट्टिकाख्य आभरणविशेषः–इति नैषधे । अधुना तु स्तम्भतीर्थद्वीपादौ लोकप्रसिद्ध्या 'असावउ' इति ज्ञायते । तदपि बहुतिलकमयं ललाटाभरणमर्भकविभोः कुमारेन्द्रस्य अलीकमण्डलं भालस्थलमलंकुरुते स्म भूषयामास । उत्प्रेक्ष्यते—चिहुराः केशाः एवाम्बुधरा मेघास्तेषां भ्रमेण भ्रान्त्या बुद्ध्या निकटे समीपे विलुठन्ती तिष्ठन्ती मिलन्ती च ह्लादिनी विद्युदिव । 'चिकुराश्चिहुरा' इति शब्दप्रभेदे ॥

दिद्युते मणिकरम्बितयास्ये शातकुम्भकृतपट्टिकयास्य ।
[1]स्वैरमात्मन इवाननलक्ष्म्या निर्मितेन वरणेन निवस्तुम् ॥ १०८ ॥

अस्य कुमारस्य आस्ये मणिभिः रत्नैः करम्बितया खचितया शातकुम्भेन कनकेन कृतया निर्मितया पट्टिकया दिद्युते । उत्प्रेक्ष्यते—आत्मनः स्वस्य स्वैरं स्वेच्छया निवस्तुं वासार्थं स्थातुमाननलक्ष्म्या निर्मितेन रचितेन वरणेन प्राकारेणेव । प्राकारस्यार्थोऽग्रे वक्ष्यते । तस्मादन्यापतद्वयी(?) ॥ पाठान्तरे उत्प्रेक्ष्यते—मुखस्यार्थात्कुमारवक्त्रस्य इन्दुश्चन्द्रः, पद्मानि कमलानि, मुकुरा दर्पणास्तेषामभिभावेन पराभवनेन उद्भूतं साक्षात्प्रकटीभूतं नूतं नवीनं महः प्रतापस्तेनेव वा ॥

भालमण्डलममण्ड्यत राजज्जातरूपतिलकेन तदीयम् ।
तस्थुषात्र चरणक्षणवीक्षाकाङ्क्षिणाल्पवपुषांशुमतेव ॥ १०९ ॥

भालमण्डलं ललाटपट्टः राजन् शोभमानः जातरूपस्य स्वर्णस्य तिलविशेषकस्तिलकः तेनामण्ड्यत भूषितम् । उत्प्रेक्ष्यते—चरणस्य चारित्रस्य क्षणो महोत्सवः तस्य वीक्षां दर्शनं काङ्क्षतीत्येवंशीलेन अभिलाषुकेण, तथा अल्पं लघु वपुः शरीरं यस्य तादृशेनात्र भाले तस्थुषा अर्थात्समेत्य स्थितवता अंशुमता भास्करेणेव ॥

यस्य भालतलचन्दनबिन्दोर्दम्भतो वदनकैरवबन्धुः ।
कोपनां प्रियतमामिव तारामानुकूल्यविधये व्यधिताङ्के ॥ ११० ॥

यस्य कुमारस्य वदनकैरवबन्धुर्वक्त्रचन्द्रमा भालतले ललाटे कृतः श्रीखण्डस्य मण्डलाकारतिलकबिन्दुः तस्य दम्भतश्छलात्कोपनां चण्डामत्यमर्षणां तथा प्रियतमामतिशयेन वल्लभां तारां कामपि कान्तां तारिकाम् । तस्य तारापतित्वात् । उत्प्रेक्ष्यते—आनुकूल्यविधये स्वानुकूलीकरणप्रकाराय अङ्के निजोत्सङ्गे व्यधित कृतवानिव । 'अचुम्बि या चन्दनबिन्दुमण्डली नलीयवक्त्रेण' इति नैषधेऽपि ॥

यस्य चान्दन उपभ्रु बभासे बिन्दुरङ्गजभटं प्रणिहन्तुम् ।
नासिकानलिकया गुलिकेयं येन मोक्तुमनसा विधृतेव ॥ १११ ॥

---

1. 'इन्दुपद्ममुकुराद्यभिभावोद्भूतनूतमहसेव मुखस्य' इति पाठान्तरम्.

यस्य कुमारस्य उपभ्रु भुवोर्मध्ये समीपे चान्दनश्चन्दनसंबन्धी विन्दुर्वृत्ततिलकं बभासे शोभते स्म । उत्प्रेक्ष्यते—अङ्गजः स्मरः कमनः । 'कलाकेलिरनन्यजोऽङ्गजः' इति हैम्याम् । तथा 'अङ्गजो मन्मथे सुते । मदे केशे' इत्यनेकार्थः । स एव भटो वीरस्तं प्रणिहन्तुं यमातिथिं कर्तुं नासिकैव नलिकागुलिकाक्षेपणोपकरणं 'बन्दूकहाथनाली' इति लोकप्रसिद्धा । तथा 'नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः' इति नैषधे । नासा नलिकेव । तया कृत्वा मोक्तुमनसा क्षेप्तुकामेन इयं प्रत्यक्षलक्ष्या गुलिकेव । धृता । 'सीसागोली' इति प्रसिद्धा ॥

चापलस्य नियमोऽभ्युपगम्योऽतःपरं द्युनिशमत्र युवाभ्याम् ।
एतदालपितुमञ्जनरेखा कल्पिता नयनयोरिव तस्य ॥ ११२ ॥

तस्य हीरकुमारस्य नयनयोर्नेत्रयोरञ्जनस्य कज्जलस्य रेखा कल्पिता । लोचने अञ्जिते इत्यर्थः । बालत्वादथ वा महोत्सवान्निर्मिता रेखा । किं च विवाहादौ तरुणानां वृद्धानां पुरुषाणामपि चक्षुषोरञ्जनरेखा क्रियते इति लोकरूढिरपि स्थितिश्च । उत्प्रेक्ष्यते—एतदत्रैव कथ्यमानमालपितुं वक्तुमिव । तदेवाह—हे नयने, अतःपरम् अद्यतनदिवसादारभ्य द्युनिशं दिवारात्रौ चापलस्य चटुलताया नियमो निषेधः युवाभ्यामभ्युपगम्यः अङ्गीकरणीयः । कदाचिदपि चापल्यं न विधेयमिति भावः ॥

उत्पलाब्जकुमुदादिमदस्यून्यद्विलोचननृपौ परिभूय ।
सालयोः सुखमिवाञ्जनरेखानीलरत्नकृतयोर्वसतः स्म ॥ ११३ ॥

यस्य कुमारस्य विलोचने नयने एव नाम्नी ययोस्तौ तादृशौ नृपौ राजानौ उत्पलं नीलकमलं अब्जं पद्मं कुमुदं श्वेतकमलं तान्यादिमानि प्रथमभवानि येषां तादृक्षान् दस्यून् विपक्षान् परिभूय जित्वा अञ्जनरेखारूपैर्नीलरत्नैर्हरिन्मणिभिः कृतयोः सालयोः सुखं यथा स्यात्तथा क्रियाविशेषणम् । उत्प्रेक्ष्यते—वसतः स्म अतिष्ठतामिव ॥ अथ वा । यद्विलोचननृपौ कुमारनयननामराजौ सालयोः प्राकारयोर्मध्ये सुखं शर्मणा यथा स्यात्तथा वसतः तिष्ठतः स्म । किंभूतयोः सालयोः । अञ्जनरेखारूपाणि यानि नीलरत्नानि मरकतमणयः तैः कृतयोर्निष्पादितयोः । उत्प्रेक्ष्यते—उत्पलानि कुवलयानि अब्जानि कमलानि कुमुदानि कैरवाणि तान्यादिमानि प्रथमानि येषां तादृक्षान् दस्यून् शत्रून् परिभूय निर्जित्येव सुखं वसतः । येन सर्वेऽप्यरयोऽभिभूय वशीकृताः स सुखं वसतीति ॥

भृङ्गसंगतवतंससरोजे तस्य कर्णयुगले शुशुभाते ।
विग्रहीतुमनसी नयनाभ्यामागते किमितरेतरवैरात् ॥ ११४ ॥

तस्य कुमारस्य कर्णयुगले श्रवणद्वन्द्वे भृङ्गाभ्यां मधुपानागतभ्रमराभ्यां संगते संयुक्ते वतंससरोजे कर्णपूरकमले शुशुभाते रेजतुः । उत्प्रेक्ष्यते—इतरेतरेण परस्परं वैराद्विरोधान्नयनाभ्यां नेत्राभ्यां सार्धं विग्रहीतुमनसी योद्धुकामे किमागते पार्श्वे संप्राप्ते ॥

श्रोत्रपत्रयुगमाश्रितवत्या दिद्युते मणिवतंसिकयास्य ।
अर्चिषेव वदनान्तरमान्त्या पिण्डभावमितया स्थितयास्मिन्॥११५॥

अस्य कुमारस्य श्रोत्रे कर्णावेव पत्रे तयोर्युगं द्वन्द्वमाश्रितवत्या भजन्त्या मणिवतंसिकया रत्नोत्तंसेन । 'विदर्भपुत्रीश्रवणावतंसिका' इति नैषधे । दिद्युते शोभितम् । उत्प्रेक्ष्यते—वदनान्तर्मुखमध्ये अमान्त्या बाहुल्यात्स्थातुमशक्नुवत्या अर्चिषा कान्त्येव । अर्चिः कान्तिवाची । स्त्रीक्लीबलिङ्गः । 'रोदोर्चिषीनामगुणलयट अयट्' इति लिङ्गानुशासने । किंभूतया अर्चिषा । पिण्डभावं पिण्डतामितया प्राप्तया । पिण्डीभूय स्थितयेत्यर्थः । पुनः किंभूतया । अस्मिन् कुमारकर्णे स्थितया वसन्त्या ॥

मन्महे सकलशीतलभासां सार्वभौममिदमाननचन्द्रम् ।
कुण्डलच्छलतमीरमणाभ्यामन्यथा कथमुपास्यत एषः ॥ ११६ ॥

इदमाननचन्द्रममुष्य मुखमेव चन्द्रं विधुं सकलाः समस्ता ये शीतलभासः चन्द्रमसः तेषां सार्वभौमव्यतिकरेण कुण्डलयोः कर्णाभरणयोः छलात्कपटात्तमीरमणाभ्यां चन्द्राभ्यामेष इदमाननचन्द्रः कथं केन प्रकारेण उपास्यते सेव्यते ॥

कुण्डले कलयती[1] प्रतिबिम्बे गण्डयोर्वहति हीरकुमारः ।
क्रोधमुख्यचतुरात्मविपक्षान्भेत्तुकाम इव चक्रचतुष्कः ॥ ११७ ॥

हीरकुमारः कुण्डले कर्णवेष्टिके वहति धारयति । कुण्डले किं कुर्वती । गण्डयोः कुमारस्यादर्शोपमगल्लयोः कपोलयोः प्रतिबिम्बे प्रतिमे कलयती[2] बिभ्रती । उत्प्रेक्ष्यते—क्रोधः कोपो मुख्यः प्रकृष्टः प्रथमो वा येषु तादृशाः । क्रोधमानमायालोभाभिधानाश्चत्वारः चतुःसंख्याकाः कषाया एवात्मनः स्वस्य विपक्षाः शत्रवस्तान् । चतुःकषायद्वेष्यानित्यर्थः । भेत्तुकामो वैरादेककालमेव हन्तुमनाः सन् चक्राणामायुधविशेषाणां चतुष्कं चतुष्टयमिव बिभर्ति ॥

व्यालवल्लिदलखण्डनजन्मा शोणिमाधरदले विललास ।
एतदीयहृदयादनुरागो निःसरन्बहिरिव स्थित एषः ॥ ११८ ॥

अधरदले कुमारस्याधरोष्ठपत्रे शोणिमा रक्तता । 'वर्णदृढादिभ्यः ष्यञ्च' । वर्णविशेषार्थेभ्यो दृढादिभ्यश्च ष्यञ् स्यात्, इमनिज्वा भावार्थे । 'शौक्ल्यं शुक्लिमा, दार्ढ्यं द्रढिमा, लावण्यं लवणिमा।' इति प्रक्रियाकौमुद्याम् । विललास बभासे। किंभूतः शोणिमा। व्यालवल्ल्या नागरवल्ल्या । 'ताम्बूलवल्ली ताम्बूली नागपर्यायवल्ल्यपि' इति हैम्याम् । दलानां पत्राणां खण्डनाच्चर्वणाज्जन्मोत्पत्तिर्यस्य । उत्प्रेक्ष्यते—एतदीयात्कुमारसंबन्धि हृदयान्मनसः । 'हृदयं मनो वक्षश्च स्तनान्तरं हृत् हृदयम्' । तथा 'हृच्चेतो हृदयं चित्तम्' इति द्वयमपि हैम्याम् । निःसरन्निर्गच्छन्नेष प्रत्यक्षो बहिःप्रदेशे अधरोष्ठे स्थित इव ॥

१-२. कलयती इति नुम्रहितः प्रयोगः 'शप्श्यनोर्नित्यम्' इति सूत्रविरुद्धः.

रागसङ्गिरदनच्छदराजत्तत्स्मितं दशनदीधितिमिश्रम् ।
पल्लवोदरविहारिहिमाम्भोविभ्रमं किमु जिघृक्षति लक्ष्म्या ॥११९॥

रागस्य नागवल्लीदलास्वादनजनितरक्ततायाः सङ्गोऽस्त्यस्य तादृक् यो रदनच्छद ओ-ष्ठस्तत्र राजद्दीप्यमानं यत्तत्स्मितं प्रमोदमेदुरतया ईषन्मात्रं कुमारस्य हसितं तत्कर्तृपदं लक्ष्म्या स्वशोभया महर्घ्या वा । उत्प्रेक्ष्यते—पल्लवोदरे प्रवालमध्ये विहरति एवंशीलं हिमाम्भस्तुहिनजलं तस्य विभ्रमं श्रियं विलासं वा किमु जिघृक्षति ग्रहीतुमिच्छतीव । किंभूतम् । तत्स्मितं दशनानां दन्तानां दीधित्या कान्त्या मिश्रं करम्बितम् ॥

रज्यते स्म दशनप्रकरेणामुष्य कुण्डलिपुरंदरबाहोः ।
रागिणीं सविधगां च रसज्ञां प्रेक्ष्य कैर्न ध्रियते ह्यनुरागः ॥१२०॥

अमुष्य कुमारस्य दशनप्रकरेण दन्तवृन्देन रज्यते स्म रक्तीभूतम् । सरागीभूयते । बालानां दन्ता हि यावकपुस्तिकया रज्यते स्म स्त्रीणां चेति लोकस्य व्यवस्था । किंभू-तस्य अमुष्य । कुण्डलिनां भोगिनां पुरंदरो वासवः शेषनागेन्द्रस्तद्वद्दीर्घौ बाहू भुजौ यस्य । यद्रक्तीभूतं तद्युक्तमेव । तदेव दर्शयति—हि यस्मात्कारणात्सविधगां पार्श्ववर्तिनीं समीपस्थायुकां रागिणीं रागो रक्तिमा अनुरागोऽन्तरङ्गस्नेहश्च तेन कलितां रागवतीं तथा रसानास्वादान् । तिक्तः कटुकषायाम्ललवणमधुराख्यान्, अथ वा शृङ्गारहास्य-करुणारौद्रवीरभयानकबीभत्साद्भुतशान्तनामकान्नवप्रमाणान् रसान् जानातीति रसज्ञा तां प्रेक्ष्य दृष्ट्वा । कैः । पुंभिः अनुरागो न ध्रियते, अपि तु विविधरसेषु निपुणां रागवर्तीं पार्श्वस्थायिनीं कामिनीं विलोक्य सर्वैः कामुकै रागो ध्रियत एव । तत्त्वतस्तु रसज्ञा जिह्वा ॥

संयमाध्यवसितिप्रथमानप्रावृषेण्यजलवाहघटायाः ।
बिन्दुवृन्दमुदियाय किमेतत्कण्ठपीठकृतमौक्तिकहारः ॥ १२१ ॥

एतस्य कुमारस्य कण्ठपीठे गलकन्दले कृतः स्थापितः । परिहित इत्यर्थः । मौक्तिक-हारो मुक्तालता । स उत्प्रेक्ष्यते—बिन्दुवृन्दं कणनिकर इवोदियाय प्रकटीभूतम् । कस्याः । संयमस्य चारित्रस्य या अध्यवसितिरध्यवसायः परिणामः सैव प्रथमाना विस्तरन्ती प्रावृषेण्या वर्षाकालसंबन्धिनी जलवाहानां वर्षणोन्मुखमेघानां घटा माला तस्याः ॥

एतदीयवदनामृतभासा स्पर्धयेव सह शीतलभासा ।
नूततारकततिर्ध्रियते स्मामुक्तमौक्तिकलताकपटेन ॥ १२२ ॥

एतदीयेन हीरकुमारसंबन्धिना वदनामृतभासा वक्त्रविधुना नूता नवीना तारक-ततिर्ज्योतिर्मण्डला ध्रियते स्म बिभरांबभूवे । केन । आमुक्ता कण्ठपीठे स्थापिता परिहिता या मौक्तिकलता मुक्ताकलापः स्थूलमुक्ताफलहारः तस्य कपटेन छलेन । उत्प्रेक्ष्यते—शीतलभासा गगनाङ्गणस्थायुकस्वाभाविकचन्द्रेण सह सार्धं स्पर्धया संघ-र्षेण ईर्ष्ययेव धृता इत्यर्थः ॥

भारसासहितया जितशेषः किं श्रितो वलयमस्य विभाति।
मोहशूरमसुभिः प्रवियोज्यानेन वीरवलयं विधृतं वा॥ १२३॥

अस्य हीरकुमारस्य वलयं कनककटकः विभाति। उत्प्रेक्ष्यते—भारस्य क्षमादेर्भाविनि भूतोपचारात्सूरिपदादेर्वा सासहितया सहनशीलत्वेन। भृशं सहते इति सासहिः। 'अहिर्महीगौरवसासहिर्यः' इति नैषधे। सासहिश्चाचलिः पापतिर्वावदिरित्यादय इकारान्ता निपातिताः—इति तद्वृत्तिः। जितः पराभूतः शेषो नागेन्द्रः। किं संश्रितः। अथ वा मोहनामानं वीरं सुभटमसुभिः प्राणैः प्रवियोज्य पृथक्कृत्वा। निहत्येत्यर्थः। वीरवलयं सुभटत्वसंसूचकः कटको विधृतं धारितमिव वा॥

योगिनेव दधतात्मनि मुद्रामूर्मिकां च दधताम्बुधिनेव।
फुल्लपल्लवविलासजुषा तत्पाणिनाध्रियत कापि विभूषा॥ १२४॥

तत्पाणिना कुमारहस्तेन काप्यपूर्वा अनिर्वचनीया शोभा अध्रियत धृता। किंभूतेन तत्पाणिना। फुल्ला विनिद्रीभूता ये पल्लवाः किसलयानि तेषां विलासं लीलां जुषते भजते। तत्पाणिना किं कुर्वता आत्मनि स्वस्मिन्विषये मुद्रां साक्षरोर्मिकां वहता। केनेव। योगिनेव। यथा योगभाजा मुनिना आत्मनि विषये योगमुद्रा उह्यते। 'मुद्रातो लभते मूल्यं विमुद्रः कार्यनाशकः। राजा मुनिश्च लेखश्च कोशो मुष्टिश्च पञ्चमः॥' इयं तु स्वाभाविकी मुद्रा च पुनर्वाङ्मनसां योगो रुन्धनं नियन्त्रणं विद्यते यस्य स मुनिर्मुद्रामिङ्गिताकारविशेषम्। पुनः किंभूतेन। दधता बिभ्रता। काम्। ऊर्मिकां निरक्षरमङ्गुलीयकम्। केनेव। अम्बुधिनेव। यथा समुद्रेण ऊर्मय एवोर्मिकास्तरङ्गा धीयन्ते॥

पाणिना विरुरुचे पविरोचिश्चापचक्रविलसत्कटकेन।
गन्धसिन्धुरतुरङ्गशताङ्गालंकृतेन जगतीपतिनेव॥ १२५॥

पाणिना अर्थादधिकाराद्वा कुमारहस्तेन जगत्याः पृथिव्याः पत्या भर्त्रेव राज्ञेव विरुरुचे क्षोभितम्। किंभूतेन पाणिना राज्ञा च। पवीनां वज्ररत्नानां रोचींषि कान्तय एव चापचक्राणि धनुर्मण्डलानि तैर्विलसन् दीप्यमानः कटको वलयं यस्य। 'वृता विभूषा मणिरश्मिकार्मुकैः' इति नैषधे। तथा विविधरत्नप्रभासंवलितं शक्रधनुरिति कविसमये प्रसिद्धिः—इति नरहर्याम्। अथ च वज्रनामा आयुधविशेषस्तथा कान्तियुक्तैर्धनुश्चक्रैः प्रहरणैश्च विस्फुरद्भिशेषेण प्रतिपक्षलक्षपराभवनप्रकारेण विशिष्टतया स्वस्वामिभक्तिमत्त्वेन वा स्फुरदितस्ततो जिष्णुतया भूमण्डलं स्वस्वाम्यायत्तं कुर्वन् कटकं सैन्यं यस्य। पुनः किंभूतेन। गन्धसिन्धुरतुरङ्गशताङ्गालंकृतेन अर्थादाकृतिभूतैः गन्धसिन्धुरो गन्धहस्ती तथा तुरङ्गः सपर्याणिताश्वः तथा शताङ्गो रथस्तैरलंकृतेन विविधलक्ष्मीभूतैर्विभूषितेन। पक्षे गन्धगजेन्द्रा विविधजातीयवाजिनः पुष्परथ-योग्यारथ-अध्वरथ-कर्णीरथ-प्रमुखरथास्तैरलंकृतेन कलितेन॥

रामणीयकहृतापरचित्तं तत्कलत्रमवलोक्य युवेव।
जातरूपकलितो गुणशाली शृङ्खलः किमकरोत्परिरम्भम् ॥१२६॥

तस्य कुमारस्य कलत्रं कटीम्, अर्थध्वनिना स्त्रियं वा, अवलोक्य दृग्गोचरीकृत्य। उत्प्रेक्ष्यते—शृङ्खलः। 'सा शृङ्खला पुंस्कटिस्था'। शृङ्खलशब्दस्त्रिलिङ्गः। रत्नजटितकनकघटितकटिदवरकः परिरम्भमालिङ्गनमकरोत्किमु आलिङ्गति स्मेव। क इव। युवेव। यथा तरुणः पुमान् कस्यापि लघोः प्रौढीभूतं कलत्रं युवतीं परिरम्भते। किंभूतं कलत्रम्। रामणीयकेन रमणीयत्वेन स्वाभाविकसौन्दर्येण हृतानि स्ववशीकृतानि अपरेषां लक्षप्रेक्षकलोकानां कामिनां च चित्तानि मनांसि येन। किंभूतः शृङ्खलो युवा च। जातरूपेण सुवर्णेन कलितो हिरण्मयः। तथा जातमुत्पन्नं यदद्वैतं रूपं वपुःसुन्दरता तेन युक्तश्च। पुनः किंभूतः। गुणैः सुवर्णदवरकैः हेमतन्तुभिः शालन्ते इत्येवंशीलस्तैर्ग्रथितत्वात्। तथा गुणैरौदार्यादिभिः शृङ्गारादिभिर्वा द्वासप्ततिकलागुणैर्वा शोभते इत्येवंशीलः॥

भूषणैः कनकरत्ननिबद्धैर्भूषितो व्यरुचदेष कुमारः।
मञ्जरीभरकरम्बितकायः कल्पसाल इव भूतलशाली॥ १२७॥

एष हीरनामा कुमारः तदानीं कनकानि काञ्चनानि रत्नानि मणयस्तैर्निबद्धै रचितैर्भूषणैराभरणैः कृत्वा भूषितोऽलंकृतः व्यरुचत् विराजते स्म। 'द्युद्भ्यो लुङि' द्युतादिभ्यः परस्मैपदं वा स्यात्। 'पुष्पादिद्युतादिऌदितः परस्मैपदेषु'। श्यन्विकरणपुषादेर्द्युतादेर्ऌदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु। अद्युतत् अद्योतिष्ट। व्यरुचत् व्यरोचिष्ट।' इति प्रक्रियाकौमुद्यां साधना। उत्प्रेक्ष्यते—मञ्जरीणां कलिकानां भरः समूहस्तेन करम्बितः पूरितः कायः शाखाप्रशाखालक्षणं वपुर्यस्य तादृशो भूतले पृथ्वीपीठे शालते शोभते इत्येवंशीलः। भूमीमण्डलोपगत इत्यर्थः। कल्पसालः सुरतरुरिव॥

दर्पणेष्विव गवेषयति स्वं भूषणेषु किरणाङ्कुरितेषु।
दर्पणार्पणविधाभिरमुष्मिन्निष्फलाभिरजनि स्वजनानाम्॥ १२८॥

अमुष्मिन् हीरकुमारे स्वजनानां बन्धुवर्गलोकानाम् अथवा स्वस्य जनानामात्मीयलोकानाम्। सेवकानामित्यर्थः। दर्पणानामादर्शानामर्पणानि प्रदानानि। आत्मदर्शदर्शनानीत्यर्थः। तेषां विधाभिः प्रकारैः निष्फलाभिर्निरर्थकाभिरजनि जाता। अमुष्मिन् किं कुर्वेति। किरणैः कान्तिभिः कृत्वा अङ्कुरितेषु प्ररोहसहितेषु जातेषु भूषणेष्वाभरणेषु स्वमात्मानम्। [स्वरूपमित्यर्थः।] गवेषयति विलोकयति। केष्विव। दर्पणेष्विव। यथा कश्चिन्मुकुरेषु स्वं निभालयति॥

दीप्यते किमधिकं सुषमा नोऽमुष्य वा मुषितमन्मथकान्तेः।
भूषणानि मृगयन्त इतीव स्फाररत्ननयनैरिदमङ्गम्॥ १२९॥

भूषणानि आभरणानि । उत्प्रेक्ष्यते—स्फाराणि विकाशभाञ्जि रत्नान्येव नयनानि तैरिति हेतोरिदमङ्गं कुमारकायं मृगयन्ते पश्यन्तीव । इति किम् । नोऽस्माकं भूषणानां सुषमा अतिशयिनी शोभा किं अधिका, अथवा मुषिता अपहृता आच्छिद्य गृहीता मन्मथस्य कामस्य कान्तिः शोभा येन तादृशस्य कुमारस्य सुषमा शरीरातिशायि सौन्दर्यं किं वा अधिका दीप्यते ॥

तद्विभूषणमणीनिकुरम्बैः स्पर्धिभिः प्रतिभटैरिव भूत्या ।
प्राप्य तन्मृधधरां दधिरे स्वज्योतिरङ्कुरसुरेन्द्रधनूंषि ॥ १३० ॥

भूत्या शोभया लक्ष्म्या वा स्पर्धिभिः स्पर्धनशीलैस्तस्य कुमारस्य विभूषणानामलंकाराणां मणीनिकुरम्बै रत्नप्रकरैः तन्मृधधरां स कुमार एव संग्रामकरणोचितभूमी तां प्राप्य आसाद्य । उत्प्रेक्ष्यते—ज्योतींषि दीधितयः तेषामङ्कुराः प्ररोहास्त एव सुरेन्द्रधनूंषि इन्द्रचापचक्राणि दधिरे धृतानीव । कैरिव । प्रतिभटैरिव । यथा संपदा स्पर्धमानैः प्रतिपक्षैः शत्रुभी रणभूमीर्लब्ध्वा परस्परं संग्रामकरणे कृते सुरेन्द्रचापोपमानि कार्मुकानि ध्रियन्ते ॥

भूरुहैर्विहसितैरिव कुञ्जः सौरभैरिव सरोरुहपुञ्जः ।
सान्द्रचन्द्रकिरणैरिव दोषा भूषणैरपुषदेष विभूषाम् ॥ १३१ ॥

एष कुमारो भूषणैरलंकारैराभरणैः कृत्वा विभूषां शोभामपुषत्पुष्णाति स्म । क इव । कुञ्ज इव । यथा काननं वसन्तर्तुना विहसितैः कुसुमितैः भूरुहैर्वृक्षैः कृत्वा शोभते । पुनः क इव । सरोरुहपुञ्ज इव । यथा पद्मप्रकरः सौरभैः परिमलैः कृत्वा शोभां लभते । पुनः केव । दोषेव । यथा रजनी सान्द्रैर्नयनानन्ददायिभिर्नीरन्ध्रैश्चन्द्रस्य विधोः किरणैः रश्मिभिः कृत्वा श्रियं पुष्णाति ॥ इति दीक्षासमये कुमारशृङ्गारवर्णनम् ॥

निर्जितेन यशसा सितभासा प्राभृतीकृतमिवैत्य नमस्तः ।
आनयन्नथ तुरङ्गममुष्यारोहणार्थमनघस्य मनुष्याः ॥ १३२ ॥

अथ शृङ्गारविधानान्तरं मनुष्या मानवाः अमुष्य कुमारस्यारोहणार्थमध्यारोढुं तुरङ्गं जात्यवाजिनमानयन्नानयन्ते स्म । किंभूतस्यामुष्य । अनघस्य प्रशस्यस्य निष्पापस्य वा । उत्प्रेक्ष्यते—यशसा अर्थाद्यशःश्वैत्यश्रिया निर्जितेन पराभूतेन सितभासा चन्द्रमसा नभस्त आकाशमण्डलादेत्यागत्य प्राभृतीकृतमर्थात्कुमारस्य ढौकितमिव ॥

यन्नभस्वदतिपातिरयेन न्यक्कृतेन विनतातनयेन ।
तत्तुलां कलयितुं बलिदस्युः सेवनामगमि यानतयेव ॥ १३३ ॥

यस्य तुरगस्य नभस्वन्तं समीरणमतिपतत्यतिक्रामतीत्येवंशीलेन रयेण वेगेन । 'रयो वेगप्रवाहयोः' इत्यनेकार्थः । न्यक्कृतेन विजितेन वितानाम्नी अरुणगरुडयोर्जननी तस्यास्तनयेनात्रार्थाद्गरुडेन तत्तुलां कुमारारोहणार्थमानीततुरङ्गमवेगसादृश्यं कलयितुं

प्राप्तुम्। उत्प्रेक्ष्यते—यानतया वाहनत्वेन बलिदस्युः कृष्णः सेवनां परिचरणामगमि प्रापित इव सेव्यते स्म। 'न्यादयो ण्यन्तनिष्कर्मा गत्यर्था मुख्यकर्मणि। प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि॥' अनन्तेन कृष्णेन गोपी वनमगमि नीता। इत्युदाहरणम्' इति प्रक्रियाकौमुद्याम्॥

यो दृशा भुवि पुनर्दिवि फालैर्नागवेश्मनि खुरोत्खननैश्च।
स्फूर्तिभिस्तत इतस्त्रिजगत्यां स्वाङ्ककारमिव पश्यति जेतुम्॥१३४॥

यस्तुरङ्गमः स्फूर्तिभिर्विस्फूर्जनैः इतस्ततः संस्फुरणैः कृत्वा त्रिजगत्यां त्रिलोक्यामपि। 'त्रिजगतीं पुनती कविसेविता' इति जिनप्रभसूरिकृतर्षभनम्रस्तोत्रे। इत्यत्रैकवचनात्रिजगत्यामप्येकवचनम्। त्रित्वेन त्रित्वसंख्यया वा उपलक्षिता जगती भुवनं त्रिजगतीति एवं संभाव्यते। तत्त्वं तु तज्ज्ञा एव विदन्ति। स्वाङ्ककारं निजरंहःस्फूर्जितजैत्रप्रतिमल्लं जेतुं पराभवितुमिव इतस्ततः सर्वत्रापि पश्यति। 'दूरं गौरगुणैरहंकृतिभृतां जैत्राङ्ककारे चरति' इति नैषधे। कथं विलोकयति तदेव दर्शयति—भुवि पृथिव्यां दृशा विलोचनावलोकनेन। पुनर्दिवि गगनाङ्गणे फालैरुच्चैरुल्ललनलक्षणैः। 'सान्द्रोत्फालमिषाद्विगाहयति पदा स्प्रष्टुं तुरङ्गोऽपि गाम्' इति नैषधे। च पुनर्नागवेश्मनि पाताले खुरैः शफैरुत्खननैः भूविदारणैः॥

स्पर्धयार्कतुरगान्स्वजिगीषून्धूननेन शिरसः समराय।
अङ्ककारविभवाभिभवाहंपूर्विकाभिरयमाह्वयतीव॥ १३५॥

अयं तुरङ्गः अङ्ककारविभवानां जैत्रप्रतिमल्लसंपदाम्। 'शशाङ्ककलाङ्ककारैः' इति नैषधे। अभिभवः पराभवनं तेनाहंपूर्विका गर्वावेशास्ताभिः कृत्वा शिरसो मस्तकस्य धूननेन कम्पनेन। स्वकन्धराया अधऊर्ध्वकरणेनेत्यर्थः। उत्प्रेक्ष्यते—अर्कतुरगान् सूर्यरथरथ्यवाजिनः समराय संग्रामविधानाय आह्वयत्याकारयतीव। किंभूतानर्कतुरङ्गमान्। स्पर्धया संहर्षेण स्वस्यात्मनः स्वमात्मानं वा जिगीषून् जेतुमिच्छून्॥

आत्मफेनहरिचन्दनसान्द्रस्यन्दचर्चनविधाभिरिवार्चा।
पत्प्रहारभवमम्बुधिनेमेः स्वापराधमधरीकुरुते यः॥ १३६॥

यः अर्वा तुरगः अम्बुधिनेमेर्भूमेः। उत्प्रेक्ष्यते—पदां चरणानां प्रहारैर्घातैः ताडनैर्भवं 'पत्कजमिति' दर्शनात्पत्प्रहारैरिति। अथ च। 'क्व तच्छयच्छायलवोऽपि पल्लवे' इति नैषधे। पदो लवः पल्लवः इति व्युत्पत्त्या तस्य नलस्य छायाया लवोऽप्यंशः क्व' इति तद्वृत्तौ। स्वापराधं निजमन्तुमधरीकुरुते शामयतीव। काभिः। आत्मनः फेना मुखलालास्तद्रूपा हरिचन्दनस्य श्रीखण्डस्य सान्द्राः स्निग्धा ये स्यन्दा रसा द्रवा वा तैश्चर्चनविधाभिः पूजनप्रकारैः॥

वृत्रशात्रवतुरङ्गममुख्यान्वैभवेन परिभूय तुरङ्गान्।
स्कन्धकेसरसटाकपटात्तच्चिह्नचामरमिवायमधत्त ॥ १३७ ॥

स्कन्धस्यांसस्य स्कन्धेंऽसे वा प्ररूढानां प्रादुर्भूतानां केसराणां केशानां सटा श्रेणी केसरनामानः सटास्तुरगस्कन्धकुन्तलाः तत्कपटादयं तुरङ्गः। उत्प्रेक्ष्यते—तस्य जयस्य चिह्नं लक्षणं चामरं वालव्यजनमधत्त बिभर्ति स्मेव। किं कृत्वा। वैभवेन स्वलक्ष्म्या वृत्रशात्रवस्य शक्रस्य तुरङ्गम उच्चैःश्रवाः स एव मुख्यः प्रकृष्टः प्रथमो वा येषु तादृशांस्तुरङ्गान् परिभूय जित्वा ॥

रोहिणीकमलिनीरमणाश्वान्स्वोपरिस्थितिजुषः सुषमाभिः।
निर्जिगीषुरिव निर्जरमार्गे फालकेलिमयमातनुते स्म ॥ १३८ ॥

अयमश्वः निर्जरमार्गे आकाशे फालकेलिमुच्चैरुल्ललनस्य विशेषस्य विलासमातनुते स्म। उत्प्रेक्ष्यते—स्वस्यात्मन उपरि ऊर्ध्वं स्थितिं स्थानं जुषन्ते भजन्ते। ऊर्ध्वगामित्वेन आकाशगमनशीलत्वेन निजोपरिस्थितानित्यर्थः। तादृशान् रोहिण्याः कमलिन्याश्च रमणयोर्भर्त्रोः चन्द्रसूर्ययोः अश्वास्तुरङ्गमास्तान् सुषमाभिः अतिशायिशोभाभिः कृत्वा निर्जिगीषुर्निर्जेतुमिच्छुरिव ॥

अर्जितानि गरुडस्य च गत्या निर्जयैर्हरिहरैश्च विभूत्या।
उद्गिरन्निव यशांसि हरिर्यः फेनपिण्डपटलीकपटेन ॥ १३९ ॥

यो हरिस्तुरङ्गः फेनानां मुखनिर्गतकफलालानां पिण्डा बुद्बुदाकारा गोलकास्तेषां पटली वृन्दं तस्य कपटेन व्याजेन यशांसि स्वकीर्तीरुद्गिरन्निव प्रकटीकुर्वन्निवास्ते। किंभूतानि यशांसि। गत्या पवनवेगगमनेन गरुडस्य, तथा विभूत्या स्वलक्ष्म्या हरिहरेरिन्द्राश्वस्य उच्चैःश्रवसो, निर्जयैः पराभवनैरर्जितानि संचितानि ॥

आरुरोह जितजिष्णुहयं तं श्वैत्यतः फणिपतिं च जयन्तम्।
वाजिनं कनकवैभवरा(भा)जं कैटभारिरिव नीडजराजम् ॥ १४० ॥

स कुमारो वाजिनमश्वमारुरोह अध्यासामास। किंभूतं वाजिनम्। जितोऽर्थालक्ष्म्या पराभूतो जिष्णोरिन्द्रस्य हय उच्चैःश्रवा नाम तुरगो येन तम्। पुनः किं कुर्वन्तम्। श्वैत्यतः शुभ्रिमविभ्रमात्फणिपतिं शेषनागं जयन्तं परिभवन्तम्। पुनः किंभूतम्। कनकानां काञ्चनानां वैभवः पर्याणखलीनप्रमुखभूषा तं भजतीति। क इव। कैटभारिरिव। यथा कृष्णो नीडे कुलाये 'मालो' इति प्रसिद्धे जाता नीडजाः पक्षिणस्तेषां राजा गरुडस्तमारोहति चढति। किंभूतं नीडजराजम्। जितो जिष्णुर्वासवो येन वज्रिजित्वात्। गत्या चातित्वरितगगनगमनेन हय इन्द्राश्वो येन। च पुनः किंभूतम्। फणिपतिं नागेन्द्रम्। जातिवाचित्वादेकवचनम्। सर्वनागनायकान् जयन्तं पराभवन्तम्।

तदरातित्वात् । स्वर्णशोभावन्तं स्वर्णकायत्वात् । गरुडविशेषणान्यपि ॥ इति दीक्षासमये कुमारारोहणार्थमानीततुरगवर्णनम् ॥

तत्र भावयतिनः पुलकोद्यत्कञ्चुकानणुमहः कटकोघाः ।
मुक्तिपत्तनजिघृक्षुमनस्कौत्सुक्यभाज इव राजकुमाराः ॥ १४१ ॥
भूविहारिहयवाहनशस्यानेकमूर्तय इवोत्सवपश्याः ।
वाहपृष्ठमधिरुह्य कुमारा आगमन्नपि परे जितमाराः ॥ १४२ ॥
(युग्मम्)

तत्र तस्मिन्नवसरे तस्मिन् स्थाने वा जितमाराः स्वरूपसौन्दर्याभिभूतमदनाः अपरे अन्येऽपि भावयतिनः अभिप्रायेण चारित्रवन्तः अमी पालादिमाः कुमाराः आगमन् समागताः । किं कृत्वा । वाहानां जात्यतुरङ्गाणां पृष्ठमधिरुह्य अध्यास्य । उत्प्रेक्ष्यते— उत्सवं संयममहामहं पश्यन्त्यवलोकयन्तीति तादृश्यो भूविहारिण्यः क्षोणीचारिण्यः हयवाहनस्य एवं तस्य शस्याः श्लाघ्याः रम्यास्तथा अनेका बह्वयो मूर्तयः शरीराणि इव । किंभूताः कुमाराः । (इव यथा पृथ्वीपति) पुलको रोमाञ्चः स एवोद्यन् प्रकटीभवन् कञ्चुकः संनाहो येषाम्, तथा अनणु महन्महः कान्तिः प्रतापश्च येषाम् । अथ वा अनणुभिर्बहुलैर्महोभिः किरणैः प्रतापैश्च युक्तानां कटकानां वलयानां सैन्यानामोघाः समूहाः येषाम् । पुनः किंभूताः मुक्तिः सिद्धिः सैव पत्तनं महानगरं तज्जिघृक्षु ग्रहीतुमिच्छु मनो येषाम् । समासान्तः कप् । पुनः किंभूताः । यत एव मुक्तिनगरजिघृक्षवस्तत एवोत्कण्ठां भजन्त इति । अथ वा औत्सुक्यं संयमोत्कण्ठां भजन्ते । पश्चात्कर्मधारयः । उत्प्रेक्ष्यते— राजकुमारा इव । यथा पृथ्वीपतिपुत्राः एवंविधा भवन्ति ॥

पद्मिनीप्रियतमो दिवसादौ पावकादिव सहस्रमयूखैः ।
पूरुषैर्निखिलमण्डलमध्यात्तत्क्षणादुपगतैः परिवव्रे ॥ १४३ ॥

हीरकुमारो निखिलः समस्तो यो मण्डलो गुर्जरदेशस्तस्य मध्यादन्तरालात्तत्क्षणात्स एव कुमारस्य संयमग्रहणलक्षणः क्षणः प्रस्तावः उत्सवो वा तस्माद्धेतोरुपगतैरायातैः पूरुषैर्मानुषैरुपलक्षणात्साहचर्याद्वा स्त्रीभिश्च । 'पुरुषः पूरुषो नरः' इति हैम्याम् । परिवव्रे परिवृतः । क इव । पद्मिनीपतिरिव यथा भास्वान् दिवसादौ प्रभाते पावकाद्वह्नेरुपगतैः समेतैः सहस्रसंख्याकैः किरणैः परिव्रियते । सूर्यो हि सायमस्तं गच्छन् स्वकिरणान् वह्नौ निक्षिपति । प्रभाते च गृह्णाति इति च कविसमयः । तथा च रघुवंशे— 'दिनान्ते निहितं तेजः सवित्रेव हुताशने' इति ॥

तत्र तद्व्रतमहोपगतानां मेलकः स्फुरति पञ्चजनानाम् ।
कौतुकेन निजशक्तिदिदृक्षोर्नाकिनः किमिह कायनिकायः ॥ १४४ ॥

तत्र व्यतिकरे तस्य कुमारस्य व्रतस्य संयमस्य महोत्सवे उपगतानां समागतानां पञ्चजनानां लोकानाम्। 'मर्त्यः पञ्चजनो भूस्पृक्' इति हैम्याम्। मेलकः संगमः स्फुरति। 'मेलके सङ्गसंगमाः' इति हैम्याम्। तथा 'जगत्रयीनायकमेलकेऽस्मिन्' इति नैषधे। उत्प्रेक्ष्यते—कौतुकेन कुतूहलेन कृत्वा निजस्यात्मनः। 'श्रुत्वा निजं भीमजया निरस्तम्' इति नैषधे। निजशब्देनात्मा। शक्तिं सामर्थ्यं दिदृक्षोर्द्रष्टुमिच्छोर्नाकिनः कस्यचिद्देवस्य इहास्मिन् प्रस्तावे स्थाने वा कायनिकायो देहव्रजः किमु। निकायस्तु सधर्मिणां समुदायः। 'तथास्याहेर्भूयः फगसमुचितः काययष्टीनिकायः' इति नैषधे॥

निष्पतन्मदविलोलकपोलास्तत्पुरः समचलन्द्विरदेन्द्राः।
विन्ध्यभूध्र इव निर्झरशाली जङ्गमः करणबंहिममाली॥ १४५॥

तत्पुरः हीरकुमारस्याग्रे द्विरदेन्द्रा गजराजाः समचलन् संचरन्ति स्म। किंभूताः। निष्पतन्निरन्तरं निःसरन् यो मदो दानाम्भस्तेन विलोलाश्चञ्चलाः कपोला गण्डस्थलानि येषाम्। उत्प्रेक्ष्यते—विन्ध्यभूध्र इव विन्ध्याचल इव। किंभूतः। जङ्गमः संचरन्। पुनः किंभूतः। निर्झरैर्निःसरत्सलिलैः शालते शोभत इत्येवंशीलः। पुनः किंभूतः। करणानां शरीराणां बंहिमा बाहुल्यं मलते धारयतीत्येवंशीलः। 'मलि मल्ल धारणे' धातुः। बहुरूपवानित्यर्थः॥

स्यन्दनैः स्यदविगानितवातैस्तत्पुरोऽङ्कविलसज्जनजातैः।
पुस्फुरे सुरसमूहसनाथैः क्ष्मागतैरिव मरुद्रथसार्थैः॥ १४६॥

तस्य कुमारस्य पुरोऽग्रे स्यन्दनै रथैः पुस्फुरे दिदीपे। किंभूतैः स्यन्दनैः। स्यदेन वेगेन विगानितोऽवगणितो वातः पवनो यैः। 'स्यदझाङ्कारितपत्रपद्धतिः' इति नैषधे। पुनः किंभूतैः। अङ्के क्रोडे रथोत्सङ्गे विलसन्तः शोभमाना जना मनुष्यास्तेषां जातं समूहो येषु। उत्प्रेक्ष्यते—क्ष्मागतैर्भूमण्डले समेतैः सुराणां देवानां समूहेन गणेन सनाथैः सहितैर्मरुद्रथसार्थैः निर्जररथवृन्दैरिव॥

स्वर्णपल्ययनपल्लविताङ्गास्तत्पुरः प्रविचलन्ति तुरङ्गाः।
तत्तुरङ्गविजिताः शशिभास्वद्वाजिनः किमु निषेवितुमेताः॥ १४७॥

तस्य कुमारस्याग्रे तुरङ्गाः प्रविचरन्ति। किंभूताः। स्वर्णस्य हेम्नः पल्ययनं पर्याणं तेन पल्लवितं मण्डितमङ्गं कायो येषाम्। उत्प्रेक्ष्यते—तेन हीरकुमारारोहणार्थमानीतेन तुरङ्गेणाश्वेन विजिताः स्वश्रिया पराभूताः सन्तो निषेवितुमर्थात्तमेवाश्वमुपासितुमेता आगताः। शशिनः चन्द्रस्य भास्वतः सूर्यस्य वाजिनोऽश्वा इव॥

मागधा मधुरमङ्गलवाचः प्रोच्चकैरुदचरन्पुरतोऽस्य।
आह्वयन्त इव दर्शयितुं किं दिङ्महेन्द्रनिवहं महमेनम्॥ १४८॥

मागधा मङ्गलपाठका अस्य कुमारस्याग्रतः प्रोच्चकैरतिशयेनोच्चस्वरेण मधुरा मिष्टाः श्रवणसुखकारिण्यो मङ्गलवाचः कल्याणशंसिनीर्वाणीः उदचरन् उच्चरन्ति स्म । उत्प्रेक्ष्यते—एनं महं कुमारदीक्षोत्सवं दर्शयितुं दिङ्महेन्द्रनिवहं लोकपालमण्डलम् । 'आखण्डलो दण्डधरः शिखावान् पतिः प्रतीच्याः इति दिङ्महेन्द्राः' इति नैषधे । इह पत्तनभूमौ आह्वयन्त आकारयन्त इव । किम् इवार्थे ॥

गायनैरयमगायि समेतैः स्वर्गृहात्किमिह तुम्बुरुवर्गैः ।
अभ्यषिच्यत सुधाप्यवसीये वेणुभिः श्रवसि वैणविकौघैः ॥१४९॥

अयं हीरकुमारो गायनैर्गानकर्तृभिर्जनैः अगायि गानगोचरीकृतः । उत्प्रेक्ष्यते—स्वर्गृहाद्देवलोकरूपसद्मनः सकाशादिह भूलोके पत्तने समेतैस्तुम्बुरुवर्गैः देवगायनानां समुदायैरिव अपि पुनर्वैणविकौघैर्वंशवादकवृन्दैर्वेणुभिर्वंशैः कृत्वा अदसीये कुमारसंबन्धिनि श्रवसि कर्णे सुधा पीयूषमभ्यषिच्यत सिक्ता ॥

घोषणास्य यशसामिव भेरीभाङ्कृतिर्व्यरचि कैश्चन मार्गे ।
किंनरालिरिव वैणिकपङ्क्तिसंमदात्तमुपवीणयति स्म ॥ १५० ॥

कैश्चन भेरीवादकैर्मार्गे पथि भेरीणां वादित्रविशेषाणां दुन्दुभीनां वा भाङ्कृतिर्भाङ्कारध्वनिर्व्यरचि चक्रे । उत्प्रेक्ष्यते—अस्य कुमारस्य यशसां कीर्तीनां घोषणा पटहवादनमिव । पुनर्वैणिकानां वीणावादकानां पङ्क्तिः श्रेणिः संमदात् हर्षात् तं हीरकुमारमुपवीणयति स्म वीणया गायति स्म । 'उपवीणयितुं ययौ रवेरुदयावृत्तिपथेन नारदः' इति रघौ । किमिव । किंनरालिरिव यथा किंपुरुषमालिका वीणया कृत्वा गायति गानं कुरुते ॥

साङ्गजे प्रबलमोहमहीन्द्रे प्रापिते पितृपतेरतिथित्वम् ।
यस्य चञ्चुपुटचञ्चुररावा मङ्गलध्वनितमः किमुदीर्णाः ॥ १५१ ॥

चञ्चुपुटास्तालाः कांस्यतालाः वाद्यविशेषास्तेषां चञ्चुराः मनोज्ञा रावाः शब्दा उदीर्णाः प्रकटीकृताः । ताला वादिता इत्यर्थः । अर्थान्मार्गे तालवादकैः । उत्प्रेक्ष्यते—यस्य कुमारस्य मङ्गलध्वनितमः मङ्गलशब्दा इवोदीर्णाः । कस्मिन्सति । सहाङ्गजेन स्मरेण पुत्रेण च वर्तते यस्तादृशे मोहनामति महीन्द्रे राजनि पितृपतेर्यमस्य अतिथित्वं प्राघुणत्वं प्रापिते नीते सति । हते इत्यर्थः । 'यमः कृतान्तः पितृदक्षिणाशाप्रेतात्पतिः' इति हैम्याम् ॥

ताण्डवं व्यरचि वारवधूभिस्तत्पुरः किमु सुपर्ववधूभिः ।
तथ्यवत्पथिमिथः पृथु मिथ्यायुद्धमुद्धतनरैर्निरमायि ॥ १५२ ॥

तस्य कुमारस्य पुरः पुरस्ताद्वारवधूभिः पणाङ्गनारूपपात्रैस्ताण्डवं नृत्यं व्यरचि विर-

चितं कृतम् । उत्प्रेक्ष्यते—सुपर्ववधूभिः अप्सरोभिरिव । 'स्वःस्वर्गिवध्वोऽप्सरसः' इति हैम्याम् । पुनरुद्धतनरैरुत्कटपुरुषैः पथि मार्गे मिथः परस्परं पृथु बहु यथा स्यात्तथा मिथ्यायुद्धं मृषासंग्रामो निरमायि निर्मितम् । विवाहादिमहोत्सवेषु दाक्षिणात्या नराः पुरस्तात्प्रतिचतुष्पथं खड्गपाणयः परस्परं मिथ्यायुद्धं कुर्वन्तीति सौराष्ट्रमण्डलादौ दृश्यते । 'ततः प्रतीच्छ प्रसरेति भाषिणी परस्परोल्लासितशल्यपल्लवे । मृषामृधं सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥' इति नैषधे । किंवत् । तथ्यवत् । यथा उद्धताः खड्गपाणयः पुरुषाः सत्यं युद्धं विदधते ॥

दुन्दुभिध्वनितिभिर्जयशब्दं तस्य बन्दिवदुदीरयतीव ।
तद्गुणानिव मुदा निगदन्ती दंध्वनीति मधुरापि न(नु)भेरी ॥१९३॥

दुन्दुभिर्मदनभेरी निस्वातो वा ध्वनितिभिर्भाङ्काररावैस्तस्य कुमारस्य जयशब्दः जयजयरावमुदीरयति प्रकटीकरोति इव वदतीव । किंवत् । बन्दिवत् । यथा मङ्गलपाठकः जयजयेति शब्दमुदीरयति । अपि पुनर्भेरी वाद्यविशेषो दंध्वनीति अतिशयेन शब्दायते । किंभूता । मधुरा श्रवणसुखकारिरावा । उत्प्रेक्ष्यते—मुदा हर्षेण तस्य कुमारस्य गुणान् धैर्यौदार्यगाम्भीर्यवैराग्यशमदमादिकान्निगदन्ती कथयन्तीव दंध्वनीति ॥ इति दीक्षाग्रहणप्रस्थानसमये कुमारपुरो गीतनृत्यवादित्रादिकथनम् ॥

क्षात्त्रियैरिव सुतैर्युवराजोऽलंकृतैः परिवृतोऽन्यकुमारैः ।
प्रस्थितिं पथि चकार कुमारोऽनल्पकल्पितमहेषु सगोत्रैः ॥ १९४ ॥

हीरकुमारः सगोत्रैः स्वजनैरनल्पा अतिशायिनो बहवो वा कल्पिता विरचिता ये महा उत्सवास्तेषु सत्सु पथि मार्गे प्रस्थितिं प्रस्थानं चकार । प्रचचालेत्यर्थः । किंभूतः । परिवृतः सहितः । कैः । अन्यैः दीक्षाग्रहणोत्सुकीभूतैरपरैः कुमारैः । किंभूतैः । अलंकृतैर्मणिस्वर्णादिभरणगणभूषितैः । क इव । युवराज इव । यथा क्षात्त्रियैः क्षत्त्रियसंबन्धिभिः सुतैर्नन्दनैः परिवृतो युवराजः पथि प्रतिष्ठते । किंभूतो युवराजः । स स्वपितुः समग्रराज्यभारधुरंधरः । क्षात्त्रियैः सुतैः किंभूतैः । गां पृथ्वीं क्षत्त्रियत्वेन त्रायन्ते सम्यक्तया रक्षन्तीति गोत्रास्तैः । केषु सत्सु । प्रस्थानमङ्गलादिकादभ्रनिर्मितोत्सवेषु ॥

हेषितैर्हयगणस्य गजानां गर्जितैश्च रथचीत्कृतिभिश्च ।
रोदसी जनरवैरपि शब्दाद्वैतवादकलिते इव जाते ॥ १९९ ॥

रोदसी द्यावापृथिव्यौ शब्दाद्वैतवादकलिते न विद्यते द्वैतो द्वितीयो वादो वदनं कथनं यत्र स शब्दानामद्वैतवादः शब्दाद्वैतवादस्तेन युक्ते इव जाते इव केवलम् । शब्दमये इव संपन्ने । कैः । हयगणस्य वाजिव्रजस्य हेषितैर्हेषारवैः । 'हेषा ह्रेषा तुरङ्गाणाम्' इति हैम्याम् । च पुनः कैः । गजानां हस्तिनां गर्जितैः गर्जारवैः । च पुनः रथानां शताङ्गानां चीत्कृतिभिः चीत्काररवैः अपि पुनर्जनरवैर्लोककोलाहलैः ॥

रेणुभिः समुदडीयत रङ्गद्वाजिवारणरथाभ्युदिताभिः।
दिक्पतीन्निगदितुं महमत्राभूतभाविनमिवोत्सुकिताभिः ॥ १९६ ॥

रङ्गन्तस्त्वरितत्वरितमुपर्युपरि चलन्तो वाजिनो बहुविधाश्वा वारणाः शृङ्गारितगजा रथाः पुरुषस्त्रीभृतस्यन्दनाः तेभ्योऽभ्युदिताभिरुच्छ्रिताभिः रेणुभिर्धूलीभिः समुदडीयत उड्डीतम्। 'उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः' इति नैषधे। 'कटाहौ षष्ठिरेण्विषु' इति लिङ्गानुशासने रेणुशब्दस्त्रिषु लिङ्गेषु प्रोक्तस्तेनात्र स्त्रीलिङ्गो विवक्षितः। उत्प्रेक्ष्यते—दिक्पतीनिन्द्रादिलोकपालान् अत्र जगति अभूतं न कदाचिदपि पूर्वं संजातम्, तथा न भाविनमागामिकाले कदाचिदपि न भविष्यन्तम्, भूतश्चासौ भावी च भूतभावी, न भूतभावी अभूतभावी, तं महमर्थात्तत्कुमारदीक्षामहोत्सवं निगदितुमुत्सुकिताभिरिवोत्कण्ठिताभिरिव ॥

तद्गजादिभरभारमसह्यं स्वेन वीक्ष्य निरपेक्षमहीन्द्रः।
याचितेन जलजन्मभुवेवाचीकरत्कुलगिरीन्स्वसहायान् ॥ १९७ ॥

अहीन्द्रो नागराजः याचितेन भूमीभारधारणसंभागिनमर्थितेन जलजन्मभुवा विधात्रा कर्त्रा कुलगिरीन् भूभरधारिणोऽष्टौ मन्दरकैलाशहिमाचलादिकान् कुलाचलानचीकरत्कारयामास। 'यद्यपि कूर्मकुलाचलफणिपतिविधृतापि चलति वसुधेयम्। प्रतिपन्नमचलमनसां न चलति पुंसां युगान्तेऽपि ॥' इति सूक्ते। उत्प्रेक्ष्यते—स्वस्यात्मनो भूभारोद्धरणसहायानिव कारयति स्म। किं कृत्वा। तद्गजादीति। तस्मिन् कुमारसंयममहोत्सवसमये समानीतगजवाजिरथजनव्रजभवमुत्पन्नं भारं विविधं स्वेनात्मना निर्गता अपेक्षा परसहायता यत्र एवं यथा स्यात्तथा एकेनात्मना वोढुमुत्पाटयितुमसह्यमशक्यं वीक्ष्य दृष्ट्वा ज्ञात्वा ॥ इति तत्समयानीतगजाश्वरथलोकभारबाहुल्यम् ॥

तद्विलोकनरसस्तिमितानां चित्रविभ्रममिवोपगतानाम्।
तत्पुरालयविलासवतीनां चेष्टितैरिति तदाविरभावि ॥ १९८ ॥

तदा तस्मिन् समये तत्पुरमणहिल्लपत्तनं नगरं तत्रालयो यासां तासां पत्तननिवासिनीनां विलासवतीनां युवतीनामित्यमुना प्रकारेण चेष्टितैर्विलसितैराविरभावि प्रकटीभूतम्। किंभूतानां विलासवतीनाम्। तस्य महामहपुरःसरं संयमं ग्रहीतुं प्रस्थितस्य कुमारस्य यद्विलोकनं निरीक्षणं तस्य रसेन रागेण स्तिमितानां निश्चलीभूतानाम्। उत्प्रेक्ष्यते—चित्रविभ्रममालेख्यविलासमुपगतानां प्राप्तानामिव। चित्रलिखितानामिव जातानाम् ॥

काचिदीक्षणरसेन बबन्धोद्वेष्टितं न निजकुन्तलहस्तम्।
कौतुकादिव कलापिकलापश्रीकलापमनुमातुमनेन ॥ १९९ ॥

काचिद्विलासवती ईक्षणस्यार्थात्तद्विलोकनस्य रसेन उद्वेष्टितं छोटितमपि निजस्यात्मनः कुन्तलहस्तं केशपाशं न बबन्ध । उत्प्रेक्ष्यते—कौतुकात्कौतूहलादनेन निजकुन्तलहस्तेन कलापिनां मयूराणां कलापस्य बर्हस्य शिखण्डकस्य श्रीकलापं शोभासमुदयमनुमातुं सदृशीकर्तुमिव ॥

कापि वीक्षणरसत्वरमाणा स्रस्तमप्यधृत मूर्ध्नि न माल्यम् ।
यज्जितेन मदनेन निजौकः स्थायिनोज्झितमिवास्त्रमवेत्य ॥१६०॥

कापि कामिनी स्रस्तमर्थान्मस्तकात्पतितमपि माल्यं पुष्पदाम मूर्ध्नि स्वशिरसि नाधृत न धृतवती नारोपयति स्म । किंभूता । वीक्षणस्यार्थात्कुमारालोकनस्य रसेन रागेण त्वरमाणा शीघ्रं व्रजन्ती भवन्ती वा । उत्प्रेक्ष्यते—निजस्यात्मीयस्यात्मनो वा यदोको वशारूपं मन्दिरं तत्र स्थायिना वसनशीलेन । तथा येन कुमारेण जितेन मदनेन कामेन उज्झितं त्यक्तमस्त्रं प्रहरणमिव अवेत्य ज्ञात्वा ॥

हंसपादभरितार्धमहासीत्केशवर्त्म तमवेक्षितुमन्या ।
पूर्णरागिणमिह प्रविधातुं श्यामलाशयमलंभवतात्कः ॥ १६१ ॥

अन्या कापि खञ्जननयना तं कुमारमवेक्षितुमर्थादुत्सुका सती हंसपादेन सिन्दूरेण भरितं पूरितमर्धं सामिभागो यस्य तादृशं केशवर्त्म सीमन्तमहासीत्तत्याज मुक्तवती। युक्तोऽयमर्थः । इह जगति श्यामलाशयं मलिनमानसं पिशुनम्। 'दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः' इति नैषधे । आशये मनसीति तद्वृत्तिः । पूर्णो रागोऽस्त्यस्मिन्वा तादृशमतिशायि रागरङ्गत्तरङ्गितं कर्तुम् । कः पुमानलंभवतात् समर्थो भवतु । अपि तु न कोऽपीत्यर्थः ॥

भाति मुक्तमलिके रभसेनाप्यन्ययार्धकृतचन्दनचित्रम् ।
स्पर्धिजित्त्वरकलां शिशुसोमोऽध्येतुमागत इवैष मुखाब्जात् ॥१६२॥

अपि पुनरन्यया अपरया कयापि कामिन्या अलिके स्वललाटपदे अर्धकृतं सामिरचितं चन्दनस्य श्रीखण्डस्य तिलकं रभसेनौत्सुक्येन मुक्तं त्यक्तं ललाटे अर्धकृतमेव तिलकममोचि इत्यर्थः । उत्प्रेक्ष्यते—एषोऽर्धतिलकरूपः शिशुसोमो बालचन्द्रः मुखाब्जाद्युवतीवदनकमलात्स्पर्धिनां स्वशोभाविद्वेषिणां जित्वरीं जयनशीलां कलां चातुरीमध्येतुं पठितुमभ्यसितुमागतः समेत इव ॥

पातुमप्रभु कुमारविभूषां स्वं दृशोर्द्वयमवेत्य कयाचित् ।
लोचने इव धृते इतरे स्वश्रोत्रयोः स्मितवतंससरोजे ॥ १६३ ॥

कयाचित्कान्तया स्वश्रोत्रयोरात्मकर्णयोः स्मिते विकसिते वतंससरोजे उत्तंसकमले धृते धारिते । क्षिप्ते इत्यर्थः । उत्प्रेक्ष्यते—इतरे अन्ये लोचने नयने इव कलिते । किं कृत्वा । अवेत्य ज्ञात्वा। किं कर्मतापन्नम्। दृशोर्द्वयं चक्षुषोर्द्वितयम् । किंभूतम् । स्वमा-

त्मीयम्। पुनः किंभूतम्। अप्रभु असमर्थम्। किं कर्तुम्। पातुम्। सादरावलोकनं पानमुच्यते। सम्यक्तया निरीक्षितुम्। काम्। कुमारविभूषां हीरशिशोः शरीरशोभाम्॥

राजतः श्रुतिपुटे धृतमेकं कुण्डलं च मुखमुत्सुकितायाः।
भास्करामृतकराविव पर्वाप्यन्तरेण मिलितौ स्फुटमेतौ॥ १६४॥

उत्सुकितायाः कुमारं प्रेक्षितुमुत्कण्ठितायाः कस्याश्चित् श्रुतिपुटे कर्णपालौ धृतं स्थापितमेकमत्यौत्सुक्यादेकस्मिन्नेव कर्णे एकं कुण्डलं क्षिप्तं राभस्यान्नान्यदित्यर्थः। तच्च पुनर्वदनं तस्या एव मुखं द्वे राजतः शुशुभाते। उत्प्रेक्ष्यते—पर्वामावास्यामन्तरेणापि। 'पञ्चदश्यौ यज्ञकालौ पक्षान्तौ पर्वणी अपि' इति हैमीवचनात्। पूर्णिमामावस्योः पर्वेति संज्ञा। अमावास्यां विनापि स्फुटं प्रकटं यथा स्यात्तथा मिलितौ संगतौ एकत्र भूतौ एतौ कुण्डलमुखौ भास्करामृतकरौ सूर्याचन्द्रमसाविव। अमावास्यायां हि सूर्यचन्द्रौ एकत्र मिलतः। 'दर्शः सूर्येन्दुसंगमः' इति हैम्याम्॥

तद्दिदृक्षुरपराञ्जनयष्ट्यानञ्ज सव्यनयनं न तदन्यत्।
वामतां भजति यः शितिमैव स्यात्तदाननमितीव विचिन्त्य॥१६५॥

तं कुमारं दिदृक्षुर्द्रष्टुमिच्छुस्तद्दिदृक्षुः। 'तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम' इति नैषधे। अपरा पूर्वोक्ताभ्यः अन्या काचित्कामिनी अञ्जनयष्ट्या कज्जलशलाकया कृत्वा सव्यं वामं नयनम्। 'वामं शरीरेऽङ्गं सव्यमपसव्यं तु दक्षिणम्' इति हैम्याम्। चक्षुः आनञ्ज। तदन्यत्तस्मात्सव्यादन्यदपरमपसव्यं नयनं दक्षिणं नेति निषेधे। राभस्यान्नानक्ति स्म। 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' रुधादिर्धातुः। तेनानक्तीति रूपम्। परोक्षायामानञ्जेति। उत्प्रेक्ष्यते—इति विचिन्त्य वितर्क्य। इति किम्। 'यः वामतां सव्यत्वमथ च प्रतिकूलभावं भजति आश्रयति तदानने तस्य वदने एव निश्चितं शितिमा श्यामतैव स्यात्' इति॥

काचनातिरभसान्मृगनाभीवारिणाव्यलिखदेककपोलम्।
मन्मुखं जितशशी श्रयतेऽसौ गण्डमूर्तिरिति किं व विवक्षुः॥१६६॥

काचन मृगाक्षी मृगस्याक्षिणी इवाक्षिणी यस्याः सा मृगाक्षी। 'वैयधिकरण्ये बहुव्रीहौ मध्यमपदलोपश्च' इति सूत्रेण एकाक्षिशब्दलोपः। सूत्रोदाहरणं यथा—कुसुदस्य गन्ध इव गन्धो यस्याः सा कुमुदगन्धिः। अत्रैकगन्धशब्दलोपः इति सारस्वते। हरिणनयना अतिरभसात्कुमारविलोकनस्यौत्सुक्यान्मृगनाभीवारिणा कस्तूरिकाद्रवेण कृत्वा एकं कपोलं निजगण्डस्थलं व्यलिखत्। पत्रवल्लीकलितं कृतवती। चित्रयति स्मेत्यर्थः। गौरे हि कपोलमण्डले मृगनाभिमण्डनमतीव शोभते। उत्प्रेक्ष्यते—इति किं विवक्षुर्लोकानां पुरस्तादमुना प्रकारेण वक्तुमिच्छुरिव। इति किम्। यदसौ गण्डमूर्तिः कपोलकायः जितः स्वशोभातिशयेनाभिभूतः शशी चन्द्रः मन्मुखं मम वदनं श्रयते सेवत इति॥

तद्विभावनरसव्यवसाया नागवल्लिदलविभ्रमतोऽन्या।
कापि केलिकमलं निजवक्रस्पर्धयेव कवलीकुरुते स्म॥ १६७॥

अन्या कापि कान्ता नागवल्ल्यास्ताम्बूलीलताया दलानां पत्राणां विभ्रमतो भ्रान्तेः। बुद्धेरित्यर्थः। 'कर्णान्तविभ्रमभ्रान्तकृष्णार्जुनविलोचना' इति चम्पूकथायाम्। विभ्रमेण भ्रान्तेति तट्टिपनके। केलिकमलं क्रीडापद्मं कवलीकुरुते स्म। खादति स्मेत्यर्थः। किंभूता कापि। तस्य कुमारस्य यद्विभावनं विलोकनं तस्य रसो रागः स एव व्यवसायो व्यापारोऽस्याः। उत्प्रेक्ष्यते—निजेनात्मीयेन वक्रेण वदनेन सार्धं स्पर्धया संहर्षेणेव। विभूषाभिरीर्ष्ययेत्यर्थः॥

काचन व्यधित काञ्चनकाञ्चीं कण्ठपीठलुठितां रभसेन।
इन्दुजां मिलितुमब्जपिशङ्गां यन्मुखाङ्गपितृसोममिवैताम्॥१६८॥

काचन नितम्बिनी रभसेन कुमारदर्शनौत्सुक्येन काञ्चनकाञ्चीं कलधौतमेखलां कण्ठपीठे गलकन्दले लुठितां विलम्बिताम्। क्षिप्तामित्यर्थः। व्यधित चकार। राभस्यान्मुक्ताहारभ्रान्त्या मेखलां कण्ठे चिक्षेपेत्यर्थः। उत्प्रेक्ष्यते—यस्याः सीमन्तिन्याः मुखं वदनमेवाङ्गं कायो यस्य यत्स्त्री(मुख)वपुषं पितरं तातं सोमं चन्द्रं मिलितुं तातस्नेहादेतामागतामब्जैरर्थात्सुवर्णकमलपरागैः पिशङ्गां पीतां भूतामिन्दुजां रेवानदीमिव॥

कापि मौक्तिकलतां स्वकटीरे विभ्रमादधृत सारसनस्य।
वेश्मनीव रचितां रतिभर्तुः कुन्दकुड्मलितवन्दनमाला॥ १६९॥

कापि वरवर्णिनी सारसनस्य मणिमेखलाया विभ्रमाद्भ्रान्तेः कुमारदर्शनौत्सुक्यात्स्वकटीरे निजकटीतटे। 'कलापो रसना सारसनं काञ्ची च सप्तकी,' तथा—'श्रोणिः कलत्रकटीरं काञ्चीपदं ककुद्मतान्ति' द्वयमपि हैम्याम्। मौक्तिकलतां मुक्ताहारम्। अधृत परिदधौ। उत्प्रेक्ष्यते—रतिभर्तुः स्मरस्य वेश्मनि। गृहद्वारे इत्यर्थः॥

हारचारिमकुचौ परया नो वाससातिरभसात्पिदधाते।
माल्यशालिकलशद्वितयीव श्रेयसे पथि धृता व्रजतोऽस्य॥ १७०॥

परया अन्यया कयाचिन्महिलया हारस्य मुक्तालतायाश्चारिमा रमणीयता ययोर्हारेण रम्यत्वं वा ययोस्तादृशौ कुचौ स्तनौ अतिरभसात्कुमारप्रेक्षणात्यौत्सुक्यान्नो इति निषेधे। 'अमानो नाः प्रतिषेधे' इति व्याकरणवचनात् वाससा वस्त्रेण कृत्वा पिदधाते पिहितौ परोक्षाद्विवचनम्। उत्प्रेक्ष्यते—व्रजतो दीक्षाग्रहणार्थं गच्छतोऽस्य हीरकुमारस्य पथि मार्गे माल्येन पुष्पमालया शालते शोभते इत्येवंशीला कलशयोः कुम्भयोः द्वितयी द्वयीव श्रेयसे कल्याणकृते धृता पुरस्कृता॥

नूपुरं निजभुजे रभसेनाजीघटत्कटकविभ्रमतोऽन्या।
वैभवैर्भुजभवैरभिभूतं शालितुं किमु मृणालमुपेतम्॥ १७१॥

अन्या परा कापि चकोरलोचना रभसेन कुमारविभावरसेनोत्सुकत्वेन कटकस्य वलयस्य विभ्रमतो भ्रान्तेर्नूपुरं मञ्जीरं निजस्यात्मनो निजे आत्मीये वा भुजे बाहौ अजीघटत् घटयामास परिधृतवती । उत्प्रेक्ष्यते—भुजभवैर्विभवैः स्वबाहुसमुत्पन्नशोभातिशयैः अभिभूतं पराजितं सन्मृणालं कमलनालं शीलितुमर्थान्निजजित्वरभुजमेव सेवितुमुपेतमागतमिव ॥

तद्गवेषणरसोत्सुकचेताः काचनाध्वनि धृतश्लथबन्धम् ।
अम्बरं हरिणदृक्स्वकरेणालम्ब्य संचरति चन्द्रकलेव ॥ १७२ ॥

काचन हरिणेक्षणा तस्य हीरकुमारस्य यद्गवेषणं निर्वर्णनं तस्य रसो रागस्तेनोत्सुकमुत्कण्ठितं चेतश्चित्तं यस्यास्तादृशी सती अध्वनि पत्तनमार्गे धृतः कलितः श्लथः शिथिलः बन्धो बन्धनग्रन्थिर्येन तादृग्विधमम्बरं परिधानवस्त्रं स्वकरेण निजहस्तेन आलम्ब्य आश्रित्य । गृहीत्वेत्यर्थः । संचरति व्रजति । केव । चन्द्रकलेव । यथा शशिलेखा अम्बरमाकाशं स्वकरेण आत्मकिरणेन । जातिवाचित्वादेकवचनम् । आश्रित्य संचरति ॥

अन्ययार्धरचितात्मकलापापातिमौक्तिकभरै रभसेन ।
सृज्यते स्म विषये किमु लाजोत्क्षेपणा वरयितुर्व्रतलक्ष्म्याः ॥१७३॥

अन्यया अपरया कयाचित्तरललोचनया रभसेन कुमारेक्षणोत्सुकभावेन अर्धरचितः साभिप्रोतो य आत्मकलापः स्वस्य मणिमौक्तिककाञ्चनमयमेखला तत्सकाशादासामस्त्येन पतन्तीत्येवंशीलानि निपातुकानि यानि मौक्तिकानि मुक्ताफलानि तेषां भरैः समूहैः कृत्वा व्रतलक्ष्म्याश्चारित्रश्रियाः वरयितुः परिणेतुः कुमारस्य विषये आचारार्थं लाजोत्क्षेपणा अक्षतैः संवर्धनं मौक्तिकैर्वर्धापनमित्यर्थः । किमु सृज्यते । क्रियते परिणेता हि मङ्गलार्थं सधववधूभिर्लाजैरक्षतैर्मौक्तिकैर्वा वर्धाप्यते इति विधिः ॥

काचिदर्भकमपास्य धयन्तं यात्यवेक्षितुममुं स्वगवाक्षम् ।
वेश्मनि स्तननिपातिपयोभिर्जाह्नवीं जनयतीव नवीनाम् ॥ १७४ ॥

काचिदन्या युवती वेश्मनि निजमन्दिरे पयोधरकुम्भयोर्निष्पतनशीलैरविरलनिर्गलद्भिः पयोभिर्दुग्धधाराभिः । उत्प्रेक्ष्यते—नवीनां नूतनां जाह्नवीं गङ्गां जनयति उत्पादयतीव। करोतीवेति यावत् । किं कुर्वन्ती । अमुं हीरकुमारमवेक्षितुं विलोकयितुं स्वगवाक्षं निजनिकेतनसंबन्धिजालकं प्रति यान्ती गच्छन्ती । किं कृत्वा । धयन्तं स्वपयोधरपयः पिबन्तमर्भकं निजनन्दनमपास्य त्यक्त्वा रुदन्तमेव विहायेत्यर्थः ॥

प्राप्तरूपविभवं वहते यः स्यात्किमत्र स जडैरनुषङ्गी ।
अर्धधौतमितरा स्वमितीवोत्कण्ठिता तरलदृक्क्रममौज्झत् ॥ १७५ ॥

उत्कण्ठिता कुमारदर्शनोत्सुकितचेता इतरा अपरा तरलदृक् चपललोचना । उत्प्रे-

क्ष्यते—इति हेतोः स्वमात्मीयं क्रमं चरणमर्धधौतं सामिप्रक्षालितमौज्झज्जहाति स्म त्यक्तवती। इति किम्। हेतुमाह—यः पुमान् प्राप्तरूपविभवमधिगतसम्यग्रूपत्वेन शोभां पण्डितत्वेन वा संपदम्। 'विद्वान्सुधीकविविचक्षणलब्धवर्णा ज्ञप्राप्तरूपकृतिकृष्टयभिरूपधीराः' इति हैम्याम्। वहते धारयति। अत्र जगति स जनः जडैः। डलयोरैक्यात्। जलैः पानीयैः मूर्खैश्च सार्धमनुषङ्गी संगमवान् कृतसङ्गः कथं भवति। अपि तु कदाचिदपि स्यादेवेति विचारः॥

स्फाटिकावनिषु वेश्मनि यान्त्या वीक्ष्य यावकपदानि परस्याः।
मुग्धभृङ्गविहगैर्जलरोहद्रक्तपङ्कजधियेव दधावे॥ १७६॥

वेश्मनि स्वगृहे स्फाटिकावनिषु स्फाटिकरत्ननिबद्धभूमीषु यान्त्या अर्थात्कुमारं द्रष्टुमुत्सुकतया व्रजन्त्या अपरस्या अन्यस्यास्तरुण्याः यावकपदानि नवीनालक्तकरसार्द्राणि पदानि क्रमस्थापनानि वीक्ष्य विलोक्य मुग्धैरचतुरैर्भृङ्गा भ्रमरा एव विहङ्गाः पक्षिणस्तैर्दधावे धावितम्। उड्डीय गत्वा तदुपरिष्टादुपविष्टमित्यर्थः। उत्प्रेक्ष्यते—जलेषु सरःप्रभृतिपानीयेषु रोहन्त्युद्गच्छन्ति प्रादुर्भवन्ति इति जलरोहन्ति तादृशानि यानि रक्तपङ्कजानि शोणकमलानि कोकनदानि तेषां धिया बुद्ध्या भ्रमेणेव॥

काप्यलक्तकधियोत्सुकिता पत्पद्मयोरकृत चन्दनचर्चाम्।
रक्तयोर्न सविधे प्रहितां स्वां चन्द्रिकां शशभृता सखितायै॥१७७॥

उत्सुकिता कुमारावलोकनरसेनोत्कण्ठिता कापि काचिदपरा लीलावती अलक्तधिया यावकरसभ्रान्त्या पत्पद्मयोः स्वचरणतामरसयोः चन्दनस्य श्रीखण्डद्रवस्य चर्चां विलेपनम्। 'अङ्गरागो विलेपनं चार्चिक्यं समालम्भनं चर्चा स्यात्' इति हैम्याम्। अकृत कृतवती। उत्प्रेक्ष्यते—रक्तयोः स्वानुरागिणोः। 'रक्तं नील्यादिरञ्जिते। कुङ्कुमेऽसृज्यनुरक्ते प्राचीनामलकेऽरुणे' इत्यनेकार्थः। स्वाभाविकारुणयोरिति तत्त्वम्। अर्थान्निजोपरि रागं दधानयोः अनयोः पदपद्मयोः सविधे पार्श्वे सखितायै मैत्रीकरणार्थे शशभृता चन्द्रेण प्रहितां प्रेषितां स्वामात्मीयां चन्द्रिकां कौमुदीं न अपि तु ज्योत्स्नेव नकारो मौलार्थमेव वक्तीति। यथा नैषधे—'अनुभवति शचीत्थं सा घृताचीमुखाभिर्न सहसहचरीभिर्नन्दनानन्दमुच्चैः' इति। चन्द्रिका तु दन्तकान्तिरप्युच्यते। 'दशनचन्द्रिकया व्यवभासितं हसितमासवगन्धि मधोरिव' इति रघुवचनात्। ततः स्वचन्द्रिकामित्युक्तम्॥

दर्शयन्त्यपरपद्ममुखी तं कापि पाणिमकरोन्निजमुच्चैः।
व्योमपल्वलमिव स्मयमानोन्नालताम्रनलिनं प्रणयन्ती॥ १७८॥

काचिदपरा अन्या पद्ममुखी अरविन्दवदना तं कुमारं दर्शयन्ती लोचनगोचरं कारयन्ती सती निजमात्मीयं पाणिं हस्तमुच्चैः ऊर्ध्वमकरोच्चकार। उत्प्रेक्ष्यते—स्मयमानं

विजृम्भमाणं विकसत्तथा उन्नालमुच्चैर्नालं यस्य तादृक् ताम्रं रक्तं कमलं यत्र तादृशं व्योमपल्वलं गगनतटाकं प्रणयन्ती कुर्वन्तीव ॥

सुभ्रुवामिह महे जगृहे किं चक्षुषैव सकलेन्द्रियवृत्तिः।
ज्योतिरर्चिरिव भानुमता यत्कापि सा प्रभवति स्म न किंचित् १७९

इहास्मिन् महे कुमारदीक्षाया उत्सवे सुभ्रुवाम् अणहिल्लपाटकपत्तनवनितानां निखिलानां चतुर्णा श्रवणनासिकारसनास्पर्शननाम्नामिन्द्रियाणां वृत्तिर्व्यापारः। उत्प्रेक्ष्यते—चक्षुषा लोचनेनैव जगृहे गृहीता किम्। केनेव। भानुमतेव। यथा भास्करेण ज्योतिषां ग्रहनक्षत्रतारकाणामर्चिः कान्तिर्गृह्यते। यद्यस्मात्कारणात् सा चतुरिन्द्रियवृत्तिः कापि क्वचिदपि स्वस्वव्यापारे किंचित्किमपि श्रोतुमाघ्रातुमास्वादयितुं स्प्रष्टुमपि न प्रभवति स्म न समर्थीबभूव। ज्योतींष्यपि कापि ज्योतिरर्चिरपि कापि किंचिन्नालं भवति ॥ इति पौराङ्गनाविविधचेष्टितवर्णनम् ॥

रामणीयकतिरस्कृतकामं तं निपीय नयनैः पथि कामम्।
वल्लकीकुलसखीमिव वाणीमित्यथो युवतिराजिरभाणीत् ॥ १८० ॥

अथो विविधचेष्टितानन्तरं स्वगृहगवाक्षस्थितानां युवतीनां पत्तननागरीणां राजिः श्रेणिः इत्यग्रे वक्ष्यमाणां वाणीं वाचं मिथः परस्परमभाणीत् बभाषे। किं कृत्वा। तं कुमारं काममत्यर्थं नयनैः स्वलोचनैः पथि मार्गे अर्थाद्दीक्षाग्रहणार्थं गच्छन्तं निपीय सादरमवलोक्य। किंभूतं कुमारम्। रामणीयकेन शरीरसौन्दर्येण तिरस्कृतो निर्भर्त्सितः कामः कन्दर्पो येन तम्। वाणीमुत्प्रेक्ष्यते—वल्लकीकुलस्य वीणाव्रजस्य वीणावंशस्य वा। 'गोत्रं तु संतानोऽन्ववायोऽभिजनः कुलम्' इति हैम्याम्। 'कुलं तेषां सजातीनाम्' इत्यपि हैम्याम्। वीणावंशस्य सखीमिव वयसीमिव विपञ्चीवच्चार्वीं वाचमित्यर्थः ॥

सांप्रतं तदिह शैशवशेषः सांप्रतं व्रतजिघृक्षुरयं यत्।
अन्यथा कथमसावनुकुर्यादात्मना जगति जम्बुकुमारम् ॥ १८१ ॥

शैशवं बाल्यावस्था शेषमवशिष्टं यस्य किंचिद्विद्यमानशिशुत्वदशः। त्रयोदशचतुर्दशवर्षीयत्वात्। 'प्रणीतवाञ्शैशवशेषवानयम्' इति नैषधे। तादृशोऽयं हीरकुमारः यत्सांप्रतमधुना व्रतजिघृक्षुः संयममादातुमिच्छुरस्ति इहास्मिन् शैशवसमये तत्संयमग्रहणं सांप्रतं युक्तम्। अन्यथा व्रतग्रहणमन्तरेण जगती विश्वे असौ हीरकुमारः आत्मना स्वेन कृत्वा जम्बुकुमारं चरमकेवलिनं जम्बूस्वामिनं कथं केन प्रकारेण अनुकुर्यात् सदृशं कुर्वीत। जम्बुशब्दो दीर्घो ह्रस्वोऽप्यस्ति। सारस्वतव्याकरणे वधूजम्बूशब्दौ नदीवदिति। तथा 'मत्कृते जम्बुना त्यक्ता नवोढा नवकन्यकाः' इति कल्पवृत्तौ ॥

अङ्गजाभिलषणोद्भवकोपवान्तचित्तचतुराननशापात्।
रुद्रनेत्रशिखिनीव निपत्यादत्त जन्म कमनः परमेतत् ॥ १८२ ॥

कमनः कन्दर्पः। उत्प्रेक्ष्यते—एतत्प्रत्यक्षं दृश्यमानं हीरकुमाररूपं परमन्यजन्मावतारमादत्त गृहीतवान्। किं कृत्वा। रुद्रस्य शंभोर्नेत्रं तृतीयं भाले लोचनं तस्य शिखिनि तस्य वह्निमयत्वेन अग्नेर्विद्यमानत्वात् वह्नौ निपत्य झम्पां दत्त्वा भस्मीभूय वा। कस्मात्। अङ्गजायास्तिलोत्तमानाम्न्याः स्वनन्दनाया यदभिलषणं वाञ्छनं कामक्रीडाचिकीर्षा तस्मादुद्भव उत्पत्तिर्यस्य तादृशो यः कोपः क्रोधः तेन वान्तं पूरितं चित्तं मनो यस्य तादृग्विधो यश्चतुराननो ब्रह्मा तस्य शापात्। यदुक्तं कुमारसंभवे—'अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः। अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत्॥' इति। तथा नैषधेऽपि—'पद्मनन्दनसुतारिरंसुता'॥

अद्रिजार्धघटनाङ्कितमूर्त्या व्रीडमाकलयता गिरिशेन।
प्रैयरूपकवती तनुरेतत्कैतवात्किमुररीक्रियते स्म॥ १८३॥

गिरिशेन ईश्वरेण एतस्य हीरकुमारस्य कैतवात्कपटात्। उत्प्रेक्ष्यते—प्रैयरूपकवती रमणीयत्वकलिता तनुः शरीरयष्टिः उररीक्रियते स्म अङ्गीकृता गृहीता प्रियरूपस्य भावः प्रैयरूपकम्। मनोज्ञादित्वाद्वुण्। 'प्रैयरूपकविशेषनिदेशैः' इति नैषधे। गिरिशेन किं कुर्वता। व्रीडं लज्जाम्। व्रीडशब्दः शब्दप्रभेदे अकारान्तोऽप्यस्ति। यथा—'व्रीडायां भवे व्रीडः' इति। 'त्वयि स्मरव्रीडसमस्ययानया' इति नैषधेऽपि। आकलयता दधता। कया। अद्रिजाया हिमाचलपुत्र्याः पार्वत्याः अर्धस्य शरीरार्धभागस्य या घटना योजना तयाङ्किता कलिता या मूर्तिः स्वशरीरं तया कृत्वा। 'सापीश्वरे शृण्वति तद्गुणौघान् प्रसह्य चेतो हरतोऽर्धशंभुः। अभूदपर्णाङ्गुलिरुद्धकर्णा' इति नैषधे। अर्धं शंभोरित्यर्धशंभुरिति तद्वृत्तिः। तेन कारणेन तां स्वतनुं संत्यज्य ईश्वरेण जननयननिरीक्षणीया अपरा मूर्तिरङ्गीकृतेत्यर्थः॥

त्यक्तपूर्ववपुषा निजयोषाविप्रयोगजनितान्तरदुःखात्।
उर्वशीप्रियतमेन किमेतत्कैतवेन जगृहे तनुरन्या॥ १८४॥

उर्वशीनामाप्सरास्तस्याः प्रियतमेन भर्त्रा पुरूरवसा। 'पुरूरवा बोध ऐल उर्वशीरमणश्च सः' इति हैमीवचनात्। एतत्कैतवेन हीरकुमारमिषेण। उत्प्रेक्ष्यते—अपरा कुमारलक्षणा तनूर्मूर्तिर्जगृहे गृहीतेव। किंभूतेन उर्वशीप्रियतमेन। त्यक्तमुज्झितं पूर्वं प्राचीनं पुरूरवोलक्षणं वपुः शरीरं येन। कस्मात्। निजस्यात्मनो निजा आत्मीया वा या योषा प्रियतमा उर्वशी अप्सराः। 'अप्सरः स्वप्सराः प्रोक्ता' इति शब्दप्रभेदे। 'वा तु जलौकोऽप्सरसः सिकतासुमनः समाः' एते शब्दा बहुत्वे वा। 'इमा जलौकसः। इयं जलौकाः। इमा अप्सरसः। इयमप्सराः' इत्यादि लिङ्गानुशासने च। तस्य। विप्रयोगेण विरहेण जनितमुत्पादितं यदन्तरमन्तर्मनसि भवमन्तरङ्गमतिशायि इत्यर्थः। दुःखं तस्मात्। 'प्रियावियोगज्वलतादिवैलाम्' इति नैषधे। पुरूरवस उर्वशीवियोगः। तथा नलवर्णने—'करोषि लज्जा गुरुमौलिमैलदस्रौ हठश्रीहरणादुदस्रौ' इत्यपि नैषधे॥

दस्रयोः किमयमन्यतमोऽस्मिन्नागतस्त्रिदिवतः क्षितिपीठे ।
निष्कलङ्क इव विष्णुपदस्योपास्तिभिः कुमुदिनीदयितो वा ॥१८५॥

दस्रयोरश्विनीपुत्रयोर्मध्ये । उत्प्रेक्ष्यते—अयं हीरकुमाररूपः अन्यतमः एकः कश्चित्रिदिवतो देवलोकादस्मिन् क्षितिपीठे पत्तनलक्षणे भूमण्डले आगतः किं समायात इव । अथ वा विष्णुपदस्य पुरुषोत्तमपादस्य उपास्तिभिः सेवाभिः कृत्वा निर्गतः कलङ्को लाञ्छनमपवादो वा यस्मात्तादृशः। उत्प्रेक्ष्यते—कुमुदिनीदयितः कैरविणीप्राणप्रियश्चन्द्रो वा क्षितौ पत्तनपृथिव्यां समागतः ॥ इति कुमाररूपदर्शनादिविचारः ॥

माद्यसि स्मर जगज्जयिनीभिर्हेतिभिः किमु हताश वशाभिः ।
संश्रिते हि चरितश्रियमस्मिंस्त्वन्मदोऽयमवकेशिवदासीत् ॥१८६॥

हे हताश, मूलादेव विगता उच्छिन्ना आशा वाञ्छा यस्य ईदृशः हे स्मर कन्दर्प जगतां त्रयाणां भुवनानाम् । 'तात्स्थ्यात्तद्व्यपदेशः' इति न्यायान्नाकिनागनागराणां त्रिजगज्जनानां जयिनीभिर्जयनशीलाभिर्वशीकारिकाभिः वशाभिस्तरुणीभिरेव हेतिभिः स्वामोघप्रहरणभूताभिः कृत्वा किं कथं माद्यसि मदमाकलयसि मत्तो भवसि । हि यस्मात्कारणात् अस्मिन् सांसारिकविषयविमुखे हीरकुमारे चरितश्रियं चारित्रलक्ष्मीं संश्रिते सति अयं सर्वजगज्जनविदितः प्रत्यक्षलक्ष्यस्त्वन्मदः यदहं युवतीरूपामोघशक्तिभिः कृत्वा हरिहरेन्द्रचतुराननादिकान् सर्वान् स्ववशीकरोमि इति तवाभिमानः अवकेशिवन्निष्फलतरुरिव आसीत् फलवन्ध्यो बभूव ॥

दैत्यमर्त्यमरुतां विजये त्वं साहसिक्यमथ मोह जहीहि ।
भूधरं हरिरिवाशनिनासौ संयमेन निहनिष्यति यत्त्वाम् ॥ १८७॥

हे मोह, अथाद्यतनदिनात्प्रारभ्य त्वं दैत्या दानवा मर्त्या मानवा मरुतो देवास्तेषां विजये पराभवने साहसिक्यं साहसकर्मसत्त्वं बलवत्तां वा जहीहि त्यज मुञ्च । सहसा वर्तते इति साहसिकः । 'ओजः सहोम्भसा वर्तते' इतीकण् । साहसिकस्य भावः साहसिक्यम् । 'अहो मदीयस्तव साहसिक्यम्' इति नैषधे । यत्कारणादसौ हीरकुमारः संयमेन शुद्धचारित्रेण कृत्वा त्वां भवन्तं निहनिष्यति व्यापादयिष्यति मूलादुन्मूलयिष्यति । क इव । हरिरिव । यथा पुरंदरः अशनिना वज्रेण कृत्वा भूधरं पर्वतं हन्ति चूर्णीकरोति ॥

संसृते व्रतरमानिरतोऽसौ दुष्प्रवृत्तिमिव यत्त्यजति त्वाम् ।
निष्फला तदबलेव परस्यां सक्तमानसपतेरपमानात् ॥ १८८ ॥

हे संसृते संसार, यद्यस्मात्कारणात् व्रतरमायां संयमलक्ष्म्यां निरत आसक्तमना रक्तीभूतचेता असौ हीरकुमारस्त्वां भवतीं जहाति । कामिव । दुष्प्रवृत्तिमिव । यथा महात्मा दुष्टां प्रवृत्तिं वार्तां दुष्टं निन्द्यमाचरणं वा मुञ्चति तत्तस्मात्कारणात् त्वं भवती

संस्तृतिर्निष्फला अभूर्जाता । स्वरूपेण तरुणीगणाभिलषणीयेन विविधविषयसुखासक्तेन भाग्यवता पुंसा संसारः सफलो भवेत्तत्तु अनेन नादृतं तस्मात्त्वं निष्फलैव । केव । अबलेव । यथा युवती परस्यामन्यवनितायामासक्तीभूतमादरवज्जातं सानुरागीभूतं मानसं मनो यस्य तादृशस्य पत्युः प्रियस्यापमानादवगणनान्निष्फला भवति । संसारसुखानुभवनरूपफलानवाप्तेर्निष्फलत्वमिति ॥

राग सागर इवासि निपीतोऽनेन पीततटिनीपतिनेव ।
दर्प खर्परकरीभव सर्पन्रङ्कवद्युधि जितो यदनेन ॥ १८९ ॥

हे राग हे अनुराग, सागरः समुद्र इव त्वमनेन कुमारेण निपीत आचान्तो निष्ठापितोऽसि । केनेव । पीततटिनीपतिनेव । यथा अगस्तिना तापसेन समुद्रो निपीतश्चुलुकीकृतः । 'अगस्त्योऽगस्तिः पीताब्धिः' इति हैम्याम् । पीताब्धिरित्यत्राब्धिपर्यायपरिवर्तन कृतम् । पुनर्हे दर्प अभिमान, यत्कारणात्त्वमनेन हीरकुमारेण युधि परस्परं संग्रामे जितः पराभूतः निःसारीकृतः तत्कारणात्सर्पन्नितस्ततः पर्यटन् भ्रमणीं कुर्वंस्त्वं रङ्कवत् द्रमक इव भिक्षुकवत् खर्परकरीभव खर्परं घटादिकपालठिक्करं तदेव करे पाणौ यस्य तादृशो भव संपद्यस्व । ठिक्करं करे कृत्वा भिक्षां मार्गयेत्यर्थः ॥

मानमाननसरोरुहनत्या मानिनीजन जहीहि जहीहि ।
मोहनाह्वमणिनेव मनस्वी न व्यमोह्यत यतो भवतायम् ॥ १९० ॥

हे मानिनीजन हे रूपचातुर्यादिभिः साभिमानकामिनीलोक, त्वं लज्जावशेनाननसरोरुहाणां वदनकमलानां नत्या नम्रीकरणेन मुखं नीचैः कृत्वा मानं दर्पं गर्वं जहीहि जहीहि । कोपनात्युक्तौ वीप्सा पुनः पुनर्भाषणं वीप्सा । त्यज त्यज । संभ्रमवशाद्वा द्विरुक्तिः । 'त्यज त्यजाकारणरोषणे रुषम्' इति नैषधे । यतः कारणात् मनस्वी विशिष्टमनोवा(नस्वा)न् देवतादिभिरप्यक्षोभ्यमना वा अयं कुमारो भवता त्वया न व्यमोह्यत न मोहितः नात्मवशीकृतः । केनेव । मोहनाह्वमणिनेव यथा मोहनकृन्नामरत्नेन जनो मोह्यते मोहं प्राप्यते ॥

स्वर्णजालकविमानगतानां सुभ्रुवां भ्रुव इवाप्सरसां सः ।
आननामृतरुचीभ्य उदीतास्ताः सुधा इव कथाः पिबति स्म १९१

स कुमारः सुभ्रुवां पत्तनपुरंध्रीणामाननानि वदनानि तान्येवामृतरुच्यः चन्द्राः । रुचीशब्दो दीर्घोऽप्यस्ति । 'रुच्यो रुचीभिर्जितकाञ्चनाभिः' इति नैषधे । तेभ्य उदीता उद्गता । 'उदीतमातङ्कितवानशङ्कितः' इत्यपि नैषधे । ईङ् गतौ दीर्घईकारो धातुः । ताः पूर्वोक्ताः कथा वार्ताः । 'त्वत्संकथापि जगतां दुरितानि हन्ति' इति भक्तामरस्तवे । 'संकथा वार्ता' इति तद्वृत्तिः । पिबति स्म सादरं शृणोति स्म । उत्प्रेक्ष्यते—सुधा इव । यथा कश्चिद्देवश्चन्द्रादुदितां सुधां पिबति । 'विरहिवर्गवधव्यसनाकुलं कलय पापमशेषफलं विधुम् । सुरनिपीतसुधाकमपापकम्' इति नैषधे । किंभूतानां सुभ्रुवाम् । स्वर्ण-

जालकानि काञ्चनरचितगवाक्षा एव विमानानि देवतानां स्वर्गे स्थितिस्थानानि तेषु गतानां संप्राप्तानाम् । सुखं निषेदुषीनामित्यर्थः । उत्प्रेक्ष्यते—भुवः पृथ्व्या अप्सरसां सुराङ्गनानामिव । अप्सरसोऽपि विमानस्थायिन्यः स्युः ॥ इति पौराङ्गनानां हीरकुमारदर्शनोद्भूतमिथः कथाप्रथा ॥

नीरदोऽवनिभृतामिव तापं वृष्टिभी रजतहेममयीभिः ।
सोऽर्थिनां प्रमथयन्पथि दौःस्थ्यं संचचार पुटभेदनमध्ये ॥१९२॥

स हीरकुमारः पुटभेदनमध्ये पत्तनविचाले संचचार संचरति स्म । 'पत्तनं पुटभेदनम्' इति हैम्याम् । तथा 'द्वीपान्तरेभ्यः पुटभेदनं तत्क्षणादवापे सुरभूमिभूपैः' इति नैषधे । किं कुर्वन् । रजतानि रूप्याणि हेमानि काञ्चनानि तन्मयीभिस्तैः प्रचुराभिः धानाभिर्वा वृष्टिभिः दानैः रूपकस्वर्णकादिविश्राणनैः कृत्वा पथि मार्गे अर्थिनां याचकानां दौःस्थ्यं दारिद्र्यं प्रमथयन्निर्दलयन् । क इव । नीरद इव । यथा वारिदो मेघः अवनिभृतां भूधराणां पर्वतानां तापं निदाघदाघं प्रमथयति प्रशमयति । यदुक्तम्—'धाराधरा एव धराधराणां निदाघदाघौघविघातदक्षाः' इति सूक्तम् । काभिः । वृष्टिभिर्जलवर्षणैः ॥

तद्यशोधरणिभर्तुरितोऽन्यद्वीपनिर्जयकृते प्रयियासोः ।
अध्वरोधिजलधीनिव रोद्धुं तत्क्षणे क्षितिरजोभिरुदीये ॥ १९३ ॥

तस्मिन् कुमारस्य दीक्षाग्रहणार्थं समहं गमनसमये क्षितेः पृथिव्याः सकाशात् रजोभिर्धूलीभिरुदीये प्रकटीभूतम् । प्रसृतमित्यर्थः । उत्प्रेक्ष्यते—इतोऽस्माज्जम्बूद्वीपादन्येषां षण्णाम् पुष्करशाकक्रौञ्चकुशशाल्मलप्लक्षनाम्नां द्वीपानाम् । 'सप्तद्वीपा वसुमती' इति शिवराजर्षिवचनात् । षड्द्वीपाभिधानानि नैषधे । जैनमते तु जम्बूद्वीपं धातुकीखण्डम्, पुष्करवरद्वीपम्, वारुणीवरद्वीपम्, घृतवरद्वीपम्, क्षीरवरद्वीपम्, इक्षुवरद्वीपम्, इति । अथवा अष्टादशसंख्याकानां द्वीपानाम् । 'अष्टादशद्वीपनिखातयूपः' इति रघुवंशे । तथा । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । निर्जयकृते विजयार्थं प्रयियासोः प्रयातुमिच्छोः तद्यशोधरणिभर्तुः कुमारश्लोकराजस्य । धरणिशब्दो ह्रस्वोऽप्यस्ति । यथा—'धरणिविरहिणि क्रान्तमुद्रे समुद्रे' इति नाटककाव्ये । अध्वानं मार्गं रुन्धतीत्येवंशीलान् जलधीन् । लवणस्वादूदकक्षीरोददधिमण्डघृतोदसुरोदकेक्षुरसनाम्नः जिनशासने सप्त समुद्राः । लवणसमुद्रकालोदधिपुष्करोदधिवारुणीसमुद्रघृतोदक्षीरोदधिइक्षुरससमुद्रनामानोऽर्णवाः सप्तसंख्याकान् गमनमार्गरोधकान् समुद्रान् रोद्धुमावरीतुं स्थलीकर्तुमिव रेणुभिः प्रसस्रे ॥

संयमाय समियाय कुमारः पत्तनोपविपिने दितदोषः ।
पूर्वपर्वतशिरःशिखराङ्के पद्मिनीपतिरिवाभ्युदयाय ॥ १९४ ॥

हीरकुमारः संयमाय चारित्रग्रहणार्थं पत्तनस्योपविपिने समीपोद्याने समियाय समा-

जगाम। क इव। पद्मिनीपतिरिव। यथा कमलिनीकान्तो भास्करः अभ्युदयाय उद्गमनार्थं पूर्वपर्वत उदयाचलः। 'पूर्वपर्वततिरोहितात्मनः' इति वस्तुपालकीर्तिकौमुदी-भ्रातृसुरथोत्सवकाव्ये। तस्य शिरसि मस्तके। उपरितनभागे इत्यर्थः। यच्छिखरं शृङ्गं तस्याङ्कं उत्सङ्गे समेति। किंभूतः कुमारः पद्मिनीपतिश्च। दिताः। 'दो अवखण्डने'। खण्डिताश्छिन्ना दोषा अपगुणा रात्रयश्च येन सः॥

कौतुकाद्भुवमुपेत्य वसन्तीं स्वःपुरीमिव पुरीमवगत्य।
आगतं किमनु नन्दनमत्रोद्यानमेष निपपौ नयनाभ्याम्॥ १९५॥

एष हीरकुमार उद्यानं विपिनं नयनाभ्यां निजनेत्राभ्यां कृत्वा पपौ सादरमवलोकयति स्म। उत्प्रेक्ष्यते—अत्र पत्तनसमीपे अनु पश्चादागतं किं नन्दनं देवराजवनमिव। किं कृत्वा। पृष्ठे समेतं कौतुकान्नागरिकनिकरविशिष्टरूपविविधविचेष्टितवीक्षणोद्भूतकौतूहला-द्भुवं भूमीमण्डलमुपेत्य अभ्यागत्य। 'भुवि समेत्य' इति वा पाठे भुवि पृथिव्यां समेत्यागत्य वसन्तीं वासं सृजन्तीं तस्थुषीं स्वःपुरीं स्वर्नगरीममरावतीमिव पुरीम् अणहिल्लपत्तन-रूपां नगरीमवगत्य ज्ञात्वा। 'ज्ञातं सितगते अवात्' इति हैम्याम्। तथा—'अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम्। स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समु-द्धृतम्॥' इति रघुवंशे॥

शारिकाशुकशिखण्डिकपोतीपोतकेलिकलनाकमनीयम्।
मत्तवारणविचित्रितसालं प्राविशद्गृहमिवोपवनं सः॥ १९६॥

स हीरकुमारो गृहं मन्दिरमिव उपवनं तत्पत्तनसमीपोद्यानं प्राविशत् प्रविशति स्म। किंभूतं गृहमुपवनं च। महेभ्यानां गृहे क्रीडाविनोदविधानार्थं विविधाः पक्षिणः स्युः। तदेव दर्शयति—शारिकाः पीतपादाः, शुकाः कीराः, शिखण्डिनो मयूराः, कपोतीनां पारावताङ्गनानाम्। 'परिणतरविगर्भव्याकुला पौरहूती दिगपि घनकपोती हुंकृतैः क्रन्थतीव' इति कालिदासकृतप्रभातवर्णनकाव्ये। पोताः शिशवः। अथवा कपोत्यः अत्यन्तविषयित्वात्कदाचिदपि कपोताः प्रियाणां पार्श्वं न मुञ्चन्त्यतः कपोताः कपोत्यः। तथा पोताः दशवर्षीया गजबालाः। 'पञ्चवर्षो गजो बालः स्यात्पोतो दशवार्षिकः' इति हैम्याम्। पोतसाहचर्यात्त-न्मातरः पितरोऽप्यागता एवेति। महेभ्यानां गृहेऽपि गजा भवन्ति। 'गजान्तलक्ष्मीः ध्वजान्तः प्रासादः' इति वचनात्। तेषां याः केलिकलनाः क्रीडाकरणानि तैः कमनीयं मनोज्ञम्। पुनः किंभूतम्। मत्तवारणः मदोद्धुरसिन्धुराः। पूर्वोक्तास्तु सामान्यगजाः, एते तु गन्धसिन्धुराः, अयं विशेषः। तथा विशिष्टाश्चित्रा आखुपर्णी समुद्राभिधाना वा औषधयस्ताभिर्युक्ता जाता। अथवा चित्रिता उरगविशेषाः। 'चित्रडि' इति प्रसिद्धाः। तैः सहिता जाता वा। वृक्षाणां कोटरेषु प्रायो भुजङ्गा भवन्ति। साला वृक्षा यत्र गृहे तु मत्तालम्बाः। 'मत्तालम्बोपाश्रयः स्यात्प्रग्रीवो मत्तवारणः' इति हैम्याम्। 'घोडला' इति प्रसिद्धाः। तथा विविधैश्चित्रैरालेख्यैः सहिता जाताः। श्लेषे शसयोरैक्यात्। शाला

चित्रशाला यत्र । 'चित्रा त्वाखुपर्णीसुभद्रयोः । गोदुम्बाप्सरसोर्दन्त्यां नक्षत्रौषधिभेदयोः' इत्यनेकार्थः । राजगृहे तु सुतरां स भवेदेव । यथा पाण्डवचरित्रे दमयन्तीप्रवासे— 'लीलाकुरङ्गकक्रीडासारिके केलिबर्हिणः । गृहपारावताः सद्म कीरवापीसितच्छदाः । प्रेयांसमनुगच्छन्तीमनुजानीत मां मनाक् ॥' तथा द्रौपदीप्रवासे—'हंहो बर्हिन्नहो हंस हले हरिणि हे शुक । कुशलं वस्त्वसौ देवाद्याति वः परिचालिका । इत्यापृच्छय पतद्बाष्पा केलिपात्राणि सर्वतः ॥' इति ॥

पुष्पपल्लवफलानि दधानाः शाखिनः स्मितशिखाग्रशयेषु ।
स्वागतं द्विजरवैः किमुदीर्यास्यातिथेयमतिथेरिह चक्रुः ॥ १९७ ॥

इह वने शाखिनो वृक्षाः अतिथेर्निजप्राघुणकस्य अस्य कुमारस्य आतिथेयमतिथिसत्क्रियां किमु चक्रुः कुर्वन्ति स्म । किं कृत्वा । द्विजानां स्वाङ्कस्थायुकानां पक्षिणां रवैः शब्दैः स्वागतं सुखेनागतं कुशलप्रश्नादिकं वा उदीर्य कथयित्वा । पृष्ट्वा वा इत्यर्थः । किं कुर्वाणाः शाखिनः । स्मिता विकसिता याः शिखाः स्वशाखास्ता एवाग्रहस्ता हस्ताग्राणि अथ वा तासां शिखानामग्राणि तान्येव शयाः पाणयस्तेषु पुष्पाणि कुसुमानि पल्लवाः प्रवालाः फलानि सस्यानि दधानाः धारयन्तः ॥

तत्र सस्यभरगौरवभाग्भिः कोकिलाक्वणितसंस्तववाग्भिः ।
पादपैरयमनम्यत वन्यैर्भाविसूरिपुरहूतधियेव ॥ १९८ ॥

तत्रोद्याने अयं कुमारः वन्यैः काननभवैः पादपैर्वृक्षैः अनम्यत नमस्कृतः । किंभूतैः पादपैः । सस्यानां फलानाम् । 'फलं तु सस्यम्' इति हैम्याम् । भराः समूहास्तेषां गौरवं भारं भजन्तीति । पुनः किंभूतैः । कोकिलानां कलकण्ठानां क्वणितानि कूजितानि पञ्चमालापास्तान्येव संस्तवः स्तुतिस्तद्युक्ता तद्रूपा वा वाग्येषाम् । उत्प्रेक्ष्यते—भाविनो भविष्यतः आचार्यपुरंदरस्य धिया बुद्ध्येव ॥ इत्युपवनम् ॥

कामनीयकमशेषममुष्यान्वेषयन्वटतरुं स ददर्श ।
श्रीतिरस्कृतसमग्रवनस्य छत्रमेतदिव मूर्ध्नि वनस्य ॥ १९९ ॥

स कुमारो वटतरुं प्लक्षवृक्षं ददर्श पश्यति स्म । किं कुर्वन्कुमारः । अन्वेषयन् विलोकयन् । किम् । अमुष्योद्यानस्याशेषं समस्तमपि कामनीयकं मनोज्ञताम् । कमनीयस्य भावः कामनीयकम् । मनोज्ञादित्वाद्वुञ् । 'कामनीयकमधःकृतकामम्' इति नैषधे । उत्प्रेक्ष्यते—श्रीभिः स्वशोभाभिः तिरस्कृतानि पराजितानि समग्राणि सर्वाण्यपि वनानि नन्दनचैत्ररथादीनि काननानि येन तादृशस्यास्य वनस्य पत्तनोपविपिनस्य मूर्ध्नि मस्तके एतन्महावटरूपेण दृश्यमानं छत्रमातपवारणमिव ॥

न्यक्षरुक्षनिकरेषु गुरुत्वं यद्बिभर्ति मनुजेष्विव भूमान् ।
गौरवात्किमिति लोलविहङ्गैर्वीज्यते स चमरैरिव पक्षैः ॥ २०० ॥

यो वटतरुर्लोलैरुड्डयनादितस्ततः पर्यटनाद्वा चपलैर्विहङ्गैः पक्षिभिः । उत्प्रेक्ष्यते—इति हेतोर्गौरवान्माहात्म्यात्किमु चमरैर्बालव्यजनैरिव । 'चमरश्चामरः' इति शब्दप्रभेदे । तथा 'चमरश्चामरे दैत्ये' इत्यनेकार्थः । पक्षैस्तनूरुहैर्वीज्यते स्म । इति किम् । यद्यस्मात्कारणात् न्यक्षाः समस्ता ये रुक्षाः पादपास्तेषां निकरेषु गणेषु गुरुत्वं महत्वं बिभर्ति धत्ते । क इव । भूमानिव । यथा मनुजेषु अशेषमनुष्येषु राजा गौरवं कलयति । पाठान्तरे—अथवा सर्ववृक्षेषु मखभुक्शिखरी सुरतरुः कल्पवृक्षो गुरुतां धत्ते ॥

रागिणः प्रणयतोऽखिललोकाञ्शैशवावधिजगज्जनगेयान् ।
तद्गुणानिव निशम्य सरागः पल्लवैरयमशालत शालः ॥ २०१ ॥

अयं शालो वटतरुः पल्लवैः किसलयैः अशालत शोभते स्म । उत्प्रेक्ष्यते—तद्गुणान् हीरकुमारस्य धैर्यौदार्यगाम्भीर्यशमदमादिमान् गुणान् निशम्याकर्ण्य सरागो रक्तो जात इव । गुणान् किं कुर्वतः । अखिलान् समस्तान् लोकान् नाकिनागररूपजनान् रागिणो निजानुरक्तान् प्रणयतः । पुनः किंभूतान् । शैशवावधि बाल्यावस्थां मर्यादीकृत्य जगतां पातालस्वर्गभूमीलक्षणानां भुवनानां जनैः सुरासुरनरैर्गेयान् गातुं योग्यान् ॥

वल्कलैः कलयतात्मनि भूषां बिभ्रता कपिशशालिजटालीम् ।
काननस्थितिमताजनि तेनातन्वता किमु तपो व्रतिनेव ॥ २०२ ॥

तेन वटद्रुमेण । उत्प्रेक्ष्यते—व्रतिनेव तापसेनेव तपः अनाहारलक्षणं कष्टं किमु कुर्वता अजनि जातम् । केनेव । व्रतिनेव । यथा तापसेन तपःकुर्वता जायते । किंभूतेन तेन व्रतिना च वल्कलैः वल्लीभिर्वृक्षविशेषत्वग्भिश्च । 'त्वचि वल्ली चोक्तं वल्कलम्' इति हैम्याम् । कृत्वा आत्मनि स्वस्मिन् विषये भूषां शोभां कलयता दधता । पुनः किंभूतेन । कपिशां पीतरक्ताम्, तथा शालिनीं शोभनशीलाम्, जटानां शिफानां वृक्षमूलानां सटानां सार्द्रभस्मभरैरेकीकृतकेशानां च । 'प्रकाण्डौघजटाः शिफाः', 'जटाः सटा' इति द्वयमपि हैम्याम् । 'जटा केशविकारे मांसिमूलयोः' इत्यनेकार्थः । आलीं श्रेणीं बिभ्रता धारयता । पुनः किंभूतेन । कानने वने स्थितिर्वासो विद्यते यस्य ॥

निष्कुहान्तरितविष्किरवारस्फारताररनिनदैर्वटशाखी ।
यो मरुत्तरलपल्लवहस्तैराह्वयन्निव निजान्तिक एतम् ॥ २०३ ॥

यो वटतरुः एतं कुमारम् । उत्प्रेक्ष्यते—निजान्तिके स्वसमीपे आह्वयन्नाकारयन्निवास्ते । कैः । निष्कुहान्तरितानां स्वकोटरव्यवहितानां तरुस्कन्धरन्ध्रमध्यगतानां विष्किराणां विहङ्गानां वारस्य समूहस्य स्फारैः स्पष्टैः पटुभिस्तारैरत्युच्चैः कृतैर्निनादैः कूजितैः । पुनः कैः । मरुता पवनेन तरलाश्चञ्चला ये पल्लवाः प्रवालास्त एव हस्ताः पाणयस्तैः कृत्वा चेत्यध्याहार्यम् ॥ इति दीक्षाग्रहणयोग्यवटद्रुमवर्णनम् ॥

शिश्रिये विजयदानयतीन्द्रः पूर्वमेव तदुपागमनाद्यम् ।
छाययाखिलजनं सुखयन्तं कः श्रयेन्न धनदाश्रयमत्र ॥ २०४ ॥

विजयदाननामा यतीन्द्रः सूरिः तदुपागमनात्कुमारस्यागमनात्पूर्वमेव प्रथममेव यं वटतरुं शिश्रिये श्रितवान् । प्रागेव तत्रागत्य निषण्ण इत्यर्थः । युक्तोऽयमर्थः । अत्र जगति छायया आश्रयेण। 'वयं श्रीमच्छायया जीवामः' इति लोकरूढिः। प्रतिच्छायिकया चाखिलजनं समस्तलोकं सुखयन्तं सुखीकुर्वन्तम्, तथा धनदानां वदान्यानां वैश्रवणस्य वा आश्रयं स्थानम् । 'वटो वैश्रवणाश्रयः' इति हैम्याम् । कः सुखार्थी पुमान्नाश्रयेन्न सेवेत । अपि तु सर्वोऽपि जनस्तं भजेदित्यर्थः ॥

तीर्थनाथमिव चैत्यतरोस्तत्पादपस्य सविधे स्थितिमन्तम् ।
संमदेन स कुमारमहेन्द्रस्त्रिः प्रदक्षिणयति स्म मुनीन्द्रम् ॥ २०५ ॥

स कुमारमहेन्द्रः हीरनामा । शिशुच(श)क्रः संमदेन हर्षेण कृत्वा मुनीन्द्रं श्रीविजयदानसूरिं त्रिः वारत्रयं प्रदक्षिणयति स्म प्रदक्षिणीकृतवान् । किंभूतं मुनीन्द्रम् । तस्य पूर्वव्यावर्णितस्य पादपस्य वटशाखिनः सविधे समीपे स्थितिरुपवेशनं विद्यते यस्य । कमिव । तीर्थनाथमिव । यथा महेन्द्रः पुरंदरश्चैत्यतरोरशोकद्रुमस्य केवलज्ञानोत्पत्तिस्थानकवृक्षस्य वा पार्श्वे तिष्ठन्तं जिनेन्द्रं त्रिःकृत्वः त्रिवारं प्रदक्षिणीकरोति । प्रभोः प्रदक्षिणात्रयं ददाति स्मेत्यर्थः ॥

उत्ततार तुरगात्स कुमारो बर्हिणादिव सुतः सुरसिन्धोः ।
श्रीगुरुं प्रमुदितश्च ललाटन्यस्तहस्तनलिनस्तमनंसीत् ॥ २०६ ॥

स हीरनामा कुमारस्तुरगादश्वादुत्ततार उत्तीर्णवान् । क इव । सुरसिन्धोः सुत इव । यथा सुरसिन्धोर्देवनद्याः गङ्गाया नन्दनः स्वामिकार्तिकः बर्हिणान्मयूरादुत्तरति । 'आवासवृक्षोन्मुखबर्हिणानि' इति रघुवंशे । उत्तीर्य च पुनस्तं महावीरदेवपट्टपरम्परायातं दीक्षादानगुरुं वा श्रीगुरुं शोभाकलितविजयदानसूरिम् अनंसीत् प्रणमति स्म । किंभूतः । प्रमुदितो हृष्टवदनः । पुनः किंभूतः । ललाटे स्वभालस्थले न्यस्तौ स्थापितौ हस्तौ पाणी एव नलिने कमले यत्र ॥

रामणीयकविधेरवधेर्मे भूषया वपुषि कृत्रिमया किम् ।
तत्यजे निजतनोरिति सर्वाङ्गीणभूषणभरः किमनेन ॥ २०७ ॥

अनेन हीरकुमारेण निजतनोः स्वाङ्गात् । उत्प्रेक्ष्यते—इति हेतोः सर्वाण्यङ्गानि व्याप्नोति । 'पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' इति सूत्रेण ख ईनादेशश्च । सर्वाङ्गीण इति सर्वाङ्गोपाङ्गसंबन्धी । भूषणानामाभरणानां भरः समूहस्तत्यजे त्यक्तः । सर्वानलंकारान्निजाङ्गादुत्तारयति स्मेत्यर्थः । इति किम् । तत्कारणमाह—रामणीयकस्य रमणीयताया मनोज्ञत्वस्य विधेः प्रकारस्य अवधेः सीमाया मे मम वपुषि शरीरे कृत्रिमया औपाधिक्या भूषया शोभया भूषणैर्वा । भूषाशब्देन भूषणान्यप्युच्यते । उक्तं तु प्राक्प्रतिपादितमास्ते । किमस्तु । न किमपीत्यर्थः । रमणीयस्य भावो रामणीयकम् । योपधाद्वुञ् ॥

षड्ग्रहेषुशशिसंख्यमितेऽब्दे कार्तिकस्य च तिथौ द्विकसंख्ये।
यन्निरस्तभवनिःश्वसितार्चिर्धूमवर्तिभिरिवाविशदास्ये॥ २०८॥
संयमं विजयदानमुनीन्दोराददे सह परैः स कुमारः।
पद्मिनीप्रियतमात्प्रविकाशं पुण्डरीकमिव पङ्कजपुञ्जैः॥ २०९॥

स हीरकुमारः परैरन्यैरमीपालकुमारप्रमुखैरपरकुमारैः सार्धं श्रीविजयदाननाम्नो मुनीन्दोः साधुसुधांशोः सूरीन्द्रात्सकाशात् संयमं चारित्रमाददे जगृहे। किमिव। पुण्डरीकमिव। यथा सिताम्भोजं पङ्कजपुञ्जैरन्यकमलकलापैः समं पद्मिनीप्रियतमात्सूर्यात् सकाशात्प्रविकाशं विकस्वरतामादत्ते। पुण्डरीकशब्दः प्राधान्यख्यापकः। 'पुरिसवर-पुण्डरीआणम्' इति शक्रस्तववचनात्। कस्मिन् सति। षड्रसमिता संख्या, ग्रहा आदित्याद्या इदानींतनलोकप्रसिद्धा नव, इषवः स्मरस्य बाणाः पञ्च, शशी चन्द्र एकः, एषां संख्यया प्रमाणेन मिते मानीकृते अब्दे वर्षे सति। च पुनः कस्मिन् सति। कार्तिकस्य बाहुलस्य। कार्तिकमासस्येत्यर्थः। द्विकसंख्ये द्विकसंख्या प्रमाणं यस्य तादृशे एतावता द्वितीयानाम्नि तिथौ। तिथिशब्दः पुंस्त्रियोः। 'प्रश्निस्तिथ्यशनीमणिश्रृणिः' इति लिङ्गानुशासने। तिथौ किंभूते। अविशदास्ये न विद्यते विशदमुज्ज्वलमास्यं मुखं प्रारम्भो वा यस्य। कृष्णद्वितीयायां प्रथमाश्चतस्रो घटिका निशा अन्धकारेण श्यामाः स्युः। उत्प्रेक्ष्यते—येन हीरकुमारेण निरस्तो ध्वस्तोऽभिभूतो यो भवः संसारस्तस्य निःश्वसितानि दुःखप्राग्भारोद्भूतनिःश्वासास्तान्येवार्चींषि अत्युष्णत्वाद्वह्नयस्तेषां धूमवर्तयो धूमलेखास्ताभिः। 'उष्णीकृतमुखे इव निःश्वासानलधूमवर्तय इवोद्गीर्णास्तमोराजयः' इति चम्पूकथायाम्। एतावता विक्रमार्कात् षण्णवत्यधिके पञ्चदशशते वर्षाणामतिक्रान्ते १५९६ कार्तिकबहुलद्वितीयायां हीरकुमारो दीक्षां जग्राहेति तात्पर्यार्थः। संवत् १५९६ वर्षे गुर्जरमण्डलानुसारेण कार्तिकवदि देवमासानुसारेण तु मार्गशीर्षासितद्वितीयायां तिथौ हीरकुमारदीक्षा इत्युक्तम्॥

संयमश्रियमवाप्य कुमारः साधिकं शरदमिन्दुरिवाभात्।
सोऽप्यनेन सुषमां श्रयते स्मार्थेन वागिव पुरीव नृपेण॥ २१०॥

स कुमारः संयमश्रियं चारित्रलक्ष्मीमवाप्यासाद्य। सहाधिकतया वर्तते यत्तत्साधिकमिति क्रियाविशेषणम्। आभात् बभासे। अथ वा स कुमारः अधिकं यथा स्यात्तथा बभौ। क इव। इन्दुरिव। यथा चन्द्रः शरदं घनात्ययं संप्राप्याधिकं शोभते। पाठान्तरार्थो यथा—स कुमारः संयमश्रियमुपेत्यागत्य। प्राप्येत्यर्थः। अधिक आभाद्भाति स्म। क इव। अत्रिनेत्रज इव। यथा अत्रिर्नामा मुनिविशेषस्तस्य नेत्रं नयनं तस्माज्जायत इत्यत्रिनेत्रजश्चन्द्रो यथा। यथा रघुवंशे—'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इति।

१. 'संयमश्रियमुपेत्य स चित्रामत्रिनेत्रज इवाधिकमाभात्' इति पाठान्तरम्.

चित्रां त्वाष्ट्रीं प्राप्याधिकं दीप्यते । अपि पुनः सा संयमश्रीरपि हीरकुमारेण कृत्वा सुषमामतिशायिशोभां श्रयते स्म । केव । वागिव । यथा काव्यादिरूपा सत्कविवाणी चतुरचेतश्चमत्कारकारकेणार्थेन सुषमां श्रयते । पुनः केव । पुरीव । यथा नगरी नीतिमता नृपेण सुषमां भजते ॥

हीरहर्ष इति नाम तदीयं निर्ममे विजयदानयतीन्द्रः ।
स्पर्धयेव यशसास्य जनानां कर्णपूरपदवीं तदवापत् ॥ २११ ॥

श्रीविजयदाननामा यतीन्द्रः सूरिः तदीयं हीरकुमारसंबन्धिनामाभिधानं हीरहर्ष इति निर्ममे कृतवान् । तन्नाम अस्य हीरहर्षमुनेः श्लोकेन साकं स्पर्धया संहर्षेणेव ईर्ष्यया वा कृत्वा जनानां सकलभूलोकलोकानां कर्णौ श्रवणौ पूर्येते अनेनेति कर्णपूरौ कर्णाभरणौ कुण्डलौ तयोः पदवीं मार्गमैश्वर्यादिमयं स्थानं श्रूयमाणतापदं वा अवापत् प्राप॥

नभोङ्गणान्निर्जरहस्तमुक्तामरन्दलुभ्यन्मधुपानुषङ्गे ।
पपात तस्योपरि पुष्पवृष्टिः कटाक्षलक्षा इव मोक्षलक्ष्म्याः ॥२१२॥

नभोङ्गणादाकाशात्तस्योपरि पुष्पवृष्टिः कुसुमवर्ष पपात जाता । किंभूता । निर्जराणां देवानां हस्तैः करैः मुक्ता । पुनः किंभूता । मरन्देषु अविरलानर्गलगलन्मधुषु लुभ्यतां लुब्धीभवतां लोलुपीभावभाजां मधुपानां भ्रमराणामनुषङ्गो यस्याम् । उत्प्रेक्ष्यते—मोक्षलक्ष्म्याः मुक्तिश्रियाः कटाक्षाणामक्षिविकूणितानां लक्षाः शतसहस्राणि इव । लक्षशब्दः स्त्रीक्लीबयोः । 'माने लक्षम्' इति लिङ्गानुशासने ॥

महाव्रती कालमनोभवारिमहोक्षलीलागतिगौरकान्तिः ।
शिवाश्रितः शंभुरिव क्रमेणैशानीं दिशं पूर्वमसौ बभाज ॥२१३॥

अयं हीरहर्षमुनिः क्रमेण दीक्षाग्रहणानन्तरं पूर्वं प्रथममैशानीं दिशमीशानविदिशं बभाज श्रितवान् । तस्यां विहारं कृतवानित्यर्थः । दीक्षितो हि तपस्याग्रहणानन्तरं प्रथममैशानीं दिशं प्रति विहरतीति विधिः । क इव । शंभुरिव । यथा ईश्वर ऐशानीं दिशं तदधिपत्वात् । कथंभूतोऽयं शंभुश्च । महाव्रती पञ्चमहाव्रतवान् शंभुनामा च । 'महाव्रती वह्निहिरण्यरेताः' इति हैम्याम् । महाव्रत कापालिलिङ्गमस्यास्तीति व्युत्पत्तिः । कालः कलिकालः मनोभवः स्मरस्तयो रिपुः । 'कालो यमे दैत्ये च' । मृत्युंजयः कालारिः स्मरदाही च शिवः । पुनः किंभूतः । महानुक्षो मत्तवृषभस्तद्वद्गतिर्गमनं यस्य । 'मत्तोक्षगमनः पुमान्' इति काव्यकल्पलतायाम् । मत्तो(हो)क्षेण गमनं यस्य वृषभवाहनत्वात् । पुनः किंभूतः । गौरा स्वर्णवर्णा कान्तिर्यस्य । पक्षे—श्वेता वर्णेन भस्मना वा रुचिर्यस्य । 'गौरः श्वेतेऽरुणे पीते विशुद्धे चन्द्रमस्यपि' इत्यनेकार्थः । पश्चात्कर्मधारयः । पुनः किंभूतः । शिवैर्मङ्गलैः शिवया पार्वत्या च आश्रितः अर्धशंभुत्वात् ॥

कलभो यूथनाथेन यद्वद्दम्यः ककुद्मता।
हीरहर्षः समं सूरिशक्रेण विजहार सः २१४॥

स हीरहर्षमुनिः सूरीशक्रेण श्रीविजयदानसूरीन्द्रेण समं सार्धं विजहार विहारं कृतवान्। किंवत्। यद्वत्। यथा कलभो बालगजः यूथनाथेन षष्टिवर्षीयगजराजेन समं विहरति। पुनर्यद्वद्यथा दम्यो वत्सतरः पुष्टो वत्सः प्रौढवृषभेण सह विहरति। 'दम्यो वत्सतरः समौ' इति हैम्याम्। यद्वच्छब्द इवार्थे। डमरुकमणिवल्लालाघण्टान्यायेनोभयत्रापि संबध्यते॥

प्रीतिर्जिनेषु वृजिनेषु न तस्य जज्ञे
योगं व्यगाहत मनो न कदापि भोगम्।
अङ्गीचकार विरतिं न रतिं कदाचि-
न्नव्योऽप्यनव्य इव सोऽजनि साधुधुर्यः॥ २१५॥

स हीरहर्षनामा साधुषु यतिषु धुर्यो धुरीणः नव्योऽपि नवदीक्षितोऽपि अनव्यः पुरातन इव बहुकालीनमुनिरिवाजनि संजातः। तदेव दर्शयति—तस्य हीरहर्षमुनेः जिनेषु तीर्थकरेषु प्रीतिः स्नेहस्तत्परता, परं वृजिनेषु हार्दं न जज्ञे। 'स्नेहः प्रीतिः प्रेम हार्दम्' इति हैम्याम्। तस्य मनः योगं यमनियमाद्यष्टाङ्गलक्षणां सर्वविरतिमङ्गीचकार। पुनः कदापि कस्मिन्नपि क्षणे रतिं चिन्तासक्तिम्। 'वृद्धास्विव गतप्रायासु वर्षासु रतिमकुर्वाणः' इति चम्पूकथायाम्। रतिं चिन्तासक्तिमिति तट्टिपनके। अथ वा रतिमनुरागं मैथुनादिकं वा॥

सूरीन्दोः संनिधौ श्रीमान्कुमारश्रमणोऽनिशम्।
संतानस्य नवोन्निद्रत्पारिजात इवाबभौ॥ २१६॥

श्रीमानतिशायिशोभावान् कुमारश्रमणः हीरहर्षसाधुः अनिशं निरन्तरं सूरीन्दोर्विजयदानसूरिचन्द्रस्य संनिधौ पार्श्वे बभौ। क इव। नवोन्निद्रत्पारिजात इव। यथा नवीनो बाल उन्निद्रद्विकस्वरीभवन्कुसुमादिकलितो जायमानः पारिजातो विशिष्टकल्पवृक्षः संतानस्य नाम्नो देवद्रुमस्य समीपे भाति। 'कल्पः पारिजातो मन्दारो हरिचन्दनः। संतानश्च' इति पञ्चसु कल्पतरुषु मध्ये कविसमये पारिजातस्यैव प्राधान्यं दृश्यते प्रायः। यथा रघुवंशे—'तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये। रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः॥' इति॥

श्रमणधरणीभर्तुः पादारविन्दनिषेवना-
त्प्रमुदितमना नाथीदेवीतनूजयतीश्वरः।

अनुपमशमक्षीराम्भोधौ विलासरसं सृज-
न्सितगरुदिवामन्दानन्दं दिनानि निनाय सः ॥ २१७ ॥

स नाथीदेव्यास्तनूजो नन्दनः स एव यतिनां मध्ये । 'यतिश्च यतिनि प्रोक्तः' इति शब्दप्रभेदे । ईश्वरो मुख्यः हीरहर्षमुनीन्द्रो दिनानि शुद्धसंयमविधिना वासरान्निनाय अतिवाहयामास । अतिक्रामति स्मेत्यर्थः । किंभूतः । श्रमणानां साधूनां भर्तुः स्वामिनो विजयदानसूरेः पादारविन्दनिषेवनया चरणकमलपरिचर्यया कृत्वा प्रमुदितमाह्लादयुक्तं जातं मनो यस्य । किं कुर्वन् । अनुपमो न विद्यते उपमा साम्यं यस्य । साधारण इत्यर्थः । तादृशो यः शमः शान्तरसाकलितपरिणामः स एव क्षीराम्भोधिर्दुग्धजलनिधिस्तत्रामन्दो बहुल आनन्दो यत्रैवं यथा स्यात्तथा विलासरसं क्रीडास्वादम् । आस्वादोऽनुभवने । अथ वा विलासे क्रीडायां रसमनुरागं सृजन् कुर्वन् । 'रसः स्वादे जले वीर्ये शृङ्गारादौ द्रवे विषे । बोले रागे देहधातौ तिक्तादौ पारदेऽपि च ॥' इत्यनेकार्थः । क इव । सितगरु-दिव । यथा सितच्छदो हंसः परमानन्दः सन् क्षीरसमुद्रे विलासरसं जलक्रीडारसं सृजति हंसानां सद्भावः क्षीरसमुद्रेऽपि दृश्यते । यथा स्नातस्यास्तुतौ—'हंसासाहतपद्म-रेणुकपिशक्षीरार्णवाम्भोभृतैः' इति ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मी क्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽभवत्पञ्चमः ॥ २१८ ॥

इति पण्डितदेवविमलगणिना व्यावर्णिते वर्णनागोचरीकृते हीरसौभाग्यनाम्नि महा-काव्ये पञ्चमः सर्गः अभवज्जातः ॥

इति पण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ श्रीविजयदान-सूरिवन्दनदेशनाश्रवणवैराग्यभवनविमलाभगिन्यादिकादेशमार्गणविविधयुक्तिनिषेधनदा-र्ढ्याधिमननपूर्वकादेशप्रदानशृङ्गारभूपादिपरिधानवर्ण्याश्वारोहणतौर्यत्रिकादिमहोत्सवपु-रःसरपुरमध्यप्रस्थानपौराङ्गनाविविधचेष्टनतन्नानाप्रकारवार्ताश्रवणोपवनवटद्रुमवर्णनदी-क्षाग्रहणनामस्थापनविहारादिवर्णनो नाम पञ्चमः सर्गः ॥

षष्ठः सर्गः ।

अथ सूरिपुरंदरान्तिके निखिलं वाङ्मयमामनन्नयम् ।
गणधारिसुधर्मसंनिधाविव जम्बूः सुषमामपूपुषत् ॥ १ ॥

अथ दीक्षाग्रहणानन्तरं सूरिपुरंदरस्य विजयदानसूरीन्द्रस्यान्तिके समीपे निखिलं समग्रं वाङ्मयं शास्त्रमामनन् पठन् अभ्यसन् वा । 'म्ना अभ्यासे' इत्यस्य धातोर्मनादेशः

'पठत्यामनति' इति क्रियाकलापे । अयं हीरहर्षनामा मुनिः सुषमां सातिशयशोभामपूपुषत् पुष्णाति स्म । अधिकं शुशुभे इत्यर्थः । क इव । जम्बूरिव । यथा श्रीमहावीरदेवेनानुज्ञातं गणं साधुगच्छं धरतीत्येवंशीलो यः सुधर्मस्वामी सुधर्मनामा पञ्चमगणधरः तस्य संनिधौ पार्श्वे शास्त्रमधीयानो जम्बूस्वामी सुषमां पुपोष ॥

श्रुतमत्र गणीन्दुनामुना निहितं स्फूर्तिमनुत्तरां दधौ ।
इव शुक्तिकसंपुटान्तरे सलिलं स्वातिमिलत्पयोमुचा ॥ २ ॥

अमुना विजयदाननाम्ना गणीन्दुना सूरिचन्द्रेण अत्र हीरहर्षमुनौ निहितं स्थापितमर्थादध्यापितं सत् श्रुतं शास्त्रमनुत्तरामसाधारणीं स्फूर्तिं चमत्कारकारितां दधौ धत्ते स्म । किमिव । सलिलमिव । यथा स्वातिनक्षत्रेण मिलता संगच्छमानेन पयोमुचा मेघेन । शुक्तिकयोः संपुटस्यान्तर्मध्ये निहितं जलमद्भुतामद्वैतमुक्ताकारतया स्फूर्तिं बिभर्ति ॥

अधिगत्य ततः श्रुतं व्रतिक्षितिभर्तुर्दधिरेऽमुना श्रियः ।
सुरभेः समिरेण[1] सौरभं मलयोर्वीरुहकाननादिव ॥ ३ ॥

अमुना हीरहर्षमुनिना ततस्तस्माद्विजयदानाभिधानाद्व्रतिक्षितिभर्तुः सूरेः सकाशात् श्रुतं शास्त्रमधिगत्य प्राप्य । 'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः' इति नैषधे । श्रियः शोभा दधिरे धृताः । केनेव । समिरेणेव । यथा सुरभेर्वसन्तस्य समिरेण[2] मलयानिलेन मलयोर्वीरुहाणां चन्दनानां काननाद्वनात्सौरभं सुगन्धितां परिमलं प्राप्य शोभा ध्रियते ॥

स्खलति स्म न कुत्रचिद्वचोरचनास्यागमपारदृश्वनः ।
ह्रदिनीहृदयेशितुश्चलज्जलकल्लोलपरम्परा किमु ॥ ४ ॥

आगमानां जैनसिद्धान्तानां पारं प्रान्तं दृष्टवानित्यागमपारदृश्वा तस्य । आगमपारगामिन इत्यर्थः । अस्य हीरहर्षमुनेर्वचोरचना वाक्चातुरी वचनविलासो वा कुत्रचित्क्वापि स्थाने न स्खलति स्म न कुण्ठीभूता । सर्वत्राप्यस्खलितप्रचारैवासीदित्यर्थः । केव । चलज्जलकल्लोलपरम्परेव यथा ह्रदिनीनां नदीनां हृदयेशितुर्हृदयनायकस्य । 'हृदयेशा प्राणसमा' इत्यादिनामानि स्त्रीभर्त्रोर्भवन्ति । तथा—'हृदयनायकचक्रिजिनश्रियोः' इति ऋषभनम्रस्तवे । प्राणवल्लभस्य समुद्रस्य चलन्ती दिशि दिशि प्रसरन्ती जलानां कल्लोलानां तरङ्गाणां परम्परा श्रेणी क्वापि न स्खलति । किमु अत्रेवार्थे ॥

असमानमहा दिनेशवन्मतिमांश्चित्रशिखण्डिपुत्रवत् ।
भटवच्चरणोल्लसन्मना विनयी यो रघुसूनुवद्व्यभात् ॥ ५ ॥

यो हीरहर्षमुनिर्व्यभात् बभौ । किंभूतः । असमानमसाधारणं महः प्रतापो यस्य परैः परवादिभिः परपाक्षिकैः स्वपाक्षिकैर्वा असहनीयप्रतापः । किंवत् । दिनेशवत् दिवस-

१.-२. समिरशब्दस्य ह्रस्वमध्यस्य कोशव्याकरणाप्रसिद्धत्वेन 'समरेण' इति पाठ्यम्.

नायक इव । यथा भास्करः अन्यासह्यप्रतापो भवेत् । पुनः किंभूतः । मतिमान् कुशाग्रतीक्ष्णबुद्धिर्विद्यते यस्य । किंवत् । चित्रशिखण्डिपुत्रवद्यथा बृहस्पतिरद्वैतप्रज्ञावान् वर्तते । 'जीवश्चित्रशिखण्डिजः' इति हैम्याम् । तथा 'विचित्रवाक्चित्रशिखण्डिनन्दनः' इति नैषधे । विचित्रवाग्विषये चित्रशिखण्डिनन्दनो बृहस्पतिरेवेति तद्वृत्तिः । पुनः किंभूतः । चरणे चारित्रे उल्लसत्प्रोल्लासेन प्रह्लादेन कलितं मनश्चित्तं यस्य । किंवत् । भटवत् । यथा—शूरो रणे संग्रामे उल्लसत्सोत्सुकीभवत्साभिलाषं वा जायमानम् । 'विग्रहमिच्छन्ति भटा वैद्याश्च व्याधिपीडितं लोकम् । मृतकबहुलं च विप्राः क्षेमसुभिक्षं च निर्ग्रन्थाः ॥' इति वचनात् । मनो यस्य । च पुनरर्थे । पुनः किंभूतः । विनयी विनयकलितः । किंवत् । रघुसूनुवल्लक्ष्मणवत् । 'विनये लक्ष्मणः' इति काव्यकल्पलतायाम् । अथ वा विशिष्टः शास्त्रागमप्रोक्तो नयो न्यायोऽस्त्यस्मिन्निति । किंवत् । रघुसूनुवद्रामचन्द्र इव । 'न्याये रामः' इत्यपि काव्यकल्पलतायाम् ॥

गिरिराज इव क्षमाधरो बुधलक्ष्मीं दधदभ्रमार्गवत् ।
जलजासनवद्भवान्तकृद्व्रतधुर्यः स महोक्षवद्बभौ ॥ ६ ॥

स हीरहर्षमुनिर्बभौ भाति स्म । किंभूतः । क्षमां क्षान्तिं निष्कोपतां धरतीति । क इव । गिरिराज इव । यथा हिमाचलः क्षमाधरः पृथ्वीधारकः कुलाचलत्वात् । यद्यपि 'कूर्मकुलाचलफणिपतिविधृतापि चलति वसुधेयम्' इति सूक्तोक्तेः 'हिमालयो नाम नगाधिराजः' इति कुमारसंभवे मेरुर्वा । मेरोरपि गिरिपतित्वं यथा—'पातालमाविशतु यातु सुरेन्द्रलोकमारोहतु क्षितिधराधिपतिं सुमेरुम् । मन्त्रौषधैः प्रहरणैश्च करोतु रक्षां यद्भावि तद्भवति नात्र विचारहेतुः ॥' इति सूक्तावल्याम् । क्षमाधरत्वं तु शैलत्वात्कुलगिरित्वाद्वा । पुनः किं कुर्वन् । दधत् धारयन् । काम् । बुधत्वेन चिद्वत्तया लक्ष्मीं शोभाम् । किंवत् । मार्गवत् । यथा अभ्राणां मेघाणां मार्ग आकाशः । 'सुराभ्रोडुमरुत्पथोऽम्बरम्' इति हैम्याम् । बुधस्य चन्द्रपुत्रस्य ग्रहविशेषस्य लक्ष्मीं श्रियं बिभर्ति । 'बुधः सौम्ये कवौ' इत्यनेकार्थः । पुनः किंभूतः । भवान्तकृत्संसारोच्छेदकः । किंवत् । जलजासनवत् । यथा कमलासनो ब्रह्मा भवान्तकृन्नामास्ते । पुनः किंभूतः । व्रते चारित्रे धुर्यः पञ्चमहाव्रतभारोद्धारैकधुरीणः । किंवत् । महोक्षवद्यथा वृषभो धुरंधरः स्यात् ॥ इति हीरहर्षगणे पठनसमयगुणवत्त्वम् ॥

तरुणी तपनात्मजन्मनो हरिदास्ते भुवि नाम दक्षिणा ।
किमु कस्यचनापि कोपिनो व्रतिनः स्वर्निपपात शापतः ॥ ७ ॥

भुवि पृथिव्यां तपनात्मजन्मनो भानुनन्दनस्य यमस्य तरुणी गृहिणी हरिद्दिगास्ते । किं नाम । दक्षिणा अपाचीनाम्नीत्यर्थः । यद्यपि तरुणीशब्देन युवती कथ्यते सामान्येन गृहिण्या अप्यभिधानं दृश्यते । यथा चम्पूकथायां नलं प्रति प्रहितकिंनरेण सायं किंनरीं प्रत्युक्तम्—'अजनि रजनिः किमेतत्तरणिस्तरतीव पश्चिमपयोधौ । घनतरुणि

तरुणि विपिने क्वचिदस्मिन्नेव निवसामः ॥' इति दिशोऽपि स्त्रीत्वम् । 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित् ।' तथा 'वरुणगृहिणीमाशामासादयन्तममुं रुची' इति पदद्वयमपि नैषधे । तेन इदमपि तद्वत् । उत्प्रेक्ष्यते—कस्यचनाप्यनिर्दिष्टनाम्नः कोपिनो रोषवतः व्रतिनस्तापसस्य शापतः शापवशात्स्वः स्वर्गः निपपात उच्चैः स्थानादधोभूमौ त्रुटित्वा निपतितः इति परशासनकविसमयवर्णनमात्रमेव । यथा कादम्बरीकथायां केनापि तापसेन तापसः कश्चित्त्वरितं गच्छन् शप्तः । 'यतस्त्वं मामवन्दित्वैव तुरगवद्गच्छसि ततस्त्वं तुरगो भव ।' स तथैव जातः । तथा 'मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम्' इति रघौ । परं न जैनं वच इति ॥

वसति स्म घटोद्भवो मुनिर्दिशि यस्यां चिरमुज्झितान्यदिक् ।
किमु शम्बरवैरिविभ्रमैर्युवतीभिर्युववद्विमोहितः ॥ ८ ॥

घटात्कुम्भादुद्भव उत्पत्तिर्यस्य तादृशो मुनिरगस्तितापसः यस्यां दक्षिणस्यां दिशि चिरं गलितावधिकालं वसति स्म स्थितिमानजनि किम् । उज्झिता त्यक्ता अन्याः पूर्वादिकास्तिस्रो दिशो येन । उत्प्रेक्ष्यते—युवतीभिर्दाक्षिणात्यतरुणीभिः शम्बरनाम्नो दैत्यस्य वैरिणो हन्तुः स्मरस्य । 'अरी शम्बरशूर्पकौ' इति हैम्याम् । विभ्रमैर्विलासैर्युववत्तरुण इव विशेषेण मोहितः । मोहमत्यनुरागं स्नेहातिशयं वा । मोहं मूर्च्छामविद्याम् । यथा अनेकार्थनाममालायाम्—'मोहो मूर्च्छाविपर्ययौ' । "मूर्च्छाविद्या । 'न मुञ्चामः कामानहह विषमो मोहमहिमा" इति तदवचूरिः । अविद्या अहंमत्यज्ञाने प्रापितः किमु नीत इव ॥

स्मरविष्टपजैत्रशस्त्रितस्त्रितरोदीर्णविनोदविभ्रमात् ।
व्रजतीव कुतूहलीक्षितुं किमु मन्दीभवदङ्घ्रिरंशुमान् ॥ ९ ॥

अंशुमान् सूर्यः इह दक्षिणस्यां दिशि व्रजति । किंभूतः । मन्दीभवन्तः वीक्षणरसाद्गमने अत्वरिता जायमानास्तेजोभिः प्रतापैः रहिता वा भवन्तो जायमानाः । 'दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि' इति रघुवचनात् । अङ्घ्रयश्चरणाः किरणा वा । अङ्घ्रिशब्देन किरणा अप्युच्यन्ते । यथा नैषधे—'साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन् भानुमान्' इति । किंभूतः । कुतूहलं कौतुकमस्यास्तीति । अत एवोत्प्रेक्ष्यते—स्मरस्य कन्दर्पस्य विष्टपानां त्रयाणां भुवनानां तात्स्थ्यात्तद्व्यपदेशान्नाकिनागनागराणां जैत्रशस्त्रिताभिर्जयनशीलप्रहरणवदाचरिताभिस्त्रितराभिः प्रधानस्त्रीभिः । 'रहः सहचरी राजन्नेतामपि स्त्रितरा क्षणम्' इति नैषधे । स्त्रितरां श्रेष्ठामिति तद्वृत्तिः । 'ह्रस्वो वा, स्त्रियां कापि तरादौ च परे ह्रस्वो वा भवति । वेणीका श्रेयसीतरा प्रेयसितरा' इति सारस्वते । तथा स्त्रितरा स्त्रीतरा इति । उदीर्णाः स्वभावेन प्रकटीकृता विनोदा हास्यक्रीडानृत्यगीतादिका विभ्रमा हावभावविलासाः । अथवा विनोदेन परस्परानन्दक्रीडाहास्येन विलासास्तानीक्षितुं मोचयितुं किमु व्रजति । दक्षिणदेशविचक्षणनारीति लोकप्रसिद्धिः ॥

शमनस्य मृगीदृशो दिशो मणिमुक्ताफलशालमानया।
सरितां दयितस्य वेलया विलसन्मेखलयेव दिद्युते॥ १०॥

सरितां नदीनां दयितस्य भर्तुः समुद्रस्यार्थाद्दक्षिणोदधेर्वेलया। 'वेला स्याद्वृद्धिरम्भसाम्' इति हैम्याम्। दक्षिणदिशि वेलया दिद्युते शमनस्य धर्मराजस्य मृगीदृशः पत्न्याः स्त्रिया दिशो दक्षिणाशाया दक्षिणदिङ्मृगीदृशः मणिभिर्विविधरत्नैस्तथा मुक्ताफलैर्मौक्तिकैः शालमानया शोभमानया विलसन्त्या आश्लिषन्त्या। 'लस श्लेषणक्रीडनयोः'। अयं धातुः। मेखलया काञ्च्येव। 'खगकालकलत्रदिग्भवः' इति नैषधे॥

तिलकं हरितामसावमूं जिनमाणिक्यविभुर्यतः श्रितः।
किमपाच्यपयोनिधिः स्वनैरिदमावेदयते तरङ्गजैः॥ ११॥

अपाच्यो दाक्षिणात्यपयोनिधिः समुद्रः दक्षिणार्णवस्तरङ्गजैः निजलोलकल्लोलकलापजन्मभिः स्वनैर्गम्भीरनिर्घोषैः इदमस्मिन्नेव काव्ये कथ्यमानमावेदयते। अर्थाल्लोकानां कथयतीव। [णि]जन्तानां धातूनामुभयपदं स्यात्। तेनात्रात्मनेपदम्। तथा च प्रक्रियाकौमुद्याम्—'णिचश्च'। 'णिजन्ताद्धातोरात्मनेपदमपि स्यादात्मगामिनि कर्तृफले। चोरयति चुरादेर्णिच्। अनेन सूत्रेण णिजन्तत्वे आत्मनेपदे चोरयते तथात्रापीति बोध्यम्। इदं किम्। यदसौ हरिद्दक्षिणा दिक् हरितां पूर्वापरोत्तराणां दिशां तिलकं विशेषकम्। यतः कारणादमूं दक्षिणां दिशं जिनप्रथमस्तीर्थकरः माणिक्यनामा विभुः स्वामी भरतेन स्वमुद्रामाणिक्यनिर्मापितस्तन्नामैव माणिक्यस्वामी श्रितः। वैताढ्यशैलादागत्यात्रैव स्थितिमतानीत्। यत्कारणादगस्तिर्मुनिरप्यमूं दिशं श्रितः। तिस्रो हरितस्त्यक्त्वा अत्रैव तिष्ठतीत्यर्थः। इयं तु परसमयानुसारिण्यनुमानमात्रेणैवोक्तिः। इति केवलदक्षिणदिक्॥

अथ तत्र केषांचित्पदार्थानां वर्णनावसरः—

मलयो मलयद्रुमेदुरः शुशुभे यत्र सुमेरुसोदरः।
शमनस्य विलाससानुमानिव रन्तुं निजदिङ्मृगीदृशा॥ १२॥

यत्र दक्षिणस्यां दिशि मलयो नाम पर्वतः दक्षिणाचलः शुशुभे भाति स्म। किंभूतः। उच्चैस्तरत्वेन सुमेरोः काञ्चनाचलस्य सोदरो बन्धुः। सदृश इत्यर्थः। पुनः किंभूतः। मलयद्रुमैश्चन्दनतरुभिः मेदुरः पुष्टः। भृत इत्यर्थः। उत्प्रेक्ष्यते—शमनस्य यमस्य निजस्यात्मनो या दिग्दक्षिणा हरित्सैव मृगीदृक् हरिणेक्षणा पत्नी तया सार्धं रन्तुं विविधं विनोदं विधातुं विलाससानुमान् क्रीडापर्वत इव॥

मलयो बलिवेश्मवद्बभौ कलयन्कुण्डलिमण्डलीरिह।
विशदामृतकुण्डमण्डितो धृतपुंनागबलाहकोत्सवः॥ १३॥

इह दक्षिणस्यां दिशि मलयो गिरिराशाचलो बलिवेश्मवन्नागलोक इव बभौ। किं

कुर्वन्। कुण्डलिनां गन्धशैत्यलोभाच्चन्दनद्रुमान् परिरभ्य स्थितानां नागानां मण्डलीः कलयन्। 'चन्द्रे लाञ्छनता हिमं हिमगिरौ क्षारं जलं सागरे रुद्धाश्चन्दनपादपा विषधरैरम्भोरुहं कण्टकैः'। तथा—'दोजीहा वंकग्गया जइ विसहरा न हुंति। ता चंदण तुह छांहडी वहुसज्जण निवसंति ॥' इति सूक्ते। तथा—'विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः' इति नैषधेऽपि। नागलोकोऽपि नागश्रेणीभिर्भृतः। पुनः किंभूतः। विशदानि निर्मलान्यच्छानि श्वेतानि च यान्यमृतानां नीराणां सुधानाम्। 'अमृतं गगने हृद्ये स्वर्णतोये रसायने। कैवल्ये गोरसे यज्ञशेषे माक्षीकवर्णयोः ॥ सुधायाचितयो रत्ने चन्द्रे च' इत्यनेकार्थतिलकः। कुण्डानि दृषद्बद्धनिम्नजलस्थानानि तैर्मण्डितो भूषितः। पाताले तु नवसंख्याकानि सुधाकुण्डानि सन्तीति कविसमयः। पुनः किंभूतः। धृताः पुंनागाः सुरपर्णिका वृक्षविशेषा येन। पक्षे—पुमान्नागो वासुकिः सर्पराजो येन। 'धूर्जटिजटाजूट इव पुंनागवेष्टितो वापीपरिसरः' इति चम्पूकथायाम्। पुंनागो वासुकिरिति तट्टिप्पणके। तथा बलाहकानां बकानामुत्सवः सुरतक्रीडागर्भप्रसवादिर्यत्र वर्षाकाले हि बकाः क्वापि नीडान् विधाय प्रावृट् उपविशन्ति। 'पावस बक बइठा' इति लोकप्रसिद्धम्। अथ वा बलाहकानां मेघानामुत्सव उन्नमनमत्र। मेघा हि प्रायो गिरिषु सर्वदैव भवन्ति। 'शरत्प्रवासिताः सन्तः पुनस्तत्कमलाप्तये। शैलादौ क्वापि तिष्ठन्ति तपस्यन्त इवाम्बुदाः ॥' इति वचनात्। पक्षे बलाहको नागविशेषः। 'अथ कम्बलाश्वतरधृतराष्ट्रबलाहकाः। इत्यादयः परे नागाः' इति हैम्याम्। तस्योत्सवो महो हर्षोल्लासः। 'बलाहकोऽम्बुदे शैले दैत्ये नागे हयान्तरे। बके च' इत्यनेकार्थतिलकः ॥

मलयो मलयद्रुसौरभैः प्रतिदिक्षु प्रहितैर्नरैरिव।
रसिकायितदिग्विलासिनीर्निजभूमौ ह्वयतीव खेलितुम् ॥ १४ ॥

मलयः पर्वतः कर्ता प्रतिदिक्षु समन्तात्सर्वदिशासु। 'आपं चैव हलन्तानां यथा वाचा निशा दिशा' इति सारस्वतव्याकरणे प्रक्रियायां च। प्रहितैः प्रेषितैर्नरैः स्वसेवकपुरुषैरिव। उत्प्रेक्ष्यते—मलयद्रुमाणां श्रीखण्डपादपानां सौरभैः परिमलैः कृत्वा रसिका इवाचरिता इति रसिकायितास्तादृशीर्दिग्विलासिनीर्दिगङ्गनाः। कर्मपदम्। खेलितुं क्रीडां विधातुं निजभूमौ आत्मीयविनोदस्थाने ह्वयत्याकारयतीव ॥

यदुदीतसमीरणः समं प्रसरच्चन्दनसारसौरभैः।
कटकैर्विजयीव भूपतिर्निखिलाशा अपि पर्यपूरयत् ॥ १५ ॥

यस्मान्मलयाचलादुदीतः प्रकटीभूतः समीरणः पवनः। मलयानिल इति प्रसिद्धः। समं समकालमतिवेगवत्तया चतुर्दिक्प्रसृतत्वाच्चैकसमयमेव निखिलाशाः समग्रा अपि दिशः पर्यपूरयद्व्याप्नोति स्म। भरति स्मेत्यर्थः। कैः। प्रसरद्भिरविरलं निःसरद्भिश्चन्दनानां गन्धसारतरूणां सारैः प्रकृष्टैः सौरभैः सुगन्धताभिः परिमलैः। क इव। भूपति-

रिव । जयनशीलो विजयी राजा कटकैः स्वसैन्यैः कृत्वा सकला अप्याशाः पूरयति ॥ इति मलयाचलः ॥

इह शंकरभूमिभृत्सुखंकरमाणिक्यविभुर्विभासते ।
महिषाङ्कदिगङ्गनामुखे किमु माणिक्यमयो विशेषकः ॥ १६ ॥

इह दक्षिणदिशि शंकरनामा यो भूमिभृद्राजा तस्य रोगोपशामकत्वेन सुखंकरः शर्मकर्ता माणिक्यनामा विभुः स्वामी विभासते भाति । उत्प्रेक्ष्यते—महिषः कासरः स एवाङ्कश्चिह्नं यस्यैतावता महिषवाहनो यमः । 'दृश्यते खलु वाह्यत्वे वृषस्य वृषवाहनः । तथा धार्यत्वे वृषलाञ्छनः । 'तथा वृषाङ्कोऽपि' इति हैम्याम् । तथा महिषाङ्को महिषवाहनो यमः तस्य दिग्दक्षिणाशा सैवाङ्गना गृहिणी तस्या मुखे माणिक्यमयो नीलरत्नघटितो विशेषकस्तिलक इव ॥

विविधाभरणप्रभाङ्कुरच्छुरिता या जिनमूर्तिराबभौ ।
किमशेषयशःप्रशस्तिका प्रथमार्हत्तनुजन्मचक्रिणः ॥ १७ ॥

या माणिक्यस्वामिनो मूर्तिः प्रतिमा आबभौ । किंभूता । विविधान्यनेकप्रकाराणि यान्याभरणान्यलंकारास्तेषां प्रभाणां कान्तीनामङ्कुराः प्ररोहास्तैश्छुरिता व्याप्ताः । 'चन्दनच्छुरितं वपुः' इति पाण्डवचरित्रे । उत्प्रेक्ष्यते—प्रथम आद्योऽर्हंस्तीर्थकरो वृषभदेवस्तस्य तनुजन्मा नन्दनः स एव चक्री । एतावता भरतचक्रवर्ती तस्याशेषाणां समग्राणां यशसां दिग्विजयसंघपतिभवनप्रमुखधर्मकर्मकरणोद्भूताद्भुतकीर्तीनां प्रशस्तिका किमु लिखिताक्षरमालिकेव ॥ इति माणिक्यस्वामी ॥

अपि पार्श्वजिनान्तरिक्षकाभिध उच्चैः स्थितिकैतवादिह ।
किमु लम्भयितुं महोदयं भविनां भूवलयात्प्रचेलिवान् ॥ १८ ॥

अपि पुनरर्थे । इह दक्षिणस्यामाशायामन्तरिक्ष इत्यभिधा नाम यस्य सोऽन्तरिक्षकाभिधः पार्श्वनामा जिनस्तीर्थंकरः । एतावता श्रीअन्तरिक्षपार्श्वनाथः उच्चैरन्तरिक्षे गगने या स्थितिः वसनस्थानं तस्याः कैतवान्मिषाद्भूवलयात्क्षोणीमण्डलात्प्रचेलिवान् प्रस्थितः । उत्प्रेक्ष्यते—भविनां स्वभक्तभव्यजन्तूनां महोदयं लोकाग्रस्थानं मोक्षं लम्भयितुं किमु प्रापयितुमिव प्रचलितः ॥

फणभृद्भगवन्निभालनादनुभूताहिविभुत्ववैभवः ।
स्पृहयन्भुवनद्वयीशतां फणदम्भाद्भजतीव यं पुनः ॥ १९ ॥

फणभृन्नागेन्द्रः फणदम्भात्स्फटाकपटात्पुनर्द्वितीयवारं [यमन्तरिक्षपार्श्वनाथम्] । उत्प्रेक्ष्यते—भजतीव श्रितवानिव । किंभूतः । भगवतः कमवतापसपञ्चाग्निसाधनाध्यवसायसमानीतार्धनिर्दग्धविदारितदारुमध्यविनिर्गतसामिप्रज्वलितशरीरसर्पस्य श्रीमत्पार्श्वनाथस्य प्रत्यक्षतो निभालनाद्दर्शनानुभावादनुभूतः प्राप्तः अहीनां नागदेवानां विभुत्वं

स्वामिता धरणेन्द्रभावस्तस्य वैभवः संपद्येन सः । एकस्य नागलोकस्यैश्वर्यं प्राप्तोऽपि पुनर्भुवनद्वय्याः क्षोणीमण्डलस्वर्गलोकद्वयस्येशतां स्वामित्वं स्पृहयन् । एतावता समं त्रैलोक्येशतां काङ्क्षन्निवेत्यर्थः ॥ इत्यन्तरिक्षपार्श्वनाथः ॥

करहेटकपार्श्वनायको दिशि यत्रास्ति पुनः प्रभाववान् ।
न जहाति कदापि यत्पदं किमु तस्यैव समीहया फणी ॥ २० ॥

पुनरन्यतीर्थाविर्भावने। यत्र दक्षिणस्यां दिशि स जगद्विख्यातः करहेटकनामनि पुरे करहेटक इति नाम यस्य तादृशः पार्श्वनायकः। एतावता 'करहेडो' पार्श्वनाथः इत्यर्थः। अस्ति जागर्ति। किंभूतः। प्रभाववान् अतिमाहात्म्यकलितः। यत्पदं यस्य करहेटकपार्श्वनाथस्य चरणं कदापि कस्मिन्नपि समये फणी नागेन्द्रो न जहाति न मुञ्चति । उत्प्रेक्ष्यते—तस्यैव तस्य प्रभोः पदं स्थितिस्थानं मोक्षलक्षणं तीर्थं करपदवीं वा तस्यैव समीहया किमु स्पृहयेव ॥

विभवैः सह माधवादयः प्रतिवर्षं यमुपेत्य भेजिरे ।
किमिदं गदितुं तनूमतां मरुतामप्ययमेव देवता ॥ २१ ॥

माधवादयः कृष्णप्रमुखाः सर्वे देवाः प्रतिवर्षं संवत्सरं संवत्सरं प्रति दीपालिकादिवसे इत्यर्थादवसेयम्। विभवैः सह स्वस्वभक्तलोकपात्रवाद्यादिभिः ऋद्धिभिः सार्धं उपेत्य समीपे समेत्य श्रीकरहेटकाख्यपार्श्वनाथं भेजिरे । आत्मीयात्मीयसेवककृतनृत्यगीतवाद्यमानवादित्रादिभक्तिभिः सिषेविरे । अद्याप्येवमेव दृश्यमानमस्तीति। उत्प्रेक्ष्यते—तनूमतां कलिकालजातसर्वजगज्जन्तूनामिदमत्रैव वक्ष्यमाणं गदितुं किमु कथयितुमिव । इदं किम्। तदेवाह—यदयं श्रीपार्श्वनाथो मरुतामस्मत्प्रमुखाणां समग्रगीर्वाणानां देवता अस्माकमप्ययमेवाराध्यस्ततो देवाधिदेवः स्वयमेव नास्मत्प्रमुखाः सुरा इति ॥ इति श्रीकरहेटकपार्श्वनाथः ॥

इह जीवत आदिमप्रभोरपि सोपारकनामपत्तने ।
प्रतिमा प्रतिभासते सतां वृषकोशः प्रकटः किमार्षभेः ॥ २२ ॥

अपि पुनरिह दक्षिणस्यां जीवतः प्राणान् धारयतः। विद्यमानस्येत्यर्थः। आदिमप्रभोः प्रथमतीर्थंकरस्य ऋषभदेवस्य। जीवत्स्वामिन इत्यर्थः। प्रतिमा मूर्तिरार्षभेर्भरतचक्रिणः प्रकटः स्पष्टो जगज्जननयननीयमानो वृषकोशः पुण्यभाण्डागारः किमु सतां सज्जनानां प्रतिभासते हृदये स्फुरति। कस्मिन्। सोपारक इति नाम यस्य तादृशे पत्तने पुटभेदने ॥ इति जीवत्स्वामी ॥

दिशि बिभ्रति यत्र भूभृतः श्रियमभ्रंकषशृङ्गसङ्गिनः ।
किमु शक्रभयद्रुताः श्रिताः कुलशैला जिनमन्तरिक्षकम् ॥ २३ ॥

यत्र दक्षिणस्यां दिशि भूभृतोऽनेके शैलाः श्रियं शोभां बिभ्रति धारयन्ति । किं-

भूताः । अभ्रमाकाशं कषन्त्युल्लिखन्ति घर्षयन्तीत्यभ्रंकषाणि । गगनालिङ्गीनीत्यर्थः । शृङ्गाणि शिखराणि तेषां सङ्गो विद्यते येषाम् । उत्प्रेक्ष्यते—निजस्यात्मनो विद्वेषी शत्रुः इन्द्रस्य भयेन विद्रुताः पलायिता नष्टाः सन्तः अन्तरिक्षकं श्रीअन्तरिक्षनामानम् । स्वार्थे कः । जिनं जगन्नाथं श्रिताः सेवमानाः कुलाचलाः किमु मन्दरहरगिरिप्रमुखाः पर्वता इव ॥

विपिनानि पदे पदे मुदं ददते यत्र विलासशालिनाम् ।
स्फटिकाचलमूर्धनीव यद्विजितं चैत्ररथं ह्रिया ययौ ॥ २४ ॥

यत्रापाच्यां दिशि विपिनानि विस्मेरद्विविधवृक्षलक्षकमनीयानि वनानि पदे पदे स्थाने स्थाने मुदं हर्षं ददते विश्राणयन्ति यच्छन्ते । केषाम् । विलासेन स्त्र्यादिभिः समं पुष्पावचयासवपानगीतनृत्यनिधुवनादिविनोदेन विविधक्रीडया शालन्ते शोभन्ते इत्येवंशीलाः । तरुणीसखतरुणा इत्यर्थः । तेषाम् । यैर्वनैर्विजितं स्वशोभया पराभूतं सच्चैत्ररथं धनदवनम् । उत्प्रेक्ष्यते—ह्रिया लज्जया कृत्वा स्फटिकाचलमूर्धनि कैलासशिखरशिरसि । 'रजताद्रिस्तु कैलासोऽष्टापदः स्फटिकाचलः' इति हैम्याम् । ययौ गतमिव ॥

सरितो दिशि यत्र निम्नगेत्यपवादं व्यपनेतुमात्मनः ।
स्थितवत्य उपेत्य सेवितुं किमपाचीगृहनाभिसंभवम् ॥ २५ ॥

यत्र याम्यां दिशि हरिति सरितोऽनेका नद्यः उपेत्यागत्य स्थितवत्यः न्यवसन् । स्थिता इत्यर्थः । उत्प्रेक्ष्यते—अपाच्यां दक्षिणस्यां दिशि गृहं स्थानं वसतिर्यस्य तादृशं नाभेर्नृपात्संभव उत्पत्तिर्यस्य ऋषभदेवं माणिक्यस्वामिनमथवा सोपाकरकपत्तनाधीशजीवत्स्वामिनम् । आदिदेवमित्यर्थः । सेवितुं स्थितवत्य इव । किं कर्तुम् । आत्मनः स्वस्य निम्नं गच्छन्तीति निम्नगा नीचगामिनीत्यपवादं निन्दामपयशो वा व्यपनेतुमपाकर्तुम् ॥

पिबतान्मुनिरेष नोऽपि मा पतिवत्पर्वतजा भयादिति ।
दिशि यत्र समेत्य संश्रिता इह जीवद्वृषभाङ्कपारगम् ॥ २६ ॥
(इति पाठान्तरम्)

यत्र दक्षिणस्यां दिशि पर्वतजा नद्यः । उत्प्रेक्ष्यते—इति भयादिव समेत्यागत्य जीवद्वृषभाङ्कपारगं विद्यमानवृषभाङ्कपारगं जिनम् । जीवत्स्वामिनमित्यर्थः । इति किम् । एष मुनिरगस्तिः पतिवत्समुद्रमिव नोऽस्मानपि मा पिबतात् । अगस्तिर्मुनिर्भगवांस्तु मुनीश्वरोऽस्ति । अतः श्रयणं भयापहम् । इति पाठान्तरे ॥ इति गिरिवननद्यः ॥

मणिकाञ्चनकल्पनन्दनैर्विबुधैः श्रीहरिभिः सजिष्णुभिः ।
इह देवगिरेरिव श्रियं कलयन्देवगिरिर्विरोचते ॥ २७ ॥

इह दक्षिणस्यां दिशि देवगिरिर्नाम नगरं विरोचते भाति । उत्प्रेक्ष्यते—देवगिरे-

मेरोः श्रियं शोभां कलयन् दधत् । 'मेरुमस्तके हि स्वर्गोऽस्ति' इति कविसमयः । 'वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम् । घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्नुवास याम्॥' इति नैषधे। तेन मेरौ स्वर्गधर्मारोपणे न दोषः । कैः कृत्वा । मणिभी रत्नैः काञ्चनैः सुवर्णैः कल्पैः सदाचारैः कल्पवृक्षैश्च । नन्दनैः पुत्रैः नन्दनवनेन च । एते धर्मास्तु मेरौ । अथ स्वर्गधर्माः । विबुधैर्विविधैर्विशिष्टैर्वा बुधैः विशारदैः देवैश्च श्रीयुक्ताः शोभाकलिता हरयः तुरगा गजा वा यत्र । पक्षे लक्ष्म्या संयुतो हरिर्विष्णुर्यत्र सहजिष्णुभिर्जयनशीलैर्भटैर्वर्तते । पक्षे सहजिष्णुना पुरंदरेण विद्यन्ते ये ते ॥

क्वचिदिन्दुमणीमिथोमिलद्बहलोद्द्योतनिकेतकैतवात् ।
ध्रुववासविधानकाङ्क्षिणी वसति स्वैरमिवात्र पूर्णिमा ॥ २८ ॥

अत्र देवगिरिनगरे ध्रुवः शाश्वतो यो वासः स्थितिर्वसनं तस्य यद्विधानं निर्माणं तत्काङ्क्षति अभिलषतीत्येवंशीला । उत्प्रेक्ष्यते—स्वैरं स्वेच्छया पूर्णिमा पूर्णचन्द्रा राकातिथी रात्रिरूपा वसति तिष्ठतीव । कस्मात् । क्वचित्कुत्रापि स्थाने इन्दुमणीनां चन्द्रकान्तरत्नानां मिथः परस्परं मिलन्नेकीभवन् यो बहलो निबिड उद्द्योतः प्रकाशो येषां तादृशानां निकेतानां गृहाणां कैतवाच्छलात् । 'शङ्के स्वसंकेतनिकेतमाप्ता' इति नैषधे ॥

अपि नीलमणीनिकेतनच्छलभूछायमुदित्वरैः करैः ।
द्विषतेव विवस्वता पुरीं शरणीकृत्य युयुत्सु लक्ष्यते ॥ २९ ॥

अपि पुनः कुत्र चन्दनप्रदेशे नीलमणीनिबद्धानां निकेतनानां मन्दिराणां छलं कपटं यस्य। [नीलमणीनां मन्दिराणि क्वापि दृश्यन्ते। यथा नैषधे—'नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः। शरणार्थमुवास वासरेऽप्यसदाग्रत्युदयत्तमं तमः॥' इति।] तादृशं भूच्छायमन्धकारमुदित्वरैरुच्चैरुद्यद्भिर्निर्गच्छद्भिः करैः किरणैर्हस्तैश्च। उत्प्रेक्ष्यते—द्विषता स्ववैरिणा विवस्वता सूर्येण सार्धम्। 'मित्रो ध्वान्तारातिरब्जांशुहस्तः' इति हैम्याम्। यथा हि । 'ध्वान्ते रविचन्द्रदीपका वैरिणो वर्ण्यन्ते' इति कविकल्पलतायाम् । युयुत्सु योद्धुमिच्छु इव लक्ष्यते । अर्थाज्जनैर्ज्ञायते । दृश्यते संग्रामं चिकीर्षुः तावदुच्चैःकरः स्यात्। महतः कस्यापि पार्श्वे गृहीत्वा महस्विना समं संग्रामो विधीयते । अयं शास्त्रविधिः । अत एव किं कृत्वा पुरीं देवगिरिनगरीं शरणीकृत्य स्वाश्रयां(यं) विधाय ॥ इति देवगिरिनगरम् ॥

नगरे नगरन्ध्रकृद्युतो नितरां दिद्युतिरेऽत्र नागराः ।
मरुतां तनुगर्वखर्वताकृतये विश्वकृता कृता इव ॥ ३० ॥

अत्र देवगिरौ नगरे पुरे नागराः पौरयुवानो नितरामतिशयेन दिद्युतिरे विभान्ति स्म । किंभूताः । नगस्य क्रौञ्चाचलस्य रन्ध्रं छिद्रं करोतीति नगरन्ध्रकृत्स्वामिकार्तिकस्तद्वद्द्युत्कान्तिर्येषाम्। 'पाददीधितिकरद्युतिद्युतः' इति हैम्याम्। 'सनगरं नगरन्ध्रकरौजसः' इति रघौ । 'स्कन्देन बाणैः कृत्वा क्रौञ्चाचलः सच्छिद्रो विहितोऽस्तीति' पट्टिकायाम् ।

तथा । 'स्कन्देषुवृन्दनिवरैर्विवरीतुकामः क्रौञ्चाचलः' इति नैषधे । स्वामिकार्तिकशरराशिकृतविवरैश्छिद्रैरिति तद्वृत्तिः । उत्प्रेक्ष्यते—मरुतां देवानां तनूनां गर्वः शरीरसौन्दर्यातिशयाभिमानः तस्य खर्वता कुब्जीकरणत्वं नीचैः कारिता तिरस्कारकत्वं तस्य कृतये कार्यार्थं विश्वकृता जगत्सृष्टिविधायिना ब्रह्मणा कृताः स्वयं निष्पादिता इव ॥

रतिकान्तकलावहेलि यत्तरुणानां तनुरामणीयकम् ।
स्पृहयन्त इवात्मजन्मनो निकटेऽहर्निशमासते सुराः ॥ ३१ ॥

सुरा देवा आत्मजन्मनो ब्रह्मणः । 'नाभिपद्मात्मभूरपि' इति हैम्याम् । निकटे समीपे अहर्निशं नित्यमासते तिष्ठन्ति । 'आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः' इति नैषधे । उत्प्रेक्ष्यते—यत्तरुणानां देवगिरिनगरवयस्थनागराणां रतिकान्तस्य स्मरस्य कलां रूपशोभालक्षणाम् । अथ वा भावप्रधाननिर्देशात्कलत्वं मनोज्ञतामवहेलयत्येवंशीलं तनूनां शरीराणां रामणीयकं सौन्दर्यं स्पृहयन्तः इव अर्थादभ्यर्थयन्त इव ॥ इति देवगिरिनागराः ॥

प्रतिपञ्चमुखं द्विषं व्ययीकृतसर्वास्त्रतया निरायुधः ।
अकरोदिदमङ्गनामिषादिव हेतीः शतशः स्मरः पुनः ॥ ३२ ॥

स्मरः कामः इदमङ्गनानां देवगिरिनागरीणां मिषात्कपटात् । उत्प्रेक्ष्यते—शतशः बहूनि शतानि हेतीः प्रहरणान्यकरोदिव चकार । किंभूतः स्मरः । द्विषं स्ववैरिणं पञ्चमुखमीश्वरं प्रति । 'पञ्चमुखोऽष्टमूर्तिः' इति हैम्याम् । व्ययीकृतानि संग्रामे क्षिप्तानि सर्वाणि समस्तान्यस्त्राण्यायुधानि येन तत्त्वेन । मुखं मुखं प्रत्येकैकं बाणं क्षिप्तम् । एवं पञ्चानामपि शराणां क्षेपान्निरायुधीभूतः शस्त्ररहितो जातः ॥

स्वपदाभिककुम्भसंभवं तपसः पातयितुं मरुद्व(त्व)ता ।
इदमिन्दुमुखीमिषादिह प्रहिताः स्वर्गिमृगीदृशः किमु ॥ ३३ ॥

मरुद्व(त्व)ता इन्द्रेण इदमिन्दुमुखीनामस्य देवगिरिनगरस्य चन्द्राननानां नागराणां मिषाद्व्याजात् । उत्प्रेक्ष्यते—इह दक्षिणस्यां दिशि स्वर्गिमृगीदृशः अप्सरसः किमु प्रहिताः प्रेषिता इव । किं कर्तुम् । स्वपदमिन्द्रपदवी देवलोकैश्वर्यं तस्याभिकं तपसा कामयितारं कुम्भसंभवमगस्तिं तापसं तपस उपवासादिकष्टकरणात्पातयितुं भ्रंशयितुम् । इदं तु शैवशासनानुयायि वचो न जैनपरम् । कविसमयानुगामित्वादुक्तमित्यभ्यूह्यम् ॥

जलकेलिगलद्विलेपनीकृतगोशीर्षविलोचनाञ्जनैः ।
पुरि पद्मदृशः प्रकुर्वते गृहवापीर्विधुमण्डलीरिव ॥ ३४ ॥

पुरि देवगिरिनगरे पद्मदृशः कमललोचनाः स्त्रियः गृहवापीर्जलभवनविलासदीर्घिका विधुमण्डलीः शशिबिम्बानीव प्रकुर्वते । मण्डलशब्दस्त्रिषु लिङ्गेषु । 'कुवलयमृणालमण्डलाः' इति लिङ्गानुशासने । मण्डलः, मण्डलम्, मण्डली । तथा च नैषधे—'शुद्धा सु-

धादीधितिमण्डलीयम्’ इति । कैः । जलकेलिषु सलिलक्रीडासु गलद्भिर्जलसंगमात् द्रवीभूय निष्पतद्भिः । विलेपनीकृतैरङ्गरागतां प्रापितैर्गोशीर्षैश्चन्दनद्रवैस्तथा विलोचनानां नेत्राणामञ्जनैः कज्जलैः । कृत्वा चन्दनद्रवानुषङ्गात्सलिलानामौज्ज्वल्यं तथा कुत्रचिल्लाञ्छनस्थाने कज्जलकालिमा जायते इति शशाङ्कसादृश्यम् ॥ इति देवगिरिनगराङ्गनाः ॥

पुरि तत्र निजामसाहिनाजनि राज्ञा रघुसूनुनीतिना ।
तदुपात्तदिशा महस्विना विदधे येन यमोऽपि दण्डभृत् ॥ ३५ ॥

तत्र तस्यां पुरि देवगिरिनगर्यां निजामसाहिरिति नाम यस्य तादृशेन राज्ञा नृपेण अजनि जज्ञे । किंभूतः । रघुसूनुः रामचन्द्रस्तद्वन्नीतिर्न्यायो यस्य । येन महस्विना प्रबलप्रतापवता निजामसाहिना यमः सूरसूतोऽपि दण्डं राजदेयांशं वेत्रयष्टिं वा बिभर्तीति दण्डभृत् विदधे । दण्डदाता प्रतीहारो वा कृत इत्यर्थः । किंभूतेन येन । तस्य यमस्य उपात्ता गृहीता स्वायत्तीकृता दिग्दक्षिणा हरियेन । ‘यमः कृतान्तः पितृदक्षिणाशाप्रेतात्पतिर्दण्डधरोऽर्कसूनुः’ इति हैम्याम् ॥

समरे निहतारिनिष्पतद्रुधिराह्वासवपानकाङ्क्षया ।
यदसिच्छलतः स्फुटीकृता रसनेवाम्बुजबन्धुसूनुना ॥ ३६ ॥

यस्य निजामसाहेरसिः खड्गलता तस्य छलतः कपटात् । उत्प्रेक्ष्यते—अम्बुजानां पद्मानां बन्धुर्मित्रं सूर्यस्तस्य सूनुना पुत्रेण यमेन रसना जिह्वेव प्रकटीकृता । कया । समरे अर्थान्निजामसाहेर्वैरिभिः समं संग्रामे निहता व्यापादिता येऽरयो वैरिवीरास्तेषां निष्पतन्ति शरीरान्निःसरन्ति यानि रुधिराणि तान्येवाह्वा नाम यस्य तादृश आसवः सीधुदेशविशेषजा मदिरा राजादीनां पानयोग्या न विकलताकृत् । सोऽधुना द्वीपबन्दिरादौ ‘सरसक’ इत्युच्यते । तस्य पानं तस्य काङ्क्षया वाञ्छयेव ॥

महसां निवहे महीशितुर्विपिनेऽपि स्फुरितेऽतिदुःसहे ।
दवधीविधुरास्तदाश्रयाः प्रतिपक्षाः सरसीर्जगाहिरे ॥ ३७ ॥

महीशितुर्निजामसाहेर्महसां प्रतापानां निवहे समूहे । ‘स राशिरासीन्महसाम्’ इति नैषधे । महसां भूयसः प्रतापानामिति तद्वृत्तिः । विपिने अरण्येऽपि स्फुरिते प्रकटीभूते सति तदेव विपिनमाश्रयः स्थानं येषामरण्यस्थायिनः प्रतिपक्षास्तद्वैरिणः दवधीविधुरा वने दावानलोऽयं लग्न इति बुद्ध्या व्याकुलीभवन्तः सन्तः । ‘देव त्वद्भुजदण्डदर्पगरिमोद्गीर्णप्रतापानलज्वालापक्तिमकीर्तिपारदघटीविस्फोटिता बिन्दवः’ इति खण्डप्रशस्तौ । प्रतापस्य वह्निरूपत्वम् । सरसीर्महातटाकान् महत्सरः सरसीर्जगाहिरे अवगाहितवन्तः । स्वप्रज्वलनभयेन सरसीषु प्रविष्टा इत्यर्थः । किंभूते निवहे । अतिशयेन दुःखेन सह्यते इत्यतिदुःसहे सोढुमशक्ये । इयमत्र गर्भितोत्प्रेक्षा ॥

अहिता अमुना पराहता वनवासाः शबरा इवाभवन् ।
अबला इव वातवेपितादपि पत्राद्विपिनेऽपि बिभ्यिरे ॥ ३८ ॥

अमुना निजामसाहिना पराहताः संग्रामे परिभूता अहिता वैरिभूपालाः शबरा भिल्ला इव । 'इति शबरवधूभिस्तर्क्यमाणान्यवापुः सपदि विपुलविन्ध्यस्कन्धमध्यं बलानि' इति चम्पूकथायाम् । शबरवधूभिर्भिल्लीभिरिति तट्टिप्पनके । वने वासो वसनं स्थितिर्येषां तादृशा अभूवन् जाताः । अपि पुनर्भीतिविद्रुताः सन्तः भयाकुलिता वा विपिने वनेऽपि वातवेपितान्मारुतान्दोलितात्पत्रात्पर्णादपि आगतोऽस्मत्पृष्ठे शत्रुरिति धिया अबला निःसत्त्वा इव स्त्रिय इव वा बिभ्यिरे महाभयमलभन्त । भीताः पलायन्ते स्मेत्यर्थः॥ इति देवगिरिस्वामिनिजामसाहिः ॥

अथ तत्पुरि देवसीत्यभूदभिधानेन वणिक्पुरंदरः ।
विधिनास्य यशःप्रशस्तयोऽम्बरपट्टे लिखिता इवोडवः ॥ ३९ ॥

अथेति दिगादिनृपवर्णनानन्तरम् । अथ वा या श्राद्धीहीरगणिस्तत्र द्विजपार्श्वे पठतो द्रव्यादिदायिनी भाविनी तद्दम्पत्योर्वर्णनारम्भः । 'अथ अथो समुच्चये मङ्गले संशयारम्भाधिकारान्तरेषु च' इत्यनेकार्थः । तस्यां पुरि सा चासौ पूश्च तत्पूस्तस्यां तत्पुरि देवगिरिनगरे । देवसीत्यभिधानेन नाम्ना वणिजां नैगमानां मध्ये पुरंदरः श्रेष्ठः अभूत्संजातः । उत्प्रेक्ष्यते—विधिना ब्रह्मणा अस्य देवसीव्यवहारिणो यशःप्रशस्तयः कीर्तिवर्णनमयाक्षरमालिका अम्बरमाकाशरूपः पट्टस्तस्मिन् लिखिता उत्कीर्णा इव । प्रशस्तयः काः । उडवस्तारका एव । तारकस्वरूपेण वा प्रशस्तिवर्णाः । '[१]ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः' इति नैषधे । 'जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः' सत्यः शतशोऽप्सरसः सुराङ्गना अवतीर्य आकाशादागत्य यां नगरीं कुण्डिनपुरमध्यासताश्रयन्ति स्म । अप्सरसः कस्तत्सखीजनो दमयन्त्या वयसीजनरूप इत्यर्थः । इति तद्वदिदमपीति॥

सुरयौवतजैत्रकान्तियद्युवतीसंगमरङ्गिमानसः ।
वपुरस्य दधत्सुधाशनः किमु कोऽप्यत्र पुरेऽवतीर्णवान् ॥ ४० ॥

अत्र देवगिरौ कोऽप्यनिर्दिष्टनामा सुधाशनो देवः । उत्प्रेक्ष्यते—अवतीर्णवान्किमु । अवतारं गृहीतवानिव । किं कुर्वन् । अस्य देवसीव्यवहारिणः वपुः शरीरं दधत् बिभ्राणः । किंभूतः । सुधाशनः सुराणां देवानां यौवतस्य युवतीसमूहस्य जैत्रा जयनशीला कान्तिः शोभा यासां तादृशीभिर्यस्य नगरस्य युवतीभिस्तरुणीभिः समं संगमे रङ्गो रागोऽस्यास्मिन्वा । 'रङ्गो नृत्ययुद्धवोः । रागे च' इत्यनेकार्थः । तादृङ्मानसं मनो यस्य ॥

कमनः कमनात्प्रसेदुषः सह सारङ्गदृशोपशीलितात् ।
भव साङ्ग इतीव तन्निभाद्वरमाप्याजनि मूर्तिमानिह ॥ ४१ ॥

कमनः कामस्तन्निभाद्देवसीच्छलात् । उत्प्रेक्ष्यते—इह देवगिरौ मूर्तिमान् शरीरयुक्त इवाजनि संजातः । किं कृत्वा । सारङ्गदृशा सह स्वप्रियया रत्या सार्धम् । उपशीलितात्स-

---

१. अयं नैषधीयसंवाद उत्तरश्लोकयोग्यः, अत्र श्लोकेऽवतारबोधकपदाभावात्.

मीपं समेत्यातिशयेन सेवितादत एव प्रसेदुषः प्रसन्नीभूतात्कमनाद्विधातुः । 'कमनः कलाकेलिरनन्यजोऽङ्गजः' इति कन्दर्पनामानि । तथा । 'कमनः सात्त्विकवेदगर्भाः' इति विधातुर्नामानि । इदं द्वयमपि हैम्याम् । सकाशादित्यमुना प्रकारेण वरमिष्टाभिलाषसिद्धिमाप्य लब्ध्वा । इति किम् । यत् हे स्मर, त्वं साङ्गो भव अस्मत्प्रभावात्सशरीरः संपद्यस्वेति ॥ इति देवसीव्यवहारी ॥

अदसीयविलासवत्यभूज्जसमादेव्यभिधानधारिणी ।
विधिना प्रहितेव वर्णिका त्रिदिवस्त्रैणदिदृक्षुभूस्पृशाम् ॥ ४२ ॥

अदसीया देवसीव्यवहारिसंबन्धिनी । 'मुखविधुमदसीयं सेवितुं लम्बमानः' इति नैषधे । विलासवती गृहिणी जसमादेवीत्यभिधानं नाम धरत्येवंशीला धारिणी अभूत्संजाता । उत्प्रेक्ष्यते—त्रिदिवस्य स्वर्गलोकस्य स्त्रैणं देवाङ्गनावर्गं द्रष्टुमिच्छवो दिदृक्षवस्तादृशा भूस्पृशो मानवास्तेषां कृते विधिना ब्रह्मणा वर्णिकेव प्रहिता भूमौ प्रेषिता ॥

कमलान्मधुपानुषङ्गिनः सितकान्तेरुदयास्तदूषितात् ।
कमलाब्धिशयालुकेशवादतिखिन्नेव तमेत्य भेजुषी ॥ ४३ ॥

कमला लक्ष्मीरेत्यागत्य तं देवसीव्यवहारिणं भेजुषी सेवते स्म । उत्प्रेक्ष्यते—अतिखिन्नेव अतिशयेन खेदं प्राप्तवतीव । कस्मात् । कमलाद्वासपद्मात् । किंभूतः । मधुपैर्मद्यपैः षट्पदैर्वा अनुषङ्गो मिलनं यस्य । पुनः कस्मात् । सितकान्तेश्चन्द्रात् । किंभूतात् । उदयेन स्तोकस्तोकोद्गमेन अस्तेन नाशेन दिने दिने मरणेन क्षीयमाणशरीरतया च दूषिताद्दुष्टीकृतात् । संतापितादित्यर्थः । अब्धौ समुद्रे पञ्चविषयभोगसुखानुभवनसमयपयोधरकाले शयालोर्निद्राशीलात् केशवात्स्वभर्तुर्नारायणात् । उद्विग्नेत्यर्थः ॥

वृषभध्वजगोधिलोचनानलकीलाशलभं स्ववल्लभम् ।
अवगत्य रतिः परं जनुर्निभतोऽस्याः प्रतिपेदुषी किमु ॥ ४४ ॥

रतिः स्मरकान्ता अस्या जसमादेव्या निभतो व्याजात् । उत्प्रेक्ष्यते—परमन्यजन्मावतारं प्रतिपेदुषी किमु प्रतिपन्नेव । किं कृत्वा । वृषभध्वजः शंकरः । 'धार्या ध्वजास्त्रपाण्यङ्कमौलिभूषणभृन्निभाः' इति हैमीवचनात् । वृषभस्य धार्यत्वेन शंभोर्वृषभध्वजत्वम् । तस्य गोधिर्भालम् । 'भाले गोध्यलिकालीकाः' इति हैम्याम् । तस्य तत्र वा यल्लोचनं तृतीयं नयनं तस्यानलो वह्निस्तस्य कीलासु ज्वालासु शलभं पतङ्गम् । भस्मीभूतमित्यर्थः । वल्लभं निजजीवितेशं काममवगत्य ज्ञात्वा ॥

अनया निजरूपसंपदाभिभवं लम्भितया श्रिया किमु ।
जलधौ विमनायमानया दयितोपास्तिनिभादगम्यत ॥ ४५ ॥

अनया जसमादेव्या निजस्यात्मनो निजया आत्मीयया वा रूपसंपदा शरीररामणीयकवैभवेन अभिभवं पराजयं लम्भितया प्रापितया श्रिया हरिप्रियया । उत्प्रेक्ष्यते—

विमनायमानया विरुद्धमनस्कीभवन्त्या लज्जाखेदचिन्तादुःखोदयमनुभवन्त्या । 'चिराय तस्थे विमनायमानया' इति नैषधे । 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' । 'भृशादिभ्यो भुव्यर्थे भवत्यर्थे क्यङ् स्यात् । न तु च्व्यन्तेभ्यः अन्तहल्लोपश्च । अभृशो भृशो भवतीति भृशायते । नोन्मना उन्मना भवतीत्युन्मनायते' इति प्रक्रियाकौमुद्याम् । तथा न विमना विमना भवतीति विमनायते इति विमनायमाना तया विमनायमानया सत्या दयितोपास्तिनिभात्समुद्रशायिनः कान्तकृष्णस्य सेवाकपटाज्जलधौ समुद्रे अगम्यत गता । ब्रूडितेत्यर्थः ॥ इति जसमादेवी ॥

युवसंमदकन्दलीघनैः कमलानन्दनकेलिशीलनैः ।
त्रिदशाविव दम्पती सुखं वसतस्तौ त्रिदिवोपमे पुरे ॥ ४६ ॥

तौ दम्पती जसमादेवीदेवसीव्यवहारिणौ पुरे देवगिरिनगरे सुखं यथा स्यात्तथा वसतस्तिष्ठतः । किंभूते पुरे । त्रिदिवस्य देवलोकस्य उपमा सादृश्यं यस्य । तौ काविव । त्रिदशाविव । यथा देवीदेवौ त्रिदिवे स्वर्गे सुखं वसतः । देवी च देवश्च देवौ, त्रिदशी च त्रिदशश्च त्रिदशौ । 'पुमान् स्त्रिया' । 'स्त्रिया सहोक्तौ पुमान् शिष्यते, न स्त्री । ब्राह्मणी च ब्राह्मणश्च ब्राह्मणौ' इति प्रक्रियाकौमुद्याम् । तथा 'आदेश्च द्वन्द्वे' । 'द्वन्द्वे आदिपदस्य लोपो भवति । माता च पिता च पितरौ पुत्रौ श्वशुरौ' इत्यादि सारस्वतव्याकरणेऽपि । सुखं वसतः तिष्ठतः । कमलाया लक्ष्म्या नन्दनः पुत्रः कामस्तस्य केलिः क्रीडा तस्याः शीलनैः सेवनैः पञ्चविषयभोगानुभवनैः । किंभूतैः । यूनां तरुणानां संमदा आनन्दास्ते एव कन्दल्यः कन्दास्तेषु घनैर्मेघैः । तदुल्लासकारकत्वात् । 'कन्दलं तु नवाङ्कुरे कलध्वनावुपरागे मृगमदे कलापे पञ्चस्वपि त्रिलिङ्गः । कदलीद्रुमे रम्भाख्ये' इत्यनेकार्थस्तदवचूरिश्च । अथ वा तरुणानां हर्षा एव कन्दल्यः रम्भास्तेषु घनैः जलधरैः ॥

परशासनशास्त्रमालिकामयमध्येतुमथो गुरोर्गिरा ।
व्रजति स्म कदापि दक्षिणां हरितं हीरमुनिर्दिनेशवत् ॥ ४७ ॥

अथो हीरहर्षगणेरधिकारप्रारम्भे अयं पूर्वव्यावर्णितो ग्रन्थनायको वा हीरमुनिर्हीरहर्षनामा मुनिर्गणिराचार्योपाध्यादीनां सर्वेषां साधुसंज्ञा तु जागर्त्येवेति दक्षिणां हरितं प्रति व्रजति स्म । कदा । कदापि कस्मिन्नपि समये । कया । गुरोर्विजयदानसूरेर्गिरा वाचा । किं कर्तुम् । परेषां शैवादीनां शासनानि दर्शनानि तेषां तत्संबन्धिनां शास्त्राणां प्रमाणग्रन्थानां मालिकां श्रेणीमध्येतुं पठितुम् । परशासनोपनिषदं ज्ञातुमित्यर्थः । किंवत् । दिनेशवत् । यथा भास्वान्दक्षिणां दिशं प्रति याति ॥

अथ देवगिरावगम्यताखिलतर्काधिजिगांसयामुना ।
पटलेन पयोमुचां यथा सलिलादानसमीहयाम्बुधौ ॥ ४८ ॥

अथेति दक्षिणदिग्गमनानन्तरममुना हीरहर्षगणिना देवगिरौ नगरे अगम्यत गतम् ।

कया। अखिलं समस्तं यत्तर्कशास्त्रं तस्याधिजिगांसया पिपठिषया। 'इङश्च'। 'इङ् अध्ययने' इत्यस्य धातोर्गमिरादेशः स्यात्सनि परे। 'अधिजिगांसते' इति प्रक्रियाकौमुद्याम्। केनेव। पटलेनेव। यथा पयोमुचां मेघानां पटलेन वृन्देन सलिलानां जलानामादानं ग्रहणं तस्य समीहया वाञ्छया अम्बुधौ समुद्रे गम्यते। 'अब्दैर्वारिजिघृक्षयार्णवगतैः साकं व्रजन्ती मुहुः' इति खण्डप्रशस्तौ। अत्र यथा इवार्थे॥

पठता सह धर्मसागरव्रतिना देवगिरौ गुरुर्व्यभात्।
सहकार इव प्रफुल्लता नवराजादनशाखिना वने॥ ४९॥

सह पठता सार्धमधीयानेन धर्मसागरनाम्ना व्रतिना मुनिना गुरुर्भाविनिभूतोपचारात् हीरहर्षगुरुर्व्यभात् बभासे। क इव। सहकार इव। यथा प्रफुल्लता विकसता नवः प्रत्यग्रः राजादनः प्रियाल एव शाखी द्रुमः तेन वने सहकारो माकन्दो भाति॥

पुरसंघजनैः प्रणोदितैरमुनाधीतिकृते कृतीन्दुना।
प्रतिबिम्बमिव द्युसद्गुरोर्द्विज आनायि ततः कुतश्चन॥ ५०॥

ततस्तदनन्तरं कृतीन्दुना कोविदचन्द्रेण अमुना हीरहर्षगणिना अधीतिकृते स्वाध्ययनकार्याय प्रणोदितैः प्रेरितैः पुरस्य देवगिरिनगरस्य संघजनैः श्राद्धवर्गैः। यद्यपि साधुसाध्वीश्रावकश्राविकारूपचतुर्विधः संघः प्रोच्यते तथाप्यत्राधिकारात्संप्रदायाद्वा श्राद्धवर्ग एव संघः कुतश्चन कस्मादपि स्थानात् द्विजो ब्राह्मण आनायि आकारितः। उत्प्रेक्ष्यते—द्युसद्गुरोर्बृहस्पतेः प्रतिबिम्बमिवापररूपमिव॥

तदुपान्तभुवं व्यभूषयत्स ततो गौरगरुद्गतिर्द्विजः।
अवतीर्ण इवारविन्दभूः स्वकसर्गस्य दिदृक्षया क्षितौ॥ ५१॥

तत आकारितानन्तरं स द्विजः पण्डितब्राह्मणः तस्य हीरहर्षगणेरुपान्तभुवं समीपक्षोणीं व्यभूषयदलंचकार प्रभोः पार्श्वे समायातः। किंभूतो द्विजः। गौरगरुत्सितच्छदो हंसस्तद्वन्मन्थरा गतिर्यस्य। उत्प्रेक्ष्यते—स्वकस्यात्मना कृतस्य सर्गस्य भूलोकसृष्टेः दिदृक्षया द्रष्टुमिच्छया क्षितौ पृथिव्यामवतीर्णवानायातः अरविन्दभूर्ब्रह्मेव॥

द्विजं विशिनष्टि—

मृडमूर्धनिवाससौहृदान्मिलितुं जह्नुसुतामिवागताम्।
अलिकार्धविधुं ललाटिकां वहमानो हरिचन्दनोद्भवाम्॥ ५२॥

किं कुर्वाणो द्विजः। हरिचन्दनोद्भवां श्रीखण्डनिर्मितां ललाटिकां ललाटालंकारम्। तिलकमित्यर्थः। 'ललाटिकासीमनि चूर्णकुन्तला' इति नैषधे। लोके 'आडि' इति प्रसिद्धा। वहमानो बिभ्राणः। उत्प्रेक्ष्यते—मृडस्येश्वरस्य मूर्धनि मस्तके निवास एकत्र स्थितिर्निवसनं तेन यत्सौहृदं मैत्री तस्मादलिकार्धविधुं भालरूपार्धचन्द्रम्। 'लब्धार्धचन्द्र ईशः' इति चम्पूकथायाम्। मिलितुमागतां जह्नुसुतां गङ्गामिव॥

उपवीतमुरःस्थलान्तरे कलयंश्चन्दनचन्द्रचर्चितः ।
दमनो मदनस्य भूतिमानिव वैकक्षितकुण्डलीश्वरः ॥ ९३ ॥

पुनः किं कुर्वन् । उरःस्थले वक्षोमध्ये उपवीतं यज्ञसूत्रं कलयन् दधत् । किंभूतः । चन्दनं मलयतरुद्रवस्तथा चन्द्रः कर्पूरस्ताभ्यां कृत्वा चर्चितः कृताङ्गरागः । उत्प्रेक्ष्यते— वैकक्षः उत्तरासङ्गः संजातोऽस्य प्रावारीकृतो वा कुण्डलीश्वरः शेषनागाधिपो यस्य येन वा । 'शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः । स च श्यामोऽथ वा शुक्लः सितपङ्कजलाञ्छनः ॥' इति हैम्याम् । तथा भूतिमान् भस्मोद्धूलनः । मदनस्य कामस्य दमनो वैरी शंभुरिव ॥

शिववाङ्मयवार्धिपारगोऽनिशषट्कर्मरतो व्रतान्वितः ।
वपुरभ्युपगत्य वर्णिनामिव धर्मः प्रकटीभवन्नयम् ॥ ९४ ॥

अथ वा वपुः शरीरमभ्युपगत्याङ्गीकृत्य प्रकटीभवन्नक्षिलक्ष्यः संपद्यमानः वर्णिनां ब्राह्मणानामयं प्रत्यक्षो धर्म इव । किंभूतो द्विजः । शिववाङ्मयं नैयायिकशास्त्रं तदेव वार्धिः समुद्रः तस्य पारगः पारगामी । पुनः किंभूतः । अनिशं षट्सु अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहलक्षणेषु कर्मसु ब्राह्मणोचितेषु कार्येषु रत आसक्तः । पुनः किंभूतः । व्रतैर्ब्राह्मणानां शैवशासनस्य वा उचितैर्योग्यैर्नियमैरन्वितः कलितः । अत एव तद्धर्मोत्प्रेक्षा ॥ इत्यादिचतुर्भिः कलापकेन पण्डितद्विजवर्णनम् ॥

स पपाठ सधर्मसागरोऽखिलनैयायिकवाङ्मयं ततः ।
समयं सुगतस्य सौगतादिव हंसः परमादिहंसयुक् ॥ ९५ ॥

स हीरहर्षगणिस्ततो ब्राह्मणादखिलं समग्रं नैयायिकानां वाङ्मयं शास्त्रं पपाठ पठति स्म । स किंभूतः । सह धर्मसागरेण वर्तते यः । क इव । हंस इव । यथा हरिभद्रसूरिभागिनेयको हंसः सुगतस्य बौद्धस्य समयं शास्त्रम् । 'आप्तोक्तिः समयागमौ' इति हैम्याम् । 'समयः शपथे भाषासंपदोः कालसंविदोः । सिद्धान्ताचारसंकेतनियमावसरेषु च ॥ क्रियाकारे निर्देशे च' इत्यनेकार्थः । सौगताद्बौद्धाचार्यात्पठति स्म । किंभूतो हंसः । परम इति पदमादौ यस्य तादृशेन हंसेन युनक्ति सङ्गं प्राप्नोति एतावता परमहंसकलितः ॥

कलयन्प्रतिभामनुत्तरामतितीक्ष्णां स कुशः शिखामिव ।
प्रथमं प्रविधाय तर्कयुक्परिभाषामुखशास्त्रसंग्रहम् ॥ ९६ ॥

द्रविणार्पणहृष्टमानसादथ चिन्तामणिमग्रहीद्द्विजान् ।
परिशीलनकर्मतोषितादिव चिन्तामणिमादितेयतः ॥ ९७ ॥

अथ पठनप्रारम्भानन्तरं स हीरहर्षगणिर्द्रविणानां द्रव्याणामर्पणाद्दानात्प्रीतं हृष्टं मानसं मनो यस्य तादृशाद्द्विजात्पण्डितब्राह्मणाच्चिन्तामणिनामशैवशास्त्रमग्रहीत् । कुत इव । आदितेयत इव यथा कश्चिद्भाग्यवान् पुरुषः परिशीलनकर्मणा सेवाविधिना तोषितात्प्रसन्नीकृ-

तादादितेयतो देवाच्चिन्तामणिनाम रत्नं गृह्णाति। किं कृत्वा। प्रथमं पूर्वं तर्कशब्देन युनक्ति तादृशी परिभाषा नामप्रमाणादिमशास्त्रं तन्मुखे आदौ येषां तेषां तर्कपरिभाषा-मितभाषिणी-शशधर-मणिकण्ठ-वरदराजी-प्रशस्तपदभाष्य-वर्धमान-वर्धमानेन्दु-किरणावली-प्रमुखशास्त्राणां संग्रहमध्ययनं कृत्वा इत्यर्थः। स किं कुर्वन्। अतितीक्ष्णामतिशयेन निशितामनुत्तरामसाधारणीं च प्रतिभां बुद्धिं कलयन्। क इव। कुश इव। यथा दर्भः अतितीक्ष्णां शिखामग्रभागं कलयति। शिखां किंभूताम्। अनुत्तराम्। तस्मादुत्तरोऽग्रेतनवर्ती कोऽपि पदार्थो न तीक्ष्णः स्यादिति॥

प्रतिभाविभवैः पठन्क्रमात्समयस्यास्य स पारमाप्तवान्।
प्रचरन्पवमानवर्त्मनोऽध्वरथैर्भानुमतामिव व्रजः॥ ५८॥

स हीरहर्षगणिः क्रमादनुक्रमेण पठनपरिपाट्या पठन्नध्ययनं कुर्वाणः प्रतिभाविभवैः बुद्धिविशेषैः कृत्वा अस्य पाठकद्विजस्य समयस्य शास्त्रस्य पारमन्तं प्राप्तवान् लभते स्म। क इव। व्रज इव। यथा प्रचरन् प्रचारं कुर्वन् भानुमतां सूर्याणां समूहः द्वादशत्वाद्भानूनाम्। 'सूरस्त्वष्टा द्वादशात्मा च हेलिः' इति हैम्याम्। 'गुहनेत्र-राशि-भासा-संक्रान्त्यादित्यचक्रिराजानः। चक्रबृहस्पतिहस्ताः सभासदो द्वादश भवन्ति॥' इति संख्यानाममालायाम्। काव्यकल्पलतायां चेति वचनात् च व्रजपदोपादानम्। जैनमताच्च संख्याः। सूर्याः अध्वरथैः पारियानिकैः पवमानवर्त्मनो वायुमार्गस्य गगनस्य पारमाप्नोति॥

अमुनाध्ययने समापिते द्विजराजद्रविणार्पणाविधौ।
सुमनोलतिकेव केवलं जसमादेव्यजनिष्ट सा तदा॥ ५९॥

अमुना हीरहर्षगणिना अध्ययने पठने समापिते संपूर्णीकृते सति तदा तस्मिन्नवसरे द्विजराजस्य पाठकब्राह्मणश्रेष्ठस्य द्रविणानां धनानामर्पणा प्रदानम्। 'चकारसेवाचणदर्पणार्पणा' इति नैषधे। तस्या विधिः प्रकारस्तत्र केवलमेकेव सा पूर्वव्यावर्णितस्वरूपा देवसीदयिता जसमादेव्येव सुमनोलतिकेव कल्पवल्लीवाजनि। जसमादेव्येव सर्वमपि पाठनद्रविणं वितीर्णमित्यर्थः॥

शिरसीव शिवस्य जाह्नवी शरदश्चन्द्रमसीव जाह्नवी।
अलिनीव मृणालिनीवने हृदि रेमेऽस्य गणेः कलन्दिका॥ ६०॥

अस्यामुष्य हीरहर्षनाम्नो गणेर्हृदि हृदयविषये कलन्दिका सर्वविद्या रेमे वसति स्फुरद्रूपा वा जाता। केव। जाह्नवीव। यथा शिवस्येश्वरस्य शिरसि मस्तके जाह्नवी गङ्गा रमते। 'धूर्जटिजटाजूट इव गङ्गया पुण्यसलिलैः प्लावितः' इति चम्पूकथायाम्। पुनः केव। चन्द्रिकेव। यथा शरदो घनात्ययसंबन्धिनि चन्द्रमसि विधौ कौमुदी रमते। पुनः केव। अलिनीव। यथा मृणालिनीनां कमलिनीनां वने भ्रमरी रमते॥

विधिना वचसामधीश्वरी किमुताकारि बृहस्पतिः क्षितेः ।
निखिलागमपारगाहिनं तमुदीक्ष्येदमतर्कि तार्किकैः ॥ ६१ ॥

निखिलानां समस्तानां जैनशैवादीनामागमानां शास्त्राणां पारमन्तं गच्छतीत्येवंशीलं तं हीरहर्षगणिमुदीक्ष्य दृष्ट्वा तर्के विचारे प्रमाणशास्त्रे वा चतुरास्तार्किकास्तैरिदमत्रैव वक्ष्यमाणमतर्कि विचारितम् । इदं किम् । स्वर्गे वाग्वादिनी बृहस्पती वर्तते विधिना ब्रह्मणा क्षितेः पृथिव्या इयं वचसामधीश्वरी सरस्वती अकारि कृता, उताथवा भूमेरयं बृहस्पतिः सुरगुरुरकारि निर्मित इव ॥ इति हीरहर्षगणेर्द्विजपण्डितपार्श्वे पठनवर्णनम् ॥

भवति स्म विचक्षणः क्षणादथ सामुद्रिकवत्स लक्षणे ।
अपि काव्यविशेषवित्तया विजितः काव्य इवाभवन्नराभः ॥ ६२ ॥

तत्पठितसर्वशास्त्रकथारम्भाधिकारे स हीरहर्षगणिर्लक्षणे शब्दशास्त्रे । जातिवाचित्वादेकवचनम् । अष्टसु व्याकरणेषु ऐन्द्र-चान्द्र-काशि(श)-कृष्ण(त्स्न)-आपिशल-शाकटायन-पाणिनीय-अमर-~~चान्द्र~~-जैनेन्द्ररूपेषु । अथवा 'ब्राह्ममीशानमैन्द्रं च प्राजापत्यं बृहस्पतिम् । त्वाष्ट्रमापिशलं चैव पाणिनीयमथाष्टमम् ॥' इत्यष्टसु महाव्याकरणेषु । अथ वा अष्टादशसु महाव्याकरणेषु । 'ऐन्द्रपाणिनिजैनेन्द्रं शाकटायनवामने । चान्द्रं सरस्वतीकण्ठाभरणं बुद्धिसागरः ॥ विश्रान्तविद्याभरणं भीमसेनकलापकम् । मुष्टिव्याकरणं शैवगौडं नन्दिजयोत्पलम् ॥ सारस्वतं सिद्धहैमं जयहैमं तथापरम् । इति व्याकरणं सर्वशब्दप्राभृतिसंभवम् ॥' इत्येवंरूपेषु । इति नामसु लक्षणग्रन्थेष्वित्यर्थः । विचक्षणश्चतुरो भवति स्म । कथम् । क्षणात्स्वल्पकालात् । किंवत् । सामुद्रिकवद्यथा समुद्रेण पण्डितेन प्रोक्तं सामुद्रं तद्वेत्तीति तत्र चतुरो वा सामुद्रिकः लक्षणे नरनारीणां करचरणरेखाद्याकारशरीरस्थमषीतिलकादिविशेषे निपुणः । अपि पुनः काव्यानां रघु-कुमारसंभव-मेघदूत-चम्पू-कादम्बरी-माघ-पद्मानन्द-नैषधादीनां विशेषवित्तया रहस्यानां ज्ञातृत्वेनेत्यपि व्याख्येयम् ॥

पदमस्य हृदि व्यतन्तनीदनिशं ज्योतिरिवाभ्रवर्त्मनि ।
नरिनृत्यति नर्तकीव धीरपि तर्कागमरङ्गवेश्मनि ॥ ६३ ॥

ज्योतिःशास्त्रमस्य हीरहर्षगणेर्हृदि हृदये पदं स्थानं व्यतन्तनीद्वितनोति स्म । चकारेत्यर्थः । कथम् । अनिशं निरन्तरम् । कस्मिन्किमिव । अभ्रवर्त्मनि ज्योतिरिव । यथा मेघमार्गे गगने ज्योतिर्ग्रहनक्षत्रतारकादि सदा पदं कुरुते । 'नक्षत्रं तारका ताराज्योतिषी भमुडु ग्रहः' इति हैम्याम् । अपि पुनरस्य धीर्बुद्धिस्तर्कागमः प्रमाणशास्त्रम् । 'आगमस्त्वागतौ शास्त्रे' इत्यनेकार्थः । स एव रङ्गवेश्म नाटकस्थानकमन्दिरं तत्र नरीनृत्यति अतिशयेन नृत्यं कुरुते । केव । नर्तकीव । यथा ताण्डवकारिका रङ्गवेश्मनि नृत्यं नृत्यति ॥

गणितं ह्यनुरागिरागवन्न विसस्मार स मानसान्निजात् ।
प्रसृतास्य मतिर्जिनागमेऽम्बुधिकाञ्च्यामिव चक्रिणश्चमूः ॥ ६४ ॥

स हीरहर्षगणिर्गणितं संख्यानं शास्त्रं त्रिशतीलीलावतीप्रमुखं हि निश्चितं निजादात्मीयान्मानसाच्चित्तात् न विसस्मार न विस्मारयति स्म । किंवत् । अनुरागिरागवत् । यथा कोऽपि रागवान् पुमान् स्वानुरक्तीभूतजनस्नेहम् । तज्जनमेवेत्यर्थः । मनसः कदाचिन्न विस्मारयति । पुनरस्य मतिर्जिनागमे । आचाराङ्ग-सूत्रकृदङ्ग-स्थानाङ्ग-समयाङ्ग-विवाहविज्ञप्त्यङ्ग-ज्ञाताधर्मकथाङ्ग-उपासकदशाङ्ग-अनुत्तरोपपातिकादशाङ्ग-प्रश्नव्याकरणाङ्ग-विपाकश्रुताङ्ग इत्येकादशाङ्गानि । अपातिका-राजप्रश्नीय-जीवाभिगम-प्रज्ञापना-चन्द्रप्रज्ञप्ती-जम्बूद्वीपप्रज्ञप्ती-द्वीपसागरप्रज्ञप्ती-निरयावलिका-दशाश्रुतस्कन्ध-निशीथव्यवहार इति द्वादशोपाङ्गानि । क्वचिदन्यान्यपि । सूर्यप्रज्ञप्ति-जम्बूद्वीपप्रज्ञप्ती-चन्द्रप्रज्ञप्ती-कल्पिका-कल्पावतंसिका-पुष्पिता-पुष्पचूलिका-वृष्णिदशा इति । निशीथ-महानिशीथ-पञ्चकल्प-जातकल्प-पर्युषणकल्प-व्यवहार इति षट् छेदाः । उत्तराध्ययन-पिण्डनिर्युक्ति-आवश्यक-दशवैकालिक इति चत्वारो मूलग्रन्थाः । चतुःशरण-आतुरप्रत्याख्यान-महाप्रत्याख्यान-भक्तप्रकीर्णक-तण्डुलवैकालिक-चन्दाविस्मय-गणिविद्या-मरणविभक्तिक-देवेन्द्रस्तव-संस्तारकप्रकीर्णक इति दशप्रकीर्णकानि । नन्दीसूत्र-अनुयोगधार इति पञ्चचत्वारिंशदागमाः । ते च वृत्तिभाष्यचूर्ण्यवचूरिनिर्युक्तिटिप्पनिककर्मग्रन्थक्षेत्रविचारसंग्रहणीचरित्रप्रमुखजैनशास्त्रे प्रसृता विस्तारं प्राप्ता । केव । चमूरिव । यथा चक्रिणः षट्खण्डाधिपतेः सेना अम्बुधिकाञ्च्यां समुद्रमेखलायामासमुद्रान्तक्षोणीमण्डले प्रसरति ॥

बहुना किमु तन्मनस्विनोऽखिलषड्दर्शनशास्त्रमालिका ।
गलकन्दलमालिलिङ्ग यद्युववत्खञ्जनमञ्जुलेक्षणा ॥ ६५ ॥

बहुना किमु अर्थाद्बहूक्तेन किमस्तु । यद्यस्मात्कारणात् अखिलानि भाष्यटीकावचूरिमुख्याङ्गयुक्तानि जैननैयायिकबौद्धसांख्यवैशेषिकनास्तिकाख्यानां षण्णां दर्शनानां शास्त्राणां तन्मतप्रसिद्धानामागमानां प्रकरणानां च संततिः श्रेणिः स चासौ मनस्वी च अथवा तस्य मनस्विनो विशुद्धमानसस्य निष्पापस्य हीरहर्षगणेर्गलकन्दलं कण्ठपीठमालिलिङ्ग आलिङ्गति स्म । किंवत् । युववत् । यथा यूनस्तरुणस्य पुंसः कण्ठपीठं खञ्जनः खञ्जरीटः पक्षिविशेषः लोके 'गङ्गेटिउ' इति क्वचित्प्रसिद्धः अतिचपलस्वभावः तद्वन्मञ्जुले मनोज्ञे ईक्षणे नेत्रे यस्यास्तादृशी स्त्री आलिङ्गति। 'भवत्कृते खञ्जनमञ्जुलाक्षी' इति पञ्चाशिकायाम् । 'अपि खञ्जनमञ्जनाञ्चिते' इति नैषधे ॥ इति हीरहर्षगणेः स्वपरशास्त्रपरिज्ञानम् ॥

सविधे स्वगुरोः सगौरवं गमनायोत्सुकमाशयं ततः ।
अयमर्जितशास्त्रवैभवोऽधित सार्थेश इव व्रतीशिता ॥ ६६ ॥

ततः पठितानन्तरम् । अयं हीरहर्षनामा व्रतीशिता मुनिनायकः सगौरवं सबहुमानं

यथा स्यात्तथा स्वगुरोः श्रीविजयदानसूरेः सविधे समीपे गमनायोपगन्तुमुत्सुकमुत्कण्ठितमाशयं परिणामं मनो वा अधित दधार । किंभूतः । अर्जितः स्वायत्तीकृतः शास्त्राण्येव वैभवः संपत्तिर्येन । क इव । सार्थेश इव । यथा उपार्जित बहुविभवः सार्थनाथः स्वगुरोः पितुः पार्श्वे गन्तुमुत्कण्ठमना भवेत् ॥

अथ दक्षिणदेशतो महाव्रतभृन्मूर्छितमत्स्यलाञ्छनः ।
मलयानिलवत्प्रचेलिवान्यशसा सौरभयन्भुवस्तलम् ॥ ६७ ॥

अथ स्वगुरुसमीपगमनोत्सुकाशयानन्तरं पठितानन्तरं वा दक्षिणनामा देशो जनपदस्ततः हीरहर्षगणिः प्रचेलिवान् प्रतिष्ठते स्म । किंभूतः । महाव्रतानि पञ्च प्राणातिपातविरमणादीनि व्रतानि बिभर्तीति । अत एव पुनः किंभूतः । मूर्छितो मूर्छां चैतन्यरोधं निधनावस्थां च नीतो मत्स्यलाञ्छनः स्मरो येन । महाव्रतीश्वरोऽपि एवंविधः स्मरघ्नः । पुनः किंभूतः । यशसा स्वकीर्त्या कृत्वा भुवस्तलं मेदिनीमण्डलं सौरभयन् सुगन्धीकुर्वन् धवलयन् । किंवत् प्रचेलिवान् । मलयानिलवद् यथा दक्षिणदेशो मलयाचलप्रदेशः । 'मलय आषाढो दक्षिणाचलः' इति हैम्याम् । तस्मान्मलयानिलो दक्षिणपवनः प्रचलति । 'कष्टं भो दाक्षिणात्यः प्रसरति पवनः पान्थकान्ताकृतान्तः' इति भोजप्रबन्धे । सोऽपि किंभूतः। मूर्छितो वृद्धिं नीतो मन्मथो येन। 'मूर्छन् वृद्धिमूर्छनयोः' अयं धातुः। भुवो मध्यमपि सुगन्धयति च ॥

मरुतामिव पद्धतीः पुरीर्वृषकन्यामिथुनाजराजिनी ।
मकरान्वितमीनशालिनीः सरितः साब्जबलाहकाः पुनः ॥ ६८ ॥
वसतीरिव वल्गुविष्टराः सकुरङ्गाः शशिमण्डलीरिव ।
स्फुरदप्सरसो यथा दिवः पदवीर्लङ्घितवान्मुनीश्वरः ॥ ६९ ॥
(युग्मम्)

मुनीश्वरो हीरहर्षगणिः पुरीर्नगरीर्लङ्घितवान् अतिचक्राम । किंभूताः पुरीः । वृषा वृषभा तथा कन्याः कुमारिकाः मिथुनानि क्रीडासक्तानां यूनां पशूनां पक्षिणां वा युगलानि स्त्रीपुंसलक्षणानि अजाश्छागा हरिहरविरञ्चिप्रतिमा वा । 'अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे' इत्यनेकार्थः । तै राजन्ते इत्येवंशीलाः । का इव । मरुतां देवानां पवनानां वा पद्धतीर्मार्गानिव । देववीथीः किंभूताः । वृषकन्यामिथुनमेषनामानो राशयः तैः शोभन्ते इत्येवंशीलाः । पुनर्यः सरितो नदीरुल्लङ्घितवान् । किंभूताः । मकरा जलयादांसि तैरन्विता युक्ताः, तथा मीना मत्स्यास्तैः शालन्ते शोभन्ते इत्येवंशीला अपि । पुनः किंभूताः । सहाब्जैः कमलैः, तथा बलाहकैर्बकैर्वर्तन्ते यास्ताः । अपि वायुवीथीरिव । किंभूताः । मकरराशिकलिताः मीनराशिना शालन्ते । सहाब्जेन चन्द्रमसा तथा बलाहकैर्मेघैर्वर्तन्ते याः । 'गगनवीथीमिव सिंहराशिराजितां उत्पतद्गामुत्क्षिप्तवृश्चि-

कामाविर्भूतसार्द्ररोहिणी मूला च' इति चम्पूकथायाम् । पुनः पदवीर्मार्गानुल्लङ्घे । किं-भूताः । वल्गवः मनोज्ञाः पल्लवपत्रप्रसूनफलकलितत्वेन रम्याः विष्टरा वृक्षा यासु । का इव । वसतीरिव यथा गृहाः प्रकृष्टासनाः स्युः । 'विष्टरः पीठवृक्षयोः' इत्यनेकार्थः । पुनः किंभूताः । सह कुरङ्गैर्मृगैर्वर्तन्ते ये (याः) । का इव । शशिमण्डलीरिव । यथा च-न्द्रबिम्बा लाञ्छनमृगयुक्ताः स्युः । पुनः किंभूताः । स्फुरन्ति पदेपदे दृश्यमानानि अप्प्र-धानानि सरांसि यासु । यथा इवार्थे । का इव । दिवो यथा । देववसतीः स्फुरन्त्य इतस्ततो भ्रमन्त्यः क्रीडन्त्यो वा अप्सरसः उर्वशीप्रमुखाः सुराङ्गना यासु ॥ इति वि-हारमार्गः ॥

मरुदेशमभूषयत्क्रमादथ कुंराङ्गजसाधुसिन्धुरः ।
अतुलैरिव धन्वजन्मिनां सुकृतैः स्वःशिखरी समीयिवान् ॥ ७० ॥

अथ मार्गोल्लङ्घनानन्तरं कुंराङ्गजो हीरहर्षः स एव साधूनां मध्ये सिन्धुरः क्रमादनुक्र-मेण मरुनामानं देशं मण्डलं अभूषयत् शोभां नयति स्म । उत्प्रेक्ष्यते—धन्वनो मरुदे-शसंबन्धिनो ये जन्मिनो जनास्तेषां न विद्यते तुला साम्यं येषां तैरसाधारणैः सुकृतैः पुण्यैः स्वःशिखरी कल्पद्रुमः इव समीयिवान् समाजगाम ॥

कविना च बुधेन संनिधिस्थितिभाजा क्षितिजन्मना पुनः ।
सविधे स गुरोरुपेयिवान्विधुवद्वागमृतं ततः किरन् ॥ ७१ ॥

ततो मरुदेशागमनानन्तरं स हीरहर्षगणिर्गुरोर्विजयदानशूरेः सविधे पार्श्वे उपेयि-वान् आगतः । किंवत् । विधुवत् । यथा चन्द्रो गुरोर्वाचस्पतेः पार्श्वे उपैति । किं-भूतः स विधुः । कविना काव्यकर्त्रा शुक्रेण च । पुनः केन । बुधेन । तत्सार्धं पठनात् पण्डितेन चार्थाद्धर्मसागरगणिना, सोमपुत्रेण च । किंभूतेन । क्षितौ भूमण्डले जन्मो-त्पत्तिर्यस्य मनुष्यत्वात्, यथा मङ्गलेन च । पुनः किंभूतेन । संनिधौ समीपे, एकराशौ च स्थितिं निवासं भजतीति भाक् तेनान्वितो युक्तः । किं कुर्वन् । वाग्वाण्येवामृतं सुधां किरन् विस्तारयन् ॥

स चुचुम्ब पदाम्बुजं गुरोरभिनोनूय नवैः स्तवैस्ततः ।
मतिदर्पणिकानुबिम्बितश्रुतिभावः शकटालसूनुवत् ॥ ७२ ॥

ततो गुरुसमीपागमनानन्तरं स हीरहर्षगणिर्गुरोर्विजयदानसूरेः पदाम्बुजं चरणकमलं चुचुम्ब वन्दितवान् । किं कृत्वा । नवैर्नवीनैः स्तवैः स्तोत्रैः कृत्वा अभिनोनूयातिश-येन स्तुत्वा । किंभूतः । मतिर्बुद्धिरेव दर्पणिका आदर्शिका । 'मन्मतौ विमलदर्पणिका-याम्' इति नैषधे । मेवातदेशादौ हस्तकं विना दर्पणस्यादर्शिकेत्यभिधानम् । तस्यामनु-बिम्बिताः संक्रान्ताः श्रुतीनां समस्तशास्त्राणां भावा रहस्यानि यस्य । अथवा श्रुतयः षड्दर्शनशास्त्राणि भावा जगत्पदार्था यस्य । किंवत् । शकटालनामा नन्दनृपप्रधानः तस्य

सूनुः पुत्रः स्थूलभद्रस्तद्वत् । यथा श्रीस्थूलभद्रो मुनिः पठित्वागत्य संभूतिविजयगुरोः पादारविन्दं ववन्दे ॥ इति हीरहर्षगणेः गुरुपार्श्वगमनम् ॥

अथ नारदनाम्नि पत्तने तुरगव्योमरसेन्दुवत्सरे ।
वृषभाङ्कजिनालये गिरेरिव शंभोर्विभवैः सहोदरे ॥ ७३ ॥
पदमाप्यत पण्डिताह्वयं गणिना तेन यतिक्षितीशितुः ।
अभिभूय बुधं बुधश्रिया पदमस्यैव किमात्तमात्मना ॥ ७४ ॥
(युग्मम्)

अथ गुरुवन्दनानन्तरं हीरहर्षगणिना यतिनां मध्ये क्षितीशितुः नृपाद्विजयदानसूरीन्द्रात् पण्डित इति आह्वयं नाम एतादृशपदं प्रज्ञाम्। संपदमित्यर्थः। आप्यत प्राप्तम् । उत्प्रेक्षते—बुधश्रिया भावप्रधाननिर्देशाद्बुधत्वस्य पण्डितस्य लक्ष्म्या बुधं रोहिणीनन्दनमभिभूय पराजित्य । त(अ)स्यैव बुधस्यैव पदमात्मना स्वेनात्तं किं गृहीतमिव । कुत्र वत्सरे । तुरगाः सूर्याश्वाः सप्त (७), व्योमाकाशं शून्यम् (०), रसाः तिक्त-कटु-कषाय-आम्ल-लवण-मधुराख्याः षट् (६), इन्दुश्चन्द्रः एक (१) एव, एतावता विक्रमार्कात् सप्तोत्तरे षोडशशतवर्षे (१६०७) । कुत्र पुरे। नारद इति नाम यस्य तादृशे पत्तने । पत्तनशब्दः सामान्यतो नगरवाची। 'नगरी पुः पुरी द्रङ्गं पत्तनं पुटभेदनम्' इति हैमीवचनात्, न तु मुख्यवृत्त्येति । अथवा रत्नोत्पत्तिस्थानम् । 'पत्तनं रत्नयोनिः' इति वचनात्। रत्नोपमविजयसेनसूरेरुत्पत्तिस्थानकत्वाद्वा पत्तनम् । 'नडुलाई' नगरे इत्यर्थः । कुत्र स्थाने । वृषभाङ्कस्य सौरभेयध्वजस्यादिनाथस्यालये चैत्ये । उत्प्रेक्षते—विभवैस्तुङ्गिमधवलिमादिशोभाभिः कृत्वा शंभोरीश्वरस्य गिरेः शैलस्य कैलासस्य सहोदरे बान्धवे इव ॥ संवत् १६०७ वर्षे हीरहर्षगणेः पण्डितपदस्थापना ॥

अपि नारदपुर्यनुत्तरैरिव संख्यां विभवैर्हरेः पुरः ।
तपसः सितपञ्चमीदिने कुलशैलाभ्ररसात्मवत्सरे ॥ ७५ ॥
सुहृदेव समेत्य शोभिते वरकाणाख्यफणीन्दुकेतुना ।
जलजध्वजसार्वमन्दिरे पदमस्याजनि वाचकाह्वयम् ॥ ७६ ॥
(युग्मम्)

अपि पुनर्जलजः शङ्खो ध्वजश्चिह्नं यस्य स चासौ सार्वश्च। एतावता नेमिनाथतीर्थकृत्। जलजशब्देन शङ्खोऽप्युच्यते। यथा रघुवंशे—'ततः प्रियोपात्तरसाधरोष्ठे निवेश्य दध्मौ जलजं कुमारः' इति । 'जलजं कमले शङ्खे' इत्यनेकार्थेऽपि । तस्य मन्दिरे प्रासादे अस्य श्रीहर्षप्रज्ञांशस्य वाचकाह्वयं उपाध्यायनामपदमजनि संजातम् । किंभूते मन्दिरे । वरकाणा इत्याख्या नाम यस्य तादृशेन फणीन्दुर्नागराजः केतुश्चिह्नं यस्यैतावता श्रीव-

र्षकाणापार्श्वनाथेन समेत्य वरकाणापुरादागत्य शोभितेऽलंकृते । केनेव । सुहृदेव । यथा मित्रेणागत्य मित्रमन्दिरं भूष्यते । कस्यां पुर्याम् । नारदपुरि पूर्वोक्तायां नारदपुर्याम् । उत्प्रेक्षते—अनुत्तरैरसाधारणैर्विभवैः संपद्भिः कृत्वा हरेरिन्द्रस्य नारायणस्य वा पुरः अमरावत्या द्वारिकाया वा सख्यां वयस्यामिव । कदाजनि । कुलशैला अष्टौ (८), अभ्रमाकाशम् (०), रसास्तिक्तादयः षट् (६), आत्मा एकः (१), एतन्मिते वत्सरे हायने विक्रमार्कावनीन्द्रादष्टाधिकषोडशशते (१६०८) । कस्मिन्वासरे । तपसो माघमासस्य । 'माघस्तपा' इति हैम्याम् । सिताया उज्ज्वलायाः पञ्चम्या दिने ॥ संवत् १६०८ वर्षे पण्डितहीरहर्षगणेर्वाचकपदस्थापना ॥

विबुधावथ राजपूर्वको विमलो धर्मयुतश्च सागरः ।
सचिवाविव वाचकेश्वरौ कृतवान्सूरिमहीपुरंदरः ॥ ७७ ॥

अथ पुनः सूरिमहीपुरंदरो विजयदानसूरिराजः विबुधौ पण्डितपदधारिणौ । प्रज्ञांशावित्यर्थः । एको राज इदं पदं पूर्वं यस्य स राजपूर्वकः तादृशो विमलः च पुनः धर्म इति नाम्ना युतः सहितः सागरः एतावता राजविमलधर्मसागरनामानौ विबुधौ वाचकेश्वरौ उपाध्यायमुख्यौ कृतवान् । काविव । सचिवाविव । यथा महीमहेन्द्रः कौचिद्योग्यौ प्रधानौ विदधाति ॥

श्रियमाश्रयते स्म वाचकत्रितयी सा श्रमणावनीशितुः ।
प्रतिबोधयितुं जगत्रयीमिव मूर्तित्रितयी समुद्यता ॥ ७८ ॥

श्रमणावनीशितुः विजयदानसूरिभूमीपतेः सा पूर्वोक्ता वाचकानामुपाध्यायानां त्रितयी श्रियं शोभामाश्रयते स्म शुशुभे । उत्प्रेक्षते—जगत्रितयीं त्रैलोक्यं प्रतिबोधयितुं धर्मे स्थापयितुं सूरेर्मुनीन्द्रस्य मूर्तित्रितयीव समुद्यता । तिस्रो मूर्तय इव प्रकटीभूताः॥

विहरन्सह वाचकेन्दुना शिवपुर्यां समवासरद्गुरुः ।
वसुभूतिसुतेन संगतो भगवान्राजगृहे यथान्तिमः ॥ ७९ ॥

वाचकेन्दुना प्रक्रमात् हीरहर्षउपाध्यायविधुना सह विहरन् महीमण्डले ग्रामानुग्रामं सुखं सुखेन विहारं कुर्वन् गुरुर्विजयदानसूरिः शिवपुर्यां श्रीरोहिण्यां सीरोहानामनगरे समवासरत् समवसृतः । समागत इत्यर्थः । क इव । भगवानिव यथान्तिमश्चरमो भगवांस्तीर्थकृत् श्रीमन् महावीरदेवः वसुभूतिनाम्नो द्विजस्य सूतेन पुत्रेण गौतमस्वामिना संगतः सहितो राजगृहे समवसरति स्म ॥

त्रिदिवोज्ज्वयिनीं पुरीं तदाजनि दूदाह्वनृपो विभूषयन् ।
सुखयञ्जनतां वदान्यतां कलयन्विक्रमभानुमानिव ॥ ८० ॥

तदा तस्मिन्नवसरे श्रीविजयदानहीरहर्षकाचककलितश्रीविजयदानसूरिपादावधारणसमये दूदा इति आह्वा अभिधानं यस्य तादृशो नृपो राजा अजनि संजातः । दवस-

रापेक्षया वर्तते इत्यर्थः । किं कुर्वन् । विभूषयन् शोभां लम्भयन् । काम् । त्रिदिवं स्वर्ग अमरावतीं तात्स्थ्यात् तद्यपदेशात् स्वर्गनगरीं स्वसमृद्ध्या उत्प्राबल्येन जयति पराभवतीत्येवंशीलां पुरीं श्रीरोहिणीम् । पुनः किं कुर्वन् । जनतां पुरजनपदवासिनं सर्वं लोकसमूहं सुखयन् सुखीकुर्वन् । पुनः किं कुर्वन् । वदान्यतां दानशीलत्वं कलयन्नतिशायिनमुदारभावं बिभ्रत् । क इव । विक्रमभानुमानिव । यथा विक्रमादित्यभूपालो जातः । सोऽपि लक्ष्म्या त्रिदिवतुल्यां उज्जयिनीमवन्तीम् । मध्यमपदलोपी समासः । भूषयन्नलंकुर्वन् परदुःखकातरबिरुदत्वेनाखिललोकं सुखयन् निर्विघ्नं विदधत् कोटिशः सुवर्णटंककानां दातृत्वेन । 'अवलोअणे सहस्सं आलावे दस सहस्साइं । हसिऊण देइ लक्खं परिउसे विक्कमो कोडी ॥' इति स्वाभाविकदानम् । काव्यगाथादीनां कोटिशः सुवर्णानि इति दानिभावं च बिभ्राण इति ॥

सचिवः पुनरस्य भूभुजोऽजनि चाङ्गाभिधसंघनायकः ।
जिनधर्मरतो निधिर्धियामभयः श्रेणिकभूपतेरिव ॥ ८१ ॥

पुनरन्यदस्य दूदाभिधस्य भूभुजो भूमीपालस्य चाङ्गा इत्यभिधा नाम यस्य तादृशः संघनायकः संघपतिरेतावता 'चाङ्गोसंघवी' नामा सचिवः मन्त्री अजनि संजातः । किंभूतः । जिनस्यार्हतो धर्मे रतः आसक्तः श्राद्धधर्मपालकः । पुनः किंभूतः । धियां बुद्धीनां निधिर्निधानम् । क इव । अभय इव । यथा श्रेणिकनाम्नो भूपतेः पृथिवीनायकस्याभयकुमारनामा प्रधानः समभवत् । सोऽपि जिनप्रणीतधर्मरतस्तथौत्पातिक्यादीनां चतसृणां बुद्धीनां शेवधिः ॥

निरमापयदस्य पूर्वजो धरणो राणपुरे चतुर्मुखम् ।
वृषभध्वजतीर्थकृद्गृहं नलिनीगुल्ममिवागतं क्षितौ ॥ ८२ ॥

अस्य चाङ्गासंघभूपतेः पूर्वजः कुले पूर्वं जायते स्म तादृशो धरणो धरणकः इति नामा संघपतिः राणपुरे राणपुरनाम्नि नगरे चत्वारि चतुःसंख्याकानि मुखानि द्वाराणि यस्य तादृशं वृषभो ध्वजश्चिह्नं लाञ्छनं यस्य स एव तीर्थकृज्जिनेन्द्रः एतावता ऋषभदेवस्तस्य गृहं प्रासादं निरमापयत् शिल्पिभिः कारयति स्म । उत्प्रेक्ष्यते—क्षितौ पृथिव्यामर्थात् स्वर्गादागतं नलिनीगुल्मं नलिनीगुल्मनामविमानमिव ॥

गणपुंगवमन्त्रमन्वहं विधिनाराद्धुमना मुनीश्वरः ।
अथ सुस्थितसूरिशक्रवत्प्रणिधानं विदधे स तत्पुरे ॥ ८३ ॥

अथ शिवपुर्यागमनानन्तरं मुनीश्वरः श्रीविजयदानसूरिः प्रणिधानं ध्यानं विदधे कृतवान् । क्व । तत्पुरे श्रीरोहिणीनगरे । किंवत् । सुस्थितसूरिशक्रवत् यथा सुस्थितनामा सूरिषु शक्रः पुरंदरः अर्थात् काकन्द्यां नगर्यां ध्यानं करोति स्म । किं कर्तुकामः(मनाः) । गणपुंगवस्य सूरेर्मन्त्रं आचार्याणां परम्परया आगतं (गौतमगणभृत् किं)

मन्त्रं अन्वहं निरन्तरम् । त्रिमासीं यावदित्यर्थः । केन । विधिना षष्टाष्टमचतुर्थाचामाम्लादितपोविधानजिनसौभाग्यादिमुद्राप्रमुखशास्त्रोक्तगुरुपरम्पराप्राप्तप्रकारेण । आराद्धुं साधयितुं मनो यस्य ॥

विषयेऽप्यखिले तदा पुरीपतिना मारिरवारि जन्मिनाम् ।
परमार्हतभूमिभास्करं किमु संस्मारयितुं स्वयं नृणाम् ॥ ८४ ॥

तदा विजयदानसूरेर्ध्यानविधानावसरे पुरीपतिना शिवपुरीस्वामिना दूदाभिधानभूपेन अखिले समस्तेऽपि विषये स्वमण्डले जन्मिनां द्विपदचतुःपदपक्षिमत्स्यादीनां प्राणिनां मारिर्हिंसा अवारि निषिद्धा, अमारि प्रवर्तिता । उत्प्रेक्ष्यते—परमार्हतः कुमारपालः । 'कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ।' इति हैम्याम् । स एव भूमेः पृथिव्याः भास्करः सूर्यः । 'माध्यंदिनावधि विधेर्वसुधाविवस्वान्' इति नैषधे । एतावता कुमारपालभूपालं स्वयमात्मना नृणां मनुष्याणां संस्मारयितुं स्मृतिगोचरं कारयितुं किमु॥

अनिशं वरिवस्यितस्य तत्तपसः सिद्धिरिवाङ्गसङ्गिनी ।
स्वककान्ततयातिहार्दतो व्रतलक्ष्मीरिव वा वपुष्मती ॥ ८५ ॥
सुरसिन्धुरवत्कदाचन प्रणिधानाम्बुधिमध्यगाहिनः ।
जिनशासनदेवताप्रभोः प्रकटीभावमबीभजत्पुरः ॥ ८६ ॥

(युग्मम्)

कदाचन कस्मिन्नपि समये ध्यानपरिसमाप्तिव्यतिकरे जिनशासनदेवता शासनाधिष्ठायिका सुरी (१) वाणी (२) त्रिभुवनस्वामिकी (३) श्रीदेवी (४) यक्षराज (५) गणिपीवका एते शासनाधिष्ठातारः। तत्र तिसृणां देवीनां मध्ये अन्यतमा अमरी देवता प्रभोर्विजयदानसूरेः पुरोऽग्रे प्रकटीभावं प्रत्यक्षतामबीभजत् भजते स्म । प्रादुर्भूतेत्यर्थः । प्रणिधानं सूरिमन्त्रध्यानं तदेवाम्बुधिरर्थात् क्षीरसमुद्रस्तस्य मध्यं गाहते इत्येवंशीलस्य । किंवत् । सुरसिन्धुरवत् । यथा ऐरावणः प्रणिधानं शुक्लध्यानं तद्वद्धवलम् । एतावता दुग्धाम्बुधिस्तस्य मध्यमवगाहते तदुत्पन्नत्वात्तस्य । उत्प्रेक्ष्यते—जिनशासनदेवता अनिशं अहोरात्रं वरिवस्यितस्य सेवितस्याचीर्णस्य तस्य विजयदानसूरेस्तपसः अङ्गसङ्गिनी अङ्गस्य शरीरस्य सङ्गः अस्त्यस्या इति मूर्तिमती सिद्धिरिव वा । अथवा स्वककान्ततया निजभर्तृत्वेन अतिहार्दात् बहुस्नेहात्। 'स्नेहः प्रीतिः प्रेम हार्दम्' इति हैम्याम् । वपुष्मती अङ्गीकृताङ्गलता शरीरिणी व्रतलक्ष्मीश्चारित्रश्रीरिव प्रादुर्भूता ॥ इति विजयदानसूरेर्ध्यानम् ॥

सफलीकुरु किंकरीमिव क्वचिदादिश्य विधौ व्रतीन्द्र माम् ।
प्रणिपत्य पदाम्बुजं प्रभोरिति सा शासननिर्जरी जगौ ॥ ८७ ॥

सा ध्यानप्रत्यक्षीकृता शासननिर्जरी जिनशासनदेवता इति वक्ष्यमाणं जगौ ब-

भाषे । किं कृत्वा । प्रभोर्विजयदानसूरेः पदाम्बुजं चरणारविन्दं प्रणिपत्य नमस्कृत्य । इति किम् । हे व्रतीन्द्र सूरे, क्वचित् कुत्रचन विधौ कार्ये आदिश्य आज्ञां दत्त्वा । 'विधिर्ब्रह्मविधानयोः । विधिवाक्ये च दैवे च प्रकारे कालकल्पयोः ॥' इत्यनेकार्थः । किंकरीं स्वदासीमिव मां सफलीकुरु कृतार्थय ॥

निजगाद गुरुर्गभीरिमाधरितद्वीपवतीपतिस्ततः ।
भविताभ्युदयः पदस्य मे वद कस्माच्छरदो मुनेरिव ॥ ८८ ॥

ततो देवतावचनानन्तरं गुरुर्विजयदानसूरिर्निजगाद गदति स्म बभाषे । गुरुः किल गभीरिम्णा गाम्भीर्यातिशयेनाधरितो हीनीकृतो निर्जितो वा द्वीपवतीनां नदीनाम् । 'द्वीपमन्तर्जले तटम्' तानि द्वीपानि विद्यन्ते यासु तासाम् । 'कर्षुर्द्वीपवती समुद्रदयिता धुन्यौ स्रवन्ती' इति हैम्याम् । पतिर्भर्ता समुद्रो येन । किं निजगाद तदाह—हे देवि, त्वं वद कथय । मे पदस्य पट्टस्य कस्मान्मुनेर्मद्विनेयादभ्युदयो भविता भविष्यति । कस्याः कस्येव । शरदो मुनेरिव यथा शरत्समयादगस्तेरुदयो भवति । यथा रघौ शरद्वर्णने—'प्रससादोदयादम्भः कुम्भयोनेर्महोजसः' इति । 'मुनिद्रुमः कोरकितः शितिद्युतिः' इति नैषधे । 'मुनिद्रुमः अगस्तिवृक्षः' इति तद्वृत्तौ ॥

अवधेरनुभावतो गुणैरसमानं जिनमेदिनीन्द्रवत् ।
अतिथिं प्रविधाय भृङ्गवद्धृदयाम्भोरुहि हीरवाचकम् ॥ ८९ ॥
अनयेत्थमभण्यत प्रभुर्भगवन्नभ्रमणेर्दिनादिव ।
भविता भवतः पदोदयो भुवि नाथीसुतसाधुसिन्धुरात् ॥ ९० ॥
(युग्मम्)

अनया शासनदेवतया प्रभुर्विजयदानसूरिरित्थममुना प्रकारेणाभण्यत प्रोच्यते स्म । किं कृत्वा । अवधेरवधिज्ञानस्यानुभावतः प्रभावात् । 'अवधिः स्यादवधाने कालसीमाबलेषु' इत्यनेकार्थः । हृदयाम्भोरुहि हृदयारविन्दे भृङ्गवत् भ्रमरमिव हीरवाचकं हीरहर्षोपाध्यायं अतिथिं प्राघुणकं प्रविधाय । हृदि ज्ञात्वेत्यर्थः । किंभूतं हीरवाचकम् । गुणैः संयमशमदमज्ञानादिभिरसमानमसाधारणम् । किं च जिनमेदिनीन्द्रवज्जिनराजमिव । किमभाणि । हे भगवन्, भुवि पृथिव्यां नाथीसुतो हीरहर्षः स एव साधुषु श्रमणेषु सिन्धुरो हस्ती तस्मादेतावता हीरहर्षोपाध्यायात् ते तव पट्टस्याभ्युदयो भविता भविष्यति । कस्मात् कस्येव । दिनादभ्रमणेरिव यथा दिवसात् सूर्यस्य अभ्युदयो भवेत् ॥

पदपद्मविलासलालसभ्रमरीभूतवसुंधराधवः ।
भगवन्स युगप्रधानवन्महिमश्रीभवनं भविष्यति ॥ ९१ ॥

हे भगवन्, स हीरहर्षोपाध्यायो युगप्रधानवद्वज्रस्वामिप्रमुखयुगप्रधानाचार्य इव महिमश्रिया माहात्म्यलक्ष्म्या भवनं गृहं भविष्यति । किंभूतः । पदपद्मयोश्चरणकमलयोर्वि-

लासेषु क्रीडासु लालसाः साभिलाषास्तादृशा भ्रमरीभूता मधुकरा इवाचरिता वसुंधराधवाः राजानो यस्य राजसेव्यो भावीत्यर्थः ॥

अयमेव हि हीरवाचकोऽस्त्युचितः सूरिपदस्य नापरः ।
धरणीधवसूनुरेव यद्वसुधाधीशपदस्य नेतरः ॥ ९२ ॥

हे प्रभो, हि निश्चितं अयमेव एष हीरहर्षवाचकेन्द्र एव सूरिपदस्याचार्यपदस्थापनाया उचितो योग्योऽस्ति । परं नापरः नान्यः शिष्यः । यद्यस्मात्कारणाद्वसुधाधीशपदस्य राज्यस्योचितो धरणीधवस्य भूमीविभवस्य राज्ञः सूनुः राजपुत्रः एव परं नेतरजातीयः हीनकुलीनः ॥

प्रणिगद्य पुरो गुरोरिदं प्रमदेनापिं विनम्य तत्पदम् ।
त्रिदशी क्षणतस्तिरोदधे स्तनयित्वा स्तनयित्नुपङ्क्तिवत् ॥ ९३ ॥

त्रिदशी शासनदेवता । 'निपीय तं यस्त्रिदशीभिरर्जितः' इति नैषधे । क्षणतः क्षणमात्रात् तत्कालमेव तिरोदधे अदृश्या बभूव । किं कृत्वा । गुरोः सूरेः पुरोऽग्रे इदं प्रागुक्तं प्रणिगद्य कथयित्वा । अपि पुनः प्रमदेन हर्षेण तत्पदं गुरुचरणं विनम्य विशेषेण पञ्चाङ्गभूस्पर्शनादिना नत्वा अदृश्यीभूता । किंवत् । स्तनयित्नुपङ्क्तिर्यथा मेघमाला स्तनयित्वा गर्जित्वा विनम्योन्नतीभूयार्थाद्वर्षयित्वा तिरोधत्ते ॥ इति विजयदानसूरिपुरोध्यानप्रत्यक्षीकृतशासनदेवताप्रोक्ताचार्यपदोचितकथनम् ॥

स तदीयगिरं निपीय तां शितिवल्लीमिव हेमकन्दलः ।
मुदमन्तरनुत्तरां दधद्गमयामास दिनानि कानिचित् ॥ ९४ ॥

स सूरिः अर्थाद्ध्यानस्थः एव कानिचिद्दिनानि कियत्प्रमाणान् वासरान् गमयामासातिक्रामति स्म । किं कुर्वन् । अन्तश्चित्तमध्ये अनुत्तरामनन्यसामान्यां मुदं हर्षं दधद् धारयन् । क इव । हेमकन्दल इव । यथा विद्रुमः अन्तरा स्वमध्ये शितिवल्लीं कृष्णलतां 'कालीवेली' इति प्रसिद्धां धत्ते । किं कृत्वा । तदीयां शासनदेवतासंबन्धिनीं गिरं वाणीं निपीय पीत्वात्यादरेण निशम्य ॥

अथ साधुसुधाशनाधिपः प्रणिधानं परिपूर्य सूर्यरुक् ।
शशभृच्छरदभ्रकादिव प्रणिधानास्पदतो विनिर्ययौ ॥ ९५ ॥

अथ शासनदेवताप्रत्यक्षागमनध्यानसंपूर्णीभवनानन्तरं साधूनां मुनीनां मध्ये सुधामभृतं अश्नन्तीति अशनं भोजनं येषां वा ते सुधाशनाः देवाः तेषामधिपः स्वामी इन्द्रः एतावता विजयदानसूरिपुरंदरः प्रणिधानस्य ध्यानस्यास्पदं स्थानं ततो विनिर्ययौ बहिराजगाम । क इव । शशभृदिव । यथा चन्द्रः शरदभ्रकात् शरत्कालसंबन्धिनोऽभ्रकान्मेघान्मेघवर्धकाद्वा निर्गच्छति । किं कृत्वा । प्रणिधानं सूरिमन्त्रस्य

जापं स्मरणं परिपूर्य समाप्य परिपूर्णीकृत्य । किंभूतः । सूर्यस्येव देदीप्यमाना रुक् कान्तिर्यस्य । विधुरपि सूर्यस्य रुचो दीधितयो यस्मिन् । 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघौ ॥

स बभाज समाजमात्मना श्रमणानां श्रमणावनीमणिः ।
क्षितिमानिव बाहुजन्मनां विलसन्मङ्गलतूर्यनिस्वनैः ॥ ९६ ॥

स प्रसिद्धः सूरिपरम्परायातः प्रणिधानविधाता वा श्रमणावनीमणिः यतिराजः आत्मना स्वेन श्रमणानां साधूनां समाजं पर्षदं बभाज शिश्राय । क इव । क्षितिमानिव । यथा भूपतिर्बाहुर्ब्रह्मणो भुजोत्पत्तिर्येषां ते बाहुजन्मानः क्षत्रियास्तेषाम् । 'क्षत्रं तु क्षत्रियो राजा राजन्यो बाहुसंभवः' इति हैम्याम् । 'तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भा–' इति नैषधेऽपि । सभां भजते । कैः । विलसतां हर्षोत्कर्षात्प्रतिदिशं मधुरं वाद्यमानानां मङ्गलकारिणां तूर्याणां वाद्यानां निस्वनैर्निर्घोषैः । समम् ॥

जहिरे मिहिरौजसा महीपतिना वारचरास्तदा नराः ।
भ्रमरा इव कोशशायिनो दिववक्त्रे सितपद्मराशिना ॥ ९७ ॥

तदा गुरोः सभायामागमनावसरे महीपतिना शिवपुरीस्वामिदूदाभिधभूपतिना वारचराः कारागारनिवासिनो बन्दीजना जहिरे मुमुचिरे । किंभूतेन महीपतिना । मिहिरस्य भानोरिव । 'दिवादिनाहर्दिवसप्रभाविभाभासः करः स्यान्मिहिरो विरोचनः' इति हैम्याम् । ओजः प्रतापो यस्य । 'तदोजसस्तद्यशसः स्थिताविमौ' इति नैषधे । ओजःशब्देनात्र प्रताप उच्यते । केनेव । सितपद्मराशिनेव । यथा दिनवक्त्रे प्रभाते विकचकमलकलापेन कोशेषु निजमुकुलेषु शेरते सूर्यास्तेन मुकुलीभूतेषु कुड्मलेषु निर्गमनानलंभूष्णुतया तत्रैव बद्धा इव तिष्ठन्तीत्येवंशीला भ्रमरा भृङ्गा हीयन्ते मुच्यन्ते । 'तदप्यवेहि स्वशये शयालु' इति नैषधे । करस्थितमित्यर्थः ॥ इति विजयदानसूरिध्यानविधानानन्तरं बहिरागमनम् ॥

व्रतिनामिव तथ्यभाषिणां जनिभाजां विपिनाभ्रचारिणाम् ।
श्रमणेन्दुरवैक्षयत्पुनः स निमित्तानि निमित्तवेदिभिः ॥ ९८ ॥

स श्रमणेन्दुर्विजयदानसूरिचन्द्रः शकुनानि विन्दति जानन्तीति निमित्तवेदिनस्तैर्निर्मितानि शकुनानि शुभानि तु ················ । तथा नैषधे 'हाहा प्रतीपपवनाशकुनान्न जग्मुः' इति पुंनपुंसकत्वमुभयत्रात्र । केषाम् । विपिनेषु वनेषु अभ्रे आकाशे चरन्तीत्येवंशीला विपिनाभ्रचारिणस्तेषां मृगशृगालादयो वनचारिणः, चाषखञ्जनशिखितित्तिरदेवीभारद्वाजादयो गगनचरास्तेषां रजनिभाजां प्राणिनाम् । किंलक्षणानाम् । व्रतिनां साधूनामिव । तथ्यं सत्यं भाषते इत्येवंशीलास्तथ्यभाषिणः तेषाम् ॥

न्यगदन्निति ते पुरो गुरोः सितपक्षादिव शीतदीधितेः।
उदयो भविता पदस्य ते भुवि कुंराङ्गजवाचकेन्द्रतः ॥ ९९ ॥

ते शकुनावलोकका निमित्तवेदिनः गुरोर्विजयदानसूरेः पुरोऽग्रे इत्यमुना प्रकारेण न्यगदन् कथयन्ति स्म। हे गुरो, भुवि पृथिव्यां कुंराङ्गजवाचकेन्द्रतः हीरहर्षोपाध्यायपुरंदरात् ते तव पदस्य पट्टस्योदयो भविता उन्नतिर्भाविनी। 'उदयः पर्वतोन्नत्योः' इत्यनेकार्थः। कस्मादिव। सितपक्षादिव। यथा शुक्लपक्षात् शीतदीधितेः शिशिरकिरणस्य चन्द्रमस उदयो भवति ॥ इति शकुनावलोकनम् ॥

विधुवद्गणपुंगवं नवोदयमालोकयितुं हृदीच्छता।
अथ सूरिपदार्पणाविधौ प्रभुरागृह्यत धीसखेन सः ॥ १०० ॥

अथ ध्यानसमाप्तिबहिरागमनशकुनावलोकनानन्तरं धीसखेन अर्थात् शिवपुरीसंघपुरःसरीकृतं चाङ्गासंघपतिमन्त्रिणा स प्रभुर्विजयदानसूरिः सूरेराचार्यस्य पदस्यार्पणा प्रदानं तस्य विधिः प्रकारस्तत्र विषये। 'विभूषणानां मणिमण्डले नलः। स्वरूपलेखामवलोक्य निष्फलीचकार सेवाचणदर्पणार्पणाः ॥' इति नैषधे। आगृह्यत गुरोरत्याग्रहः कृतः। धीसखेन किं कुर्वता। नवोदयं नवीना उन्नतिर्यस्य तादृशं गणपुंगवं गच्छनायकं आलोकयितुं द्रष्टुं हृदि स्वहृदये इच्छता काङ्क्षता। किंवत्। विधुवत् यथा धीसखेन विद्वज्जनेन शुभकार्यकरणार्थं नवोदयं चन्द्रं स्पृहयता भूयते ॥

अवधार्य तदाग्रहं हितामिव वाणीं भणितो हितैषिणा।
तत ओमिति वक्त्रवारिजं वचसा योजितवान्स तत्पुरः ॥ १०१ ॥

ततस्तदाग्रहकरणानन्तरं स गुरुर्विजयदानसूरिस्तत्पुरश्चाङ्गासंघपतेरग्रे इत्यमुना प्रकारेण वचसा वचनेन कृत्वा वक्त्रवारिजं वदनकमलं योजितवान् योजयामास। इति किम्। वाक्ये एवमस्तु। ओमिति स्वीकारे। 'ओमिति प्रतिपद्यस्व' इति हेमाचार्यकृतवीतरागस्तवे। किं कृत्वा। तदाग्रहं ससंघचाङ्गासंघपतिविज्ञप्तिकामवधार्य हृदये धृत्वा। कामिव। वाणीमिव। यथा हितैषिणा स्वस्यायतौ सुखकाङ्क्षिणा पुरुषेण स्वजनेन मित्रेण वा भणितां कथितां हितां पथ्यां वाचं विद्वान् हृद्यवधारयति। 'हितं पथ्ये गते धृते' इत्यनेकार्थः ॥

निरधारि मुहूर्तमात्मना गणकैः श्रीश्रमणावनीन्दुना।
महनीयमहो विवाहवत्पुनरारभ्यत मन्त्रिणा पुरे ॥ १०२ ॥

श्रीश्रमणावनीन्दुना श्रिया गणलक्ष्म्या शोभया वा युक्तः श्रमणानां मुनीनां मध्ये अवनीन्दुर्वसुधासुधाकरो राजा एतावता श्रीविजयदानसूरिणा आत्मना स्वयमुपविश्य गणकैर्ज्योतिषिकैः समं मुहूर्तं सूरिपदस्थापनोचितोदयास्तशुद्धिग्रहगोचरोच्चस्थग्रहादिशुभदिनवेला निरधारि निश्चयीकृतम्। पुनर्मन्त्रिणा चाङ्गाख्यधीसखेन महनीयः सर्व-

जनैरतिश्लाघनीयो मह उत्सवः पुरे शिवपुर्यां आरभ्यत प्रारब्धः । किंवत् । विवाहवत् । यथा केनाप्यभिमानवता धनिना पाणिग्रहणावसरे संसारिजनातिप्रशस्यो महामहः प्रारभ्यते ॥

अथ शिल्पिचणैरचीकरन्ननुवादैरिव विश्वकर्मणः ।
मणिमण्डपमंशुडम्बराधरितादित्यममात्यमानवाः ॥ १०३ ॥

अथ मुहूर्तनिर्धारणमहोत्सवप्रारम्भणानन्तरं अमात्यमानवाः चाङ्गासंघपतिप्रधानसेवकजनाः शिल्पिचणैः प्रशस्यविज्ञानिभिर्मणीनां उपलक्षणात् काञ्चनरत्नानां गणैः खचितं मण्डपं जनाश्रयमचीकरत् कारयन्ति स्म । किंभूतं मणिमण्डपम् । अंशूनां किरणानामाडम्बरेण प्रतिदिशं अविरलातिप्रसरणेनाधरितो हीनीकृतस्तिरस्कृतो वा आदित्यो भास्करो येन । शिल्पिचणैरुत्प्रेक्षते—विश्वकर्मणो देवानां वर्द्धकेः सूत्रधारस्यानुवादैः प्रतिरूपैरिव । प्रशस्यार्थे चञ्चुचणौ शब्दौ योज्याविति प्रक्रियायाम् ॥

मणिकल्पितशिल्पिकौतुकप्रकरालोकनलालसाशयाः ।
त्रिदशास्त्रिदशीसखा दिवः किमिहालेख्यमिषादुपागमन् ॥ १०४ ॥

इह मण्डपे आलेख्यानां चित्राणां मिषात् कपटाद्दिवो देवलोकात् त्रिदशीसखाः स्वस्वदेवीसंयुक्ताः त्रिदशा निर्जरा उपागमन् किम् आगता इव । किंभूतास्त्रिदशाः । मणिभिः पञ्चविधरत्नैः कल्पितानां रचितानां शिल्पानां चित्ररूपादिविज्ञानानां प्रकरस्य समूहस्य आलोकने दर्शने लालसा लोलुपा आशया अभिप्राया मानसानि वा येषां ते ॥

स मुहूर्तदिने गुरुः समं मुनिभिर्मण्डपमध्यमीयिवान् ।
सदसः सदनं द्युसद्मभिः प्रतिपन्थी पृथिवीभृतामिव ॥ १०५ ॥

स गुरुर्विजयदानसूरिः मुनिभिः समं गणिपण्डितोपाध्यायादिसाधुभिः सार्द्धं मुहूर्तस्य दिने वासरे मण्डपस्य मध्यमीयिवान् गतः । क इव । प्रतिपन्थीव । यथा पृथिवीभृतां पर्वतानां प्रतिपन्थी वैरी इन्द्रः द्युसद्मभिः स्वर्गगृहैः सुरैः सह सदसः सभायाः सदनं मन्दिरमेत्यागच्छति । 'नृपस्य नातिप्रमनाः सदोगृहम्' इति रघुवंशे ॥

इदमीयमहामहेक्षणोपनतैः पौरनरैः परःशतैः ।
निभृतं भ्रियते स्म मण्डपो नवकासार इवाम्बुदाम्बुभिः ॥ १०६ ॥

परःशतैः शतात्परे परः शताः तैः सहस्रसंख्यैः पौरनरैर्नागरिकलोकैः मण्डपः सूरिपदप्रदानास्पदं निभृतं घनं भ्रियते स्म भृतः । किंभूतैः पौरनरैः । इदमीयस्य हीरहर्षोपाध्यायसंबन्धिनो महामहस्याचार्यपदस्थापनातिशयितोत्सवस्य ईक्षणार्थमुपनतैः समागतैः । क इव । नवकासार इव । यथा नवीनस्तडागः अम्बुदाम्बुभिः प्रावृट्पयोधरपानीयैः निर्भरं पूर्यते ॥

त्रिशलातनुजन्मशासनाभ्युदयं मूर्तमिव व्रतीश्वरम् ।
यतिभिस्तमजूहवद्गुरुस्त्रिदशीशंसितभाग्यवैभवम् ॥ १०७ ॥

गुरुर्विजयदानसूरिः साधुभिः उपाध्यायपण्डितादिमुनिभिः कृत्वा तं हीरहर्षोपाध्यायमजूहवत् आकारयामास । किंभूतं तम् । त्रिदश्या शासनदेवतया शंसितः श्लाघितो भाग्यस्य सुकृतस्य पुण्योदयस्य वैभवः संपद् यस्य । इवोत्प्रेक्षते—मूर्तं मूर्तिमन्तमङ्गीकृताङ्गं त्रिशलायाः सिद्धार्थपृथिवीपतिपत्न्यास्तनुजन्मनो नन्दनस्य श्रीमन्महावीरदेवस्य शासनस्य अभ्युदयमुन्नतिमिव ॥

गगनात्मरसेन्दुहायने विशदे पौषजपञ्चमीदिने ।
धृतशीतरुचीरुचिच्छलोज्ज्वलवस्त्रे किमु तत्पदोत्सवे ॥ १०८ ॥
व्रतिवारिधिनेमिवासवः स्वपदे स्थापितवान्स वाचकम् ।
इव पञ्चमकं गणाधिपं मृगराजध्वजतीर्थनायकः ॥ १०९ ॥

(युग्मम्)

स विजयदाननामा व्रतिनां श्रमणानां वारिधिनेमेर्वसुंधरायाः नायकः स्वामी । राजा इत्यर्थः । सूरिः तं हीरहर्षनामानं वाचकमुपाध्यायं स्वपदे निजपट्टे स्थापितवान् संस्थापयामास । क इव । मृगराजध्वजतीर्थनायक इव यथा मृगराजः सिंहो ध्वजश्चिह्नं लाञ्छनं यस्य तादृशस्तीर्थनायकस्तीर्थेश्वर एतावता श्रीमहावीरजिनः पञ्चानां संख्यापूरणः पञ्चमः, पञ्चम एव पञ्चमकः, तं गणस्य साधुसमुदायरूपगच्छस्य नायकं स्वामिनं पञ्चशतच्छात्रैः समं प्रव्रजितत्वात् । तद्व्यतिकरे पञ्चशतसाधूनां गणस्य नाथं गणधरं सुधर्मस्वामिनं स्वपदे स्थापयति स्म । कस्मिन्हायने । गगनमाकाशं शून्यम् (०), आत्मा क्षेत्रज्ञ एकः (१), रसास्तिक्तादयः षट् (६), इन्दुश्चन्द्रोऽप्येकः (१),तन्मितहायने वत्सरे विक्रमादित्याद्दशाधिकषोडशशत (१६१०) वर्षातिक्रमे । कुत्र दिवसे । पौषजपञ्चमीदिने पौषमासे जाता या पञ्चमी नाम्नी तिथिस्तद्दिवसे । किंभूते । विशदे शुक्ले। उत्प्रेक्षते—तत्पदोत्सवे तस्य हीरहर्षोपाध्यायस्य पदस्याचार्यपदप्रदानस्य उत्सवे महामहे धृतं परिहितं शीतरुचीरुचिः चन्द्रचन्द्रिका तस्याश्छलेन कपटेन उज्ज्वलं धवलं वस्त्रं वसनं येन एवंविधे इव वासरे । शुक्लपञ्चमीदिने इत्यर्थः ॥ संवत् १६१० वर्षे पौषमासे शुक्लपञ्चमीवासरे श्रीहर्षवाचकस्य सूरिपदस्थापना ॥ इति श्रीहीरविजयसूरेराचार्यपदस्थापना ॥

हृदि हीर इवैष विष्टपे विजयोऽस्यैव पुनर्भविष्यति ।
अत एव कृतास्य सूरिणा विजयाह्वा किमु हीरपूर्विका ॥ ११० ॥

यत्कारणादेष सूरिः हृदि अर्थाज्जगतां हृदये हीर इव वज्रमणिरिव । जनभाषया 'हीरो' । रहस्यं च भविष्यति । पुनरपरार्थे न्यासे विष्टपे विश्वे अस्यैव सूरेरेव जयो कुवादिवादेषु विजयो भविष्यति नान्यस्य । उत्प्रेक्ष्यते—अतः कारणात् सूरिणा वि-

जयदानगुरुणा अस्य हीरहर्षस्य हीर इति नाम पूर्वं यस्याः सा हीरपूर्विका विजयाह्वा विजय इत्याख्या कृता किमु । एतावता हीरविजयसूरिरित्यभिधानं निर्मितम् ॥

इदमेव दिनं जगत्पतेरभिषेकार्हमितीव संमदात् ।
उदयादिमसिंहभूमिमानभिषिक्तात्र तदैव बाहुजैः ॥ १११ ॥

अत्र शिवपुर्यां संमदादानन्दात् बाहुजैः राजन्यैः । 'तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भा–' इति नैषधे । उत्प्रेक्ष्यते—इति हेतोस्तदैव तस्मिन्नवसरे उदय इति पदमादिमं पत्रं तादृशः सिंह एव भूमिमान्नृपः एतावता उदयसिंहराजा अभिषिक्त इव श्रीरोहिणीमण्डलराज्ये संस्थापितः । इति किम् । इदमेव दिनं यस्मिन् दिने श्रीहीरहर्षविजयसूरेराचार्यपदं प्रदत्तं तदेव दिनं जगतां भूलोकस्य पत्युर्भर्तुश्चक्रवर्त्यादेरभिषेकस्य राज्यस्थापनाया अर्हमुचितं योग्यम् ॥

भुवि मङ्गलतूर्यनिस्वनो दिवि दिव्योऽजनि दुंदुभिध्वनिः ।
इति तौ किमु शंसतो गुरुर्न ऋतेऽस्मादपरोऽस्ति रोदसोः॥११२॥

भुवि पृथिव्यां मङ्गलानां भूयसां श्रेयसां सूचकानां तूर्याणां वादित्राणां निस्वनो निर्घोषः, तथा दिवि आकाशे दिव्यो देवतासंबन्धी दुंदुभीनां मदनभेरीणां निस्वानानां वा ध्वनिः शब्दः अजनि संजातः । उत्प्रेक्ष्यते—तौ द्वावपि शब्दौ इत्यमुना प्रकारेण शंसतोऽर्थाल्लोकानां पुरः कथयत इव । इति किम् । यत् रोदस्योर्द्यावापृथिव्योरस्मात् हीरविजयसूरेरपरोऽन्यो द्वितीयो कोऽपि असाधारणगुणगणो गुरुर्नास्ति ॥

पिकपञ्चमकूजितक्वणास्तमगायन्दृष्यणुकोदरीगणाः ।
अदसीययशोजिगासयोपगताः किंपुरुषाङ्गना इव ॥ ११३ ॥

द्व्यणुकोदरीगणा कृशोदरीनारीनिवहाः । 'शृङ्गारसर्गद्व्यणुकोदरीयम्' इति नैषधे । तदा तस्मिन् सूरिपदप्रदानसमये तमगायन् तद्गुणग्रामं गायन्ति स्म । किंभूताः । पिकानां कोकिलानां पञ्चमकूजितं वसन्तसमयोन्निद्रसान्द्रमाकन्दकलिकास्वादनोद्घटितकण्ठकुहरप्रोङ्खोलितपञ्चममधुरध्वनिस्तद्वत् क्वणो निनादो यासाम् । उत्प्रेक्ष्यते—अदसीयानां हीरविजयसंबन्धिनां यशसां कीर्तीनां जिगासया गातुमिच्छया उपगताः । स्वर्लोकाद्भूलोके स्वस्थानाद्वा शिवपुर्यां समागताः किंपुरुषाङ्गनाः किंनर्य इव ॥ इत्याचार्यपदमहोत्सवः ॥

त्रिजगन्नयनामृताञ्जनं शुशुभाते यतिपुंगवावुभौ ।
सुरभीकृतभूतलौ यशःसुमनोभिर्मधुमाधवाविव ॥ ११४ ॥

उभौ द्वौ यतिपुंगवौ विजयदानहीरविजयसूरीन्द्रौ शुशुभाते शोभां लभेते स्म । किंभूतौ । त्रिजगतां तात्स्थ्यात् तद्व्यपदेशत्वात् त्रिभुवनजनानां नयनेषु लोचनेषु आह्लादकत्वेन अमृताञ्जनं सुधाया अञ्जनतुल्यौ । पुनः किंभूतौ । यशोभिरेव सुमनोभिर्वि-

कसितकुसमैः कृत्वा सुरभीकृतं वासितं सुगन्धं विहितं भूतलं महीमण्डलं याभ्याम्। उत्प्रेक्ष्यते—मधुमाधवौ चैत्रवैशाखमासाविव॥

द्युसदामिव मेदिनीरुहौ जगतीजंगमतानुसङ्गिनौ।
स विभूषयतः क्रमेण तौ विहरन्तावणहिल्लपत्तनम्॥ ११५॥

क्रमेण विहारपरिपाट्या तौ विजयदानहीरविजयसूरीन्द्रौ अणहिल्लनाम पत्तनं विभूषयतः स्म अलंचक्रतुः। किं कुर्वन्तौ। उत्प्रेक्ष्यते—द्युसदां देवानां मेदिनीरुहौ पादपौ कल्पवृक्षाविव। किंभूतौ। जगत्यां भूमिपीठे जंगमतायाः संचरणशीलत्वस्य अनुसङ्गः सङ्गोऽस्त्यनयोस्तौ॥

श्रवणद्युमणी मणीव तौ मुनिमुक्तावलिमध्यशालिनौ।
पुरि तत्र तमोनिशुम्भनौ गणलक्ष्मीं मदयांबभूवतुः॥ ११६॥

तत्र पुरि पत्तननगरे तौ विजयदानहीरविजयनामानौ श्रमणद्युमणी मुनिमार्तण्डौ। सुरीन्द्रावित्यर्थः। गणलक्ष्मीं तपागच्छश्रियं मदयांबभूवतुः। शृङ्गारकलितां कुर्वाते स्मेत्यर्थः। काविव। मणीव। नायकरत्ने इव। मणीवादिवर्जमिति द्विवचनेऽपि संधिः स्यात्। यथा मणीव दंपतीव रोदसीव। 'मणीव नीलोत्तरलौ विरेजतुः' इति नैषधेऽपि। किंभूतौ। मुनयः साधव एव मुक्तावलिर्मौक्तिकहारस्तस्य मध्ये शालेते इत्येवंशीलौ। पुनः किंभूतौ। तमसामज्ञानान्धकाराणां निशुम्भनौ व्यापादकौ। नायकमणी अपि स्त्रियं समदां सृजतः मुक्तावलिमध्यस्थायिनौ तमोनिहन्तृकौ च॥ इति द्वयोरपि सूरीन्द्रयोः पत्तने पादावधारणम्॥

अथ तत्र समर्थनामभृद्भणशाली भवति स भूतिमान्।
सचिवो यवनस्य भूभुजो मतिवार्धिश्चणकाङ्गजन्मवत्॥ ११७॥

अथ पत्तनागमनानन्तरं तत्राणहिल्लपत्तने समर्थ इति नाम बिभर्तीति समर्थनामभृत् भणशाली वक्षस्कारव्यापारकरिणां कश्चित् संज्ञाविशेषः भवति स्माभवत्। एतावता समरथभणशालीतिनामा। किंभूतः। सचिवः प्रधानः। कस्य। भूभुजः पत्तनाधीशस्य सेरखानस्य। किंभूतस्य। यवनस्य 'पठाण' इति नाम म्लेच्छजातीयस्य। पुनः किंभूतः। भूतिमान् हस्तितुरगादिलक्ष्मीकलितः। पुनः किंभूतः। मतिवार्धिः बुद्धिसमुद्रः। किंवत्। चणकाङ्गजन्मवत्। यथा चणकनामा द्विजविशेषस्तस्याङ्गजन्मा पुत्रश्चाणक्यो धीनिधिरभूत्॥

उपचक्रमिरे महामहा अमुनाचार्यपदस्य नन्दये।
शिवशैवलिनीवरोद्वहोपयमार्थं प्रथमोत्सवा इव॥ ११८॥

अमुना समर्थभणशालीसचिवेन आचार्यपदस्य नन्दये नन्दिकारापरणार्थं महामहा अतिशयिन उत्सवा उपचक्रमिरे प्रारब्धाः। उत्प्रेक्ष्यन्ते—शिवमे(ए)व मुक्तिरूपो यः

शैवलिनीनां नदीनां वरो भर्ता समुद्रस्तस्योद्वहा पुत्री लक्ष्मीस्तस्या उपयमः पाणिग्रहणं तस्मिन् । सिद्धिलक्ष्मीविवाहे इत्यर्थः । प्रथमोत्सवा इव आदिमाः क्षणा इव ॥

पुरि जानपदीयमानवव्रज आकार्यत तेन सेवकैः ।
पिकभृङ्गभरः स्वसौरभैरिव कुञ्जे स्मितचूतशाखिना ॥ ११९ ॥

तेन समर्थमणशालिमन्त्रिणा सेवकैः स्वभृत्यवर्गैर्जानपदीयो गुर्जरमण्डलसंबन्धी मानवव्रजो जनसमूहः पुरि पत्तननगरे आकार्यत आहूयते स्म । आमन्त्रित इत्यर्थः । केनेव । स्मितचूतशाखिनेव । यथा वसन्तसमयविकसितसहकारतरुणा स्वस्यात्मीयस्य सौरभैरामोदैः परिमलैः कृत्वा पिकभृङ्गभरः कोकिलमधुकरनिकरः कुञ्जे कानने आकार्यते ॥

सुकृतं प्रविधाय सत्क्रियाममुना संघजनस्य संमदात् ।
समचीयत शम्बलं महोदयपुर्यां प्रयियासुना किमु ॥ १२० ॥

अमुना पत्तनाधीशधीसखेन सुकृतं पुण्यं समचीयत सम्यक्प्रकारेण पुष्टं क्रियते स्म । किं कृत्वा । संमदादतिहर्षात् संघजनस्य चातुर्वर्ण्यस्य संघलोकस्य सत्क्रियामशन-पानस्वादिमवस्त्राभरणश्रीफलादिदानेन सत्कारं प्रविधाय कृत्वा । उत्प्रेक्ष्यते—महोद-यपुर्यां निर्वृतिनामनगर्यां प्रयियासुना प्रकर्षेण गन्तुमिच्छुना सता अमुना मन्त्रिणा शम्बलं मार्गनिर्वाहकृत्पाथेयं किमु संचितम् ॥

गुरुनन्दिमहेऽङ्गनासखैर्वसतेर्मध्यमभूषि मानुषैः ।
जिनजन्ममहे मरुद्भिरेरिव गीर्वाणगणैरधित्यका ॥ १२१ ॥

गुरोर्हीरविजयसूरीशितुः नन्दिमहे गच्छानुज्ञामहोत्सवे अङ्गनासखैः स्वस्वकलत्रक-लितैरथवा निजापरवनितावर्गसहितैर्मानुषैः पुरुषैर्वसतेरुपाश्रयस्य मध्यमभूषि अलंक्रि-यते स्म । कैरिव । गीर्वाणगणैरिव । यथा जिनस्य अर्हद्भट्टारकस्य जन्ममहे जन्मा-भिषेकोत्सवे सुराङ्गनानुगतैर्भवनपतिवानव्यन्तरज्योतिष्कविमानवासिसुरसमूहैर्मरुद्भिरे-र्निर्जरोर्वीधरस्य मेरोरधित्यका ऊर्ध्वभूमिश्चूलिका भूष्यते ॥

गणिनन्दिमहेऽप्सरोगणैरिव मुक्ताभिरुपेत्य यौवतैः ।
करपीडनमण्डपो यथाक्षतपुञ्जैः समवर्ध्यतालयः ॥ १२२ ॥

साङ्गे प्रवचने अधीती गणिरनूचानश्च तस्य गणेर्नन्दिमहे निर्वाणमहोत्सवे यौवतैर्विविध-कुलजन्मपुरनिवासियुवतीसमूहैरुपेत्यागत्याक्षतपुञ्जैर्लाजव्रजैरालयः उपाश्रयः श्रीगुरुं अतिबहुलसंमर्दतः प्रातुमशक्नुवद्भिस्तदाश्रयत्वाद्वसतिरेव समवर्ध्यत वर्धापितः । क इव । करपीडनमण्डप इव । यथा विवाहमण्डपः सधववधूभिरक्षतैर्वर्धाप्यते । कैरिव । अप्स-रोगणैरिव । यथा गौतमादिगणभरः नन्दिमहोत्सवे सुरसुन्दरीवृन्दैर्मुक्ताभिर्मुक्ताफलैः संवर्ध्यते । 'आसैर्वर्धापयांचक्रे शुभे योगः शुभस्य हि' इति प्रतिक्रमणसूत्रवृत्तौ ॥

जिनवद्गणधारिणः पदं समनुज्ञाप्य स सूरिचक्रिणः ।
गुरुरस्य सहस्रदीधितिप्रमितावर्तनवन्दनान्यदात् ॥ १२३ ॥

स गुरुर्विजयदानसूरिः अस्य सूरिचक्रिणः हीरविजयसूरिसार्वभौमस्य सहस्रदीधितयो द्वादशभास्कराः तैरिव प्रमीयन्ते प्रमाणविषयीक्रियन्ते इति सहस्रदीधितिप्रमितानि तादृशान्यावर्तनानि हस्तावर्तकरणानि येषु तादृशानि । एतावता द्वादशावर्तवन्दनकानि अदात् ददाति स्म । किं कृत्वा । गणधारिणः गच्छधरस्य पदं समनुज्ञाप्य सम्यक्प्रकारेणानुज्ञां दत्त्वा । किंवत् । जिनवत् । यथा जिनोऽर्थान्महावीरतीर्थंकरः सुधर्मस्वामिनो गणधारिणः पदं समनुज्ञापयति ॥

वशिनोऽस्य ततो वशंवदां गणभृद्भूमिमणिर्गणश्रियम् ।
स्वसुतस्य पितेव संपदं प्रणयेन प्रणिनाय नीतिमान् ॥ १२४ ॥

ततो द्वादशावर्तवन्दनकप्रदानानन्तरं गणभृत्सु गच्छधरेषु भूमिमणिः क्षोणीरत्नं राजा विजयदानसूरीन्द्रः प्रणयेन स्नेहेन वशिनो जितेन्द्रियस्य अस्य हीरविजयसूरेर्गणश्रियं तपागच्छलक्ष्मीं वशंवदामायत्तां प्रणिनाय चकार । 'सृजति करोति प्रणयति घटयति निर्माति निर्मिमीते च' इति करणार्थाः क्रियाकलापे । क इव । पितेव । यथा जनकः स्वसुतस्य निजपुत्रस्य संपदं गृहासंपत्तिं अनुक्रमागतात्मगृहलक्ष्मीं वशंवदां प्रणयति । किंभूतः । नीतिमान् युक्तायुक्तविचारोपेतः । गुरुः पिता च ॥ इति समरथभणशालीकृतमहोत्सवपूर्वकश्रीहीरविजयसूरिपुरंदराचार्यपदनन्दिवन्दनकप्रदानवर्णनम् ॥

मुदमादधिरे मुमुक्षवस्तमवाप्याभिनवोदयं प्रभुम् ।
ननृते नरकद्विषं पुनर्गणलक्ष्म्या पुरुषोत्तमं पतिम् ॥ १२५ ॥

मुमुक्षवः संसारासारकारागारं मोक्तुमिच्छवः तपागच्छसाधवः अभि सामस्त्येन नवः 'णु स्तुतौ' नवनं नवः स्तुतिस्तद्युक्तः प्रशंसास्पदं नवीनो वा उदयोऽभ्युदयनं प्रादुर्भावो यस्य तादृशं प्रभुं स्वामिनं हीरविजयसूरिं अवाप्य लब्ध्वा मुदमानन्दम् । अर्थान् मानसे आदधिरे धारयन्ति स्म । पुनरर्थान्तरन्यासे गणलक्ष्म्या तपागच्छश्रिया नवीनाभ्युदयं तं पतिं नायकं प्राप्य ननृते नर्तितम् । किंभूतम् । नरकस्य दुर्गतेर्द्विषं वैरिणम् । पुनः किंभूतम् । पुरुषेषु सकलमनुष्येषु उत्तमं आचार्यत्वात् श्रेष्ठम् । तथा श्रिया क्षीरनीरनिधेर्नन्दिन्यापि नरकासुरसंहारकारिणं पुरुषोत्तमं नारायणं पतिं भर्तारं संप्राप्य ननृते ॥

गणपूर्वगिरौ महोदयश्रमणव्योममणीसमीक्षणात् ।
कुनयैरिह कौशिकायितं भविकैः पङ्कजकाननायितम् ॥ १२६ ॥

इह जगति भूमिपीठे वा गणस्तपागच्छः स एव पूर्वगिरिरुदयाचलः । 'पूर्वपर्वततिरोहितात्मनः' इति सुरथोत्सवकाव्ये पूर्वशब्दः । तथा 'अथोदयः पूर्वाद्रिः' इति हैम्या-

मपि। तस्मिन् महान् सर्वातिशायी उदयः पदस्थापनासमय एव सर्वोत्कृष्टं माहात्म्यं यस्य तादृशो यः श्रमणव्योममणी सर्वसाधुषु तेजस्वित्वेन भास्करः तस्य समीक्षणाद्दर्शनात् कुत्सितो विरुद्धो नयो मतं येषां ते कुनयाः कुपाक्षिकास्तैः कौशिकाः घूकास्तैरिवाचरितं प्रण(न)ष्टमित्यर्थः । पुनर्भव्यैर्मोक्षगमनयोग्यैर्जैनैः सम्यग्दृष्टिभिः पङ्कजानां कमलानां काननैर्वनैरिवाचरितम्। विकसितमित्यर्थः ॥

स्वयमेष शिवं गमी पुरानपि संप्रापयितुं प्रभुः प्रभुः।
इति वक्तुमिवेश्वरान्दिशा यशसा व्यानशिरेऽखिला दिशः॥ १२७॥

यशसा अर्थात् सूरीन्द्रश्लोकेनाखिलाः समस्ता दशापि दिशः व्यानशिरे व्याप्ताः । उत्प्रेक्ष्यते—दिशां हरिताम् ईश्वरान्नायकान्। दिक्पालानित्यर्थः। इत्यग्रे वक्ष्यमाणं वक्तुं कथयितुमिव। इति किम्। यदेष प्रभुर्हीरविजयसूरिः स्वयमात्मना शिवं मोक्षं गमी गमिष्यति कालसामाग्र्यभावाद्भवान्तरेऽपि पुनः परानन्यानपि जन्तून् मोक्षं संप्रापयितुं प्रभुः समर्थोऽस्ति। 'यथा विदूराद्रिरदूरतां गमी' इति नैषधे ॥

कजपाणितमोद्विषज्जगन्नयनस्यास्य महोभरैर्भरात्।
किमु चण्डरुचेरसूयया भ्रियते भूमिनभस्तलद्वयी॥ १२८॥

अस्य सूरेः मेहोभारैः प्रतापपटलैर्भरादतिशयाद्भूमिनभस्थलद्वयी मेदिनीगगनमण्डलयामलं भ्रियते अभिव्याप्यते। उत्प्रेक्ष्यते—चण्डरुचेः सूर्यस्यार्थात् प्रतापैः सार्द्धमसूयया ईर्ष्ययेव। अस्य किंभूतस्य। कजं कमलं अरुणत्वेन मृदुत्वेन वा तत्तुल्यः पाणिर्यस्य। अथवा आकृत्या कजं पद्मं पाणौ हस्ते यस्य। तथा तमसामज्ञानानां पापानां वा द्विषन् वैरी। तथा जगतां विश्वेषां धर्ममार्गदर्शकत्वेन नयनरूपः। पक्षे कमलाङ्कितकरस्यान्धकारद्विषतः जगच्चक्षुषः। विशेषणत्रयेऽपि कर्मधारयः॥

स पतिव्रतयेव वल्लभो गणलक्ष्म्या समुपास्यत प्रभुः।
अमुनागमि सा पुनर्मुदं नगरी नीतिमतेव भूभृता॥ १२९॥

स हीरविजयसूरिर्गणलक्ष्म्या तपागच्छश्रिया समुपास्यते सम्यक् सेव्यते स्म। कयेव। पतिव्रतयेव पतिः। स्वभर्तैव व्रतं नियमो यस्याः स्वकीयं भर्तारं विना स्वप्नेऽपि नान्यं कामुकं कामयते। सा पतिव्रता तया सत्या युवत्या वल्लभः स्वकान्तः सम्यक् त्रिकरणशुद्ध्या सेव्यते । पुनरन्यदर्थे अमुना सूरिणा सा गणलक्ष्मीर्मुदं परमानन्दमगमि प्रापिता। केनेव। भूभृतेव। यथा नीतिमता न्यायनिष्ठेन पार्थिवेन नगरी उपलक्षणात् स्वजनपदकलिता आत्मवासराजधानी प्रमोदं प्राप्यते। अथवा 'तरुणीवत्तरुणेन सूरिणा' इति पाठस्तदा किंवत्। तरुणीवत्। यथा तरुणेन यूना पुंसा तरुणी युवती मुदं प्रीतिं गम्यते प्राप्यते। ण्यन्तः प्रयोगः। किंभूतेन तरुणेन। सूरिणा पण्डितेन विविधविलासरसचतुरशीतिकामासनक्रीडानर्मवचनचातुरीचतुरेण । 'मेधाविकोविद-

विशारदसूरिदोषदृक्' इति हैम्यां विद्वन्नाम। तथा। 'वाचो वाच्यविवेकविक्लवधिया-मीदृग्विधा मादृशां लप्स्यन्ते क्व किलावकाशमथवा सर्वंसहाः सूरयः' इति चम्पू-कथायामपि। अथवेति स्मरणगर्भे पक्षान्तरे वा सूरयो विद्वांसः सर्वंसहाः। मादृशा-मनतिप्रकृष्टा अपि वाचः सहिष्यन्ते हृद्यवधारयिष्यति ज्ञातृत्वादिति तट्टिप्पनके॥

अभजन्त यतिव्रजा विभुं विहगाः स्मेरमिवावनीरुहम्।
पृणति स्म स तान्पुनर्महोदयसस्यं स प्रदिशंस्तानिव॥ १३०॥

यतिव्रजास्तपागणश्रमणसमूहा विभुं हीरविजयसूरिमभजन्त सेवन्ते स्म। के इव। विहंगा इव। यथा पक्षिणः स्मेरं विकसितमवनींरुहं वृक्षं सेवन्ते। पुनः स सूरिस्तान् मुनिमण्डलान् पृणति स्म प्रीणाति स्म। किं कुर्वन् सः। महोदयो मोक्षो महानुदयो वा स एव सस्यं फलं प्रदिशन् प्रयच्छन् ददानः। क इव। स इव। यथा स स्मेरावनी-रुहः फलं स्वसस्यं विश्राणयन् विहगान् प्रीणाति। 'प्रीणाति प्रीणयति च पृणतीति प्रीणनार्थाः स्युः' इति क्रियाकलापे॥ इति हीरविजयसूरेस्तपागच्छसाम्राज्यप्राप्तिः॥

कुनयान्नयता विनम्रतां जयिनेव प्रतिगर्जतोऽमुना।
दधताधरितः क्षमां ह्रिया किमु पातालमहीश्वरोऽविशत्॥ १३१॥

क्षमामतिशायिनीं क्षान्तिं उपशान्तवामित्यर्थः दधता धारयता अमुना सूरिणा अ-धरितः हीनीकृतो धिक्कृतः सन् अहीश्वरः क्षमां पृथिवीं धरतीति तादृशः शेषनागः। उत्प्रेक्ष्यते—ह्रिया लज्जया किमु पातालं रसातलमविशत् प्रविष्ट इव। 'क्षमा क्षिति-क्षान्त्योः' इत्यनेकार्थः। अमुना किं कुर्वता। [प्रतिगर्जतो वैतण्डिकान्] कुनयान् कु-पाक्षिकान् शाक्यादीन् विनम्रतां प्रणमनशीलतां नयता प्रापयता। केनेव। जयि-नेव। यथा विजयकारिणा नृपतिना प्रतिगर्जन्तः स्पर्द्धिनः पार्थिवा विनम्रतां नीयन्ते। 'सुहृदयो हृदयः प्रतिगर्जताम्' इति रघुवंशे॥

परिशीलितशीललीलया तुलयञ्श्रीसकडालनन्दनम्।
स गभीरतयेव सागरं गुणमाणिक्यनिधिः पराभवत्॥ १३२॥

गुणाः शमदमार्जवमार्दवादयस्त एव माणिक्यानि रत्नानि तेषां निधिर्निधानं स सूरि-रुत्प्रेक्ष्यते—गभीरतया त्रिजगज्जनातिशायिस्वगाम्भीर्येण सागरं पराभवत्पराजैषीदिव। किं कुर्वन्। परिशीलितमाबालकालात्परिपालितं यत् शीलं ब्रह्मचर्यं तस्य लीला विला-सस्तया सकडालनाम्नो नागरजातिद्विजस्य नन्दनं पुत्रं श्रीस्थूलभद्रं तुलयन् सदृशी-कुर्वन्॥

निजधैर्यवदान्यताश्रिया विजिता येन सुराचलद्रुमाः।
किमु तद्विजयाय मन्त्रणं सहवासच्छलतो वितन्वते॥ १३३॥

येन सूरिणा निजस्यात्मनो धैर्यस्य धैर्यताया घोरोपसर्गपरिषहनिष्कम्पतायाः, तथा

वदान्यताया दानशीलतायाः श्रिया शोभया आधिक्येन वा सुराणां देवानां अचलाः पर्वताः पञ्च मेरवः तथा द्रुमा वृक्षाः पञ्च कल्पतरवः विजिताः पराभूताः सन्तः सहवासच्छलतः एकत्र निवसनकपटतः। उत्प्रेक्ष्यते—तद्विजयाय सूरिपराभवनार्थं मन्त्रणं मिथ आलोचं किमु वितन्वते कुर्वन्तीव॥ इति हीरविजयसूरिगुणाः॥

अधिपौ निखिलक्षमाभृतां सुरसेव्यौ कलधौतदीधिती।
हिमहेमगिरी नु जंगमौ मुनिचन्द्रौ भुवि तौ विजह्रतुः॥ १३४॥

तौ मुनिचन्द्रौ विजयदानसूरि-हीरविजयसूरीन्द्रौ भुवि पृथ्वीपीठे विजह्रतुः विहारं चक्रतुः। किंभूतौ। निखिलाः समस्ताः क्षान्तिधराः शान्तिरसशालिनः साधवः तेषामधिपौ स्वामिनौ। पुनः किंभूतौ। सुरैर्देवैः सेव्यौ उपासनीयौ। पुनः किंभूतौ। कलधौतं काञ्चनं तद्वद्दीधिती शरीरकान्ती ययोस्तौ। नु इति वितर्के। जंगमौ संचरन्तौ हिमहेमगिरी हिमाचलसुराचलाविव। किंभूतौ। क्षमाधराणां पर्वतानां नाथौ। 'हिमालयो नाम नगाधिराजः' इति कुमारसंभवनामकाव्ये। तथा 'आरोहतु क्षितिधराधिपतिं सुमेरुम्' इति सूक्तावल्याम्। तथा देवैर्निषेवनीयौ। 'कलधौतं रूप्यसुवर्णयोः' इत्यनेकार्थः। कलधौते इव रूप्यसुवर्णे इव कान्ती शोभा रुची शोभा वा ययोस्तौ॥

अथ भावडसूनुसूरिराण्मुदिरैर्मेदुरिते नभस्तले।
इव मानस इष्टमानसः कृतवान्सूरतिवन्दिरे स्थितिम्॥ १३५॥

अथ हीरविजयसूरेर्नन्दिभवनानन्तरं कदाचित् कस्मिन्नपि संवत्सरे मुदिरैः प्रावृषेण्यपयोदैर्मेदुरिते पुष्टे कृते निभृते नभस्तले गगनमण्डले सति। वर्षाकाले इत्यर्थः। भावड इति नाम्नो व्यवहारिणः सूनुर्नन्दनः स एव सूरिराट् एतावता विजयदानसूरिभूमिमघवा सूरतिनाम्नि वन्दिरे स्थलजलमार्गागमनस्थाननगरे स्थितिं चतुर्मासिकास्थानलक्षणां चक्रे कृतवान्। क इव। इष्टमानस इव। यथा राजहंसो वर्षासमये मानसनाम्नि सरसि वसतिं कुरुते। 'नृपमानसमिष्टमानसः' इति नैषधे। इष्टमानसो हंस इति तद्वृत्तौ॥

विलसत्यथ मेदपाटकाभिधदेशो वसुधाविशेषकः।
निखिलेष्वपि मण्डलेषु यः प्रमुखोऽङ्गावयवेषु वक्त्रवत्॥ १३६॥

अथ विजयसेनसूरेर्जन्मदीक्षावसरः अथापरवर्णनप्रारम्भे मेदपाट इत्यभिधा नाम यस्य तादृशो देशो विलसति शोभते। किंभूतः। वसुधायाः पृथिव्याः विशेषकः अर्थात्क्षोणीलक्ष्म्यास्तिलकः यो जनपदः निखिलेषु मण्डलेषु देशेषु प्रमुखः प्रकृष्टः सर्वधातुखनीस्थानत्वेन प्रशस्यः। किंवत्। वक्त्रवत्। यथा समग्रेष्वङ्गावयवेषु वक्त्रं वदनं प्रमुखं चतुरिन्द्रियवसतित्वेन प्रवरम्। वक्त्रं पुंनपुंसके॥

सुरमन्दिरजित्वरश्रिया गमितं येन विमानमीयताम् ।
फणभृद्भुवनं भुवस्तलं भजति व्रीडभरोदयादिव ॥ १३७ ॥

येन मेदपाटमण्डलेन सुरमन्दिरस्य स्वर्लोकस्य जित्वर्या जयनशीलया श्रिया लक्ष्म्या विमाननीयतामपमानपदवीं गमितं प्रापितं सत्फणाभृद्भुवनं नागलोक उत्प्रेक्षते—व्रीडभरस्य लज्जातिरेकस्योदयादाविर्भावाद् भुवस्तलं भूमेरधोविभागं भजति शीलतीव । व्रीडशब्दोऽकारान्तोऽपि नाममालावृत्तौ तथा 'व्रीडायां च भवेद्व्रीडः' इति शब्दप्रभेदे ॥

अलकायितपूःपरम्पराः परमं बिभ्रति यत्र विभ्रमम् ।
नभसोऽनवलम्बनच्युतेः शतशोंऽशा इव भूतले दिवः ॥ १३८ ॥

यत्र देशे अलकायिता सर्वसमृद्ध्या धनदनगरीवदाचरिताः पूःपरम्परा पुरीपङ्क्तयः परममुत्कृष्टं विभ्रमं शोभां बिभ्रति धारयन्ति । उत्प्रेक्ष्यते—नभसः आकाशादनवलम्बनेन आधाररहितत्वेन च्युतिः पतनं यस्यास्तादृश्या दिवो देवलोकस्य भूतले भूमिमण्डले शतशः शतसंख्याका अंशा भागाः खण्डा इव ॥

त्रिजगद्विजयोद्यतस्य यद्वनराज्यो रतिजानि धन्विनः ।
सुमसंगतषट्पदा धनुर्विशिखोल्लासिखल्लरिका इव ॥ १३९ ॥

यद्वनराज्यो मेदपाटमण्डलसंबन्धिन्यो विविधविपिनश्रेणयः शोभन्ते इति संबन्धः । किंभूताः । सुमेषु पुष्पेषु संगता विकसत्पत्र प्रकरनिःसरदमन्दमकरन्दपानागमनेन मिलिता अथवा मकरन्दपानलोलुपतया समेत्यान्तर्निलीयमानाः षट्पदा मधुकरा यासु ताः । उत्प्रेक्ष्यन्ते—त्रिजगद्विजयोद्यतस्य त्रिभुवनजनपरम्परापराभवनविनिर्मितोद्यतस्य रतिर्जाया यस्य स रतिजानिः । 'जायाया निङ्' इतिनिप्रत्ययः । 'लोपो व्योर्वलि' इति यकारलोपे सिद्धं जानिरिति प्रक्रियाकौमुद्याम् । रतिपतिः स एव धन्वी धनुर्धरस्तस्य कुसुमायुधधानुष्कस्य धनूंषि कोदण्डा विशिखा बाणास्तैरुल्लसन्ति शोभन्ते इत्येवंशीलाः खल्लरिकाः धनुर्विद्याभ्यसनभूमय इव । यत्र धनुःपरिश्रमः क्रियते ॥

श्रितनागसगन्धसारभूरुहमाला व्यलसन्निहाचलाः ।
मलयस्य विलासमूर्तयः शमनाशाङ्कमपास्य हृष्यतः ॥ १४० ॥

इह मेदपाटमण्डले अचलाश्चित्रकूटप्रमुखाः पर्वता व्यलसन् विभान्ति स्म । किंभूताः । श्रिता नागा हस्तिनो यैः । तथा सह गन्धैः परिमलैस्तथा सारैर्मज्जभिर्वर्तन्ते तादृश्यो भूरुहाणां विविधवृक्षाणां मालाः श्रेणयो येषु । पश्चात् कर्मधारयः । उत्प्रेक्ष्यते—मलयस्य दक्षिणाचलस्य विलासेनाक्रीडया अथवा विलासार्थे मूर्त्तय काया इव । किंभूता मूर्तयः । श्रिता नागा भुजगा याभिः । 'रुद्धाश्चन्दनपादपा विषधरैरम्भोरुहाः [कण्ट]-कैः' इति सूक्तोक्तेः । अथ अन्येषामपि द्रुमाणां कोटरेषु प्रायो भुजंगा भवेयुरिति सगन्धसाराः चन्दनद्रुमकलिता भूरुहाणां रसालसालपुंनागप्रियंगुलवङ्गादितरूणां मा-

लाः पङ्क्तयो यासु। मलयस्य किं कुर्वतः। शमनस्य यमस्याशाया वाञ्छाया अङ्कमुत्सङ्गम्। तत्त्वतस्तु दक्षिणादिक्क्रोडम्। अपास्य त्यक्त्वा हृष्यतः प्रमोदं प्राप्नुवतः। प्रायो दुष्टाशयसमीपं त्यजन् जनः संतुष्यति॥ इति मेदपादमण्डलः॥

इह नीवृति नारदाभिधा नगरी नागपुरीव राजते।
बलिराजविराजितान्तरा रममाणानणुभोगिभाजिनी॥ १४१॥

इहास्मिन् नीवृति मण्डले नारदाभिधा 'नडुलाई' इति नाम्ना लोकप्रसिद्धा नारद इत्यभिधा नाम यस्यास्तादृशी नगरी नागपुरीव भोगवतीव राजते दीप्यते। किंभूता। बलिना बलवता राज्ञा विशेषेण राजितं शोभितं अन्तरं मध्यं यस्याः। पक्षे—बलिनाम्ना नृपेण दानवाधिपतिना भूषितमन्तरं मध्यं बलिवेश्मत्वात्। पुनः किंभूता। रममाणाः स्वैरं क्रीडां कुर्वाणाः अनणवो महान्तो भोगिनो राज्यादिसुखवन्तो विलासिनस्तान् भजतीत्येवंशीला। पक्षे—खेलनमहाकायभुजगकलिता॥

उपमातुमिवामरावतीं भुवने तन्निभभावदुर्विधे।
कृतवानरविन्दनन्दनः पुरमेतां विबुधैरुपासिताम्॥ १४२॥

अरविन्दनन्दनो ब्रह्मा। 'पद्मनन्दनसुतारिरंसुना' इति नैषधे। यथा पद्मनन्दनस्तथैवारविन्दनन्दन इति। एतां 'नडुलाई'नगरीं कृतवान् निर्मितवान्। किंभूताम्। विबुधैर्विशिष्टपण्डितैर्देवैश्च उपासितां सेविताम्। उत्प्रेक्ष्यते—तन्निभभावैस्तस्या अमरावत्या निभास्तुल्या ये भावा नगरीरूपाः पदार्थास्तैर्दुर्विधे दरिद्रे इन्द्रपुरीप्रतिमापरनगरीरहिते तादृशे भुवने विश्वे अमरावतीमिन्द्रनगरीमुपमातुमुपमायुक्तां कर्तुमिव। अमरावतीसंनिभामित्यर्थः॥

युवतीयुवराजिराजिते नगरे सालनिभान्मनोभवः।
स्थितवान्नवसूरिसाध्वसादिव दुर्गं प्रविधाय सानुगः॥ १४३॥

मनोभवो मदनो नगरे 'नडुलाई'पुर्याम्। उत्प्रेक्ष्यते—नवसूरेः हीरविजयाचार्यस्य साध्वसाद्भयात् स्थितवानिव। किं कृत्वा। दुर्गं कोट्टं प्रविधाय निष्पाद्य। कस्मात्। सालनिभात् नगरीप्राकारच्छलात्। किंभूते नगरे। युवतीयुवराजिराजिते तरुणीतरुणश्रेणीभूषिते। स्मरः किंभूतः। सानुगः सहानुगैः स्वसेवकैर्निजपरीवारैर्वर्तते यः॥

यदनन्यहिरण्यशीतरुग्मणिक्लृप्तालयलक्ष्मिकाङ्क्षया।
चरणं मुरवैरिणोऽनिशं शुचिचन्द्रावुपचेरतुः किमु॥ १४४॥

यस्याः नारदपुर्या अनन्यानामसाधारणानां हिरण्यैः सुवर्णैः तथा शीतरुग्मणिभिः चन्द्रकान्तरत्नैः क्लृप्तानां निर्मितानाम्। सुवर्णचन्द्रकान्तमयानामित्यर्थः। आलयानाम्। अनेकमन्दिराणामित्यर्थः। लक्ष्म्याः शोभायाः। लक्ष्मीशब्दः शब्दभेदे ह्रस्वोऽप्यस्ति। तथा समासमध्ये ह्रस्वशब्दानयने न दोषः। यदुक्तं जिनप्रभसूरिकृतचतुर्विंशतिजिनस्तव-

ऋषभनम्रे—'चरणलक्ष्मिकरग्रहणोत्सवे' इति । उत्प्रेक्ष्यते—शुचिचन्द्रौ सूर्याचन्द्रमसौ । 'हरिः शुचीनौ गमनाद्ध्वजाध्वगौ' इति हैम्यां रविनामानि । मुरवैरिणो विष्णोश्चरणं पदं अनिशं निरन्तरं किमु उपचेरतुः सेवेते स्म ॥

प्रविभाव्य भवेन भस्मितं स्मरमेतन्निखिलानुजीविनः ।
किमु यत्र समेत्य चक्रिरे वसतिं पौरपरम्परोपधेः ॥ १४५ ॥

एतस्य स्मरस्य निखिलाः समस्ता अप्यनुजीविनः सेवकाः यत्र नारदपुर्यां समेत्यागत्य । उत्प्रेक्ष्यते—पुरे भवाः पौराः नागरिकजनाः तेषां परम्पराः श्रेणयः तासामुपधेः कपटात् वसतिं निवासं चक्रिरे कृतवन्तः । किमु किं कृत्वा । भवेन शंभुना स्वधैर्यलोपोद्भूतकोपानलेन भस्मितं ज्वालितावशेषीकृतं भस्म करोतीति भस्मयति भस्म्यते स्मेति भस्मितस्तम् । 'तत्करोति तदाचष्टे' इति ञिः ञ्यन्तत्वा(न्ता)त्तक् । स्मरं स्वस्वामिनं मनोभवं प्रविभाव्य दृग्गोचरीकृत्य ॥

कुतुकाद्बहुरूपिणं स्मरं हृदि निश्चित्य रतिर्युवभ्रमात् ।
स्वयमप्यकरोदिदंमिता निजमूर्तीरिव यद्वधूपधेः ॥ १४६ ॥

रतिः शृङ्गारयोनिसीमन्तिनी स्वयमात्मनापि । उत्प्रेक्ष्यते—यद्वधूपधेर्नारदनामनगरीसुन्दरीदम्भात् । इदंमिताः स्मररूपप्रमाणा यावन्ति स्मररूपाणि तावन्निजमूर्त्तीरात्मीयकायान् किमु अकरोत् कृतवतीव । किं कृत्वा । युवभ्रमान्नारदनगरीतरुणजनभ्रान्त्या कुतुकात् कौतूहलात् स्वकान्तं स्मरं बहुरूपिणं अनेकानि रूपाणि सन्त्यस्येत्येवंविधं हृदि मनसि निश्चित्य निधाय निश्चयेनावधार्य यावन्ति रूपाणि स्वभर्त्रा स्मरेण कौतुकात्क्रीडार्थं कृतानि, रत्यापि तेन समं रमणार्थं तावन्त्यात्मीयानि रूपाणि निर्मितानीत्यर्थः । एतावता स्मररूपा युवानः, रतिरूपाश्च युवत्यः सन्तीत्यर्थः ॥ इति नारदपुरीवर्णनम् ॥

मुरवैरिपुरीव माधवोऽजनि तत्रोदयसिंहभूधनः ।
धरणी रमणं प्रणीय यं शुशुभे सूरमिवारविन्दिनी ॥ १४७ ॥

तत्र नारदपुर्यां उदयसिंहनामा भूधनो भूमीपतिरजनि संजातः । क इव । माधव इव । यथा यथा मुरनाम्नो दैत्यस्य वैरी नारायणस्तस्य पूर्नगरी तस्यां द्वारिकायां पुर्यां श्रीपतिर्नाम भूपतिः संजायते स्म । तथा धरणी मेदपाटमण्डलमेदिनी यं उदयसिंहराणकं रमणं भर्तारं प्रणीय कृत्वा शुशुभे शोभते स्म । केव । अरविन्दिनीव । यथा कमलिनी सूरं सूर्यं स्वपतिं प्रणीय शोभितवती ॥

युवतीव युवानमङ्गजान्कलधौतप्रमुखान्खनीव्रजान् ।
पृथिवी पृथिवीपुरंदरं यमवाप्य प्रमदादजीजनत् ॥ १४८ ॥

पृथिवी मेदपाटदेशावनी प्रमदादानन्दाद्यं पृथिवीपुरंदरं उदयसिंहराणकमवाप्य

भर्तृत्वेन अधिगत्य कलधौते कनकरूप्ये प्रमुखे आदी येषां तादृशान् सर्वधातुप्रधानान् खनीव्रजान् खानिनिकरानजीजनत् प्रकटीकृतवती । केव । युवतीव । यथा तरुणी स्त्री तरुणं युवानं तरुणं यौवनमदोन्मत्तं कान्तं प्राप्य अङ्गजान् नन्दनान् जनयति ॥

विपुलां विपुलाहवाहताहितशूरस्रवदस्रराशिना ।
हृदयेशवदूर्णुनाव यो नवकौसुम्भिकवाससा वशाम् ॥ १४९ ॥

य उदयसिंहमहीमहेन्द्रो विपुलाहवेषु महासंग्रामेषु आहताः सामस्त्येन सपरिवारेण व्यापादिता येऽहिताः स्वशत्रुभूताः शूराः स्वभटास्तेषां स्रवताङ्गोपाङ्गेभ्यो निःसरता अस्रराशिना रुधिरप्रकरेण विपुलां वसुधामूर्णुनावाच्छादयामास । किंवत् । हृदयेशवत् प्राणवल्लभ इव । यथा भर्त्ता स्वकान्तां नवेन सद्यस्केन कौसुम्भिकेन कुसुम्भेन रक्तं वस्त्रं कौसुम्भिकं तेन कुसुम्भरञ्जितेन वाससा नोर्णोति आच्छादयति परिधापयति । 'ऊर्णुञ् छ आच्छादने' ह्वादिको धातुः ॥

बहुना महिमाभिनन्द्यते किममुष्योदयसिंहभूपतेः ।
न चिरादजरामरीभवेद्युधि योऽभ्येत्य हि संमुखीभवेत् ॥ १५० ॥

अमुष्योदयसिंहभूपतेर्महिमा माहात्म्यं बहुनाधिक्येन किं अभि सामस्त्येन नन्द्यते समृद्धिं प्राप्यते । अभिनन्द्यते प्रशस्यते वा । यस्मात् कारणाद्युधि संग्रामे यः कोऽपि वीरः सुभटः अमुष्य भूवलयैकवीरस्य राज्ञः अभ्येत्य शौर्यादागत्य संमुखीभवेत् संमुखीभूयात् तेन सह संग्रामं कुर्यात् स विक्रान्तो न चिरादल्पकालादेव अजरामरीभवेद-जरामरत्वं लभते । देवभूयं भजेदित्यर्थः । यतः—'जिते च लभ्यते लक्ष्मीर्मृते चापि सुराङ्गना । क्षणविध्वंसिनि काये का चिन्ता मरणे रणे ॥' इति वृत्तरत्नाकरवृत्तिवचनात् ॥ इत्युदयसिंहराणकः ॥

अपि तत्र कमाख्यनैगमोऽजनि तद्भूपुरुहूतसंमतः ।
व्यवहारिषु यः पुरोगतां समवर्गेषु दधार धर्मवत् ॥ १५१ ॥

अपि पुनस्तत्र नडुलाईनगर्यां कमा इत्याख्या नाम यस्य तादृशो नैगमो वणिक् अजनि जातः । किंभूतः । तस्य पूर्वव्यावर्णितस्य भूपुरुहूतस्योदयसिंहभूमीन्द्रस्य संमतो मान्यः । 'इदमः प्रत्यक्षगते समीपतरवर्त्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानी-यात् ॥' ग्रन्थकरणावसरे तस्य राज्ञः परोक्षत्वात् एतत्कथनम् । अथवा इदं स्वाभाविकवचनम्, कवीनां वर्णनौत्सुक्यात् सर्वमपि प्रत्यक्षमेव स्यान्नैषधे प्रयोगनिदर्शनात् । इह नगर्यां यः कमाख्यः साधुर्व्यवहारिषु लक्ष्मीवत्सु पुरोगतां प्रकृष्टताम् । 'वर्यं वरेण्यं प्रकरं पुरोगम्' इति हैम्याम् । मुख्यतामित्यर्थः । दधार बिभर्त्ति स्म । किंवत् । धर्मवत् । यथा समेषु सर्वेषु चतुर्षु वर्णेषु अर्थादिलक्षणेषु धर्मः प्रधानतां धत्ते । अर्थकाममोक्षाणां धर्माधीनत्वेन धर्म एव मुख्यः ॥

किमपास्य जिनांह्रिसेवया शशिना येन कलङ्ककश्मलम् ।
स्थितमेत्य दिवः क्षितौ पुनर्नभसो नीलिमसङ्गशङ्कया ॥ १९२ ॥

येन यद्रूपेण कमामूर्तिना शशिना चन्द्रेण । उत्प्रेक्ष्यते—दिव आकाशादेत्य आगत्य क्षितौ पृथिव्याम् । अर्थात् नड्डुलाईनगर्याम् । स्थितं वासो विहितः । किं कृत्वा । जिनो वीतरागः स्वविमानप्रसादगतशाश्वतार्हत्प्रतिमा तस्यांह्रेः पदस्य सेवया विविधपूजास्तवाद्युपासनया । अथ च जिनो विष्णुस्तस्यांह्रेरुपास्त्या । तत्त्वतस्तु 'आकाशं विष्णुपदम्' इत्यभिधानम् । कलङ्करूपं कश्मलं मलमपास्य निरस्य । तर्हि तत्रैव कथं न स्थितम्, स्थानाभावे हेतुमाह—कया । पुनर्व्याघुट्य नभसः आकाशस्य नीलिमा श्यामलत्वं तस्य सङ्गो मिलनं भवनं तस्य शङ्कया अनिष्टोत्प्रेक्षणेन । 'धृतगम्भीरखनीखनीलिमा' इति नैषधे गगनस्य श्यामत्वम् । श्यामनीलत्वयोरभेदः ॥

करवीरगृहत्वमुग्रतां प्रविहायात्मविरूपनेत्रताम् ।
पुरि यन्निभतोऽवतीर्णवानिव पीयूषमयूखशेखरः ॥ १९३ ॥

पुरि नारदपुर्यां यस्य कमासाहस्य निभतः कपटात् । उत्प्रेक्षते—पीयूषमयूखशेखरश्चन्द्रमौलिरीश्वरोऽवतीर्णवानिव अवतारं गृहीतवानिव । किं कृत्वा । करवीरगृहत्वं श्मशानवेश्मताम् । 'श्मशानं करवीरं स्यात्' इति हैम्याम् । पुनरुग्रताम् । चण्डतां तथात्मनो निजस्य विरूपं विरुद्धं विकृताकारं वह्निमयत्वान्नेत्रं यस्य तत्ताम् । 'अहिर्बुध्नो विरूपाक्षविषान्तकौ च' इति हैम्याम् । तृतीयानललोचनतामित्यर्थः । प्रविहाय त्यक्त्वा ॥ इति कमावर्णनम् ॥

कोडाईत्यस्य कान्तासीज्जगतीयुवतीमणिः ।
यथा सुमनसां सार्वभौमस्य जयवाहिनी ॥ १९४ ॥

अस्य कमाव्यवहारिणः कोडाई इति नाम्ना कान्ता पत्नी आसीत् । किंभूता । जगत्या भूमेर्युवतीनां यावद्वनितानां मध्ये मणी रत्नम् । केव । जयवाहिनीव । यथा सुमनसां देवानां सार्वभौमस्य चक्रवर्त्तिनः शक्रस्य पौलोमी नाम पत्नी आस्ते । यथेतीवार्थे ॥

रम्भा दम्भादिवामुष्यास्त्रिदशी त्रिदशौकसः ।
विमोहिता कमारूपं निरूप्यास्यामुपागता ॥ १९५ ॥

कमाव्यवहारिणो रूपं शरीरसौन्दर्यं निरूप्य विलोक्य विमोहिता रागातिशयं प्राप्ता सती अमुष्या कोडिमादेव्या दम्भात् कपटात् त्रिदशौकसः स्वर्लोकतः अस्यां नड्डुलाईपुर्यां उपागता समेता । उत्प्रेक्ष्यते—रम्भानाम्नी त्रिदशी अप्सरा इव देवीव । अथवा 'प्रेक्ष्य क्ष्मायामुपागता' इति पाठः ॥

दृष्ट्वा पतिं रतं रत्यां प्रीत्येव त्यक्तकायया ।
दुःखात्सपत्न्यास्तत्पत्न्या व्याजाज्जन्माददेऽपरम् ॥ १९६ ॥

प्रीत्या प्रीतिनाम्न्या स्मराङ्गनया तस्य कमासाधोः पत्न्या व्याजात् कोडिमदेवीदम्भात् । उत्प्रेक्ष्यते—अपरमन्यजन्मावतार आददे गृहीतम् । किंभूतया प्रीत्या । समान एकः पतिर्यस्याः सा सपत्नी । 'सपत्न्यादिषु नित्यं नुक् वाच्यः' इति सपत्नी । तस्या दुःखादसातात् त्यक्त उज्झितः कायः शरीरं यया । किं कृत्वा । पतिं स्मरं स्वकान्तं रत्यां रतिविषये रतमत्यासक्तं दृष्ट्वा विलोक्य । 'श्रेणीद्वयेशयोः कन्ये उपायंस्त स···क्रमात् । वैजयन्तीं जयन्तीं च रतिप्रीती इव स्मरः ॥' इति रत्नशेखरसूरिकृतप्रतिक्रमसूत्रवृत्तौ स्मरस्य रतिप्रीतिनाम्न्यौ द्वे पत्न्यौ ॥

त्यक्त्वावतीर्णां पुरुषं पुराणं स्वमिमां रमाम् ।
विलक्ष्यः प्रेक्ष्य तद्दुःखान्ममज्जेवार्णवे जले ॥ १९७ ॥

अर्थात् श्रीपतिः तद्दुःखात्तस्याः स्वपत्न्याः लक्ष्म्याः दुःखादसातादतीवार्त्या । उत्प्रेक्ष्यते—आर्णवे समुद्रसंबन्धिन्यगाधे जले पानीये ममज्ज मग्नवानिव । किंभूतः । विलक्ष्यः पत्न्याः परलोकगमनावलोकनाद्विमनायमानः । किं कृत्वा । प्रेक्ष्य प्रविभाव्य । काम् । रमां लक्ष्मीम् । किंलक्षणाम् । अवतीर्णां गृहीतावताराम् । काम् । कोडिमदेवीम् । कोडाईरूपामित्यर्थः । 'ध्रुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः' । ध्रुवमुत्प्रेक्ष्यते—'शतं शतशः संख्याः अप्सरसः सुराङ्गनाः अवतीर्य यां नगरीमध्यासताश्रयन्ति स्म । परं कः । तत्सखीजनः तस्या दमयन्त्या वयसीरूपो लोकसमुदायः' इति नैषधतद्वृत्ती । किं कृत्वा । पुराणं जीर्णं वृद्धं पुरुषं भर्तारं स्वमात्मानं त्यक्त्वा निरस्य । वृद्धपुरुषनिर्वेदान्निजं विमुच्येत्यर्थः ॥

स्पर्धयेव दिवा दम्भादस्याः स्त्रैणशिरोमणेः ।
धृतेतरा पुरा रम्भा चित्तभूभूमिभृत्सभा ॥ १९८ ॥

पुरा नारदनामनगर्यास्याः कोडिमदेव्या दम्भाद्व्याजात् । उत्प्रेक्ष्यते—इतरा अन्या रम्भा अप्सरोविशेषा धृता कलितेव । कया । दिवा दैवलोकेन समं सार्धं सार्धया संघर्षेण असूयया वा । अस्याः किंलक्षणायाः । स्त्रीणां समूहः स्त्रैणं तस्य शिरोमणेश्चूडामणिसंनिभायाः । किंभूता रम्भा । चित्तभूः कामः स एव भूमिभृत्पार्थिवस्तस्य सभा उपवेष्टुमास्थानशाला ॥ इति कोडिमदेवी ॥

अमन्दानन्दसंदोहमेदुरौ तौ वधूवरौ ।
गमयांचक्रतुः कालं केलतीश्रीसुताविव ॥ १९९ ॥

तौ पूर्वव्यावर्णितस्वरूपौ वधूवरौ कोडिमदेवीकमाह्वव्यवहारिणौ कालं सुखगृहवाससंबन्धिनं गमयांचक्रतुरतिचक्रमतुः । काविव । केलतीश्रीसुताविव । यथा केलती रतिः । 'केलतीमदनयोरुपाश्रये' इति नैषधे । 'केलती रतिः' इति तद्वृत्तौ । श्रीसुतः कामः । विविधविलासैरनेहसं गमयतः स्म । किंभूतौ । अमन्दा अकुण्ठाः प्रत्यहं वर्धमाना ये आनन्दास्तेषां संदोहो नानात्वं तेन मेदुरौ पुष्टौ ॥

कदाप्यदर्शि तत्पत्न्या स्वप्ने सुखशयानया।
उत्सङ्गसंगतः सिंहः श्रेयोराशिरिवाङ्गवान्॥ १६०॥

कदापि कस्मिन्नपि निशासमये सुखेनाधिव्याधिरहितत्वेन शयानया सुत्वचा किंचिन्निद्रायमाणया तत्पत्न्या कमाकान्तया कोडिमदेव्या स्वप्ने निद्रावस्थायामुत्सङ्गे निजक्रोडे संगतः स्थायुकः सिंहः केसरी अदर्शि दृष्टः। उत्प्रेक्ष्यते—अङ्गवान्मूर्तिमान् श्रेयोराशिः पुण्यपुञ्ज इव॥

मृणालधवलान्स्कन्धे बिभ्रद्बन्धुरकेसरान्।
शिखरे शिखरी शंभोः शारदीनानिवाम्बुदान्॥ १६१॥

सिंहः किं कुर्वन्। स्कन्धे भुजशिरसि मृणालं कमलनालं तद्वद्धवलानुज्ज्वलान्, तथा बन्धुरान्मनोज्ञान् केसरान् स्कन्धोद्गतरोमाणि बिभ्रत् धारयन्। क इव। शिखरी यथा शंभोर्भूधरः कैलासः शिखरे स्वशृङ्गे शारदीनान् शरत्कालसंबन्धिनः निःशेषेण वर्षणेन विशदीभूतान् अम्बुदान् मेघान् बिभर्ति। 'अन्ये ते जलदायिनो जलधरास्तृष्णां विनिघ्नन्ति ते भ्रातश्चातक किं वृथात्र रटितैः खिन्नोऽसि विश्रम्यताम्। मेघः शारद एष काशधवलः पानीयरिक्तोदरो गर्जत्येव हि केवलं भृशमपां नो बिन्दुमप्युज्झति॥' इति चातकाष्टके सूक्ते शारदमेघे धवलिमा॥

किमभ्यर्थयमानानामुच्छेत्तुं दौस्थ्यमर्थिनाम्।
कुम्भिकुम्भभिदालग्ना मुक्ता बिभ्रन्नखान्तरे॥ १६२॥

पुनः किं कुर्वन्। नखानां कामाङ्कुशानामन्तरे मध्ये अर्थान्नखाग्रेषु कुम्भिनां भद्रजातिभवानां हस्तिनां कुम्भानां शिरःपिण्डानाम्। 'कुम्भौ तु शिरसः पिण्डौ' इति हैम्याम्। मस्तकानां भिदा विदारणं द्विधाकरणं तदवसरे विलग्नानां नखाग्राणामतितीक्ष्णत्वे भिदासमये लगित्वा स्थिता मुक्ता मौक्तिकानि बिभ्रद्दधत्। उत्प्रेक्ष्यते—अभ्यर्थयमानानां याचनां कुर्वाणानामर्थिनां याचकानां दौस्थ्यं दारिद्र्यमुच्छेत्तुं मूलान्निहन्तुं किं धनाढ्यीकर्तुमिव॥

जृम्भणादाननं काशप्रतीकाशो विकाशयन्।
मत्तस्तम्बेरमीकान्तकवलीकृतये किमु॥ १६३॥

पुनः किं कुर्वन्। जृम्भणात् जृम्भाकरणात् आननं निजमुखं विकाशयन्विकस्वरं कुर्वन्। प्रसारयन्नित्यर्थः। किंभूतः। काशाः प्रतीता ईषिकास्तेषां प्रतीकाशः श्वैत्येन तत्संनिभः। 'विकसत्काशचामरः' इति रघुवंशे। उत्प्रेक्ष्यते—मत्ता मदोत्कटा ये स्तम्बेरमीकान्ताः करिणः तेषां कवलीकृतये गण्डोलीकरणार्थं किमु। भक्षणार्थमिवेत्यर्थः॥ आदितश्चतुर्भिः कुलकम्॥ इति सिंहस्वप्नः॥

जहे महेलया निद्रा विनिद्रन्नेत्रपत्रया।
संगतिर्दौर्जनीयेव सज्जनानां समज्यया॥ १६४॥

विनिद्रती विकाशं प्राप्नुवती नेत्रपत्रे नयनकमलदले यस्यास्तया कमाकान्तया कोडिमदेव्या निद्रा प्रमीला सुप्त्यवस्था जहे त्यक्ता। 'महिला स्यान्महेलया' इति शब्दप्रभेदे। तथा। 'यश्च परमहेलारतोऽप्यपारदारिकः' इति चम्पूकथायाम्। कयेव। समज्ययेव। यथा सज्जनानां साधूनां समज्यया सभया। 'ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला' इति चम्पूकथायाम्। श्रेण्यर्थवाची सभाशब्दः। दुर्जनानामियं दौर्जनीया दुर्जनसंबन्धिनी सभा श्रेणी। 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे परिषच्छब्दः पङ्क्त्यर्थवाची। संगतिर्मिलनम् गोष्ठी वा हीयते॥

कंसारेरिव रुक्मिण्या स स्वप्नः स्वपतेः पुरः।
तया मुदितयाभाषि भाषितेशोपमेयया॥ १६५॥

तया कोडिमदेव्या स सिंहदर्शनलक्षणः स्वप्नः स्वपतेः कमाख्यव्यवहारिणः निजभर्तुः पुरोऽग्रे अभाषि कथितः। कयेव। रुक्मिण्येव। यथा रुक्मिनृपभगिन्या स्वपतेः कंसारेः कृष्णस्याग्रे नक्तदृष्टः स्वप्नोऽभाषि प्रोक्तः। तया रुक्मिण्या च किंलक्षणया। मुदितया हृष्टचित्तया। पुनः किंभूतया। भाषितेशोपमेयया भाषितेशाया स्ववचनचातुर्या कृत्वा सरस्वत्या सार्धमुपमीयते उपमातुं योग्येत्यर्थः॥

स विचार्य विचारज्ञोऽङ्गनामिदमजीगदत्।
सूनुः सिंह इवाधृष्यो भविता तव भामिनि॥ १६६॥

स कमानाम व्यवहारी अङ्गनां निजकामिनीं कोडिमदेवीं इदमत्रैवानुष्टुभि वक्ष्यमाणमजीगदत्कथयति स्म। किं कृत्वा। विचार्य स्वस्वाभाविकमतिपूर्वकबुद्धिविज्ञानेन विमृश्य। सिंहदर्शनलक्षणापूर्वस्वप्नविचारं विधायेत्यर्थः। स व्यवहारी किं विचारज्ञः। आयतौ स्वपरहितावहोदर्कविमर्शने कुशलः। इदं किम्। हे भामिनि वर्णिनि सिंह इव पञ्चाननवत् परैरधृष्योऽनाकलनीयः। 'अधृष्यश्चाभिगम्यश्च' इति रघुवंशे। तव भवत्याः सूनुर्नन्दनो भविता भविष्यति॥

गन्धसिन्धुरराजस्य वशेवालसगामिनी।
अन्तर्वत्नी ततः पत्नी महेभ्यस्य बभूवुषी॥ १६७॥

ततः सिंहस्वप्नदर्शनपुत्रप्राप्तिरूपतदर्थश्रवणानन्तरं महेभ्यस्य कमानामव्यवहारिणः पत्नी जाया कोडिमदेवी अन्तर्वत्नी गुर्विणी गर्भवती बभूवुषी संजायते स्म। किंभूता। अलसं मन्थरमचपलं गच्छतीत्येवंशीला गामिनी। केव। वशेव। यथा गन्धेनोत्कटमदवारिसौरभेणोपलक्षितः। सिन्धुरराजो गजेन्द्रस्तस्य वशा प्रिया हस्तिनी मन्थरं व्रजति तत्रापि गर्भमन्तर्वहन्ती सा। 'वशा नार्यां वन्ध्यगव्यां

हस्तिन्यां दुहितर्यपि । वेश्यायामपि' इत्यनेकार्थः । यद्यपि वशाशब्दो हस्तिन्यां प्रवर्तते तथापि बाहुल्यान्नार्यामेव प्रयुज्यमानत्वाद्गन्धसिन्धुरराजस्य वशा हस्तिनीत्यभिधानम् । गन्धेभपत्नीत्वात्प्राधान्यं च ॥

समयेऽथ तया रत्या ब्रह्मसूरिव नन्दनः ।
सुषुवे सुषुमास्तोमः प्रोद्भवन्मूर्तिमानिव ॥ १६८ ॥

अथ गर्भभवनानन्तरं समये सार्धसप्तवासराधिकनवमासपरिपूर्तिप्रस्तावे तया कोडिमदेव्या नन्दनः पुत्रः सुषुवे प्रसूतः । कयेव । रत्येव । यथा कन्दर्पपत्न्या ब्रह्मसूरनिरुद्धनामा तनयः प्रसूतः । 'कन्दर्पसुतोऽनिरुद्ध ऋष्याक ऊषेशो ब्रह्मसूश्च सः' इति हैम्याम् । उत्प्रेक्ष्यते—मूर्तिमान् शरीरसंयुतः प्रोद्भवन् प्रकटीभवन् सुषुमास्तोमः सातिशायिशोभासमुदय इव ॥

तनूजन्माननज्योत्स्नानाथे लवणिमामृतम् ।
चकोरेणेव पिबता ननृते पितृचक्षुषा ॥ १६९ ॥

पितृचक्षुषा कमामहेभ्यलोचनेन ननृते नर्तितम् । किं कुर्वता । पितृचक्षुषा तनूजन्मनः स्वनन्दनस्य आननमेव वदनमेव ज्योत्स्नानाथश्चन्द्रमास्तस्मिन् लवणिमा लावण्यं सौन्दर्यमेवामृतं सुधां पिबता। सादरमवलोकयतेत्यर्थः। केनेव । चकोरेण यथा ज्योत्स्नाप्रियेण कुमुदबान्धवबिम्बे ज्योत्स्नामृतं पिबता सता नृत्यते ॥

क्षीरकण्ठः कृतोत्कण्ठः संजाते जातकर्मणि ।
उत्तेजित इवादर्शः शिश्रिये परमां श्रियम् ॥ १७० ॥

क्षीरकण्ठः शिशुः कमादारकः जातकर्मणि जातस्य संप्राप्तजन्मनः सूनोः स्थितिपदिकाचन्द्रसूर्यदर्शनषष्ठीजागरणाशुचितादिनिवर्तनादिके कर्मणि कर्तव्ये संजाते सति परमां प्रकृष्टां श्रियं शोभां शिश्रिये श्रयति स्म बभाज । किंभूतः क्षीरकण्ठः । कृता निर्मिता स्वसौन्दर्यादिगुणैः स्वजनादीनां दर्शनाद्युत्कण्ठा औत्सुक्यं येन । क इव श्रियं श्रितवान् । उत्तेजितः शाणोल्लिखितो निर्मलीकृत आदर्श इव । यथा उत्तेजितो दर्पणः शोभां भजते ॥

अयं जयं यतः कर्ता सिंहवद्द्वेषिदन्तिनाम् ।
जयसिंह इतीवास्य बीजी नाम विनिर्ममे ॥ १७१ ॥

बीजी तत्पिता कमाह्वः । उत्प्रेक्ष्यते—इति हेतोस्तस्य कुमारस्य जयसिंह इति नाम विनिर्ममे कृतवानिव । इति किम् । यतः कारणादयं कुमारः सिंहवत्केसरीव द्वेषिणः स्वशात्रवा[न्] जिनशासनप्रतिकूलताभाजो वा कुवादिनस्त एव दन्तिनो गजास्तेषां जयं पराभवं कर्ता विधास्यति । 'वप्ता तु जनकस्तातो बीजी जनयिता पिता' इति हैम्याम् ॥

धात्रीभिः प्रेमपात्रीभिः पाल्यमानः स बाल्यतः ।
रामो यादवरामाभिरिवासौ ववृधे क्रमात् ॥ १७२ ॥

अथ नामादिनिर्माणानन्तरं स जयसिंहकुमारः क्रमादनुक्रमेण ववृधे वर्धते स्म । किंभूतः । बाल्यतो जन्मदिनं प्रभृतीकृत्य प्रेमपात्रीभिः कुमारोपर्यतिशयितस्नेहभाजनभूताभिर्धात्रीभिरुपमातृभिः पाल्यमानः रक्ष्यमाणः सम्यग्यत्नेन गोप्यमानः । क इव । राम इव । यथा बलभद्रो यादवानां यदुवंशोत्पन्नानां रामाभिर्वनिताभिः पाल्यमानो वर्धते स्म ॥

पुपोषावयवैर्वृद्धिं स क्रमेण स्तनंधयः ।
आलवालाम्बुपायीव शाखाभिश्चन्दनाङ्कुरः ॥ १७३ ॥

स जयसिंहः क्रमेण परिपाट्या अवयवैरङ्गोपाङ्गैर्वृद्धिमुपचयं पुपोष पुष्णाति स्म । किंभूतः । स्तनंधयः उपमातॄणां पयोधरपयःमा(पा)नविधायी । क इव । चन्दनाङ्कुर इव । यथा आलवालस्य स्थानकस्याम्बु पानीयं पिबतीत्येवंशीलः श्रीखण्डपादपप्ररोहः शाखाप्रशाखाभिरुपचयं लभते ॥

स प्राक्चङ्क्रमणैः पित्रोरारोप्य प्रीतिवीरुधम् ।
आलपन्सफलीचक्रे वर्षन्निव घनाघनः ॥ १७४ ॥

स जयसिंहः आलपन् ब्रुवन् सन् पित्रोर्जननीजनकयोः प्रीतिवीरुधं स्नेहलतां सफलीचक्रे कलकलितां कृतवान् । किं कृत्वा । प्राक् पूर्वं चङ्क्रमणैर्हिण्डनैः कृत्वा आरोप्य स्थानके निवेश्य । रोपयित्वेत्यर्थः । सफलीचक्रे क इव । घनाघन इव । यथा वर्षन् वारिवृष्टिं सृजन् वारिवाहः प्राग्वल्लीं वृक्षादिष्वारोप्य स्थापयित्वा सफलीकुरुते ॥

वर्धमानः क्रमेणासावजनिष्टाष्टहायनः ।
प्रत्यहं प्रणयन्केलीः सिन्धुराधिपपोतवत् ॥ १७५ ॥

असौ जयसिंहः क्रमेण वर्षपरिपाट्या वर्धमानः सन्नष्टा(ष्टौ)संख्याकानि हायनानि वत्सराणि यस्य तादृशोऽजनिष्ट संजातवान् । किं कुर्वन् । प्रत्यहं बाल्यत्वान्निरर्गलः प्रतिवासरं केलीर्बालवयोयोग्याः क्रीडाः प्रणयन् कुर्वन् । किंवत् । सिन्धुराधिपपोतवत् । यथा गजेन्द्रस्य दशवार्षिकः शिशुर्गजो बालक्रीडां कुर्वन् वर्धते । 'स्यात्पोतो दशवार्षिकः' इति हैम्याम् ॥

सोऽनवद्यास्ततो विद्याः स्माधीते गुरुसंनिधौ ।
हार्दं तासां च जग्राहाभिज्ञवन्मुग्धचेतसाम् ॥ १७६ ॥

ततोऽष्टवर्षभवनानन्तरं स जयसिंहो गुरुसंनिधौ कलाचार्यस्य समीपे अनवद्या निष्पापाः प्रशस्ता वा विद्या अधीते स्म पठति स्म । च पुनस्तासां विद्यानां हार्दं रहस्यं

विशेषादिकं जग्राह। यतः'—वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्बितम्। हृदयग्राहिणस्तासां द्वित्राः सन्ति न वा क्षितौ॥' इति सूक्तवचनात्। स विद्याहृदयग्राही जज्ञे। किंवत्। अभिज्ञवत्। यथा छेकः पुमान् मुग्धं कार्याकार्यविचारानभिज्ञं हिताहितज्ञानरहितं वा परवञ्चनकपटाभिप्रायवेदनामूढं वा चेतो मनो येषां तेषां पुंसां हार्दं गृह्णाति रहस्यं पृष्ट्वा दत्ते। यतः—'रच्चावइ रच्चइ नही परमन लिन्ति न दिन्ति। धुत्तछयल्ला एह गुण मन हरि मान करन्ति॥' इति वचनात्॥

सिद्ध्यध्वानं प्रतिष्ठासुर्विधित्सुर्धर्ममार्हतम्।
सखायमिव तद्वप्ता संयमं समुपाददे॥ १७७॥

ततोऽनन्तरमित्यध्याहारः। तस्य जयसिंहस्य वप्ता पिता संयमं चारित्रं समुपाददे सम्यक्प्रकारेण गृह्णाति स्म। कमिव। सखायमिव। यथा कश्चित्सखायं मित्रं वा गृह्णाति। सख्युर्ग्रहणे कारणमाह—किं चिकीर्षुः। सिद्ध्यध्वानं मोक्षमार्गं प्रतिष्ठासुः प्रस्थातुमिच्छुः। पुनः किं कर्तुमिच्छुः। आर्हतं जैनं धर्मं चारित्रलक्षणं विधित्सुः विधातुमिच्छुः कर्तुकामः। यो हि मार्गे प्रतिष्ठते तस्य सहायोऽवश्यं विलोक्यते। कार्यकरणेऽपि च सख्युरपेक्षा स्यादिति॥

ततो नमसितुं तातं कुमारः स कदाचन।
प्रतिष्ठते स्म सानन्दं वृषभाङ्कमिवार्षभिः॥ १७८॥

ततः पितुः परिव्रज्याग्रहणानन्तरं स जयसिंहकुमारः कदाचन कस्मिन्नपि समये तातं स्वपितरं कमर्षिं नमसितुं नमस्कर्तुम्। 'नमसितुमना यन्नाम स्यान्ननाम न पूषणम्' इति नैषधे। सानन्दं सप्रमोदं प्रतिष्ठते स्म। प्रचचाल। क इव। आर्षभिरिव। यथा भरतो वृषभाङ्कं स्वतातमृषभदेवं प्रणन्तुं प्रचलति स्म॥

प्रीतिवापीपयःपूराप्लवनैः पुलकाङ्किता।
प्रसूस्तमनुयाति स्म गौरिवाङ्गजमात्मनः॥ १७९॥

प्रसूर्जयसिंहजननी कोडाई तं स्वनन्दनमनुयाति स्म अनुजगाम। किंभूता। प्रीतिः स्वपुत्रोपरि यः स्नेहः सैव वापी दीर्घिका तस्याः पयःपूरे आप्लवनैः स्नानैः कृत्वा पुलकाङ्किता रोमाञ्चकञ्चुककलिता जाता। केव। गौरिव। आत्मनोऽङ्गजं वत्सरूपमनुगच्छति॥

श्रीमन्मुनिनिशारत्नं जयसिंहकुमारराट्।
प्रणतेर्गोचरीचक्रे श्रीवीरमतिमुक्तवत्॥ १८०॥

जयसिंहनामा कुमारराट् पृथुकपार्थिवः श्रीमन्तं गणलक्ष्मीरमणं मुनीनां मध्ये निशारत्नं चन्द्रमसं विजयदानसूरिं प्रणतेर्नमस्कारस्य गोचरीचक्रे विषयीकृतः। प्रणत इत्यर्थः। किंवत्। अतिमुक्तवत्। यथा अतिमुक्तककुमारः श्रीवीरं श्रीमन्महावीरदेवं प्रणतवान्॥

अथ पृथुकपुरोगः संमदेन व्रतीन्दो-
रिव गजसुकुमालः स्वामिनोऽरिष्टनेमेः ।
अधिकमधरयन्तीं साधिमानं सुधानां
श्रवणविषयभावं देशनामानिनाय ॥ १८१ ॥

अथ सूरतिवन्दिरे सूरिपार्श्वागमनानन्तरं पृथुकपुरोगः कुमारश्रेष्ठः । 'वर्ये वरेण्यं प्रवरं पुरोगम्' इति हैम्याम् । संमदेन हर्षेण व्रतीन्दोः सूरेर्देशनां धर्मोपदेशं श्रवणविषयभावं श्रुतिगोचरतामानिनाय प्रापयति स्म । शृणोति स्मेत्यर्थः । देशनां किं कुर्वतीम् । सुधानाममृतरसानां साधिमानं चारुताम् । आस्वादमित्यर्थः । अधरयन्तीं हानीं कुर्वतीम् । किमधिकं बहु यथा स्यात्तथा । मिष्टत्वेन सुधामपि धिक्कुर्वतीमित्यर्थः । क इव । गजसुकुमाल इव । यथा कृष्णलघुभ्राता देवक्या अष्टमः पुत्रो गजसुकुमालः अरिष्टनेमेः श्रीनेमिनाथस्य स्वामिनो जगन्नाथस्य तीर्थकृतो देशनां शुश्राव ॥

असाराद्देहिना देहात्सारोऽर्हद्धर्म एव हि ।
उद्धार्योऽनर्थकार्यर्थाद्दानशौण्डेन दानवत् ॥ १८२ ॥

देहिना भविकप्राणिना असारादाधिव्याधिजरादिभिः साररहितीकृताद्देहादात्मशरीरादर्हतो जिनस्य जिनप्रणीत एव सारो निखिलार्थसाधको धर्म एवोद्धार्य उद्धरणीयः । किंवत् । दानवत् । यथा अनर्थं पितृभ्रातृपुत्रमित्रादिद्रोहं कारयतीत्येवंशीलादर्थाद्धनाद्दानशौण्डेन वदान्येन दानमुद्ध्रियते । यदुक्तम्—'दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः । परोपकरणं कायादसारात्सारमुद्धरेत् ॥' इति ॥

प्रबुबुधे प्रभुदेशनयानया शिशुसहस्रदृशा सममम्बया ।
विशदचन्द्रिकयेव कुमुद्वतीलतिकया कुमुदेन तमीमणेः ॥ १८३ ॥

शिशुसहस्रदृशा कुमारपुरंदरेण प्रबुबुधे प्रतिबोधः प्राप्यते स्म संसाराद्व्यरज्यत । कथम् । समं सार्धम् । कया । अम्बया तज्जनन्या कोडिमदेव्या । कया । प्रभोर्विजयदानसूरेरनया पूर्वोक्तया देशनया धर्मकथया । केनेव । कुमुदेनेव । यथा तमीमणेश्चन्द्रस्य विशदचन्द्रिकया शरत्समयनिर्धूतोद्धुरजलधररोधनिर्मलीभवच्चन्द्रगोलिकया कृत्वा कुमुद्वतीलतिकया कुमुदिनीवल्ल्या समं कैरवेण प्रबुध्यते ॥

प्रभोरुपान्ते सममम्बया महामहैर्महेभ्यीभवदर्थिमण्डलैः ।
सुनन्दया सींहगिरेः स वज्रस्वामीव जग्राह शिशुस्तपस्याम् ॥ १८४ ॥

स शिशुर्जयसिंहकुमारः अम्बया कोडाईमात्रा समं प्रभोर्विजयदानसूरेरुपान्ते समीपे महामहैर्भविकजनविनिर्मितानेकाधिकोत्सवैस्तपस्यां दीक्षां जग्राह आदत्ते स्म । महामहैः किंलक्षणैः । महेभ्यीभवदर्थिमण्डलैर्महेभ्यीभवन्तः कामिताधिकधनप्रदाने-

र्धनाढ्या जायमाना अर्थिनां याचकानां मण्डलाः समूहा येषु । क इव । वज्रस्वामीव । यथा धनगिरिसुतः वज्रस्वामिनो जननी सुनन्दानाम्नी तया स्वजनयित्र्या सार्धं सींहगिरिनामाचार्यस्य पार्श्वे महामहोत्सवैः प्रव्रज्यां गृह्णाति स्म ॥

जयविमल इदं तन्नामधेयं विधिज्ञो
व्यधित विजयदानः सूरिसारङ्गराजः ।
पुनरभिनवसूरेस्तं प्रदत्ते स्म सूनो-
र्विनयिन इव वप्ता स्वं क्रमेणागतं स्वम् ॥ १८५ ॥

विजयदाननामा सूरिष्वाचार्येषु सारङ्गराजो मृगेन्द्रः सिंहः जयविमल इदमेतत्तस्य जयसिंहमुनेर्नामधेयमभिधानं व्यधित विदधाति स्म । किंभूतः । विधिं शास्त्रोक्तं लौकिकं च आचारं जानाति वेत्तीति विधिज्ञः । पुनरन्यमर्थमभिधत्ते—पुनस्तं जयविमलमुनिमभिनवसूरेर्नवीनस्थापिताचार्यस्य हीरविजयसूरेः प्रदत्ते स्म दत्तवान् । क इव । वप्तेव । यथा पिता तातः कुलक्रमेण स्वान्ववायपरिपाट्या समेतं स्वमात्मीयं स्वं द्रविणं विनयिनो विनयवतः स्वनन्दनवैनयिककर्तव्यापहृतचेताः पिता सूनोर्निजनन्दनस्य प्रददाति ॥ इति विजयसेनसूरेर्जन्मदीक्षादिवर्णनम् ॥

विजयदानविभुर्वटपल्लिकाभिधपुरेऽथ विभूषितवान्दिवम् ।
भुवि भरेण विसार्य पुनर्दिवि प्रथयितुं महिमानमिवात्मनः॥१८६॥

अथानन्तरं विजयदाननामा विभुर्गच्छाधिपतिः सूरिः वटपल्लिका ('वडली' इति लोकप्रसिद्धा) इत्यभिधा नाम यस्य तादृशे पुरे दिवं स्वर्लोकं विभूषितवान् अलंकरोति स्म । उत्प्रेक्ष्यते—आत्मनः स्वस्य महिमानं माहात्म्यं दिवि देवलोके पुनर्भूमण्डलापेक्षया द्वितीयस्थाने प्रथयितुं विस्तारयितुमिव । किं कृत्वा । भुवि पृथिव्यां भरेणातिशयेनार्थान्महिमानं विसार्य विस्तारयित्वा ॥

सूरीन्द्रहीरविजयः प्रतिपद्य पट्ट-
लक्ष्मीं गुरोरनु विशिष्य पुपोष भूषाम् ।
वप्तुर्निजस्य युवराज इवाधिपत्यं
क्रान्तारिचक्रमखिलाम्बुधिमेखलायाः ॥ १८७ ॥

सूरीन्द्रः सूरीणां सर्वेषां मध्ये परमैश्वर्यादिन्द्रः एवंविधः श्रीहीरविजयः एतावता श्रीहीरविजयसूरिपुरंदरः गुरोर्विजयदानसूरेरनु पश्चात् पट्टलक्ष्मीं पट्टश्रियं प्रतिपद्याङ्गीकृत्य विशिष्य विशेषप्रकारेण कृत्वा भूषां शोभां पुपोष पुष्णाति स्म । क इव । युवराज इव । यथा युवराजपदवीं प्रतिपन्नो राजकुमारो निजस्य वप्तुः आत्मीयस्य जनकस्यानन्तरं क्रान्तारिचक्रं पराभूताभिमानिभूमिपतिमण्डलं वशीकृतसमस्तप्रतिपन्थिपार्थिवसार्थं वा अखिलाम्बुधिमेखलाया निःशेषकाश्यपीपीठस्याधिपत्यमैश्वर्यं प्राप्याधिकं शोभते ॥

मण्डयत्यमरमन्दिरं गुरौ दीप्यते स्म मुनिवासवोऽधिकम्।
यामिनीप्रियतमे पराम्बुधेर्मध्यभागमिव पद्मिनीपतिः॥ १८८॥

गुरौ विजयदानसूरीश्वरे अमरमन्दिरं सुरसदनं देवलोकं मण्डयत्यलंकुर्वति सति। 'मण्डति भूषत्यलंकरोत्यपि च मण्डयति भूषयत्यपि' इति क्रियाकलापे। मुनिवासवो हीरविजयसूरिपुरहूतः अधिकमतिशयेन दीप्यते स्म स्फूर्तिं बिभर्ति स्म। क इव। पद्मिनीपतिरिव। यथा यामिनीप्रियतमे निशानाथे चन्द्रे पराम्बुधेः पश्चिमसमुद्रस्य मध्यभागमन्तरालं भजति सति पद्मिनीपतिरधिकमतिशायितया दीप्यते एतावता दिवसोदयमवाप्य भास्वानधिकतेजस्वी स्यात्॥ इति विजयदाने सूरीन्द्रे परलोकं प्राप्ते श्रीहीरविजयसूरेः पट्टधरत्ववर्णनम्॥

यद्गेहशृङ्गाङ्गणनद्धमारुतप्रेङ्खत्पताकापटपल्लवच्छलात्।
गोष्ठीमनुष्ठातुमिवामरावतीं श्रिया सखीमाह्वयतीव पाणिना॥ १८९॥

यत्पुरं डीसानगरम्। उत्प्रेक्ष्यते—गोष्ठीमनुष्ठातुं परस्परं प्रीतिवार्तां विधातुं श्रिया समृद्ध्या शोभया सखीं वयसीममरावतीं पुरंदरपुरीं प्राणिना हस्तेन आह्वयत्याकारयतीव भूचराणां तूर्ध्वलोकगमनं न भवेत्, खेचराणां त्वध उर्ध्वगमनशक्तिरस्त्येव, तस्मादमरावत्याकारणं युक्तमेव। कस्मात्। गेहशृङ्गाङ्गणे डीसानगरगृहशिखराजिरे नद्धः अङ्कुटकमध्यनिवेशितदण्डप्रान्तनिबद्धः, तथा मारुतेन वातेन प्रेङ्खन्नितस्ततश्चञ्चलीभवन्पताकापटपल्लवो ध्वजवसनाञ्चलस्तस्य छलं कपटं तस्मात्। अत्र यावद्ध्वजवाचित्वादेकवचनमेव विवक्षितम्॥

यदीयराजद्विभवाभिभूतया पौलस्त्यपुर्या किमभाजि लज्जया।
यदुष्यतेऽद्यापि तया न भङ्गोऽभिज्ञानमीशानशिलोच्चयाश्रयः॥१९०॥

यदीयो डीसानगरसंबन्धी राजन् जगति शोभां प्राप्नुवन् यो विभवः समृद्ध्यतिशयस्तेनाभिभूतया जितया पौलस्त्यपुर्या धनदनगर्या। उत्प्रेक्ष्यते—लज्जया त्रपया कृत्वा किमभाजि नंष्ट्वा गतम्। यस्मात्कारणादद्यापि अद्यतनदिनं यावत्तया अलकापुर्या भङ्गाभिज्ञानं पलायनचिह्नमीशानशिलोच्चयाश्रयः कैलासशैलशिखरस्थितिर्नोज्झ्यते न त्यज्यते॥

यदीयलक्ष्म्या विजितेव लङ्का प्रणश्य मध्येऽम्बुनिधेर्विवेश।
कदाचन प्रावृषि सूरिराजो डीसाह्वयं तत्पुरमाससाद॥ १९१॥

यदीयया डीसानगरसंबन्धिन्या लक्ष्म्या श्रिया विजिता पराभूता सती लङ्का दशमस्तकपुरी। उत्प्रेक्ष्यते—पराभूता त्रपातिरेकाद्दुःखाद्वा प्रणश्य प्रपलाय्य अम्बुनिधेर्मध्ये समुद्रान्तराले विवेश प्रविष्टेव। कदाचन कस्यांचित्प्रावृषि वर्षाकाले सूरिराजो हीरविजयसूरिर्वसुधाविवस्वान्। तत्पूर्वव्यावर्णितं 'डीसा' इत्याह्वयं नाम यस्य तादृक्पुरमाससाद भजति। इत्यन्ते त्रिभिर्विशेषकम्॥ इति डीसानगरं च॥

कुलाद्रिवार्धिप्रतिनादभेदुरीभविष्णुनिःस्वानिततूर्यनिःस्वनम् ।
जिनेश्वरस्येव जना वितेनिरे पुरप्रवेशेऽतिमहं मुनीशितुः ॥ १९२ ॥

जना डीसानगरसंघलोकाः जिनेश्वरस्येव तीर्थकर्तुरिव मुनीशितुर्हीरविजयसूरेः पुरप्रवेशे डीसानगरमध्यसमागमनावसरे अतिशयेन महमुत्सवं वितेनिरे कुर्वन्ति स्म । किंभूतं महम् । कुलाद्रिषु मन्दरहिमाचलकैलासादिकाष्टकुलपर्वतकंदरेषु, तथा वार्धौ समुद्रमध्ये प्रतिनादैः प्रतिशब्दैर्मेदुरीभविष्णुः पुष्टीभवनशीलः तादृशो निःस्वानितानां वादितानां तूर्याणां वादित्राणां निःस्वनो यत्र । अथ वा निःस्वाना राजवाद्यानि संजातानि एषु लोके 'नीसाण' इति प्रसिद्धास्तादृशां वाद्यानां निर्घोषो महाशब्दो यत्र ॥

सूरिवासवसमागमस्फुरत्प्रीतिपल्लवितचित्तवृत्तिभिः ।
नागरैरमितपृत्कु(रिक्थ)वर्षिभिः स्पर्धयेव धनदो निधीश्वरः ॥१९३॥

अमितं मानातीतं प(रि)क्थं द्रविणं वर्षन्ति याचकानां यथाकामं ददते इत्येवंशीलैर्नागरैर्डीसानगरजनैः सार्धम् । उत्प्रेक्ष्यते—स्पर्धया संह(घ)र्षेणेव निधीश्वरो वैश्रवणो धनं ददातीति धनदोऽभूदिव बभूवानिव । किंभूतैर्नागरैः । सूरिवासवस्य हीरविजयसूरीन्द्रस्य समागमेन समवसरणेन कृत्वा स्फुरन्ती प्रकटीभवन्ती या प्रीतिः प्रमोदातिशयस्तया पल्लविता मेदुरीभूता चित्तवृत्तिर्मनोव्यापारो येषाम् ॥

नृत्यच्चन्द्रकिचक्रमुन्मदनदद्बप्पीहबालाकुलं
श्रीसूनोरिव यौवराज्यसमयं व्यालोक्य वर्षागमम् ।
क्रीडञ्छान्तरसाह्वमानससरोजन्माकरे हंसव-
च्छ्रीसूरीश्वरहीरहीरविजयस्तस्मिन्सुखं तस्थिवान् ॥ १९४ ॥

श्रिया स्वस्वगणलक्ष्म्या युक्ता ये सूरीणां स्वल्पश्रुताध्ययनेन सामान्याचार्याणां मध्ये ईश्वरा व्यवहारिणः साङ्गप्रवचनेष्वधीतिनोऽनूचानास्तेषु हीरो मुकुटमणिर्वज्ररत्नं तत्तुल्यः श्रीहीरविजयनामा सूरिपुरंदरः तस्मिन् डीसानगरे चिन्तानाचान्तहृदयत्वेन निर्विघ्नत्वेन वा सुखसहितं यथा स्यात्तथा तस्थिवान् चतुर्मासीमासीदति स्म । स्थित इत्यर्थः । किं कृत्वा । वर्षागमं मेघागमनसमयं व्यालोक्य समीक्ष्य । किंभूतम् । नृत्यन्ति कान्तकेकारवकलितताण्डवं कुर्वाणानि चन्द्रकिणां मयूराणां चक्राणि पटलानि यत्र । चन्द्रकं पिच्छमिति विद्यते येषां ते चन्द्रकिणः । 'मेचकश्चन्द्रकः समौ' इति हैम्याम् । 'सेव्याः संप्रति सान्द्रचन्द्रकिकुलैरुत्ताण्डवैर्मण्डिताः' इति चम्पूकथायाम् । पुनः किंभूताः । उत्कृष्टो मदो येषां ते । मदोद्धता इत्यर्थः । नदन्तः शब्दायमानाः नन्दन्त्यो बप्पीहानां चातकानां बालाः स्त्रियः शिशवो वा । प्रायो विपदि स्त्रीणां शिशूनां च कातर्यं स्यात्, अतो बालाशब्दोपादानम् । ताभिस्तैर्वा आकुलं व्याप्तम् । उत्प्रेक्ष्यते—श्रीसूनोः कन्दर्पस्य यौवराज्यसमयमिव । युवा चासौ राजा च युवराजस्तस्य भावो यौवराज्यं

तस्य समयः युवराजपदाभिषेचनप्रस्तावमिव । सूरिः किं कुर्वन् । क्रीडन् । केलीं निर्मिमाणः । कुत्र । शान्तरसो नवमोपशम रस इत्याह्वा नाम यस्य तादृशे मानसनाम्नि सरोजन्मनां पद्मानामाकरे । 'पद्माकरस्तडागः स्यात्' इति हैमीवचनात् । मानससरोवर इत्यर्थः । किंवत् । हंसवत् । यथा हंसो वर्षागमं विलोक्य मानससरसि क्रीडन् तिष्ठति ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते षष्ठोऽत्र सर्गोऽभवत् ॥ १९९ ॥

अत्र हीरविजयसूरिचरित्रे हीरसौभाग्यनाम्नि महाकाव्ये षण्णां संख्यापूरणः षष्ठः सर्गोऽधिकारः अभवत्संजातः ।

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ हीरहर्षगणेर्दक्षिणदिग्गमनद्विजसमीपपठनमेदपाटमण्डलस्थगुरुपार्श्वागमनपण्डितवाचकपदप्रदानमरुदेशशिवपुरीसंघाग्रहवशाचार्यपदप्रस्थापनाणहिल्लपत्तननन्दिभवनविजयसेनसूरिजन्मदीक्षादिकथनडीसापुरचतुर्मासागमनवर्णनो नाम षष्ठः सर्गः ॥

सप्तमः सर्गः ।

सूरीन्दुरानन्दयति स्म तस्मिन्पुरे समग्रानपि नागरान्सः ।
पचेलिमः प्राक्तनपुण्यपुञ्जः प्रादुर्भवन्मूर्त इवैष तेषाम् ॥ १ ॥

स श्रीहीरविजयसूरिसुधाकरः तस्मिन् डीसानाम्नि पुरे समग्रान् सर्वानपि नागरान्पौरलोकान् आनन्दयति स्म प्रमोदमुत्पादयामास । उत्प्रेक्ष्यते—तेषां डीसापुरपौराणामेष चक्षुःप्रत्यक्षलक्ष्यः मूर्तस्तनुमान् पचेलिमः परिपाकं प्राप्तः प्राक्तनः प्राचीनजन्मोपार्जितः पुण्यपुञ्जः सुकृतसमूह इव ॥

मिलद्बलाकाम्बरमुद्वहन्ती लीलागतोद्वेजितराजहंसा ।
श्यामातिनम्रा च पयोधरोद्यद्धाराभिरामा पिहिताननेन्दुः ॥ २ ॥
सुरायुधभ्रूलतिकात्मयोनिमुज्जीवयन्तीव तडिद्विलासा ।
मुदे तदानीमजनिष्ट यूनां प्रावृण्णवोढा वरवर्णिनीव ॥ ३ ॥

तदा तस्मिन् डीसानगरे हीरविजयसूरेश्चतुर्मासकस्थितिसमये यूनां तरुणजनानां मदनमदमेदुरीभूतानां नवोढा यौवनवती नवपरिणीता वरवर्णिनी सर्वकलाकुशलप्रधानस्त्रीव प्रावृट् वर्षा मुदे प्रमोदायाजनिष्ट संजाता । वृद्धानां तु शीतवातकर्दमादिना दुःखदायिन्यत एव यूनामिति पदोपादानम् । किंलक्षणा प्रावृट् वरवर्णिनी च । मिलन्त्यः श्लिष्यन्त्यः भर्त्रा समागमं कुर्वन्त्यः बलाका बलाकाङ्गना यत्र । 'गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः' इति मेघदूतकाव्ये । प्रायो वर्षाकाले बकास्तु वृक्षादिषूपविश्य तिष्ठन्ति । बकाङ्गनास्तानाहारैः पोषयन्त्यत एवाम्बरे भ्राम्यन्ति । तादृशमम्बरमाकाशम् । पक्षे मिलन्त्यः श्रेणीभवन्त्यः बलाका बलाहकमहिलास्तद्वदुज्ज्वलं नवपाणिग्रहणावसरत्वाद्धवलमम्बरं वसनमुद्वहन्ती धारयन्ती । यतः । श्वेतं परिणयवासः स्यात् । पुनः किंभूता । लीलया स्वभावेन, न तु मन्त्राकर्षणादिना, आगतेन अनादिजगन्निसर्गेण वर्षितुमागमनेन उद्वेजिता विजयकरणप्रस्थानेषु विघ्नं प्रापिता राजहंसा विजयिराजानो यया । 'विश्रान्तजिष्णुक्षमापाल्युधि' इति चम्पूकथायाम् । विजयिनो हि राजानः प्रावृट्समये कुत्राप्यवस्थितिं कुर्वते, शरदि च विजयाय प्रतिष्ठते । अथ वा लीलया वर्षणविलासेन यदागमनं तेनोद्वेजिता जम्बालजालाविलजलावलोकनेनोद्वेगं गमिता अत एव मानसं प्रति प्रस्थातुमुत्सुकीकृता राजहंसा यया । 'प्रोषितकलहंसवयसि' इति चम्पूकथायाम् । 'प्रोषिता मानसं प्रति प्रस्थापिताः कलहंसविहंगमा येन' इति तद्वृत्तौ । पक्षे मन्थरगमनविलासेनावहेलिता राजमराला यया स्त्रिया । पुनः किंभूता । श्यामा सजलदपटलकालिमाकलिता । पक्षे षोडशवार्षिकी । पुनः किंभूता । अतिनम्रा अतिशयेन गुर्वादिषु नमनशीला लघुवृद्धानां विनयपरा । यदुक्तम्—'नमणी षमणी बहुगुणी विहुपखिवंसविशुद्ध । पुण्यविना नवि पामिइ करिधणुहा घरि भज ॥' इति वचनात् । पक्षे अतिशयेन नम्रा उन्नमय्यागता मेदिनीमण्डलालिंगिवर्द्दलिका । पुनः किंलक्षणा । पयोधरेभ्यो मेघेभ्य उद्यन्तीभिः प्रकटीभवन्तीभिर्धाराभिर्जलवृष्टिभिरभिरामा । पक्षे पयोधरयोः पीनोच्चकुचयोरुद्यता उपरिस्फुरता हारेण मुक्ताकलापेन हारिणी मनोज्ञा । पुनः किंलक्षणा । पिहित आवृतोऽर्थात् घनाभ्रमरेणादृश्यीकृत आननस्य मुखस्य तुल्य इन्दुश्चन्द्रो यस्याम् । पक्षे नवपरिणयनलज्जावशाद्वसनेनाच्छादितो वदनचन्द्रो यया । पुनः किंलक्षणा । सुरायुधमिन्द्रधनुरेव स्त्रीपक्षे शक्रचापचक्रवद्वक्रा कुटिला भ्रूवल्ली यस्याः । पुनः किंलक्षणा । आत्मयोनिं स्मरमुज्जीवयन्तीव ग्रीष्मसमये तापातिरेकान्मृतप्रायीभूतमदनं पुनर्जीवितं कुर्वतीव । पक्षे विभ्रमविलासैः काममुद्दीपयन्तीव । भर्तुरिति शेषः । वर्षाणां तरुणयोषितामवलोकनात्प्रायो यूनां स्मरः प्रादुर्भवेदिति । पुनः किंभूता । तडितां विद्युतां विलासाः स्फुरणानि झंकारा वा यस्याम् । पक्षे तडिद्वद्विलासाश्चञ्चलकेलयो यस्याः शृङ्गारचेष्टितानि वा यस्याः ॥ युग्मम् ॥ इति वर्षागमः ॥

अथ व्यधत्त प्रणिधानमिच्छन्कंचित्स संस्थापयितुं स्वपट्टे।
पुरेऽपि जीवातुरिवाखिलेऽपि प्रावर्तत प्राणभृताममारिः॥ ४॥

अथ तत्र डीसानगरे चतुर्मासीमासीने सति वर्षावहलीभवनानन्तरं स हीरविजयसूरिः प्रणिधानं सूरिमन्त्रस्मरणं व्यधत्त विदधाति स्म। किं कुर्वन्। इच्छन्काङ्क्षन्। किं कर्तुम्। कमपि योग्यं शिष्यं स्वपट्टे निजपदे संस्थापयितुम्। अपि पुनस्तस्मिन्निखिलेऽपि समग्रेऽपि पुरे डीसानगरे प्राणभृतां जन्तूनाममारिर्द्विपदचतुष्पदपक्षिमत्स्यादिप्राणिवधनिषेधो जीवदया प्रावर्तत प्रवृत्ता। तत्पुरस्वामिना प्रवर्तितेत्यर्थः। क इव। जीवातुरिव अर्थात् स्थलचरखेचरजलचराणां जीवनौषधमिव॥

द्वारं स्वसिद्धेरिव सूरिराजो ध्यानं दधानो वसुभूतिसूनोः।
अहान्यहर्बान्धवबन्धुरौजास्तन्निष्ठयेवागमयद्बहूनि॥ ५॥

सूरिराजः श्रीहीरविजयसूरिभूमीपुरुहूतः तस्य ध्यानस्य निष्ठा चतुर्थषष्ठाष्टमाचाम्लादिविविधतपोनेकमुद्रासनादिविधानपूर्वकसूरिगणनविधिक्रिया तयैव निश्चयेन बहूनि घनान्यहानि दिनानि अगमयदतिक्रामति स्म। सूरिमन्त्राराधनविधेस्त्रिमासावधित्वात् ऋतोस्तु द्विमासावधित्वाचेति। किंभूतः। अहर्बान्धवो भास्वान्। 'चक्राब्जाहर्बान्धवः सप्तसप्तिः' इति हैम्याम्। तस्येव बन्धुरमतिशायि ओजः प्रतापो यस्य। किं कुर्वाणः। वसुभूतिनाम्नो द्विजस्य सूनोर्नन्दनस्य श्रीगौतमस्वामिनो ध्यानं स्मरणमनुचिन्तनमर्थात्स्वहृदये दधानो बिभ्राणः। उत्प्रेक्ष्यते—स्वस्यात्मनः सिद्धेः श्रीजिनशासनाधिष्ठायकदेवतागमनलक्षणफलनिष्पत्तेर्द्वारं प्रवेशनमार्ग इव॥ इति हीरविजयसूरेः सूरिमन्त्रस्य ध्यानविधानारम्भः॥

संपिप्रती कामितमुत्सुकानां दिग्जेत्रयात्रासु धराधवानाम्।
अथोपतस्थे शरदस्य सूरेर्विधित्सयेव प्रणिधानसिद्धेः॥ ६॥

अथ ध्यानविधानावसरे शरद्घनविरामसमयः उपतस्थे समाजगाम। 'अथैनं समुपस्थिता। पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा॥' इति रघुवंशे। 'उपस्थिता आगता' इति तद्वृत्तिः। किं कुर्वती। दिशां पूर्वादीनां हरितां जयनशीलासु यात्रासु प्रस्थानेषु सम्यगुत्सुकानामुत्कण्ठितानाम्। दिग्विजयं कर्तुकामानामित्यर्थः। धराधवानां पृथिवीपतीनां नृपाणां कामितं समीहितं संपिप्रती संपूरयन्ती पूर्णं प्रणयन्ती। 'पृ पालनपूरणयोः' इत्ययं धातुः। उत्प्रेक्ष्यते—अस्य हीरविजयनाम्नः सूरेर्भट्टारकस्य प्रणिधानसिद्धेर्विधित्सया कर्तुमिच्छयेवागता॥

मलीमसीभूतमशेषमभ्रमातङ्गसङ्गेन पदं मुरारेः।
द्विजाधिपः क्षालयतीव यस्यां निस्तन्द्रचन्द्रातपनीरपूरैः॥ ७॥

यस्यां शरदि द्विजाधिपो ब्राह्मणश्रेष्ठः शशभृच्च । उत्प्रेक्ष्येते—निस्तन्द्रो मेघाभ्रहिमधूमप्रमुखनिर्मुक्तत्वेन निर्मलो यश्चन्द्रातपश्चन्द्रिका तत्तुल्यैर्विशदैर्नीरपूरैः । गङ्गोदकसमुदायैरित्यर्थः । पक्षे । ज्योत्स्नैव जलप्लवैः कृत्वा मुरारेर्नारायणस्य पदं स्थानं चरणं च नभः क्षालयति धावयतीव । किंभूतं पदम् । मलीमसीभूतं अपावनं जातम् । केन । अभ्रस्याकाशस्य मातङ्गश्चाण्डालस्तस्य । अथवा गगनमातङ्गेन समं संगमेन । अथवा अभ्रे आकाशे पर्वताद्युच्चस्थाने स्वपाचेन समं संगमेन कृत्वा अस्पृश्यभावमभ्युपगतम् । मातङ्गस्पृष्टं हि वस्तु जलेन शुध्यतीति जनप्रतीतिः । पक्षे । अभ्रमातङ्गैर्मेघैः । 'नभसः कलभैरुपासितम्' इति नैषधे । 'नभसः कलभैर्मेघैः' इति तद्वृत्तिः । मलीमसीभूतं श्यामलं संजातं घनान्धकारमयीभवनात् । 'दिवापि श्रूयमाणरजनिशङ्काकुलचक्रवाकचक्रकुशि' इति चम्पूकथायाम् । मलिनीभूतं हि जलैः क्षालयित्वा निर्मलीक्रियते इत्यपि लोकरूढिः । तत्त्वतस्तु ऐरावणगजकलितं जातम् । 'प्रावृषेण्यं पयोवाहं विद्युदैरावताविव' इति रघुवंशे । पुनः किंभूतम् । अशेषं संपूर्णमप्याकाशं वस्तुतस्तु चन्द्रचन्द्रिकया नभो धवलीक्रियते । 'आप्लावितमिव मुक्तमर्यादेन दुग्धवारिधिना विलिप्तदिग्भित्तिकमिव सान्द्रसुधापङ्कपिण्डैः प्रविष्टमिव स्फटिकमणिमहामंन्दरोदरदरीषु भुवनमासीत्' इति चम्पूकथायाम् । चन्द्रोदये सर्वं श्वेतीक्रियते ॥

गाधा व्यधाद्याम्बरचुम्बिरङ्गत्तरङ्गपूरानपि सिन्धुदारान् ।
जगत्प्रसारोत्सुकयद्यशःक्ष्माधरस्य किं सुप्रतराः प्रणेतुम् ॥ ८ ॥

या शरत् अम्बरमाकाशं चुम्बन्ति आलिङ्गन्ति इत्येवंशीलाः, तथा रङ्गन्त उपर्युपरि प्रसर्पन्तस्तरङ्गाः कल्लोला येषु तादृशाः पूराः पयःप्लवा येषां तादृशानपि सिन्धुदारान् समुद्रपत्नीर्नदीर्गाधाः पादोत्तरणयोग्याः । 'सरितः कुर्वती गाधाः' इति रघुवंशे । व्यधाचकार । उत्प्रेक्ष्यते—जगत्सु त्रिषु भुवनेषु प्रसारः प्रसरणं पर्यटनं तत्रोत्सुकस्योत्कण्ठितस्य यस्य हीरविजयसूरेर्यशः श्लोकः स एव क्ष्माधरो राजा तस्य सुप्रतराः सुखेन स्वयं पादोत्तरणसातेन तीर्यन्ते उत्तीर्यन्ते प्रोल्लङ्घयन्ते तादृग्विधाः प्रणेतुं कर्तुं सुखेन तरीतुं शक्या विधातुमिव वा ॥

आस्वादितस्वादुमृणालकाण्डाः कूजन्ति लीलालसराजहंसाः ।
आगन्तुकार्हन्मतदेवतायाः स्मरध्वजाः पूर्वमिव ध्वनन्तः ॥ ९ ॥

लीलया विविधजलक्रीडया अलसा मन्थरा राजहंसा अत्यरुणचञ्चुचरणा मरालाः कूजन्ति शब्दायन्ते । 'राजहंसास्त्वमी चञ्चुचरणैरतिलोहितैः' इति हैम्याम् । किंभूताः । आस्वादिताः कवलीकृताः स्वादवो मधुरा रसनावदनहृदयाह्लादकरा मृणालानां कमलनालानां काण्डाः स्तम्बाः पटलानि यैः । उत्प्रेक्ष्यते—आगन्तुकाया आगमनशीलाया हीरविजयसूरेः पुरः प्रकटीभवितुकामाया अर्हन्मतदेवतायाः शासनदेव्याः पूर्वं प्रथम-

मेव ध्वनन्तः शब्दायमाना वाद्यमाना वा स्मरध्वजा वाद्यानीव । 'वाद्यं वादित्रमातोद्यं तूर्यं तूरं स्मरध्वजः' इति हैम्यां वादित्रनामानि ॥

निर्मृष्टनिःशेषनिषद्वरायाः किं वर्ण्यतेऽस्याः शरदिन्दिरायाः ।
जडाशयानप्यसृजत्प्रसन्नाशयान्कविश्रीकलितांश्च यत्सा(द्या)॥१०॥

अस्याः हीरविजयसूरिध्यानसमयसमेतायाः शरदिन्दिराया जलधरविरामलक्ष्म्याः किम् अर्थाद्वीप्सा किं किं माहात्म्यं वर्ण्यते प्रशस्यते । किंभूतायाः । निर्मृष्टो निःशेषेण मृष्टो निवारितोऽपहृतो वा निर्गतः शेषो लवलेशमात्रो निषद्वरः कर्दमो यस्याः । अथवा निर्मृष्टो निर्धूतः शोषं नीतो निःशेषः समस्तोऽपि कर्दमो यया । यद्यस्मात्कारणात् या शरल्लक्ष्मीर्जडाशयान् जडस्वभावान् जडहृदयान्वा । मूर्खानित्यर्थः । प्रसन्नाशयान् निर्मलीभूतमध्यान् प्रसन्नतायुक्तस्वभावान् झगित्यर्थावबोधगोचरत्वं प्रसादगुणस्तद्युक्तचित्तान् त्वरितमेव शास्त्रार्थमवबुध्यन्ते तादृशान् । पण्डितानित्यर्थः । असृजत्कृतवती । च पुनः कवित्वेन पाण्डित्येन काव्यकर्तृत्वेन वा । 'विद्वान् सुधीः कविविचक्षणलब्धवर्णाः' इति हैम्यां पण्डितनामानि । तथा 'वयमपि कवयः कवयः [कवयः] कवयश्च कालिदासाद्याः' इति कविशब्देन काव्यकर्तापि । या श्रीः शोभा लक्ष्मीर्वा तया कलितान्युक्तान् करोति स्म । तत्त्वतस्तु डलयोरैक्यात् जलाशयांस्तडाकादिनीरस्थानानि स्वच्छमध्यान् तथा कस्य पानीयस्य वयः पक्षिणो हंसादयस्तैः सहितांश्चक्रे । वर्षासु हंसा हि मानससरसि यान्ति । शरदि पुनः कमलकलितेषु निर्मलसलिलेषु सरःसु समायान्ति इति कविसमयः ॥

स्मितेषु पद्मेषु मुखेष्विवास्या रङ्गत्सु नेत्रेष्विव खञ्जनेषु ।
बन्दिष्विव स्मेरसरोजपौष्पनिष्पातिगुञ्जन्मधुकृद्व्रजेषु ॥ ११ ॥
पटीष्विवोद्दामकलामकौघावदातकेदारवसुंधरासु ।
भूषास्विवास्या विविधासु लीनशिलीमुखस्मेरसुमावलीषु ॥ १२ ॥
गणाधिराजे प्रणिधानदुग्धपाथोनिधौ मीन इवातिलीने ।
तदा कदाचिद्गगनाध्वनीनोऽपराचलाभ्यर्णभुवं बभाज ॥ १३ ॥

तदा तस्मिन् शरत्समये कदाचित्कस्मिन्नपि दिनावसानव्यतिकरे गगनाध्वनीनः । 'गगनाद्ध्वजाध्वगौ' इति हैम्याम् । सूर्यनामसु । तथा 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकदेशिकौ' इति हैम्याम् । अपराचलस्य अस्ताद्रेरभ्यर्णभुवं समीपभूमीप्रदेशं बभाज श्रयति स्म । कस्मिन् सति । गणाधिराजे हीरविजयसूरीन्द्रे प्रणिधानं ध्यानम् । 'सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम्' इति रघुवंशे । तदेव दुग्धपाथोनिधिः क्षीरसमुद्रः तस्मिन्मीनो मत्स्य इव अतिशयेन लीने मग्नीभूते । अथ समयवर्णनम् । केषु सत्सु । स्मितेषु विकसितेषु पद्मेषु कमलेषु सत्सु । उत्प्रेक्ष्यते—अस्याः शरल्लक्ष्म्याः

मुखेषु क्रीडाकृतानेकवदनेष्विव। पुनः केषु सत्सु। रङ्गत्सु लीलया अशनाद्यर्थं वा इतस्ततो भ्राम्यत्सु खञ्जनेषु खञ्जरीटेषु 'गंगेटिया'ख्यपक्षिविशेषेषु सत्सु। वर्षाकाले हि खञ्जनानां शिरःसु शिखा समायाति तदनुभावाददृश्यीभावं भजन्ते । ततः शरदि पुनः शिखापाताच्चक्षुर्लक्षतामाकलयन्ति तेनेतस्ततो भ्रमणं कुर्वते । तदुपर्युत्प्रेक्षा । उत्प्रेक्ष्यते—शरल्लक्ष्म्या नेत्रेषु स्त्रीस्वभावाच्चञ्चललोचनेष्विव। 'भवत्कृते खञ्जनमञ्जुलाक्षि' इति बिल्हणपञ्चाशिकायाम् । पुनः केषु सत्सु । स्मेराणां विनिद्राणां सरोजानामरविन्दानां पौष्पेषु परागेषु निष्पातिनो निपतनशीला आगत्य मकरन्दपानकृते निलीय स्थितिं कुर्वाणाः तथा स्वच्छन्दमाकण्ठमकरन्दास्वादनोन्मदिष्णुभवदमन्दानन्दं शब्दायमाना गुञ्जन्तः गुञ्जारवं विदधाना मधुकृतां भ्रमराणां व्रजाः समूहास्तेषु सत्सु । उत्प्रेक्ष्यते—अस्याः शरल्लक्ष्म्या बन्दिषु मङ्गलपाठकेष्विव । पुनः कासु सतीषु । उद्दामाः परिपाकप्राप्तत्वेन मनोरमा ये कलामकाः कलमशालयः । 'कलमस्तु कलामकः' इति हैम्याम् । तेषामोघाः समूहास्तैरवदाता उज्ज्वलाः । केदाराणां वसुंधरा भूमयस्तासु सतीषु । उत्प्रेक्ष्यते—शरदिन्दिरायाः पटीषु उत्तरीयनिवसनेष्विव । पुनः कासु सतीषु । विविधासु श्वेतरक्तनीलपीतकृष्णाद्यनेकविधासु । तथा लीना मधुपानकृते मध्ये प्रविश्य स्थिताः शिलीमुखा भृङ्गा यासु तादृश्यासु(शीषु) स्मेरासु हसितासु सुमानां पुष्पाणामावलीषु श्रेणीसु सतीषु। उत्प्रेक्ष्यते—अस्याः शरदिन्दिराया विविधप्रकारासु भूषासु आभरणेष्विव । 'विनापि भूषामवधिः श्रियामसौ' इति नैषधे । 'भूषा भूषणानि' इति तद्वृत्तिः । त्रिभिर्विशेषकम् । इति शरत्समयः ॥

विधेर्नियोगेन निजास्तपश्यान्पुत्रानिवोत्सङ्गजुषः स्वरश्मीन् ।
दृष्ट्वा यियासूंस्तदुदीतकोपादिवारुणीभूतमथारुणेन ॥ १४ ॥

अथास्ताचलसमीपगमनानन्तरम् अरुणेन भास्करेण अरुणीभूतं रक्तेनाभूयत । उत्प्रेक्ष्यते—तदुदीतकोपादिव तेषु स्वरश्मिषु उदीतः प्रादुर्भूतो यः कोपः क्रोधस्तस्मादिव । किं कृत्वा । दृष्ट्वा अवलोक्य । कान् । स्वरश्मीन् आत्मीयकिरणान् । किंभूतान् । उत्सङ्गं क्रोडं जुषन्ते भजन्ते । उत्प्रेक्ष्यते—पुत्रान्नन्दनानिव । पुनः किंभूतान् । विधेर्दैवस्य नियोगेन परवशतया निजस्य सूर्यात्मनः अस्तं क्षयं पश्यन्ति विलोकयन्तीति । अत एव किं कर्तुमिच्छून् । यियासून् आत्मनः पार्श्वादन्यत्र कुत्रचिद्गन्तुमिच्छून् ॥

जहेऽम्बरं सायमशीतभासा नीत्वास्तधात्रीधरगह्वरान्तः ।
प्रदोषनाम्ना परिमोषिणेवासहायिभावेन बलाद्गृहीतम् ॥ १५ ॥

न विद्यन्ते शीताः शिशिराः शीतला भासः कान्तयो यस्योष्णरश्मित्वात् अशीतभास्तेनाशीतभासा भानुना सायं संध्यासमये अम्बरमाकाशं वसनमपि जहे त्यक्तम् । उत्प्रेक्ष्यते—प्रदोष इति नाम यस्य तेन प्रदोषनाम्ना परिमोषिणा तस्करेण। यामिनीमुखचौरेणेत्यर्थः । अस्तधात्रीधरः पश्चिमाचलः तस्य गह्वरान्तः गुहामध्ये घनद्रुमगहन-

मध्ये च नीत्वा प्रापयित्वा असहायिभावेन सहायः सखा अस्यास्तीति सहायी न साहायी असहायी तस्य भावस्तेन सहायराहित्येन। एकाकित्वेनेत्यर्थः। बलात् हठात् गृहीतमादत्तमिव। कस्मिंश्चिद्बलवति तस्करादिके वसनादि गृहीतुमुद्यते एकाकिना निर्बलेन पुंसा त्यज्यत एव ॥

कलङ्कवानिन्दुरथाभ्युदेताकलङ्किनो विश्वविबोधिनो मे ।
न सांप्रतं सांप्रतमत्र वस्तुमितीव याति क्वचिदंशुमाली ॥ १६ ॥

अंशुमाली सूर्यः क्वचित् कुत्रचन स्थाने याति गच्छति। उत्प्रेक्ष्यते—इति कारणादिव। इति किम्। यत्। अथ दिवसावसानानन्तरं कलङ्कवान् दोषाकरत्वेन कलङ्ककलितः। अथवा कामितया गुरुदारकामुकत्वात्सकलङ्क इन्दुश्चन्द्रोऽभ्युदेता उदयिष्यते तत्कारणादकलङ्किनो निष्कलङ्कस्य तथा विश्वविबोधिनः जगत्प्रतिबोधप्रविधानशीलस्य मे ममात्र भुवने सांप्रतमधुना वस्तुं स्थातुं न सांप्रतं न युक्तं नोचितीमञ्चति ॥

स्वरागिणीमञ्जनकुम्भिकुम्भप्रगल्भपीनस्तनदिङ्मृगाक्षीम् ।
निर्वर्ण्य रागीव दिनावसाने किं पद्मिनीप्राणपतिः प्रयाति ॥१७॥

पद्मिनी। यस्याः शरीरसौरभभरमाघ्राय मधुरा मालतीप्रमुखकुसुमजातीर्विहाय यद्वसनोपरि परिभ्राम्यन्ति सा पद्मिनीत्युच्यते। तस्याः प्राणपतिः प्राणेभ्योऽतिवल्लभः पतिव्रतात्वेन भास्वान् दिनावसाने संध्यासमये प्रयाति गच्छति। उत्प्रेक्ष्यते—अञ्जननामा पश्चिमदिग्गजः। यतः—'ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥' एते पूर्वाद्यष्टानां दिशामष्टौ दिग्दन्तिनः सन्ति। तेषु प्रतीच्या दिग्दन्ती अञ्जननामा कुम्भी गजस्तस्य कुम्भौ शिरसः पिण्डौ तावेव प्रगल्भौ कामिजनमनोहारिणौ तथा पीनावतिपुष्टौ स्तनौ पयोधरौ यस्यास्तादृशी दिक् प्रतीची सैव मृगाक्षी हरिणनयनां तां स्वस्मिन्विषये रागिणीमनुरागिणीं प्रेमातिरेकभाजिनीमरुणां च निर्वर्ण्य दृष्ट्वेव याति। क इव। रागीव। यथा कश्चिद्रागी पुमान् पद्मिनीपतिरपि स्वाङ्गनामवगणयन्। 'स्वाधीनेऽपि कलत्रे नीचः परदारलम्पटो भवति। संपूर्णेऽपि तटाके काकः कुम्भोदकं पिबति ॥', तथा 'चातुर्येणातिवाचं सुगणमणिखनीं भाग्यसौभाग्यलक्ष्मीं स्वाधीनां भक्तिभाजं विमलकुलभवां शीलमाशीलयन्तीम्। प्रेमाढ्यां पद्मिनीं स्वां परयुवतिरतो हा विहायेन्दुवक्त्रामन्यां वामां कुरूपामनुसरति जनो मन्मथं तद्धिगस्तु ॥', 'सहदेशे विन्नाणं अणरसमब्भं मिगाइयं गीयम्। नियमहिलाणयरूवं तन्निविलोए न अग्घन्ति ॥' इति वचनात्। रागातिरेकवान् सन् स्वस्मिन्नत्यनुरक्तां कामिनीं प्रेक्ष्य सायं तत्संनिधौ याति ॥

उत्तुङ्गतारङ्गशिखावलम्बि किंजल्कलीलायितरश्मिराशि ।
पयोधिपूरेऽम्बुजबन्धुबिम्बं स्मेरारुणाम्भोरुहवद्विभाति ॥ १८ ॥

पयोधिपूरे पश्चिमसमुद्रसलिलप्लवे अम्बुजबन्धोः पद्मसुहृदो दिवाकरस्य बिम्बं मण्डलं स्मेरारुणाम्भोरुहवद्विकसितरक्तकमलमिव विभाति । नीरधिनीरोपरि विकच-कोकनदसदृशं दृश्यते इत्यर्थः । किंभूतम् । उत्तुङ्गो गगनाङ्गणालिङ्गी यस्तारङ्गस्तरङ्गाणां समूहस्तारङ्गः । अत्र समूहार्थेऽण् । कल्लोलकलापः । 'वारं वारं तारतरस्वरनिर्जि-तगङ्गातारङ्गाम्' इति पद्मसुन्दरनिर्मितभारतीस्तवने । तस्य शिखामग्रभागमवलम्बते आश्रयतीति एवं शीलम् । पुनः किंभूतम् । किंजल्कानां कमलकेसराणां लीला विला-सस्तद्वदाचरितो रश्मिराशिः करनिकरो यस्य ॥

पूरे समुद्रस्य बभस्ति बिम्बं राजीविनीजीवितनायकस्य ।
पयोधिपल्यङ्कतले शयालोरुल्लासि चक्रं किमु चक्रपाणेः ॥ १९ ॥

समुद्रस्य पश्चिमवीचिमालिनः पूरे पयःप्लवे राजीविनीनां पद्मिनीनां जीवितनाय-कस्य प्राणवल्लभस्य बिम्बं मण्डलं बभस्ति भासते । 'वररजनीकर कान्ते चित्राभरणे निशानभःसदृशे । तव नृप मज्जनभवने सविता नाभाति परमश्रीः ॥' इति चम्पूकथा-याम् । 'तत्र द्वितीयराजार्थे निशानैस्तेजस्विभिर्बभस्ति' इति तट्टिप्पनके । उत्प्रेक्ष्यते— पयोधिः समुद्र एव पल्यङ्कः शय्या तस्य तले शयालोः शयनशीलस्य । 'दासार्हः पु-रुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजौ' इति हैम्याम् । चक्रपाणेर्विष्णोरुल्लासि प्रोल्ल-सनशीलं चक्रं किमु । विस्फुरत्सुदर्शनं नाम रथाङ्गमिव ॥

खण्डेन चण्डद्युतिमण्डलेन न्यमज्जि पूरे मकराकरस्य ।
सूरेर्महःसाम्यकृतेऽब्धिझम्पासृजा शनैर्निष्पततेव भीतेः ॥ २० ॥

चण्डद्युतेर्भास्करस्य मण्डलेन खण्डेन शकलेन चतुर्थभागेन कृत्वा मकराकरस्य समुद्रस्य पूरे न्यमज्जि ब्रूडितम् । मण्डलचतुर्थांशो जलधिमध्ये निमग्न इत्यर्थः । उत्प्रे-क्ष्यते—सूरेर्हीरविजयसूरीन्द्रस्य महसां भूयसां प्रतापानां साम्यकृते तुल्यत्वप्राप्त्यर्थ-मब्धौ समुद्रे झम्पां पयःसंपातपाटवं सृजति करोति इत्यब्धिझम्पासृट् तेनार्केण भीतेः स्वान्ते भयवशात् शनैर्लघु निष्पततेव ॥

अम्भोधिमध्येऽर्धितबिम्बमम्भोजिनीवरस्य स्फुरति स्म सायम् ।
अतादृशीं प्रेक्ष्य दशां प्रियस्य किमब्धिमज्जद्दिनलक्ष्मिभालम् ॥२१॥

सायं संध्यासमये अम्भोधेः समुद्रस्य मध्ये अम्भोजिनीवरस्य पद्मिनीपतेर्भानोर-र्धितं भावप्रधाननिर्देशादर्धत्वं जातमस्मिन्नित्यर्धितं बिम्बं मण्डलम् । अर्धमब्धिमध्ये मग्नम्, अर्धं च बहिर्दृश्यमानं चेत्यर्थः । स्फुरति दीप्यते स्म । उत्प्रेक्ष्यते—प्रियस्य स्व-भर्तुर्भानोरतादृशीं विश्वशोच्यामस्तलक्षणां दशामवस्थां प्रेक्ष्य दृग्गोचरीकृत्य । अर्था-

१. भावल्युडन्तनिशानशब्दादर्श आद्यजिति भावः.

त्तदुःखातिरेकादब्धौ मज्जन्त्या ब्रूडन्त्याः पतन्त्या वा दिनलक्ष्म्या वासरश्रिया भालं ललाटमिव ॥

भानोर्बभौ मण्डलखण्डमब्धौ गन्तुः पुरारेर्मिलितुं मुरारिम् ।
मृगाङ्कलेखेव सरोषचण्डीसालक्तपादाहतिशोणितश्रीः ॥ २२ ॥

अब्धौ समुद्रे भानोः सूर्यस्य मण्डलस्य बिम्बस्य खण्डं शकलम् । बिम्बचतुर्थांशमात्रमित्यर्थः । बभौ शोभते स्म । उत्प्रेक्ष्यते—मुरारिं नारायणं मिलितुं गन्तुर्गच्छतीति गन्ता तस्य पुरारेः शंभोर्मृगाङ्कलेखेव शिरःशेखरपीयूषमयूखकलेव शिरःशशिकलेव । किंभूता । सरोषा कुतश्चित्कारणात्कोपकलिता या चण्डी अत्यन्तकोपना कामिनी पार्वती च । 'चण्डस्त्वत्यन्तकोपनः' इति हैमीवचनात् । स्त्री चेच्चण्डी । 'दुर्गा चण्डी सिंहयाना मृडानी' इत्यपि हैम्यां पार्वतीनामानि । तस्याः सालक्तकेन सह यावकरसेन वर्तते यस्तादृशः पादश्चरणस्तस्याहत्या शिरसि प्रहारेण शोणत्वं संजातमस्यामिति शोणिता रक्तीभूता श्रीर्वपुर्लक्ष्मीर्यस्याः । कथंचित्सुरतकलहे कुपितां पार्वतीमनुनेतुं पादपतितस्य शंभोः शिरसि कोपात्पादप्रहारः प्रदत्तः, तदवसरे चरणार्द्रालक्तकरसे लग्ने रक्ता जातेत्यर्थः ॥

द्वीपे परस्मिन्नितरोऽस्ति कश्चिदस्य व्रतीन्द्रस्य वशी सदृक्षः ।
दिदृक्षयान्तः कुतुकादितीव पतिस्त्विषां याति परत्र खण्डे ॥ २३ ॥

त्विषां पतिर्भानुमान्परत्र अन्यस्मिन् खण्डे द्वीपे प्रदेशे वा याति । उत्प्रेक्ष्यते—अन्तश्चेतोमध्ये कुतुकात्कौतूहलादित्यमुना प्रकारेण दिदृक्षया द्रष्टुमिच्छयेव । इति किम् । यदन्यस्मिन्नपरस्मिन्द्वीपेऽस्य हीरविजयनाम्नो व्रतीन्द्रस्य सूरेः सदृक्षस्तुल्य इतोऽन्यः कश्चिद्वशी जितेन्द्रिय आस्ते न वेति ॥

अनक्षिलक्ष्यीभवति स्म भास्वान्निजाङ्गनायामनुरागिभावात् ।
क्वचिन्निगूढं वरुणेन रोषादिवैष पाशेन नियन्त्र्य मुक्तः ॥ २४ ॥

भास्वान्मार्तण्डः अक्ष्णोर्नयनयोर्लक्ष्यो दृश्यः अक्षिलक्ष्यः दृग्गोचरो नाक्षिलक्ष्योऽनक्षिलक्ष्यः स भवति स्मेति अनक्षिलक्ष्यीभवति स्म । अदृश्यो जातः । अस्तं गत इत्यर्थः । उत्प्रेक्ष्यते—निजाङ्गनायां पश्चिमदिङ्मृगलोचनायाम् । 'वरुणगृहिणीमाशामासादयन्तममुं रुची' इति नैषधे । अनुरागः प्रेमातिरेकोऽस्त्यस्मिन्वा दृग्भावश्चित्ताभिप्रायो यस्य अनुरक्तत्वेन वा रोषात्कोपोदयात्क्वचित्कुत्रापि प्रदेशे वरुणेन प्रतीचीपतिना पाशेन बन्धनग्रन्थिना नियन्त्र्य बद्ध्वा निगूढं गुप्तस्थाने मुक्तः स्थापितो रक्षित इव ॥ इति सूर्यास्तवर्णनम् ॥

आवासविस्मेरमहीरुहाणां सायं शिखाः शिश्रियिरे शकुन्ताः ।
विश्वोपकर्ता क्व गतः सगोत्रः खगस्तदीक्षार्थमिवास्थुरुच्चैः ॥२५॥

शकुन्ताः पक्षिणः सायं संध्यासमयमनुलक्ष्यीकृत्य आवासनमावासस्तदर्थम्। निशायां निवस्तुमित्यर्थः। आवासार्हा वा विकसिता ये महीरुहा पादपास्तेषाम्। 'आवासवृक्षोन्मुखबर्हिणानि' इति रघुवंशे। तथा 'फलबर्हाभ्यामिनच्'। 'फलिनः, बर्हिणः' इति प्रक्रियाकौमुद्याम्। शिखाः शाखाः शिश्रियिरे भजन्ते स्म। उत्प्रेक्ष्यते—विश्वोपकर्ता जगज्जनानां प्रबोधालोककारकत्वेनोपकारकारकः तथा सगोत्रो नोऽस्माकमाकाशचरत्वेन सदृशं गोत्रं नाम यस्य स सगोत्रः। 'गोत्रसंज्ञानामधेयाख्याह्वा' इति हैम्याम्। खगो भानुमाली। 'सूर्योऽर्कः किरणो भगो ग्रहपुषः पूषा पतङ्गः खगः' इति सूर्याभिधानानि हैम्याम्। क कुत्रस्थाने गतः यातवान्। तस्य खगस्य ईक्षार्थमालोकनार्थमिवोच्चैः उपरितनशिखासु अस्थुः स्थिताः॥

मरन्दनिस्पन्दितमालतालीः सायं स्म शीलन्ति कलापिमालाः।
प्रावृट्पयोदस्य धियेव मैत्र्यादुपेयुषोऽभ्रान्मिलितुं क्षमायाम्॥२६॥

कलापिमाला मयूरमण्डली सायं संध्यासमये मरन्दानां विकसितकुसुममकरन्दानां नितरामतिशायितया स्पन्दः क्षरणमस्त्यासु तादृश्यस्तमालास्तापिच्छास्तालीवृक्षविशेषाः शीलन्ति श्रयन्ते। उत्प्रेक्ष्यते—अभ्रादाकाशान्मैत्र्यात्सौहार्दान्मिलितुमर्थादात्मनोमिलनार्थं क्षमायां भूमण्डले उपेयुषः समागतस्य प्रावृट्पयोदस्य वार्षिकमेघस्य धिया बुद्ध्या। भ्रमादिवेत्यर्थः॥

विकालवेलामनु सूत्रकण्ठा अनीनदन्नीडसनीडभाजः।
दृष्ट्वा जगच्चक्षुरनिष्टमेते पठन्ति किं शान्तिकमन्त्रपाठान्॥ २७॥

विकालवेलां दिवसावसानसमयमनुलक्ष्यीकृत्य। व्यालोक्येत्यर्थः। 'दिनावसानमुत्सूरो विकालसबली अपि' इति हैम्याम्। सूत्रकण्ठाः शुकाः अनीनदन् अतिशयेन शब्दायन्ते स्म। किंभूताः। नीडानां कुलायानां सनीडं समीपं भजन्तीति। उत्प्रेक्ष्यते—जगतां विश्वेषां प्राणिनां सर्वमार्गाणां स्वेषां परेषां वा सर्वपदार्थानां दर्शकत्वाच्चक्षुरिव लोचनमिव तस्य जगच्चक्षुषो भानोरनिष्टमस्तलक्षणामापदं दृष्ट्वा एते द्विजाः किं शान्तिकान् शान्तिकारकान्मन्त्रपाठान्मन्त्रोच्चारान्पठन्त्युच्चरन्तीव। ब्राह्मणा हि विपत्तौ विघ्ने वा शान्तिकं कुर्वाणाः शान्तिकमन्त्रपाठानुच्चरन्तीति लोकरूढिः। 'सूत्रकण्ठः शुके विप्रे खञ्जरीटकपोतयोः' इत्यनेकार्थतिलकः॥

वियन्मणीवल्लभविप्रयुक्तां पाथोजिनीं मुद्रितवक्त्रकोशाम्।
रसार्पणप्रीतहृदस्तदानीमालापयन्तीव रवैर्द्विरेफाः॥ २८॥

तदानीं संध्यायां सूर्येऽस्तमिते द्विरेफाः मधुकरा रवैः स्वगुञ्जारवैः शब्दैः कृत्वा पाथोजिनीं पद्मिनीम्। उत्प्रेक्ष्यते—आलापयन्तीव शोकापनोदं मनाक् प्रणेतुं वादन्तीव। किंभूता द्विरेफाः। रसानां निजोज्जृम्भमाणपाथोजनिर्यन्मकरन्दानामर्पणेन पूर्वप्रदानेनाकण्ठपानोपकारकरणेन प्रीतमतीव हृष्टं हृद् मनो येषाम्। किंभूतां पद्मिनीम्। विय-

न्मणी गगनरत्नं सूर्यः । 'भानुर्नभोद्युमणी' इति हैम्याम् । स एव वल्लभः प्राणप्रियो भर्ता पद्मिनीपतित्वेन तस्य । तेन विप्रयुक्तां प्राप्तवियोगाम् । विरहिणीमित्यर्थः । पुनः किंभूताम् । अत एव मुद्रितो मुकुलीकृतः संकोचितः पिहितो वा वक्त्रसदृशः कोशः कुड्मलो यस्यास्ताम् । पूर्वप्रीणितस्वजनादिः कामपि प्रियवियोगिनीं कामिनीमागत्य सुखदुःखादिवार्ता प्रश्नेनालापयतीति रीतिः ॥

सरोजिनी कोशकुचौ निपीड्याधरच्छदे पीतरसैः स्ववातात् ।
मीलन्मुखी कम्पमिषान्निषेद्ध्री जहे महेलेव युवद्विरेफैः ॥ २९ ॥

युवद्विरेफैस्तरुणभृङ्गैः सरोजिनी पद्मिनी जहे । केव । महेलेव । यथा युवभिर्युवती त्यज्यते । किं कृत्वा । कोशौ मुकुलावेव कुचौ निपीड्य मर्दयित्वा । किंभूतैर्द्विरेफैः युवभिश्च । अधरच्छदे अधस्तनपत्रे ओष्ठदले च । निपीतो नितरामास्वादितो रसो मकरन्दोऽमृतरसो यैः । 'स्वमाह संध्यामधरोष्ठलेख्याम्' इति नैषधे । 'अधस्तनोऽधरः' इति तद्वृत्तिः । किंभूता । स्ववातान्निजपक्षपवनाद्यः कम्पस्तन्मिषान्निषेद्ध्री निषेधनशीला स्वं निवारयन्ती । अत एव किंभूता । मीलन्मुखी संकुचद्वदना ॥

विश्वं विशन्तीं द्विषतीमुषां स्वामन्विष्य तस्याः किममङ्गलाय ।
रथाङ्गनाम्नां निवहैर्वियुक्तैर्विमुक्तकण्ठं रुरुदे दिनान्ते ॥ ३० ॥

वियुक्तैः वियोगिभिः निजाङ्गनारथाङ्गविहंगमीभ्यः पृथग्भूतैर्दैववशात्स्वां प्रियां मीलितुमशक्नुवद्भिः इत एव पृथक्स्थानस्थितैः । 'रविरहर्विरहध्रुवभेदयोः' इति रघुवंशवचनात् । रथाङ्गनाम्नां चक्रवाकानां निवहैर्निकरैर्दिनान्ते दिवसावसाने प्रदोषसमये विमुक्तकण्ठं गाढस्वरेण रुरुदे रोदनमकारि । किं कृत्वा । विश्वं जगन्मध्यं विशन्तीं प्रवेशं सृजन्तीम् । तथा स्वामात्मीयां द्विषतीं वैरिणीमुषां निशामन्विष्य विलोक्य । उत्प्रेक्ष्यते—तस्या रात्रेः किममङ्गलायापशकुनार्थम् । गमनागमने हि प्रायः प्राणिनां स्वयं रोदनं पररोदनश्रवणं च महाकष्टाय जायते ॥

मृगीदृशामञ्जनमञ्जुलाभिर्विलोचनश्रीभिरिवाभिभूताः ।
व्रीडेन नीडद्रुमकोटरान्तः प्रयान्ति संध्यामनु खञ्जरीटाः ॥ ३१ ॥

संध्यां पितृप्रसूसमयमनुलक्ष्यीकृत्य खञ्जरीटाः खञ्जननामानः शकुनविशेषाः नीडानां स्वस्वकुलायानां ये द्रुमा महीरुहास्तेषां कोटरान्तः निष्कुहमध्यभागे । 'निष्कुहः कोटरो मञ्जा'[1] इति हैम्याम् । प्रयान्ति गच्छन्ति । प्रविशन्तीत्यर्थः । उत्प्रेक्ष्यते—मृगीदृशां सारङ्गीनयनानां सुलोचनानां स्त्रीणामञ्जनमञ्जुलाभिः कज्जलशलाकाञ्जनावन्मनोज्ञाभिः विलोचनश्रीभिर्विशिष्टनयनलक्ष्मीभिरभिभूताः सन्तो व्रीडेन लज्जयेव । व्रीडशब्दोऽकारान्तोऽप्यस्ति । 'व्रीडमावहति मामकं मनः' इति नैषधे ॥

---

१. मञ्जेति तु प्रकृतानुपयुक्तं भवेत्.

दोषामुखेन द्विषतेव वार्धौ क्षिप्तं समीक्ष्य स्वविपक्षमर्कम् ।
शत्रोरगोत्रीभवनादिवाभ्रभुवोर्मुदाभ्राम्यत घूकलोकैः ॥ ३२ ॥

घूकलोकैः कौशिकशकुन्तसंकरैरभ्रभुवोर्द्यावापृथिव्योर्मुदा स्वशात्रववारिजबान्धवास्तविभावनाभ्युदितप्रमोदेन अभ्राम्यत इतस्ततो बंभ्रम्यते स्म । 'आलोकतालोकमुलूकलोकः' इति नैषधे । तथा 'आकाशे तमसि सममिते कोकलोके सशोके' इति नाटकशास्त्रेऽपि पक्षिशब्दानां पुरः समूहवाची लोकशब्दो दृश्यते, तेन घूकलोकः इति प्रयोगः । उत्प्रेक्ष्यते—शत्रोरगोत्रीभवनात् स्वीयविपक्षजगज्चक्षुषो वंशस्य नाम्नोऽपि वा अभावो जात इतीव मुदा भ्रान्तम् । किं कृत्वा । द्विषतेव शात्रवेनेव दोषामुखेन प्रदोषेण स्वविपक्षं निजप्रत्यर्थिनं भास्करं वार्धौ अगाधपयोधिपयोमध्ये क्षिप्तं पातितं समीक्ष्य दृष्ट्वा ॥

कपोतपालीतटसंनिविष्टा हुंकुर्वते क्वापि कपोतपोताः ।
शोच्यां दशां प्राप्तमुदीक्ष्य मित्रमुदीयमानान्मनसीव दुःखात् ॥३३॥

क्वापि कुत्रापि स्थाने कपोतपाल्या विटङ्कस्य । 'कपोतपाली विटङ्कः' इति हैम्याम् । तटे एकत्र प्रान्तप्रदेशे संनिविष्टाः संस्थितिं कुर्वाणाः सन्तः कपोतपोताः पारावतबालका हुंकुर्वते हुंकारं कुर्वन्ति । कपोतानां कूजितं प्राय एवंविधमेव श्रूयते । यदुक्तं कालिदासकविना विभातवर्णनाधिकारे—'परिणतरविगर्भव्याकुला पौरहूती दिगपि घनकपोती हुंकृतैः कुन्थतीव' इति । उत्प्रेक्ष्यते—शोच्यां शोचनार्हां दशामस्तलक्षणामवस्थां प्राप्तमासादितं मित्रं सूर्यं सुहृदं च उदीक्ष्य दृष्ट्वा मनसि स्वचेतसि उदीयमानात् प्रकटीभवतो दुःखादिव ॥

पिकाश्चुकूजुः सहकारकुञ्जे रत्या रतश्रान्ततया शयालोः ।
जगज्जयस्यावसरं जिगीषोः संसूचयन्तीव रतीशभर्तुः ॥ ३४ ॥

सहकारकुञ्जे माकन्दपादपकानने पिकाः कोकिलाश्चुकूजुः शब्दायन्ते । प्रोन्निद्रसान्द्रामन्दमाकन्दमञ्जरीपुञ्जास्वादनमधुरध्वनिप्रपञ्चपञ्चमगीतिमुच्चरन्ति । उत्प्रेक्ष्यते—स्वपत्न्या रत्या समं रतेन संभोगाभोगविनोदेन श्रान्ततया प्राप्तश्रमत्वेन सुरतसंजातखेदेन शयालोर्निद्राशीलस्य । तथा जिगीषोस्त्रिजगज्जेतुमिच्छोः रतीशः कामः स एव भर्ता प्रभुस्तस्य जगतां तात्स्थ्यात्तद्व्यपदेशान्नाकिनागनागराणां जयस्य पराभवनप्रविधानस्यावसरं व्यतिकरं वेलां प्रस्तावं संसूचयन्ति कथयन्तीव । यतो नक्तं प्रायः सर्वेऽपि संसारिणो जनाः स्मरवशा जायन्ते इति ॥ इति संध्यावर्णनाधिकारे सर्वविहगविरुतादिवर्णनम् ॥

समुल्ललासाभ्रपथेऽथ संध्यारागो विरागीकृतचक्रचक्रः ।
पञ्चेषुणा विश्वजिगीषुणेयं प्रादायि शोणीव नवोपकार्या ॥ ३५ ॥

अथ संध्यासमयाविर्भावानन्तरमभ्राणां मेघानां पथे मार्गे । नभोङ्गणे इत्यर्थः ।

संध्यारागः। रवेरस्तगमनानन्तरं प्रायो व्योमाङ्गणे दिशि दिशि रक्तिमा प्रादुर्भवति। संध्यासमये जातत्वात्संध्यारागः समुल्ललास सम्यग्दृश्यमानः स्फुरति स्म। किंभूतः। विरागीकृतानि वियोगव्याकुलाङ्गीभवनत्वेन सदुःखानि कृतानि चक्राणां चक्रवाकानां चक्राणि वृन्दानि येन। उत्प्रेक्ष्यते—विश्वानि त्रीणि सप्त चतुर्दश वा एकविंशतिर्वा जगन्ति भुवनानि जिगीषुणा पराभवितुमिच्छुना पञ्चेषुणा मदननृपतिना इयमेषा संध्यारागलक्षणाप्रत्यक्षा शोणी रक्ता नवोपकार्या नवीनपटकुटी प्रादायि दत्ता। 'रचयति रुचिः शोणीमेतां कुमारितरारवैः' इति नैषधे॥

नभोङ्गणे सान्द्रितसांध्यरागैर्बभेऽम्बुधिं शीलति हेलिबिम्बे।
भर्तुर्विधोरागमने प्रणीतै रात्रिस्त्रिया कुङ्कुमहस्तकैः किम्॥ ३६॥

नभोङ्गणे गगनमण्डले सान्द्रत्वं निबिडीभावः संजातोऽस्त्येषु तादृशैः संध्यायां सूर्यास्तसमये भवैः सांध्यरागैः पदे पदे पाटलाभ्रपटलैः बभे शुशुभे। कस्मिन्सति। हेलिबिम्बे मार्तण्डमण्डले अम्बुधिं समुद्रमध्यं शीलति श्रयति सति। उत्प्रेक्ष्यते—विधोश्चन्द्रमसः भर्तुः स्वप्राणवल्लभस्यागमने पादावधारणसमये रात्रिस्त्रिया यामिनीकामिन्या प्रणीतैः प्रदत्तैर्दिग्भित्तिगगनाङ्गणेषु वितीर्णैः कुङ्कुमहस्तकैः घुसृणद्रव्यलिप्तहस्तबिम्बकैः किम्॥

मज्जत्ककुप्कुञ्जरबिन्दुवृन्दारुणीभवद्व्योमसरित्तरङ्गैः।
अभ्रेऽरुणाम्भोजरजोविमिश्रैरदभ्रसंध्याभ्रनिभात्प्रसस्रे॥ ३७॥

मज्जतां सकलवासरतपत्तपनतापसंतापिततनुतया सायं शिशिरतानिर्मितये जलकेलिकरणसमये लीलया सलिलान्तरे ब्रूडतां ककुभामष्टदिशामैरावताद्यष्टदिग्गजानां बिन्दुवृन्दैः शोणमदोदककणगणैः। पञ्चम्यां हि दशायां करीन्द्राणां कपोलपालीभ्यः पाटलाः बिन्दवो निर्गच्छन्तीति शास्त्रे कविसमयः। तथाहि—'भूर्जत्वचः कुञ्जरबिन्दुशोणाः' इति कुमारसंभवे। अरुणीभवद्भिः शोणिमानं प्राप्नुवद्भिः व्योमसरितो गगनगङ्गायास्तरङ्गैः कल्लोलैः अदभ्राणि अनेकानि अभ्राणि संध्यासमयाविर्भवद्दर्दका(ला)नि तेषां निभात्कपटादभ्रे व्योममार्गे प्रसस्रे प्रसृतम्। इति गर्भोत्प्रेक्षा। किंभूतैस्तरङ्गैः। अरुणाम्भोजानि कोकनदानि तेषां रजोभिः पाटलपरागैः विमिश्रैः करम्बितैः॥

आगामुकं कामुकमक्षिलक्ष्यं प्रणीय राजानमनन्तलक्ष्म्या।
अङ्गेऽङ्गरागो घुसृणैः प्रणीतः सांध्योल्लसल्लोहितिमा किमेषः॥३८॥

संध्यासंबन्धी समुल्लसन् स्फुरन् लोहितिमा रक्तिमा। राग इत्यर्थः। भातीत्युक्तिलेशः। उत्प्रेक्ष्यते—एष दृश्यमानः प्रत्यक्षः सांध्यराग एव अनन्तलक्ष्म्या गगनश्रिया अङ्गे स्वतनूलतायां घुसृणैर्द्रवीभवत्कुङ्कुमैरङ्गरागो विलेपनं किं प्रणीतो निर्मित इव। किं कृत्वा। कामुकं स्वकामयितारं स्वस्यां विषये भोगाभिलाषिणमत एव आगामुकमात्मसमीपे समागमनशीलं राजानं चन्द्रं नृपं च अक्षिलक्ष्यं दृग्गोचरं प्रणीय कृत्वा। दृष्ट्वेत्यर्थः॥

निशानने श्रीसुतमत्तकान्तैरत्युत्सवायोत्सुकभावभाग्भिः।
दिग्वारसारङ्गविलोचनाभिः संध्यारुणश्रीरुदगारि रागः॥ ३९॥

दिश एव वारसारङ्गविलोचना वारविलासिन्यः ताभिः संध्यायाः अरुणश्री रक्तिमश्रीः, स एव तद्रूप एव वा। उत्प्रेक्ष्यते—रागः स्वपतिं प्रत्यतिशाय्यनुरागः उदगारि उद्गीर्णः। प्रकटीकृत इत्यर्थः। किंभूताभिः। दिग्वारसारङ्गविलोचनाभिः निशानने यामिनीमुखे एव संध्यात एवारभ्य श्रीसुतेन कन्दर्पेण कृत्वा मत्तैरुन्मदिष्णूभूतैरुन्मादिभिर्मदोद्धुरैः कान्तैः स्वभर्तृभिः दिङ्नायकैः सार्धं रतेः सुरतस्योत्सवाय विविधप्रकारकामक्रीडाविलासार्थमुत्सुक उत्कण्ठितो यो भावश्चित्ताभिप्रायस्तमाशयं भजन्तीति तादृशीभिः॥

स्वर्यौवताङ्घ्रिप्रतिकर्मसज्जप्रसाधिका पाणिपयोरुहेभ्यः।
निपातुकालक्तकपङ्कपङ्क्तिः संध्याभ्रिका व्योम्नि बभूवुषीव॥ ४०॥

स्वर्यौवतानां स्वर्गाङ्गनानामप्सरसां 'स्वःस्वर्गिवध्वप्सरसः' इति हैम्याम्। अङ्घ्रीणां चरणानां प्रतिकर्म प्रसाधनं मण्डनादिकरणम्। 'मण्डनं पुनः प्रसाधनं प्रतिकर्म' इत्यपि हैम्याम्। तत्र प्रसाधने सज्जानां प्रवणानां पङ्क्तिः श्रेणी सैव। उत्प्रेक्ष्यते—व्योम्नि आकाशे संध्याभ्रिका संध्यासमयप्रादुर्भवदभ्रपटली बभूवुषी जातेव॥

अनीदृशीं व्योममणेर्दिनश्रीचूडामणेः प्रेक्ष्य दशां स्वभर्तुः।
दुःखेन ताम्बूलमहायि वक्त्रात्संध्याभ्रदम्भादिव दिग्वधूभिः॥४१॥

दिग्वधूभिर्दिगङ्गनाभिः दुःखेन चित्तोद्भूतातिखेदोदयेन संध्याकालीनाभ्राणां दम्भाद्व्याजात्। उत्प्रेक्ष्यते—वक्त्रान्निजवदनात्ताम्बूलं दशनचर्वितनागवल्लीदलचूर्णमहायि क्षिप्तमिव। किं कृत्वा। दिनश्रिया वासरलक्ष्म्याश्चूडामणेः शिरोमणेर्व्योममणेः सहस्रकिरणस्य अनीदृशीं दुष्टामस्तलक्षणाम्। 'ईदृशीं च कथमाकलयित्री' इति नैषधे। दशामवस्थां प्रेक्ष्य चक्षुर्लक्ष्यीकृत्य। किंभूतस्य भानोः। स्वभर्तुर्निजेश्वरस्य। 'दिशो हरिद्भिर्हरितामिवेश्वरः' इति रघुवंशे। 'हरितामीश्वरः पतिः सूर्यः' इति तद्वृत्तिः॥

पत्यौ गवां क्वापि गतेऽस्य बन्धून्पद्मान्रथाङ्गान्रिपुवत्प्रदोषः।
क्लिश्नाति कोपात्किमतो दिगीशैः संध्याभ्रदम्भादरुणीबभूवे॥४२॥

दिगीशैर्दिक्पालैः। उत्प्रेक्ष्यते—अत एतत्कारणात् उत्पन्नात् प्रकटीभूतात्कोपात्क्रोधात्संध्याभ्राणां दम्भाद्व्याजात्किमरुणीबभूवे रक्तैर्जातम्। कारणं प्रतिपादयति—गवां भूमीनां किरणानां च पत्यौ स्वामिनि भास्करे राजनि च क्वापि कुत्रापि स्थाने गते प्रयाते सति अस्य बन्धून्मित्राणि पद्मान् कमलान्। द्वावपि पुंनपुंसकलिङ्गौ। रथाङ्गांश्चक्रवाकान् संकोचवियोगादिप्रकारै रिपुवद्वैरिवत्प्रदोषो यामिनीमुखं क्लिश्नाति पीडयति। यथा कश्चित्प्रत्यर्थी पृथ्वीनाथे कार्यवैयग्र्यात्क्वचन गते सति तत्स्वजनजनान् संतापयति॥ इति संध्यारागः॥

अभ्रे मनाक्संतमसैः प्रदोषरागान्तरेऽथ प्रकटीबभूवे ।
प्रवालपुञ्जे स्मयमानकृष्णवल्लीप्ररोहैरिव वार्धिमध्ये ॥ ४३ ॥

अथ संध्यारागभवनानन्तरमभ्रे आकाशे प्रदोषो यामिनीमुखं संध्या तस्य यो रागो रक्तिमा तस्यान्तरे मध्ये मनाक् किंचन संतमसैरन्धकारैः प्रकटीबभूवे प्रादुर्भूतम् । कैरिव । स्मयमानकृष्णवल्लीप्ररोहैरिव । यथा वार्धिमध्ये परीवारान्तरालभूमौ प्रवालपुञ्जे विद्रुमकन्दलवृन्दे विस्मेरकृष्णलतानां 'कालीवेल' इति लोकमध्ये प्रसिद्धानामङ्कुरैः प्रकटीभूयते ॥

विभ्राजिसंध्याभ्रपरम्पराभिरलम्भि भूच्छायभरैर्विभूतिः ।
स्मेरारुणाम्भोरुहमण्डलीभिर्भृङ्गैरिवान्तर्मधुपानलीनैः ॥ ४४ ॥

विभ्राजन्त इत्येवंशीलाभिर्विभ्राजिनीभिः शोभनशीलाभिः संध्यारागरक्तीभूताना-मभ्राणां वर्दलिकानां परम्पराभिः श्रेणीभिः कर्त्रीभिर्भूच्छायभरैरन्धकारनिकरैः करणै-र्विभूतिः शोभा अलम्भि संप्राप्ता । काभिरिव । स्मेरारुणाम्भोरुहमण्डलीभिरिव यथा विकचानां कोकनदानां मालिकाभिः अन्तर्विकसितकोशमध्ये मधूनां मकरन्दानां पानार्थमास्वादनकृते लीनैरातृप्तिपानरसान्निश्चलीभूतैर्भृङ्गैर्भ्रमरैः कृत्वा लक्ष्मीः शोभा प्राप्यते ॥

तमोगणालिङ्गिनभोङ्गणश्रीः संध्याभ्ररागच्छुरिता चकासे ।
वृन्दारकैः कुङ्कुमगन्धधूलीद्रवैरिवासिच्यत शक्रमार्गः ॥ ४५ ॥

संध्यासमयोद्भूतानामभ्राणां रागै रक्तिमभिश्छुरिता व्याप्ता । 'चन्दनच्छुरितं वपुः' इति पाण्डवचरित्रे । तमसां तिमिराणां गणेन समुदायेन आलिङ्गिता चुम्बिता कलिता नभोङ्गणश्रीर्गगनतललक्ष्मीश्चकासे शोभते स्म । उत्प्रेक्ष्यते—वृन्दारकैर्देवैः कुङ्कुमैर्घुसृण-रसकलितैर्गन्धधूलीनां जात्यमृगनाभीनां द्रवैः पङ्कैः कृत्वा शक्रमार्गः पुरंदरपदवी गगनमसिच्यत सिक्त इव । 'येनामुना बहुविगाढसुरेश्वराध्व-' इति नैषधे । 'सुरेश्व-राध्वा गगनम्' इति तद्वृत्तिः ॥

सुधान्धसामध्वनि सांध्यरागोल्लासं विलुप्य प्रसृतं तमोभिः ।
मलीमसाः स्वावसरं प्रपद्य परोदयं हन्त कुतः सहन्ते ॥ ४६ ॥

सांध्यरागस्य जगत्स्वभावात्प्रादुर्भवतः संध्यायां दिनादौ दिनान्ते च द्वे सांध्ये भवतः । अत्र चाधिकाराद्दिनान्तसंध्याया एवेति वाच्यम् । यतोऽग्रेतननिशायां शासनदेवता समेष्यती विवक्ष्यते रागो रक्तिमा तस्योल्लासमाविर्भावं प्रसारं वा विलुप्य निराकृत्य निषिध्य सुधामृतमेवान्धो भोजनं येषां ते सुधान्धसो देवाः । 'स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' इति हैमीवचनात् । सुधाशना देवास्तेषामध्वनि मार्गे पथि गगने तमोभिर्भू-च्छायभरैः प्रसृतं विस्तृतम् । जगद्व्याप्तमित्यर्थः । युक्तोऽयमर्थः । मलीमसा मलिनाः

पापा वा स्वस्यात्मनोऽवसरं प्रस्तावं वेलामभ्युदयसमयं वा प्रपद्य प्राप्य । हन्त इति खेदे । परेषामन्येषामात्मव्यतिरिक्तानामुदयमुन्नतिं कुतः सहन्ते । अपि तु नीचस्वभावान्न सहन्ते एव ॥ इति संध्यारागतमिस्रवर्णनम् ॥

पुरारिकंसारिपदप्रसत्तेरजय्यवीर्यं शशिनं निशम्य ।
ध्वान्तोपधेस्तानि निघृक्षयेव तमोभिरभ्रे बहुभिर्बभूवे ॥ ४७ ॥

ध्वान्तानामन्धकाराणामुपधेर्व्याजात् । उत्प्रेक्ष्यते—तमोभिः स्वर्भानुभिरभ्रे आकाशे बहुभिर्घनैर्बभूवे संजातमिव । अनेके विधुंतुदा बभूवुरित्यर्थः । कया । तस्य स्वकवलायमानस्य शशिनो निजिघृक्षया निग्रहीतुमिच्छया निग्रहं कर्तुं काङ्क्षया । किं कृत्वा । पुरनाम्नो दैत्यस्य अरिः शत्रुरीश्वरस्तस्य तथा कंसनामासुरस्य अरिर्द्वेषी तस्य च पदस्य क्रमस्य विष्णुपदस्य प्रसत्तेः प्रसादात्सेवानुभवाज्जेतुमशक्यमजय्यं वीर्यं पराक्रमो यस्य तादृशं शशिनं चन्द्रं निशम्य आकर्ण्य ॥

क्वचिज्जगत्साक्षिणमेक्ष्य यातं जगज्जगज्जीवपिबो जिघत्सुः ।
स्वीयं विभाव्यावसरं स्मरारिर्भूच्छायकायां सृजतीव मायाम् ॥४८॥

जगज्जीवपिबः विश्वप्राणहरः । ईश्वररूपेण संहारकारकत्वात् । 'जीवेऽसुजीवितप्राणाः' इति हैम्याम् । तथा 'क्षये जगज्जीवपिबं शिवं वदन्' इति नैषधे । स्मरारिरीश्वरः स्वीयमात्मीयं तमसोऽभ्युदयत्वात् शिवस्तु तमः प्रगुणः अत एव अवसरं प्रस्तावं समयं विभाव्य विलोक्य ज्ञात्वा वा । उत्प्रेक्ष्यते—जगद्विश्वं जिघत्सुः खादितुमिच्छुः भूच्छायं निबिडतमतमिस्रमेव कायः शरीरं यस्यास्तादृशीं मायाम् । शाम्बरीकपटविद्यामित्यर्थः । सृजतीव करोतीव । किं कृत्वा । जगत्साक्षिणं शुभाशुभकर्मकर्तॄणां जगज्जनानां प्रतिभुवं भास्करं क्वचित्कुत्रापि दृग्गोचरप्रदेशे यातम् एक्ष्य विभाव्य ॥

पशोरिवोर्वीदिवगोचरस्य ध्वान्तस्य भोः पश्यत मन्दिमानम् ।
निहन्यमानोऽपि मुहुः करेण चण्डद्युता धावति रोदसोर्यत् ॥४९॥

भो लोकाः पण्डिताः, यूयं पशोस्तिरश्च इव छागस्येव वा ध्वान्तस्य निशान्धकारस्य मन्दिमानं मूढतां मूर्खतामज्ञानतां पश्यत विलोकयत । 'अथोदयति निर्दोषे सचिवेन्दौ नवे रवेः । कोककोकनदानन्दिमन्दिमानमगान्महः ॥' इति वस्तुपालकीर्तिकौमुद्यां सूर्यास्तमनवर्णने । किंभूतस्य । उर्वीदिवगोचरस्य द्यावाभूमीविषयस्य पशोरपि भूमीपर्वताद्यूर्ध्वस्थाने चरणगोचरो यस्य । यद्यस्मात्कारणात् चण्डद्युता अत्यन्तकोपना कान्तिर्यस्य । कोपारुणीभूतेनेत्यर्थः । तादृशेन पुंसा करेण किरणेन खरेण करेण हस्तेन चपेटादिप्रदायिपाणिना मुहुर्वारंवारं निहन्यमानः ताड्यमानं हस्तपादप्रभृतिप्रहतिभिः व्यापाद्यमानं वधादिभिः सत् रोदसोर्दिवस्पृथिव्योर्धावति पुनः पुनः समायाति । ध्वान्तशब्दः पुंनपुंसकलिङ्गयोः ॥

अङ्काच्च्युताया रभसेन बाल्याल्लीलां सृजन्त्याः स्वपितुर्गभस्तेः ।
जामेर्यमस्येव पयःप्रवाहैर्भृते नभोभूमितले तमोभिः ॥ ९० ॥

तमोभिस्तिमिरैर्नभोभूमितले नभस्तलं भूमीतलं च भृते व्याप्ते बाल्याद्बालस्वभावाल्लीलां क्रीडाम् । 'क्रीडा लीला च नर्म च' इति हैम्याम् । सृजन्त्याः कुर्वन्त्याः स्वस्य जनकस्य पितुर्गभस्तेर्भास्करस्य अङ्कादुत्सङ्गात् रभसेनौत्सुक्येन च्युतायाः पतितायाः यमस्य शमनस्य जामेर्भगिन्या अलभत । शमनस्वसुः शिशुत्वम् 'दिवसकराङ्कतले चला लुण्ठन्ती' इति नैषधे । यमुनायाः पयःप्रवाहैः सलिलौघैरिव व्योममहीमण्डले निर्भरं भृते । कालिन्द्याः कृष्णजलत्वेनेयमुत्प्रेक्षा ॥

रथाङ्गनाम्नां दिवसावसाने वियोगभाजां सममङ्गनाभिः ।
स्फुरद्विषादानलधूमलेखा मन्ये तमिस्रा बहुलीबभूवुः ॥ ९१ ॥

तमिस्रा अन्धकाराणि । तमिस्रशब्दः स्त्रीक्लीबलिङ्गयोः । बहुलीबभूवुः निबिडा नीरन्ध्राः संजायन्ते स्म । तत्राहमेवं मन्ये विचारयामि । दिवसावसाने दिनपर्यन्ते संध्याया एवारभ्य अङ्गनाभिः स्वीयवल्लभाभिः रथाङ्गविहंगमीभिः समं सार्धं वियोगभाजां परस्परविश्लेषकुलितानां रथाङ्गनाम्नां चक्रवाकानां स्फुरन्त्यः प्रकटीभवन्त्यः विषादः खेदः स एवानलो हुताशनः तस्य धूमानां लेखाः श्रेणय इव ॥

गते गवां स्वामिनि नाभ्युदीते राजन्यथाराजकवद्विभाव्य ।
स्वैरप्रचारेण जगत्समग्रमुपाद्रवद्दस्युरिवान्धकारः ॥ ९२ ॥

अन्धकारः स्वैरं स्वेच्छया प्रचारेण द्यावाभूम्योः संचरणेन दस्युरिव प्रत्यर्थीव चौर इव वा समग्रं जगत्सर्वमपि भुवनमुपाद्रवदुपद्रवति स्म । किं कृत्वा । गवां किरणानां पृथिवीनां च स्वामिनि नायके भानौ भूधने च । 'गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे' इति कल्याणमन्दिरस्तवने । क्वापि कुत्रापि गते अस्तमिते परजनपदे प्रयाते मृते वा सति अथ पश्चात् राजनि चन्द्रे पट्टधरनृपे च नाभ्युदीते नोदयं प्राप्ते पट्टे स्थापिते च । अत एवाराजकवन्निःस्वामिकमिव जगद्विभाव्य निरीक्ष्य । 'हा हा महाकष्टमराजकं जगत्' इति मृगयावर्णने धनपालोक्तिः ॥

कियद्विहायः कियती क्षितिर्वा प्रमातुकामस्तमसां समूहः ।
कुतूहलाक्रान्तमना इतीव द्यावापृथिव्योः प्रसरीसरीति ॥ ९३ ॥

तमसामन्धकाराणां समूहो द्यावापृथिव्योर्नभोभूमण्डलयोः प्रसरीसरीति अतिशयेन प्रसरति । उत्प्रेक्ष्यते—विहायो गगनं किंप्रमाणमस्येति कियत् । तथा वा पुनः क्षितिः पृथिवी कियती कियत्प्रमाणा । 'कियती पञ्चसहस्री कियती लक्षा च कोटिरपि कियती । औदार्योन्नतमनसां रत्नवती वसुमती कियती ॥' इति सूक्तोक्तिः । इत्यमुना प्रकारेण

कुतूहलेन कौतुकेनाक्रान्तमाकुलितं व्याप्तं वा मनो यस्य तादृक् सन् प्रमातुकामः प्रमाणीकर्तुमना इव ॥

तेपे तपो भूधरगह्वरान्तस्त्यक्ताशनाम्भः प्रतिवासरं यत् ।
व्योमावनीव्यापकसिद्धिरस्मादलम्भि भूच्छायभरैरिवैषा ॥ ९४ ॥

भूच्छायभरैः संतमसमूहैर्भूधराणां पर्वतानां गह्वराणां गुहानां महाकन्दराणामन्तर्मध्ये अर्थात्स्थित्वा प्रतिवासरं दिवसं दिवसं प्रति त्यक्ते अशनाम्भसी आहारपाने यत्र तादृशं क्रियाविशेषणं वा मुक्तान्नपानं यथा स्यात्तथा तपस्तेपे । नियमविशेषकष्टं तप्तम् । उत्प्रेक्ष्यते—अतोऽस्मादुग्रतपसः एषा प्रत्यक्षलक्ष्या व्योमावन्योर्नभोभूम्योर्व्यापनरूपा सिद्धिः फलनिष्पत्तिर्लब्धिविशेषा अलम्भि लब्धा संप्राप्ता ॥ इत्यन्धकाराविर्भवनम् ॥

अथोददीप्यन्त नभःपदव्यां झगज्झगित्युस्रविमिश्रताराः ।
स्वकान्तमायान्तमवेत्य रात्र्या पुष्पोपचारो व्यरचीव मार्गे ॥ ९५ ॥

अथ तमःप्रसारानन्तरं झगज्झगिति कृद्भिर्देदीप्यमानैरुस्रैः किरणैर्विमिश्राः करम्बितास्तादृशास्तारास्तारका ज्योतिर्मण्डला नभःपदव्यां गगनमार्गे उददीप्यन्त प्रस्फुरन्ति स्म । उत्प्रेक्ष्यते—स्वकान्तं निजवल्लभं रात्रिपतित्वाच्चन्द्रम् । 'रोहिणीद्विजनिशौषधीपतिः' इति हैमीवचनात् । आयान्तमागच्छन्तम् । स्वपार्श्वे इत्यध्याहारः । अवेत्य विज्ञाय रात्र्या चन्द्रपत्न्या । 'उषादोषेन्दुकान्ता' इति हैम्याम् । मार्गे भर्तुरागमनस्याध्वनि पुष्पोपचारः कुसुमप्रकरो व्यरचि विरचित इव ॥

कुक्षिंभरि क्षोणिनभःपदव्योर्दृप्ताहितं संतमसं जिघांसोः ।
ताराः स्वयं राज्ञ इहायियासोः पताकिनीव प्रसृता पुरस्तात् ॥ ९६ ॥

इह जगति गगनाङ्गणे वा स्वयमात्मनायियासोरागन्तुकामस्य राज्ञः रजनीजीवितवल्लभस्य पार्थिवपुंगवस्य च पुरस्तादग्रे तारास्तारकारूपा पताकिनी सेनेव प्रसृता प्रसरति स्म । यत्र राज्ञोऽभिषेणनाभिलाषस्तत्र पुरस्त्वरितमनीकं प्रसरतीति रीतिर्नीतिश्च । राज्ञः किं कर्तुमिच्छोः । क्षोणिनभःपदव्योश्चतुर्दिग[न्त]सागरान्तगगनाम्बरमण्डलयोः कुक्षिंभरि भृतमध्यम् । तथा दृप्तं जगदाक्रम[ण]कारकम् । तथा अहितं प्रतिपक्षम् । 'ध्वान्तस्य रविचन्द्ररत्नदीपकाविपक्षाः' इति काव्यकल्पलतायाम् । संतमसमन्धकारं जिघांसोर्हन्तुमिच्छोः । अन्योऽपि बलवान् भूपतिर्दृप्तं भुवमाक्रामन्तं बलिष्ठं प्रतिपन्थिनं हन्तुमिच्छति ॥

चिरंविनोदैर्दिननायकेनाभिकेन साकं सुरवर्त्मलक्ष्म्या ।
नक्षत्रलक्षात्किमशेषवक्षः श्रमाम्बुभिर्बिन्दुकितं बभूव ॥ ९७ ॥

अभिकेन निजकामुकेन दिननायकेन साकं भानुमता समं चिरं बहुकालं सकलं वासरं यावद्विनोदैर्विविधमानसाभिलषितक्रीडारसैः कृत्वा सुरवर्त्मलक्ष्म्या गगनश्रिया अशेषमखिलं वक्षो हृदयस्थलम् । उत्प्रेक्ष्यते—नक्षत्राणामुडूनाम् इति सामान्योक्तिः । यतो हैम्यामपि सर्वेषां नामानि सामान्येनैवोक्तानि न विशेषात्, यथा—'नक्षत्रं तारका ताराज्योतिषी भमुडुग्रहाः । धिष्ण्यमृक्षम्' इति, तथापि उपलक्षणाद्ग्रहनक्षत्रतारकाणां लक्षात्कपटात् श्रमाम्बुभिः बहुविनोदविधानोद्भूतप्रस्वेदसलिलैर्बिन्दवः संजाता अस्मिन्निति । स्वार्थे कः । बिन्दुकितं जलकणकलितं जातम् । 'स्वेदबिन्दुकितनासिकाशिखं तन्मुखं सुखयति स्म नैषधम्' इति नैषधे । किं बभूव संजातमिव ॥

आगन्तुकस्योदयशृङ्गिशृङ्गास्थानीं तमोद्विड्दमनस्य राज्ञः ।
नभोवितानं किमकारि तारामुक्ताङ्कितं सृष्टिकृतोपरिष्टात् ॥ ९८ ॥

सृष्टिकृता जगत्सर्गविधायकेन विधात्रा राज्ञश्चन्द्रस्य पृथिवीपुरंदरस्य उपरिष्टात् मस्तकोपरितनभागे । उत्प्रेक्ष्यते—तारास्तारका उपलक्षणान्नक्षत्रताराग्रहा एव मुक्ताफलानि तैरङ्कितं विचित्ररचनाचारिमाञ्चितं नभो गगनतलमेव वितानं चन्द्रोदयः किमकारि निर्मितम् । रचितमिव । राज्ञः किंभूतस्य । शृङ्गिणः पर्वतस्य । पूर्वपर्वतस्येत्यर्थः । शृङ्गं शिखरं तदेवास्थानीमुपवेशनसभामागन्तुकस्य आगमनशीलस्य । पुनः किंभूतस्य । तमांस्येव द्विषन्तः शत्रवस्तेषां दमनस्यान्तकारकस्य । 'अप्यन्तकारिदमनदर्पच्छिन्मथनादयः' इति हैम्याम् ॥

नभोगसारङ्गदृशां रतीशराभस्यवश्यप्रियखेलिनीनाम् ।
वक्षःस्थहारच्युतमुक्तिकाभिर्नभःस्थली तारकिता किमासीत् ॥ ९९ ॥

रतीशराभस्येन तारुण्यवयस्त्वेन यन्मदनौत्सुक्यं यौवनोन्मादेन मदनात्युत्कण्ठाभाक्त्वेन वश्या स्वायत्तीभूता ये प्रिया वल्लभास्तैः समं स्मरमते वात्स्यायनोक्तविविधविनोदैः खेलन्ति क्रीडन्तीत्येवंशीलास्तादृशीनाम् । 'भीमं कृत्वाङ्कखेलनम्' इति पाण्डवचरित्रे । नभसि आकाशे गच्छन्तीति नभोगा देवास्तेषां सारङ्गदृशो मृगलोचनाः स्त्रियो देव्यस्तासां वक्षःसु हृदयस्थलेषु तिष्ठन्तीति वक्षःस्थास्तादृशा हारा मुक्ताकलापास्तेभ्यश्च्युतास्त्रुटित्वा पतिता मुक्तिका मुक्ता एव मुक्तिका मुक्ताफलानि ताभिः कृत्वा । उत्प्रेक्ष्यते—नभःस्थली गगनमण्डली तारकिता तारकाः संजाता अस्यामिति तादृशी तारककलिता किमासीत् बभूवुषीव । 'नक्षत्रभूः क्षत्रकुलप्रसूतेर्युक्तो न भोगैः खलु भोगभाजः' इति चम्पूकथायां नलस्य मेरोरप्याधिक्यवर्णनम् । 'न भोगैः राज्यादिसुखैर्न युक्तः । पक्षे नभोगैर्देवैः सहितः' इति तट्टिप्पनके ॥

स्वर्दण्डदण्डं दधता तमिस्रवासो वसानेन सितेतरश्रि ।
कपालमालेव धृता विहायःकपालिना वक्षसि तारतारा ॥ ६० ॥

विहायःकपालिना नभोनाम्ना योगिना वक्षसि स्वहृदयस्थले तारा उज्ज्वला केशचर्मरहितत्वेन केवलं तुम्बिकात्वेन च धवला तारा ज्योतिश्चक्रं च तद्रूपा । उत्प्रेक्ष्यते—कपालमाला निर्नाथद्रमकमनुजमुण्डली च 'तुम्बिली' इति लोकप्रसिद्धा धृतेव कलितेव । कपालिना कपालधारणं युक्तिमदेव । यतः कपालानि विकचत्वङ्नृमुण्डानि मालात्वेन सन्त्यस्येति कपाली । किं कुर्वता । स्वर्दण्डो लोके 'स्वर्दण्डउ' अथ वा पितृपथः इति प्रसिद्धः । गगनान्तराले भ्रमन् किंचित् श्वेतवर्णो दण्डाकारेण दृश्यमानो मार्गाकारेण वा स दण्डो यष्टिस्तं दधता बिभ्रता । पुनः किं कुर्वाणेन । सितादुज्ज्वलवर्णादितरा कृष्णवर्णा श्रीः शोभा यस्य तादृक् तमिस्रं ध्वान्तं तदेव वासो वसनं वसानेन परिदधानेन । 'गुणिप्रायाणि वस्त्राणि भूषणानि तव प्रभो । वसानश्च दधानश्च सत्कविर्द्वारि तिष्ठति ॥' इति भोजप्रबन्धे ॥

तथा तवाप्यस्तु यथा त्रियामे निष्कास्यतेऽहं गलहस्तयित्वा ।
शपन्निवीवाक्षिपदृक्षलक्षाक्षतानहर्योग्यभिमन्त्र्य गच्छन् ॥ ६१ ॥

गच्छन् परद्वीपं प्रति व्रजन्नहर्दिनमेव योगी त्रियामां प्रत्यक्षिपत्क्षिपति स्म । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण सिद्धविद्यामन्त्रतन्त्रोपयोगवान् अभिमन्त्र्य मन्त्रेण स्थानभ्रंशादिकारकया विद्यया मन्त्रयित्वा जापं दत्त्वा ऋक्षाणां तारकादिज्योतिषां लक्षात्कपटात् लाजानक्षततण्डुलान्वा त्रियामां प्रत्यक्षिपत्क्षिपति स्म । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण त्रियामामात्मप्रवासदायिनीं वैरिणीं चन्द्ररमणीं शपन् शापं ददान इव । इति किम् । हे त्रियामे इति संबोधनम् । शात्रवत्वेन चतुर्यामाया अपि त्रियामेति कथनं क्षयकृत्सूचकम् । यथाहं त्वया गलहस्तयित्वा गलेहस्तं 'गलोघो' इति प्रसिद्धः, चपेटां वा दत्त्वा निष्कास्यते[1] लोकमध्यात् रोदःकन्दरमन्दिराद्वा कर्ष्यते तथा तेनैव प्रकारेण गलहस्तचपेटादिप्रदानादिना तवापि भवत्या अपि निष्कासनमस्तु स्तोकवेलयैव भवतात् ॥

प्रस्थातुकामेन तमो जिघांसोर्जयाय पूर्वावनिभृद्गतेन ।
अक्षेपि राज्ञा दशदिक्षु मन्ये शान्त्यै बलिस्तारकतन्दुलालीः ॥ ६२ ॥

पूर्वावनिभृद्गतेन उदयाचलरूपराजधानीस्थायुकेन पूर्वाद्रौ स्थितेन वा । राज्ञा चन्द्रेण जिष्णुजगतीभुजा च । उत्प्रेक्ष्यते—शान्त्यै निर्विघ्नतानिर्माणकृते दिक्षु सर्वदिशां प्रदेशेषु तारकाणामेव ज्योतिषामेव तन्दुलानां निस्तुषीकृताक्षतकलमानां माला श्रेणी । तद्रूप इत्यर्थः । बलिः देवदानवादीनां गगनादिदिक्षु क्षेपणीयसिद्धान्नादिवस्तुजातमक्षेपि क्षिप्त इव । राज्ञा किं कर्तुकामेन । तमसां तमसो वा अन्धकारस्य विधुंतुदस्य वा जिघांसोर्निजप्रत्यनीकस्य जयाय वशीकरणार्थं भूयः पराभवनार्थं वा प्रस्थातुकामेन प्रचलितुमनसा ॥

---

१. 'निष्कास्यते' इति प्रथमपुरुषप्रयोगश्चिन्त्यः, 'अहम्' इति कर्मणा समानाधिकरण्यात्. 'अहंयुः' इत्यत्रेवाहमो विभक्तिप्रतिरूपकत्वेन वा समाधेयम्.

कान्ते निमग्नेऽम्बुनिधौ प्रणश्य दिनश्रियोऽत्राणतया प्रयान्त्याः।
आच्छिद्य मुक्ताभरणानि तारा द्विषत्तयेवाददिरे रजन्या ॥ ६३ ॥

अत्राणतया अरक्षकत्वेन अशरणभावेन वा प्रणश्य जीवनाशं नष्ट्वा प्रयान्त्याः क्वचिद्गुप्तस्थाने गच्छन्त्या दिनश्रियो दिवसलक्ष्म्यास्तारा एव ज्योतीरूपाणि वा मुक्ताभरणानि मुक्ताफलमयानि भूषणानि द्विषत्तया वैरिभावेन रजन्या रात्र्या आच्छिद्य हठाद्बलं कृत्वा आददिरे उद्दाल्य गृहीतानीव। कस्मिन्सति। कान्ते अर्थाद्दिनश्रिया भर्तरि भास्करे अम्बुनिधौ समुद्रपयःप्लवे निमग्ने ब्रूडिते सति ॥

स्वःकूलिनीकूलविलासिनीनां प्रदोषविश्लेषिविहंगमीनाम्।
विलोचनोद्भूतपयःपृषद्भिः किमम्बरं तारकितं पतद्भिः ॥ ६४ ॥

स्वःकूलिन्या गगनगङ्गायाः कूले तटे विलसन्ति। 'लस श्लेषणक्रीडनयोः' इति धात्वर्थत्वेन आश्लिष्याश्रित्य तिष्ठन्ति स्वैरं भर्त्रा वा क्रीडन्तीति वा। इत्येवंशीलास्तादृशीनाम्। तथा प्रदोषे दोषामुखे विश्लेषो निजप्रियेण समं वियोगोऽस्त्यासां तासां विहंगमीनां पक्षिणीनाम्। अर्थाच्चक्रवाकीनाम्। 'विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः' इति रघुवंशे। 'दिवसावसाने निश्चयेन वियोगयोः विहगयोश्चक्रवाकीचक्रवाकयोः कृपयेव' इति तद्वृत्तिः। 'पुमान् स्त्रिया,' 'स्त्रिया सहोक्तौ पुमान् शिष्यते न तु स्त्री' इति केवलविहगशब्दः। तथा 'निजपरिवृढं गाढप्रेमा रथाङ्गविहंगमी' इति नैषधे विहंगमीशब्दः। 'स्वर्गिगङ्गारथाङ्गः' इति काव्यकल्पलतायाम्। विलोचनेभ्यः नेत्रेभ्य उद्भूतानां वियोगातिदुःखोदयादाविर्भूतानाम्। नेत्रनिःसृतानामित्यर्थः। पयसामश्रुजलानां पृषद्भिर्बिन्दुभिः। 'बिन्दौ पृषत्पृषतविप्रुषः' इति हैम्याम्। उत्प्रेक्ष्यते—पतद्भिः क्षरद्भिः अर्थात् गगनाङ्गणमागत्य तिष्ठद्भिः सद्भिः अम्बरमाकाशं तारकितं तारकाः संजाता अस्मिन्निति तादृशं तारककलापकलितं किं जातं बभूवेव ॥

स्वां निष्ठितां प्रेक्ष्य सुधां सुधांशैः पुनः कृतेऽस्या इव मथ्यमानात्।
सुधाम्बुधेर्व्योम्नि समुच्छलद्भिरम्भःकणैस्तारभरैर्बभूवे ॥ ६५ ॥

सुधाम्बुधेः क्षीरसमुद्रात्सुधाया उत्पत्तिस्थानत्वात्कविसमये प्रसिद्धत्वाच्च सुधाम्बुधिः। तथा 'सुधाम्भोनिधिडिण्डीरपिण्डपाण्डुयशःकुशेशयखण्डमण्डितसकलसंसारसराः' इति चम्पूकथायाम्। व्योम्नि पवमानपदव्यामुच्छलद्भिरूर्ध्वं गच्छद्भिरम्भःकणैर्जलबिन्दुभिः। उत्प्रेक्ष्यते—तारभरैर्ज्योतिर्व्रातैर्बभूवे संजातम्। सुधाम्भोधेः किं क्रियमाणात्। स्वां स्वकीयां नारायणमथनसमयसमुद्भूतां प्राचीनां सुधां पीयूषं निष्ठितां व्ययितां भुक्त्वा पीत्वा सर्वामपि क्षयं नीतां प्रेक्ष्य दृष्ट्वा पुनर्व्याघुट्य अस्याः सुधायाः कृते अर्थाय। तर्हि तेऽन्यमप्याहारं कथं न कुर्वन्तीत्यत आह—यतस्ते केवलं सुधाममृतमेवाश्नन्तीति सुधाशा देवास्तैर्मथ्यमानात् विलोड्यमानात् ॥ इति तारकाणामुदयः ॥

अथो दधे चण्डकरे प्रयाते प्राच्या मुखे किंचन पाण्डिमश्रीः।
स्मितं प्रमोदादिव सौम्यराजोदयं प्रकृत्येव दिशां समीक्ष्य ॥ ६६ ॥

अथो संध्यारागान्धकारतारकाभ्युदयानन्तरं चण्डकरे उग्रदण्डे नृपे सूर्ये प्रयाते अस्तमिते सति प्राच्या पूर्वदिशा किंचन किमपि मुखे स्ववदने पाण्डिमश्रीरुज्ज्वलतायाः शोभा दधे धृता। प्राच्यां दिशि धवलिमा प्रादुर्भवति स्म। उत्प्रेक्ष्यते—सौम्यराजोदयं सोमतासंयुक्तस्य राज्ञश्चन्द्रस्य भूवल्लभस्य च उदयमुद्गमनं पैतृकपदप्राप्तिलक्षणाभ्युदयं समीक्ष्य विलोक्य प्रकृत्येव प्रजयेव नगरलोकेनेव। 'राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च' इति हैम्याम्। दिशा पूर्वहरिता प्रमोदात्स्वाभिमतराजप्राप्तिजनितहर्षाविर्भावात्स्मितं हसितमिव ॥

संसृज्य रज्यद्दयितेन पत्नी हरेर्हरित्तारविभूषणश्रीः।
गर्भं वहन्ती मिहिकामयूखं मुखेऽपुषत्पाण्डुरिमाणमूहे ॥ ६७ ॥

हरेरिन्द्रस्य पत्नी कान्ता हरित् दिक् एतावता पूर्वदिक् मुखे निजास्ये पाण्डुरिमाणं धवलतामपुषत् पुपोष अतीव पाण्डुरवदना संजातवती। 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति नैषधे। तत्राहमेवमूहे तर्कयामि। 'ऊह वितर्के' इत्ययं धातुः। मिहिकामयूखं हिमकरं चन्द्रं तमेव गर्भं भ्रूणं दोहदलक्षणं वहन्ती सती दधानेव। किं कृत्वा। रज्यता अनुरक्तीभवता। 'रज्यन्नखस्याङ्गुलिपञ्चकस्य' इति नैषधे। दयितेन प्राणप्रियेण पुरंदरेण साकं समं संसृज्य सङ्गं कृत्वा। 'निर्वापयिष्यन्निव संसिसृक्षोः' इति नैषधे। 'सङ्गं कर्तुमिच्छोः' इति तद्वृत्तिः। किंभूता हरित्। ताराणां निर्मलमौक्तिकानाम्। 'तारो निर्मलमौक्तिके' इत्यनेकार्थः। ताराणां राजतीयानां वा ताराणां शुभ्राणां वा तारकरूपाणां वा विभूषणानामाभरणानां श्रीः शोभा यस्याः। 'प्रथममुपहृत्यार्थं तारैरखण्डिततन्दुलैः' इति नैषधे। तारकवाची तारशब्दः। अपरस्तद्वत्। अपरापि युवती राज्यं निजवल्लभेन समं संगमनाद्गुर्विणी सती स्ववदने विशदिमानं दधातीति रीतिः स्थितिश्च ॥

आकण्ठमम्भःसु निमज्य काममन्त्रोऽलिशब्दैः कुमुदैरसाधि।
विकाशलक्ष्मीं ददती किमेषा तत्सिद्धिरिन्दुद्युतिराविरासीत् ॥ ६८ ॥

कुमुदैः कैरवैश्चन्द्रविकाशिकमलैः आकण्ठं गलकन्दलं मर्यादीकृत्य अम्भःसु पानीयेषु निमज्य ब्रूडित्वा अलिशब्दैर्मधुकरमधुरगुञ्जारवैः कृत्वा काममन्त्रो मानसमनीषितप्रदायिका विद्या असाधि साधित आराद्धः। उत्प्रेक्ष्यते—एषा प्रत्यक्षलक्ष्या इन्दुद्युतिश्चन्द्रचन्द्रिकारूपा तत्साधकस्याभीष्टविधायकमन्त्रस्य सिद्धिः फलनिष्पत्तिराविरासीत्किमु प्रकटीभूतेव। तत्सिद्धिः किं कुर्वती। एषां कुमुदानां विकाशलक्ष्मीं स्मेरताश्रियं विश्राणयन्ती ॥

सान्द्रद्रुमोल्लासिनि पूर्वशैलशृङ्गाङ्गणे चञ्चति चन्द्रलेखा ।
किंचिन्निरीक्ष्या हरिदिङ्मृगाक्ष्याश्चूडामणिः किं चिकुरान्तरस्था ॥ ६९ ॥

सान्द्रविनिद्रदल(निबिडदल)मण्डलकलितान्तरालसच्छायपादपपटलोल्लसनशीले पूर्वशैलस्य उदयाचलस्य शृङ्गाङ्गणे शिखराजिरे उपरितनभूविभागे किंचिन्निरीक्ष्या स्वल्पतरचक्षुर्लक्ष्या चन्द्रलेखा शशिकला चञ्चति संशोभते । 'चञ्चति चकास्ति लसत्यपि शोभते' इति क्रियाकलापे । उत्प्रेक्ष्यते—हरेः पुरंदरस्य दिक् पूर्वाशा सैव मृगाक्षी हरिणेक्षणा वधूस्तस्याः चिकुराः केशपाशास्तेषामन्तरे मध्ये तिष्ठतीति चिकुरान्तरस्था निबिडघनकेशकलापत्वेन किंचिन्मनाक् निरीक्ष्या दृग्गोचरा चूडामणिः किमु शिरोरत्नमिव । मणिशब्दः पुंस्त्रीलिङ्गयोरपि । यथा 'प्रश्निस्तिथ्यशनीमणिः सृणिः' इति लिङ्गानुशासने । तथा ह्रस्वो दीर्घोऽपि । अथ वा चूडामणिर्मस्तकाभरणविशेषः । सौराष्ट्रगुर्जरेषु तु 'वाक' इति लोकोक्त्या तत्र पुंलिङ्ग एवावधार्यते ॥

दत्त्वाधिपत्यं निखिलाचलानां स्वदिग्गिरेः स्वर्गिगिरिचक्रिणेव ।
मौलिस्थले राजतपट्टबन्धो विनिर्मितः स्फूर्जति सामिसोमः ॥ ७० ॥

सामिसोमः अर्धविधुः स्फूर्जति स्फूर्तिमियर्ति । दीप्यते इत्यर्थः । 'पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि' इति नैषधे । 'सामिघटिता अर्धनिष्पादिता' इति तद्वृत्तिः । उत्प्रेक्ष्यते—स्वर्गिगिरिचक्रिणा काञ्चनाचलचक्रवर्तिना शक्रेण । 'जाम्बूनदोर्वीधरसार्वभौम' इति नैषधे इन्द्राभिधानम् । स्वदिग्गिरेरात्मीयाशाशैलस्य उदयाभिधानस्य भूधरस्य निखिलाचलानां सकलभूमण्डलवर्तिपर्वतानामाधिपत्यमैश्वर्यं राज्यं दत्त्वा मौलिस्थले शिरोमण्डले राजतो राजतस्यायं रूप्यसंबन्धी पट्टबन्धो विनिर्मितः कृत इव बद्ध इव ॥

सुरेन्द्रदिग्भूधरमूर्ध्नि बिम्बमपूर्णमाभासत शीतभासः ।
खण्डं शिखायामिव सैंहिकेयदंष्ट्रान्तरायन्त्रणतोऽजनिष्ट ॥ ७१ ॥

सुरेन्द्रस्य निर्जरनायकस्य दिक् पूर्वाशा तस्या भूधर उदयपर्वतः तस्य मूर्ध्नि मस्तके शिखरे शीतभासश्चन्द्रस्य अपूर्णं किंचिन्न्यूनं किमपूर्णनिर्गमनात्खण्डं बिम्बमण्डलमाभासत राजते स्म । उत्प्रेक्ष्यते—सैंहिकेयस्य सिंहिकासुतस्य स्वर्भानोर्दंष्ट्राणां दाढानामन्तरा मध्ये यन्त्रणतः पीडनतः निर्गमनतः शिखायामग्रभागे खण्डं शकलमिवाजनिष्ट संजातमिव ॥

संपूर्णपीयूषमयूखबिम्बं बभौ ततः स्वीयदिगङ्गनायै ।
मरन्दलीनालिपुरंदरेण समर्प्यते स्म स्मितपुण्डरीकम् ॥ ७२ ॥

ततोऽनन्तरं संपूर्णमखण्डं पीयूषमयूखस्य चन्द्रस्य बिम्बं मण्डलं बभौ भासते स्म । उत्प्रेक्ष्यते—पुरंदरेण इन्द्रेण स्वीयायै आत्मीयायै दिगङ्गनायै हरित्कान्तायै निजपूर्व-

दिक्पद्मनयनायै मरन्दार्थं मकरन्दपानकृते लीना अन्तर्निश्चलीभूता अलयो भ्रमरा यत्र तादृक् स्मितपुण्डरीकं विस्मेरश्वेतकमलं किं समर्प्यते स्म विश्राणितं दत्तमिव ॥

पितामहस्य व्रतिराट्चरित्रैश्चित्रीयमाणस्य विधूतमौलेः ।
कमण्डलुश्चान्द्र इवोत्पलाङ्कः स्रस्तः शयादुल्लसति स्म सोमः ॥ ७३ ॥

सोमश्चन्द्र उल्लसति स्म उल्लासं दशदिक्षु ज्योतिःप्रसारमातनुते स्म शोभते स्म वा । कवेरपरवर्णनराभस्येन मा ग्रन्थनायको विस्मृतोऽभूदिति । तमेव स्मारयति इति सर्वत्रापि योजनीयम् । उत्प्रेक्ष्यते—व्रतिराजः श्रीहीरविजयसूरिपुरंदरस्य चरित्रैः सर्वातिशायिभिरवदातैश्चित्रीयमाणस्य अनन्यसामान्यविस्मयरसं दधानस्य अत एव विस्मयातिरेकाद्विधूतः कम्पितो मौलिर्मस्तकं येन तादृशस्य पितामहस्य वृद्धस्य विधातुः शयात्पाणिपद्मात्स्रस्तः कथंचित्पतितः अत्याश्चर्यरसवशाच्चित्तवैयग्र्येण पाणिपङ्कजाद्गलितः । तथा उत्पलाङ्कः कुवलयकलितं तथा चान्द्रश्चन्द्रकान्तमणिमयः कमण्डलुरिव कुण्डिकाख्यं जलपानपात्रमिव । 'कुण्डिका तु कमण्डलुः' इति हैम्याम् ॥

पीयूषपूर्णः कलधौतक्लृप्तोऽभिषेककुम्भः किमु कौमुदीशः ।
शृङ्गारयोनिं जगदाधिपत्येऽभिषिञ्चता विश्वकृता व्यधायि ॥ ७४ ॥

शृङ्गारयोनिं श्रीनन्दनम् । 'मनःशृङ्गारसंकल्पात्मनो योनिः' इति हैम्यां स्मरनामसु । जगदाधिपत्ये सर्वेषां भुवनानां राज्ये नक्तं स्मरस्यैश्वर्यादभिषिञ्चता अभिषेकं कुर्वाणेन विश्वकृता जगत्सृष्टिकारकेण विधिना । उत्प्रेक्ष्यते—कौमुदीशः चन्द्रिकापतिः शीतकान्तिरूपः पीयूषेणामृतरसेन पूर्णो भरितः । तथा कलधौतै रजतैः क्लृप्तो विनिर्मितो घटितः अभिषेककुम्भः अभिषेककरणकृते कलशः किमु व्यधायि विनिर्मित इव ॥

क्षयात्सुधायाश्चिरकालपानात्तां याचमानाननुगृह्य देवान् ।
सुधारुचिर्विश्वसृजा सुधाया अक्षीणकुम्भः किमु कल्प्यते स्म ॥ ७५ ॥

विश्वसृजा त्रिभुवनसर्वसृष्टिविधायिना वेधसा सुधारुचिश्चन्द्रः । उत्प्रेक्ष्यते—सुधाया अमृतरसस्य न कदाचिदपि क्षीयत इत्यक्षीणः अक्षयकुम्भश्चन्द्रकान्तमणिमयः कलशः किमु कल्प्यते स्म विनिर्मितो घटित इव । किं कृत्वा । चिरकालं बहुसमयं यावत्पानाद्गीतेः सुधायाः पूर्वपीयूषस्य क्षयान्नाशात् तां पुनः सुधां याचमानानभ्यर्थयमानान्मार्गयतो देवाननुगृह्य सर्वेषां सुराणामुपरि पीयूषपायित्वेन अनुग्रहं कृत्वा ॥

प्राग्दिङ्मृगाक्ष्या प्रणयेन पत्यौ समीयुषि स्वावसथं सुरेन्द्रे ।
उद्बोधितो भेत्तुमिवान्धकारं निशीथिनीनायकदीप्रदीपः ॥ ७६ ॥

प्राग्दिङ्मृगाक्ष्या पूर्वहरिन्नामहरिणनयनया रात्रित्वादन्धकारं भेत्तुं निराकर्तुम् । उत्प्रेक्ष्यते—निशीथिनीनायकः शर्वरीवरयिता चन्द्र एव दीप्रो दीपनशीलः प्रसरज्ज्योतिर्ज्वालजटिलो दीपो मन्दिरमणिरुद्बोधितः प्रकटीकृत इव । कस्मिन्सति । प्रणयेन

प्रेम्णा याचनया वा । 'प्रणयः प्रेमयाच्ञयोः । विस्रम्भे प्रसरे चापि' इत्यनेकार्थः । स्वावसथं निजनिकेतनं समीयुषि सम्यग्भोगागकलिते संप्राप्ते पत्यौ भर्तरि सुरेन्द्रे निर्जरनायके सति । अथ वा शक्रे स्नेहेन स्वगृहे समागते सति ॥ इति चन्द्रोदयः ॥

पूर्वाद्रिमौलेरथ मन्दमन्दं प्रचक्रमे गन्तुमचण्डरोचिः ।
निजोदयश्रीनवनृत्तसूत्रधारापराद्रिं मिलितुं किमुत्कः ॥ ७७ ॥

अथाभ्युदयानन्तरं न विद्यन्ते चण्डानि तीक्ष्णानि रोचींषि यस्य सः अचण्डरोचिः शीतकान्तिश्चन्द्रः पूर्वाद्रिमौलेरुदयाचलचूलातः मन्दमन्दं शनैःशनैः । 'गगनमवजगाहे मन्दमन्दं मृगाङ्कः' इति चम्पूकथायाम् । तथा—'मन्दं मन्दं नुदति पवनश्चातकस्तोयगृध्नुः' इति मेघदूतेऽपि दृश्यते । गन्तुं प्रचलितुं प्रचक्रमे प्रारब्धवान् । 'प्रचक्रमे वक्तुमनुक्रमज्ञा सविस्तरं वाक्यमिदं सुनन्दा' इति रघुवंशे । उत्प्रेक्ष्यते—निजस्यात्मनः उदयश्रिया अभ्युद्गमनलक्ष्म्या नवं नवीनं यन्नृत्तं ताण्डवं नाटकं तत्र तस्य वा सूत्रधारं नृत्यकलाचार्यम् । नाटकप्रारम्भकमित्यर्थः । तादृशमपराद्रिं पश्चिमाचलम् । अस्ताद्रिमित्यर्थः । मिलितुमुत्कः किमु उत्कण्ठित इव । चन्द्रस्य हि प्रतिपद्द्वितीययोः पश्चिमाचलादेवाभ्युदयः । तस्मादस्ताचल एव चन्द्रस्योदयाचलः । 'उदयगिरिकुरङ्गीश्रृङ्गकण्डूयनेन स्वपिति सुखमिदानीमन्तरोदोःकुरङ्गः' । पुनः 'परिणतरविगर्भव्याकुला पौरहूती दिगपि घनकपोतीहुंकृते क्रन्थतीव' इत्युदयनाचार्यकालिदासकवीन्द्रयोः प्रातर्वर्णने पृथक्पृथक् पदद्वये ॥

स्वर्भाणुभीतेः शरणीकृतेन प्राचीधवेनायमुपेक्षितः सन् ।
त्रस्यञ्छशाङ्कः किमु पश्चिमाशापतेः शरण्यस्य समेत्युपान्ते ॥ ७८ ॥

त्रस्यन् रिपोः सकाशात्त्रासमाकस्मिकं भयं संप्राप्नुवन् अयं गगनावगाही शशाङ्कश्चन्द्रः । उत्प्रेक्ष्यते—शरण्यस्य शरणागतवत्सलस्य पश्चिमाशापतेः पश्चिमदिक्पालकस्य वरुणस्योपान्ते समीपे किमु समेति समागच्छतीव । किंभूतः सन् । स्वर्भाणुभीतेः निजस्यात्यन्तप्रत्यर्थितया गिलनशीलस्य विधुंतुदस्य भीतेर्भयात् शरणीकृतेन आगत्याश्रितेन प्राचीधवेन पूर्वदिक्पतिना वज्रपाणिनाप्युपेक्षितः अकृतममत्वः सन् न स्वशरणे रक्षित इत्यर्थः ॥

प्राचीपयोराशिपयःप्लवान्तर्विलासमाधाय मरालबालः ।
क्रीडां चिकीर्षुः किमु पश्चिमाब्धौ नभोध्वनासौ प्रचचाल चन्द्रः ७९

असौ प्रत्यक्षलक्ष्यः वर्णनगोचरीकर्तुमारब्धो वा चन्द्रः श्वेतकान्तिर्नभोध्वना गगनमार्गेण प्रचचाल चलति स्म । उत्प्रेक्ष्यते—पश्चिमाब्धौ प्रतीचीसमुद्रनीरपूरे क्रीडां जलकेलिविलासं चिकीर्षुः कर्तुमिच्छुर्मरालबालः शिशुकलहंसः किमु प्रचलति । किं कृत्वा । प्राचीपयोराशेः पूर्वसमुद्रस्य पयःप्लवान्तः पानीयपूरमध्ये विलासं मज्जनोन्मज्जन-

तरणतामरसबिसास्वादनादिकां क्रीडामाधाय कृत्वा । समुद्रे हंसानां सद्भावो दृश्यते । यदुक्तम्—'हंसान्सहेत(?) पद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः' इति स्नातस्य स्तुतौ ॥

संचारि निर्दण्डमिवातपत्रं विहस्तको वा चलदात्मदर्शः ।
क्रीडातडागः किमु जङ्गमो वा स्मरावनीन्दोः शशभृद्बभासे ॥ ८० ॥

शशभृच्चन्द्रो बभासे राजते स्म । उत्प्रेक्ष्यते—स्मरावनीन्दोः मेदिनीकुमुदसुहृदः कामराजस्य संचारि दिव्यानुभावेन स्वयं संचरणशीलं तथा निर्गतो दण्डो यस्मात्तन्निर्दण्डमवष्टम्भयष्ट्या रहितमातपत्रं सितातपवारणमिव वाथ वा । पुनरुत्प्रेक्ष्यते—स्मरनरपतेर्विहस्तको हस्तग्रहणोचितस्थाणुनिर्मुक्तः चलन् स्वयमेव प्रतिष्ठमान आत्मदर्शः दर्पण इव वा । पुनरुत्प्रेक्ष्यते—कन्दर्पपार्थिवस्य जङ्गमः कथंचन देवतानुभावाद्भ्रमणरसिकक्रीडातडाको लीलासरोवरमिव ॥ इति चन्द्रमण्डलसंचारः ॥

भीतेः स्विकाया दिवसस्य लक्ष्मीं विज्ञाय नष्टामिह जीवनाशम् ।
विद्मो वसत्या हसितं हसन्त्या ज्योत्स्ना जजृम्भे गगने सुधांशोः॥८१॥

सुधांशोश्चन्द्रस्य मनागित्यध्याहार्यं ततः किंचित् ज्योत्स्ना चन्द्रिका जजृम्भे प्रकटीभूता विस्तृता वा । इहात्र ज्योत्स्नाविजृम्भणे वयमेवं विद्मो जानीमः । विचारयाम इत्यर्थः । इह जीवलोके स्विकायाः स्वस्या रात्र्याः सकाशात् । 'हंसं तनौ संनिहितं वरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम्' इति नैषधे । भीतेर्भयाज्जीवनाशं नष्टां जीवं गृहीत्वा प्रपलाय्य गतां दिवसस्य वासरस्य लक्ष्मीं श्रियं विज्ञाय ज्ञात्वा अवधार्य हसन्त्याः स्वोत्कर्षेण हास्यं सृजन्त्यावसत्या निशाया हसितं स्मितं हास्यमिव ॥

अम्बरे विरुरुचे सुधारुचेश्चन्द्रचञ्चुरमरीचिसंचयः ।
दुग्धवारिनिधिरात्मजं विधुं किं चिराय मिलितुं समीयिवान् ॥८२॥

अम्बरे आकाशमण्डले सुधारुचेरमृतकिरणस्य चन्द्रस्य चन्द्रवत्कर्पूर इव चञ्चुरो मनोज्ञः । धवल इत्यर्थः । 'चन्द्रोऽम्बुकाम्ययोः । स्वर्णे सुधांशौ कर्पूरे कम्पिल्ले मेचकेऽपि च॥' इत्यनेकार्थः । मरीचीनां कान्तीनां संचयो निकरो विरुरुचे विरोचते स्म शुशुभे । 'विरुरुचे-···ष्ठितभूमिषु' इति रघुवंशे । उत्प्रेक्ष्यते—दुग्धवारिनिधिः क्षीरसमुद्रः आत्मजं नन्दनं दुग्धाम्भोनिधावुत्पन्नत्वेन विधुं सुधादीधितिं चिराय बहोः कालात् । 'चिराय चिररात्राय चिरस्य च चिराच्चिरम्' इति हैम्यामव्ययाधिकारे । मिलितुं पुत्रस्नेहेन मिलनार्थं समीयिवान्किं समागत इव ॥ गगने चन्द्रगोलिकाङ्कः ॥

स्वर्गं गता क्रतुभुजां प्रभवामि तृप्त्यै
तद्वन्नृणामपि धरामधिगत्य नित्यम् ।
पीयूषसंततिरितीव विचिन्तयन्ती
ज्योत्स्नातनूरवततार तलेऽचलायाः ॥ ८३ ॥

ज्योत्स्नातनूश्चन्द्रिकाकाया पीयूषसंततिरमृतराजी। उत्प्रेक्ष्यते—इति विचिन्तयन्ती सती अचलायास्तले मण्डले अवततार उत्तीर्णेव। इति किम्। यथेत्यध्याहारः। यथाहं स्वर्गं देवलोकं गता संप्राप्ता सती क्रतुभुजां यज्ञांशभोजिनां देवानां तृप्त्यै सौहित्याय बुभुक्षोपशमाय प्रभवामि समर्थी स्यां तद्वत्तथा धरामधिगत्य पृथिवीं संप्राप्य मनुष्याणामप्यन्नाशनानां नित्यं सदा तृप्तिकृते समर्थीभवामि॥

प्रससार महीविहायसोर्मिहिकादीधितिदीधितिव्रजः।
युवतेरिव शीतदीधितेरुपसंव्यानममेचकद्युति॥ ८४॥

मिहिकादीधितेर्हिमकिरणस्य विधोः। 'प्रालेयं मिहिका हिमम्। स्यान्नीहारस्तुषारश्च' इति हैम्याम्। दीधितीनां कान्तीनां व्रजो निकरः महीविहायसोर्भूमीनभसोः प्रससार विस्तरति स्म। द्यावापृथिव्योः समकालं विस्तारं प्राप्त इत्यर्थः। उत्प्रेक्ष्यते—शीतदीधितेश्चन्द्रस्य युवतेस्तरुण्या यामिन्या अमेचकाः श्वेता न मेचका अमेचका उज्ज्वला द्युतिः कान्तिर्यस्य। 'या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रावृता' इति विशेषणाद्वाग्देवतावसनवद्विशदमुपसंव्यानं परिधानवस्त्रमिव। 'गुणशब्दो विरोध्यर्थं नञादिरितरोत्तरः। अभिधत्ते यथा कृष्णः स्यादसितः सितेतरः॥' इति हैम्याम्॥

वारिराशिरशनाविहायसोः कौमुदीभिरुदरं स्म पूर्यते।
अन्धकाररिपुनिर्जयोद्भवत्कीर्तिभिः किमु कुमुद्वतीपतेः॥ ८५॥

कौमुदीभिश्चन्द्रिकाभिर्वारिराशिः समुद्रः स एव रशना मेखला यस्या एतावता स-[स]मुद्रा मेदिनी। मेखला तु शरीरान्तरेऽवस्थायिनी न पृथग्भवतीति। अतः समुद्रसहिता महीति समेतम्(?)। तथा विहाय आकाशं तयोरुदरं मध्यं पूर्यते स्म पूर्णीक्रियते स्म। व्याप्तमित्यर्थः। उत्प्रेक्ष्यते—कुमुद्वतीपतेः कैरविणीकान्तस्य विधोः अन्धकार एव रिपुर्ध्वान्तशत्रुः। अथ वा रिपुः सूर्यः। 'मित्रो ध्वान्तारातिरब्जांशुः' इति हैमीवचनात्। चन्द्रोदये भानुरस्तमीयते। सूर्यः स्वोदये च चान्द्रमसीं सर्वामपि विभूतिमादत्ते इति परस्परशत्रुतापि। तस्य ध्वान्तस्य सूर्यस्य वा निर्जयात्पराभवादुद्भवन्तीभिः प्रकटाभिर्जायमानाभिः कीर्तिभिः किमु समाज्ञाभिरिव दिवस्पृथिव्यौ व्याप्ते॥

भूमीनभोमण्डलमेदुरश्रीर्ज्योत्स्नावपुर्विष्णुपदीप्रवाहैः।
नक्तंदिनं जह्नुपदप्रसत्तेः प्राकाम्यरूपा किमवापि सिद्धिः॥ ८६॥

भूमी पृथिवीपीठं नभोमण्डलं गगनस्थलं तयोर्विषये मेदुरा उपचयप्राचुर्यं प्राप्ता श्रीर्लक्ष्मीः शोभा वा यस्यास्तादृशी ज्योत्स्ना कौमुदी सैव वपुर्गात्रयष्टिर्यस्यास्तादृश्या विष्णुपद्या गङ्गायाः प्रवाहैः प्रसरत्पयःपूरैर्नक्तंदिनं रात्रौ दिवा च जह्नोर्नारायणस्य पदमाकाशं चरणश्च तस्य प्रसत्तेः प्रसादनतः। 'प्रसादनं प्रसत्तिः' इति व्युत्पत्त्या सेव-

नमित्यर्थः । भक्तेः सकाशात् । उत्प्रेक्ष्यते—प्राकाम्यरूपा रोदःकन्दरविस्तरणशीला बहुरूपकारिणी सिद्धिः फलनिष्पत्तिरवापि किं लब्धा संप्राप्तेव ॥

चूर्णैः प्रपूर्णा किमु मौक्तिकानां पीयूषपङ्कैः किमु वा [विलिप्ता ।
श्रीखण्डनीरैरथवा]भिषिक्ता ज्योत्स्नाभिरुर्वी धवलीकृताभात्॥ ८७ ॥

ज्योत्स्नाभिः [धवलीकृता] प्रतिदिशं प्रसरचन्द्रसान्द्रचन्द्रिकाभिर्निरन्तरमतिश्वेततां प्रापिता उर्वी समस्तापि वसुमती आ[भात् आ]बभासे । उत्प्रेक्ष्यते—मौक्तिकानां स्थूलमुक्ताफलानां चूर्णैः क्षोदैर्निष्पिष्य सूक्ष्मीकृतरजोभिः प्रपूर्णा प्रकर्षेण (धवलीकृता) पूरिता किमु भरितेव । वा अथवा पीयूषपङ्कैरमृतकर्दमैः स्त्यानीभूतसुधारसैर्विलिप्ता किमु विशेषेण कृतविलेपने च अङ्गरागकलिता कृता । अथ वा श्रीखण्डनीरैः स्थूलघृष्टचन्दनवारिद्रवैरभिषिक्ता किं कृताभिषेकेव ॥

आप्लाविते किं सुरसिन्धुसुभ्रुवः स्रोतःसहस्रैः परितः प्रसृत्वरैः ।
कर्पूरपारीविलसद्यशोभरैः सूरीशितुर्वा विशदीकृते इव ॥ ८८ ॥

विलीयमानैस्तुहिनावनीभृन्नीहारचारैर्निभृतं भृते वा ।
प्रपूरिते सान्द्रितचन्द्रचन्द्रातपैर्विभातः स्म दिवस्पृथिव्यौ ॥ ८९ ॥

सान्द्रं नीरन्ध्रत्वं संजातमेषामेषु वा इति सान्द्रिता बहलिताश्चन्द्रस्य निशानायकस्य चन्द्रातपाश्चन्द्रगोलिकास्तैः प्रपूरिते प्रकर्षेण पूर्णीकृते । सर्वतोऽपि निर्भरं भरिते व्याप्ते इत्यर्थः । दिवस्पृथिव्यौ द्यावाभूम्यौ विभातः स्म । तत्रोत्प्रेक्ष्यते—परितः सर्वतोऽपि दशदिक्प्रदेशेष्वपि प्रसृत्वरैः प्रसरणशीलैः सुराणां देवानां सिन्धोः समुद्रस्य सुभ्रुवः पत्न्याः । 'कर्षुद्वीपवतीसमुद्रदयिताधुन्यौ स्रवन्तीसरस्वत्यौ' इति हैम्याम् । देवनद्या गङ्गायाः स्रोतसां पयःप्रवाहाणां सहस्रैर्दशशतीभिः आप्लाविते किम् । स्वकुक्षिगतीकृते इव निर्भरं भृते इत्यर्थः । वा पुनरुत्प्रेक्ष्यते—सूरीशितुर्हीरविजयसूरीन्द्रस्य । पुनः सूरिनामग्रहणं बहुबहुमानसूचकम् । कर्पूराणां घनसाराणां पार्यः । 'फडसि' इति लोके प्रसिद्धाः । 'पारी पूरपरागयोः । पात्र्यां कर्करिकायां च पादबन्धे च हस्तिनः ॥' इत्यनेकार्थः । 'कर्पूरपारीपरिधूसराङ्गम्' इति तद्वृत्तिः । तथा 'कर्पूरपूरकमनीयशोभिरामम्' इति स्तुत्यादौ । तत्र पूरशब्देन समूह एव । तद्वद्विलसद्भिः शुभ्रिमविभ्रमैः शोभमानैः यशसां भरैः श्लोकानां प्रकरैः । 'श्लोकः कीर्तिर्यशोऽभिख्या समाज्ञा' इति हैम्यां यशोनामानि । विशदीकृते इव । पुनरुत्प्रेक्ष्यते—विलीयमानैर्गलद्भिर्द्रवीभवद्भिः तुहिनावनीभृतो हिमाचलस्य नीहारचारैर्हिमनिवहैर्निभृतं निचितं भृते वा भरिते वा । युग्मम् ॥ इति चन्द्रचन्द्रिकायाः प्रचारः ॥

---

१. 'ज्योत्स्नाभिः' इत्युत्तरमुचितोऽपि 'धवलीकृता' इति पाठः कैश्चिदत्र प्रक्षिप्तः.

गङ्गावज्जलजन्मबन्धुतनया स्वःकुम्भिवत्कुञ्जरो
नीरं क्षीरवदुत्पलं कुमुदवत्कादम्बवद्वायसः ।
वल्ली मौक्तिकहारवन्मरकतश्रेणीशशाङ्काश्मव-
लक्ष्मीं कांचिदमी दधुः सितरुचौ चन्द्रातपं चिन्वति ॥९०॥

सितरुचौ शारदीने चन्द्रे चन्द्रातपं चन्द्रगोलिकां चिन्वति पुष्णति उपचयं प्रापयति सति । विस्तारयतीत्यर्थः । अमी अत्रैव वृत्ते प्रकाश्यमाना यमुनादयः पदार्थाः कांचिदनन्यां लक्ष्मीं शोभां दधुर्बिभ्रति स्म । तानेव दर्शयति कविः—जलजन्मनां कमलानां बन्धुः सूर्यः तस्य तनया पुत्री यमुना । 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति हैम्याम् । गङ्गावल्लक्ष्मीं धत्ते । चन्द्रिकया शुचीभवत्पयःप्रवाहत्वेन गङ्गासाम्यमापेत्यर्थः । तथा कुञ्जरो गजः । जातावेकवचनं सर्वत्रापि योज्यम् । समस्ता अपि हस्तिनः स्वःकुम्भिवत् ऐरावणगजवद्वैभवं बिभ्रति स्म । नीरं समग्रमपि जलं क्षीरवद्दुग्धमिव । तथा उत्पलं कुवलयनीलकमलमण्डलं कुमुदवत्कैरवमिव श्वेतारविन्दमिव । तथा वायसः कोलः सर्वेऽपि बलिभुजः कादम्बवत्कलहंसा इव । तथा मरकतानां गारुत्मतानां नीलमणीनां श्रेणी माला शशाङ्काश्मवच्चन्द्रकान्तरत्नपङ्क्तिरिव । तथा वल्ली समग्रलतावितानं मौक्तिकहारवन्मुक्ताफलकलाप इव शोभां बभार ॥

स्मेरत्कैरवशङ्कया कुवलयान्युत्तंसयत्यङ्गना
भृङ्गान्मालिकबालिकाः सुमधिया गृह्णन्ति केलीवने ।
मुक्ताभ्रान्तिभृतः किरातवनिताश्चिन्वन्ति गुञ्जाव्रजां-
श्चञ्चच्चन्द्रमसो भ्रमं वितनुते नो कस्य चन्द्रातपः ॥ ९१ ॥

चञ्चतो गगनमण्डले निखिलकलाकलापकलनदीप्यमानस्य चन्द्रमसः सुधादीधितेः चन्द्रातपःप्रतिहरित्प्रसत्वरसान्द्रचन्द्रिका कस्य पुंसः स्त्रीगणस्य वा भ्रमं भ्रान्तिं नो वितनुते चिनुते । अपि तु सर्वस्यापि करोतीत्यर्थः । तमेव प्रदर्शयति—अङ्गना मुग्धकामिन्यः स्मेरतां विकसताम् । 'स्मेरदम्भोरुहारामपवमानमिवानिलः' इति पाण्डवचरित्रे स्मेरद्विकाशनार्थे दृश्यते । कैरवाणां श्वेतकमलानां शङ्कया भ्रमेण कुवलयानि नीलोत्पलानि उत्तंसयन्ति अवतंसानि कुर्वन्ति । शिरसि श्रवणयोर्वा अवतंसनिर्माणस्थानद्वन्द्वमिदं दृश्यते शास्त्रादौ यथा । 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैम्याम् । तथा 'विलोचनाभ्यामतिमात्रपीडितेऽवतंसनीलाम्बुरुहद्वयीं खलु । तयोः प्रतिद्वन्द्वितयाधिरोपयांबभूवतुर्भीमसुताश्रुती ततः ॥' इति नैषधे । पुनर्मालिकानां मालाकारकाणां बालिकाः कुमार्यः । अथ वा बाला एव बालिकाः स्त्रियः । केलीवने क्रीडाकानने स्वेषां परेषां राजादीनां वा । 'नित्योद्द्योतपदं समस्तकमला केलीगृहे राजते' इति श्रीचिन्तामणिपार्श्वनाथस्तोत्रे केलीशब्दो दीर्घोऽप्यस्ति । सुमधिया पुष्पबुद्ध्या भृङ्गान् भ्रमरान् गृह्णन्ति । पुनर्मुक्तानां

मुक्ताफलानां भ्रान्तिं भ्रमं बिभ्रतीति मुक्ताभ्रान्तिभृतः मौक्तिकभ्रमधारिण्यः किरातवनिताः पुलिन्दपुरंध्र्यः गुञ्जाव्रजांश्चिन्वन्ति आददते॥

ज्ञायन्ते वसुधासुधाकरगृहा गर्जारवैः कुम्भिनां
दुग्धाब्धिः प्रतिनादमेदुरमिलत्कल्लोलकोलाहलैः।
शैलाः कन्दरमन्दिराङ्कविलुठत्कण्ठीरवक्ष्वेडितै-
र्जाते श्वेतकरोदयेऽम्बरसरिड्डिण्डीरपिण्डोपमे॥ ९२॥

अम्बरसरितो गगनापगायाः सिद्धसिन्धोः। भूपीठस्थगङ्गायास्तु प्रावृट्प्रसरन्नीरवाहवर्षणप्रकर्षप्रवहत्प्रबलजम्बालजालाविलीभवज्जलजम्बालिनीप्लवमिलनात्कदाचित्कालुष्यमपि भवत्येव। यदुक्तम्—'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम्' इति। परं नभोनद्यां तु कदाचिदप्याविलीभावो न स्यादेव। तस्मादाकाशगङ्गायाः डिण्डीराणां फेनानां पिण्डाः समूहाः। 'पिण्डो वृन्दे जपापुष्पे गोले चोलेऽङ्गसिह्लयोः। कवले च' इत्यनेकार्थः। तेषामुपमा सादृश्यं यस्य तादृशे श्वेतकरस्य चन्द्रस्य उदये जाते सति। वसुधा पृथिवी तस्या आह्लादकारकत्वात्सुधाकराश्चन्द्रा अतिन्यायिवत्तया सुधासदृशा उचितातिस्तोकत्वेन अमृतोपमानाः करा राजदेयांशा येषाम्। 'इदं तमुर्वीतलशीतलद्युतिम्' इति नैषधे। तेषां राज्ञां गृहा आवासाः ते कुम्भिनां मदोद्धुरसिन्धुराणां गर्जारवैः कृत्वा ज्ञायन्ते नक्तं राजकार्यायागतराजसेवकैरवसीयन्ते उपलक्ष्यन्ते वा। तथा प्रतिनादैः प्रतिशब्दैः कृत्वा मेदुरैः पुष्टैर्वृद्धिं प्राप्तैर्बहलीभूतैर्वा मिलतामन्योन्यं संगच्छतां संनिहितीभवताम्। वा अथ वा स्वयमेव प्रादुर्भवतां कल्लोलानां तरङ्गाणां कोलाहलैरद्वैतनादैस्तुमुलैर्वा कृत्वा दुग्धाब्धिः क्षीरसमुद्रो ज्ञायते। तथा कन्दरा गुहा एव मन्दिराणि निवाससदनानि तेषामङ्के उत्सङ्गे। कन्दरशब्दस्त्रिषु लिङ्गानुशासने। यथा 'पिठरप्रतिसरपात्रकन्दरा' इति। विलुठतामितस्ततः पार्श्वे परिवर्तयतां कण्ठीरवाणां मृगेन्द्राणां क्ष्वेडितैः क्ष्वेडाशब्दैः सिंहनादैः। 'क्ष्वेडा तु सिंहनादोऽथ' इति हैम्याम्। कृत्वा शैलाः पर्वता ज्ञायन्ते अवबुध्यन्ते। अवलोककैरित्यध्याहारः। शारदीनसान्द्रचान्द्रचन्द्रिकया क्षोणीमण्डले धवलीकृते एतैरभिज्ञानैः कृत्वा प्रागुक्ताः पदार्थाः कथमप्यवबुध्यन्ते बुधैरित्यर्थः॥

दुग्धाम्भोनिधिनिर्जरा इव नराः सर्वेऽपि संजज्ञिरे
स्वःसिन्धोरधिदेवता इव बभुस्त्रस्यत्कुरङ्गीदृशः।
स्फारस्फाटिकरत्नकोटिघटितेवासीत्पुनर्मेदिनी
क्षुभ्यत्क्षीरसमुद्रसान्द्रविभवे जाते शशाङ्कोदये॥ ९३॥

क्षुभ्यतः हरिणा मन्दरमन्थाचलनिर्मथनावसरे क्षोभं प्राप्नुवतः इतस्ततः सडिण्डीरपिण्डपाण्डुरसलिलोच्छलनेनातीव शुभ्रिमभाजः क्षीरसमुद्रस्येव सान्द्रोऽतिस्नेहलो बहलीभूतो वा विभवो धवलिमश्रीर्यस्य तादृशे शशाङ्कोदये चन्द्राभ्युद्गमने जाते सति सर्वे

समस्ता अपि नरा भूचराः पुरुषाः दुग्धाम्भोनिधेः क्षीरनीरधेर्निर्जरा अधिष्ठातृसुरा इव संजज्ञिरे । ते हि अतीव शुभ्रवपुर्वसनविभवाः स्युः । अत एव तदुपमानम् । पुनस्त्रस्यन्त्यस्त्रासं प्राप्नुवत्यो याः कुरङ्ग्यो मृगाङ्गनास्तद्वत्तरलाश्चञ्चला दृशो यासाम् । एतावता वनिताः सर्वा अपि स्वःसिन्धोर्गङ्गाया अधिदेवता इव अधिष्ठायिका देवता गङ्गादेव्य इव बभुः शोभन्ते स्म । पुनर्मेदिनी पृथ्वी । उत्प्रेक्ष्यते—स्फारा अनर्घ्या ये स्फाटिकाः स्फटिकमणिसमूहास्तेषु रत्नान्यतीव सारमणयः मुख्यानि वा । यदुक्तम्—'येषां मन्दररत्नशैलशिखरे जन्माभिषेकः कृतः' इति स्नातस्य स्तुतौ । मन्दराणां धातुकीखण्डपुष्करार्धद्वीपसत्कानां चतुर्णां मेरूणां मध्ये रत्नं सर्वेभ्य उच्चैस्तरत्वेन लक्षयोजनप्रमाणत्वेन मुख्य इत्येकव्याख्या । तेषां स्फाटिकमणीनां कोट्यस्ताभिः कृत्वा घटितेव निष्पादितेवासीद्बभूव भूमी ॥ इति चन्द्रिकाभ्युदये विविधा भावाः ॥

विजयिन इव राज्ञः श्वेतभासो विभाव्या-
भ्युदयमखिलकाष्ठामध्यराजत्करस्य ।
विहितसकलसंध्यावश्यको ध्यानलीला-
कमलकलमरालः स स्म भूत्सूरिराज्ञः ॥ ९४ ॥

स श्रीहीरविजयनामा सूरीणामाचार्याणां मध्ये दीप्यमानत्वात्प्रतापवत्त्वाद्वा राजा । अथ वा राजा मुख्यः । स ध्यानं सूरिमन्त्रजापरूपप्रणिधानं तदेव लीलाकमलं क्रीडाकरणोचितमरविन्दं तत्र कलमरालः कलहंसः । 'कलमरालविहंगमवाहना' इति वाग्देवतास्तोत्रे । प्रकृष्टो राजहंसो वा । स्म भूदजायत । 'स्मयोगेऽप्यटो लोपमिच्छन्ति । स्म भूत्' इति सारस्वतव्याकरणे[1] । स किंलक्षणः । विहितं कृतं सकलं समस्तं संध्यायां दिनावसाने आवश्यकं प्रतिक्रमणादिविधिर्येन । अथ वा निर्मितसंध्यासंबन्धिकमावश्यकमवश्यकर्तव्यं येन । किं कृत्वा । श्वेतभासः सितकान्तेश्चन्द्रस्याभ्युदयं विभाव्य । 'पश्यति विभावयत्यपि विलोकते वीक्षते गवेषयति' इत्यादि क्रियाकलापे विलोकनार्थाः क्रियाः । कस्येव । विजयिनः सर्वत्राप्यप्रतिहतपराक्रमत्वेनानेकराजचक्रजयनशीलस्य राज्ञ इव नृपस्य । किंभूतस्य चन्द्रस्य राज्ञश्च । अखिलानां समग्राणां काष्ठानां दिशां मध्ये राजन्तो दीप्यमानाः कराः किरणा राजदेयांशा यस्य ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिरचिते सर्गोऽभवत्सप्तमः ॥ ९९ ॥

---

१. चिन्त्यमिदमिति प्रामाणिकाः.

अत्र श्रीहीरसौभाग्यनाम्नि महाकाव्ये सप्तानां संख्यापूरणः सप्तमः सर्गः अकारनामविशेषोऽभवत्संजातः ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यमहाकाव्यवृत्तौ वर्षाशरत्समयसूर्यास्तसंध्यारागतिमिरतारकचन्द्रोदयचन्द्रिकाप्रचारादिवर्णनो नाम सप्तमः सर्गः ॥

अष्टमः सर्गः ।

अथो निशीथे द्विजराजराजज्ज्योतिःप्रथाभिर्मथितान्धकारे ।
निवातनालीक इव व्रतीन्दुर्ध्यानं दधानः स्तिमितीबभूव ॥ १ ॥

अथो चन्द्रोदयचन्द्रिकाप्रसारानन्तरं ध्यानं मनो निश्चलीकरणानन्तरं वा निशीथेऽर्धरात्रे ध्यानं सूरिमन्त्रप्रणिधानं दधानः । कुर्वाण इत्यर्थः । सन्व्रतीन्दुः सूरिशीतकान्तिः । निवातनालीक इव वातवेगाभावेन निष्प्रकम्पपद्मवत्स्तिमितीबभूव निश्चलो जातः । 'निवातपद्मस्तिमितेन चक्षुषा' इति रघौ । किंभूते निशीथे । द्विजानां राजा चन्द्रस्तस्य राजतां दीप्यमानानां ज्योतिषां किरणानामर्थाच्चन्द्रिकाणां प्रथाभिर्विस्तारैः कृत्वा मथितं निर्दलितमन्धकारं ध्वान्तं यत्र । नालीकशब्दः पुंक्लीबलिङ्गयोः ॥

पर्यङ्कबन्धः स विभोर्व्रतश्रीविलासपर्यङ्क इवाबभासे ।
कथं भरोऽमुष्य मया विषह्यो हृदेति यस्मिन्समशेत शेषः ॥ २ ॥

विभोः सूरीन्द्रस्य स यो ध्यानसमये विहितः पर्यङ्कबन्धः पद्मासनरचनाविशेषः आबभासे सामस्त्येन शोभते स्म । उत्प्रेक्ष्यते—व्रतश्रिया संयमलक्ष्म्या विलासार्थे क्रीडाकृते पर्यङ्कः पल्यङ्क इव । स कः । यस्मिन् पर्यङ्कबन्धे शेषः शेषनामा नागाधिराजो हृदा स्वमनसा इत्यमुना प्रकारेण समशेत संशयं कृतवान् । इति किम् । यदमुष्य पर्यङ्कबन्धस्य भरो भारोऽसहायेन एकेनैव मया कथं केन प्रकारेण विषह्यो विशेषेण सहनीयः । धार्य इत्यर्थः । ध्यानभाजां हि योगीन्द्राणां ध्यानसमये पर्यङ्कबन्धस्यातिशायी भारो भवतीति कविसमयः । यदुक्तं कुमारसंभवे—'ततो भुजंगाधिपतेः फणाग्रैरधः कथंचिद्धृतभूमिभागे । शनैःकृतप्राणविमुक्तिराशेः पर्यङ्कबन्धं निबिडं बिभेद ॥' इति ॥

भुजान्तरासन्नशयारविन्दे विभोश्चकासे विशदाक्षमाला ।
हृघ्द्यानदुग्धाम्बुनिधिप्रतीरं प्रपेदुषी किं कलहंसपङ्क्तिः ॥ ३ ॥

भुजान्तरस्य वक्षःस्थलस्य आसन्ने समीपवर्तिनि शयारविन्दे करकमले धवलवर्णा अक्षमाला जपमालिका चकासे भासते स्म । उत्प्रेक्ष्यते—हृदि हीरविजयसूरिहृदयविषये यो ध्यानं शुक्लप्रणिधानं तदेव दुग्धाम्बुनिधिः क्षीरसमुद्रस्तस्य प्रतीरं तटं प्रपेदुषी

प्राप्तवती मानसादिजलाशयेभ्यः स्वैरं विलासरसिकायितमानसा समागतवती कलहंसानां राजमरालानां मालाधोरणी पङ्क्तिरिव ॥

श्रीसूरिमन्त्रं विजने व्रतीन्द्रो जपन्स गोत्रत्रिदशीमिव स्वाम् ।
दध्यौ हृदा श्रीजिनशासनस्याधिष्ठायिकां निर्जरनीरजाक्षीम् ॥ ४ ॥

विजने एकान्ते अपरजनरहितस्थाने श्रिया सर्वशक्तिलक्ष्म्या युक्तः सूरीणामाचार्याणां मन्त्रं जपन् ध्यायन् सन् व्रतीन्द्रो हीरविजयसूरिः हृदा मनसा कृत्वा षड्दर्शनेष्वपि सर्वातिशायिन्या श्रिया लक्ष्म्या शोभया वा कलितस्य जिनशासनस्य अधिष्ठायिकां प्रत्यक्षसांनिध्यविधायिनीं निर्जरनीरजाक्षीं नाकिकमललोचनां देवतां दध्यौ ध्यायति स्म । कामिव । स्वां स्वकीयां गोत्रत्रिदशीमिव । यथा कश्चित्पुमान्निजां कुलदेवतां ध्यानगोचरां कुरुते । 'निपीय तं यस्त्रिदशीभिरर्जितः' इति नैषधे । 'गोत्रं तु संतानोऽन्ववायोऽभिजनः कुलम्' इति हैम्याम् ॥ इति सूरेर्ध्यानविधानम् ॥

ध्यानानुभावेन ततो निशीथे सूरीशितुः शासनदेवतायाः ।
केतुर्निकेतस्य रयेण वायोरिव क्षणादासनमाचकम्पे ॥ ५ ॥

ततो ध्याने जिनशासनाधिष्ठायिकास्मृतिगोचरीकरणानन्तरं सूरीशितुर्हीरविजयसूरीश्वरस्य ध्यानानुभावेन प्रणिधानमाहात्म्येन शासनदेवताया निशीथेऽर्धरात्रे आसनमुपवेशनस्य विष्टरम् । 'विष्टरः पीठमासनम्' इति हैम्याम् । आचकम्पे आ सामस्त्येन दोलायमानमासीत्प्रचलति स्म । क इव । केतुरिव । यथा निकेतस्य गृहस्य केतुः वैजयन्ती वायोः पवमानस्य रयेण वेगेन कृत्वा कम्पते चञ्चलीभवति ॥

स्वविष्टरं कम्प्रमवेक्ष्य बिम्बमिवोत्तरङ्गाम्बुधिबिम्बितेन्दोः ।
शोणारविन्दायितमीक्षणेन रोषारुणेन त्रिदशाङ्गनायाः ॥ ६ ॥

त्रिदशाङ्गनाया जिनशासनदेवताया रोषेण कोपेन कृत्वा अरुणेन रक्तीभूतेन ईक्षणेन लोचनेन । नयनद्वन्द्वेनेत्यर्थः । शोणारविन्दायितं कोकनदमिवाचरितम् । अत्र गर्भितोमपास्ते । किं कृत्वा । स्वस्यात्मनः स्वमात्मीयं विष्टरं सिंहासनमवेक्ष्य विलोक्य । किंभूतं विष्टरम् । कम्प्रं कम्पनशीलं चञ्चलीभूतम् । किमिव । बिम्बमिव । यथा उदूर्ध्वे गगनचुम्बिनस्तरङ्गाः कल्लोला यस्य एतावता समयस्वभावेन प्रबलपवनवेगप्रवृद्धो योऽम्बुधिः समुद्रस्तत्र बिम्बितः रात्रौ जलस्यातिस्वच्छभावेन संक्रान्तः । 'यद्यपि स्वच्छभावेन दर्शयत्यम्बुधिर्मणीन् । तथापि जानुदघ्नोऽयमिति चेतसि मा कृथाः ॥' इति वचनात् । प्रतिबिम्बितो य इन्दुश्चन्द्रस्तस्य बिम्बि प्रतिमाभावं प्राप्तं मण्डलं कम्पते अतिशयेन कम्पनशीलं स्यात् ॥

ध्यानस्थितं शासनदेवता सा निपीय तं ज्ञानदृशा वशीन्द्रम् ।
मुदं दधारामृतकुण्डमध्यप्रणीतलीलाप्लवनेव चित्ते ॥ ७ ॥

सा ध्यानगोचरीकृता शासनदेवता श्रीजिनमताधिष्ठायिका निर्जरी ज्ञानदृशा निजावधिज्ञानलोचनेन ध्यानस्थितं प्रणिधानोपविष्टं हीरविजयनामानं वशीन्द्रं जितेन्द्रियाणामधिराजं सूरिं निपीय सादरमवलोक्य चित्ते स्वमानसे मुदमानन्दं दधार धत्ते स्म । प्रमोदं प्रापेत्यर्थः । उत्प्रेक्ष्यते—अमृतस्य सुधायाः कुण्डे परितो निबद्धानेकसोपानपटलप्रवणे जलाशये अर्थादमृतकुण्डमध्ये प्रणीतं कृतं लीलया स्वैरक्रीडया । ननु तापमलापनोदाय देवानां तापाद्यभावात् । आप्लवनं स्नानं यया तादृशीव । 'स्नानं सवनमाप्लवः' इति हैम्याम् । आप्लवनमाप्लवः इति वाक्यमेवानीतमस्तीति ॥

अथाविरासीद्वशिशीतकान्तेः पुरः स्फुरज्जैनमताधिदेवी ।
प्रसादितोपासनया शमश्रीरिवेयमङ्गीकृतकाययष्टिः ॥ ८ ॥

अथ ध्यानस्थिरस्थायुकसूरीन्द्रदर्शनानन्तरं स्फुरन्ती वपुराभरणमणिदीप्तिभिर्दीप्यमाना जिनानां तीर्थकृताम् । अथ वा जिनस्य महावीरस्येदं जैनम् । तादृशं मतं शासनं तस्याधिदेवी अधिष्ठात्री देवता वशी जितेन्द्रियग्रामो मुनिजनस्तन्मध्ये शीतकान्तेश्चन्द्रस्यैतावता सूरीन्द्रस्य पुरोऽग्रे आविरासीत्प्रकटीभूता । उत्प्रेक्ष्यते—उपासनया निरन्तरसेवनया कृत्वा प्रसादिता प्रसादयुक्ता विहिता । प्रसन्नीकृतेत्यर्थः । अतएवाङ्गीकृता उपात्ता गृहीता काययष्टिस्तनूलता यया तादृशी शमश्रीर्मूर्तिमती उपलक्ष्मीरिव प्रभोः पुरः प्रादुर्भूता ॥

कलामिवेन्दोर्जगते द्वितीयां प्राप्तां सुरीं दर्शयितुं स्वमस्मै ।
निद्रां दृशा किंचन चुम्बतापि प्रेक्ष्यामुनाजायत जाग्रतेव ॥ ९ ॥

अमुना सूरीन्द्रेण जाग्रतेव जागरणावस्थितेनेव निन्द्रारहितेनेव अजायत संजातम् । अमुना किं कुर्वता । किंचन किमपि उदरिकामन्त्रं दृशा नेत्रेण निद्रां प्रमीलां चुम्बता आश्रयतापि । किं कृत्वा । प्रेक्ष्य व्यालोक्य । काम् । सुरीं शासनदेवताम् । किंलक्षणाम् । अस्मै सूरीन्द्राय स्वमात्मानं दर्शयितुं दृग्गोचरीकारयितुं प्राप्तां पुरःसमागताम् । कामिव । द्वितीयां तिथिमिव । यथा इन्दोः सुधादीधितेः कलां षोडशांशम् । अत्रार्थाज्जगत्स्थितिवशाच्च कलात्रयमयीं खेलां जगते सकललोकाय दर्शयितुं प्राप्तां जनो जानाति ॥

प्रवाललक्ष्मीमिव कामितद्रोस्तद्ध्यानसिद्धेः किमुताग्रदूती ।
प्रत्यक्षवत्प्रादुरभूत्पुरोऽस्य स्वप्नेऽपि सा सार्वमताधिदेवी ॥ १० ॥

सा हीरविजयसूरिसूरिमन्त्रध्यानानुभावाभ्यागता सार्वस्य श्रीमच्चरमकृन्महावीरभगवतो मतं शासनं तस्याधिदेवी अधिष्ठायिका निर्जरी । श्रीवीरशासनदेवता इत्यर्थः । स्वप्ने किंचिन्निद्रावस्थायामपि प्रत्यक्षवज्जाग्रदवस्थास्थायुकचक्षुर्लक्ष्यवत् । अस्य सूरेः पुरोऽग्रतः प्रादुरभूत्प्रकटीभवति स्म । उत्प्रेक्ष्यते—कामितद्रोरर्थात् हीरसूरेरभिलषितशाखिनः प्रवाललक्ष्मीः पल्लवश्रीरिव । द्रुमाणां हि प्रथमं पल्लवाः प्रादुर्भवन्ति । तदुप-

मानम् । उताथ वा तस्य सूरेर्ध्यानस्य सूरिमन्त्रजापस्य सिद्धेः फलनिष्पत्तेः । अथ च सिद्धिनाम्न्या देवताया विघ्नराजपार्श्वे सिद्धिबुद्धिनाम्न्यौ देवते अनुचर्यौ वर्तेते इति लोकप्रसिद्धिः । तस्या अग्रदूती । किं प्रथमशासनहारिकेव ॥ इति सूरिपुरो निशीथे शासनदेवतागमनम् ॥

अथ शासनदेवतावर्णनारम्भः—

सृष्टिं सिसृक्षोः सुदृशां पुरा यः स्वयंभुवः शिल्पगुरुर्बभूव ।
विधाय तां बिम्बमिवादसीयशिक्षाकृतेशोऽर्पयति स्म तस्मै ॥ ११ ॥

स शिल्पगुरुः अमूषां सुलोचनानामियमदसीया । 'नासादसीया तिलपुष्पतूणम्' इति नैषधे । सृष्टिः सर्गः । स्त्रीरूपघटनमित्यर्थः । सृष्टिरिति मध्यमपदलोपी समासः । तस्याः सृष्टेः शिक्षणं न पुनर्निर्माणक्रिया तत्कृते तदर्थं बिम्बं मूलरूपं निरूप्य अन्यानि तद्रूपाणि निर्माप्यन्ते । एतावता शासनदेवतारूपबिम्बे विधाय तस्मै धात्रे अर्पयति स्म दत्तवान् । यत्तदोर्नित्याभिसंबन्धात् । स कः । सुदृशां चारुचक्षुषां स्त्रीणां हि कटाक्षादिहेतुतया दृष्टिरेव प्रधाना तस्यां च शोभनत्वेन सर्वाङ्गीणशोभनत्वं सुतरामागतमिवेति । तथोक्तम्—'सर्वेन्द्रियाणां नयनं प्रधानम्' इति । तथा—'तदनु पुनरपाङ्गोत्सङ्गसंचारितानां जयति तरुणयोषिल्लोचनानां विलासः' इति चम्पूकथाद्वितीयश्लोकान्त्यद्विपदी । इति सृष्टिरचनां सिसृक्षोः कर्तुमिच्छोः स्वयंभुवो ब्रह्मणः पुरा पूर्वं विज्ञानज्ञानाभ्यासनसमये शैशवे यः कश्चिदज्ञाताश्रुतनामा शिल्पगुरुर्विज्ञानाचार्यः कलाचार्यो वा बभूवासीत् । प्रायो हि कलाकौशल्यगृहगुरुमन्तरेण जगच्चेतश्चमत्कारि शिल्पं न संगच्छते ॥

महीवियद्वीक्षणकेलिलोलीभवन्मनाः स्वैरविहारिणीयम् ।
जम्बूह्रदिन्या अधिदेवतेव समीयुषी काञ्चनचारिमश्रीः ॥ १२ ॥

इयं शासनसुरीरूपा । उत्प्रेक्ष्यते—जम्बूह्रदिन्या जम्बूनामनद्याः । जम्बूद्वीपसत्कजम्बूवृक्षाः । तेषां जम्बूफलरसैर्जम्बूसरित्प्रवहति । तन्मृत्स्ना च जाम्बूनदं भवति । जम्बूनद्यां भवं जाम्बूनदमिति व्युत्पत्त्या इति कविसमयः । तदेव दर्श्यते—'जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नापि सा तव रुचा विजितश्रि यस्याः । तज्जाम्बवद्रवभवास्य सुधाविधाम्बुजम्बूसरिद्वहति सीमनि कम्बुकण्ठि ॥' इति नैषधे । अधिदेवता अधिष्ठायिका देवी समीयुषीव समागतवतीव । किंभूता । मह्या भूमेर्वियत आकाशस्य च द्वयोर्भूनभसोर्वीक्षणमवलोकनं तदेव केलिः क्रीडा तत्र लोलीभवच्चञ्चलं जायमानं मनश्चेतो यस्याः । अत एव पुनः किंभूता । स्वैरं स्वेच्छया विहरति संचरतीत्येवंशीला । देवा देव्यो हि स्वैरविहारा भवेयुः । अतोऽपि स्वेच्छया संचारिणी । पुनः किंभूता । काञ्चनत्वेन काञ्चनवद्वा चारिम्णो वपुर्मनोज्ञत्वस्य श्रीः शोभा यस्याः सा ॥

निर्यत्सुरास्त्राशनिभूषणानि विरेजुरङ्गानि सुराङ्गनायाः।
स्वस्पर्धिनः श्रीभिरिवेन्द्रचापवज्राण्यमीभिर्विधृतानि जेतुम् ॥ १३ ॥

सुराङ्गनाया जिनशासनत्रिदश्या अङ्गान्यवयवाः। 'एकदेशे प्रतीकोऽङ्गावयवापघना अपि' इति हैम्याम्। तथा 'अङ्गमन्तिकमात्रयोः। उपसर्जनभूते स्यादभ्युपायप्रतीकयोः ॥' इत्यनेकार्थः। विरेजुर्विभान्ति स्म। किंभूतान्यङ्गानि। निर्यन्ति निर्गच्छन्ति प्रादुर्भवन्ति सुरास्त्राणि इन्द्रधनूंषि। 'धनुर्देवायुधम्' इति हैम्याम्। इन्द्रधन्वाप्युच्यते। तथा 'तस्मै स्वभूषा ददृशुः शिल्पं बलिद्विषः कार्मुकमर्पयन्ती' इति नैषधे। मणिज्योतिरिन्द्रधनुराकृत्या निर्याति। यथा नैषधे—'वृता विभूषा मणिरश्मिकामुकैः' इति। येभ्यस्तादृशान्यशनिभूषणानि वज्ररत्नखचिताभरणानि येषु तानि। अशनिशब्देनात्र वज्ररत्नमुच्यते। 'शुचीमुखं तु हीरकः। वराटकं रत्नमुख्यं वज्रपर्यायनाम च ॥' इति हैम्याम्। उत्प्रेक्ष्यते—अमीभिरङ्गैः श्रीभिः शोभाभिः कृत्वा स्वस्पर्धिनः निजप्रतिमल्लीभूतशत्रून् जेतुं पराभवितुमिन्द्रचापवज्राणि शस्त्राणीव विधृतानि ॥

राजीवराजी विजिता यदङ्गैर्मृदुश्रिया रङ्गदनङ्गरङ्गैः।
तत्तुल्यभावाय तपः सृजन्ती वने वसन्तीव कुशेशयासीत् ॥ १४ ॥

यदङ्गैर्यस्या देव्या अङ्गैरवयवैर्मृदुश्रिया भावप्रधाननिर्देशात्सौकुमार्यलक्ष्म्या विजिता पराभूता सती राजीवराजी कमलमालिका। उत्प्रेक्ष्यन्ते—वने निकुञ्जे वसन्ती सती वासं विदधती। तिष्ठन्तीत्यर्थः। कुशेशयासीत् दर्भशायिनी बभूवेव। 'वनं काननीरयोः' इत्यनेकार्थः। तथा कुशेशयं पद्मनामापि। यथा 'कमलं नलिनं पद्ममरविन्दं कुशेशयम्' इति हैम्याम्। तत्रोत्प्रेक्षापि। 'कुशो दर्भे जले द्वीपे' इत्यनेकार्थः। किं कुर्वन्ती। तेषामङ्गानां तुल्यभावाय सादृश्याय तपः सृजन्ती अनुतिष्ठन्ती। अन्यापि किंचित्फलं मनसि स्पृहयन्ती सती वनमध्यस्थायिनी तपः कुर्वाणा कुशप्रस्तरे शेते। किंभूतः। यदङ्गैः रङ्गन्नृत्यं कुर्वन्। 'नृत्यविधाने नृत्यति नटति च रङ्गति च विलसति च' इति क्रियाकलापे। योऽनङ्गः स्मरस्तस्य रङ्गैर्नर्तनस्थानै रङ्गन्ती जङ्गमा अनङ्गनर्तकस्य रङ्गा नर्तनशाला वा ॥

अगण्यनैपुण्यमुखान्नियन्त्र्य संरक्षितान्प्रेक्ष्य गुणांस्त्रिदश्याः।
स्वयन्त्रणोद्भूतभयातिरेकात्तस्याः प्रणेशे किमशेषदोषैः ॥ १५ ॥

तस्याः शासनदेव्याः सकाशात् अशेषदोषैः समग्रापगुणैः प्रणेशे प्रणष्टं प्रपलाय्य गतम्। उत्प्रेक्ष्यते—स्वेषां स्वकीयात्मनां यद्यन्त्रणं बन्धनं तस्मादुद्भूताज्जाताद्भयातिरेकात्साध्वसातिशयादिव। किं कृत्वा। अगण्यान् गणयितुमशक्यान् गणनातिगानतिशायिनो वा नैपुण्यं दाक्षिण्यम्। चातुर्यमित्यर्थः। तदेव मुखमादौ मुखे वा धुरि येषां तान्। 'मुखमुपाये प्रारम्भे श्रेष्ठे निःसरणास्ययोः' इत्यनेकार्थः। गुणान्नियन्त्र्य नितरां यन्त्रयित्वा बद्ध्वा त्रि-

दश्या शासनदेव्या रक्षितान् स्वप्नेऽप्यन्यस्थानगमनाप्रदानतया गोपितान् प्रेक्ष्य दृग्गोचरीकृत्य ॥ इति शासनदेवतासाधारणसर्वाङ्गवर्णनम् ॥

अथ पृथगङ्गवर्णनारम्भणम् । तत्र 'मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः' इति वचनात्कविसमयानुसारेण देवतापादादारभ्य वर्णयितुं प्रारभ्यते—

जिनेशितुः शासनदेवतायाः पादारविन्देऽरुणिमा दिदीपे ।
प्रणेमुषीणां दिविषद्वधूनां सीमन्तसिन्दूरमिवात्र लग्नम् ॥ १६ ॥

जिनानां सामान्यकेवलिनामीशितुरधिराजस्य श्रीतीर्थकृतः शासनदेवताया जिनभक्तचातुर्वर्ण्यसंघस्य सम्यक्सांनिध्यविधायिन्या देव्याः पादारविन्दे चरणतामरसे अरुणिमा पादतले स्वाभाविकी रक्तता दिदीपे दीप्यते स्म शुशुभे । उत्प्रेक्ष्यते—प्रणेमुषीणां सेव्यत्वेन प्रणीतप्रणामानां दिविषद्वधूनां देवाङ्गनानां सीमन्तस्य केशेषु वर्त्मनः सिन्दूरं शृङ्गारभूषणम् अत्र पादारविन्दतले लग्नमिव ॥

यत्पादपद्मेन पराजितेन विजृम्भमाणारुणवारिजेन ।
शुश्रूषणायारुणिमा तदङ्के शङ्के ढुढौकेऽरुणलक्ष्मिलक्षात् ॥ १७ ॥

विजृम्भमाणेन विकाशं प्राप्नुवता अरुणवारिजेन रक्तकमलेन । कोकनदेनेत्यर्थः । कर्त्रा । शुश्रूषणाय सेवाकारणाय अरुणिमा आत्मीयरक्तिमा तदङ्के पादपद्मोत्सङ्गे अहमेवं शङ्के संशयं कुर्वे मन्ये। विचारयामीत्यर्थः । अरुणा या लक्ष्मीः शोभा विभूतिर्वा तस्या लक्षात्कपटात् । 'व्यपदेशो मिषं लक्षं निभव्याजः' इति हैम्याम् । लक्ष्मिशब्दो ह्रस्वः शब्दप्रभेदे । अरुणिमा रक्तता स्वरागो ढुढौके किमु प्राभृतीक इव । किंभूतेन कोकनदेन । यत्पादपद्मेन यस्याः शासनदेवतायाः पादपद्मेनेव चरणारविन्दद्वन्द्वेन पराजितेन पराभवपदवीं प्रापितेन अर्थादात्मीयविभवेन ॥ इति पादतलरक्तिमा ॥

यस्याः स्फुरत्कान्तिविकाशिताशाः कामाङ्कुशा दिद्युतिरे पदाब्जे ।
इदं मुखाम्भोजविनिर्जितेन राज्ञेव रत्नान्युपदीकृतानि ॥ १८ ॥

यस्याः शासनदेव्याः पदाब्जे चरणारविन्दद्वन्द्वे कामाङ्कुशा नखा दिद्युतिरे द्योतन्ते स्म शुशुभिरे । किंभूताः। स्फुरन्तीभिरितस्ततः प्रसरन्तीभिः सूर्यज्योतिःस्पर्धया वा स्फूर्जन्तीभिः कान्तिभिर्दीप्तिभिः विकाशिता प्रकटीभावं प्रापिता उद्योतिता आशा दशदिशो यैस्ते । उत्प्रेक्ष्यते—इदं मुखाम्भोजेन अस्या वदनवारिजन्मना। 'इदं नृपप्रार्थिभिरुज्झितोऽर्थिभिः,' तथा 'इदं यशांसि द्विषतः सुधारुचः' इति पदद्वयमपि नैषधे । विनिर्जितेन पराजयगोचरीकृतेन राज्ञा चन्द्रेण नृपेण च रत्नाकरोद्भवत्वेन कोशसौधाधिपतित्वेन च द्वयोरपि मणीनां सद्भावात् रत्नानि जात्यपद्मरागमणयः उपदीकृतानि ढौकितानीव ॥

यदाश्रयीभूय किमर्भसूराः राहुं निहन्तुं नखराङ्गभाजः ।
प्रणम्रगीर्वाणवधूप्रवेणीछायाच्छलाङ्गीकृतचन्द्रहासाः ॥ १९ ॥

दानवारिपरिग्रहपदमेव । अथ वा यो दानवारिपरिग्रहः स एवाश्रयः शरणं येषां तादृशा भूत्वा यत् यो वा आश्रयो येषां ते यदाश्रयाः। न यदाश्रया अयदाश्रया भूत्वा इति यदाश्रयीभूय अर्भसूराः बालारुणाः प्रभातप्रोद्यन्मार्तण्डाः शासनत्रिदशीक्रमकामाङ्कुशाः एवाङ्गं वपुर्लतां भजन्ते सेवन्ते तादृशाः सन्तो भवन्तः राहुं स्वर्भाणुदानवं निहन्तुं शमनसदनातिथीकर्तुं प्रणम्राणां देवीचलननमनशीलानां गीर्वाणवधूनां सुराङ्गनानां प्रवेणीनां कबरीणां छायाः प्रतिबिम्बानि तासां छायानां छलेन कपटेन अङ्गीकृता गृहीताश्चन्द्रहासा महाखड्गा इव सन्ति । नखानां रक्तत्वेनोद्गच्छदादित्योपमानम् ॥

इदंपदीभूय भवान्तरेऽपि लौहित्यलक्षात्कलितानुरागाम् ।
पद्मद्वयीं प्रेक्ष्य नखाङ्गबालारुणा इवैतन्मिलनार्थमीयुः ॥ २० ॥

पद्मद्वयीं स्वबन्धुभूतामम्भोजन्मद्वितयीं प्रेक्ष्यालोक्य चक्षुर्लक्ष्यीकृत्य एतस्याः पद्मद्वय्या अर्थाद्बन्धुत्वेन मित्रत्वेन वा मिलनार्थमीयुरागता नखा अर्थाद्देवीचरणजन्मकामाङ्कुशा एवाङ्गानि शरीराणि येषां तादृशा बाला नवमुदयं लभमाना अरुणा भास्करा इव । किंभूतां पद्मद्वयीम् । इदंपदीभूय । 'जगत्कर्तृजगत्सर्गप्रणयनपरवशत्वे विधेर्विश्वव्यापारपारवश्यादवतीर्णस्य संसारचक्रे' इति चम्पूकथायाम् । अस्या जिनशासनदेवतायाश्चरणौ भूत्वा पदभावं प्रपद्य भवान्तरेऽन्यस्मिन्नपि भवे जन्मनि अपरावतारे संप्राप्तेऽपि लौहित्यस्य स्वाभाविकस्फुरद्रक्तताया लक्षात्कपटात्कलितः पूर्ववद्भृतोऽनुरागः स्नेहातिरेकता पाटलिमा च यया ताम् ॥

प्रपेदुषीं यत्पदतां पयोजद्वयीं विभाव्यार्भकशीतभासः ।
निजानुरज्यन्मनसं प्रणेतुं नखीबभूवुः किमु तत्रिदश्याः ॥ २१ ॥

अर्भकशीतभासो बालचन्द्राः । तेषां चारुणत्वं कविसमये दृश्यते । यथा—'अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः' इति विदग्धमुखमण्डने, तथा—'स्फुरदम्भःसरोदम्भात्सैंहिकेयभयादिव । राकामृगाङ्काः संभूय विभान्ति शरणागताः ॥' इति पाण्डवचरित्रे च चन्द्रबाहुल्यं प्रोक्तमस्तीति । तथात्रापीदं द्वयमपि उद्यतां चन्द्रसूर्याणां बालत्वमेव प्रतिपद्यते । तत्रिदश्याः सा सूरिध्यानाकृष्टागता वासौ त्रिदशी च त्रिदशवशा तस्या नखीबभूवुः तत्पदपुनर्भवभावं भजन्ते स्म । देवतानखा जाता इत्यर्थः । किं कृत्वा । यत्पदतां तत्रिदशचरणभावं प्रपेदुषीं प्राप्तवतीं पयोजयोः कमलयोर्द्वयीं युगलीं विभाव्य चक्षुषा समीक्ष्य । उत्प्रेक्ष्यते—तां पद्मद्वितयीं निजे स्वात्मनि विषये अनुरज्यत् सरागीभवत् । 'चकास्ति रज्यच्छविरुज्झिहानः' इति नैषधे । मनः स्वान्तं यस्यास्तादृशीं प्रणेतुं किमु कर्तुमिव । 'सृजति करोति प्रणयति' इत्यादिकरणार्थाः क्रियाः क्रियाकलापे ॥

सौन्दर्यपाथःप्लवपादपद्माकरेऽङ्गुलीनालजुषोऽनिमिष्याः ।
कामाङ्कुशाः शोणसरोजराज्यो ज्योतिर्मरन्दोपचिता इवाबभुः ॥२२॥

अनिमिष्या देवतायाः नखा अनुरागा भान्ति स्म । अयं प्रयोगः क्रियारत्नसमुच्चयेऽप्यस्ति । उत्प्रेक्ष्यते—शोणसरोजराज्यः कोकनदपङ्क्तय इव । कस्मिन् । सौन्दर्यं मनोहरत्वं तदेव पाथसां पानीयानां प्लवः पूरो यस्मिंस्तादृशे पादे चरणरूपे पद्माकरे सरसि । चरणे त्वाकृतिकमलानां सद्भावात्कमलाकरत्वम् । किं शोणसरोजराज्याः । अङ्गुल्यः पादशाखास्ता एव नाला मृणानि जुषन्ते भजन्ते । पुनः किंभूताः । ज्योतींषि नखकान्तयः एव मरन्दा मधूनि तैरुपचिताः पुष्टाः । भृता इत्यर्थः ॥ इति पदनखाः ॥

नखोल्लसत्पल्लवशालमानैर्नम्रामरीनेत्रमिलद्विरेफैः ।
शाखाविशेषैः पदशाखिनः किं तदङ्गुलीभिर्भ्रियते स्म शोभा ॥ २३ ॥

तदङ्गुलीभिर्देवीपदशाखाभिः शोभा भ्रियते ध्रियते स्म । 'डुभृञ् धारणपोषणयोः' इत्यस्य रूपम् । उत्प्रेक्ष्यते—पदशाखिनः पादपादपस्य किं शाखाविशेषैर्विशिष्टशाखाभिरिव । किंभूतैः । नखाः एवोल्लसन्तः स्फुरन्तः विकसन्तो वा पल्लवाः प्रवालास्तैः कृत्वा शालमानैः शोभाभासुरैः । पुनः किंभूतैः । नम्राणां नमनशीलानाममरीणां त्रिदशीनां नेत्राणां नवानां प्रतिबिम्बितान्येव । मध्यमपदलोपी समासः । मिलन्तः समीपे समागच्छन्तो द्विरेफा भृङ्गा येषु ॥

पदं मयेदं प्रददे शिरःसु दिशां दशानामपि सुन्दरीणाम् ।
इतीव रेखाः क्रमयोरमर्त्याङ्गुलीमिषात्तत्प्रमिता बिभर्ति ॥ २४ ॥

अमर्त्या देवसुन्दरी । 'अलम्भि मर्त्याभिरमुष्य दर्शने' इति नैषधे । यथा मर्त्या तथा अमर्त्या । तथा अमर्त्यापि अङ्गुलीनाम् । अत्राङ्गुष्ठोऽप्यङ्गुलीमध्य एव गण्यते न पृथक् क्रियते । यदुक्तं नैषधेऽपि—'रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हिङ्गुलपञ्चतूणे । हेमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥' इति । दशानां मिषाच्छलात्क्रमयोर्द्वयोश्चरणयोस्तत्प्रमिता दशदिक्प्रमाणा रेखा बिभर्ति धत्ते । उत्प्रेक्ष्यते—इति हेतोरिव । इति किम् । यन्मया स्वीयाद्भुतरूपश्रिया कृत्वा दशानां पूर्वा, अग्निः, दक्षिणा, नैर्ऋती, प्रतीची, वायवी, उत्तरा, ऐशानी, ऊर्ध्वदिक्, अधोदिक् । एकस्मिन् पक्षे । अष्टदिक्षु मानुष्यः ऊर्ध्वलोके देवाङ्गनाः अधोलोके च नागाङ्गना असुराङ्गनाश्च । अपरस्मिन् पक्षे । तिर्यग्लोके दशदिक्षु सर्वत्रापि देव्यो वर्तन्ते इति । दशदिग्वर्तिनीनां सुन्दरीणां स्त्रीणां शिरःसु मस्तकेषु रूपसौन्दर्यातिरेकात् इदं पदम् । अयं चरणः प्रददे प्रदत्तम् । पदशब्दः पुंलिङ्गनपुंसकलिङ्गयोः । 'चरणः क्रमणः पादः पदोऽङ्घ्रिश्चलनः क्रमः' इति हैम्याम् । तथा—'पदं किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे ॥ इति पादाङ्गुल्यः ॥

विलासिबालव्यजनाधृतोद्यच्छत्रा स्फुरद्वारिजराजमाना ।
अधीश्वरीवाखिलवारिजानां यदीयपादद्वितयी दिदीपे ॥ २५ ॥

यस्या देव्या इयं यदीया शासनदेवतासंबन्धिनी पादद्वितयी चरणयुगली दिदीपे शुशुभे । उत्प्रेक्ष्यते—अखिलानां समग्राणां वारिजानां जलजन्मनामन्रार्थात्कमलानामेव पदयोः पद्मानामुपमानत्वात् । वारिजशब्देन शङ्खोऽप्युच्यते । 'कम्बुस्तु वारिजस्त्रिरेखः षोडशावर्तः शङ्खः' इति हैमीवचनात् परं तन्निरासः । अथ वारिजशब्देन मुख्यतया पद्ममेवोच्यते तस्मात्कमलानामेवाधीश्वरी स्वामिनीव राज्ञीव । किं राजचिह्नं दर्श्यते विलसत इत्येवं शोभमाने बालव्यजने आकृतिरूपे । 'छत्तचामरपडागजूअलचमंडिया' इत्यजितशान्तिस्तवनात् । चामरे यस्यां यस्या वा । पुनः किंभूता । धृतमाकलितमाकारकायमातपत्रं छत्रं यया । स्फुरद्भिः प्रकटीभवद्भिः रेखाकारधारिभिर्वारिजैः पद्मैर्विराजमाना शालिनी ॥

कथंचनाभ्यर्थनया मृदुत्वं रागश्रियं चाप्य पदारविन्दात् ।
प्रवालमाला धरणीरुहाणामिवाधमर्णीभवति स्म तस्याः ॥ २६ ॥

धरणीरुहाणां पादपानां प्रवालमाला पल्लवपङ्क्तिः । तरूणां प्रवालकथनेन विद्रुमाणां निरासः कृतः । उत्प्रेक्ष्यते—तस्या देव्या अधमर्णीभवति स्म ग्राहका जाताः । किं कृत्वा । कथंचन महता कष्टेन केनापि प्रकारेण वा अभ्यर्थनया देवीपुरस्ताद्याचनया कृत्वा पदारविन्दादर्थात् शासनदेवीचरणकमलान्मृदुत्वं सौकुमार्यं च पुनः रागश्रियं लौहित्यलक्ष्मीं चाप्य लब्ध्वा ॥

प्रसादकान्ती दधती सुवर्णालंकारिणी रम्यतमक्रमा च ।
संश्लेषदक्षाप्रतिमोपमानश्रीः श्लोकमालेव सुरी चकासे ॥ २७ ॥

सुरी(शान)त्रिदशी श्लोकमालेव अनुष्टुभां पङ्क्तिरिव चकासे दीप्यते स्म । किंभूता सुरी श्लोकमाला च । प्रसादं प्रसन्नभावं कान्तिं शोभां वपुर्दीप्तिं वा तथा झगित्यर्थावबोधगोचरत्वं प्रसादगुणः । तथा दीप्तरसत्वं कान्तिस्ते दधती दधाना । पुनः किंभूता । सुवर्णैः काञ्चनैर्विरचिता अलंकारा अङ्गप्रत्यङ्गाभरणानि विद्यन्ते सन्ति वास्याः । तथा शोभना वर्णा अक्षराणि । तथा उपमोत्प्रेक्षारूपकाद्या अलंकारास्ते सन्ति अस्यामिति । अस्त्यर्थीय इन् । पुनः किंभूता । रम्यतमौ अतिशयेन मनोज्ञौ सामुद्रोक्तलक्षणलक्षितावत एवातिरुचिरौ क्रमौ चरणौ यस्याः अतिरमणीयचतुश्चरणा अनुक्रमो वा यस्याः । पुनः किंभूता संश्लेषे स्वकामुकेन वल्लभेन समं सस्नेहसरोमाञ्चाञ्चितं लतावेष्टितकाद्यालिङ्गनविशेषे निपुणा चातुर्यवती । तथा । शब्दगुणार्थगुणशब्दालंकारार्थालंकारादिरूपः सम्यक् समीचीनश्चेतश्चमत्कारकारी श्लेषस्तत्र दक्षा पट्वी । पुनः किंभूता । अप्रतिमोपमानश्रीः न विद्यते प्रतिमा सादृश्यं यस्याः । 'न तन्मुखस्य प्रतिमा

चराचरे' इति नैषधे । तादृशी उपमानश्रीः शोभा लक्ष्मीर्वा यस्याः । तथा अप्रतिमा असाधारणा उपमानैरुपलक्षणादुत्प्रेक्षाद्यैः श्रीर्लक्ष्मीः शोभा यस्याः ॥ इति पादाः ॥

यत्पादराजौ परिशुद्धपार्ष्णी निर्जित्य गत्याखिलराजहंसान् ।
उच्चै रुचिस्फूर्तिमिषाज्जिगीषू प्रस्थातुकामाविव नाकिनागम् ॥ २८ ॥

यस्या देवतायाः पादौ चरणावेव राजौ राजानौ पार्थिवौ अपरावपि बलवद्भूपती नाकिनां नागं गीर्वाणानां वारणमैरावणं निर्जरश्रेष्ठं शक्रं वा । यदुक्तं हैम्याम्—'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्यास्तल्लजश्च मतल्लिकाः । मचर्चिकाप्रकाण्डोद्धयः प्रशस्यार्थप्रकाशकाः ॥' इति । जिगीषू जेतुमिच्छन्तौ सन्तौ । रुचीनां निःसरद्बहलप्रबलकान्तीनां स्फूर्तेः स्फुरणस्य मिषात्कपटात् । उत्प्रेक्ष्यते—उच्चैरूर्ध्वं स्वर्गलोकं प्रति प्रस्थातुकामौ गन्तुमीहमानाविव प्रचलितुमनसाविव । ऐरावणवासवयोः स्वर्गस्थायुकत्वेन उच्चैर्गमनम् । राज्ञामपि इन्द्रनिर्जयनं दृश्यते । यथा रघुवंशे इन्दुमतीस्वयंवरे कार्तवीर्यवर्णनाधिकारे—'कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमा प्रसादात्' । तथा सूक्ते—'दृषद्भिः सागरो बद्धः इन्द्रजिन्मानवैर्जितः । वानरैर्वेष्टिता लङ्का जीवद्भिः किं न दृश्यते ॥' इति । किं कृत्वा । गत्या गमने विलासेन प्रयाणेनाभिलाषेण तेन वाखिलान् समस्तान् राजहंसान् सितच्छदान् पार्थिवपुङ्गवांश्च । प्रबलपृथिवीपुरंदरानित्यर्थः । निर्जित्य पराभूय स्ववशीकृत्य च । किंभूतौ पादराजौ । परि सामस्त्येन सर्वप्रकारेण समन्तात्समग्रतया वा शुद्धो लाञ्छनाभावेन निर्मलः पार्ष्णिः घुटयोरधः प्रदेशो ययोः । तथा परि समन्तात् समग्रस्वपदेशापेक्षया निर्दोषो विरोधादिरहितः पार्ष्णिः पाश्चात्यो विजयिनो राज्ञः स्वदेशपृष्ठवर्ती राजा ययोस्तौ ।'शुद्धपार्ष्णिरयान्वितः' इति रघुवंशे । यो विजयी नृपोऽपरदेशसाधनार्थं प्रतिष्ठते सोऽवश्यं स्वदेशपाश्चात्यं पार्थिवं पुरग्रामाश्च हस्त्यादिप्रदानेन मैत्रीविधानेन च शुद्धं स्वानुकूलीकरोतीति स्थितिः । नो चेदशुद्धः स तद्देशे विद्वरं कुरुते तस्मान्निर्दोषीकरणं तदभिधानं च पार्ष्णिरित्युच्यते ॥ इति पार्ष्णिः ॥

जम्भद्विषत्कुम्भिपराभविन्या ययातिभूतिं गमितः स्वगत्या ।
किं हंसकस्तां चरणारविन्दे तस्थौ प्रसत्तेर्विषयीचिकीर्षुः ॥ २९ ॥

हंस एव हंसकः । स्वार्थे कः । राजहंसः नूपुरम् । 'पिण्याकझर्झरहंसकशङ्खपुङ्खाः' इति लिङ्गानुशासने· पुंनपुंसकलिङ्गः । चरणारविन्दे अर्थाद्देवीपादपद्मे तस्थौ स्थितवान् । उत्प्रेक्ष्यते—तां शासनदेवतां प्रसत्तेः प्रसादस्य विषयीचिकीर्षुः किं गोचरीकर्तुमिच्छुरिव । हंसकः कथंभूतः सन् । यया त्रिदश्या स्वगत्या निजगमनातिविलासेन अतिभूतिं पराभवं गमितः प्रापितः सन् । किंभूतया गत्या । जम्भनामा दैत्यस्तस्य द्विषन् वैरी हन्ता वासवस्तस्य कुम्भी हस्ती ऐरावणस्तं पराभवति निर्जयति इत्येवंशीला तया ॥

स्वजिह्मयानेन विगानितः सन्नाखण्डलः कुण्डलिनामिवैताम्।
सिञ्जानमञ्जीरविनिर्मिताङ्गः प्रसाहयत्यङ्घ्रिपयोजलग्नः ॥ ३० ॥

कुण्डलिनां भुजंगमानामाखण्डलः पुरंदरः स्वामी शेषनामनागाधिराजः पादपयोजे क्रमकमले लग्न आश्रित्य स्थितः सन्। उत्प्रेक्ष्यते—एतां शासनदेवतां प्रसन्नां करोतीव। प्रसादकलितां निर्मिमीत इव। यो हि बलवन्तं निजजेतारं प्रसादयितुमिच्छति स तत्पदयोर्लगति। चाटुवाक्यानि ब्रूते। इति रीतिः। किंभूतः। सिञ्जानं शब्दायमानं रणझणितिरावं कुर्वाणं यन्मञ्जीरं नूपुरं तदेव विहितं निर्मितमङ्गं वपुर्येन। पुनः किंलक्षणः सन्। स्वस्यात्मनो जिह्मेन वक्रेण यानेन गमनेन। यौवनोन्मादेन प्रायः स्त्रीणां गतिर्वक्री भवति। अपरोऽपि पाठः। यथा—'स्वश्लोकशौक्ल्येन' स्वस्यात्मनः श्लोकस्य यशसः शौक्ल्येन शुक्लतया वा विगानितोऽधरीकृतः॥ इति चरणनूपुरम्॥

यया जगज्जैत्रतमश्रियाङ्घ्रिगुल्फः परां कोटिमवापितः सन्।
पराक्षिलक्ष्यत्वमयांबभूव न चक्रवर्ती तु कदाचनापि ॥ ३१ ॥

यया शासनदेवतया जगतां भुवनानां तात्स्थ्यात्तद्व्यपदेशात्त्रैलोक्यकामिनीनां जैत्रतमया अतिशयेन जैत्रया जयनशीलया श्रिया आत्मलक्ष्म्या परां प्रकृष्टां कोटिमुत्कर्षं काष्ठामवापितो नीतः सन्। पराक्षिलक्ष्यत्वम् अङ्घ्रिगुल्फश्चरणग्रन्थिघुण्टकः कदाचनापि कस्मिन्नपि समये पराक्षिलक्ष्यत्वं परेषामन्येषां चक्षुष्मतामक्ष्णोर्लोचनयोर्लक्ष्यत्वं दृश्यतां गोचरत्वं न अयांबभूव गच्छति स्म। 'अय गतौ' इत्यस्य धातोराम्प्रत्यये प्रयोगा यथा—अयांचक्रे, अयांबभूव, अयामासेति। क इव। चक्रेण नरखेचरेन्द्राद्यप्रतिहतेनामोघरथाङ्गायुधेन वर्तते। षट्खण्डक्षोणीमण्डलान्तरे प्रवर्तते दिग्विजयं विदधातीत्येवंशीलचक्रवर्ती सार्वभौम इति। यथा चक्री परेषां प्रत्यर्थिनां कदाचिदपि कस्मिन्नपि प्रस्तावे आजीवितान्तमक्षिलक्ष्यत्वं लोचनगोचरत्वं तां नायते न प्राप्नोति। प्रतिभटैर्भूपैर्दृष्टचापि द्रष्टुं न शक्यते इत्यर्थः। एतावता देवीगुल्फौ न दृश्येते। स्त्रीणां गुल्फजानू अदृश्यावेव श्लाघ्येते इति सामुद्रशास्त्रे। तथा 'गुल्फद्वयाप्ता यददृश्यसिद्धिः' इति नैषधे॥

यज्जङ्घयाधःकरणादुदीतव्रीडातिरेकादिदमीयगुल्फः।
मन्ये न्यमज्जन्नवनिर्यदर्चिरर्णःप्रपूर्णीभवदङ्घ्रिशोणे ॥ ३२ ॥

यस्याः शासनसुराङ्गनायाः जङ्घया अधःकरणान्नीचैर्विधानात्तिरस्करणाद्वा उदीता प्रकटीभूता। 'उदीतमातङ्कितवानशङ्कत' इति नैषधे। या व्रीडा लज्जा तस्या अतिरेकादतिशयात् अस्या अयमिदमीयः। 'मध्यं तनूकृत्य यदीदमीयम्' इति नैषधे। देवीचरणसंबन्धी गुल्फो घुण्टकः। अहमेवं मन्ये वितर्कयामि। नवानि नवीनानि निर्यन्ति प्रादुर्भवन्ति यान्यर्चींषि अर्थात्तत्क्रमकान्तयः तान्येवार्णांसि पानीयानि तैः प्रपू-

र्णीभवन्नाकण्ठं व्याप्तः संपद्यमानः अञ्जिर्देवीपादः स एव शोणो ह्रदस्तस्मिन्यमजन्किमु ब्रूडति स्मेव ॥

श्रीमज्जिनाधीशमताधिदेव्या जङ्घे विभूषामनघे दधाते ।
किमु प्रगल्भक्रमनामधेयवृन्दारकोर्वीरुहयोः प्रकाण्डे ॥ ३३ ॥

श्रीमांश्चतुस्त्रिंशदतिशयादिका लक्ष्मी त्रैलोक्याधिपत्यलक्ष्मीर्वा विद्यते यस्य स श्रीमान् यो जिनानां जयन्ति सर्वथापि रागद्वेषादिकानन्तरङ्गान् शात्रवानिति जिनास्तेषां सामान्यकेवलीनामधीशः स्वामी तीर्थंकरोऽर्थान्महावीरभगवान् तस्य मतं शासनं तस्याधिदेव्या अधिष्ठायिकाया देवतायाः अनघे निष्पापे प्रशस्ये जङ्घे नलकिन्यौ विभूषां शोभां दधाते कलयतः । उत्प्रेक्ष्यते—प्रगल्भौ प्रकृष्टौ यौ क्रमौ देवीपादौ तावेव नामधेयमभिधानं ययोस्तादृशयोर्वृन्दारकोर्वीरुहयोः कल्पवृक्षयोः । प्रकाण्डे किमु वृक्षस्कन्धाविव । 'मूलाच्छाखावधिर्गण्डिः प्रकाण्डौघः' इति हैम्यां प्रकाण्डः पुंक्लीबलिङ्गयोः ॥

यस्याः प्रकाण्डस्फुरदुग्रजङ्घा सदृक्षलक्ष्मीस्पृहयालवः किम् ।
विषह्य भारं भवनव्रजानां स्तम्भा मनुष्याननुपकुर्वते स्म ॥ ३४ ॥

स्तम्भाः स्थूणाः भवनव्रजानां गृहगणानां भारं वीवधं विषह्य क्षान्त्वा मनुष्यानुपलक्षणात्सुरान् त्रिभुवनेऽपि गृहभाराधारभूतस्तम्भानां विद्यमानत्वेन एतावता त्रिजगज्जनानुपकुर्वते स्म उपकारं कुर्वन्ति स्म । उत्प्रेक्ष्यते—यस्यास्त्रिदश्याः प्रकाण्डे वृक्षस्कन्धाविव स्फुरन्त्योः शोभमानयोः जङ्घयोः सदृक्षलक्ष्म्याः समानविभूषायाः स्पृहयालवः किम् अभिलाषुका इव कामयितार इव ॥

सारङ्गनाभीसुरभेरमुष्या जङ्घाविभूषाभिरधःकृताभिः ।
मृगाङ्गनाभिर्गिरिगह्वरोर्वी मन्दाक्षलक्ष्याभिरिव प्रपेदे ॥ ३५ ॥

मन्दाक्षस्य लज्जाया लक्ष्याभिर्वेध्याभिस्त्रपातिरेककलिताभिर्मृगाङ्गनाभिर्हरिणरमणीभिः । उत्प्रेक्ष्यते—गिरिगह्वरोर्वी गिरीणां शैलानां गह्वराणां गुहानाम्, अथ वा निकुञ्जानामुर्वी भूमिः । 'गह्वरो बिलभेदयोः । कुञ्जे' इत्यनेकार्थः । तथा 'गौरीगुरोर्गह्वरमाविवेश' इति रघुवंशे । 'परस्परमिलच्छाखापटलपादपङ्क्तिनिबिडवनमित्यर्थः' इति तद्वृत्तिः । प्रपेदे प्रपन्नेव । किंभूता । मृगनाभिः सारङ्गनाभिः कस्तूरिका । 'गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपा पुनरुक्तयन्ती' इति नैषधे । तथा कस्तूरिकानामापि । 'मृगनाभिर्मृगमदः कस्तूरीगन्धधूल्यपि' इति हैम्याम् । तद्वत्सुरभेः सुगन्धायाः । श्वासवपुःपरिमलकलिताया इत्यर्थः । अमुष्या वर्ण्यमानशासननिर्जरनितम्बिन्याः जङ्घयोर्नलकिन्योर्विभूषाभिः शोभाभिरधःकृताभिस्तिरस्कृताभिः । जिताभिरित्यर्थः ॥

जङ्घे यदीये प्रणयन्प्रयत्नात्प्रकाण्डसारं पृथिवीरुहाणाम् ।
जग्राह धाता किमभावि तेषु ततः स्फुरत्कोटरकूटरन्ध्रैः ॥ ३६ ॥

यस्या इमे यदीये देवतासंबन्धिन्यौ जङ्घे प्रयत्नात्सादरादेकतानतया वा एकाग्रमनसा प्रणयन्कुर्वन् सन् धाता जगत्कर्ता पृथिवीरुहाणां रमणीयसान्द्रद्रुमाणां प्रकाण्डानां सारं सारदलिकपटलं जग्राहाददे गृहीतवान् । उत्प्रेक्ष्यते—ततः सारवस्तुग्रहणानन्तरं तेषु प्रकाण्डेषु तरुस्कन्धेषु स्फुरन्तः प्रकटीभवन्तो ये कोटराः निष्कुहाः । 'पोलाडि' इति लोके प्रसिद्धाः । त एव कूटं कपटं येषां तादृशै रन्ध्रैश्छिद्रैरभावि भूतम् । संजातमित्यर्थः ॥ इति जङ्घे ॥

कपोलयुग्मेन मरुद्युवत्या तिरस्कृते दर्पणिके विभूत्या ।
गुप्तं स्थिते जानुनिभादुपेत्य जेतुं द्विषं छिद्रदिदृक्षयेव ॥ ३७ ॥

दर्पणिके आदर्शिके । 'यन्मतौ विमलदर्पणिकायाम्' इति नैषधे । उपेत्य । कुतश्चिदागत्य गुप्तं छन्नं स्थिते तिष्ठतः स्म । कस्मात् । जान्वोर्जानुनो रूपवर्णोर्निभाद्दम्भात् । अर्थात् तद्देवी वपुष्येवोषिते । उत्प्रेक्ष्यते—द्विषं स्वशात्रवं जेतुं पराभवितुं छिद्राणां वैरिणोरपगुणानां दोषाणां यैर्गवेषितैर्दोषैः स्वद्वेषी सुखं निमेषमात्रान्निहन्यते निर्जीयते वा । तद्रन्ध्राणां दिदृक्षया द्रष्टुमिच्छयेव । तथा दोषे ज्ञाते सति शत्रुः सुखेन पराभूयते इति लोकेऽपि प्रसिद्धिः । तस्मात् किंलक्षणे दर्पणिके । मरुद्युवत्याः गीर्वाणगृहिण्याः । शासनदेव्या इत्यर्थः । कपोलयुग्मेन गल्लयामलेन विभूत्या स्वीयवैभवेन कृत्वा तिरस्कृते तिरस्कारं न्यक्कारं प्रापिते । पराभूते इत्यर्थः । गुप्तमिति विशेषणात् दृश्यते । 'निगूढजाणु—' इति कल्पसूत्रेऽपि लक्ष्मीवर्णने ॥

आदर्शिकाघानि मिथो मृधेषु यज्जानुना स्पर्धितया स्वकान्त्या ।
ततः किमु प्रापदतुच्छमूर्छां न वेद चैतन्यवती किमेषा ॥ ३८ ॥

यज्जानुना यस्या देवताया नलकीलेन स्वस्यात्मनः कान्त्या विभूषया । 'कान्तिः शोभायामिच्छायां प्रभायामपि' इत्यनेकार्थः । समं सार्धं स्पर्धितया स्पर्धोद्भावुकभावेन संहर्षित्वेन मिथो मृधेषु परस्परक्रोधोद्धततया विधीयमानयुद्धेषु आदर्शिका मुकुरिका लोके मेवातमण्डलादौ यस्या अधो हस्तको न स्यात् पृष्ठे च ग्रहणार्हं किमप्यङ्कुटकादि भवेत्तस्या अभिधानम् 'आरसी' इत्युच्यते । अघानि दृढप्रहारादिभिर्निहता । उत्प्रेक्ष्यते—ततः प्रहारादिहेतोरतुच्छामतिघनां वालयितुमशक्यां मूर्छां मोहचैतन्याभावं किमु प्रापल्लब्धवतीव । एवं चेन्न तर्हि एषा आदर्शिका अचैतन्यवती चेतनाया भावश्चैतन्यं तद्विद्यते यस्याः सा चैतन्यवती न चैतन्यवती अचैतन्यवती चेतनाविरहिता किं कथं लक्ष्यते ॥ इति जानू ॥

रम्भास्फुरद्वैभवयत्सुपर्वसारङ्गदृक्केलिनिकेतनस्य ।
अन्तर्वसत्सालसदृक्स्मरस्य स्तम्भौ प्रगल्भौ स्फुरतः किमूरू ॥ ३९ ॥

गुरू अर्थाद्यस्याः स स्फुरतः शोभेते । उत्प्रेक्ष्यते—रम्भा नामाप्सरास्तद्वत्स्फुरन् प्रकटीभवन् दीप्यमानो वा वैभवो वपुःशोभातिशयः तादृशी या सूरिपुरस्तात्स्थायुका

चासौ सुपर्वसारङ्गदृक् च सुरहरिणीनयना शासनदेवी सैव केलये क्रीडाकृते अर्थान्मनोभवस्यैव यन्निकेतनं मन्दिरं तस्य स्तम्भौ स्थूणे इव । अन्यदपि रम्भागृहं कदलीगृहं 'केलिहरं' इति वा प्रसिद्धम् । तत्राप्याधारस्तम्भौ भवतः । किंलक्षणस्य गृहस्य । अन्तः सौधमध्ये वसन् वासं विदधानः तिष्ठन् । सह अलसदृशा, मन्थरनयनया, स्वगुणेनोपमानेन मनोज्ञादिपदेन च विशेषिताङ्गकर्मा स्त्री यथा तरललोचना । 'अलसेक्षणा मृगाक्षी' इति हैम्याम् । स्त्रिया रत्या वर्तते यः स स्मरः कामो यत्र तस्य ॥

यदूरुसृष्टयै करिणां करेभ्यो मन्ये मृदुत्वं गृहयांबभूव ।
स्वयं स्वयंभूरिति तेषु नो चेदेकान्तकार्कश्यमिदं कुतस्त्यम् ॥ ४० ॥

यदूरुसृष्टयै यस्या देवताया उर्वोः सक्थ्नोः सृष्टयै निर्माणाय स्वयंभूर्विधाता स्वयमात्मना नान्यैरत्राहमेवं मन्ये जानामि वितर्कयामि करिणां गजेन्द्राणां करेभ्यो हस्तेभ्यः । शुण्डादण्डेभ्य इत्यर्थः । मृदुत्वं सकुमारभावम् । सौकुमार्यकलितदलिकसारमित्यर्थः । गृहयांबभूव गृहीतवान् । 'गृह्णाति गृहयते लाति' इति ग्रहणार्थाः क्रियाः क्रियाकलापे । 'जन्तादाम्' इति गृहयांबभूवेति । एवं चेन्न तर्हि तेषु हस्तिहस्तेषु इदं प्रत्यक्षलक्ष्यं सर्वजनप्रतीतं वा एकान्तेन अतिमात्रं केवलं वा कार्कश्यं त्वचि काठिन्यं कुतस्त्यं कुतोभवम् । ततो ज्ञायते सौकुमार्ये गृहीते केवलं कर्कशतैव स्थितवती । 'नागेन्द्रहस्तास्त्वचि कर्कशत्वात्' इति कुमारसंभवेऽपि ॥

दृप्तां यदूरुद्वितयीं प्रतीपामन्विष्य संहर्षकरीं करेण ।
प्रणश्य भीत्याभ्रमुकामुकः किं दम्भोलिपाणिं शरणीचकार ॥ ४१ ॥

अभ्रमुकामुक ऐरावणगजः । 'पयोनिलीनाभ्रमुकामुकावलीरदान्' इति नैषधे । 'ऐरावतो हस्तिमल्लः श्वेतगजोऽभ्रमुप्रियः' इति हैम्यामपि । भीत्या भयेन कृत्वा प्रणश्य प्रपलाय्य दम्भोलिपाणिं वज्रिणं पुरंदरं शरणीचकार आश्रितवान्, वज्रपाणित्वेन देवदानवमानवैरजेय इति तं बभाज । भीतेः कारणमाह—किं कृत्वा । करेण स्वकीयशुण्डादण्डेन समं संहर्षकरीं स्पर्धाकारकाम् अत एव प्रतीपां प्रतिपक्षां तथा पुनर्दृप्तां बलिष्ठां यदूरुद्वितयीं देवीसक्थियुगलीमन्विष्य व्यालोक्य ॥

तत्कैव वार्ता मम राजहंसान्सर्वानसौ यज्जयति स्वगत्या ।
इत्यूरुकायं किमु तावदस्याः करं करीन्द्रो व्यतरत्रिदश्याः ॥ ४२ ॥

असौ देवी स्वगत्या निजगमनेन आत्मीयाभिषेणयेन कृत्वा सर्वान् समस्तानपि राजहंसान् प्रकृष्टबलिष्ठभूपालान् तत्त्वतस्तु स्वमन्थरगमनविलासेन कृत्वा राजमरालान् यत्कारणाज्जयति स्ववशीकरोति पराभवति च, तत्तस्मात्कारणात् मम पशुमात्रस्य परवशीभूतस्य च कैव वार्ता मज्जयेऽस्या न कश्चिदपि प्रयासः । यतोऽहं करो राजदेयांशोऽस्यास्तीति करदाता चतुष्पदमात्रं तस्मान्मज्जयमवश्यमेषा कर्त्र्येवेति । उत्प्रेक्ष्यते—इति हेतोः करीन्द्रो गजराजः तावत्प्रथममेवास्यास्त्रिदश्या जघनेन कट्या अग्रभागेन

बभासे शुशुभे, मन्ये इत्युत्प्रेक्षायाम् । उत्प्रेक्ष्यते—अथवा जघनस्थलशोभाविषये अहमेवं मन्ये विचारयामि यत्स्वस्यात्मनो विलासवत्या रत्या पत्न्या सह रिरंसया रन्तुमिच्छया सुरतादिविविधक्रीडाविलासकरणार्थं सुमनःशरेण कुसुमबाणेन मनोभवेन कृतेन देवशक्त्या स्वयं विनिर्मितेन विनोदविधायिना क्रीडानिर्माणसमीहोत्पादकेन जाम्बूनदस्य जात्यकाञ्चनस्य मन्दिरेण सदनेनेव ॥

भस्मीकृतं धूर्जटिनाक्षिलक्ष्यीकृत्य प्रसूनध्वजजीवितेशम् ।
मा हन्तुमामेष इतीव रत्या गुप्तं गृहं यज्जघनं व्यधायि ॥ ४३ ॥

रत्या स्मरपत्न्या यज्जघनं देव्याः कटेरग्रभागः 'पेड्ड' इति प्रसिद्धं गुप्तं छन्नं परलोचनागोचरं गृहं व्यधायि स्थानं चक्रे । किं कृत्वा । धूर्जटिना शंभुना भस्मीकृतं निजातिकोपप्रज्वलल्ललाटलोचनानलज्वालावलीभिर्ज्वालितं भस्मावशेषीकृतं प्रसूनध्वजो मदनः । 'प्रद्युम्नः श्रीनन्दनश्च कन्दर्पः पुष्पकेतनः' इति हैम्याम् । 'केतुः पताका केतनं ध्वजः' इति ध्वजनामानि हैम्याम्, यथा पुष्पकेतनस्तथा प्रसूनध्वज इति, स एव जीवितेशः स्वप्राणनाथो भर्ता स्मरस्तमक्ष्णोः स्वनेत्रयोर्लक्ष्यं दृश्यम् । स्वदृग्गोचरमित्यर्थः । कृत्वा । व्यालोक्येत्यर्थः । तत्रोत्प्रेक्ष्यते—इति हेतोरिव । इति किम् । यदेष धूर्जटिः स्मरशत्रुत्वान्मां स्मरपत्नीं मा हन्तुं मा व्यापादयतात् ॥ इति जघनम् ॥

तीर्थाधिभर्तुर्मतदेवतायाश्चकास्ति लक्ष्म्याप्रतिमो नितम्बः ।
मोघीकृतेषूमखजिद्द्विषन्तं जेतुं धृतं चक्रमिव स्मरेण ॥ ४४ ॥

तीर्थस्य चातुर्वर्ण्यस्य संघस्याधिभर्ता स्वामी नायकः जिनो महावीरस्तस्य यन्मतं शासनं तस्य देवता अधिष्ठायिका देवी तस्या लक्ष्म्या शोभया कृत्वा अप्रतिमः न विद्यते प्रतिमा प्रतिरूपं सदृशं वस्तु यस्य स नितम्ब आरोहः कटीपृष्ठप्रदेशः । 'नितम्बारोहौ स्त्रीकट्याः पश्चाज्जघनमग्रतः' इति हैम्याम् । चकास्ति शोभते । उत्प्रेक्ष्यते—मोघीकृता निष्फला विहिता इषवो बाणा येन तादृशो यो मखजित् मखनामा कश्चिद्दानवविशेषस्तस्य जित् जेता एतावता ईश्वरः स एव द्विषन् प्रत्यर्थी तं जेतुं स्मरेण कामेन धृतं धारितमङ्गीकृतं चक्रमायुधविशेष इव । नितम्बस्य चक्रोपमानम् । यथा—'रोमावलीदण्डनितम्बचक्रे' इति नैषधे । तथा—'पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया । विधिरेकचक्रचारिणं किमु निर्मित्सति मान्मथं रथम् ॥' इत्यपि नैषधे ॥

यदङ्गरङ्गन्नवराजधानीनिवासिनः श्रीसुतभूविवोढुः ।
स्फुटीभवत्पुष्परथस्य शङ्के रथाङ्गमेतत्त्रिदशीनितम्बः ॥ ४५ ॥

त्रिदश्याः शासनदेव्या नितम्बो विभातीति संबन्धः । उत्प्रेक्ष्यते—यस्या देवताया अङ्गं शरीरं तदेव रङ्गन्ती जङ्गमा नवा राजधानी स्कन्धावारो मूर्धाभिषिक्तनिवासनगरी तत्र निवसतीत्येवंशीलो यः श्रीसुतो लक्ष्मीनन्दनो मदनः स एव भूविवोढा धरणीरमणस्तस्य पुष्परथस्य क्रीडाकरणोचितशताङ्गस्य । 'सक्रीडार्थः पुष्परथः' इति हैम्याम् ।

स्फुटीभवत्प्रकटं जायमानमेतत्प्रत्यक्षं रथाङ्गं देवीनितम्बतनुचक्रमिव शङ्के इवार्थे । अथ वा अहमेव शङ्के वितर्कं कुर्वे । स कः । एतत्त्रिदशीनितम्बः एतस्या देव्या आरोहः ॥ इति नितम्बः ॥

एतत्कलत्रस्य हरेः कलत्रजैत्रस्य सौभाग्यमुदीर्यते किम् ।
गाङ्गेयमप्यातनुते स्म काञ्चीनिभान्निजालिङ्गनलालसं यत् ॥ ४६ ॥

हरेः केसरिणः कलत्रं कटीकटः । 'कटिः श्रोणिः कलत्रं कुटीरं काञ्चीपदं ककुद्मती' इति हैम्याम् । तस्य जैत्रस्य जयनशीलस्य तथा हरेः विष्णोः कलत्रस्य पत्न्या लक्ष्म्याः । जैत्रस्येत्यप्यर्थध्वनिः । एतस्या देव्याः कलत्रस्य कट्याः । एतस्य कस्यापि कलत्रस्य पत्न्या इत्यप्यर्थध्वनिः । 'कलत्रं श्रोणौ भार्यायां दुर्गस्थाने च भूभुजाम्' इत्यनेकार्थः । 'द्वितीयोढा कलत्रं च' इति हैम्याम् । सौभाग्यं सुभगतां सौन्दर्यं चातुर्यं वा किमुदीर्यते । किमित्यनिर्वचनीयमाहात्म्यं वर्ण्यते इत्यर्थः । यद्यस्मात्कारणाद्गाङ्गेयं गङ्गातनयं भीष्मम् । अपिशब्देन ब्रह्मव्रतधारित्वेन सर्वथापि स्त्रीविषयविमुखमपीति लक्ष्यते । अथ च तत्त्वतो गाङ्गेयं सुवर्णं काञ्चीनिभान्मेखलाच्छलान्निजस्यात्मन आलिङ्गने परीरम्भणे लालसं लोलमौत्सुक्यं वा यस्य जातदोहदं वा तृष्णातिरेको वा यस्य तादृशमातनुते स्म चकार । 'लालसो लोलयाञ्चयोः । तृष्णातिरेक औत्सुक्ये' इत्यनेकार्थः । अमरस्तु—'इच्छातिरेकस्तु लालसा' ॥

अस्याः कलत्रं हरिजित्वरं यन्मा मां हरिं तज्जयताद्भियेति ।
अढौकि काञ्ची कनकस्य तेन शय्याब्धिमुक्तामणिमण्डितेव ॥ ४७ ॥

यद्यस्मात्कारणात् अस्या देव्या हरेः पञ्चाननस्य जित्वरं जयनशीलम् । अथ च कलत्रं पत्नीत्यर्थः । विद्यते तत्तस्मात्कारणात् मां नाम्ना एकाभिधानेन हरिं कृष्णमपि मा जयतान्मा पराभवतात् । इति हेतोर्भिया भयेन हरिणा अर्थात्प्रसत्तये शय्याभूतः पर्यङ्कभावप्राप्तस्याब्धेः समुद्रस्य मुक्तामणिभिर्मुक्ताफलै रत्नैश्च मण्डिता भूषिता कनकस्य स्वर्णस्य काञ्ची मेखलेवाढौकि प्राभृतीकृतेव ॥ इति कटिः ॥

उमोपयामे पुनराप्तजन्म शिशुस्मरस्येन्द्रगुरोरुपान्ते ।
अध्येतुकामस्य कलास्त्रिदश्याः पृष्ठस्थलीहाटकपट्टिकेव ॥ ४८ ॥

त्रिदश्याः शासनदेवतायाः पृष्ठस्थली तनोश्चरमप्रदेशः । 'पृष्ठं तु चरमं तनोः' इति हैमीवचनात् । उमायाः पार्वत्याः उपयामे पाणिग्रहणकरणानन्तरं समये हरिविरञ्चिशक्राद्यशेषवृन्दारकवृन्दातियाच्ञया प्रसन्नीभूतभूतपतिनिर्मितानुग्रहा पुनर्द्वितीयवारमाप्तं लब्धं जन्मोत्पत्तिर्येन अत एवाभिनवोत्पादहेतोः शिशोर्बालकस्य स्मरस्य मन्मथस्य हाटकस्य जात्यजाम्बूनदस्य पट्टिकेव हस्तलेखविधानपट्टिकेव । स्मरस्य किं कर्तुकामस्य । इन्द्रस्य पुरंदरस्य गुरोराचार्यस्य बृहस्पतेः । 'ईदृशीं गिरमुदीर्य बिडौजा जोषमास न विशिष्य बभाषे । नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥' इति नैषधे । 'अभिधाकु-

शलत्वेन वचनचातुर्ये' इति तद्वृत्तिः । उपान्ते समीपे कलामातृकाद्यारम्भतो लिखितगणितादिमाः शकुनरुतपर्यन्ताद्वा सप्ततिकला मानवप्रसिद्धाः । देवानां कलास्तु त एव विदन्ति नास्माकं वाङ्मनोगोचरा अध्येतुकामस्य पठितुमनसः ॥

संक्रान्तवेणीग्रथितप्रसूनपङ्क्तिर्बभौ पृष्ठतटे तदीये ।
संवेशनश्रान्तशयालुकामकृतेऽर्कतूली किमु निम्नमध्या ॥ ४९ ॥

तस्या देव्या इदं तदीयं तस्मिन्देवीसंबन्धिनि पृष्ठतटे 'वासउ' इति लोकप्रसिद्धं नाम वपुःप्रान्तप्रदेशे संक्रान्ता प्रतिबिम्बिता वेण्यां कबर्यां या ग्रथिता गुम्फिता वेणीग्रथनावसरे मध्ये संदब्धा प्रसूनानां कुसुमानां पङ्क्तिः श्रेणी बभौ विराजते स्म । उत्प्रेक्ष्यते—संवेशनेन रतिप्रीतिपत्नीभ्यां समं चिरसंभोगेन श्रान्तस्य श्रमं प्राप्तस्यात एव प्रायोभोगिनां शय्या कुसुमान्यास्तीर्यन्ते इति रीतिस्थिती । अर्कतूली शयालोर्निद्राशीलस्य कामस्य मदनस्य कृते कार्याय निम्नं गम्भीरं मध्यमन्तरालं शय्यामध्यवर्ती प्रदेशो यस्यास्तादृशी अर्कतूली अर्कतूलपटलोपचिता प्रसूनशयो वा प्रायो भोगिनां शय्या कुसुमान्यास्तीर्यन्ते इति रीतिस्थिती । अर्कतूलीनामा काचित् शय्याविशेषो वा ॥ इति पृष्ठदेशः ॥

आवर्तविभ्राजितरङ्गितान्तर्ज्योतिःपयःपूरितनाभिरस्याः ।
समं वशाभ्यां स्मरसिन्धुरस्य स्वैरं रिरंसोः स्फुरतीव शोणः ॥ ५० ॥

अस्याः शासननाकिनायकाया आवर्तेन भ्रमरकाकृतिविशेषेण, पयसां भ्रमेण वा । 'आवर्तः पयसां भ्रमः' इति हैमीवचनात् । विभ्राजते शोभते इत्येवंशीलं तथा तरङ्गाः कल्लोलाः संजाता अस्मिन्निति तरङ्गितं तादृशमन्तर्मध्यं येषां तादृग्विधानि ज्योतींषि स्वाभाविकरत्नस्फुरत्कान्तयस्तान्येव पयांसि सलिलानि तैः पूरिता व्याप्ता नाभिस्तुन्दकूपिका स्फुरति परमां स्फूर्तिमतिलभते। उत्प्रेक्ष्यते—वशाभ्यां रतिप्रीतिनामभार्याभ्यां हस्तिनीभ्यां च । 'वशा नार्यां वन्ध्यगव्यां हस्तिन्यां दुहितर्यपि । वेश्यायां च' इत्यनेकार्थः । स्वैरं स्वेच्छया रिरंसोः रन्तुमिच्छोः जलक्रीडां कर्तुकामस्य वा स्मरसिन्धुरस्य मदोन्मत्तोद्धतत्वान्मदनदन्तिनः कामरूपमहामृगेन्द्रस्य शोणो ह्रद इव । ह्रदेषु करिणः क्रीडन्त्येव ॥

प्रसारिशोचिर्मकरन्दसान्द्रा परिस्फुरत्कामुकदृग्द्विरेफा ।
अनन्यलावण्यजले यदीयनाभिर्बभौ जृम्भितपद्मिनीव ॥ ५१ ॥

अनन्यमसाधारणं यल्लावण्यं शरीरसौन्दर्यं तदेव जलं सलिलं तत्र यस्यास्त्रिदश्या इयं यदीया नाभिस्तुन्दकूपिका जृम्भिता विकसिता या पद्मिनी कमलं तद्वद्बभौ भाति स्म । 'पद्मिनी योषिदन्तरे । अब्जेऽब्जिन्यां सरस्यां च' इत्यनेकार्थः । किंभूता । प्रसारि प्रसरणशीलं यत् शोचिर्ज्योतिस्तदेव मकरन्दो मधुरसस्तेन सान्द्रा स्निग्धा । पुनः किंभूता । परि समन्तात्स्फुरन्तो ये कामुकास्तदभिलाषुकास्तेषां दृशस्तदुपरि निक्षिप्तने-

त्राणि । यदुक्तम्—'सा पिच्छइ पिअवयणं जोई पुणनाहि मण्डलं तीसे । पुव्वभवन्तरनेहो कागाइ चुणन्ति तक्करम् ॥' इति । ता एव द्विरेफा भ्रमरा यत्र ॥

यदङ्गगेहे निवसन्प्रसूनायुधः सुधाभुक्स्पृहयन्स्ववल्भाम् ।
अचीकरत्कूपमिवामृतस्य विरञ्चिना पूर्तकृतेव नाभिम् ॥ ९२ ॥

प्रसूनं कुसुममेवायुधं प्रहरणं यस्य । 'पुष्पाण्यस्येषुचापास्त्राणि' इति हैम्याम् । स स्मरः सुधाभुक् सुधां पीयूषं भुनक्ति आहारयति इति सुधाशनो देवः स्वस्यात्मनो वल्भामशनमाहारं स्पृहयन् काङ्क्षन् सन् । उत्प्रेक्ष्यते—नाभिमर्थाद्देवतातुन्दकूपिकां पूर्तकृतेव खनकेनेव विरञ्चिना ब्रह्मणा अमृतस्य पीयूषस्य कूपमचीकरत्कारयति स्म । किं कुर्वन् । स्मरः यदङ्गं यस्याः शरीरं तदेव गेहं सुवर्णसौधं तत्र निवसन्निवासं कुर्वन् ॥ इति नाभिः ॥

यस्यावलग्नेन विगानितेन पञ्चाननेनानुचिकीर्षयास्य ।
वैमुख्यभाजा विषयाद्विशेषात्किं तप्यते भूधरगह्वरान्तः ॥ ९३ ॥

पञ्चाननेन मृगेन्द्रेण भूधरस्य पर्वतस्य गह्वरान्तर्गुहामध्ये । उत्प्रेक्ष्यते—अस्यावलग्नस्य मध्यस्य अनुचिकीर्षया अनुकर्तुमिच्छया तप्यते तप इव क्रियते । किंभूतेन पञ्चाननेन । यस्या देवताया वलग्नेन मध्यप्रदेशेन विजितेन। पुनः किंभूतेन । विशेषाद्विशेषप्रकारेण विषयात् शब्दादिगोचरात् । 'संवत्सरेण रतमेति किलैकवारं सिंहावली द्विरदशूकरमांसभोजी' इति हेमचन्द्रवचनात् । अथ च विषयाज्जनपदाच्च विमुखः विरक्तेन पराङ्मुखेन च । प्रायः सिंहादयो हि श्वापदा विजनघनगहनसानुमत्कन्दरनिवासिन एव भवन्ति ॥

तपस्यतः शंभुदिधक्षयाङ्घ्रिकनिष्ठया स्पृष्टभुवः स्मरस्य ।
मध्यं पुरो निर्मितनाभिहोमकुण्डा तपोवेदिरिव क्रशिष्ठा ॥ ९४ ॥

अर्थसंगत्या शासनदेव्या मध्यं विभातीति संबन्धः । उत्प्रेक्ष्यते—शंभुदिधक्षया स्ववत् शंभोरीश्वरस्यापि दिधक्षया दग्धुमिच्छया भस्मसात्कर्तुं काङ्क्षया तपस्यतः तीव्रं तपः कुर्वतः । यतो घोरतपःसाधनमन्तरेण निजाभिलषितसिद्धिर्न स्यात् । तपसि स्थितस्य क्रशिष्ठा अतिशयेन कृशा वेदिरिव तपःकरणव्यतिकरोपवेशनवेदिकेव । किंभूता वेदिः । पुरोऽग्रभागे निर्मितं निष्पादितं नाभिरर्थाद्देवतायास्तुन्दकूपिकैव होमार्थं कुण्डं यस्याः । तापसा हि तपः साधयन्तः सन्तः मध्वज्यादि जुह्वति । किंभूतस्य स्मरस्य । अङ्घ्रेर्वामचरणस्य कनिष्ठया प्रान्ताङ्गुल्या कृत्वा स्पृष्टा आश्लिष्टा भूर्भूमिर्येन । 'भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम्' इति नैषधे । 'एतदेव तपस्विनां महत्तपः । यद्वामचरणकनिष्ठाङ्गुल्यग्रमात्रेण भुवं स्पृशंस्तपस्यति' इति तद्वृत्तिः । यादृक् शरीरावस्थितिक्षेत्रं तादृगेव स्थानं विलोक्यते तत एव क्रशिष्ठेति ॥

सर्वाङ्गसृष्टिं सृजतस्तदीयां धातुर्विलग्नस्य विधानकाले।
प्राप्तः क्षयं सारदलस्य कोशोऽल्पीयस्ततोऽभूदिव मध्यमस्याः ॥ ९९ ॥

तस्या इयं तदीया सर्वेषां समग्राणामङ्गानामवयवानां सृष्टिं रचनां निर्माणं सृजतः कुर्वतो धातुर्जगत्कर्तुर्विलग्नस्यार्थाद्देवीमध्यस्य विधानकाले प्रणयनसमये सारदलस्य प्रकृष्टनिर्माणयोग्यपरमाणुपिण्डस्य कोशो भाण्डागारः क्षयं क्षीणतां स्तोकभावं प्राप्तः। उत्प्रेक्ष्यते—ततस्तस्मात्कारणादस्यास्त्रिदश्या मध्यमल्पीयः अतिशयेनाल्पं कृशतममभूदिव जातम् ॥ इति मध्यम् ॥

यदङ्गयष्टीबहलीभविष्णुरोचिष्णुरोचिश्चयनिर्झरिण्याः।
प्रादुर्भवन्ती त्रिवलीविलासिकल्लोलमालेव विभाति मध्ये ॥ ९६ ॥

मध्ये अर्थाद्देव्या उदरे विलग्ने त्रिवली त्वक्संकोचलक्षणा त्रित्वसंख्यायुक्ता वली त्रिवली। यथा जिनप्रभसूरिकृतऋषभनम्रस्तवे—'त्रिजगतीं पुनती कविसेविता' इति। विभाति शोभते। 'मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला' इति कुमारसंभवे। 'मध्येनोदरेण' इति तद्वृत्तिः। तथा 'त्रयीमयीभूतबलीविभङ्गा,' पुनः 'उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु। धृततच्चतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥' इति नैषधे। उदरे वलित्रिकं भवेद्भाग्यवद्योषिताम्। उत्प्रेक्ष्यते—यदङ्गयष्ट्या यस्या देव्या अङ्गयष्ट्यास्तनूलतायाः। 'अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेषस्याहर्भूयः फणसमुचितः काययष्टीनिकायः' इति नैषधे। तत्र बहलीभविष्णुर्नीरन्ध्रभवनशीलः तथा रोचिष्णुः शोभनशीलो यो रोचिश्चयः कान्तिनिकरः स एव निर्झरिणी नदी तस्यां प्रादुर्भवन्ती प्रकटीसंजायमाना विलसति परस्परमाश्लिष्यतीत्येवंशीला कल्लोलमाला तरङ्गमण्डलीव। अथवा प्रकटीभवन्ती लोचनगोचरत्वमागच्छन्ती तिस्रश्च ता वल्यश्च त्रिवल्यस्त्रिवल्य एव विलसनशीला विराजमानस्वभावा लहरी राजीव ॥

चण्डी सपत्नी प्रबला ममास्ते ज्यायानजो वेदजडः पतिर्मे।
भर्त्रा वियोगो हरिणा ममापि दुःखं जहीदं तिसृणामपीति ॥ ९७ ॥
वक्तुं जगत्कल्पितकल्पवल्लि जह्नोर्विधेश्चांशुमतः सुताभिः।
मध्ये समेत्य त्रिवलीच्छलेन प्रसादपात्रीक्रियते किमेषा ॥ ९८ ॥

सुताशब्दः त्रिषु स्थानेषु प्रत्येकं योजनीयः। जह्नोर्नारायणस्य सुता गङ्गा। 'तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोः' इति रघौ। पुनर्विधेर्ब्रह्मणः सुता सरस्वती। 'ब्रह्मपुत्री सरस्वती' इति हैम्याम्। तथा 'दशमनामब्रह्मणः सुता' इति भारवीस्तोत्रे। च पुनरंशुमतः सूर्यस्य। 'स्यत्वेंशुपतिरंशुमान्' इति हैम्याम्। सुता पुत्री यमुना। 'कृतान्तजनकः प्रद्योतनस्तापनः'- इति हेमचन्द्रोक्तिः। तथा 'अलभत शमनस्वसुः

शिशुत्वं दिवसकराङ्कतले चला लुठन्ती’ इति नैषधे। एतावता गङ्गासरस्वतीयमुनानामन- ... मध्ये उदरे तिसृणां वलीनां त्वक्संकोचलक्षणानां छलेन कपटेन समेत्य देवीपार्श्वे आगत्य। उत्प्रेक्ष्यते—इति वक्तुं कथयितुम्। किम्। एषा देवीप्रसत्तेः प्रसादस्य पात्रं स्थानं क्रियते। याचना सफला तु प्रसादपात्रीकृतादेव प्रभोः स्यादतो देवी प्रसाद्यत इत्यर्थः। इति किम्। मम गङ्गायाः प्रबला सिंहयानत्वेन बलवती चण्डी अत्यन्तकोपना पार्वती सपत्नी वर्तते। द्वयोरपीश्वरपत्नीत्वेन सापत्न्यम्। तथा मम सरस्वत्याः पतिर्ज्यायानतिवृद्धः, तथाजः पशुर्ब्रह्मा, तथा वेदजडोऽज्ञानः। ‘स्थविरशतानन्दपितामहौ कस्तथा परमेष्टाजोऽष्टश्रवणः स्वयंभूः’ इति हैम्याम्। किमपि न वेत्ति वैदिकः। यतः ‘न वेदतां वेदजडः सवत्काम्’ इति नैषधे सरस्वत्या ब्राह्मणस्त्रीत्वम्। तथा एकादशं नाम ब्रह्माणी। इति हेतोर्मम पतिर्भर्तास्ते। तथा भर्त्रा प्रियेण हरिणा कृष्णेन सार्धं मम यमुनाया वियोगो विरहः। ‘जम्मन्तरेण विहडइ उत्तममहिलाणजं कियं पिम्मम्। कालिन्दा कन्हविरहे अज्जवि कालं जलं वहइ॥’ इति वृत्तरत्नाकरवृत्तिबोधकवचनात्। विद्यते इदमेतत्पूर्वोक्तलक्षणम्। तिसृणामप्यस्माकमुषितानां पूरणे प्रदाने कल्पवल्लि सुरलते जहि निवारय मूलाच्छिन्धि। इति विज्ञपयितुमिव। दुःखमसातम्॥

अध्यारुरुक्षोर्हृदधित्यकायां वपुर्गृहस्य स्मरमेदिनीन्दोः।
सौवर्णसोपानपरम्परेव मध्ये विरेजे त्रिवली त्रिदश्याः॥ ८९॥

त्रिदश्याः शासनदेवताया मध्ये उदरे त्रिवली विरेजे। हृत् हृदयमेव अधित्यकायामुपरितनभूमिकां चन्द्रशालिकामध्यारुरुक्षोरध्यारोढुमिच्छोः। यद्वपुः यस्या देव्या वपुरेव गृहं मन्दिरं यस्य तादृशः स्मरः कामः स एव मेदिन्या भूमेरिन्दुराल्हादकत्वाचन्द्रः। ‘कामयेम हि महीमिहिकांशो’ इति नैषधे। सौवर्णा सुवर्णसंबन्धिनी काञ्चनरचिता सोपानानामारोहणानां परम्परा श्रेणीव॥

जगत्त्रयीस्त्रैणजयार्जितायाः श्वैत्येन कीर्तेरनया विजित्य।
बन्दीकृता निर्झरिणी सुराणामिव त्रिवेणी त्रिवली चकास्ति॥ ९०॥

देव्या इति संबन्धात्। त्रिवली मांससंकोचलक्षणा त्रित्वसंख्याकलिता वली चकास्ति दीप्यते। उत्प्रेक्ष्यते—अनया शासनदेवतया कीर्तेः स्वकीययशसः श्वैत्येन शुभ्रिमश्रिया विजित्य पराभूय बन्दीकृता निगृह्य रक्षिता सुराणां निर्झरिणी नदीव गङ्गेव किं निर्झरिणी त्रिवेणी तिस्रो वेण्यः प्रवाहा यस्याः। ‘प्रवाहः पुनरोघः स्याद्वेणीधारा रयश्च सः’ इति हैम्याम्। तथा गङ्गायास्त्रिस्रोतस्त्वात्। ‘त्रिस्रोता जाह्नवी मन्दाकिनी’ इति हैम्याम्। कीर्तेः किंभूतायाः। जगतां स्वर्गपातालभूमण्डलानां त्रयी त्रिकं तस्याः स्त्रैणस्य स्त्रीसमूहस्य सुरासुरनरनागाङ्गनागणस्य जयेन निजवैभवभरेण पराभवेनार्जितायाः स्वीकृतायाः॥ इति त्रिवली॥

स्तनान्तरीपाङ्कवपुःप्रसर्पज्ज्योतिःस्रवन्तीसलिलप्ररूढा ।
लोमावली शैवलवल्लरीव रराज राजीवविलोचनायाः ॥ ६१ ॥

राजीवे कमले तत्तुल्ये विलोचने यस्याः कमलचक्षुषो देव्याः लोमावली रोमराजी रराज राजते स्म । उत्प्रेक्ष्यते—शैवलवल्लरीव शैवालमञ्जरीव । 'मुखेन्दुभातस्तनचक्रवाकचञ्चुच्युता शैवलवल्लरीव' इति कुमारसंभवे । किंभूता । स्तनौ कुचावेवान्तरीपे अन्तर्जले तटे द्वीपौ अङ्के उत्सङ्गे मध्ये यस्यास्तादृशे वपुषि काये वपुषो देहस्य वा प्रसर्पति कल्लोलविलासैरितस्ततः प्रसरति ज्योतिः कान्तिरेव स्रवन्ती नदी तस्याः सलिले पानीये जलमध्ये प्ररूढा समुद्गता । प्रादुर्भूतेत्यर्थः ॥

विनिद्रनीलोत्पलकेसरश्रीः स्वःसुभ्रुवो राजति रोमराजी ।
किं तुङ्गवक्षोजकलिन्दशृङ्गिशृङ्गान्तरोदीतकलिन्दकन्या ॥ ६२ ॥

स्वःसुभ्रुवः सुराङ्गनायाः । 'स्वः स्वर्गिवध्वोऽप्सरसः' इति हैम्याम् । रोमराजी रोमलेखा राजति । किंभूता । विनिद्राणि विकसितानि यानि नीलोत्पलानि इन्दीवराणि तेषामिव श्रीः शोभा सौन्दर्यं यस्याः । उत्प्रेक्ष्यते—तुङ्गावत्युच्चौ यौ वक्षोजौ कुचौ तावेव कलिन्दनाम्नः शृङ्गाणि शिखराणि सन्ति अस्यास्मिन्वा स शृङ्गी शैलस्तस्य शृङ्गान्तरे शिखरमध्ये उदीता प्रादुर्भूता कलिन्दकन्या कालिन्दी किं यमुनेव ॥

स्मरद्विपस्यैणमदाभिरामवक्षोजविन्ध्याचलसंनिधाने ।
नाभीह्रदाभ्यर्णविभासिनी यल्लोमावली केलिकृते वनीव ॥ ६३ ॥

यल्लोमावली यस्या रोमराजी स्मरद्विपस्य काम एवातिमदोन्मत्तत्वाद्गजः तस्य केलिकृते क्रीडाकरणार्थं वनी उद्यानमिव । 'स्ववनी संप्रवदत्पिकापि का' इति नैषधे । क्व स्थाने । एणमदैः एणानां मृगाणां मदैः क्रीडाविनोदरसैरभिरामः । 'मदो रसो मद्ये इभदानयोर्गर्वे । वीर्ये कस्तूरिकामुदोः' इत्यनेकार्थतिलकः । तत्त्वतस्तु कस्तूरिकाविलेपनाभिरामो यो वक्षोजः स्तनः । एवं जलबालकशैलस्तस्य संनिधाने समीपे । निकटवर्तिप्रदेशे इत्यर्थः । किंभूता वनी । नाभीरूपो ह्रदो ह्रदस्तस्याभ्यर्णे पार्श्वे विभासते शोभते इत्येवंशीला ॥

निजाक्षिलक्ष्मीहसितैणशावकश्रेण्या व्यभाल्लोमलता त्रिदश्याः ।
मध्यं कृशं वर्धयितुं किमस्या वयःश्रिया नीलमदायि सूत्रम् ॥ ६४ ॥

निजस्यात्मनोऽक्षिलक्ष्म्या नेत्रवैभवेन हसिता अवहेलिता एणानां सारङ्गाणां शावकानां बालकानां श्रेणी धोरणी यया तादृश्याः त्रिदश्याः शासनदेवतायाः लोमान्येव रोमाण्येव सरललताकारत्वाल्लतेव व्यभाद्बभासे । उत्प्रेक्ष्यते—अस्या देव्याः कृशं क्षामं परमाणुपरिमाणत्वात् । 'अध्यापयामः परमाणुमध्याः' इति नैषधे । मध्यमुदरं वर्धयितुं किंचिदुपचयगोचरीकर्तुं वयःश्रिया यौवनलक्ष्म्या । वयःशब्देनात्र तारुण्यमेव लक्ष्यते ।

यथा नैषधे—'उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयः कृतेन किम्'। 'यौवनेन कृतेन नवीनोपयानेन स्तनकलशद्वन्द्वेन' इति तद्वृत्तिः। नीलं नीलवर्णं सूत्रमदायि। दवरिकेव दत्ता 'दोरी' इति प्रसिद्धा। यः पदार्थो वर्धयितुं काङ्क्षते तत्र प्रथमं दवरिकासूत्रं दीयते इति सूत्रकृच्छिल्पे प्रसिद्धम्॥ इति रोमराजी॥

यस्याः स्तनौ संस्फुरतः सचित्तनिवासिमीनाङ्कमहीधनस्य।
विलासवत्योरिव शातकुम्भासंदृब्धलीलालयतुङ्गशृङ्गौ॥ ६५॥

यस्या अमर्त्यायाः स्तनौ पयोधरौ संस्फुरतः विलसतः। उत्प्रेक्ष्यते—चित्ते अर्थाद्देवीहृदये निवसनशीलस्य मीनो मत्स्योऽङ्कश्चिह्नं यस्य स मकरध्वजः स्मरः। 'निषधवसुधामाजाङ्कस्य प्रियाङ्कमुपेयुषः' इति नैषधे। स एव मही भूमिरेव धनं यस्य एतावता राजा तस्य मदननृपस्य विलासवत्यो रतिप्रीतिनाम्न्योर्नितम्बिन्योः शातकुम्भेन सुवर्णेन संदृब्धौ निर्मितौ घटितौ वा। हिरण्मयावित्यर्थः। लीलालययोः क्रीडामन्दिरयोस्तुङ्गावत्युन्नतौ शृङ्गौ शिखरे इव। 'नखयुगमधिकाङ्कः संयुगः पद्मरागो भगयुगमघटंगोद्योगशृङ्गा निदाघः' इति लिङ्गानुशासने पुंनपुंसकलिङ्गे॥

तन्निर्वृतेः स्थानमुरोजयुग्मं जागर्ति गीर्वाणमृगीदृशोऽस्याः।
प्रोद्यन्महानन्दरसा यदस्मिन्मुक्ता दृशो नोपनमन्ति भूयः॥ ६६॥

तत्तस्मात्कारणादस्या गीर्वाणमृगीदृशः शासनदेवतायाः उरोजयुग्मं वक्षोजन्मद्वन्द्वं स्तनद्वयं निर्वृतेर्मोक्षस्य सुखस्य च स्थानं पदं जागर्ति विद्यते। 'सत्तायामस्त्यास्ते जागर्ति च विद्यते' इति क्रियाकलापे सत्तार्थाः क्रियाः। प्रकटीभवति वा। यद्यस्मात्कारणात् अस्मिन् देव्याः उरोजयुग्मं पयोधरद्वन्द्वं मुक्ता मोक्षं प्राप्ताः संसारकारागारादिति। सकलकर्मक्षयान्मुक्तात्मतां गताः। कामुकै रागातिशयान्मुक्ताः प्रेषिता निःक्षिप्ता वा। दृशो दृष्टयः प्रोद्यन्प्रकटीभवन्महानतिशायि आनन्त्याश्रयत्वादानन्दः प्रमोदः संजायमानोत्कृष्टानन्दस्तस्य तत्र वा यो रसः आस्वादो रागो वा यासां तादृश्यः सत्यः भूयः पश्चान्न उपनमन्त्यागच्छन्ति। तत्रैव स्थितास्तिष्ठन्ति। मुक्तात्मानः कामुकदृष्टयश्च सर्वथापि पश्चान्नायान्त्येवेत्यर्थः॥

मित्रे गतेऽस्तं वियुनक्ति राजन्रात्रिः कलत्रं तव नः कुलानि।
इतीव दुःखं गदितुं प्रपन्नौ यद्वक्त्रचन्द्रं किमु चक्रवाकौ॥ ६७॥

कुचावेव चक्रवाकौ स्तनरूपौ वा रथाङ्गविहंगमौ यद्वक्त्रं यस्यास्त्रिदश्या वक्त्रं वदनमेव आननरूपं वा चन्द्रं द्विजपतिं प्रपन्नौ समाश्रितौ। 'त्वामेव वीततमसं परवादिनोऽपि नूनं विभो हरिहरादिधिया प्रपन्नाः' इति कल्याणमन्दिरस्तवने। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण दुःखं स्वकीयातीवासातं गदितुं कथयितुमिव। इति किम्। यत् हे राजन् हे कुवलयबान्धव हे मध्यमभुवनजनाह्लादक, मित्रे अर्थादस्माकं सुहृदि बान्धवे च भास्करे अस्तं क्षयं द्वीपान्तरं वा तेजोवसाने। 'व्रजति द्वीपान्तरमहर्मणिः' इति सूक्तमु-

क्ताकलापे। तव भवतः कलत्रं कामिनी यामिनी नः अस्माकं कुलानि गोत्राणि वंशान् वियुनक्ति वियोजयति। परस्परं वियोगं प्रापयति। यदुक्तम्—'उत्कूजति श्वसिति मुह्यति याति तीरं तीरात्तरुं तरुतलात्पुनरेति वापीम्। वाप्यां न तिष्ठति न वाति मृणालखण्डं चक्रः क्षपासु विरहे खलु चक्रवाक्याः॥ कवलितमिह नालं कन्दलं त्वेह दृष्टमिह हि कमलकोशे पीतमम्भः सुशीतम्। इति विरटति रात्रौ पर्यटन्ती तटान्ते सहचरपरिमुक्ता चक्रवाकी वराकी॥' इति परस्परचक्रवाकदम्पत्योर्विरहः॥

प्रोत्तुङ्गपीनस्तनवैभवेन ययाभिभूतौ सुरकुम्भिकुम्भौ।
ऊहे सहेते श्रियमाप्तुमेतत्साधारणीमङ्कुशकीलनानि॥ ६८॥

सुराणां देवानां कुम्भी हस्ती ऐरावणस्तस्य कुम्भौ शिरसः पिण्डौ अङ्कुशस्य निशिताङ्कुशस्य कीलनानि ताडनानि प्रहारान् सहेते क्षाम्यतः। तत्राहमूहे तर्कयामि। किं कुम्भौ प्रोत्तुङ्गौ अत्युन्नतौ तथा पीनौ पुष्टौ उपचयं प्राप्तौ यौ स्तनौ स्वस्याः कुचौ तयोर्वैभवेन शोभया कृत्वा यया देव्या अभिभूतौ पराभवं प्रापितौ। उत्प्रेक्ष्यते—एतत्साधारणीम् एतयोर्देवीस्तनयोः एताभ्यां वा साधारणीं सदृशीम्। 'तुल्यः समानः सदृक्षः सरूपः सदृशः समः। साधारणसधर्माणौ सवर्णः संनिभः सदृक्' इति हैम्यां तुल्यनामानि। तथा 'साधारणीं गिरमुषर्बुधनैषधाभ्याम्' इति नैषधे। श्रियं लक्ष्मीं प्राप्तुमधिगन्तुमिव॥

प्रसूनमालाभिरलंकृताभ्यां स्वःसुभ्रुवोऽभासि पयोधराभ्याम्।
प्रस्थातुकामस्य जगज्जयाय श्रेयो निपाभ्यामिव मीनकेतोः॥ ६९॥

स्वःसुभ्रुवः शासनदेवतायाः पयोधराभ्यां स्तनाभ्याममभासि शुशुभे। भावोक्तिरियम्। भावस्यैकत्वादेकवचनमेव। किंभूताभ्यां पयोधराभ्याम्। प्रसूनानां विकचपञ्चवर्णकुसुमानां मालाभिर्विचित्ररचनाग्रथितमाल्यैर्हारैरलंकृताभ्याम्। उत्प्रेक्ष्यते—जगज्जयाय जगतां तात्स्थ्यात्तद्व्यपदेशाज्जगज्जनानां सुरासुरनागनागराणां जयाय स्ववशीकरणार्थं स्वाज्ञैकवशंवदविधानाय प्रस्थातुकामस्य प्रस्थानं कर्तुं कामयमानस्य अघलिन्मनोराजधानीतः प्रतिष्ठासमानस्य मीनकेतोर्मकरध्वजस्य धात्रीपतेः श्रेयोर्थं मङ्गलकृते निपाभ्यां कुम्भाभ्यामिव। 'युक्तं हि पार्थिवनिपस्य सतस्तवैव' इति कल्याणमन्दिरस्तवे। तथा 'घटः कुम्भः करीरश्च कलशः कलसो निपः' इति हैम्याम्॥

कुम्भीन्द्रकुम्भौ कुचभूयमूहेऽनुभूय यस्याः सुखिनावभूताम्।
सुव्यक्तमुक्ताफलमालिकानां सौभाग्यमाभ्यामिह लभ्यते यत्॥ ७०॥

कुम्भीन्द्रस्य गजराजस्य कुम्भौ शिरःपिण्डौ यस्या देव्याः कुचभूयं विश्वसृजो विश्वविधानव्यापारपारवश्यात्स्तनभावमनुभूय संप्राप्य। 'स्वदेवभूयं चरितार्थमस्तु' इति नैषधे। तथा 'भुवो भावे' इति क्यप्। 'ब्रह्मभूयं गतः ब्रह्मभावं प्राप्तः' इति सारस्वतव्याकरणे। सुखिनः सातवन्तः। यद्यस्मात्कारणात्। सु अतिशयेन व्यक्तानां प्रकटानां

जगन्नयननिपेयानां मुक्ताफलानामामलकमानमौक्तिकानां श्रेणीनां स्रजां हाराणां च आभ्यां कुम्भिकुम्भाभ्यां सौभाग्यं सुषमा सौन्दर्यं लभ्यते प्राप्यते। स्वभावेन तु तयोर्मध्ये मुक्ता गुप्ताः, न लोचनगोचराः सन्ति। यतो भद्रजातित्वेन तयोस्तेषा-मुत्पादात् ॥

प्रसूनतारावलिशालितायां वेणीतमायामुदिते मुखेन्दौ ।
यन्माद्यतस्तत्कुचचक्रवाकौ श्रीसूनुसौराज्यविजृम्भितं तत् ॥ ७१ ॥

प्रसूनानि मालतीकुन्दादिकुसुमानि एव श्वैत्यात्तारास्तारकास्तेषामावलिः परम्परा तया शालितायां शोभितायां देव्याः शासनदेवतायाः वेणी कबरी सैव तमा रात्रिः। 'त्रियामा यामिनी भौती तमी तमा विभावरी' इति हैम्याम्। तस्यां निशायां मुखेन्दौ देवीवदनचन्द्रे उदिते उदयं प्राप्ते सति यत्तस्याः कुचौ स्तनावेव चक्रवाकौ रथाङ्गविहंगमौ माद्यतः मदं लभेते। यतस्तयोस्तमायां वियोग एव स्यान्न संयोगः। तं विरहमपास्य नक्तंदिनं संयुक्तौ सन्तौ परस्परेण प्रमुदितमनसौ यन्माद्यतस्तत्राहमेवममुना प्रकारेण मन्ये जाने विचारयामि। तत् श्रीसूनोर्लक्ष्मीनन्दनस्य मदनराजस्य सुशोभनराजतायाः सौराज्यस्य विजृम्भितं विलसितम्। यदा सुराज्यं स्यात्तदा केषामपि दुःखातङ्को न स्यादेवेति ॥

पत्रावलीव्याजवती यदीयवक्षोजदम्भर्षभनामकूपे ।
विजित्य विश्वं विजयप्रशस्तिर्लिपीकृता श्रीसुतचक्रिणेव ॥ ७२ ॥

विश्वं सचराचरं जगद्विजित्य निजाज्ञापालनपरं प्रणीय श्रीसुतः कामनामा चक्री-सार्वभौमः तेन। उत्प्रेक्ष्यते—यदीयो यस्या देव्या अयं देवीसंबन्धी यो वक्षोजः स्तनः स एव दम्भः कपटं यस्य तादृशे ऋषभनामकूटे क्षुल्लहिमवद्गिरिनिकटवर्तिनि षट्खण्डविजयविधायिनश्चक्रवर्तिनः स्वनामलिखनस्थाने जिनशासनप्रसिद्धे। ऋषभकूटनामशैलशिलायामित्यर्थः। पत्रावली पत्रवल्ली स्तनतटे चान्दनद्रवो विविधरचनाविशेषः। यथा हेमाचार्यकृतकर्णराजवर्णने—'मुखे हारावाप्तिर्नयनयुगले कङ्कणभरो नितम्बे पत्राली सतिलकमभूत्पाणियुगलम्' इति। यथा पत्राली अपि सैव व्याजः कपटं विद्यते यस्यास्तादृशी विजयप्रशस्तिरिव लिपीकृता लिखिता। यन्मया सचराचरमपि त्रैलोक्यं स्वभुजवीर्यवैभवेन विजित्य मच्छासनवशंवदं व्यधायि। इत्यहंकारसूचकाक्षरमालिका लिखितेव स्वयम्। 'अविरलमिदमम्भः स्वेच्छयोच्छालयन्त्या विकचकमलकान्तोत्तोनहस्तद्वयेन। परिकलित इवार्थः कामबाणातिथिभ्यः सलिलमिव वितीर्णं बाल्यलीलासुखाय ॥' इति चम्पूकथायाम्। एवमेका केवलैवोत्प्रेक्षा दृश्यते तस्मात्केवलोत्प्रेक्षा युक्तिमती चम्पूक्तेरानयनेनेति न कश्चिद्दोषः ॥ इति स्तनौ ॥

यया स्ववक्षोरुहयोर्जितेन तुङ्गश्रिया रोहणभूधरेण ।
दत्तानि दण्डे किमुदात्तलक्ष्मीपुष्पाणि पाण्योर्नखरच्छलेन ॥ ७३ ॥

यया देव्या स्वयोरात्मीययोर्वक्षोरुहयोरुरोजन्मनोः स्तनयोस्तुङ्गश्रिया उच्चत्वलक्ष्म्या जितेनाभिभूतेन रोहणभूधरेण रत्नाचलेन पाण्योर्हस्तयोर्नखराणां कामाङ्कुशानां छलेन कपटेन। उत्प्रेक्ष्यते—उदात्तानि महार्घ्याणि। 'उदात्तनायकोपेता' इति चम्पूकथायाम्। तथा 'उदात्तो महात्मा महार्घ्यश्च नायको वृत्तस्वामी मध्यमणिश्च तेनोपेता युक्ता' इति तट्टिप्पणके। लक्ष्मीपुष्पाणि पद्मरागमणयः दण्डे विजयावसाने दण्डकरणसमये दत्तानि किं विश्राणितानीव। तथा—'अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः पञ्चाशन्मदगन्धलुब्धमधुपक्रोधोद्धुराः सिन्धुराः। अश्वानामयुतं मरुद्युवतिजिद्वाराङ्गनानां शतं दण्डे पाण्ड्यनृपेण ढौकितमिदं वैतालिकस्यार्पितम्॥' इति विक्रमार्कदानपत्रे। अत्रापि ढौकितमग्रे दत्तमुक्तम्॥

स्वयं विनिर्मापयितुं जयं स्वशोभापराभावुकयन्नखानाम्।
राजानमभ्यर्थयते स्वकान्तमुपान्तयाता किमु तारकाली॥ ७४॥

उपान्तयाता समीपे समेता तारकाली ताराश्रेणी। उत्प्रेक्ष्यते—स्वकान्तं निजभर्तारं राजानं चन्द्रं भूपतिं च किमु अभ्यर्थयते याचतीव। किं कर्तुम्। स्वस्याः शोभायाः वैभवस्य परा भावुकानां पराभवनशीलानां यस्या देव्या नखानां कामाङ्कुशानां निजेनात्मनैव पराभवं निर्मापयितुं कारयितुं हे राजन् त्वं तथास्माकं साहाय्यं कुरु यथा वयं स्वयं वैरिणो जयामः। 'नखानामुपमानानि रत्नताराप्रसूनानि' इत्यादि काव्यकल्पलतायाम्॥ इति पाणिनखाः॥

प्रसूनधन्वा निजदेहदाहे निध्याय दग्धान्विशिखानशेषान्।
कामाङ्कुशाली कुरुविन्दपुङ्खान्यदङ्गुलीस्तानथ किं चकार॥ ७५॥

प्रसूनधन्वा कुसुमकोदण्डः अथ पश्चात्पुनर्वा यदङ्गुलीर्यस्याः करशाखा एव तान्विशिखान्। किम्। उत्प्रेक्ष्यते—चकार कृतवानिव। 'प्रसूनधन्वा शरसात्करोति माम्' इति नैषधे। किंभूतान् तान्। कामाङ्कुशानां नखानामाली श्रेणी एव कुरुविन्दस्य हिङ्गुलस्य पुङ्खाः। अथ वा कुरुविन्दमणिमयाः पुङ्खाः बाणपश्चात्प्रदेशा येषाम्। 'चित्ते कुरुष्व कुरुविन्दसकान्तदन्ति' इति नैषधे। 'पद्मरागमणिसमानकान्तिकादन्ति' इति तद्वृत्तिः। किं कृत्वा। निजस्यात्मनो देहस्य दाहे स्वशरीरस्य भस्मीभवनसमये अशेषान् समस्तान्पञ्चापि विशिखान्बाणान् दग्धान् ज्वलितान् निधाय दृष्ट्वा पश्यति विभावयत्यपि। 'विलोकते वीक्षते गवेषयति निध्यायत्यन्विषति' इति क्रियाकलापे॥

वने स्वमुद्बध्य शिखासु भूमीरुहां तपोऽतप्यत यन्निरन्नम्।
यदङ्गुलीभूयमिव प्रवालैः पचेलिमैस्तैः सुकृतैरवापे॥ ७६॥

वने कानने निकुञ्जमध्ये भूमीरुहां तरूणां शिखासु शाखासु स्वमात्मानमुद्बध्य ऊर्ध्वं बद्ध्वा प्रवालैः पल्लवैः यन्निरन्नं निराहारं तपः कष्टमतप्यत तप्तमाचरितम्। उत्प्रेक्ष्यते—पचेलिमैः परिपाकं प्राप्तैरुदयावलिकायामागतैस्तपोजनितैः सुकृतैः पुण्यैः कृत्वा य-

दङ्गुलीभूयं देवीकरशाखाभाव इवापे प्राप्तः । द्रुमप्रवालैस्तीव्रं तपस्तप्त्वा यदङ्गुलीबभूव इत्यर्थः ॥

सुपर्वपारिप्लवलोचनायाः श्रियं दधौ धोरणिरङ्गुलीनाम् ।
विजृम्भमाणारुणपाणिपङ्केरुहे प्ररूढा दलमालिकेव ॥ ७७ ॥

सुधाशनस्य पारिप्लवलोचना चञ्चलाक्षी । 'चञ्चलं चपलं लोलं चलं पारिप्लवास्थिरे' इति हैम्याम् । तस्या अङ्गुलीनां करशाखानां धोरणिः श्रेणी श्रियं शोभां दधौ श्रयते स्म । उत्प्रेक्ष्यते—विजृम्भमाणं दिवाकरकरनिकरसंपर्काद्विकाशमाश्रयमाणं निर्निद्रीभवत्तथा अरुणं रक्तं यत्पाणिरेव पङ्केरुहं करकोकनदं तत्र प्ररूढोद्गता दलमालिकेव पाटलिमशालिनी पत्रपङ्क्तिरिव ॥ इति कराङ्गुल्यः ॥

अजय्ययत्पाणिपयोरुहाभ्यां सहाहवे संस्रवदस्रपूरैः ।
शोणीभवद्भिः कमलैरवापेऽरुणाम्बुजख्यातिरिव क्षमायाम् ॥ ७८ ॥

अजय्ये केनापि प्रतिपक्षेन पक्षलक्षवैभवाभ्यां जेतुमशक्ये यस्या देव्याः पाणिपयोरुहे करकमले ताभ्यां सह सार्धमाहवे महासंग्रामे क्रियमाणे सति स्रवन्तः प्रत्यर्थिप्रगल्भप्रहरणप्रहारैः शरीरेभ्यो निःसरन्तो येऽस्राणां रुधिराणां पूराः प्रवाहास्तैः कृत्वा शोणीभवद्भिः सर्वाङ्गेष्वपि शोणमयैरिव जायमानै रक्ततां प्राप्नुवद्भिश्च कमलैः । उत्प्रेक्ष्यते— एतानि सर्वाणि अरुणाम्बुजानीति ख्यातिः कोकनदानीति प्रसिद्धिरवापे प्राप्तेव ॥

आबालमुद्यद्वलयः शिखाश्चाङ्गुल्यः पुनर्यत्र नखाः सुमानि ।
ज्योतिर्मरन्दानि करद्रुमोऽस्या यूनां मनोभृङ्गगणं धिनोति ॥ ७९ ॥

अस्या देव्याः । यत्तदोर्नित्यसंबन्धादसतोरपि यत्तदोर्मध्ये एको गृह्यते । स प्रसिद्धो जिनभक्तानां सिद्धिविधायी करः पाणिः स एव द्रुमस्तरुः कर्ता । यूनां तरुणजनानां मनांसि चित्तानि एव भृङ्गा भ्रमरास्तेषां गणं धिनोति प्रीणयति । 'धिवि प्रीणने' इदित्त्वान्नुम् । 'धिन्विकृण्वोरश्च' आभ्यामुप्रत्ययः स्यादकारान्तादेशश्च स्यात्कर्तरि सार्वधातुके । उप्रत्ययस्याशित्त्वादलोपः । अलोपस्य स्थानिवत्त्वान्नोपधागुणः । धिनोतीति सिद्धम् । यत्र करद्रुमे उद्यन्प्रकटीभवन्दीप्यमानो वा वलयः कटकः । 'पूजाजन्यप्रमयसमया राजसूयो हिरण्यारण्ये संख्यं मलयवलयौ वाजपेयः कषायः' इति लिङ्गानुशासने पुंक्लीबलिङ्गे । आबालः स्थानकम् । च पुनर्यत्र पाणिपादपे अङ्गुल्यः करशाखाः एव शिखाः शाखाः । पुनर्यत्र ज्योतींष्येव निःसरत्कान्तय एव मरन्दा मधूनि येषु तादृशानि नखाः कामाङ्कुशा एव सुमानि पुष्पाणि वर्तन्ते ॥ इति पाणिः ॥

मृणालिकाभिर्जलदुर्गभाग्भिरपि स्वजैत्रीं प्रविभाव्य बाहाम् ।
स्वसूनुपद्मः प्रहितः किमेतदुपास्तये पाणिरराजदस्याः ॥ ८० ॥

अस्या देवतायाः पाणिः करः अराजत् दीप्यते स्म । उत्प्रेक्ष्यते—जलं पानीयमेव

दुःखेन गम्यते तीर्यते ग्रहीतुं शक्यते इति वा दुर्गः अगाधि नीरं कोट्टो वा, तं भजन्त्याश्रयन्तीत्येवंविधाभिरपि जलदुर्गस्थिताभिरेभिः मृणालिकाभिः कमलनालैः स्वासामात्मनां जैत्रीं जयनशीलाम् अस्याः शासनदेव्या वाहां भुजां प्रविभाव्य समीक्ष्य स्वसूनुर्निजाङ्गजन्मा पद्मः कमलमेतस्यास्त्रिदश्या जैत्र्या उपास्तये सेवाकरणार्थं प्रहितः किमु प्रेषित इव । यो येन जीयते स स्वयं सूनुना वा तमुपास्ते इति रीतिः ॥

इयं मृणाली जडसङ्गमौज्झ्य निजाङ्गजेनानुगताम्बुजेन ।
एत्याश्रिता किं विबुधाम्बुजाक्षीं यद्दोर्लताशालिशया व्यलासीत् ॥८१॥

यस्या देव्या दोर्लता बाहुवल्ली व्यलासीद्विलसति स्म । किंभूता । शालिशया शालनशीलः शोभाकलितः शयः पाणिर्यस्याः । उत्प्रेक्ष्यते—जडानां मूर्खाणां डलयोरैक्याज्जलानां पानीयानां सङ्गं सहवासं चिरकालावस्थितिम् औज्झ्य संत्यज्य निजेनात्मीयेनाङ्गजेन नन्दनेन स्वस्मिन्नुत्पन्नत्वादम्बुजेन जलजन्मना पद्मेन अनुगता सहिता इयमेषा प्रत्यक्षा बाहुदेहा मृणाली कमलनालम् । मृणालशब्दस्त्रिलिङ्गः । 'कुवलयमृणालमण्डला' इति लिङ्गानुशासने स्वतस्त्रिलिङ्गे । एत्यागत्य विबुधां सर्वचातुर्यकलाकलितां विदुषीमम्बुजाक्षीं कमललोचनां स्त्रियं सुराङ्गनां चाश्रिता किं निषेवितवतीव ॥

बभौ भुजाभ्यां मखभुङ्मृगाक्षी दग्धायुधस्येव कृते स्मरस्य ।
रसालवल्लीमयकार्मुकाभ्यामभ्यर्थनादात्मभुवा कृताभ्याम् ॥ ८२ ॥

मखं यज्ञं भुनक्तीति मखभुक् देवः । 'स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' इति हैम्याम् । 'मखांशभाजां प्रथमो निगद्यसे' इति रघौ । 'मुखं मखास्वादविदाम्' इति नैषधे । तस्य मृगाक्षी हरिणेक्षणा प्रिया शासनदेवी भुजाभ्यां बाहुभ्यां कृत्वा बभौ भाति स्म । उत्प्रेक्ष्यते—दग्धानि ज्वलितानि आयुधानि समग्रशस्त्राणि यस्य तादृशस्य स्मरस्य कामस्य कृतेऽर्थमभ्यर्थनादर्थान्मदनातिथिविहितबहुयाचनात आत्मभुवा विधात्रा कृताभ्यां निर्मिताभ्यां रसालवल्लीमयाभ्यामिक्षुलतारूपाभ्यां कार्मुकाभ्यां कोदण्डाभ्यामिव । 'पुष्पाः पञ्चशरः शरासनमपि ज्याशून्यमिक्षोर्लता जेतव्यं जनतां त्रयं प्रतिदिनं जेताप्यनङ्गः किल' इति चम्पूकथायाम् । तथा 'इक्षुः स्याद्रसालोऽसिपत्रकः' इति हैम्याम् । तथा 'रसाल इक्षौ चूते च' इत्यनेकार्थः । अथ वा रसालवल्लीमयाभ्यामाम्रलताप्रधानाभ्यां चापाभ्यामिव ॥

समुच्चरच्चन्द्ररुचीचयाम्भा पार्श्वद्वयोद्भूतभुजा मृणाली ।
जम्बूनदीवोच्चकुचान्तरीपा या भाति दृग्भृङ्गमुखारविन्दा ॥ ८३ ॥

या शासनसुरी जम्बूनदीव भाति । किंभूता । समुच्चरन्तीनां प्रादुर्भवन्तीनां चन्द्रसान्द्राणां सुवर्णसदृशीनां हेमरूपाणां वा रुचीनां कान्तीनाम् । 'वरुणगृहिणीमाशामासादयन्तमम़ुं रुची निचयसि च यांशांशभ्रंशक्रमेण निरंशुकम्' इति नैषधे । चयः समूहः स एवाम्भो नीरं यस्यां वपुषः काञ्चनवर्णत्वात्तद्रुच्योऽपि तादृग्वर्णाः स्युः । पुनः किं-

भूता। पार्श्वद्वयमुभयतटयुगलं समीपद्वन्द्वं वा। 'कक्षाधःप्रदेशद्वितयं पार्श्वमन्तिके। कक्षाधोऽवयवे वक्रोपायपर्शुसमूहयोः॥' इत्यनेकार्थः। तत्रोद्भूतौ उद्गतौ भुजारूपौ बाहुमूल्यौ मृणाल्यौ कमलनाले यस्याम्। 'शुङ्गोऽथलिङ्गभुजशाटसटाः स्त्रपाटः' इति लिङ्गानुशासने। भुजः। भुजाशब्दः पुंस्त्रीलिङ्गयोः। पुनः किंभूता। उच्चावुन्नतौ कुचावेवान्तरीपे अन्तर्जले तटे यस्याम्। पुनः किंभूता। दृशावेव भृङ्गौ षट्चरणौ यत्र तादृशं मुखं वदनमेवारविन्दं कमलं यस्याम्। उत्प्रेक्ष्यते—जम्बूनदीव॥ इति भुजा॥

भुजान्तरानुत्तरराजधान्या अभ्यर्णभूमौ रतिजानिभर्तुः।
किमु स्फुरच्चन्दनचारिमश्रीक्रीडाद्रिकूटौ लसतस्तदंसौ॥ ८४॥

तस्या देव्या अंसौ स्कन्धौ लसतः शोभां लभेते। उत्प्रेक्ष्यते—रतिरेव जाया यस्य स रतिजानिः कंदर्पदेवः स एव भर्ता त्रिभुवनं बिभर्तीति सुरासुरोरगनराणां तदाज्ञावशंवदीभूतत्वेन। अथ वा हास्यविविधविनोदविलाससंयोगभोगादिभिर्जगज्जनान्बिभर्ति पुष्णातीति। 'डुभृञ् धारणपोषणयोः' अयं धातुः। ततः·········स्वामी श्रीनन्दनराजाधिराजस्तस्य स्फुरन्ती परमोत्कर्षमुद्वहन्ती चन्दनस्य मलयद्रुमद्रवस्य गोशीर्षशाखिनो वा पत्रवल्लीविचित्रचित्ररचनाविलेपनादेः सुरभिपर्णश्रेणिपरिमलादेर्वा चन्दनतरौ पुष्पफलानामसंभवः। यदुक्तम्—'यद्यपि चन्दनविटपी विधिना फलपुष्पवर्जितो विहितः। निजवपुषैव परेषां तथापि संतापमपनयति॥' इति वचनात्पत्राणां संभवो दृश्यते। तथा चम्पूकथायाम्—'नागरुचिताश्चन्दनपत्रभङ्गा भवद्वैरिवधूवदनेवनेव'। 'किंलक्षणे नागरुणा काकतुण्डेन चिता व्याप्ता सहिताश्चन्दनद्रवस्य पत्रवल्ल्यो भान्ति। तथा नागानां भुजंगमानां रुचिता ईप्सिता चन्दनद्रुमाणां पत्राणां पर्णानां भङ्गाः शकलानि भान्ति' इति चम्पूटिप्पणकम्। चारिमायाः सुगन्धितायाः श्रीः शोभा ययोः तादृशौ क्रीडाद्रेः केलिशैलस्य कूटौ शिखरे इव कूटे इव। कुत्र। भुजान्तरं देवीहृदयं तदेवानुत्तरा न विद्येते वैशिष्ट्येण लक्ष्म्या वा उत्तरः अग्रेतनवर्ती पदार्थो यस्याः सासाधारणा राजधानी स्मरराजनिवसनस्थाननगरं तस्या अभ्यर्णभूमौ समीपप्रदेशे। राजधान्याः संनिधौ क्रीडावननदीवापीपर्वतादयो भवन्ति। तत्र प्रियासखा नृपादयः स्वैरं क्रीडन्तीति रीतिः॥

स्वःसुभ्रुवः प्रेक्ष्य पयोधरौ स्वसंस्पर्धिनौ तुङ्गिमविभ्रमेण।
जयाय तद्युद्धविधित्सयेव कुम्भौ समेतौ स्फुरतस्तदंसौ॥ ८५॥

स्वःसुभ्रुवः सुराङ्गनायास्तस्याः अंसौ स्कन्धौ स्फुरतः। उत्प्रेक्ष्यते—जयाय प्रतिपक्षपराभवकृते स्वयं तद्युद्धविधित्सया ताभ्यां स्तनाभ्यां सार्धं युद्धस्य संग्रामस्य विधित्सया चिकीर्षया विधातुमिच्छया समेतावागतौ कुम्भौ कलशाविव। किं कृत्वा। तुङ्गिम्न उच्चताया विभ्रमेण लक्ष्म्या कृत्वा स्वाभ्यां घटात्मभ्यां सार्धं स्पर्धेते इत्येवंशीलौ। स्वःसुभ्रुवः पयोधरौ कुचौ प्रेक्ष्य दृग्गोचरीकृत्य॥ इति स्कन्धौ॥

अस्याः सदृक्षां श्रियमाश्रयन्ती नास्ति त्रिलोक्यामपि कापि कान्ता।
इतीव रेखात्रितयं ततान तत्कण्ठपीठे सरसीजजन्मा ॥ ८६ ॥

सरसीजात्कमलाज्जन्म उत्पत्तिर्यस्य स सरसीजजन्मा विधाता तस्या देव्याः कण्ठपीठे गलकन्दले। उत्प्रेक्ष्यते—इतीव हेतो रेखानां त्रितयं त्रिकं ततान विस्तारयामास। चकारेत्यर्थः। इति किम्। यदस्याः शासनत्रिदश्याः सदृक्षां साधारणीम्। तुल्यामित्यर्थः। श्रियं शरीरसौन्दर्यलक्ष्मीमाश्रयन्ती भजन्ती कापि ज्ञाताज्ञाता काचन कान्ता सुलोचना त्रिलोक्यां स्वर्गबलिगृहमहीवलयत्रयेऽपि नाकिनागनागराङ्गनासु नास्त्येवेति जगत्त्रयेऽपि न विद्यते॥

कण्ठश्रिया स्वःकुरविन्ददत्या निर्जीयमानैर्निखिलैस्त्रिरेखैः।
रथाङ्गपाणिं प्रति पाञ्चजन्यः पूत्कर्तुकामैः प्रहितः किमेकः ॥ ८७ ॥

निखिलैस्त्रिरेखैः समस्तैः शङ्खैः पूत्कर्तुकामैः एवं कर्तुमिच्छद्भिः सद्भिः अर्थात्सर्वैः संभूय रथाङ्गं वैरिवारिभिरप्रतिहतं चक्रं पाणौ हस्ते यस्य स रथाङ्गपाणिर्विष्णुस्तं प्रति एकः पाञ्चजन्यनामा शङ्खः। उत्प्रेक्ष्यते—किं प्रहितः प्रेषित इव। किं क्रियमाणैः। निखिलत्रिरेखैर्निर्जीयमानैः पराभवनपदवीं नीयमानैः हठात्प्राप्यमानैः। कया। स्वःकुरविन्ददत्या स्वर्गस्य कुरविन्दाः पद्मरागमणयः। 'स्वे हि दर्शयति कः परेणथानर्घ्यदन्तकुरविन्दमालिके' इति नैषधे। तद्वद्दन्ता दशना यस्याः सा। कया कृत्वा। कण्ठश्रिया निजगललक्ष्म्या साधनभूतया॥

कण्ठीकृतो यज्जलजस्त्रिदश्यास्तद्वेधसा साधु विधीयते स्म।
नैसर्गिकानार्जवमात्मनिष्ठं जह्यादवाह्यं कथमन्यथायम् ॥ ८८ ॥

वेधसा ब्रह्मणा यज्जलजस्त्रिरेखः त्रिदश्या देव्याः कण्ठीकृतः कण्ठपीठतां प्रापितः। 'ततः प्रियोपात्तरसाधरौष्ठे निवेश्य दध्मौ जलजं कुमारः' इति रघौ। अहमेवं मन्ये। जगत्स्रष्टिकृता तत्साधु सम्यग्विधीयते स्म समीचीनमनुष्ठितम्। अन्यथा अपरप्रकारेण यत्कण्ठपीठीकरणमन्तरेण अयं शङ्खः आत्मनि स्वस्मिन्विषये निष्ठा स्थितिर्यस्य तादृशं नैसर्गिकं स्वाभाविकं स्वोत्पत्तिसमयादेव जातमपर्यवसानस्थायुकमनार्जवं कथं केन प्रकारेण जह्यात्त्यजेत्। यदुक्तम्—'विमलता वचनस्य न गोचरे जनयिता तव शङ्ख महोदधिः। मुदमलं तनुते च तव ध्वनिः किमु ततो निहिता हृदि वक्रता॥' इति। अपि तु न कयापि विधया नैव मुञ्चेत्॥

यत्कण्ठपीठेन हठादुपात्तां दृष्ट्वात्मभूषामखिलास्त्रिरेखाः।
पूत्कुर्वते किं विकलीभवन्तः प्रत्यालयं भैक्षभुजो भुजन्तः ॥ ८९ ॥

अखिलाः समस्तास्त्रिरेखाः शङ्खाः विकलीभवन्तो शिथिला जायमानाः प्रत्यालयं गृहं गृहं प्रति पूत्कुर्वते। लोकानां पुरः पूत्कारं कुर्वन्तीत्यर्थः। विकलतामेव दर्शयति—किं-

भूताः। भिक्षाणां समूहो भैक्षं भुजन्त्यश्नन्तीति भैक्षभुजो भिक्षुकाः सांन्यासिकयोगिप्रमुखास्तान् भजन्तः सेवमाना इति विकल्पेन विचारानभिज्ञता । वैकल्पकारणमाह—किं कृत्वा । यस्या देव्याः कण्ठपीठेन गलकन्दलेन हठाद्बलादुपात्तां गृहीतामात्मनः स्वस्य भूषामाभरणादिलक्ष्मीम् । 'विनापि भूषामवधिः श्रियामसौ' इति नैषधे । आभरणगणमन्तरेणापि दमयन्ती श्रियां सुषमाणामवधिः सीमास्तीति' इति तद्वृत्तिः । दृष्ट्वा विलोक्य ॥ इति कण्ठपीठः ॥

यूनो मनोजन्मनृपस्य तस्या वपुर्लतायाः स निकेतभाजः ।
शृङ्गारभूषासुषमादिदृक्षोरिवात्मदर्शः शुशुभे तदास्यम् ॥ ९० ॥

तस्यास्त्रिदश्या आस्यं शुशुभे रेजे । उत्प्रेक्ष्यते—यूनस्तरुणस्य मनोजन्मनृपस्य स्मरराजस्य आत्मदर्शो दर्पण इव । किंभूतस्य मनोजन्मनृपस्य ।यस्या देव्या वपुर्लता शरीरयष्टी सैवावासार्थं वासकृते निकेतं भवनं भजतीति तस्य । पुनः किं कर्तुमिच्छोः । शृङ्गारार्थं शोभाकृते या भूषा भूषणानि । 'तस्मै स्वभूषादृषदंशुशिल्पबलिद्विषः कार्मुकमर्पयन्ती' इति नैषधे । 'निजभूषणमणिकिरणगणव्यतिरेकेण' इति तद्वृत्तिः । तेषामाभरणानां सुषमां सातिशायिनीं शोभाम् । 'सुषमा सातिशायिनी' इति हैम्याम् । 'सा अतिशायिनी शोभा सुषमा प्रोच्यते' इति तद्वृत्तिः । तां दिदृक्षोः द्रष्टुमिच्छोः । 'तावदेव ऋषिरिन्द्रदिदृक्षुः' इति नैषधे । 'नारदर्षिरिन्द्रद्रष्टुमिच्छुः' इति तद्वृत्तिः ॥

कृष्णच्छविं भ्रूयुगलीं दधानं ज्योत्स्नासुधापायि चकोरचक्षुः ।
उत्सङ्गसङ्गीकृततारदन्तमास्यं त्रिदश्याः शशिबिम्बति स्म ॥ ९१ ॥

त्रिदश्याः शासनामर्त्याया आस्यं वदनं शशिबिम्बति चन्द्रमण्डलमिवाचरति । 'सर्वप्रातिपदिकेभ्यः क्विप् वाचारे इत्येके' इति क्विप्प्रत्यये शशिबिम्बतीति सिद्धम् । किं कुर्वाणम् । लक्ष्म लाञ्छनं तद्वत्कृष्णा मेचका छविः कान्तिर्यस्यास्तादृशीं भ्रूयुगलीमूर्ध्वनयनयोरुपरिप्रदेशे रोमपद्धतिद्वितयीम् । 'उच्चै राज्यादिदानात्कलिकलुषमलक्षालनात्तामसानामुच्छिन्दाद्विघ्नभेदात्त्रिदशपतिकरस्पर्शनाद्दर्शनस्य । हेतुत्वात्तस्यसूर्याद्युदयफलपदस्वर्जनज्ञानभूत्वाद्धस्ते नाभेयदेवप्रभुपदयुगली······गौरिवेह ॥' इति श्रीसोमसुन्दरसूरिकृतस्तोत्रे युगलीशब्दः । दधानं बिभ्राणम् । पुनः किंभूतम् । ज्योत्स्ना चन्द्रिका ज्योत्स्नाप्रियत्वात् तथा सुधाममृतं पिबत इत्येवंशीलौ । 'कणे हत्य चकोरीणां गणः पीत्वा सुधासवम् । अजायत मदेनेव गुञ्जापुञ्जारुणेक्षणाः ॥' इति वस्तुपालकीर्तिकौमुद्यां चन्द्रोदयवर्णने यथा चकोराणां ज्योत्स्नापानं तथा सुधापानमपि दृश्यते इति । चकोरौ ज्योत्स्नाप्रियावेव चक्षुषी यत्र। अथ वा ज्योत्स्नारूपां सुधां सुधारुचित्वात्पिबत इत्येवंशीलौ तादृशौ चलचञ्चू एतत्तुल्ये वा चक्षुषी नेत्रे यत्र । पुनः किंभूतम् । उत्सङ्गो क्रोडे सङ्गोऽस्त्यासां तादृशाः कृतास्तारास्तारकाः । 'तारकाभकनीनिकयोस्तारौ' इति लिङ्गानुशासने नक्षत्रकनीनिकयोरर्थयोस्तारशब्दः पुंस्त्रीलिङ्गे । यथा 'तारस्तारा च' इत्यवचूर्णौ । एव श्लेषात्तद्रूपा वा तत्तुल्या वा दन्ता यत्र तत् ॥

चिकीर्षता यन्मुखमात्तसारमात्मानमन्विष्य चतुर्मुखेन ।
गलन्मरन्दाश्रुकणाब्जराजीद्विरेफरावैरिव रारटीति ॥ ९२ ॥

गलन्तः पतन्तो ये मरन्दाः मधूनि मकरन्दबिन्दवस्त एवाश्रुकणा रोदने नयननिर्गतनीरविप्लुषो यस्याम्। तादृशी अब्जराजी कमलमाला। उत्प्रेक्ष्यते—द्विरेफरावैर्मधुकरगुञ्जारवै रारटीति अतिशयेन रोदिति पूत्कृतिं वा कुरुते। किं कृत्वा। यन्मुखं यस्याः शासनदेवताया वदनं चिकीर्षता कर्तुमिच्छता चतुर्मुखेन ब्रह्मणा आत्तं गृहीतं सारम्। 'सम्यग्मज्जा सारो मज्जि' इति हैम्याम्। सारदलं वा स्वकीयसद्वस्तु यस्मात्तादृशमात्मानमन्विष्य विलोक्य ॥

यदीयचेतोवसतौ वसन्तं स्वमित्रपुष्पास्त्रनृपं निरीक्ष्य ।
किमागतस्तं मिलितुं मृगाङ्को वक्त्रं चकासे सुरकम्बुकण्ठ्याः ॥ ९३ ॥

सुरस्य कम्बुः त्रिरेखः एतावता दक्षिणावर्तशङ्खं तद्वत् रेखात्रिकाङ्कितः कण्ठो यस्यास्तस्याः। सुरकम्बुकण्ठ्याः सुरस्य कम्बुकण्ठ्या वध्वा इति वा। सुधाशनवध्वा वक्त्रं वदनं चकासे दिदीपे। उत्प्रेक्ष्यते—यस्या इदं यदीयं चेतश्चित्तं तदेव वसतिर्वासवेश्म तत्र वसन्तं वासं कुर्वाणम्। देवीसंबन्धिनि हृदयसदने तिष्ठन्तमित्यर्थः। तथा स्वस्यात्मनो मित्रं सखायं पुष्पास्त्रनामानं मदनाभिधानं नृपं राजानं निरीक्ष्य व्यालोच्य। तं प्रति मिलितुमागतो गगनात्समागतः। किंभूतः। मृगाङ्कः शशधरश्चन्द्र इव ॥

यस्या मुखं स्वर्वनितार्चितायाः संवर्ध्य ताराततिमुक्तिकाभिः ।
स्वःसिन्धुतीरे किमु दिङ्मृगाक्ष्यो निर्मिच्य रात्रीमणिमुत्सृजन्ति॥९४॥

स्वःस्वर्गस्य वनिताः सीमन्तिन्यः ताभिरर्चितायाः पूजितायाः यस्याः शासनदेवताया मुखं वदनं निर्मिच्य नीराजयित्वा मुखस्य न्युञ्छनं कृत्वा। उत्प्रेक्ष्यते—दिङ्मृगाक्ष्यः दिगङ्गनाः स्वःसिन्धुतीरे स्वर्गगङ्गातटे रात्रीमणिं निशारत्नं चन्द्रम्। 'कथयति परिश्रान्तिं रात्रीतमः सह युध्वना' इति नैषधे रात्रीशब्दो दीर्घोऽप्यस्ति। चन्द्रकान्तरत्नमपि किमु उत्सृजन्ति त्यजन्ति। किं कृत्वा। ताराणामर्थाद्ग्रहनक्षत्रतारकाणां ततयः श्रेणयः एव मुक्तिकाः लघुमुक्ताफलानि ताभिः। 'सिता वमन्त्यः खलु कीर्तिमुक्तिकाः' इति नैषधे। अथवा मुक्ता एव मुक्तिकास्ताभिः कृत्वा संवर्ध्य वर्धयित्वा इदानींतन्या अपि सधववध्वः स्वगुरून्मुक्ताफलैर्वर्धयित्वा मणिप्रमुखं न्युञ्छनीकृत्य क्वचिन्मुञ्चन्तीति रीतिः॥ इति मुखम्॥

अगण्यलावण्यपयस्त्रिदश्या आस्यात्प्रसर्पद्विलसत्तरङ्गैः ।
मा स्ताद्बहिस्तादिति निम्नभागं चक्रे विरञ्चिश्चिबुकं किमन्ते ॥ ९५ ॥

विरञ्चिर्ब्रह्मा अन्ते वक्त्रप्रान्तप्रदेशे। उप्रेक्ष्यते—इतीव हेतोर्निम्नो गम्भीरो नीची भागः प्रदेशो यस्य तादृशं चिबुकमसिकाधःप्रदेशं चक्रे निर्मितवान्। इति किम्।

यदस्यास्त्रिदश्या देव्या आस्याद्वक्त्रकुण्डाद्विलसत्तरङ्गैः प्रस्फुरत्कल्लोलैः स्वरङ्गाकारीभवत्कान्तिप्रतानैः । 'विमलं वर्तुलं कान्तितरङ्गि वदनं विभो' इत्युक्तेः । कृत्वा प्रसर्पन्निःसरत् 'गच्छति विसर्पत्ययत्ययते' इति क्रियाकलापे । यथा विसर्पति तथा प्रसर्पत्यपि । अगण्यममेयं यल्लावण्यं लवणिमा तदेव पयः पानीयं बहिस्तान्मुखाद्बहिर्भागे मा स्तान्मा भवतु वक्त्राद्बहिर्मा निर्यातु । 'धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव' इति नैषधे ॥

यदाननाम्भोरुहवाससौधे सातं वसन्त्या जलराशिपुत्र्याः ।
विलासवापीव पयोविहारं स्वैरं विधातुं चिबुकस्त्रिदश्याः ॥ ९६ ॥

त्रिदश्याः शासनदेव्याश्चिबुकः । उत्प्रेक्ष्यते—जलराशिपुत्र्या लक्ष्म्या विलासवापीव क्रीडादीर्घिकेव । किं कर्तुम् । स्वैरं स्वेच्छया पयसि वारिणि विहारं जलकेलिम् । 'यस्यावरोधस्तनचन्दनानां प्रक्षालनाद्वारिविहारकाले' इति रघुवंशे । विधातुं कर्तुम् । किं कुर्वत्या जलराशिपुत्र्याः । यदाननाम्भोरुहवाससौधे यस्या देव्या आननं वदनमेवाम्भोरुहं कमलं तदेव वाससौधं वसनसदनं तत्र सातं सुखं यथा स्यात्तथा वसन्त्याः स्थितिं कुर्वत्याः ॥ इति देवीचिबुकाः ॥

रेजेऽधरोऽस्या हरिमन्थकालात्प्रवासिनं यन्मुखचन्द्रपुत्रम् ।
हृल्लेखभाजा मिलितुं प्रवालः पयोधिनाह्वातुमिव प्रयुक्तः ॥ ९७ ॥

अस्या देव्या अधरः ओष्ठो रेजे राजते स्म । उत्प्रेक्ष्यते—पयोधिना समुद्रेण यस्या मुखमेव चन्द्रं स्वपुत्रमाह्वातुमाकारयितुमिव प्रवालः समुद्रोत्पन्नत्वाद्विद्रुमः । अथ वा प्रकृष्ट उक्तसंदेशवाक्यकथको बालकः प्रयुक्तः प्रेषितः । किंलक्षणेन समुद्रेण । हृल्लेखमुत्कण्ठामौत्सुक्यं भजतीति तादृशेन । किं कर्तुम् । मिलितुं पुत्रप्रेम्णा सङ्गं कर्तुम् । चन्द्रस्य समुद्रोत्पन्नत्वेन नन्दनत्वम् । किंभूतं चन्द्रम् । हरिणा विष्णुना मन्दराद्रिणा यो मन्थो मन्थनं तस्य कालः समयः तस्मादारभ्य प्रवासिनं परदेशे गतं पुनरागतम् अत एव मिलनोत्कण्ठा ॥

यदाननाङ्गीकृतविग्रहेण रदच्छदाङ्गः क्षणदाकरेण ।
प्रियौषधेरङ्गभवः किमेष प्रपाल्यते वप्तृतया प्रबालः ॥ ९८ ॥

यस्या देव्या आननं मुखं तदेव अङ्गीकृतः अभ्युपगतः गृहीतो विग्रहः शरीरं येन तादृशेन क्षणदाकरेण विधुना प्रियायाः स्वकान्ताया औषधेः फलपाकावसानिकायाः अङ्गभवस्तनुजः । चन्द्रस्यौषधीपतित्वात् पतिपत्नीसंबन्धः । प्रबालस्य चौषधीजातत्वादौषध्याः पुत्रत्वमेवोपपन्नम् । तथा रदच्छदोऽधरः स एवाङ्गं यस्य तादृशः प्रबालः पल्लवः प्रकृष्टो बालः प्रवालः । अथवा प्रकर्षेण बालकश्च वप्तृतया पितृत्वेन प्रपाल्यते सम्यक्तया पाल्यते । अन्यो वप्ता आत्मपत्नीसंजातमतीव बालकं निजनन्दनं प्रेम्णा प्रपालयति ॥

इदंमुखीभूतमवेत्य चन्द्रं बालं तदीयं करचक्रवालम् ।
अन्वागतं प्राक्प्रणयादिवैतद्दन्तच्छदः स्फूर्तिमियर्ति तस्याः ॥ ९९ ॥

तस्या देव्या दशनच्छदो दशनपत्रमधरः स्फूर्तिं शोभामियर्ति । उत्प्रेक्ष्यते—इदंमुखीभूतम् अस्या वदनभावं प्राप्तं चन्द्रं स्वजनकुमुदसुहृदमवेत्य ज्ञात्वा सम्यगवबुध्य प्राक्प्रणयात्पूर्वस्नेहाच्चन्द्रावस्थायां नित्यमुत्सङ्गसङ्गीकरणप्रीतेः एतद्दशनच्छददेहं देवीदन्तवस्त्रगात्रं तदीयं यद्वदनीभूतचन्द्रसंबन्धि तथा बालं लघुकुमारं कराणां किरणानां चक्रवालं मण्डलमन्वागतं पृष्ठे समेतमिव । यो बालः स पितुर्मातुर्वा पृष्ठे समेतीति रीतिरपि बालत्वात्किरणानामरुणत्वमपि युक्तमेवेति ॥

यद्दन्तपत्रेण रणेऽभिभूता नंष्ट्वा प्रविष्टापि पयोधिमध्ये ।
रक्ताङ्कराजी हृदि कृष्णवल्लीं शल्यं किमद्यापि न पर्यहार्षीत् ॥१००॥

यस्या देवताया दन्तपत्रेण दशनदलेनाधरेण रणे परस्पर्धितया मिथो युद्धे अभिभूता पराजिता सती रक्ताङ्कराजी विद्रुममालिका हृदि मनसि विषये हृदये वक्षसि वा कृष्णवल्लीम् । 'कालिवेल' इति लोकप्रसिद्धा । तद्रूपं तामेव वा शल्यं शूककण्टकादीनां शलाकां हृदये मर्मप्रविष्टशस्त्रं वा । 'शल्यं शस्त्रशलाकयोः' इत्यनेकार्थः । तथा 'शल्यं शरीरान्तर्गतं शस्त्रादिसीमाच्छिद्रं वंशादीनां शलाकाविशेषश्च' इति लिङ्गानुशासने । अद्यापि अद्यतनं दिनं यावन्न पर्यहार्षीत् परिहरति स्म हृदये एवावतिष्ठमानमास्ते किम् । नंष्ट्वा यदधरोद्धुरविरोधिविरुद्धविधानातिसाध्वसात्प्रणश्य पयोधिः समुद्रस्तस्य मध्ये अत्यगाधजलान्तः प्रविष्टा प्रविश्य स्थितापि ॥ इत्यधरः ॥

बन्धूकबन्धूभवदेतदीयदन्तच्छदे दन्तरुचिश्चकासे ।
निपेतुषी कोकनदच्छदाङ्के शरत्सुधादीधितिकौमुदीव ॥ १०१ ॥

बन्धूको बन्धुजीवः । 'विपोहरिया' इति लोकप्रसिद्धिः । स रक्तकुसुमः स्यात् । तथा 'बन्धुजीवविघातं ग्रीष्मदिवसावसानजनाः' इति चम्पूकथायाम् । ग्रीष्मे हि बन्धूकानि शुष्यन्ति । तथा 'बन्धूकप्रसवारुणाम्बरधराम्' इति लघुस्तवेऽपि । तस्य बन्धूककुसुमस्य बन्धूभवन् सहोदरो मित्रं वा जायमानो य एतदीयो देवतासंबन्धी दन्तच्छदोऽधरस्तत्र निपेतुषी पतनशीला पतिता वा दन्तानामर्थाद्देवीदशनानां रुचिः कान्तिश्चकासे दीप्यते स्म । उत्प्रेक्ष्यते—कोकनदस्य विकसितरक्तोत्पलस्य यच्छदं पत्रं तस्याङ्के उत्सङ्गे निपेतुषी समीयुषी प्राप्ता शरदो घनात्ययस्य सुधादीधितिरमृतवत् शरत्कालेन जलधररोधोपरोधावधीरणेन निर्मलीकृतत्वादुज्ज्वला अतिविशदीभूता दीधितयः कान्तयो यस्येत्यन्वर्थनामा चन्द्रस्तस्य कौमुदी चन्द्रिकेव । अथ वोपमा । यथा रक्तकमलपलाशे शारदीननिशानायककौमुदी शोभते ॥

पीयूषपूर्णस्मरकेलिशोणमणीनिबद्धाधरदीर्घिकायाम् ।
यस्या विनिद्रद्विजचन्द्रिकाभिराश्रीयते कैरविणीवनश्रीः ॥ १०२ ॥

यस्याः शासनसुर्याः विनिद्रन्तीभिर्विजृम्भमाणाभिर्द्विजानां दन्तानां चन्द्रिकाभिर्ज्योत्स्नाभिः । कान्तिभिरित्यर्थः । 'दशनचन्द्रिकया व्यवभासितम्' इति रघौ । कैरविणीनां कुमुदिनीनां चन्द्रविकाशिविशदविकस्वितारविन्दिनीनां वनं काननम् । वृन्दमित्यर्थः । तस्य श्रीः लक्ष्मीः शोभा आश्रीयते आलम्ब्यते । कस्याम् । पीयूषैः सुधारसैः पूर्णायां निर्भरभरितायां स्मरस्य रतिपतेः केलये क्रीडाकरणार्थं शोणै रक्तैर्मणीभिः रत्नैः । पद्मरागगणैरित्यर्थः । निबद्धायां रचितायां घटितायामधरोऽर्थाद्देव्या ओष्ठः स एव दीर्घिका वापी तस्यां राजीव । 'वनराजिनि दीर्घिकावारिणि स्नानम्' इति पाण्डवचरित्रेऽर्जुनस्याष्टापदयात्राधिकारे । यत्र राजीवानि तत्र राजीविनीलताया अपि सद्भाव इति । तथा 'केचिद्वदन्त्यमृतमस्ति पुरे सुराणां केचिद्वदन्ति वनिताधरपल्लवेषु । ब्रूमो वयं त्वदरिवर्गकराङ्गुलीषु यत्पानतो मरणमागतमप्यपास्तम् ॥' इति भोजप्रबन्धे वनिताधरेषु सुधारसः ॥

स्वर्भाणुभीरो रजनीचरिष्णोः कलङ्कभाजः क्षयिनः सितांशोः ।
ज्योत्स्ना किमुद्वेगवती यदास्यं भेजेऽपविघ्नं दशनांशुदम्भात् ॥१०३॥

सितांशोश्चन्द्रादुद्वेगवती खेदं प्राप्ता सती ज्योत्स्ना । उत्प्रेक्ष्यते—दशनानां राजदन्तानामंशवः किरणास्तेषां दम्भात्कपटात् अपगता विघ्ना वसतौ स्वानिष्टकारिणः प्रत्यूहा यस्मात्तादृक् यदास्यं देवीवदनं भेजे श्रितवतीव । उद्वेगकारणान्याह—किंभूतस्य सितांशोः । स्वर्भाणो राहोः सकाशाद्भीरोर्भीरुकस्य । स्वाभ्यवहारकारिसिंहिकेयभयविह्वलीभूतस्येत्यर्थः । एतावता सवैरत्वमुक्तम् । पुनः किंभूतस्य । रजन्यां निशायामेव पारदारिकपाटच्चरादिवच्चरिष्णोः संचरणशीलस्य । एतावता चौरविटादिचेष्टावत्त्वं च । अत एव पुनः किंभूतस्य । कलङ्कं गुरुदाराभिगमनादपवादं लाञ्छनं च भजतीति कलङ्कभाजः । एतावता सापवादत्वं सुशीलताराहित्यं च । पुनः किंभूतस्य । क्षयिनः क्षयरोगवतः । स्वपरदारेष्वत्यासक्तस्य व्यसनिनो राजयक्ष्मादयो रोगा भवेयुरवश्यम् । यतः 'कम्पः स्वेदश्रमो मूर्छा भ्रमिर्ग्लानिर्बलक्षयः । राजयक्ष्मादिरोगाश्च भवेयुर्मैथुनोत्थिताः ॥' इति योगशास्त्रे । पक्षे कृष्णपक्षानुभावात् कलाभिर्हीयमानतया क्षीणताभाजः । सितांशोरिति पदेनापि पाण्डुरत्वं सूचितम् । तच्च रोगादिना दुःखाद्यतिरेकेण वा पाण्डिमा जायते । ततः पाण्डुकुष्ठरोगवतः भूतादिवद्धूलदेहस्य वा । ततोऽपि विरूपवतः । एतेभ्यः कारणेभ्यः एतैः कारणैर्वा मनस्युद्वेगं प्राप्ता ॥

यस्याः पृणन्निर्जरदृक्चकोरान्दन्तप्रभाभिर्वदनं दिदीपे ।
शरद्विनिद्रीकृतचन्द्रिकाभिर्विभावरीणामिव सार्वभौमः ॥ १०४ ॥

यस्या देवताया दन्तप्रभाभिर्दशनदीप्तिभिः कृत्वा वदनं मुखं दिदीपे । वदनं किं कुर्वत् । पृणत् प्रीणयत् । 'पृण प्रीणने' तुदादिधातोरयं प्रयोगः । कान् । निर्जरा देवास्तेषां दृशो लोचनान्येव चकोरा ज्योत्स्नाप्रियास्तान् । क इव । सार्वभौम इव । यथा विभावरीणां शर्वरीणां सार्वभौमश्चक्रवर्ती प्राणनाथश्चन्द्रः । 'कन्दर्पेऽनल्पदर्पे विकिरति

किरणाञ्शार्वरीसार्वभौमः' इति नाटकग्रन्थे । शरदा घनात्ययेन विनिद्रीकृता जलधरधारावधीरणेन निर्मलीकृत्य विस्तारिता याश्चन्द्रिकाश्चन्द्रगोलिकास्ताभिः कृत्वा दीप्यते॥

स्मितश्रियामिश्रितदन्तकान्तिश्चकास्ति गीर्वाणमृगेक्षणायाः ।
बन्दीकृता चन्द्रमसं विजित्य ज्योत्स्नास्य दारा वदनेन विद्मः॥१०५॥

गीर्वाणस्य अमोघसदसद्वचनप्रपञ्चनाराचस्य देवस्य मृगेक्षणाया हरिणलोचनायाः स्त्रियः शासनदेवतायाः स्मितस्य कथंचिद्विनोदावसररसविनिर्मितहसितस्य श्रिया श्वेतिमलक्ष्म्या मिश्रिता करम्बिता व्याप्ता दन्तानां दशनानां कान्तिर्दीप्तिश्चकास्ति दीप्यते । तत्र वयमेवं विद्मो जानीमो वितर्कं वा कुर्मः उत्प्रेक्षामहे वा । वदनेन देवतामुखेन अर्थान्निजजगज्जित्वरवैभवेन चन्द्रमसं कुमुदबान्धवं विजित्य पराभूयास्य चन्द्रमसः दारा जाया ज्योत्स्ना कौमुदी बन्दीकृता निगृह्य रक्षितेव । 'विद्म इत्युत्प्रेक्षाविषयेऽपि भवेत्' इति काव्यकल्पलतायाम् ॥ इति सस्मितदन्तकान्तिः ॥

मरुन्मृगाक्षीवदनाब्जदन्तैस्तारेशतारैर्विजितैर्विभूत्या ।
आलोच्यते तद्विजिगीषयेव संभूय तीरेऽम्बरनिर्झरिण्याः ॥ १०६ ॥

तारा ज्योतींषि तेषामीशस्तारेशश्चन्द्रः । तथा तारा उपलक्षणात्सर्वेऽपि ग्रहनक्षत्रतारकास्तैः संभूय एकत्र मिलित्वा अम्बरनिर्झरिण्या गगनतरङ्गिण्याः । आकाशगङ्गाया इत्यर्थः । तीरे रोधसि तटप्रदेशे । उत्प्रेक्ष्यते—आलोच्यते मन्त्र्यते बिचार इव विधीयते । कया । तद्विजिगीषया । तेषां स्वद्वेष्याणां वक्त्रदन्तानां विजिगीषा पराबुभूषा अभिभवितुमिच्छा तया । अन्यापि निजप्रतिपन्थिपराजयचिकीर्षया एकान्तप्रदेशे मिलित्वा मिथो मन्त्रयन्ति । किम् । तारेशतारैर्मरुन्मृगाक्ष्या सुरहरिणचक्षुषा देवतया वदनाब्जेन स्वमुखकमलेन तथा दन्तैर्दशनैश्च विभूत्या तेषामद्वैतलक्ष्म्या कृत्वा विजितैः पराभूतैः ॥

अजय्यवीर्यं मुखपद्ममस्याः श्रिया जयन्तं स्वमवेत्य राज्ञा ।
संधिं विधातुं प्रहिताः प्रधाना द्विजाः समं तेन किमुल्लसन्ति ॥१०७॥

द्विजा देवीदशना उल्लसन्ति दीप्यन्ते । किंभूताः । प्रधानाः प्रकृष्टलक्षणोपेताः । उत्प्रेक्ष्यते—राज्ञा चन्द्रेण नृपेण च तेन स्वजैत्रेण मुखपद्मेन समं संधिं परस्परं मेलं प्रीतिं वा विधातुं प्रधानाः सचिवा द्विजाः स्वपारिपार्श्वका ब्राह्मणाः पुरोहितादयः प्रहिताः प्रेषिता इव । किं कृत्वा । अजय्यं जेतुमशक्यं केनापि स्पर्धिना विरोधिना कदापि कथमपि षड्गुणैस्तिसृभिः शक्तिभिश्चतुर्भिरुपायैश्चतसृभिर्बुद्धिभिरपि न जीयते पराभूयते इत्यजय्यं तादृशं वीर्यं पराक्रमो यस्य तादृशमस्या देव्या मुखपद्मं वादनारविन्दं स्वमात्मानं श्रिया लक्ष्म्या कृत्वा जयन्तं पराभवन्तमवेत्य ज्ञात्वा योऽधिकबलो निजनिर्जिगीषुश्च तेन सार्धं संधिरेवोचित इति ॥

पाण्डुः क्षयी शून्यनभश्चरिष्णुर्निरङ्गराहोर्द्विषतोऽपि बिभ्यत्।
दोषाकरः श्याममुखो वराकोऽस्माकं पुरस्ताज्जड कस्त्वमेकः ॥ १०८॥
हंसद्युतोऽक्षीणसुखा मुखस्था जिताहिताः स्फीतगुणा विशुद्धाः।
नैकेऽभिभूताः किमितीन्दुमुद्यद्द्युता त्रिदश्याः प्रहसन्ति दन्ताः॥ १०९॥

त्रिदश्याः शासनामर्त्यायाः दन्ता दशना उद्यन्ती प्रकटीभवन्ती उच्चैर्निर्यान्ती वा द्युत्कान्तिस्तया कृत्वा। उत्प्रेक्ष्यते—इति हेतो इन्दुं विधुं प्रकर्षेण हसन्तीव शशिनो हास्यं सृजन्तीव। इति किम्। यत् हे इन्दो हे जड मूर्ख जडस्वरूप जडाशय। 'किमु दधौ जड वा वडवानलात्' इति नैषधे चन्द्रसंबोधनं जड इति। अस्माकं पुरस्ताद्दन्तानामग्रे वराकः तपस्वी द्रुमको वा त्वं कः। न कश्चिदपीत्यर्थः। वराकतामेवादर्शयति—किंभूतस्त्वम्। पाण्डुः पाण्डुरोगवान् श्वेतकुष्ठविनष्टवपुः। भूतादिबद्धबलविग्रहो वा। पुनः किंभूतः। क्षयी राजयक्ष्मा रोगोऽस्यास्तीति। क्षयात्प्रतिदिनं कलानामपगमात्। बहुलपक्षे वपुषः क्षीणता अस्त्यस्मिन्निति वा क्षयी। पुनः किंभूतः। शून्यं निर्मानुषं तथानेनैव सम्यक्तया बभस्तीति भातीति नभः कुत्सितस्थानम्। 'निशानभःसदृशे' इति चम्पूकथायाम्। निशानैस्तेजस्विभिर्वीरैर्बभस्ति शोभते इति निशानिभास्तथा सदृशः इः कामो यस्य तस्य संबोधनम्। पक्षे रात्रिगगनतुल्ये इति तट्टिप्पन(ण)के। तत्र नगरग्रामाराममानवादिरिक्तके स्थानके चरिष्णुः संचरणशीलः श्मशानादिषु भक्षणशीलो वा। 'चर गतिभक्षणयोः' अस्य धातोः प्रयोगत्वेन जग्धिः स्थितिश्चेति द्व्यर्थता। पुनः किंभूतः। निर्गतमङ्गं शरीरं यस्य। विष्णुना सुदर्शनचक्रे शिरोवशेषीकृतत्वादङ्गराहित्यम्। तादृशाद्राहोः विधुंतुदाद्द्विषतो वैरिणः सकाशाद्बिभ्यद्भयमाकलयत्। पुनः किंभूतः। दोषाणामपगुणानामाकरः खनिः निशाकरश्च। पुनः किंभूतः। श्यामं कलङ्केन कृत्वा कृष्णं मुखं वक्त्रं यस्य। प्रायः कलङ्ककलिताः श्यामानना एव स्युः। पुनः किंभूतः। एको नास्ति द्वितीयः सदृशः कोऽपि एवंविधस्त्वं क्व। वयं पुनः कीदृशाः। हंसवत् उभयपक्षविशुद्धत्वेन द्योतन्ते इति। पुनः किंभूताः। अक्षीणं न क्षीयते स्मेत्यक्षीणम् अनिष्ठीयमानं संपूर्णं वा सर्वाङ्गीणं वा सुखं सातं येषाम्। एतावता रोगराहित्यसातवन्तः। पुनः किंभूताः। मुखे सर्वेषामप्यग्रे वक्त्रे च तिष्ठन्ति इति मुखस्थाः। एतावता सुस्थानभाजः। पुनः किंभूताः। जिताः स्वकीयपरमवैभवैरभिभूताः वज्ररत्नकुन्दतारकादयोऽहिताः प्रतिस्पर्धिनो यैस्ते जिताहिताः। एतावता निर्वैरिताः। पुनः किंभूताः। स्फीता विश्वविख्याता वृद्धिं प्राप्ता वा गुणा येषां ते स्फीतगुणाः। एतावता गुणवत्त्वम्। पुनः किंभूताः। विशेषेण शुद्धा निष्कलङ्काः सर्वत्रावदाताः। एतावता सर्वदाप्युच्चैःशिरसः। पुनः किंभूताः। नैके अनेके द्वात्रिंशप्रमाणत्वेन। एतावता वृद्धिभाजः सगोत्रत्वात्। पुनः किंभूताः। अभिलक्षणयुक्तं रूपं येषाम्। 'अभिर्वीप्सालक्षणयोः' इत्यनेकार्थः। अभिरूपाः पण्डिताः। 'विद्वान्सुधीः कविविचक्षणलब्धवर्णाः ज्ञप्राप्तरूपकृतिकृष्ट्यभिरूपधीराः' इति हैम्याम्॥ युग्मम्॥

आशानुरागातिशयं सृजन्ती प्रचेतसः स्फारमरीचितारा।
समुज्जिहानद्विजराजराजिवक्त्रा स्म संध्येव विभाति देवी ॥ ११० ॥

सा श्रीवीरशासनाधिष्ठायिका देवी संध्येव दिनावसानपितृसूरिव विभाति स्म। प्रातःकालीनापि संध्या प्रोच्यते। अतोऽर्थेन दिनावसानस्येत्युक्तम्। 'संध्या तु पितृसूः' इति संध्यानामद्वयं हैम्याम्। देवी संध्या च किं कुर्वती। प्रचेतसः प्रकृष्टमुन्नतेच्छं चेतो मनो यस्य तादृशस्य महतोऽपि आशाया वाञ्छाया अनुरागस्य मोहस्य स्नेहस्य वा अतिशयमाधिक्यमुत्कर्षं वा सृजन्ती कुर्वन्ती। महान्तोऽपि यामालोक्य मुह्यन्ति स्निह्यन्ति च। यां स्पृहयन्तीत्यर्थः। पक्षे प्रचेतसो वरुणस्य। 'वरुणस्त्वर्णतमन्दिरं प्रचेताः' इति हैम्याम्। आशाया दिशः पश्चिमाया अनुगतं क्रमागतं रागस्य रक्तताया अतिशयं प्राबल्यं संध्यारागं सृजन्ती विदधाना। पुनः किंभूताः। स्फारा उदारा बहुप्रदेशदर्शिन्यो लक्षयोजनविषयत्वान्मरीचयो दीप्तयस्तादृशे तारे कनीनिके यस्याः। पक्षे दीप्यमाना झगज्झगिति कुर्वन्त्यः कान्तयो रोचिषो येषां तादृशास्तारा ज्योतींषि यस्यां सा। पुनः किंभूताः। समुज्जिहान उदयमानः। 'मुखेन्दुनानेन सहोज्जिहाने' इति नैषधे। 'चन्द्रेण सममुदयन्ती' इति तद्वृत्तिः। द्विजराजश्चन्द्रः द्विजानां रदनानां राजानो द्विजराजा दन्तश्रेष्ठाः। 'क्वचिदमायन्तस्य परत्वम्' इति दन्तानां राजा राजदन्ता इति दन्तशब्दस्य परत्वम्। तै राजन्ते इत्येवंशीलः प्रारम्भः। पूर्णिमायां संध्याप्रारम्भ एव चन्द्रोऽभ्युदेति। अतः प्रारम्भो वदनं च यस्याः सा। राजदन्तशोभितवदना देवी। उदितचन्द्रप्रारम्भा च संध्या ॥ इति दन्ताः ॥

शशी सुधां प्रेक्ष्य निपीयमानां सुरैः सृजंस्तत्र ममत्वमन्तः।
ररक्ष निक्षिप्य रहो रसज्ञा पात्र्यामिवैतां कृतयन्मुखाङ्गः ॥ १११ ॥

शशी शशधरो विधुः एतां स्वसुधां रह एकान्तस्थानस्थितायां रसज्ञा देवीरसनैव पात्री भाजनविशेषस्तस्यां निक्षिप्य स्थापयित्वा। उत्प्रेक्ष्यते—ररक्षेव गोपायति स्मेव रक्षितवानिव। किंभूतः शशी। कृतं स्वेनैव निष्पादितं स्वात्मनैव विरचितं यस्या देव्या मुखं वदनमेव अङ्गं शरीरं येन। शशी किं कुर्वन्। अन्तश्चित्तमध्ये तत्र स्वसुधाविषये ममत्वम् इयं सुधा मया यथाकथंचिद्रक्षणीयैवेति। मम इत्यस्य भावो ममता तां मोहमूर्च्छां सृजन् कुर्वन्। किं कृत्वा। सुरैः सुधाशनैः निपीयमानां पीत्वापीत्वा निष्ठाप्यमानाम्। यदुक्तम्—'विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम्। सुरनिपीतसुधाकमपापकम्' इति नैषधे। सुराश्चन्द्रमसः सुधां पिबन्ति इति सुधां निजाङ्कस्थायुकपीयूषं प्रेक्ष्य विलोक्य ॥

यस्या रसज्ञां जयिनीं निभाल्य शोणच्छदं तत्तुलनाविलासम्।
पितामहं प्रार्थयते स्वतातारविन्दगेहे निवसन्तमूहे ॥ ११२ ॥

शोणच्छदं रक्तोत्पलपत्रं पितामहं जनकजनकं धातारं च प्रति अहमेवमूहे वितर्क-

यामि। तत्तुलनाविलासं तस्या देवीरसज्ञायास्तुलनां सादृश्यं तस्य विलासं वैचित्र्यं लीलां वा। 'असकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः' इति चम्पूकथायाम्। 'निरन्तरसुधारसाविष्कारिणो वाग्विलासा वचनवैचित्र्ये' इति तट्टिप्पन(ण)कम्। प्रार्थयते याचतीव। ण्यन्तत्वाद्विकर्मत्वम्। पितामहं किं कुर्वन्तम्। स्वस्यात्मनः स्वजन्मकर्तृत्वेन तातो जनकोऽरविन्दः पद्मः स एव तत्र वा गेहं मन्दिरं तत्र निवसन्तं निवासं कुर्वन्तम्। एतावता संबन्धो जातः संबन्धे च प्रार्थना फलेग्रहिः स्यादिति किं कृत्वा प्रार्थयते। यस्या देवताया जिह्वां रसज्ञां जयिनीं निजजयनशीलां निभाल्य निरीक्ष्य ॥

स्वं निष्ठितं नित्यसुपर्वपानात्पीयूषमन्विष्य सितत्विषेव।
प्रैषीदमानापयितुं रसज्ञासुधाह्रदोऽस्या द्विजराजिराभात् ॥ ११३ ॥

अस्या देवताया द्विजराजिर्दन्तपङ्क्तिराभाद्बभौ। उत्प्रेक्ष्यते—सितत्विषा चन्द्रमसा इदं पीयूषमानापयितुमात्मार्थे आनयनार्थमस्या देव्या रसज्ञा जिह्वा सैव सुधाया अमृतरसस्य ह्रदो द्रवस्तत्र द्विजराजिस्तदधिपतित्वात्स्वभृत्यवर्गीभूता द्विजपङ्क्तिर्दशनावलीरूपा ब्राह्मणमण्डली प्रैषि प्रहितेव। किं कृत्वा। नित्यमहोरात्रं सुपर्वणां देवानां सुधाशनत्वात्पानात्पानवशतः निष्ठितं क्षीणं स्वल्पावशिष्टं वा पीयूषं सुधारसमन्विष्य समीक्ष्य ॥

जाने यदास्यं सरसीरुहाया विजृम्भिजिह्वारुणपद्मपत्रा।
श्रेणीभवन्तः पुलिनावतंसा हंसद्विजाः स्युः कथमन्यथास्याम् ॥ ११४ ॥

यदास्यं देवीवदनम् अहमेवं जाने वेद्मि। सुधाया अमृतरसस्य सरसी महत्सरोवरमिव। किंभूतम्। विजृम्भि विकसनशीलं जिह्वा देवीरसना सैवारुणपद्मस्य रक्तकमलस्य पत्रं दलं यस्यां सा। एवं चेन्न तर्हि अन्यथा सुधासरसीमन्तरेण अस्यां सरस्यां पुलिनस्य जलोज्झितप्रदेशस्य तटस्येत्यर्थः। 'पुलिनं तज्जलोज्झितम्' इति हैम्याम्। अवतंसाः शेखरीभूतास्तथा श्रेणीभवन्तः पङ्क्त्या जायमानाः सन्तस्तिष्ठन्तः हंसद्विजाः सितच्छदविहंगमाः हंसवदुज्ज्वला द्विजा दशनाः कथं केन प्रकारेण स्युर्भवेयुः ॥

वर्धिष्णुदेवीहृदयानुरागवारांनिधेर्विद्रुमकन्दलीव।
कण्ठत्रिरेखेन मुखे गृहीता पुपोष भूषां रसनादसीया ॥ ११५ ॥

अदसीया अमुष्या इयमदसीया शासनदेवतासंबन्धिनी रसना जिह्वा भूषां शोभां पुपोष पुष्णाति स्म। शुशुभे इत्यर्थः। उत्प्रेक्ष्यते—कण्ठ एव त्रिरेखः तिस्रो रेखा यत्रेति कम्बुनोपमेयत्वात्कम्बुरेव तेन मुखे स्ववदने गृहीता उपात्ता वर्धिष्णुर्वर्धनशीलो यो देव्या हृदये मनसि। हृदयं मनो वक्षश्च। अनुरागः स्वप्रियायुपरि अत्यन्तानुरक्तता वर्धमानो रागः स एव वारांनिधिः समुद्रः तस्य। तदुत्पन्नस्येत्यर्थः। विद्रुमस्य प्रवालस्य कन्दली नवाङ्कुर इव। 'कन्दली रूपरागेऽपि कलापे च नवाङ्कुरे। मृगजातिप्रभेदे च' इति लिङ्गानुशासनावचूर्णौ विद्रुमाणां शङ्खानां च समुद्रे सद्भावात्तद्ग्रहणमुचितमेवेति ॥ इति रसज्ञा ॥

जडीभवन्ती रिपुनिर्जये यद्वाचा जिता ह्रीविधुरा विपञ्ची ।
यियासया शैवलिनीशपारे तुम्बद्वयं किं बिभरांबभूव ॥ ११६ ॥

यद्वाचा देवीसुधारसोद्गारायमान(ण)वाण्या जिताभिभूता अत एव ह्रिया परात्पराभवोद्भूतभूरिलज्जया विधुरा विह्वला व्याकुला विपञ्ची वीणा । शैवलिनीशस्य सरिद्भर्तुः समुद्रस्य पारे अपरपार्श्ववर्तिनि तटे यियासया मन्दाक्षलक्षीकृतत्वेनापरस्य कस्यापि स्वास्यं दर्शयितुमशक्नुवन्ती गन्तुमिच्छया। उत्प्रेक्ष्यते—तुम्बद्वयं किम्। अलाबुयुगलमिव बिभरांबभूव धृतवतीव । यो नद्यादिजलमुत्तितीर्षुः स तुम्बकानि धरति इति रीतिः । किं कुर्वती । रिपुनिर्जये प्रतिपन्थिपराभवने प्रतिपक्षस्य प्रतीकारकरणे जडीभवन्ती किंकर्तव्यतायाम् अतः परं मयाथ किं करणीयमिति कार्यकरणविषये मन्दिमानं मूढतां दधाना । स्वशात्रवं प्रतिकर्तुमशक्नुवन्तीत्यर्थः ॥

श्रवःसुधायै जगतां यदीयवाचे पिकेन स्पृहयालुनेव ।
अभ्यस्यते भैक्षभुजा तरुभ्योऽनिशं वने पञ्चमगीतिरुच्चैः ॥ ११७ ॥

पिकेन कोकिलेन अनिशं निरन्तरं वने सहकारकानने । प्रायः पिकानां मनो माकन्दनिकुञ्जे एव रमते नान्यस्मिन् शाखिखण्डे । यतः—'यद्यपि दिशि दिशि तरवः परिमलमत्तालिपटलवाचालाः । तदपि स एकरसालः कोकिलहृदि हन्त जागर्ति॥' इति । उच्चैरतिशयेन बाढस्वरेण वा पञ्चमस्य पञ्चमनाम्नो रागस्य गीतिर्गानं कण्ठकुहरान्तरानेकतानलयमूर्छनाघोलनापूर्वको ध्वनिर्वा अभ्यस्यते अभ्याससाध्यो विधीयते । यः पठन् शास्त्राभ्यासं कुरुते स बाढस्वरेणैव उद्घोषं कुरुते । किंभूतेन पिकेन । तरुभ्योऽर्थान्माकन्दपादपेभ्यो भैक्षं मञ्जरीकलिकारूपं भिक्षाणां समूहो भैक्षम् । अत्र समूहार्थेऽण्प्रत्ययः । भुनक्ति अश्नातीति तेन भैक्षभुजा । उत्प्रेक्ष्यते—स्पृहयालुनेवाभिलाषुकेनेव । कस्यै । जगतां त्रिजगज्जनानां श्रवसां कर्णानामुपोषितानामिव पारणायै सुधायै अमृतरसभूतायै ॥

स्वरैकसारं परवादिनीभ्यः संगृह्य जाने जलजासनेन ।
विधीयते स्म ध्वनितं त्रिदश्यास्ताभ्योऽतिरिच्येत न चेत्कुतस्तत्॥११८॥

परवादिनीभ्यः सप्ततन्त्रीविपञ्चीभ्यः । 'साथ तन्त्रीभिः सप्तभिः परवादिनी' इति हैम्याम् । सर्ववीणासकाशात् स्वराणाम् 'षड्ज–ऋषभ–गान्धार–मध्यम–पञ्चम–धैवत–निषध–इति सप्तानां तन्त्रीभवानां ध्वनीनाम् 'षड्जऋषभगान्धारा मध्यमः पञ्चमस्तथा । धैवतो निषधः सप्ततन्त्रीकण्ठोद्भवाः स्वराः ॥' इति हैम्याम् । अत्र तु वल्लकीक्कणानामेवोपादानं मध्यादेकमद्वितीयं सारं श्रेष्ठदलम् । 'सारो मज्जास्थिरांशयोः । बले श्रेष्ठे च' इत्यनेकार्थः । संगृह्य संग्रहं कृत्वा गृहीत्वा वा जाने वेद्मि । उत्प्रेक्ष्यते वा—अहमेवं चिह्नोचरीकरोमि । जलजासनेन कमलविष्टरेण ब्रह्मणा त्रिदश्या वीरशासनदेवताया

ध्वनितं सारस्वरो विधीयते स्म कृतम् । एवं चेन्न तर्हि तद्ध्वनितं देवीनिस्वनस्ताभ्यः परवादिनीभ्यः कुतोऽतिरिच्यते कस्मात्कारणादधिकीभवति ॥

यद्वाक्पुरस्तादिव पाण्डुराभिर्विलीयते स्म त्रपया सुधाभिः ।
सितोपलाभिश्च तपस्विनीभिस्तृणं किमादाय मुखेन तस्थे ॥ ११९ ॥

यस्या देवताया वाचां माधुर्याद्वैततया निजनिर्जित्वरीणां वाणीनां पुरस्तादग्रे त्रपया लज्जया कृत्वा पाण्डुराभिर्धवलीभूताभिर्दुःखातिरेकात्पाण्डूभूय सुधाभिरमृतरसैः । उत्प्रेक्ष्यते—विलीयते स्म विलीनमिव गलित्वा गतमिव द्रवीभावः प्रापेव । च पुनर्यस्या वाचां पुरः तपस्विनीभिर्वराकीभिः दुर्बलाभिः पाण्डुराभिरपि सितोपलाभिः शर्कराभिः तपस्वितया । उत्प्रेक्ष्यते—मुखेन वक्त्रेण कृत्वा तृणमादाय गृहीत्वा किं तस्थे स्थितमिव । यद्वाचा जिता पाण्डुरीभूय अमृतं विलीय गतं सिता मुखे तृणं गृहीत्वा स्थितेति भावः ॥ इति वाणी ॥

स्वप्रीतिरत्योरिदमोष्ठधाम्नोः सापत्न्यतः संस्थितिवासभाजोः ।
स्मरस्तदर्धे विबभाज सीमां रेखामिषात्किं विनिनीषुराजिम् ॥ १२० ॥

स्मरः कन्दर्पस्तदर्धे तयोर्निजनितम्बिन्योर्निवासस्थानकीभूताधारस्यार्धे तुल्योभयपार्श्वयोर्मध्ये । उत्प्रेक्ष्यते—रेखाया अधरमध्यगतरेखाकारस्य मिषात्कपटात्सीमामवधिभूतभूमीं विबभाज विभागीकृतवानिव विभागीकृत्य द्वयोर्दत्तवानिव वा । स्मरः किं कर्तुमिच्छुः । विनिनीषुः व्यपनेतुमिच्छुर्निवारयितुं काङ्क्षन् । काम् । आजिं परस्परकलहम् । कयोः । स्वस्यात्मनः प्रीतिरतिनाम्न्योः पत्न्योः । किंभूतयोः । इदमस्या देव्या ओष्ठो दशनच्छद एव धाम मन्दिरं ययोः । अत एवः पुनः किंभूतयोः । समान एव पतिर्भर्ता ययोस्ते सपत्न्यौ सपत्न्योर्भावः सापत्न्यं सापत्न्यतः सपत्नीभावतः कृतसपत्नीकत्वादित्यर्थः । संस्थितौ परस्परं सम्यक्स्थितौ वसतिविषये विशेषेण वादं कलिम् इदं स्थानकं मदीयमिदं स्थानकं मदीयमिति क्लेशं भजतस्तयोः । स्वस्वस्थानाधिकस्थानलिप्सया मिथो विवादकारिण्योरित्यर्थः ॥ इत्यधरोष्ठमध्यरेखा ॥

तत्साधु मन्ये मलयानिलेन यदेतदीयस्वसितीबभूवे ।
सर्वर्तुपुष्पोद्भवसौरभस्य सौभाग्यमाप्नोति किमन्यथासौ ॥ १२१ ॥

तत्साधु मन्ये अहं कविस्तत्साधु समीचीनं मन्ये हृदि मानयामि वेद्मि यन्मलयानिलेन मलयद्रुमपरिमलसुरभीकृतमलयशैलप्रसरत्पवनेन दाक्षिणात्यवायुना एतस्या इदमेतदीयं देवतासंबन्धि यत्स्वसितं श्वासः तद्बभूवे जातम् । 'श्वासस्तु श्वसितम्' इति हैम्याम् । देवीश्वासरूपेण संजज्ञे अन्यथा तद्भवनव्यतिरेकेण असौ मलयानिलः सर्वे वा ते ऋतवश्च सर्वर्तवः हिम–शिशिर–वसन्त–ग्रीष्म–वर्षा–शरल्लक्षणाः षडपि ऋतवः समयविशेषास्तेषां पुष्पाणि कुसुमानि तेभ्यः उद्भवेभ्य उद्भव उत्पत्तिर्यस्य तादृशं यत्सौरभं सुरभिता आमोदो वा तस्य सौभाग्यं सुभगतां माहात्म्यं वा किं कथं केन प्रकारेणा-

प्रीति लभते। अपि तु न केनापीति। यतो मलयानिलो वसन्तर्तावेव नान्यर्तुषु ततो वसन्ततौं एव कुसुमसौरभं लभते। एतद्वदनश्वासानिलस्य तु सर्वर्तुकपुष्पपरिमललम्भः तस्मात्साधिमैव प्रलयवायोः संजातः॥

निमीलनोन्मीलनदूषितेभ्यो नित्यं दधद्भ्यो मधुपानुषङ्गम्।
निर्वेदवान्पद्मकुमुद्वनेभ्यः स्थितः किमामोद इदंमुखाब्जे॥ १२२॥

पद्मकुमुद्वनेभ्यः कमलकैरवकाननेभ्यः सकाशान्निर्वेदवान् खेदमेदस्विमनः कलितः प्राप्तोद्वेगः। उत्प्रेक्ष्यते—आमोदः परिमलः इदंमुखाब्जे शासनसुरीवक्त्रारविन्दे किं स्थितः समेत्य स्वयं वसतीव। किंभूतेभ्यः पद्मकुमुद्वनेभ्यः। निमीलनं संकोचः, उन्मीलनं विकाशः। निशायां पद्मं निमीलति कैरवमुन्मीलति दिने पद्ममुन्मीलति कुमुदं निमीलति। आभ्यां क्रमात्संपद्विपद्भ्यां दूषितेभ्यः विकारं प्रापितेभ्यः। पीडितेभ्य इत्यर्थः। पुनः किंभूतेभ्यः। नित्यं निरन्तरं मधुपैर्मद्यपायिभिर्भ्रमरैर्वा अनुषङ्गो मिलनं संगमं दधद्भ्यो धारयद्भ्यः। कुर्वद्भ्यः इत्यर्थः॥

विश्राणयित्वेव पुरा स्वसारसौरभ्यमेतद्वदनाम्बुजाय।
शोभासहस्रांश इतः पयोजपरम्पराभिर्गृहयांबभूवे॥ १२३॥

पयोजपरम्पराभिः पद्मानामनेकाभिः पङ्क्तिभिः इतोऽस्मादेव तद्वदनाम्बुजाद्देवतावदनारविन्दात् शोभानां श्रीमत्ता-सुकुमारता-सुरभिता-संपूर्णता-वृत्तता-मनोज्ञता-प्रभृतिलक्ष्मीणां सहस्रः दशशतसंख्यः अंशो भागः। 'यदि प्रसादीकुरुते सुधांशोरेषा सहस्रांशमपि स्मितस्य' इति नैषधे। गृहयांबभूवे गृहीतः। उत्प्रेक्ष्यते—पुरा पूर्वं पूर्वस्मिन्काले एतस्याः शासनदेव्या वदनं मुखमेवाब्जं कमलं तस्मै स्वस्यात्मनः सारं श्रेष्ठभूतं सौरभ्यं सुरभितां विश्राणयित्वेव प्रदायेव॥ इति देवीवक्त्रपरिमलः॥

व्यर्थीकृतां शक्तिमवेत्य पूषद्विषा विरक्तेर्निजहेतिहातुः।
तूणीरमादाय मनोभवस्य विरञ्चिनास्या व्यरचीव नासा॥ १२४॥

विरञ्चिना अस्यास्त्रिदश्या नासा व्यरचि चक्रे। उत्प्रेक्ष्यते—मनोभवस्य स्मरस्य तूणीरं निषङ्गं रिक्तं शराश्रयमादाय गृहीत्वेव। किंभूतस्य मनोभवस्य। विरक्तेर्विरागान्मानसीयनिर्वेदात् हेतोर्हेतीनां निजप्रहरणानां हातुस्त्यजनशीलस्य। 'ओहाक् त्यागे' तृन्। हानं शीलो हाता तस्य हातुः जहातीत्येवंशीलस्य। किं कृत्वा। पूषद्विषा पूषनाम्नः शत्रोः व्यापादकेन शंभुना। 'गजपूषपुरानङ्गकालान्धकमखासुहृत्' इति हैम्याम्। शक्तिं स्वस्य वीर्यं बलं सर्वायुधसामर्थ्यं वा व्यर्थीकृतां निष्फलां वन्ध्यां विनिर्मितामवेत्य ज्ञात्वा॥

यन्नासिकां वीक्ष्य जगन्निरीक्ष्यामेतत्पुरः श्रीर्मम का ह्रियेति।
शङ्केऽनिशं न्यक्कृतिकैतवेन स्वं गोप्यते कीरस्रपाटिकाभिः॥ १२५॥

कीरस्थपाटिकाभिः शुकचञ्चुभिः अहमेवं शङ्के विचारयामि । उत्प्रेक्ष्यते वा—इति हेतोर्ह्रिया लज्जया अनिशं निरन्तरं दिवा रात्रावपि न्यक्कृतेर्नीचैःकरणस्य कैतवेन कपटेन कृत्वा स्वमात्मानं गोप्यते गुप्तीक्रियते छन्नो रक्ष्यते इव । इति किम् । एतत्पुरः एतस्या नासिकाया पुरस्तान्मम श्रीः का । न कापीत्यर्थः । किं कृत्वा । सम्यग्लक्षणोपेततया जगन्निरीक्ष्यां त्रिजगज्जनैर्विलोकनीयां यस्या देव्या नासिकां वीक्ष्य ॥

मुक्त्वा द्विषः पञ्चमुखीं प्रति स्वान्पञ्चापि रोपान्स्मरधन्विनाजौ ।
यदङ्गवासौकसि किं निषङ्गो रिक्तो विमुक्तोऽजनि नासिकास्याः॥१२६॥

स्मरधन्विना विषमायुधधनुर्धरेण यस्या देवताया अङ्गं शरीरं तदेव वासार्थं निवसनकृते ओको गृहं तत्र रिक्तो निखिलविशिखव्यपगमनतोच्चारणरहितः अत एव विमुक्तः सदनान्तःस्थापितः निषङ्गः तूणीरः । उत्प्रेक्ष्यते—अस्याः शासनदेवताया नासा गन्धज्ञा किमजनि संजात इव । किं कृत्वा । द्विषः स्वशात्रवस्य ईश्वरस्य पञ्चानां मुखानां समाहारः पञ्चमुखी तां प्रति । शंभोः पञ्च वदनानि सन्ति कविसमये । 'मृत्युंजयः पञ्चमुखोऽष्टमूर्तिः' इति हैम्याम् । पञ्चसंख्याकानि मुखानि प्रति आजौ संग्रामे पञ्चापि पञ्चप्रमाणानपि। स्मरस्य पञ्चैव बाणास्तूणीरे नाधिकाः । यतः—'बाणाः पञ्च रतिप्रियाः' इति हैम्याम् । रोपान् बाणान् मुक्त्वा क्षिप्त्वा ॥

स्वमन्दिरे यद्वदनारविन्दे लावण्यलक्ष्म्या प्रकटीकृतेव ।
भ्रूकैतवात्कज्जलमुद्गिरन्ती प्रदीपलेखा विललास नासा ॥ १२७ ॥

नासा अर्थाजिनशासनदेवताया नासिका विललास शोभते स्म । उत्प्रेक्ष्यते—स्वस्यात्मीयस्य मन्दिरे निवाससदने यस्या देव्या वदनारविन्दे मुखकमले लावण्यं लवणिमा विभ्रमविलासशोभातिशयः तस्य लक्ष्म्या श्रिया प्रकटीकृता उद्बोधिता प्रदीपलेखा स्नेहप्रिया कलिकेव । किं कुर्वन्ती । भ्रुवोर्लोचनयोरूर्ध्वयो रोमपद्धत्योः कैतवाद्व्याजात्कजलमञ्जनमुद्गिरन्ती स्वशिखायाः सकाशात् भ्रूश्यामिकाञ्जनं प्रादुःकुर्वन्ती ॥ इति नासिका ॥

निजप्रतिद्वन्द्विविधुंतुदस्य निरीय भाग्याभ्युदयेन वक्रात् ।
पुनस्तदातङ्कितचेतसेव यद्गण्डभूयं विधुनानुसस्रे ॥ १२८ ॥

विधुना चन्द्रेण यस्या देव्या गण्डभूयं गल्लभावः कपोलरूपता अनुसस्रे आश्रिता । उत्प्रेक्ष्यते—पुनर्व्याघुट्य द्वितीयवारमपि तस्माद्विधुंतुदाद्वैरिणः सकाशादातङ्को भयं संजातोऽस्मिन्नित्यातङ्कितं भीतियुक्तं जातं चेतो मनो यस्यैवंविधेनेव । किं कृत्वा । निजस्यात्मनः निज आत्मीयो वा प्रतिद्वन्द्वी प्रत्यर्थी यो विधुंतुदो राहुस्तस्य वक्रान्मुखाद्भाग्यस्य प्राचीनाचीर्णसुकृतस्याभ्युदयेनाविर्भावेन कथंचित्पूर्वपुण्यप्रकरपरिपाकवशेन कृत्वा निरीय निर्गत्य केनापि भाग्यसंभारोदयेन वैरिवदनाद्विनिर्गत्य पुनस्तदानननिष्पतनाशङ्कया विधुना यत्कपोलकायीबभूवे इत्यर्थः ॥

यदास्यतोऽभ्यर्थयितुं विभूषाभरं त्रियामादयितात्मदर्शौ ।
तन्नित्यसेवाविधये कपोलपालीद्वयीभावमिवाभजेताम् ॥ १२९ ॥

त्रियामादयितो निशापतिः चन्द्रस्तथा आत्मदर्शो दर्पण एतौ द्वावपि तस्य देवीवदनस्य नित्यमहोरात्रमविरहितं सेवायाः पर्युपास्तेर्विधये प्रकाराय । करणार्थमित्यर्थः । कपोलपाल्योर्गण्डस्थल्योः । 'कपोलपालीजनितानुबिम्बयोः' इति नैषधे । द्वयी द्वितयी यामलं तस्या भावं तत्स्वरूपताम् । उत्प्रेक्ष्यते—अभजेताम् भेजतुरिव । किं कर्तुम् । यदास्यतो देवीवदनात् विभूषाभरं शोभासमुदयातिशयमभ्यर्थयितुं याचितुम् ॥

कपोलभित्तौ मृगनाभिपङ्कैश्चित्रीकृतोऽस्या मकरश्चकासे ।
यद्वेश्मनोऽदृश्यतनोरनङ्गतयात्मयोनेरिव लक्ष्म लक्ष्यम् ॥ १३० ॥

यस्याः शासनदेवतायाः कपोलो गण्डस्तद्रूपायां भित्तौ कुड्ये मृगनाभेः कस्तूरिकायाः पङ्कैः कृत्वा चित्रीकृत आलेख्यतां प्रापितो मकरो मत्स्यविशेषः लोके 'मगर' इति प्रसिद्धः । चकासे शोभते स्म । 'कपोलपत्रान्मकरात्सकेतुः' । 'कपोले पत्रवल्लीरूपान्मकरात्' इति तद्वृत्तिः । उत्प्रेक्ष्यते—आत्मयोनेर्मकरध्वजस्य लक्ष्यं जनदृग्गोचरं लक्ष्म केतनं चिह्नमिव । किंभूतस्य आत्मयोनेः । यद्वेश्मनो यैव शासनदेवतैव वेश्म वासभवनं यस्य । पुनः किंभूतस्य । अनङ्गतया अशरीरत्वेन शंभुना भस्मीकृत्य नामशेषीकृतत्वात् अदृश्या न नयनगोचरीभूता तनुः शरीरं यस्य ॥ इति कपोलः ॥

हिरण्यगर्भः प्रणयन्सुरीं तां विद्मोऽरविन्दं वदनीचकार ।
मरन्दलुभ्यन्नयनद्विरेफौ न चेद्भवेतां कथमन्यथास्मिन् ॥ १३१ ॥

वयमेवं विद्मः जानीमः उत्प्रेक्षामहे वा । हिरण्यगर्भः विधाता । 'हिरण्यगर्भो लोकेशो नाभिपद्मात्मभूरपि' इति हैम्याम् । तां जिनशासनाधिष्ठात्रीं सुरीं प्रणयन् घटयन् सन्नरविन्दं प्रफुल्लपद्मं वदनीचकार तस्या मुखं कृतवान् । एवं चेन्न तर्हि अन्यथा अपरप्रकारेण अरविन्दव्यतिरेकेण अस्मिन्नानननलिने मरन्दार्थे मकरन्दपानकृते लुभ्यन्तौ लोलुपीभवन्तौ नयने लोचने एव द्विरेफौ भ्रमरौ कथं केन प्रकारेण भवेताम् ॥

स्फुरन्महोगोचरिताखिलाशौ भूपाविवास्या भवतः स्म नेत्रौ ।
अधारिषातां कथमातपत्रे पक्ष्मोपधे मूर्धनि चेन्न ताभ्याम् ॥ १३२ ॥

अस्याः सुधाशनसारङ्गलोचनाया नेत्रौ नयने भूपाविव राजानाविव भवतः स्म संजातौ । स्फुरता सर्वत्र प्रसरता महसा तेजसा गोचरिता स्वदर्शनविषयीकृता । दृष्टेत्यर्थः । अखिलाः समस्ता अपि आशा दिशो याभ्यां तौ । स्फुरद्भिः प्रत्यर्थिपार्थिवसार्थासह्यभावं प्रदधद्भिः महोभिः प्रतापैः । 'स राशिरासीन्महसाम्' इति नैषधे । 'महसां प्रतापानाम्' इति तद्वृत्तिः । गोचरीकृता व्याप्ताः समग्रा अपि हरितो याभ्यां भूपाभ्याम् । एवं चेन्न तर्हि राजभावमन्तरेण ताभ्यां नेत्राभ्यां मूर्धनि निजोपरिमस्तके पक्ष्मोपधेर्नेत्ररोमच्छलादातपत्रे द्वे छत्रे कथं केन प्रकारेणाधारिषातां विधृते ॥

असूयया स्वीयपराभविष्णुं दृशं यदीयां प्रविभाव्य भृङ्गाः ।
स्पर्धां न दध्मोऽथ वयं कदाचिदितीव चक्रुः कजकोशपानम् ॥ १३३ ॥

भृङ्गा भ्रमराः इति हेतोः कजानां कमलानां कोशानां कुड्मलानां मुकुलानां पानमर्थान्मकरन्दधीतिम् । 'धीतिः पाने' इति हैम्याम् । 'धेट् पाने' अस्य धातोः रूपम् । धानं धयनं धीतिः । पानं कुर्वन्ति स्म कोशपानं शापथमिव चक्रुः कृतवन्तः । इति किम् । पूर्वं तु यदभूत्तत्तु जातमेव । अद्यतनाद्दिनादारभ्य वयं त्वया समं स्पर्धां सहर्षं कदाचित्कस्मिन्नपि समये न दध्मो धारयामो न वहामो वा । स्पर्धां न कुर्म इत्यर्थः । किं कृत्वा चक्रुः । यदीयां देवीसंबन्धिनीं दृशं दृष्टिमसूयया भृङ्गाणां मानसे संस्पर्धितामवधार्य तदुद्भूतभूरितमेर्ष्यया कृत्वा स्वीयामात्मीयां पराभविष्णुं पराभवशीलां प्रविभाव्य समीक्ष्य ॥

सारैर्दलैः शासनदेवतायाः प्रणीय नेत्रे इव पद्मयोनिः ।
शेषैरशेषैर्दलिकैरकार्षीत्पुनश्चकाराम्बुजखञ्जरीटान् ॥ १३४ ॥

पद्मयोनिर्ब्रह्मा । 'जनकायोनिजरुहजन्मभूसूत्यणादयः' इति हैम्याम् । पुनर्द्वितीयवारं शेषैरुद्वृत्तैरशेषैः सकलैः सारेतरदलिकैर्वस्तुद्रवैः कृत्वा चकोरान् ज्योत्स्नाप्रियान् अम्बुजानि कमलकुवलयकुमुदादीनि सलिलजन्मानि तथा खञ्जरीटान् खञ्जनान् लोके 'गङ्गेटिवा' इति प्रसिद्धानकार्षीत्करोति स्म । किं कृत्वा । प्रणीय निर्माय । कैः । कर्मतापन्नैः । उत्प्रेक्ष्यते—सारैः सर्वविशिष्टभूतैः अशेषद्वेषिसंताननिर्जित्वरैर्दलैरद्वैतद्रव्यैः शासनदेवताया जिनमताधिष्ठायिकायास्त्रिदश्याः किमु नेत्रे कर्णान्तायतलोचने इव कृत्वा ॥

जेया त्रिलोक्येव शरैस्त्रिभिस्तच्छेषा द्विकाण्डी किमिति स्मरेण ।
त्यक्ताथ सा पद्मभुवा कृतार्थीकृतेव देव्या नयने प्रणीय ॥ १३५ ॥

अथ पश्चान्मदनधनुर्धरेण त्यजनानन्तरं सा कृत्यबन्धत्वेन क्षिप्ता त्यक्ता द्विबाणी द्वयोर्बाणयोः समाहार इति पद्मभुवा पङ्कजजन्मना विधिना देव्याः शासनदेवताया नयने विलोचने प्रणीय विधाय कृतार्थीकृता सफला विहितेव । सा का । या द्वयोः काण्डयोः समाहारो द्विकाण्डी द्विशरी । 'बाणे पृषत्कविशिखौ खगगर्धपक्षाकाण्डाशुगप्रदरसायकपत्रवाहाः' इति हैम्याम् । बाणद्वयमित्यर्थः । इति हेतोः स्मरेण विषमायुधधानुष्केण त्यक्ता उज्झिता । इति किम् । त्रयाणां स्वर्गपातालभूमण्डललक्षणानां लोकानां समाहारस्त्रिलोकी एव त्रिभुवनमेव जेया पराभवनविषयीकरणीया । नापरा मम जेतुं योग्या त्रिलोकी । सा तु त्रिलोकी त्रिभिरेव पत्रिभिर्मया जेष्यते तर्हि शेषा पञ्चसु शरेष्ववशिष्टा द्विबाणी किमिति किं कार्यार्थं केवलं भारभूतेव । न किंचित्कृत्यकृते तेनोज्झिता ॥

श्रिया सुधाभाक्परमाणुमध्या चक्षुर्विभूषामनुकर्तुकामैः ।
गुप्तं क्वचित्प्रावृषि खञ्जरीटैराराध्यते मन्त्र इवाप्तदत्तः ॥ १३६ ॥

खञ्जरीटैः खञ्जनपक्षिभिः प्रावृषि वर्षाकाले क्वचित्कुत्रापि जनदृग्गोचरे स्थाने गुप्तमत एव यथा कश्चिन्न वेत्ति तथा छन्नं यथा स्यात्तथा । उत्प्रेक्ष्यते—आप्तेन विश्वासप्राप्तेन केनचित् हितकृता सिद्धेन वा केनचन दत्तोऽतिप्रसन्नीभूत्वा विश्राणितो मन्त्रोऽतिप्रभावयुक्तवर्णपाठमयः आराध्यते साध्यते इव । किं कर्तुकामैः खञ्जनैः । श्रिया स्वशोभया वैभवेन सुधाभुजो देवस्य परमाणुवदतिसूक्ष्मत्वान्मध्यमुदरं यस्याः सा परमाणुमध्या । तस्याश्चक्षुषो लोचनस्य विभूषां लक्ष्मीं विलासमनुकर्तुं स्वेन सदृशीं विधातुं कामोऽभिलाषो येषां तैः ॥

चन्द्राच्चकोरोऽमृतपानदम्भाद्यानस्थितो गन्धवहात्कुरङ्गः ।
पितामहात्पङ्कजमासनस्थं यदक्षिलक्ष्मीमिव मार्गयन्ति ॥ १३७ ॥

चकोरजातिवाचित्वादेकवचनम् । ज्योत्स्नाप्रियप्रकरः चन्द्रात्सुधाकरादमृतपानस्य दम्भात्कैतवात् यस्याः शासनदेवतायाः अक्ष्णोर्दृशोर्लक्ष्मीं सुषमां मार्गयतीव । उत्प्रेक्ष्यते—याचतीव यथा याने वाहने स्थितः सन् कुरङ्गो मृगो गन्धवहात्पवनात्सकाशात् । 'मातरिश्वा जगत्प्राणः पृषदश्वो महाबलः' इति हैम्याम् । पृषत्कुरङ्गजातिविशेषः । तथा 'कर्तुं शशाङ्काभिमुखं न भैम्या मृगं दृगम्भोरुहनिर्जितं यत् । अस्या विवाहाय ययौ विदर्भास्तद्वाहनस्तेन न गन्धवाहः॥' इति नैषधे । पवनात्सकाशात् । उत्प्रेक्ष्यते—यदक्षिलक्ष्मीं मार्गयतीव । आसने विष्टरे तिष्ठतीत्यासनस्थं ब्रह्मणः सरोरुहासनत्वात् । 'भवान्तकृज्जगत्कर्तृसरोरुहासनाः' इति हैम्याम् । पङ्कजं कमलं पितामहाज्जनकजनकाद्विधातुः सकाशाद्देवीविलोचनविभ्रमं याचतीव ॥

स्मितं दिने निश्यपि नित्यरङ्गद्भृङ्गाङ्कितं स्याद्यदि पुण्डरीकम् ।
प्रस्पन्दमानान्तरतारिकां तत्तनोतु कुर्याद्दृशमेतदीयाम् ॥ १३८ ॥

यदि कदाचिद्दैवतानुभावात् दिने वासरे निश्यपि रात्रावपि स्मितं विकाशं प्राप्तं तथा नित्यं रात्रौ दिवा वा विरहितं रङ्गन्तौ मकरन्दं पातुमितस्ततो भ्रमणतश्चपलायमानौ भृङ्गौ द्विरेफौ ताभ्यामङ्कितं कलितमेवंविधं पुण्डरीकं श्वेतकमलं स्यात्ततस्तर्हि यथाकथंचित्तत्पुण्डरीकं प्रस्पन्दमाना प्रचलन्ती अन्तरे मध्ये तारिका कनीनिका यस्यां तादृशीम् । एतदीयामेतस्या इमां त्रिदश्या देव्या इमां दृष्टिमनुकुर्यात् सदृशीभवेत् । अनुकारं विदध्यादित्यर्थः ॥ इति लोचनम् ॥

प्रीत्या च रत्या सह मीनकेतोरन्दोलनादोहदपूरणाय ।
विनिर्मिते नाभिभुवेव लीलादोले तदीये श्रवसी विभातः ॥ १३९ ॥

तदीये देवीसंबन्धिनी श्रवसी कर्णौ विभातः शोभेते । उत्प्रेक्ष्यते—नाभिभुवा पद्म-

जन्मना लीलादोले केलिप्रेङ्खोले विनिर्मिते स्वयंकृते इव । कस्मै । प्रीत्या च पुनः रत्या प्रीतिरतिनाम्न्यौ द्वे स्मरपत्न्यौ ताभ्यां स्त्रीभ्यां समं सह मीनकेतोर्मकरध्वजस्य दोलाभ्यां प्रेङ्खोलनाभ्यां यान्दोलना तस्या यो दोहदो वाञ्छा अभिलाषस्तस्य पूरणाय संपादनाय परिपूर्तये । 'दोलान्दोलनदोहदोऽपि च चलद्वीचीचयैः पूर्यते' इति हंसाष्टके॥

मोघीकृताशेषशरं गिरीशं प्रत्यर्थिनं पाशयितुं कथंचित् ।
अधारि पाशो विषमायुधेन यद्वेश्मनेव श्रवणच्छलेन ॥ १४० ॥

यद्वेश्मना या शासनदेव्येव वेश्म वासमन्दिरं यस्य तादृशेन विषमायुधेन विषमाण्येकीभावभाञ्जि । एकत्रिपञ्चसप्तसंख्यावन्ति विषमाण्युच्यन्ते । 'लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः ।' आर्याया एतल्लक्षणम् । अष्टमस्थाने गुर्वक्षरयुताश्चतुर्मात्रिकाः । सप्त गणा भवन्ति । 'इहार्यायां विषमे एकत्रिपञ्चसप्तस्थाने जगणो न भवति' इति वृत्तरत्नाकरे । तथा समानि तु द्विचतुःषडष्टादीनि तेनात्रार्थाद्विषमाणि पञ्चसंख्याकानि आयुधानि अर्थाद्बाणा यस्य । विषमाणि दुर्धराण्यसह्यानि वा शास्त्राणि यस्य । 'विषमायुधो दर्पकः कामहृच्छया' इति हैम्याम् । स तेन स्मरेण श्रवणच्छलेन कर्णकपटेन । उत्प्रेक्ष्यते—पाश इवाधारि बन्धनग्रन्थिरिव धृतः । किं कर्तुम् । मोघीकृता व्यर्था विहितास्तृणप्रायाः प्रणीता अशेषाः समस्ताः शरा अर्थान्मन्मथमार्गणा येन तादृशं गिरीशं शंकरं प्रत्यर्थिनं स्वशत्रुं कथंचित्केनापि प्रकारेण कृत्वा पाशयितुं पाशसात्कर्तुं पाशेन बद्धुं पाशे पातितं वा कर्तुम् ॥

धृतैकपाशेन पयोधिधाम्ना स्वाङ्कप्रभुत्वेन किमात्मयोनिः ।
स्पर्धां दधानः श्रवसी त्रिदश्याः पाशद्वयीमाकलयांचकार ॥ १४१ ॥

आत्मयोनिर्मदनः त्रिदश्या जिनशासननिर्जरनितम्बिन्याः श्रवसी कर्णावेव पाशद्वयीं बन्धनग्रन्थियुगलीमाकलयांचकार बिभर्ति स्म । उत्प्रेक्ष्यते—धृत उपात्त एक एव पाशो येन तादृशेन पयोधिधाम्ना जलनिधिनिकेतनेन वरुणेन । 'वरुणस्त्वर्णवमन्दिरः प्रचेताः' इति हैम्याम् । समं सार्धं स्वस्यात्मनः अङ्कश्चिह्नं मकरः यादोऽपरनामा । 'अन्येऽपि यादोभेदाः स्युर्बहवो मकरादयः' इति हैम्याम् । तस्य मकरस्य प्रभुत्वेन स्वामितया । 'जलयादःपतिपाशिमेघनादाः' इति हेमचन्द्रवचनात् । स्वस्य तस्य च मकरप्रभुत्वेन हेतुना स्पर्धां संघर्षमीर्ष्यां वा दधानः बिभ्रदिव ॥ इति कर्णौ ॥

श्रियाभ्यभूयन्त मया समग्रा नवद्वयद्वीपमहीमहेलाः ।
इतीव वक्तुं जगतां स्म धत्ते सुरीश्रवःसङ्गि नवाङ्कयुग्मम् ॥ १४२ ॥

सुरी शासनसुधाशनवधूः श्रवसोः कर्णयोः सङ्गो मिलनं स्थितिर्वा यस्य तादृशं नवाङ्कयोर्नवसंख्याकयोरङ्कयोर्मानविशेषयोः नवाङ्काकारयोर्युग्मं द्वन्द्वं धत्ते धारयति । उत्प्रेक्ष्यते—जगतां त्रिजगज्जनानां सुरासुरनराणामित्यमुना प्रकारेण वक्तुं कथयितुमिव ।

इति किम् । यन्मया श्रिया स्ववपुर्लतारामणीयकलक्ष्म्या कृत्वा नवानां नवसंख्याकानां द्वयं युगलं ते च ते द्वीपाश्च । अष्टादशद्वीपे इत्यर्थः । 'अष्टादशद्वीपनिखातयूपः' इति रघुवंशे । तथा 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । तेषां मही पृथिवी तस्यास्तत्रोत्पन्ना वा महेलाः प्रमदाः अभ्यभूयन्त पराभवगोचरीचक्रिरे इतिकारणात्कर्णयामलसंगतनवाङ्कद्वन्द्वं स्ववधूर्धत्ते । 'कर्णान्तरुत्कीर्णगभीरलेखः किं तस्य संख्यैव नवा नवाङ्कः' इति नैषधे ॥ इति कर्णान्तर्गतनवसंख्याङ्कः ॥

स्वपृष्ठलग्नागतकेशकायस्वर्भाणुमालोक्य जिनाधिदेव्याः ।
त्रायस्व नौ वक्तुमितीन्दुभानू श्रुत्योर्विलग्नाविव कुण्डलाङ्गौ ॥१४३॥

स्वयोः सूर्याचन्द्रमसात्मनोः पृष्ठे पश्चात्प्रदेशे लग्न एवागतः पृष्ठश्लिष्ट एव समुपेतः तादृक् । तथा केशा देवीचिकुरा एव कुन्तलरूप एव कायः शरीरं यस्य श्यामवर्णत्वात्स्वर्भाणुर्विधुंतुदस्तं आलोक्य वैरित्वात्सभयं विभाव्य । कुण्डले कर्णवेष्टिके एव अङ्गं देहो ययोस्तादृशौ इन्दुभानू चन्द्रसूर्यौ । जयति पराभवति बाह्यावाह्यशत्रूनिति जिनः त्रिभुवनाधिनाथस्तस्याधिदेवी अधिष्ठात्री देवता तादृक्स्वामिसेवकतया तस्या अप्यचिन्त्यसामर्थ्यात् । श्रुत्योः श्रवणयोः । उत्प्रेक्ष्यते—इत्येतद्वक्ष्यमाणं वक्तुं कथयितुमिव विलग्नौ लगित्वा स्थितौ । अन्यावपि किंचित्स्वकृत्यं कथयितुकामौ स्वामिश्रवणयोर्विलगतः । इति किम् । हे त्रैलोक्याधीशाधिदेवते प्रबलपराक्रमे, त्वं नौ आवयोः प्रचण्डविधुंतुददैत्यादस्मज्जिघांसोः सकाशात्त्रायस्व रक्षाजीवितप्रदानेन पालय ॥ इति कर्णकुण्डले ॥

नीलोत्पले कर्णयुगे चकासांबभूवतुः स्त्रैणमणेः सुराणाम् ।
युयुत्सुनी तन्नयनोत्पलाभ्यामिव प्रतिस्पर्धितयाभ्युपेते ॥ १४४ ॥

सुराणां निर्जराणां स्त्रीणां समूहः स्त्रैणं स्त्रीसमूहापेक्षया सुराणामित्यत्र बहुवचनं तस्य तस्मिन्वा मणे रत्नभूतायाः शासनदेवतायाः कर्णयुगे कर्णयुगले नीलोत्पले इन्दीवरे।'नीले तु स्यादिन्दीवरम्' इति हैम्याम् । चकासांबभूवतुः भातः स्म । उत्प्रेक्ष्यते—तस्यास्त्रिदश्या नयने विलोचने एवोत्पले कुवलये ताभ्यां समं सार्धं प्रतिस्पर्धितया परस्पराद्वैतवैभवातिरेकोद्भूताभ्यसूयया कृत्वा युयुत्सुनी योद्धुकामे इवाभ्युपेते संमुखं समेते । अपरोऽपि संस्पर्धोदयान्निजसपत्नोपरि योद्धुमायाति ॥

अभ्यस्यतास्याः श्रवसी मनोभूर्धनुर्धरेणेव धृते शरव्ये ।
न चेद्भवेतां कथमन्तरालेऽनयोर्विनीले कमले कलम्बौ ॥ १४५ ॥

अभ्यस्यता त्रिजगज्जयकृते शराभ्यासं कुर्वता मनोभूर्मदनो नाम धनुर्धरो धानुष्कस्तेन अस्यास्त्रिदश्याः श्रवसी श्रवणावेव । उत्प्रेक्ष्यते—शरव्ये वेध्ये धृते मण्डिते इव । एवं चेन्न तर्हि अनयोः श्रवःशरव्ययोः अन्तराले मध्ये विनीले नीलवर्णे कमले एतावता नीलोत्पले एव कलम्बौ बाणौ । 'रोपाः कलम्बशरमार्गणचित्रपुङ्खाः' इति

हैम्याम् । कथं केन कारणेन भवेताम् । किं च कुण्डले नीलोत्पले च नैषधे दमयन्ती-परिणयनशृङ्गाराधिकारे दृश्येते । यथा—'अवादि भैमी परिधाप्य कुण्डले वयस्यया-भ्यामभितः समन्दयः' । तथा—'धृतं च तं सोत्पलयुग्ममेतया व्यराजदस्यां पतिते दृशा-विव' । इत्यपि तत्रैव इदं द्वितयमप्यानीतमस्ति । किं चैवं ज्ञायते यत्कर्णकुण्डलमध्ये एव नीलोत्पले भविष्यतः ॥ कर्णयोरुत्पले ॥

कटाक्षबाणान्प्रगुणान्प्रणीय स्वःसुभ्रुवो भ्रूः कुटलीभवन्ती ।
धनुर्लता श्रीसुतधन्विनेव प्रसाधिताभात्त्रिजगज्जयाय ॥ १४६ ॥

कुटलीभवन्ती वक्रभावं भजन्ती स्वःसुभ्रुवो देव्या भ्रूरूर्ध्वे रोमपद्धतिरभाद्बभौ । उत्प्रे-क्ष्यते—श्रीसुतधन्विना मदनधानुष्केण त्रिजगतस्त्रिभुवनस्य जयाय पराभवनाय वशी-करणाय वा प्रसाधिता प्रगुणीकृता धनुर्लतेव कोदण्डयष्टिरिव । किं कृत्वा । कटाक्षान-क्षिविकूणितानि नेत्रत्रिभागावलोकितानि एव बाणाः शरास्तान् प्रगुणान् सज्जान् प्र-णीय विधाय ॥

उज्जृम्भवक्राम्बुजमन्दिराया लीलाप्रवालोऽयमिवेन्दिरायाः ।
उप्ता तया वा फलिनीव भालाजिरे विरेजे सुरसुभ्रुवो भ्रूः ॥ १४७ ॥

सुरसुभ्रुवः सुपर्वप्रमदायाः भ्रूर्विरेजे भाति स्म । उत्प्रेक्ष्यते—उज्जृम्भं विकसितं यद्वक्त्रं देवीवदनं तदेवाम्बुजं जलरुहं कमलं तत्र मन्दिरं सदनं यस्यास्तादृश्या इन्दि-राया लक्ष्म्याः अयं प्रत्यक्षलक्ष्यो लीलायै विलासार्थं प्रवालः तमालसालपल्लवः इव । वाथ वा तया श्रिया भालाजिरे ललाटप्राङ्गणे उप्ता प्ररोपिता फलिनी प्रियङ्गुलतेव । 'प्रियङ्गुः फलिनी श्यामा' इति हैम्याम् ॥

मिथो मुनीन्द्रेण मृधे मनोभूभूमीपतिर्जर्जरिताङ्गयष्टिः ।
सुपर्वसुभ्रूभ्रुवमाश्मगर्भयष्टीमिवालम्बकृते ततान ॥ १४८ ॥

मनोभूभूमीपतिश्चेतोभववसुधाधिनाथः मदननृपः आलम्बकृते स्वस्यैवावलम्बनार्थ-माधारविधानोपयोगार्थम् । उत्प्रेक्ष्यते—सुपर्वसुभ्रुवः सुराङ्गनायाः भ्रुवमेवाश्मगर्भयष्टीं मरकतमणिमयदण्डम् । 'मरकतं त्वश्मगर्भः' इति हैम्याम् । ततान कृतवानिव । किं-भूतः । मिथः परस्परं मृधे संग्रामे मुनीन्द्रेण हीरविजयसूरिणा जर्जरिता प्रहारैर्जर्ज-रीकृता अङ्गयष्टिः शरीरं यस्य । जर्जरः पुमान् स्वशरीराधारकृते हस्ते यष्टिं गृह्णाति । किं चापरवर्णनादिराभस्याद्ग्रन्थकृतामावर्णनीयनायको विस्मृतः स्यादिति तदन्तर्देवीव-र्णनान्तराले मुनीन्द्रपदोपादानम् । यथा नैषधेऽपि कुण्डिनपुरवर्णनाधिकारे—'पयसा नैषधशीलशीतलम्' इति तद्वृत्तावप्येतदेवोक्तमस्ति ॥

नीलारविन्देन पुरा प्रणीय दृशं त्रिदश्याः सरसीजजन्मा ।
किंजल्कवृन्दैर्वदने तदीयैः प्रणीतवान्भ्रूलतिकामिवास्याः ॥ १४९ ॥

सरसीजजन्मा पद्मनन्दनः विधाता अस्याः शासनदेवताया वदने मुखे तदीयैर्नीलारविन्दसंबन्धिभिः किंजल्कवृन्दैः केसरनिकरैः कृत्वा। उत्प्रेक्ष्यते—भ्रूलतिकां लोचनोर्ध्वरोमपद्धतिवल्लीं प्रणीतवान् कृतवानिव। 'प्रणीतवाञ्शैशवशेषवानयं जगज्जयं तेन च कोशमक्षयम्' इति नैषधे। किं कृत्वा। पुरा प्रथमं नीलारविन्देनाविनिद्रदिन्दीवरेण त्रिदश्या बर्हिर्मुखयोषितः दृशं विलोचनं प्रणीय स्वयं विनिर्माय॥

संस्पर्धिभावं दधता स्वलक्ष्म्या खण्डेन चण्डेतरकान्तिनेव।
जग्राह योद्धुं त्रिदशीललाटं भ्रूयुग्मकायां करवालयष्टिम्॥ १९०॥

त्रिदशीललाटं शासनवृन्दारकसुन्दर्या भालं भ्रूयुग्मं भ्रुवोर्यामलमेव कायः शरीरं यस्यास्तादृशीं करवालयष्टिं निकषोल्लिखितनिशितनिस्त्रिंशलतां जग्राह गृहयांबभूव। उत्प्रेक्ष्यते—स्वलक्ष्म्या आत्मीयश्रिया समं संस्पर्धिभावं स्ववैभवोत्सेकितया स्पर्धनशीलतां दधता बिभ्राणेन खण्डेनार्धेन। 'खण्डेऽर्धशकलं भित्तम्' इति हैम्याम्। चण्डात्तीक्ष्णादितरा अपरा एतावता अनुष्णा शीता कान्तिः दीप्तिर्यस्य तादृशेन चन्द्रेण सुधादीधितिना एतावताष्टमीतमीरमणेन समं सार्धं योद्धुं संग्रामं विधातुमिव। 'खड्गायत्ताखिला पृथ्वी' इति वचनात्॥ इति भ्रूयुगलम्॥

स्मरं रतिप्रीतिनितम्बिनीभ्यां सहाभिषेक्तुं भुवनाधिपत्ये।
यद्भालदम्भाज्जलजासनेन मन्ये प्रणिन्ये कलधौतपट्टः॥ १९१॥

रतिप्रीतिनाम्नीभ्यां द्वाभ्यां नितम्बिनीभ्यां गृहिणीभ्याम्। 'रतिप्रीती इव स्मरः' इति प्रतिक्रमणसूत्रवृत्तौ। ततो मदनस्य एका रतिः अपरा च प्रीतिः एते द्वे पत्न्यौ ताभ्यां सार्धं राज्ञामभिषेकसमये राज्ञीनामप्यभिषेको दृश्यते। यथा 'कृताभिषेका महिषी' इति हैम्याम्। स्मरं कामं भुवनाधिपत्ये त्रैलोक्यराज्ये अभिषेक्तुमभिषेकं विधातुम् अहमेवं मन्ये जानामि। उत्प्रेक्षे वा। जलजासनेन कमलविष्टरेण ब्रह्मणा यस्या देव्या भालस्य ललाटस्य दम्भात्कपटात्कलधौतस्य काञ्चनस्य पट्टः पट्टकः प्रणिन्ये विनिर्मित इव॥

त्रैलोक्यमाक्रम्य पराक्रमेण सुखं निषण्णस्य झषध्वजस्य।
व्यधत्त हेम्नः फलकं विधातावष्टम्भनायेव तदीयभालम्॥ १९२॥

विधाता ब्रह्मा। झषो मीनो ध्वजः केतनं चिह्नं वा यस्य स मत्स्यलाञ्छनो मदनः अर्थान्मन्मथपृथ्वीपतिस्तस्यावष्टम्भनाय पृष्ठप्रदानार्थम्। उत्प्रेक्ष्यते—तदीयं शासनसुरीसंबन्धि भालं ललाटं हेम्नः काञ्चनस्य फलकं 'पाटिउं' इति प्रसिद्धं व्यधत्त विदधाति स्म चकार। किंभूतस्य झषध्वजस्य। पराक्रमेण स्वपुरुषाकारेण निजभुजवीर्येण कृत्वा त्रैलोक्यं तात्स्थ्यात्तद्व्यपदेशात्सुरलोकपातालभूमीलोकवासिनः सुरासुरनागनागरनिकरानाक्रम्य पराभूय स्वाज्ञैकवशंवदीकृत्य सुखं सातेन निषण्णस्योपविष्टस्य आसीनस्य॥

अधृष्यमन्विष्य यदीयभालं निजं प्रति स्पर्धितया जिगीषत् ।
अर्धामृतांशुः प्रपलाय्य पूषद्विषो जटाजूट इव प्रविष्टः ॥ १९३ ॥

अर्धामृतांशुः सामिसोमः प्रपलाय्य भयात्प्रणश्य । उत्प्रेक्ष्यते—पूषद्विषः पूषनाम्नो दानवेन्द्रस्य व्यापादकस्य शंभोर्जटाजूटे विकटकपर्दे प्रविष्ट इव निलीय तस्थिवानिव । किं कृत्वा । स्पर्धितया स्पर्धनशीलत्वेन निजमात्मानम् । निजशब्देन क्वाप्यात्माप्युच्यते । यथा नैषधे—'श्रुत्वा निजं भीमजया निरस्तम्' इति । जिगीषत् जेतुमिच्छत्पराभवितुं महिमानं तादृशं तदीयभालं देवललनाललाटमेवाधृष्य मनाक् कलनीयम् कथमप्यभिभवितुमशक्यं द्वेष्यं वैरिणमन्विष्य निरीक्ष्य ॥

अद्वैतलक्ष्मीकमवेक्ष्य यस्या भालं तदीयश्रियमीहमानः ।
विश्वंभरस्येव पदे लगित्वा तां मार्गयत्यर्भ इवार्धचन्द्रः ॥ १९४ ॥

अर्धचन्द्रः अष्टमीतमीप्रियतमः विश्वं भुवनमभीप्सितप्रदानेन पुष्णाति पुष्टं कुरुते । 'डुभृञ् धारणपोषणयोः' अस्य धातोः प्रयोगः । बिभर्ति रक्षति प्रत्यूहव्यूहापहरणेन वा इति विश्वंभरः कृष्णः तस्य पदे चरणे विष्णुपदे लगित्वा विलग्य समाश्लिष्य । उत्प्रेक्ष्यते—तां विबुधवधूललाटलक्ष्मीं मार्गयतीव याचतीव । 'अर्दति मार्गति मार्गयति याचति याचतेऽर्थनार्थाः स्युः' इति क्रियाकलापे । क इव । अर्भ इव । यथा बालकः पितुः पदं विलग्य याचते । किं कुर्वाणः । तदीयां सुधाशनवधूगोधिसंबन्धिनीं श्रियं लक्ष्मीमीहमानः काङ्क्षन् । किं कृत्वा । यस्याः शासनसुमनःसुन्दर्या अद्वैतं न विद्यते द्वैतं युगलमेतत्सदृशमपरं वस्तु यस्याः सा तादृशी लक्ष्मीः सुषमा यस्य । स्वार्थे कः । अद्वैतलक्ष्मीकमसाधारणवैभवं भालमलीकमवेक्ष्य व्यालोक्य ॥

यद्भाललक्ष्म्याधरितोऽर्धचन्द्रस्तत्साम्यमिच्छन्वरुणालयस्थाम् ।
अभीष्टदां कामदुघां प्रतीचीमस्तच्छलाद्याति किमारिरात्सुः ॥१९५॥

यस्या भालस्यालिकस्य लक्ष्म्या विभूषयाधरितो हीनीकृतो धिक्कारभावं लम्भितोऽर्धचन्द्रः सामिकुमुदिनीदयितः प्रतीचीं पश्चिमां दिशमाशामस्तच्छलात्कपटात् याति गच्छति । उत्प्रेक्ष्यते—तत्साम्यं तस्य अप्सरोललाटस्य लक्ष्म्याः शोभायाः साम्यं सादृश्यमिच्छन् मनसि वाञ्छन् सन् वरुणस्य पश्चिमदिक्पतेरालये गृहे तिष्ठतीति तां वरुणवेश्मनिवासिनीमित्यर्थः । तथा अभीष्टमभिलषितं जनमनःकामितं ददातीति तादृशं कामं मनोरथं दोग्धि प्रपूरयतीति कामदुघा । 'दुह प्रपूरणे' अयं धातुः । तां कामधेनुमारिरात्सुः आराधयितुमिच्छुरिव । 'हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः । भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥' इति रघुवंशे । तथा 'क्रतोः कृते जाग्रति वेत्ति कः कति प्रभोरपां वेश्मनि कामधेनवः' इति नैषधेऽपि ॥ इति देवीललाटस्थलम् ॥

यदाननश्रीजितमब्जबन्धोः पद्मं करक्रोड इवैत्य बन्धोः ।
निर्वेदमावेदयते स्वमेतत्पुरो भ्रमद्भृङ्गगणक्वणेन ॥ १९६ ॥

पद्मं कमलं भ्रमन्तो मधुपानकृते समेत्य लोलुभतयेतस्ततो भ्राम्यन्तो ये भृङ्गा भ्रमरास्तेषां गणस्य समुदायस्य क्वणेन गुञ्जारवेण कृत्वा । उत्प्रेक्ष्यते—एतस्य स्वबन्धोः सूर्यस्य पुरोऽग्रे स्वमात्मीयं निर्वेदं पराभवोद्भूतभूयस्तरखेदं निजावमाननादुःखं वा आवेदयते कथयतीव । किं कृत्वा । बन्धोः स्वमित्रस्य । अब्जबन्धोररविन्दसुहृदो भानोः करक्रोडे हस्तोत्सङ्गे एत्यागत्य । 'चक्राब्जाहर्बान्धवः सप्तसप्तिः', तथा 'मित्रो ध्वान्तारातिरब्जांशुहस्तः' इतीदं द्वयमपि हैम्याम् । तथा 'स्फुटारविन्दाङ्कितपाणिपङ्कजम्' इति नैषधे । किंभूतं पद्मम् । यस्या देव्या आननस्य स्वपरिस्पर्धिपराभावुकवैभववदनस्य श्रिया शोभया जितं पराभूतम् ॥

वक्त्रं त्रिदश्या विजितात्मदर्शनिशामणिं प्रेक्ष्य हिरण्यगर्भः ।
सृष्टिं सिसृक्षुः किमदोनुरूपां विनिर्मिमीतेऽम्बुजहस्तलेखम् ॥ १९७ ॥

हिरण्यगर्भो ब्रह्मा अम्बुजैः सकलकमलकलापैः कृत्वा हस्तलेखम् 'हस्तोलक' इति प्रसिद्धम् । विनिर्मिमीते कुरुते । उत्प्रेक्ष्यते—अदोनुरूपाम् अस्या गीर्वाणगृहिणीवदनारविन्दसदृशीम् । 'अदःसमित्संमुखवैरियौवतत्रुटद्भुजा कम्बुमृणालहारिणी' इति नैषधे समासान्तोऽदस्शब्दः । सृष्टिं रचनां सिसृक्षुः स्रष्टुमिच्छुः कर्तुं काङ्क्षन्निव । किं कृत्वा । विजिताः स्ववैभवाभिभूता आत्मदर्शा दर्पणा निशामणयश्चन्द्रमसो येन तादृशं त्रिदश्याः शासनसुररमण्या वक्त्रं वदनं प्रेक्ष्य दृष्ट्वा । वक्त्रशब्दः पुंनपुंसकलिङ्गयोः । 'नेत्रं वक्त्रपवित्रपत्रसमरोशीरान्धकारावरः' इति लिङ्गानुशासने ॥

मन्ये कुमुद्वन्धुरिदंमृगाङ्कमुखीमुखीभूय सुखी बभूव ।
नियन्त्र्य यत्तेन तमः स्वदस्युः प्राक्षेपि पृष्ठे स्फुटकेशकायः ॥ १९८ ॥

अहं ग्रन्थकृदेवममुना प्रकारेण मन्ये विचारयामि । यत्कुमुद्वन्धुः कैरवसुहृच्चन्द्रमाः इदंमृगाङ्कमुखीमुखीभूय इयं चासौ मृगाङ्कमुखी च कौमुदीदयितवदना च तस्या मुखीभूय वदनभावं प्रतिपद्य । 'इदं नृपप्रार्थिभिरुज्झितोऽर्थिभिः' इति नैषधे । अत्रेदंशब्दः समासान्तः । सुखी बभूव सातवान् निश्चिन्तो वा संजातः । यद्यस्मात्कारणात् स्फुटः प्रकटो दृश्यमानत्वात्केशा एव देवीशिरश्चिकुरा एव कायो देहो यस्य तादृशः । स्वदस्युर्निजप्रत्यनीकस्तमोविधुंतुदः नियन्त्र्य बद्ध्वा पृष्ठे स्वपृष्ठप्रदेशे प्राक्षेपि प्रक्षिप्तः । धम्मिल्लस्य विधुंतुदोपमानत्वं काव्यकल्पलतायाम् । 'धम्मिल्लः संयताः केशाः' इति हैम्याम् । एतदेव महत्सुखम् । यत्स्वद्विषन्नभिभूय नियन्त्र्य रक्ष्यते ॥ इति देवीवदनम् ॥

अहो महीयान्महिमा सुपर्वसारङ्गचक्षुश्चिकुरच्छटायाः ।
निर्जित्य यस्मात्पशुनापि पश्चादचीकरद्या चमरान्प्रतीपान् ॥ १९९ ॥

अहो इत्याश्चर्ये । यथा नैषधे—'अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रथितां स्मरार्दिताम्' । सुपर्वसारङ्गचक्षुषः सुरहरिणेक्षणायाः शासनदेव्याः चिकुरच्छटायाः कु-

न्तलकलापस्य । 'जहास तस्याः कुटिलाः कचच्छटाः' इति नैषधे । छटाशब्देन श्रोणी। 'भटान्तविश्रान्ततुरङ्गमच्छटाः' इत्यपि नैषधे । 'अश्वश्रोणी' इति तद्वृत्तिः । महीयानतिशयेन महानतिशायी महिमा माहात्म्यं दृश्यते । यस्मात्कारणात् या चिकुरच्छटा प्रतीपान् स्वश्रीप्रतिस्पर्धितया प्रतिकूलीभूतान् चमरान् बालव्यजनानि निर्जित्य निजौजसा पराभूय पशुना तिरश्चापि चमरधेन्वापि कर्र्या । न किंचिदर्थे पशुशब्दात्तिर्यङ्मात्रे अज्ञानेऽपि। तथा 'पशुस्तिर्यक्' इति हैम्याम् । तथा नैषधे—'पशुनाप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः' इति । पार्श्वे पश्चाद्भागे । उपहास्यवाक्यमेतत् । अचीकरत् कारयति स्म ॥

स्पर्धां विधत्ते सुमनःसुकेशीकेशच्छटाभिर्यदसौ कलापः ।
अनौचितीयं तमितीव केकी जहाति कोपादपि पक्षभूतम् ॥ १६० ॥

केकी मयूरः । उत्प्रेक्ष्यते—इति हेतोः पक्षभूतमपि सहायभूतमपि । 'पक्षः सहायः पिच्छं च,' तथा 'पक्षो मासार्धे पिच्छे च सहाये विरोधे । देहाङ्गे राजकुञ्जरे' इत्यनेकार्थः । कलातं शिखण्डकं कोपात्क्रोधातिरेकाज्जहाति त्यजतीव । इति किम् । यदसौ मम शोभाकारी पक्षभूतोऽपि मात्सर्यासूयादिदोषनिर्मुक्तं मनो मानसं यस्यास्तादृश्याः सुकेश्याः । केशलक्षणेन कृत्वा सर्वाण्यप्यङ्गलक्षणानि सूचितानि स्त्रियाः । तत्त्वतस्तु शासननायिकायाः केशच्छटाभिः कुन्तलमालिकाभिः सार्धं स्पर्धां संघर्षं विधत्ते करोति इयमनौचिती न योग्यता । 'सानौचिती चेतसि नश्वकास्तु' इति नैषधे । एतन्नौचित्यमिति कारणात्त्यागः ॥

श्रीस्पर्धया यच्चिकुरान्विजेतुं व्यवस्यमानान्स्वमवेत्य बर्हः ।
त्रासात्प्रणश्यन्निव नीलकण्ठः पृष्ठे प्रविष्टः शरणाभिलाषी ॥ १६१ ॥

बर्हः कलापः त्रासात् रात्रौ आकस्मिकातङ्कात् । 'त्रासस्त्वाकस्मिकं भयम्' इति हैम्याम् । प्रणश्यन् प्रपलायमानः सन् शरणमात्मत्राणमभिलषतीत्येवंशीलः नीलकण्ठो महादेवो मयूरश्च । तस्य पृष्ठे प्रविष्ट इव । नीलकण्ठं शरणीचकारेत्यर्थः । किं कृत्वा । श्रिया शोभया लक्ष्म्या वा या परस्पर्धा संघर्षः तेन कृत्वा स्वमात्मानं विजेतुं पराभवितुं व्यवस्यमानानुद्यमं कुर्वाणान्प्रगल्भमानान्देवीकेशान्कुन्तलानवेत्य ज्ञात्वा ॥ इति केशपाशः ॥

सीमन्तदण्डः सुरपद्मदृष्टेरुन्मादयामास मनांसि यूनाम् ।
सहावरोधैश्चरतः स्मरस्य व्यक्तीभवन्ती पदवी किमेषा ॥ १६२ ॥

सुरपद्मदृष्टेर्वृन्दारकारविन्दलोचनायाः सीमन्तः केशवर्त्मा स एव दण्डाकृतित्वाद्दण्डः। द्वाभ्यां कृत्वा यदाबध्यन्ते तदा मध्ये केशरहिता दण्डाकृतिर्लक्ष्यते । सैव सीमन्तः 'सईंघो' इति लोकप्रसिद्धः । परं स्त्रीणामेव न पुंसाम् । सौराष्ट्रसर्जरादिषु । परं लाटदेशादिषु श्रूयते। यथा लाटदेशवासिना श्रीहर्षकविना नैषधे समानीतोऽस्ति 'द्विफालबद्धाश्चिकुराः शिरःस्थितम्' इति । द्वाभ्यां फालभ्यां च संयम्यमाने केशपाशे मध्ये

सीमन्तः स्यादेवेति। स देवीसीमन्तो यूनां वयःस्थानां तरुणानां मनांसि सस्मरविकारचेतांसि उन्मादयामास। 'उन्मादश्चित्तविप्लवः'। तद्युक्तानि कृतवानित्यर्थः। उत्प्रेक्ष्यते—अवरोधैरन्तःपुरपुरंध्रीभिः रतिप्रीतिनाम्न्यौ द्वे पत्न्यौ प्रसिद्धे स्तः, परमन्या अपि भाविन्यः एवमवसीयते कविसमयानुसारेण। यदुक्तं नैषधे—'सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्ती। विलोकयामास सभां स भैम्याः' इति। चरतः अत्र देवीशिरसि संचरतः सतः अनङ्गरङ्गाभिधाने शास्त्रे प्रोक्तमस्ति यत्पञ्चदशसु तिथिषु स्त्रीणां पञ्चदशसु शिरःप्रभृतिषु स्थानकेषु स्मरः संचरति इति। स्मरस्य कामस्य व्यक्तीभवन्ती प्रकटा जायमाना एषा केशवर्त्मलक्षणा पदवी मार्ग इव। यतो घनजलसंचारेण अमार्गो मार्गः स्यादिति प्रत्यक्षं लक्ष्यते॥

प्रेक्ष्य स्वदाहे ज्वलितास्त्रमालां जेयं कथं विश्वमिदं मयेति।
पितामहोऽदान्मदनस्य तस्याः सीमन्तदण्डं विमनायितस्य॥ १६३॥

पितामहो ब्रह्मा पितुः पिता च इत्यमुना प्रकारेण विमनायितस्य विरुद्धमना इवाचरितस्य विमनस्कीभूतस्य मदनस्य। उत्प्रेक्ष्यते—तस्या मन्युभुञ्जानिन्याः सीमन्तमेव दण्डं प्रतिभटकोटिकटकाप्रतिहतिप्रचण्डदण्डरत्नमदादिव पौत्रं प्रेम्णा प्रदत्तवानिव। इति किम्। स्वदेहदाहे शंभुना कोपानलेनात्मशरीरभस्मीकरणसमये ज्वलितां दग्धां भसितीभूतामस्त्रमालां प्रहरणपटलीं प्रेक्ष्य निर्णीय। अथो भस्मीभूताशेषास्त्रसंघातेन मया विजयिना मदनेन विश्वं त्रिभुवनं कथं केन प्रकारेण जेयं जेतव्यं पराभवनीयं वशीकर्तव्यं वा इति॥

सिन्दूरपूरप्रचितेन तस्याः सीमन्तदण्डेन शिरोरुहाली।
विद्युद्विलासेन पयःप्रपूर्णा पयोमुचां पङ्क्तिरिव व्यराजत्॥ १६४॥

पूरशब्दोऽत्र लक्षणया समूहवाची। सिन्दूरपूरेण शृङ्गारभूषणगणेन प्रचितेन व्याप्तेन। सिन्दूरपूरितेनेत्यर्थः। सीमन्तदण्डेन कृत्वा तस्या देवतायाः शिरोरुहाली कचच्छटा व्यराजद्भाति स्म। का केनेव। पङ्क्तिर्विद्युद्विलासेन। यद्वा पयोभिः पानीयैः प्रपूर्णानां निर्भरं भृतानां पयोमुचां वर्षन्मेघानां मालिका तडिद्विलसितेन कृत्वा विद्युद्विजृम्भितेन कृत्वा विराजते॥ इति सीमन्तः॥

प्रफुल्लमल्लीकुसुमावनद्धयत्केशपाशः स्फुरयांबभूव।
अपूजि पुष्पैरिव चामरादिद्विषज्जयस्यावसरे दिगीशैः॥ १६५॥

प्रफुल्लैर्विकसितैर्मल्ल्या मल्लिकाया विचकिलस्य। 'मल्लीभिः प्रतिमल्लीभावं दधती विभाति भावत्की' इति राजवर्णने। कुसुमैः पुष्पैरवनद्धो ग्रथितो यस्यां मरुत्सीमन्तिन्यां केशपाशः स्फुरयांबभूव विभ्राजते स्म। अत्र स्वार्थे ञिः केवलार्थकथयित्री। उत्प्रेक्ष्यते—चामरादीनाम्। आदिशब्दात्कलापिकलापविधुंतुदक्षपाणानां ग्रहः। द्विषतां परस्परस्पर्धा-

विर्भावाद्वैरिणामेव विजयस्य पराभवनस्यावसरे प्रस्तावे दिगीशैस्तद्वैरिविजयव्यालोकनोद्भूताद्वैताश्चर्यैरशेषाशापालकैः पुष्पैः कुसुमैः कृत्वा अपूजि पूजितोऽभ्यर्चित इव ॥

संदर्भितान्तर्मुचकुन्दमल्लीकचच्छटायाः कपटादमुष्याः।
वक्रेन्दुना मैत्र्यविधित्सयेव ताराङ्कितेयं कुहुराजगाम ॥ १६६ ॥

संदर्भो रचनाविशेषः संजातो यासां ताः संदर्भिता ग्रथिता अन्तर्मध्ये मुचकुन्दाः कुन्दद्रुमास्तथा मल्ल्यो नवमल्लिका। 'मल्लिका स्याद्विचकिलः सप्तला नवमालिका' इति हैम्याम्। अर्थात् तद्विकसितविकचकुसुमानि यस्यां तादृश्याः कचच्छटायाः कुन्तलमालिकायाः कपटाद्व्याजादियं दृश्यमाना कुहुरमावास्या आजगाम समागता। किंभूता। ताराङ्किता ग्रहनक्षत्रतारककलिता। उत्प्रेक्ष्यते—अमुष्या अनिमिष्या वक्रेन्दुना वदनकुमुदिनीदयितेन समं सार्धं मैत्र्यं सौहार्दं तस्य विधित्सया विधातुमिच्छया एव कर्तुं काङ्क्षयेव ॥ इति केशपाशे कुसुमरचना ॥

वेणीकृपाणा भुजकर्णपाशा नासानिषङ्गा नयनाशुगा च।
भ्रूकार्मुका कान्तनितम्बचक्रा स्मरास्त्रशालेव सुरी चकासे ॥ १६७ ॥

सुरी शासनदैवतमत्तेभगमना चकासे दीप्यते स्म। उत्प्रेक्ष्यते—स्मरस्य मधुसारथेरस्त्राणामायुधानां शाला सदनमिव। आयुधान्येव दर्शयति—किं वेणी कबरी सैव कृपाणश्चन्द्रहासासिर्यस्याम्। पुनः किंभूता। भुजौ बाहू तथा कर्णौ श्रवणावेव पाशा बन्धनग्रन्थयो यस्याम्। पुनः किंभूता। नासा गन्धज्ञा सैव निषङ्गस्तूणीरो यस्याम्। पुनः किंभूता। नयने लोचने एवाशुगौ बाणौ यस्याम्। पुनः किंभूता। भ्रूरेव कार्मुकं शरासनं धनुर्यस्याम्। पुनः किंभूता। कान्तो मनोज्ञो वैरिणां कस्य सुखस्यान्तोऽवसानं यस्मात्तादृशो वा नितम्ब आरोहः एव चक्रं रथाङ्गं यस्याम्। 'रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला। तारुण्यमूर्तेः कुचकुम्भकर्तुः बिभर्ति मन्ये सहकारि चक्रम्॥' इति नैषधे नितम्बस्य चक्रोपमानम्। 'स्तनकलशकारकस्य तारुण्यकुलालस्य यौवनकुम्भकारस्य बाला दमयन्ती सहकारिकारणानां चक्रं समूहं बिभर्ति इत्येवमहं शङ्के। कारणान्याह—रोमावल्येव चक्रभ्रामको दण्डः नितम्ब एव चक्रं गुणं सूत्रं स्वाभाविकस्त्रीगुणव्रजश्च लावण्यमेव जलम्' इति तद्वृत्तिः ॥

विभूषणैः स्वर्णमणिप्रणीतैर्वसन्तलक्ष्मीरिव नैकपुष्पैः।
विदिद्युते सा मलयानलैरिवामोदैर्दिशः सौरभयन्त्यहर्निशम् ॥ १६८॥

सा आदितेयवासतेया वरवदना विदिद्युते विशेषेण द्योतते स्म। कैः। स्वर्णं जात्यजाम्बूनदं मणयो नैकविधरत्नानि तैः प्रणीतैर्घटितैर्विभूषणैराभूषणैः। केव। वसन्तलक्ष्मीरिव यथा सुरभिसमयश्रीः। 'वसन्त इष्यः सुरभिः पुष्पकालो बलाङ्गकः' इति वसन्तनामानि हैम्याम्। नैकैरनेकप्रकारैर्विविधजातीयैः पुष्पैः कुसुमैः कृत्वा दीप्यते। किं कु-

र्वन्ती । आमोदैः स्वाभाविकशरीरसुरभिताभिर्वदनारविन्दामोदैर्वा दिशः सर्वा अपि ककुभः अहर्निशं नित्यं सौरभयन्ती सौरभकलिताः कुर्वन्ती । सुरभेर्भावः सौरभम्, सौरभयुक्तां करोतीति सौरभयति । सुगन्धयन्ती । कैरिव । मलयानिलैरिव । यथा मधुश्रीर्दाक्षिणात्यमारुतैः कृत्वा दिशः सुगन्धीकरोति ॥

दिव्यैर्दुकूलाभरणैर्विभूषिता संपूरयन्ती जगतामपीहितम् ।
आकृष्य भाग्येन विभोर्मरुल्लता नीता पुरस्तादिव देवता बभौ ॥१६९॥

देवता शासनदेवी बभौ शुशुभे । किंभूता । दिव्यैर्देवतासंबन्धिभिर्दुकूलैः क्षौमैः तथा आभरणैः कनकमणिविभूषणैः कृत्वा विभूषिता अलंकृता । किं कुर्वन्ती । जगतां जगज्जनानां विशेषतो जिनशासनैकतानलीनमनसां भव्यलोकानामीहितमैहिकयावन्मनःकामितं संपूरयन्ती पूर्णीकुर्वन्ती । इच्छापूरणपर्यन्तं प्रयच्छन्तीत्यर्थः । उत्प्रेक्ष्यते—विभोर्गुरोर्भाग्येन सुकृतेन आकृष्य पुरस्तान्नीता मरुल्लता सुरवीरुत्कल्पवल्लीव ॥

निखिलदिविषद्योषालेखाकुमुद्वनकौमुदी
श्रिततनुलता तद्भाग्यश्रीरिवामरसुन्दरी ।
नखरशिखरादारभ्येति क्रमाच्चिकुरावधि
प्रथितसुषममाश्लिष्यन्ती पुरः शुशुभे प्रभोः ॥ १७० ॥

अमरसुन्दरी श्रीजिनशासनाधिदेवता प्रभोर्हीरविजयसूरीश्वरस्य पुरोऽग्रे शुशुभे विभाति स्म । किंभूता । निखिलाः समस्ता ये दिविषदो देवास्तेषां भवनपति-वानव्यन्तर-ज्योतिष्क-वैमानिकनाकिनां योषा विलासवत्यः तासां लेखाः श्रेणयस्ता एव कुमुदां कैरवाणां वनानि तेषामाह्लाददायकत्वेन कौमुदी चन्द्रचन्द्रिका । प्रायो ज्योत्स्ना हि गाननर्तनविविधविलसनप्रकारैः स्वकामुककलितयामिनीनामेव विशेषत आनन्ददायिनी स्यादिति तद्विशेषणम् । यदुक्तं च—'कुरु चन्द्र तथा ज्योत्स्नां विभाति न निशा यथा । ताम्बूलीदलवत्प्रेयान्यतो मोक्तुं न शक्यते ॥' अत्रार्थे दोधकोऽपि—'चन्दाकरितिम चांदणी जिम रयणविहाय । नागरवेलीपान जिम कंतन मेल्ह्यो जाय ॥' इति चन्द्रिकावाल्लभ्यमपि स्त्रीणाम् । किं कुर्वन्ती । नखरशिखरात् चरणनखशिखाया आरभ्य क्रमादनुक्रमेण चिकुराः केशा अवधिः सीमा यत्र तादृशीं प्रथितां सुरासुरनरनिकरविख्यातां सुषमां सातिशायिनीं श्रियमाश्लिष्यन्ती । आलिङ्गन्ती आश्रयन्तीत्यर्थः । उत्प्रेक्ष्यते—श्रिता अङ्गीकृता गृहीता वा तनुलता शरीरयष्टिर्यया तादृशी तस्य हीरसूरेर्भाग्यश्रीमूर्तिः पुण्यलक्ष्मीरिव ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।

तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽजनिष्टाष्टमः ॥ १७१ ॥

पण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनामकाव्यवृत्तौ अष्टानां संख्यापूरणोऽष्टमः सर्गो बभूव जातः ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यनाममहाकाव्ये ध्यानविधानशासनदेवीसमागमतत्सर्वाङ्गवर्णनो नामाष्टमः सर्गः ॥

नवमः सर्गः।

अथ सा त्रिदशी सूरिपुरहूतपुरो व्यभात्।
मुक्तिसीमन्तिनीमुक्तदूतीव विवरीषया ॥ १ ॥

अथ ध्यानविधानसमये पुरः प्रत्यक्षागमनानन्तरं सा पूर्वव्यावर्णितस्वरूपा त्रिदशी शासनदेवता सूरिषु पुरहूतः पुरंदरो हीरविजयसूरीन्द्रस्तस्य पुरोऽभ्यासे व्यभाद्विभाति स्म। उत्प्रेक्ष्यते—मुक्तिः सिद्धिरेव सीमन्तिनी अत्रार्थात्स्वयंवरवनिता अथ वा कामुकी अन्या सामान्या वशा तया मुक्ता प्रेषिता दूती शासनहारिकेव। 'शासनहारिणा हरेः' इति रघौ। किं चिकीर्षया। विशेषेण महामहपुरःसरं वरीतुं पाणिं गृहीतुमिच्छया परिणयनाभिलाषेण ॥

वाग्विलासैः सृजन्तीव हारहूरावहेलनाम्।
तृणतां च नयन्तीव निक्कणं वेणुवीणयोः ॥ २ ॥

पिकीव पञ्चमोद्गारमृतोः सख्युर्मनोभुवः।
गीर्वाणगृहिणी वाणीं श्रमणेन्दोः पुरोऽग्रहीत् ॥ ३ ॥

सा गीर्वाणगृहिणी शासनसुरी श्रमणेन्दोर्मुमुक्षुक्षणदारमणस्य पुरः पुरस्ताद्वाणीं वाचमग्रहीज्जग्राह। वचनमुवाचेत्यर्थः। केव। पिकीव। यथा कोकिला मनोभुवः स्मरस्य सख्युर्मित्रस्य ऋतोर्वसन्तस्य। 'सखा रतीशस्य ऋतुर्यथा वनम्' इति नैषधे। तथा 'जयति मधुसहायः सर्वसंसारवल्ली' इति चम्पूकथायाम्। पुरः अग्रे पञ्चमोद्गारं पञ्चमनाम्ना श्रीराग–वसन्तराग–पञ्चमराग–भैरवराग–मेघमल्हारराग–नट्टनारायणराग–एतेषु षट्स्वपि रागेषु प्रायो विलासिनां पुंसां पञ्चमरागो वल्लभः स्यात्। अतः पञ्चमनाम्नो रागस्योद्गारं ध्वनितं गृह्णाति। पञ्चमालापं कुरुते इत्यर्थः। उत्प्रेक्ष्यते—देवी वाग्विलासैः स्ववचनरचनावैचित्रीभिः कृत्वा हारहूराणां गोस्तनीनां द्राक्षाणामवहेलनामवगणनां सृजन्तीव विदधतीव। च पुनर्वेणुवीणयोः वंशविपञ्च्योर्निक्कणं मधुरध्वनिं तृणतां न किंचित्करतां नयन्ती प्रापयन्तीव ॥ युग्मम् ॥

स्वयं श्रमणशक्रेण ध्यानेनेवानुगामिना ।
यदाहूतानुगृह्याहं कारणं तत्प्रसाद्यताम् ॥ ४ ॥

अनुगामिना सेवकेनेव ध्यानेन सूरिमन्त्रस्य प्रणिधानेन स्मरणेन जापेन वा कृत्वा श्रमणशक्रेण वाचंयमवास्तोष्पतिना स्वयमात्मना यत्कारणमुद्दिश्य अनुगृह्य ममोपर्यनुग्रहं प्रणीय प्रसादं प्रविधाय अहमाहूता आकारिता तदाकारणं यत्कारणं सहेतुः प्रसाद्यतां निगद्यताम् । ममेति शेषः ॥

व्यापार्य कार्ये क्वचन किंकरीं मां कृतार्थय ।
वज्रस्वामीव पद्मस्यार्थने पाथोधिनन्दनाम् ॥ ५ ॥

हे प्रभो सूरे, क्वचन कस्मिन्कार्ये कर्तव्ये व्यापार्य आज्ञामनुज्ञां वा प्रदाय दत्त्वा किंकरीं श्रीमच्चरणसरोरुहसेविकां मां त्वं कृतार्थय सफलीकुरु । क इव । वज्रस्वामीव । यथा द्वादशाब्दिके दुर्भिक्षे स्वकप्रावरणकल्पाध्यासनपूर्वकं बौद्धदेशसमानीते तद्बौद्धनृपादेशानवाप्तकुसुममात्रविमनायितेन संघेन पर्युषणापर्वणि जिनपूजाकृते कुसुमानयनार्थमभ्यर्थितः स्वपितुर्मित्रादेशागृहीतविंशतिलक्षकुसुमः श्रीवज्रस्वामी पद्महदे गत्वा लक्ष्म्या प्रेक्ष्य नमस्कृत्य चागमनकारणप्रश्नानन्तरं सहस्रपत्रपद्ममार्गणेन ग्रहणेन पाथोधिनन्दनां समुद्रपुत्रीं श्रियं कृतार्थयामास ॥

निगद्येति जिनाधीशशासनामरसुन्दरी ।
भेजे जोषं मुखे शारदीनेव शिखिमण्डली ॥ ६ ॥

जिनानां सामान्यकेवलिनामधीशस्य तीर्थकरत्वात्स्वामिनः श्रीमहावीरस्य शासनस्यामरसुन्दरी देवाङ्गना इत्यमुना प्रकारेण निगद्य कथयित्वा मुखे वदने जोषं मौनं भेजे सेवते स्म । 'जोषमासनविशिष्य बभाषे' इति नैषधे । तथा 'तूष्णीं तूष्णीकां जोषं च मौने' इति हैम्याम् । मौनं कृत्वा स्थितवतीत्यर्थः । केव । शिखिमण्डलीव । यथा शारदीना शरत्कालसंबन्धिनी । घनात्ययसमये इत्यर्थः । शिखिमण्डली मयूरमाला मुखे जोषं भजते न ब्रवीतीत्यर्थः । यदुक्तं माघकाव्ये—'समय एव करोति बलाबलं प्रणिगदन्त इतीव मनीषिणः । शरदि हंसरवापरुषीकृतस्वरमयूरमयूरमणीयताम् ॥' इति ॥

यदास्यकौमुदीकान्तवाक्पीयूषाभिलाषिणी ।
चलचञ्चुचलच्चक्षुरिव सा रभसादभूत् ॥ ७ ॥

सा देवी रभसादौत्सुक्यात् चलचञ्चोश्चकोरस्य चलच्चक्षुश्चञ्चललोचना वनिता चकोरी तद्वदभूत्संजाता । किंभूता । यस्य सूरीन्द्रस्य आस्यमाननं तदेव कौमुदीकान्तश्चन्द्रस्तस्य वाग् वाणी एव वचोरूपं वा पीयूषं सुधारसस्तदभिलषति वाञ्छतीत्येवंशीला । 'कणे हत्य चकोरीणां गणः पीत्वा सुधारसम् । अजायत मदेनेव गुञ्जापुञ्जारुणेक्षणाः ॥' इति ज्योत्स्नापाने सत्यपि चकोरीणां सुधापानं कीर्तिकौमुद्याम् ॥ इति गुर्वभिप्रायजिज्ञासया देवीप्रश्नः ॥

वाचं वाचंयमश्रेणीरोहिणीरमणस्ततः।
तत्पुरो ग्राहयामास सुधाया औरसीमिव ॥ ८ ॥

ततो देवीवचनानन्तरं वाचंयमानां श्रमणानां श्रेणीषु धोरणीषु रोहणीरमणः विभावरीवल्लभः सूरीन्द्रः तत्पुरो जिनशासनदेवतापुरस्तादग्रे वाचं वाणीं ग्राहयामास जग्राह। उवाचेत्यर्थः। उत्प्रेक्ष्यते—सुधाया अमृतस्य औरसीं सुजातां केवलपितृमात्रोरुत्पन्नामिव नन्दिनीमिव। 'सुजातस्त्वौरसौरस्यौ'। पुत्री त्वौरसी। 'उदश्रुरेष व्यसजन्निजौरसीम्' इति नैषधे॥

अदृग्गोचरपारस्य वाङ्मयस्याम्बुधेरिव।
यन्मनीषा सुखं देवि तरीव पारदृश्वरी ॥ ९ ॥

विनेया विनयावासाः कतिचित्ते ममासते।
शौण्डीरिमधरा गन्धसिन्धुरा इव बन्धुराः ॥ १० ॥

हे देवि, मम ते स्वगुणैर्विख्यातिभाजः कतिचित्कियत्संख्याका विनेयाः शिष्या आसते सन्ति। 'आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः' इति नैषधे। तथा 'सत्तायामस्त्यास्ते' इति क्रियाकलापे। किंभूताः। विनयावासाः विनयकुलमन्दिराणि। पुनः किंभूताः। बन्धुराः कौलीन्यादिगुणोपेताः। पुनः किंभूताः। शौण्डीरिमाणं कर्मसंपन्नसेनां प्रतिशौर्यं धरन्तीति। के इव। गन्धसिन्धुरा इव। यथा गन्धहस्तिनः प्रत्यर्थिपृतनापराभवनपटवो भवन्ति। ते के। येषां विनेयानां मनीषा प्रतिभा सुखं यथा स्यात्तथा अदृग्गोचरो नयनविषयो न चक्षुर्ग्राह्यः पारं परतीरं यस्य। पारशब्दः पुंनपुंसकलिङ्गयोः। तादृशस्याम्बुधेरिव समुद्रस्येव वाङ्मयस्य सिद्धान्तस्य सर्वशास्त्रस्य वा तरीव नौरिव पारदृश्वरी पारं दृष्टवतीति पारगामिनी। 'वनोरच्'। 'वनन्तात्स्त्रियामीप्प्रत्ययो भवति रश्चान्तादेशः' इति प्रक्रियासूत्रेण ईप्प्रत्ययः, नकारस्य रकारः। पारदृश्वरी ॥ युग्मम् ॥

मध्येऽमीषां विनेयानां कतमः कमलानने।
भास्वान्विष्णोरिव पदे ममास्त्यभ्युदयंगमी ॥ ११ ॥

हे कमलानने पद्मवदने शासनदेवि, अमीषां विनेयानां शिष्याणां मध्ये कतमः शिष्यः मम पदे पट्टे अभ्युदयं पट्टधारितां गमिष्यत्यभ्युदयंगमी अस्ति। अभ्युदयं जगद्विख्याततां गमिष्यतीत्येवंशीलो गमी। 'भविष्यति गम्यादयः'। 'गम्यादीनामुपसंख्यानणिनि वा वृद्धिर्यति'। यदुक्तं नैषधे—'साधोरपि स्वः खलु गामिनाधोगमी स तु स्वर्गमितः प्रयाणे' इति। साधनिका तु प्रागुक्ता विकल्पेन वृद्धिर्गामी गमी। क इव। भास्वानिव। यथा भास्करो विष्णोः पदे गगने अभ्युदयं गच्छति ॥ इति गुरोर्देवीप्रश्नः ॥

एवमालपिता तेन तं सुरी पुनरूचुषी ।
प्रावृषेण्यमिवाम्भोदं नभोम्बुपनितम्बिनी ॥ १२ ॥

तेन हीरविजयसूरिणा एवममुना प्रकारेण आलपिता भाषिता भाविपट्टधराभिधानं पृष्टा सती सुरी निर्जरी पुनर्द्वितीयवारमूचुषी भाषितवती । जगादेत्यर्थः । केव । नभोम्बुपनितम्बिनीव नदीह्रदनिपानादिनीरमनीहमानः केवलं नभस आकाशाद्घनाघननिर्मुक्तमम्बु पिबतीति नभोम्बुपो वप्पीहस्तस्य नितम्बिनी प्रमदा चातकी तेन जीवनदानादिना जगत्प्रसिद्धेनार्थान्मेघेन गर्जितेन गभीरगर्जारवेणालपिता वादिता सती प्रावृषेण्यं वर्षाकालसंबन्धिनम् । 'प्रावृषेण्यं पयोवाहं विद्युदैरावताविव' इति रघुवंशे । तथा प्रावृष एण्यप्रत्ययः । इति प्रावृषेण्यनिष्पत्तिः । अम्भोदं जलधरं प्रति ब्रवीति ॥

आस्ते श्रीजयविमलो यस्तेऽन्तेवासिवासवः ।
स ते दम्यो रथस्येव धुरं पट्टस्य धास्यति ॥ १३ ॥

हे प्रभो, यस्ते तवान्तेवासिनां शिष्याणां मध्ये वासव इव वासवो मघोनः सदृशः अखिलशिष्यशिखारत्नं श्रिया शोभया युक्तो जयविमल इति नाम्ना वर्तते स जयविमलप्रज्ञांशः ते तव पट्टस्य धुरं धास्यति धारयिष्यति । क इव । दम्य इव । यथा प्रथमवया गौरथवा प्रौढीभूतो वत्सो वत्सतरः । लोके 'गोधो' इति प्रसिद्धः । दम्यो रथस्य धुरं दधाति । 'गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशं बिभर्ति' इति रघौ ॥

त्वया विश्राणिता देव विधिना स्वपदेन्दिरा ।
वार्धिना विष्णुनेव श्रीश्चिरमेतेन रंस्यते ॥ १४ ॥

हे देव हे भट्टारक, त्वया प्रभुणा स्वपदेन्दिरा निजपट्टलक्ष्मीर्विधिना पूर्वाचार्यैरुक्तकृतप्रकारेण विश्राणिता प्रदत्ता सती एतेन जयविमलप्रज्ञांशेन समं चिरं बहुकालं यावत् रंस्यते क्रीडिष्यति । केव । श्रीरिव । यथा वार्धिना क्षीरनीरनिधिना विधिना वेदोक्तप्रकारेण विश्राणिता वितीर्णा पाणौ ग्राहिता श्रीर्निजनन्दना लक्ष्मीर्विष्णुना स्वप्रेयसा साकं चिरं रमते ॥

तं गुणैरप्रतीकाशं त्वद्गुणश्रीः श्रयिष्यति ।
वल्ली विवर्धमानेव स्मयमानमहीरुहम् ॥ १५ ॥

हे सूरिपुरंदर, त्वद्गुणश्रीः तव गुरुपरम्परायाता तपागच्छलक्ष्मीर्गुणैः शमदमार्जवमार्दवज्ञानादिभिरप्रतीकाशमनन्यसामान्यं तं जयविमलं श्रयिष्यति सेविष्यते । केव । वल्लीव । यथा विवर्धमाना प्रावृषेण्यप्रवर्षत्पयोधराभिषेकप्रसभप्रवृद्धिं प्राप्नुवती लता स्मयमानं विकसितं पल्लवपत्रपुष्पफलकलापकलितं महीरुहं पादपं श्रयते भजते ॥

पट्टधुर्येऽङ्गजे राज्ञा युवराज इवोर्जिते ।
त्वयास्मिन्निर्मिते कापि भाविनी शासनोन्नतिः ॥ १६ ॥

हे हीरविजयसूरे, त्वयास्मिन् जयविमलप्रज्ञाने पट्टधुर्ये गणभारधुरीणे निर्मिते कृते काप्यद्भुतवैभवा जगदाश्चर्यकारिणी शासनस्य श्रीजिनमतस्योन्नतिर्भाविनी भवित्री । केनेव । राज्ञेव । यथा भूमीपतिना ऊर्जिते प्रबलबले युवराजे पट्टधुर्ये निजराज्यधुराधुरंधरे विहिते सति शासनानामुपलक्षणात् पुरनगरग्रामजनपदानां न्यायविधिं विदधति सति समुन्नतिर्भवति । 'दीयतां दशलक्षानि शासनानि चतुर्दश' इति विक्रमार्कदानपत्रे श्लोकः । अथवा शासनस्याज्ञायाः काप्यद्वैता उन्नतिर्जायते । कोऽप्याज्ञां नोल्लङ्घयतीत्यर्थः ॥

विक्रमार्क इव श्रीमत्सिद्धसेनदिवाकरात् ।
त्वत्तस्तदनु कोऽप्युर्वीब्रध्नो बोधिमवाप्स्यति ॥ १७ ॥

हे देव, तस्य जयविमलस्य पट्टस्थापनानन्तरं त्वत्तः श्रीमत्सकाशात् कोऽप्यद्भुतवैभवः । उर्वी पृथिवी तस्यां प्रबलप्रतापैः ब्रध्न इव ब्रध्नः सहस्रकिरणसदृशो महामण्डलीकमहीपतिर्बोधिं समत्वमवाप्स्यति लप्स्यते । क इव । विक्रमार्क इव । यथा श्रीमतः पूर्वादिज्ञानातिशायिगुणैः कलिकालसर्वज्ञ इति विरुद्धधारणासाधारणलक्ष्मीवतः सिद्धसेनदिवाकराद्विक्रमादित्यनृपो बोधिबीजमवाप्तवान् ॥ इति देवतया पट्टधुरंधरकथनम् ॥

समाकर्ण्य सुरीवर्ण्यमानं तं पिप्रिये प्रभुः ।
रथाङ्गवन्निशावेदिगदिताभ्युदयं रविम् ॥ १८ ॥

प्रभुः सूरीन्द्रः सुर्या शासनदेवतया वर्ण्यमानं श्लाघ्यमानं तं जयविमलनामानं प्रज्ञांशं समाकर्ण्य श्रवणगोचरीकृत्य पिप्रिये निजपट्टाभ्युदयविभावनाभिप्रायेण हृदये परमां प्रीतिं प्राप्तवान् । 'प्रीङ् प्रीतौ' । जहर्षेत्यर्थः । किंवत् । रथाङ्गवत् । यथा चक्रवाकः निशावेदिभिस्ताम्रचूडैर्गदितो निवेदितोऽभ्युदय उद्गमनसमयो यस्य तादृशं रविं दिवाकरं प्रीयते प्रियाभिः परस्परवियोगापगमाशया हृष्यति ॥

इत्यतर्क्यत तेनान्तर्भाग्यसौभाग्यभूरसौ ।
प्रणुन्नयेव पुण्यैर्यत्रिदश्यापि प्रशस्यते ॥ १९ ॥

तेन सूरिणा अन्तर्मनोमध्ये इत्यमुना वक्ष्यमाणप्रकारेण अतर्क्यत विचार्यते स्म । इति किम् । यदसौ मद्विनेयो जयविमलाभिधानविबुधः भाग्यं भागधेयं पुण्यं तथा सौभाग्यं सुभगतां लोके विख्यातिर्वा तयोर्भूः स्थानं वर्तते यद्यस्मात्कारणात् त्रिदश्या जिनशासनवृन्दारिकयापि प्रशस्यते । उत्प्रेक्ष्यते—पुण्यैरर्थात्तत्सुकृतैः प्रणुन्नया प्रेरितयेव ॥

मेरुभूरिव भात्येषा जिनपट्टपरम्परा ।
समुद्भवन्ति येनास्यां सूरीन्द्राः स्वर्द्रुमा इव ॥ २० ॥

एषा निःशेषगणधरधोरणी तरुणीचूडामणीभूता अभ्युदिता अभ्युदीयमाना अभ्यु-

दयप्रापयित्रीव जिनस्य श्रीमन्महावीरभगवतः पट्टानां परम्परा श्रेणी मेरुभूरिव स्वर्णाचलमेदिनीव भाति विभाति । येन कारणेन अस्यां जिनपट्टपरम्परायां मेरुमेदिनीधरवनभूमौ च स्वर्द्रुमाः कल्पवृक्षा इव सूरीन्द्राः समुद्भवन्ति प्रकटीभवन्ति ॥

अर्हन्मतैकमलयोद्भूतसूरीन्द्रचन्दनैः ।
यशःप्रसृमरामोदैः सुरभीक्रियते जगत् ॥ २१ ॥

अर्हन्मतं श्रीमज्जिनशासनं तदेकमलयो दक्षिणाचलस्तत्रोद्भूताः प्रादुर्भावं प्राप्ताः पट्टधुरीणभावं लम्भिता ये सूरीन्द्रा आचार्यास्त एव चन्दनाः श्रीखण्डशाखिनस्तैः कर्तृभिर्यशांसि कीर्तय एव प्रसृमरा दशदिक्षु विस्तरणशीला ये आमोदाः परिमलास्तैः कृत्वा जगदखिलमपि भुवनं सुरभीक्रियते । सुगन्धं विधीयते इत्यर्थः ॥

इत्यन्तरुदयत्प्रीतिमेकलाद्रिकनीप्लवे ।
निचिखेल चिरं गन्धसिन्धुरेन्द्र इव प्रभुः ॥ २२ ॥

प्रभुः सूरिः इत्यमुना प्रकारेण अन्तश्चेतसि उदयन्ती प्रकटीभवन्ती या प्रीतिः प्रमोदः । 'प्रीतिः स्मरस्त्रियां प्रेम्णि योगमुदोः' इत्यनेकार्थः । सैव मेकलनामा अद्रिः पर्वतविशेषस्तस्य कनी कन्या पुत्री । नर्मदा नदीत्यर्थः । तस्याः प्लवे पानीयपूरे । 'नर्मदा मेकलाद्रिजा' इति हैम्याम् । तथा 'समुत्तीर्य भगवतीं मेकलकन्याम्' इति चम्पूकथायाम् । चिरं बह्वीं वेलां यावन्निचिखेल क्रीडति स्म । क इव । गन्धसिन्धुरेन्द्र इव । यथा कपोलपालीप्रमुखसप्तस्रोतोनिःसरन्मदाम्भःप्रवाहाघ्राणमात्रपलायितापरसिन्धुरधोरणीबन्धुरगन्धोपलक्षितसिन्धुरेन्द्रो मेकलशैलनन्दिन्या नर्मदायाः पयःप्रवाहे चिरं स्वेच्छापूरणपर्यन्तं खेलति ॥ इति गुरोर्हृदये विमर्शः ॥

लोकान्कोकानिवाह्लादं लम्भयन्भानुमानिव ।
दानलीलायितैर्हेलां कल्पयन्कल्पभूरुहाम् ॥ २३ ॥
प्रबोधं विदधत्प्रातरिवाशेषजनुष्मताम् ।
पुष्पकाल इवोल्लासं प्रणयन्सुमनःश्रियाम् ॥ २४ ॥
त्वं चिरं नन्द सूरीन्द्रेत्यभिनोनूय निर्जरी ।
ततस्तच्चरणाम्भोजं भ्रमरीव चुचुम्ब सा ॥ २५ ॥

ततोऽनन्तरं सा निर्जरी शासनदानवद्विषत्रस्यत्पृषती विलोचना भ्रमरी भृङ्गाङ्गनेव तच्चरणाम्भोजं प्रभुपादारविन्दं चुचुम्ब चुम्बति स्म । नमस्करोति स्मेत्यर्थः । किं कृत्वा । इत्यमुना प्रकारेण पुरोऽत्रैवानुष्टुभां त्रिके वक्ष्यमाणप्रकारेण अभिनोनूयातिशयेन स्तुतिं निर्माय । इति किम् । हे सूरीन्द्र हे आचार्यपर्जन्य, त्वं चिरं गलितावधिसमयं नन्द जयवान् प्रवर्तस्व पर्वतायुष्कवान् भवतात् । 'टुनदि समृद्धौ' अस्य धातोः प्रयोगत्वात् । ज्ञानदर्शनचारित्रादिकां समृद्धिं लभस्व वा जीया वा । त्वं किं कुर्वन् । लोकान् जग-

जनान् भाविनि भूतोपचारात् अमारिजीजियकादिकरवन्दिमोचनप्रकारेणाह्लादं प्रमोदं धर्मोपदेशप्रदानादिना भाविकलोकान् आनन्दं लम्भयन् प्रापयन्। क इव। भानुमानिव। यथा सहस्ररश्मिः कोकांश्चक्रवाकानाह्लादं लम्भयति। पुनः किंभूतः। दानलीलायितैः स्वविश्राणनविलसितैः कृत्वा कल्पभूरुहां सुरतरूणां हेलामवगणनां कल्पयन् कुर्वन्। अत्र गर्भितोपमा। पुनः किंभूत। अशेषजनुष्मतां समस्तजन्तुजातानां प्रबोधं विदधत्। किमिव। प्रातरिव। यथा प्रभातं दिवसमुखं सर्वजनानां जागरणं विनिद्रतां विधत्ते। जागरयतीत्यर्थः। पुनः किंभूतः। सुमनःश्रियां सुशोभनं निष्पापापद्रोहनिर्दम्भसर्वसत्त्वहितावहं मनो येषां तेषामुत्तमानां श्रियां लक्ष्मीणां उल्लासं स्फारीभावं प्रणयन् सृजन्। क इव। पुष्पकाल इव। यथा वसन्तसमयः कुसुमश्रीणां विकासं प्रणयति कुरुते। अथ वा पूर्वश्लोकद्वयप्रतिपादितानि शत्रन्तानि संबोधनान्येव ज्ञेयानि। 'गतिस्तयोरेष जनस्तमर्दयन्न हा विधे त्वां करुणा रुणद्धि नः' इति नैषधे। 'हे अर्दयन् हे विधे' इति तद्वृत्तिः। तथा संबोधने च। 'संबोधनेऽपि शत्रानशौ भवतः। हे पचन् हे पचमान जयमान' इति प्रक्रियायाम्। एवं संबोधनैर्वाभिष्टुत्य देवता प्रणमति स्म॥ त्रिभिर्विशेषकम्॥

ततोऽस्या धर्मलाभाशीर्व्यश्राणि श्रमणेन्दुना।
श्रेयःसिद्धेरुपादानं तस्याः संप्रस्थिताविव॥ २६॥

ततो देवीप्रणमनानन्तरं श्रमणेन्दुना सूरिचन्द्रेण अस्या देव्या धर्मलाभाभिधा आशीर्मङ्गलशंसनवाक् व्यश्राणि विश्राणिता प्रदत्ता। उत्प्रेक्ष्यते—तस्याः संप्रस्थितौ सम्यक्शुभावहप्रयाणे स्वगृहगमनावसरे श्रेयसः कल्याणस्य सिद्धेर्निष्पत्तेरथ वा सर्वमङ्गलकुलगृहसिद्धेर्मुक्तेरुपादानं परमं कारणमिव॥

पुनः स्वल्पेऽपि कार्येऽहं धुर्येण गणधारिणाम्।
प्रसादपात्रीकर्तव्या किंकरीवामरी त्वया॥ २७॥

हे देव, गणधारिणां गच्छभारसासहीनां सूरीणां मध्ये धुर्येण धौरेयेण। गणधरधुरंधरेणेत्यर्थः। त्वया भगवता पुनर्द्वितीयवारं स्वल्पे स्तोकेऽपि कार्ये कर्तव्ये किंकरी चेटी दासीव अहं श्रीमच्चरणसेविका अमरी शासनदेवता प्रसादस्य प्रसत्तेः पात्रीकर्तव्या स्थानकं कार्या। स्मर्तव्येत्यर्थः॥

इत्युदित्वा प्रभुं नत्वा मोदमेदस्विनी ततः।
क्षणिकेव क्षणादासीददृश्या द्योतिताम्बरा॥ २८॥

देवी शासनसुरी क्षणात्क्षणमात्रान्निमेषमात्रात् क्षणिकेव विद्युदिवादृश्या दृशोरगोचरा आसीत्। गतेत्यर्थः। किंभूता। द्योतितं स्वकान्त्या प्रकाशितमुद्द्योतयुक्तं कृतमम्बरमाकाशं यया। पुनः किंभूता। मोदेन सूरिदर्शनोद्भूताद्वैतानन्देन कृत्वा मेदस्विनी रोमाञ्चकञ्चुकितकाययष्टित्वात्पुष्टा। हर्षप्रकर्षवतीत्यर्थः। किं कृत्वा। इति पूर्वोक्तप्रकारेण

उदित्वा कथयित्वा। प्रभोः पुर इत्यध्याहारः। पुनरित्यस्याप्यध्याहारः। प्रभुं सूरीन्द्रं नत्वा प्रणम्य॥ इति शासनदेवतागमनम्॥

कलधौतावदातश्रीर्द्विजज्योत्स्नाविराजितः।
कुर्वन्कुवलयोल्लासं विभुर्विधुरिवाभवत्॥ २९॥

विभुः श्रीहीरविजयसूरिः विधुः सुधादीधितिरिवाभवत् जातः। किंभूतः। कलधौतं काञ्चनं तद्वदवदाता निर्मला पीता श्रीर्वपुःशोभा यस्य। 'विभ्राजते तव वपुः कनकावदातम्' इति भक्तामरस्तोत्रे। चन्द्रः किंभूतः। कलधौतं रजतं तद्वदुज्ज्वला मण्डललक्ष्मीर्यस्य। 'कलधौतं रूप्यहेम्नोः' इत्यनेकार्थः। पुनः किंभूतः। द्विजानां दशनानां ज्योत्स्नया कान्त्या विराजितः। पक्षे द्विजैश्चन्द्रपारिपार्श्वकैः सेवकविशेषैः। द्विजपतित्वाच्चन्द्रस्य। तथा ज्योत्स्नया चन्द्रिकया विराजितः शोभितः। पुनः किं कुर्वन्। कुवलयस्य भूमण्डलस्य प्रतिबोधदानादिना यशसा वा उल्लासमानन्दातिशयम्। पक्षे। कुवलयानां चन्द्रविकाशिकमलानामुत्पलानां विकाशं कुर्वन् सृजन्॥

अश्रान्तानन्तपदवीलङ्घनैः श्रान्तवानिव।
शशी शनैः शनैरस्ताचलचूलामथाश्रयत्॥ ३०॥

अथ देवतागमनानन्तरं शशी शीतकान्तिः शनैः शनैर्मन्दं मन्दमस्ताचलस्य चरमाद्रेः प्रतीचीपर्वतस्य चूलां शिखामाश्रयद्भजते स्म। उत्प्रेक्ष्यते—अश्रान्तं विगतविश्रामं यथा स्यात्तथा निरन्तरं विद्यते अन्तोऽवसानं यस्याः सा अनन्ता अपरिमिता प्रमाणातीता या पदवी मार्गः गगनाङ्गणं तस्या लङ्घनैरतिक्रमणैः श्रान्तवान् श्रमं प्राप्तवानिव। यः परिश्रमं प्राप्तः स कुत्रचन विश्रामार्थमवतिष्ठते॥

गर्भाश्मगर्भचन्द्राश्मकल्पितोत्तंसिकेव सा।
अस्ताचलश्रीर्भाति स्म मौलिलीलायितेन्दुना॥ ३१॥

मौलौ अर्थात् पश्चिमाचलस्य शिरःशिखरे लीलया स्वविचरणविलासेन न तु परस्य कस्यापि बलेन आकर्षणादिबलात्कारेणाचरितमाचरणं यस्य स लीलाचरितस्तादृशेनेन्दुना चन्द्रेण कृत्वा सा प्रसिद्धा चन्द्रस्योदयदायिनी द्वितीयायां प्रथममस्ताचलादेवोदयत्वात्। अथ वा सूर्याचन्द्रमसयोरस्तकारकत्वेन ख्यातिमती अस्ताचलस्य पश्चिमपृथिवीधरस्य श्रीर्लक्ष्मीर्भाति स्म। उत्प्रेक्ष्यते—गर्भे मध्यप्रदेशे अश्मगर्भा मरकतमणयो यस्याः। 'मरकतं त्वश्मगर्भम्' इति हैम्याम्। तादृशी। चन्द्राश्मभिश्चन्द्रकान्तरत्नैः। 'चन्द्रकान्तश्चन्द्रमणिश्चान्द्रचन्द्रोपलश्च सः' इति हैम्याम्। यथा चन्द्रोपलस्तथा चन्द्राश्मा। कल्पिता रचिता उत्तंसिका शेखरो यस्यास्तादृग्विधेव। 'विदर्भसुभ्रूवणावतंसिका' इति नैषधे। अवतंसिका तथैवोत्तंसिकापि॥

चन्द्रश्चङ्क्रमणक्लान्तं स्वाशनायितरोहितम् ।
वनाय मोक्तुमस्ताद्रेरध्यास्त किमधित्यकाम् ॥ ३२ ॥

चन्द्रो मृगाङ्कः अस्ताद्रेश्चरमाचलस्याधित्यकामूर्ध्वभूमीं सर्वशिरःशिखरकाश्यपीमध्यास्त आश्रयति स्म । उत्प्रेक्ष्यते—चङ्क्रमणे चतुर्यामीं यावदविश्रमेण निखिलनभोभ्रमणेन क्लान्तं परिश्रान्तं विभातप्रायायां विभावर्यां स्वस्यात्मनः क्रोडानिशलाल्यमानपाल्यमानम् । अथ वाशना या बुभुक्षा संजाता अस्येत्यशनायितं बुभुक्षाक्षामकुक्षिं रोहितमङ्कमृगभेदगतकुरङ्गम् । यतो 'मृगभेदारुरन्यंकुरङ्कुगोकर्णशंबराः । चमूरुचीनचमराः समरार्णस्य रोहिषौ । कदलीकन्दलीकृष्णसारः पृषतरोहिताः ॥' इति हैम्याम्, तथा 'त्रस्यच्चमूरुचलचक्षुषमाचचक्षे,' तथा 'नश्यत्पृषतीविलोचने,' तथा 'पृषत्किशोरी कुरुतामसंगतं कथं मनोवृत्तिमपि द्विपाधिपे,' तथा 'सुखं वसत्येष कलङ्करङ्कुः' इत्यादि नैषधे । मृगभेदा मृगा एवोक्ताः सन्तीति । तथैवात्र रोहितनामा मृगभेदविशेषस्तं वनाय चरणार्थं मोक्तुमिव । 'वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच' इति रघौ । मोचनार्थमिव ॥

विभुना वाक्सुधास्पन्दिवदनेन विधुर्जितः ।
तत्तुलाप्त्यै तपःकाङ्क्षीवागादस्ताद्रिगह्वरे ॥ ३३ ॥

विधुः मृगाङ्कः अस्ताद्रेः प्रतीचीपर्वतस्य गह्वरे विविधविटपिकोटिसंकटनिकुञ्जे गुहायां वा आगादाजगाम । उत्प्रेक्ष्यते—तस्य भगवद्वक्त्रस्य तुला सादृश्यमुपमा तस्या आप्त्यै प्राप्तये आसादनार्थं तपःकाङ्क्षी तीव्रं तपः कर्तुं काङ्क्षन्वाञ्छन् इव । किंभूतो विधुः । वाचं वाणीमेव सुधाममृतरसं स्पन्दते क्षरत्युद्गिरतीत्येवंशीलेन वदनेन स्वीयाननेन कृत्वा विभुना सूरिणा जितः पराभूतः ॥

दृष्ट्वा यान्तं जघन्यायामन्तर्भूताभ्यसूयया ।
चन्द्रश्चन्द्रिकया रुच्य इव चण्डिकया जहे ॥ ३४ ॥

चन्द्रः कैरविणीरमणः चन्द्रिकया ज्योत्स्नया जहे त्यक्तः । उत्प्रेक्ष्यते—अन्तर्मनोमध्ये भूता प्रकटा जाता अभ्यसूया ईर्ष्या तयेव । किं कृत्वा । जघन्यायां निकृष्टायां जातेर्वा रूपाद्वा श्वपचरूपायामतिकुत्सितायां च । स्वभावतः स्त्रीजातावसूयाबाहुल्यं स्यात्सपत्नीमपि द्रष्टुं न शक्नोति ततोऽन्यस्याः का किंवदन्ती । तत्रापि तां विशुद्धां विश्वाह्लाददायिनीमेकपत्नीं सतीं विहाय सकलङ्कां जगद्विषादविधायिनीं कुरूपां मातङ्गाङ्गनामेषोऽभिसरत्येषा महीयस्यसूया तयेव कृत्वोज्झितः । अथ च जघन्या पश्चिमा । 'अजघन्यः प्रचेताः । नलः किंभूतः । अजघन्यः सर्वोत्कृष्टः । तथा प्रकृष्टमुत्तमत्वोचितं चेतो मनो यस्य । तथा प्रचेता वरुणस्तु सजघन्यः सह जघन्यया प्रतीच्या दिशा वर्तते यः स तदधिपतित्वात्' इति चम्पूकथायाम् । यान्तं गच्छन्तं गमनं कुर्वन्तम्

दृष्ट्वा स्वलोचनगोचरीकृत्य । क इव । रुच्य इव । यथा चण्डस्त्वत्यन्तकोपनः स्त्री चेच्चण्डिका कृतं कोपं कथमप्यनुज्झन्त्या स्त्रिया कान्तः शङ्कीमभिसरन् हीयते लज्यते ॥

प्रेक्ष्य क्षपाक्षये चन्द्रं विद्राणं चन्द्रगोलिका ।
त्यक्त्वा कान्तं ययौ क्वापि पुंश्चलीव यदृच्छया ॥ ३५ ॥

चन्द्रगोलिका विशदचन्द्रिका कान्तं स्वभर्तारमर्थतो विभावरीवल्लभं त्यक्त्वा मुक्त्वा संत्यज्य क्वापि कुत्रापि स्वरुचिते स्थाने यदृच्छया स्वेच्छया ययौ प्रयातवती । किं कृत्वा । क्षपाया निशायाः क्षये क्षीणतायां विनाशे विद्राणं निःश्रीकं मृतप्रायं चन्द्रं नक्षत्रनायकं प्रेक्ष्य विभाव्य । केव । पुंश्चलीव । यथा व्यभिचारिणी स्त्री स्वकान्तं त्यक्त्वा क्वाप्यभिमते पुंसि प्रयाति ॥

रथाङ्गव्यथनोद्भूतैः पक्त्रिमैरिव पाप्मभिः ।
त्रियामापगमे राजा तत्यजे वसुभिः क्षणात् ॥ ३६ ॥

त्रियामाया निशाया अपगमे विरामे विनाशे । क्षये इत्यर्थः । राजा चन्द्रो नृपतिश्च क्षणात् निमेषमात्राद्वसुभिः किरणैर्द्रव्यैश्च तत्यजे परित्यक्तः । 'वसुस्त्वग्नौ देवभेदे रुचियोक्त्रे शुष्के च सुस्वादे रत्ने वृद्ध्योषधे घने' इत्यनेकार्थाः । उत्प्रेक्ष्यते—रथाङ्गानां चक्रवाकविहंगमानां व्यथनैः परस्परवियोगोत्पादनैरुद्भूतैः संजातैस्तथा पक्त्रिमैः परिपाकं प्राप्तैः उदयाचलिकायामुपागतैः परमपाप्मभिरुत्कृष्टदुःकृतैरिव । नृपतिरप्यकराकरकरणदण्डनपरदारगमनग्रहणसप्तव्यसनरोचनादिजनितदुरन्तदुरितैः कृत्वा । द्रव्यादिभिरादिशब्दात् अश्वगजरथपदातिसुभटजनपदपुरग्रामादिरूपलक्ष्मीधनैस्त्यज्यते । क्षीणे पुण्ये विधीयमाने च दुर्नये श्रीर्याति । यतः—'पुण्ये सत्यपि लक्ष्मीं दुर्नीतिरिहान्तरे क्षयं नयति । तैलेऽनुपभुक्तेऽपि हि दीपशिखां हन्ति वाताली ॥' इति वचनात् ॥ इति चन्द्रस्यास्ताचलगमनम् ॥

नियन्त्र्य हन्तुं स्वर्भाणुपाशकाङ्क्षीव पाशिना ।
विधुः पाथोधिसौधेनाधातुं सौहार्दमीयिवान् ॥ ३७ ॥

विधुर्वासतेयीविवोढा निशापतिः । पाथोधिरम्भोनिधिः समुद्रः स एव सौधं वासवेश्म यस्य तेन । 'वरुणस्त्वर्णवमन्दिरं प्रचेताः' इति हैम्याम् । पाशः स्वशात्रवनियन्त्रणदवरकग्रन्थिरस्यास्तीति पाशी वरुणः । 'जलयादःपतिपाशिमेघनादाः' इति हैम्याम् । वरुणाह्वास्त्रं तेन प्रचेतसा सार्धं सौहार्दं मित्रमित्रतामाधातुं कर्तुमीयिवान् । तद्वाग्नि जलनिधौ जगाम । उत्प्रेक्ष्यते—पाशकाङ्क्षीव । मित्रीभूताद्वरुणात्पाशं गृहीतुं काङ्क्षति स्पृहयतीत्येवंशील इव । यतः मित्रस्य यद्विलोक्यते तन्निजमित्रात्सद्वस्तु गृह्यते इति रीतिः । किं कर्तुम् । स्ववैरिणं स्वर्भाणुं विधुंतुदं नियन्त्र्य कथंचित्पाशेन कृत्वा निबध्य हन्तुं कृतान्तनिकेतनातिथीकर्तुम् ॥

तमीप्रियतमो मध्ये प्रत्यग्द्वीपवतीपतेः ।
जनिकर्तुर्निजस्येव मिलनाय समीयिवान् ॥ ३८ ॥

विभावरीप्राणवल्लभः विधुः प्रत्यग्द्वीपवतीपतेः पश्चिमदिक्संबन्धिनो निर्झरिणीनायकस्य समुद्रस्य प्रतीचीपाथोधेर्मध्ये समीयिवान् समागच्छति स्म । उत्प्रेक्ष्यते—निजस्यात्मन आत्मीयस्य वा जनिकर्तुः जनकस्य । यतः—'सागरान्मुनिविलोचनोदराद्यद्व्यादजनि तेन किं द्विजः' इति नैषधे । मिलनाय पितृस्नेहातिरेकान्मिलनार्थमिव ॥

इतोऽभ्युदयते भानुरितश्चन्द्रोऽस्तमीयते ।
इदं किमप्यनीदृक्षमहो विलसितं विधेः ॥ ३९ ॥

इतोऽस्मिन् पार्श्वे पूर्वस्या दिशि भानुः सहस्ररश्मिः अभ्युदयते अभ्युदयं प्राप्नोति । 'अय गतौ' भ्वादिः आत्मनेपदी च । तथा 'गच्छति विसर्पत्ययत्ययते' इत्यादिक्रियाः क्रियाकलापे । इतः प्रतीचीननीरनिधेर्मध्ये । पश्चिमायां दिशीत्यर्थः । चन्द्रो रजनीजीवितेश्वरः अस्तं क्षयं नाशमीयते लभते । 'ईङ् च गतौ' दिवादिरात्मनेपदी च । अहो इत्याश्चर्ये खेदे वा । किमप्यपूर्वमनीदृक्षं विद्वद्भिरपि वक्तुमशक्यं वचनगोचरातीतं विधेर्दैवस्य विलसितं विजृम्भितं दृश्यते ॥ इति चन्द्रमसोऽस्तमयनम् ॥

दत्त्वोदयं त्वमेवास्तं कथं दत्से प्रियस्य नः ।
तारका इत्युपालब्धुं भेजुरस्ताचलं किमु ॥ ४० ॥

तारका अर्थादश्विन्यादिनक्षत्राणि दाक्षायिण्यः सर्वाः शशिप्रियाः । हेमाचार्येण नामसु कश्चिद्विशेषः प्रोक्तो नास्ति । किं च 'भकनीनिकयोस्तारा, तारा शब्दो भे नक्षत्रे कनीनिकायां च । तारा एव तारका नक्षत्राणि' इति लिङ्गानुशासने । चन्द्रकरा अस्ताचलं प्रतीचीपृथ्वीधरं भेजुराश्रिताः । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण उपालब्धुमुपालम्भं प्रदातुमिव । इति किम् । हे चरमाद्रे, नोऽस्माकं तारकाणां प्रियस्य प्राणनाथस्य निशीथीनीनायकस्य त्वमेव भवानेव उदयमुद्गममैश्वर्यं वा दत्त्वा वितीर्य प्रतिपद्द्वितीययोस्तिथ्योरस्ताचले चन्द्रोदयदर्शनात् । तस्माद्विधोरस्ताद्रिरेवोदयाचलः । तथा प्रातर्वर्णनेऽप्युदयनाचार्येणापि प्रोक्तं यथा—'उदयगिरिकुरङ्गीश्टङ्गकण्डूयनेन स्वपिति सुखमिदानीमन्तरेन्दोः कुरङ्गः' इति । प्रतिपच्चन्द्रोदयदर्शनं प्रायः सुरभिणामेव । यदुक्तम्—'प्रतिपच्चन्द्रं सुरभी नकुलो नकुलीं पयश्च कलहंसः । चित्रकवल्लीं चाषः सूक्ष्मं धर्मं सुधीर्वेत्ति ॥' इति । पुनस्त्वमेवास्तमस्तमयनं क्षयं च कथं दत्से ददासि ॥

नक्षत्रपद्धतेः प्रातर्भ्रश्यन्तोऽम्बुधरादिव ।
क्षणाद्विलयमासेदुस्तारकाः करका इव ॥ ४१ ॥

तारका ग्रहनक्षत्रताराः प्रातः प्रभातसमये करका घनोपला इव क्षणान्निमेषमात्राद्विलयं क्षयमासेदुः प्राप्नुवन्ति स्म । किं कुर्वन्तः । नक्षत्रपद्धतेराकाशात् । 'अभ्रं सु-

राभ्रोडुमरुत्पथोऽम्बरम्' इति हैम्याम् । भ्रश्यन्तो भ्रंशं प्राप्नुवन्तः । 'भ्रशूभ्रंशू अधः-पतने' दिवादिकौ हैमधातुपाठे । कस्मादिव । अम्बुधरादिव । यथा जलधरान्मेघात्करका भ्रश्यन्त्यधः पतन्ति ॥

अर्त्याब्धिमग्नं प्रत्यूषद्विषता मुषितश्रियम् ।
तारास्तारापतिं प्रेक्ष्यान्वमज्जंस्तमिवार्णवे ॥ ४२ ॥

ताराः प्रातर्दृश्यमानाः गुरुशुक्रादिमहत्तारका अर्णवे समुद्रे । उत्प्रेक्ष्यते—तं चन्द्र-मन्वमजन् विधुपृष्ठे बुब्रुडुरिव कृत्वा । तारापतिं स्वस्वामिनं शशिनं प्रेक्ष्य समीक्ष्य । अयं गुरोस्तारकः, अयं शुक्रतारकः, इति लोकोक्त्यापि तारकास्तेषां तारकाणां स्वामित्वं तु चन्द्रमस एव । यतः—'तारकराट् किरीटः' इति नैषधे । 'अथ वा गह अट्ठासीत-डवी संतारकोट्टिकोडीणं । छासठिसहस्सनवसयपणहत्तरीपगसखिभिन्नं' ॥ इति वच-नात् ग्रहपतित्वमपि । किं च । यावान्परिवारः सूर्यस्य तावान्परिवारश्चन्द्रस्येति जीवा-भिगमे । किंभूतः । प्रत्यूषं प्रभात एव द्विषन् द्वेषी शत्रुस्तेन मुषिता गृहीता छलदर्शिना स्वावसरं छलं च प्राप्य हठात्सर्वाप्यादत्ता श्रीर्यस्य अत एवार्त्या चिन्तया पीडया वा दुःखातिरेकत्रपया अब्धौ समुद्रे मग्नं ब्रूडितम् ॥

निशाशनायितेनाभ्रपथे तारकतन्दुलाः ।
दिनाननशकुन्तेन शङ्के कुक्षिगतीकृता ॥ ४३ ॥

निशया रात्र्या कृत्वा निशायां वा चरणाभावाददर्शना जातास्त्यस्येत्यशनायितो बुभुक्षितः तेन दिनाननं प्रभातं तदेव शकुन्तः पक्षी तेन शकुन्तेन अहमेवं शङ्के वित-र्कयामि उत्प्रेक्षे वा । अभ्रपथे मेघमार्गे गगनवर्त्मनि वा तारकतन्दुलास्तारका एवात्यौ-ज्ज्वल्यात्तन्दुलास्तुषनिर्मुक्तकलमाः । 'प्रथममुपहृत्यार्थं तारैरखण्डिततन्दुलैः' इति नैषधे तारकास्तन्दुलीकृताः । कुक्षौ उदरे गताः । 'कृतौ' इति च्विप्रत्यये कुक्षिगतीकृताः । 'इव बहुरूपकशालभञ्जिका मुखचन्द्रेषु कलङ्करङ्कवः । यदनेकपसौधकन्धरा हरिभिः कु-क्षिगतीकृता इव ॥ ' इति नैषधे ॥

दिग्गजेन्द्रावगाहेनोत्पन्नाः स्वःसिन्धुबुद्बुदाः ।
क्षणादिव व्यलीयन्त तारकास्तारकापथे ॥ ४४ ॥

तारकास्तारास्तारकापथे नक्षत्रवर्त्मनि आकाशे क्षणाद्दृश्यमाना एव स्वल्पकालादेव व्यलीयन्त विलयं क्षयं लभन्ते स्म । उत्प्रेक्ष्यते—दिग्गजानामाशामातङ्गानामैरावतादि-हरिकुञ्जराणां जलावगाहेन सलिलक्रीडाकरणमज्जनादिविधिना उत्पन्ना उद्भूताः स्वःसि-न्धोराकाशतरङ्गिण्याः । गगनगङ्गाया इत्यर्थः । बुद्बुदाः पानीयस्थासका इव । 'जलपं-पाटो' इति प्रसिद्धाः । बुद्बुदा हि स्वल्पकालावस्थायिनः स्युः । यदुक्तम्—'सब्भरा-गजलबुब्बुदउवमे जीविएभ जलबिन्दुचञ्चले । जुचणेयनइवेगसंनिहे यावजीव किमयं न बुज्झसि ॥' इति वैराग्यशतके ॥ इति शुक्रादिमहत्तारास्तः ॥

आगामिनो गवां पत्युः प्रातः सेनापतेः पुरः।
कांदिशीका इवानश्यन्नन्धकारविरोधिनः ॥ ४५ ॥

आगमिष्यतीत्येवंशीलस्य आगामिनो गगनमण्डले समागन्तुकस्य गवां किरणानां भूमीनां च पत्युः स्वामिनः सूर्यस्य पार्थिवस्य प्रातः प्रभाताभिधानस्य दिनाननरूपस्य वा सेनापतेरनीकिनीनायकस्य पुरः पुरस्तादग्रे। उत्प्रेक्ष्यते—कांदिशीका भयद्रुता इव। अन्धकारविरोधिनः संतमससंपन्नसंदोहा अनश्यन्पलायांचक्रिरे। 'मित्रो ध्वान्तारातिरब्जांशुहस्तः' इति हैम्याम्। एकस्य शत्रुत्वे द्वावपि परस्परं शात्रवौ भवतः इति॥

गह्वरे भूभृतां गुप्तं तामसास्तापसा इव।
कृशाः किमु तपस्यन्ति पुनरभ्युदयाशया ॥ ४६ ॥

तमसां समूहास्तामसाः। अत्र समूहार्थेऽण्। तिमिरप्रकराः कौशिका वा। 'तामसास्तिग्मरोचिषः' इति वीतरागस्तवे। कृशाः परिपन्थिपाथोजिनीपतिनिपतदृढतरकरनिकरप्रसभप्रहारजर्जरीभवद्घनोद्भवद्भूरिचिन्तातिशयवशतो दुर्बलीभूताः सन्तः। उत्प्रेक्ष्यते—भूभृतां धरणीधराणां गह्वरे महत्कन्दरे कोटरे किमु तपस्यन्ति तीव्रतमं मुक्तान्नपानं तपःकष्टं कुर्वन्तीव। कथम्। गुप्तं छन्नं यथा स्यात्तथा केनाप्यज्ञातम्। कया। पुनर्द्वितीयवारमभ्युदयस्य चन्द्रचण्डरुचिप्रदीपप्रमुखद्विषत्पराभावुकविषयाद्वैतस्फूर्तिमत्तया आशया स्पृहया वाञ्छया। के इव। तापसा इव। यथा परिव्राजकाः समग्रशात्रवक्षत्रगोत्रचित्रासनैकालम्भविष्णुनृपादिपदवीकामनया तपस्तन्वते॥ इत्यन्धकारगमनम्॥

अथ विभातप्राया शर्वरी उच्यते—

विद्राणोत्पलदृक्क्षीणशुक्रा भ्रश्यत्पयोधरा।
म्लानास्येन्दुस्त्यक्ततारमुक्ता वृद्धेव शर्वरी ॥ ४७ ॥

शर्वरी रात्रिर्वृद्धेव जरती स्त्रीवासीत्। किंभूता निशा वृद्धा च। विद्राणे संकुचिते निमीलिते गते वा उत्पलानि कुवलयानि एव तत्तुल्ये च दृशौ नयने यस्याः। पुनः किंभूता। क्षीणोऽस्तमितप्रायः। विभातेऽपि कदाचित् शुक्रो निरीक्ष्यते। ततोऽस्तमितप्रायः अस्तमितो वादृग्गोचरीभूतः शुक्रः ग्रहविशेषो यस्याः। पक्षे। गर्भाधानाभावात्क्षीणं विनष्टं शुक्रं पुंवीर्यं यस्याम्। पुनः किंभूता। भ्रश्यन्तोऽविरलीभवन्तः। पाश्चात्यरात्रौ प्रायो वर्दलानि भवन्ति सूर्योदये च यान्ति। अत एव चम्पूकथायां प्रातर्वर्णने प्रोक्तं सूर्यविशेषणम्—'करपरामृष्टपयोधरे' इति। पयोधरा मेघा अभ्ररूपा यस्याम्। पक्षे। भ्रश्यन्तावधःपतन्तौ पयोधरौ स्तनौ यस्याः। पुनः किंभूता। म्लानो विच्छायीभूतो गतचन्द्रिकत्वाद्वृद्धत्वाच्च आस्येन्दुर्वदनसदृशः वक्त्रमेव चन्द्रो यस्याः। पुनः किंभूता। त्यक्ता उज्झितास्तारा एव उज्ज्वला वा मुक्ता मुक्ताफलानि यया। प्रायो वृद्धानां भूषणपरिधानं शोभावन्न दृश्यते। यदुक्तम्—'मा ज्ञातुरिय पल्हाणिइ परकप्पडइपडप्प। एतन्नेअसुहामणां बुड्ढीकानिधडुक्क॥' इति प्राकृतवाक्यात्॥

रजनीवियुजां जाने द्विजानामपशापतः।

कैरवाक्षी क्षणाद्राज्ञः क्षीणतां प्रतिपेदुषी॥ ४८॥

राज्ञः सुधाधाम्नः नृपतेश्च कैरवाक्षी कुमुदनयना निशीथिनी जाया राज्ञी क्षणात्स्वल्पसमयादेव क्षीणतां क्षयभावमतिकृशीभावम्। अस्थिचर्मावशेषतामित्यर्थः। 'छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः। इति विमृशन्तः सन्तः संतप्यन्ते न ते विपदा॥' अत्र क्षीणता तु कलावशेषमात्रेणैव। 'मूलादुच्छिन्नस्योपचय एव नास्ति क्षीणस्य स्वल्पावशेषस्यैवोपचयः' इति सूक्तोक्तिः। प्रतिपेदुषी प्रपन्ना संप्राप्तवती। उत्प्रेक्ष्यते—रजन्यां निशासमये वियुञ्जन्ति परस्परं वियोगं प्राप्नुवन्तीति तादृशा द्विजाः पक्षिणो रथाङ्गनामानो ब्राह्मणाश्च। 'विहगयोः कृपयैव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः।' इति रघुवंशे। तथा वस्तुपालकीर्तिकौमुदीसहोदरे सुरथोत्सवकाव्येऽपि—'रजनीवियुजां पतत्रिणाम्' इति। चक्रवाकानामिति। अपशापतः विरुद्धशपनादिव स्वाचारनिरतानां ब्राह्मणानां शापो लगति न तु ब्राह्मणब्रुवाणाम्। यतः—'वृत्तस्था ब्राह्मणा ज्ञेयाः क्षत्रियाः शस्त्रपाणयः। कृषिकर्मकरा वैश्याः शूद्राः प्रेक्षणकास्तथा॥' इति क्रियया ब्राह्मणत्वं न तु जात्या उत्तराध्ययने 'बम्बचेरेण बंभणे' इति॥

त्यक्ततारपरीवारा छिन्नध्वान्तकचच्छटा।

तमी तपस्विनीवासीद्दयितेऽस्तमिते विधौ॥ ४९॥

विधौ चन्द्रमसि दयिते भर्तरि अस्तमिते परलोकं प्राप्ते सति तमी त्रियामा। उत्प्रेक्ष्यते—तपस्विनी तापसी आसीदिव परिव्राजकेव बभूव। किंभूता। त्यक्तो मुक्तस्तारास्तारका उपलक्षणाद्ग्रहनक्षत्राणि एव परीवारः परिच्छदो यया। पुनः किंभूता। छिन्ना लूना भद्रकारिता ध्वान्तान्यन्धकाराण्येव कचच्छटा केशपाशो यया। योषितो हि भर्तरि मृते शिरःकेशान्मुण्डयन्ति॥

संसिसृक्षुः शशी कान्तां कामगादनुरागवान्।

इत्यालोकयितुं शङ्के तमी तमनुजग्मुषी॥ ५०॥

तमी इन्दुकान्ता शशिनं स्ववल्लभं विधुमनुजग्मुषी पृष्ठे प्रस्थिता पश्चाद्गच्छति स्म। उत्प्रेक्ष्यते—इत्यालोकयितुमित्यमुना प्रकारेण प्रेक्षितुमिव। इति किम्। अनुरागवाननुरतिकलितः। 'रागोऽनुरागोऽनुरतिः' इति हैम्याम्। अनुगतो रागो रक्तिमा तेन संयुक्तः। अस्ताद्रिसंगमान्मनागरुणीभूतत्वादिदं विशेषणम्। शशी कां चतुर्षु वर्णेषु अन्यतरां खेचरीमप्सरसं वा नागाङ्गनां वा। किंनाम्नीं कान्तां स्त्रियं संसिसृक्षुः कस्याः सङ्गं कर्तुमिच्छुः। अगात्कुत्रापि मां विमुच्य गतः। 'निर्वापयिष्यन्निव संसिसृक्षोः' इति नैषधे॥

किं पाथेयमिवादाय क्षपा नक्षत्रमुक्तिकाः।

प्रत्यूषे प्रोषितं कान्तं मृगाङ्कमनुगच्छति॥ ५१॥

प्रत्यूषे प्रभातसमये प्रोषितं द्वीपान्तरं प्रति प्रस्थितं मृगाङ्कं हरिणलाञ्छनं निजहृदयनायकं कान्तम् । उत्प्रेक्ष्यते—क्षपा निशा किमनुगच्छति पृष्ठे प्रयातीव । किं कृत्वा। नक्षत्राणि उडवः उपलक्षणत्वात्तारका एव तद्रूपा वा मुक्तिका मुक्ताफलानि अल्पभारबहुमूल्यानि मौक्तिकानि आदाय गृहीत्वा। किमिव । पाथेयमिव । यथा काचित्रिपुटिका 'त्रेवडीनीकरणहार' इति जने प्रसिद्धा दीर्घदर्शिनी नैपुण्यवती स्त्री कथमप्यकस्मात्कारणाद्विशंवलं स्ववल्लभं कुत्रचिज्जनपदे प्रस्थितं विज्ञाय स्वयं सम्यग्मणिमुक्तादिपाथेयमादाय तमनुयाति ॥

वितत्य मायिकीवाभ्रे मायां तारामयीं तमी ।
क्षणाददृश्यतां निन्ये मन्ये तां दिवसानने ॥ ९२ ॥

तमी यामिनी दिवसानने प्रभातसमये मन्ये उत्प्रेक्षे अहमेवं मन्ये मानयामि विमर्शं विदधामि वा। क्षणात्क्षणमात्रतां स्वयं प्रपञ्चितां मायां प्रेक्षणरूपकादिरचनाकपटपाटवमदृश्यतां दृशोरगोचरतां निन्ये लम्भयामास । किं कृत्वा । अभ्रे दशदिक्सीमव्योममण्डले मायिकीव इन्द्रजालिकविद्याविधुरा वनितेव । तारामयीमुपलक्षणाद्ग्रहनक्षत्रप्रचुरां मायां शाम्बरीम् । इन्द्रजालमित्यर्थः । वितत्य विस्तार्य ॥

तमस्विन्या विधोः पत्युर्विरहासहमानया ।
प्रातःसंध्याबृहद्भानौ स्वतनूः किमहूयत ॥ ९३ ॥

तमस्विन्या पीयूषमयूखप्राणवल्लभया विधोश्चन्द्रमसः पत्युः स्वभर्तुर्विरहं वियोगं न सहते इत्यसहमाना तादृश्या सत्या प्रोद्दामविरहाकुलया विधुवल्लभवियोगं सोढुमसमर्थया भवन्त्या । उत्प्रेक्ष्यते—प्रातःसंध्या दिवसाननरक्तिमा सैव बृहद्भानुः कृशानुस्तस्मिन् स्वतनूर्निजगात्रलता किमहूयत हुतेव भस्मीकृतेव ॥

तूर्याणां यामिनीयामविरामे ध्वनिरुद्ययौ ।
प्रयाणं सूचयन्प्रातरिव राज्ञो मृगीदृशः ॥ ९४ ॥

यामिन्या निशाया यामानां चतुर्णां प्रहराणां विरामे अपगमे तुर्याणां वादित्राणां 'नगारा' इति लोकप्रसिद्धानां ध्वनिः शब्दः उद्ययौ प्रादुर्भूतः । उत्प्रेक्ष्यते—राज्ञश्चन्द्रमसो महीपतेर्वा मृगीदृशो निशाया महिष्या वा प्रयाणं प्रस्थानं सूचयन्कथयन्निव ॥ इति रात्रिगमनम् ॥

चक्रे श्रमणशक्रेण विधिर्वैभातिकस्ततः ।
जैत्रं तन्त्रमिवाधृष्यभावद्वेष्यजिगीषया ॥ ९५ ॥

ततो रात्रिगमनानन्तरं श्रमणशक्रेण वाचंयमपुरंदरेण हीरविजयसूरिणा । विभाते विधीयते, विभातस्यायं वा वैभातिकः प्रातःकालसंबन्धी विधिराचारः प्रातरावश्यकादिकः चक्रे कृतः । उत्प्रेक्ष्यते—अधृष्याणामनाकलनीयानां दुर्धराणां भावानामन्तरङ्गा-

णामष्टकर्मणामष्टादशदोषाणां वा द्वेष्याणां प्रतिभटानां जिगीषया जेतुमिच्छया। जैत्रं शात्रवगोत्रमात्रजयनशीलं तन्त्रमुपायमर्थसाधकमिव। 'तन्त्रं सिद्धान्ते राष्ट्रे च परिच्छन्दप्रधानयोः। अगदे कुटुम्बकृत्ये तन्तुवाने परिच्छदे॥ श्रुतिशाखान्तरे शास्त्रे करणे अर्थसाधके। कर्तव्या तन्त्रोक्तिः' इत्यनेकार्थः॥

उपभुज्य प्रियां प्राचीं वज्रिणा व्रजता दिवम्।
व्युत्सृष्टमिव ताम्बूलं शोणिमा प्रातरुद्ययौ॥ ९६॥

प्रातः प्रभातकाले शोणिमा प्रभातसंध्याराग उद्ययौ प्रकटीबभूव। उत्प्रेक्ष्यते—प्राचीं पूर्वदिशं प्रियां स्वजायाम्। 'कौशिकः पूर्वदिग्देवाप्सरःस्वर्गेशचीपतिः' इति हैम्याम्। पूर्वदिक्पतित्वेन उपभुज्य नक्तं भुक्त्वा।'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति नैषधे। दिवं स्ववाससदनं त्रिदिवं व्रजता गच्छता वज्रिणा शक्रेण व्युत्सृष्टं नीरसत्वेनात्ममुखात्त्यक्तं ताम्बूलं सचूर्णखदिरपूगनागवल्लीदलचर्वणपिण्डमिव॥

प्रातःसंध्या व्यभाद्वह्निहेतिर्मुक्ता विवस्वता।
हन्तुं महाहवोन्मादिमन्देहानिव कोपतः॥ ९७॥

प्रातः प्रत्यूषसंबन्धिनी संध्या प्रभातसमयप्रादुर्भूतशोणिमा व्यभात्संध्यारागो भाति स्म। उत्प्रेक्ष्यते—महति प्रौढे प्रबले आहवे संग्रामे उन्मादयन्ति उन्मत्ता भवन्ति इत्येवंशीला ये मन्देहा नाम मार्तण्डे इति यक्षभूतराक्षसविशेषाः कोपतः क्रोधातिरेकात्तान् स्वप्रत्यनीकान् हन्तुं व्यापादयितुं भस्मसात्कर्तुं विवस्वता भास्वता मुक्ता तान्प्रति प्रहिता क्षिप्ता वह्निहेतिः कार्शानवं शस्त्रमिव। 'इह हि समये मन्देहेषु व्रजन्त्युदवज्रताम्' इति नैषधे। तथा 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः। उदयन्तं सहस्रांशुमभियुध्यन्ति ते सदा॥' इति नैषधवृत्तौ॥

संध्यारागारुणं जैनं पदं प्रातर्व्यराजत।
अपूजि निर्जरैर्भक्तिप्रह्वैः किं कुङ्कुमद्रवैः॥ ९८॥

जिनोऽर्हन् विष्णुश्च तस्येदं जैनं तादृक्पदं विष्णुपदमाकाशं प्रातः प्रभाते संध्यारुणं संध्यारागेण कृत्वा रक्तीभूतं व्यराजत विराजते स्म। उत्प्रेक्ष्यते— भक्त्या सेवाशक्त्या कृत्वा प्रह्वैर्नम्रैर्नमनशीलैर्भूतैर्निर्जरैः सुपर्वभिः कुङ्कुमैर्घुसृणपङ्कैर्द्रवैरपूजि किं पूजितमभ्यर्चितमिव विलिप्तमिव वा॥

प्रातर्दिग्दन्तिनां गङ्गां व्रजतां जलकेलये।
जज्ञे गण्डगलद्बिन्दुवृन्दैर्व्योमारुणं किमु॥ ९९॥

व्योमाकाशमरुणं संध्योल्लसद्रागेण कृत्वा रक्तं जज्ञे जातम्। शोणीबभूवेत्यर्थः। उत्प्रेक्ष्यते—प्रातर्दिनमुखे जलकेलये सलिले क्रीडाकरणार्थं गङ्गामम्बरजम्बालिनीं प्रति व्रजतां गच्छतां दिग्दन्तिनां हरित्कुञ्जराणां गण्डेभ्यः कपोलपालिभ्यो गलद्भिर्निःसरद्भिः

बिन्दुवृन्दैः पद्मनामभिः शोणच्छविमदवारिकणगणैः । 'बिन्दुजालं पुनः पद्मम्' इति हैम्याम् । पञ्चम्यादिदशायां करिणां कपोलेभ्यो रक्तबिन्दवो निःसरन्तीति कविसमयः । 'भूर्जत्वचः कुञ्जरबिन्दुशोणाः' इति कुमारसंभवे ॥

प्रत्यूषे मखभुग्लेखातल्पेभ्यः पतयालुभिः ।
किमास्तीर्णारुणाम्भोजपर्णैः शोणीकृतं नभः ॥ ६० ॥

नभो गगनं शोणीकृतम् अधिकारार्थात्प्रभातसंध्यारागेण पाटलं प्रणीतम् । उत्प्रेक्ष्यते—प्रत्यूषे दिनवदने मखभुजां यज्ञांशभोजिनां लेखा श्रेणी तस्यास्तल्पेभ्यः पल्यङ्केभ्यः पतयालुभिः पतनशीलैरास्तीर्णैः प्रस्तृते अरुणाम्भोजानां कोकनदानां पर्णैर्दलैर्मण्डलैरिव ॥ इति प्रातःसंध्या ॥

अथो पाथोजिनीनाथोऽभ्युदियाय नभोङ्गणे ।
कपोलकुङ्कुमक्लिन्नं प्राच्याः किं कर्णकुण्डलम् ॥ ६१ ॥

अथो संध्यारागानन्तरं नभोङ्गणे आकाशाजिरे पाथोजिनीनां जलजन्मिनीनां नाथः प्राणपतिः सूर्यः अभ्युदियाय उदयाचलचूलायामुद्गमं लभते स्म । उत्प्रेक्ष्यते—कपोलस्य गण्डस्थलस्य पत्रवल्लीं प्रापितेन कुङ्कुमेन घुसृणेन क्लिन्नं व्याप्तम् । 'अयमुदयति घुसृणारुणतरुणीवदनोपमश्चन्द्रः' इति विदग्धमुखमण्डनवचनात् प्राच्या आखण्डलमहिष्याः पूर्वदिशः कर्णस्यैकं कुण्डलं स्फुटं प्रकटं ताटङ्क इव ॥

पूषद्विषं प्रसाद्याम्भोमूर्तिं नित्यानुशीलनैः ।
पद्मिनीभिरभीर्भर्ता पूषाहूतः किमुद्ययौ ॥ ६२ ॥

पूषा भानुमान् उद्ययौ उद्यमालिङ्गति स्म । उत्प्रेक्ष्यते—पद्मिनीभिः कमलिनीभिः प्रेयसीभिर्भर्ता स्वप्राणनाथः । अथ वा पद्मिनीभिररविन्दैर्बान्धवैः सुहृद्भिर्वा निजसुहृद्बन्धुराहूतः । सप्रणयं तादृशस्य पूषद्विषः शंकरस्य नित्यमहर्निशमनुशीलनैः सर्वावसरसावधानताविधानाद्वैतसेवाभिः । जलमूर्तिरीश्वरस्य । यदुक्तम्—'क्षितिजलपवनहुताशनयजमानाकाशसोमसूर्याख्याः । यस्य खलु मूर्तयोऽष्टौ स भवतु भवतां शिवः सिद्ध्यैः ॥' इति कविसमयोक्तिः । प्रसाद्य पूर्वं प्रसन्नीकृत्याभयदानमार्गणसन्मानप्रदानादि सम्यग्वरोपादानपूर्वं संतोष्य ॥

अभ्रमूवल्लभेनेवोत्खातः प्रातर्निखेलता ।
प्राग्गिरेर्गैरिको गण्डोपलो बालारुणो व्यभात् ॥ ६३ ॥

बालारुणोऽर्भकभानुमाली व्यभाद्विभासते स्म । 'जरीजृम्भज्जिम्भद्युमणिविलस–' इति खण्डप्रशस्तौ । तथा 'विश्वव्यापि तमो हिनस्ति तरणिर्बालोऽपि कल्पाङ्कुरो दारिद्राणि गजावलीं हरिशिशुः' इति श्रीचिन्तामणिपार्श्वनाथस्तुतौ । उत्प्रेक्ष्यते—प्रातः प्रभातसमये निखेलता स्वतन्त्रं तटाघातादिक्रीडां कुर्वता अभ्रमूवल्लभेन अभ्रमूनामा हस्तिनी तस्या

भर्त्री । अभ्रमूशब्दो दीर्घोऽपि दृश्यते—यथा 'गजानामभ्रमूपतिः' इति काव्यकल्पलतायाम् । तथा 'अभ्रमूवल्लभारूढं निशाशेषे कदाचन । स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनोरथा ॥' इति पाण्डवचरित्रेऽपि । ऐरावणवारणेन प्राग्गिरेः पूर्वपर्वतस्य गैरिको धातुमयो गण्डोपलः स्थूलपाषाण इवोत्खातः उत्पाद्य क्षिप्तः इव । ऐरावतदन्तावलस्य पूर्वस्या दिशो दिग्गजत्वात्प्राग्गिरेरिति कथनं युक्तिमत् ॥

द्यावाभूमी पराभूष्णुं भूच्छायामरवैरिणम् ।
भेत्तुं व्यमोचि चण्डांशु चक्रं किं चक्रपाणिना ॥ ६४ ॥

चक्रपाणिना नारायणेन । उत्प्रेक्ष्यते—चण्डास्तीक्ष्णा रुद्रा वा अंशवः किरणा यस्य सूर्यरूपं वा । अथ वा चण्डं भयकारि अंशु शीघ्रगामि । 'अंशुः सूत्रादिसूक्ष्मांशे किरणे चण्डदीधितौ' इत्यनेकार्थः । शीघ्रगामिनि वाच्यलिङ्गः । शैघ्र्येऽपि तत्र क्लीबम् । चक्रं सुदर्शनं नाम स्वरथाङ्गं व्यमोचि मुक्तमिव । किं कर्तुम् । द्यावाभूम्योर्दिवस्पृथिव्योर्नभोभुवोः पराभूष्णुमभिभवनशीलं भूच्छायमन्धकारमेवामरवैरिणं दानवं भेत्तुं विदारयितुं हन्तुम् ॥

कण्ठपीठीलुठत्प्राणरथाङ्गाह्वविहायसाम् ।
जीवातुर्यमुनाबीजी व्यरचीव विरञ्चिना ॥ ६५ ॥

विरञ्चिना ब्रह्मणा यमुनायाः कालिन्द्या बीजी जनकः । 'वप्ता तु जनकस्तातो बीजी जनयिता पिता' इति हैम्याम् । 'सहस्ररश्मिर्यमुनाकृतान्तजनकः प्रद्योतनस्तापनः' तथा 'यमुना यमभगिनी कालिन्दी सूर्यजा यमी' इति द्वितयमपि हैम्याम् । उत्प्रेक्ष्यते—जीवातुर्जीवनौषधमिव व्यरचि विहितम् । केषां कण्ठपीठ्यां गलकन्दले । 'जयत्युदरनिःसरद्रसराजपीठीपठचतुर्मुखमुखावलीरचितसामनामस्तुतिः' इति चम्पूकथायाम् । 'वंशिकवक्रोष्ठिककान्यकुब्जपीठानि' इति लिङ्गानुशासने स्त्रीक्लीबलिङ्गयोः । पीठं पीठी च । लुठन्तः वियोगातिव्यथाव्याकुलतया निर्गमनायागच्छन्तः प्राणा असवो येषाम् । कण्ठगतजीवितानामित्यर्थः । तादृशानां रथाङ्ग इति आह्वा नाम येषाम् । 'चक्रवाको रथाङ्गाह्वः कोको द्वन्द्वचरोऽपि च' इति हैम्यां रथाङ्गशब्देन चक्रमुच्यते तन्नाम्नां विहायसां पक्षिणां चक्रवाकविहङ्गमानां जीवनस्य भेषजमिव । 'विहायो व्योमपक्षिणोः' इत्यनेकार्थः ॥ इति सूर्योदयः ॥

शोणी दीप्तिर्दिनेशस्याधात्कुमारितरा श्रियम् ।
कोकैर्दुःखानलज्वाला किमुद्गीर्णाः सुहृत्पुरः ॥ ६६ ॥

दिनेशस्य दिवसनायकस्य भानोः दीप्तिः कान्तिः श्रियं शोभामधाद्धरते स्म । किंभूता । कुमारितरा बाला । प्रथमोत्पन्ना । अतिशयेन कुमारी कुमारितरा । 'ह्रस्वो वा' इति सारस्वतसूत्रेण तरतमयोः परयोः सतोर्वा ह्रस्वः । अत एव किंभूता । शोणी अत्यन्तारुणा । 'रचयति रुचिः शोणीमेतां कुमारितरा रवेः' इति नैषधे । उत्प्रेक्ष्यते—

कोकैश्चक्रवाकैर्विहंगमैः सुहृदः स्वमित्रस्य भास्करस्य पुरोऽग्रे दुःखरूपानलस्य सकलशर्वरीपरस्परवियोगसंजातासाततीव्रज्वलनज्वाला इवोद्गीर्णाः हृदयवदनाद्बहिरुद्वान्ता इव ॥

निजानुरागिणीर्वीक्ष्य दारान्स्मेरसरोजिनीः ।
किमुद्गीर्णोऽरुणज्योतीरागो राजीवबन्धुना ॥ ६७ ॥

राजीवबन्धुना अरविन्दसुहृदा सूर्येण अरुणमतिरक्तं यज्ज्योतिः कान्तिः एव रागो हृदयोदयदनुरागोऽनुरतिरुद्गीर्णः प्रकटीभूतः । किं कृत्वा । स्मेरा विकसिताननसरोजाः सरोजिनीः पद्मिनीर्दारान् निजप्रेयसीः । निजे आत्मनि विषयेऽनुरागोऽस्त्यासामित्यनुरागिण्यस्ताः सानुरागा वीक्ष्य व्यालोक्य ॥

हरिव्यापादितध्वान्तकुम्भिकुम्भसमुद्भवैः ।
रक्तै रक्तीकृता शङ्के प्रभा भाति स्म भानवी ॥ ६८ ॥

भानोरियं भानवी सूर्यसंबन्धिनी प्रभा अर्थात्कुमारीकान्तिर्भाति स्म शुशुभे । तत्राहमेवं शङ्के वितर्कयामि । हरिणा भानुना केसरिणा च व्यापादिता कराग्रनिशितनिस्त्रिंशोद्धुरधाराविदारिता ध्वान्ता अन्धकारा एव कुम्भिनः श्यामवर्णत्वादन्धकारसाधारणा वारणाः। यत उक्तम्—'दूरतया स्थूलतया श्यामतया गन्धलोलुपैर्मधुपैः । धावितमिभराजधिया तत्त्वधिया चाग्रतो महिषः ॥' इति । प्रायोऽधुना कृष्णवर्ण एव दन्तिनो दृश्यन्ते । तेषां कुम्भेभ्यः शिरःपिण्डेभ्य उद्भव उत्पत्तिर्येषां तादृशै रक्तै रुधिरै रक्तीकृता शोणा निर्मितेव ॥

कान्तागमे धृताताम्राम्बरा इव दिगङ्गनाः ।
बन्धूकबन्धुरैर्ब्रध्नभवैर्भान्ति प्रभाभरैः ॥ ६९ ॥

बन्धूकवद्बन्धूककुसुमानीव 'विपोहरिया' इति लोकप्रसिद्धानि । बन्धुरैः शोणिम्ना सुन्दरैः ब्रध्नाद्भानोर्भवैरुत्पन्नैः प्रभाभरैः कान्तिकलापैर्दिगङ्गना आशावशा भान्ति विराजन्ते। उत्प्रेक्ष्यन्ते—कान्तस्य स्वभर्तुः सूर्यस्यागमे समागमनसमये । 'दिशो हरिद्भिर्हरितामिवेश्वरः' इति रघुवंशे । धृतानि परिहितान्याताम्राणि सामस्त्येन शोणान्यम्बराणि वासांसि याभिः एतादृश्य इव ॥ इत्यरुणतरुणप्रभा ॥

द्रुमद्रोणिषु संचिन्वन्नुल्लसन्पल्लवानिव ।
तन्वन्निव तटाकेषु निन्दन्कोकनदश्रियम् ॥ ७० ॥
कुर्वन्निव गिरेः शृङ्गे गैरिकावनिविभ्रमम् ।
ताम्बूलश्रियमास्येषु दिग्वधूनां दिशन्निव ॥ ७१ ॥
सीमन्तेषु मृगाक्षीणां सिन्दूरं पूरयन्निव ।
प्रातः प्रस्तारयन्भाति भानुमान्भानुविभ्रमम् ॥ ७२ ॥

भानुमान् किरणमाली सूर्यः प्रातः वासरवदने भानूनां निजार्भकप्रभाणां विभ्रमं शोभां विलासं वा प्रस्तारयन् विस्तारयन् भाति विभ्राजते । द्रुमाणां तरूणां द्रोणिषु । 'द्रोणी द्रोणिरिदन्तः श्रेण्यामपि' इत्यनेकार्थावचूर्णिः । भानुविभ्रमं विस्तारयन्निति सर्वत्र योज्यते । उत्प्रेक्ष्यते—उल्लसतः स्फुरतः विकसतो वा पल्लवान्प्रवालान्संचिन्वन्नुपचयं बाहुल्यं प्रापयन्निव । तथा तटाकेषु पद्माकरेषु । उत्प्रेक्ष्यते—कोकनदानां रक्तोत्पलानां श्रियं लक्ष्मीं तन्वन्विस्तारयन्निव बहूनि कोकनदानि कुर्वन्निव । तथा । गिरेः पर्वतस्य शृङ्गे शिखरे । उत्प्रेक्ष्यते—गैरिकावने रक्तधातुभूमेर्विभ्रमं भ्रान्तिं कुर्वन्निव विरचयन्निव । पुनर्दिग्वधूनां दशदिगङ्गनानां आस्येषु वदनेषु । उत्प्रेक्ष्यते—ताम्बूलश्रियं दिशन्ददान इव । ताम्बूले चर्विते वाधरादौ रक्तिमा भवेत् । पुनर्मृगाक्षीणां त्रस्तसारङ्गीदृशां सीमन्तेषु केशपाशवर्त्मसु । उत्प्रेक्ष्यते—सिन्दूरं शृङ्गारभूषणं पूरयन् सिन्दूरेण भरन्निव इति लोहितलक्ष्मीविलसितं सिद्धान्ते । 'कुङ्कुमखवियच्च जीवलोपे' इति सूर्यस्याभ्युदयसमये कान्तिरप्यतीव रक्ता स्यादिति । त्रिभिर्विशेषकम् ॥ इति सूर्यप्रभाप्रस्तारः ॥

प्रारेभे भानुना व्योम्नि क्रमाच्चङ्क्रमणक्रमः ।
विश्वविश्वंभराभोगं प्रेक्षितुं किमु काङ्क्षता ॥ ७३ ॥

भानुना मार्तण्डेन व्योम्नि गगनाङ्गणे क्रमादनुक्रमेण चङ्क्रमणक्रमः गमनस्यानुक्रमः परिपाटी चङ्क्रमणकलितः क्रमः प्रारेभे पादाः प्रारेभिरे । अथ वा चङ्क्रमस्य क्रम आनन्तर्यनिरन्तरत्वं विश्रामरहितत्वेन गन्तुं प्रारभतेत्यर्थः । 'क्रमः कल्पाङ्घ्रिशक्तिषु परिपाट्याम्' इत्यनेकार्थः । 'परम्परायां पादक्षेपे आनन्तर्ये पदसंधावपि क्रमः' इत्यनेकार्थावचूरिः । उत्प्रेक्ष्यते—विश्वस्य जगतः अथ वा विश्वस्याः समग्राया विश्वंभरायाः वसुंधरायाः आभोगं विस्तारं प्रेक्षितुं द्रष्टुं काङ्क्षता किमु वाञ्छतेव ॥ इति दिनोदयः ॥

आसाद्य दर्शनं तस्याः शासनस्वर्गिसुभ्रुवः ।
व्यरंसीद्ध्यानतः सूरिर्योगीव परमात्मनः ॥ ७४ ॥

सूरिर्हीरविजयसूरीन्द्रो ध्यानतः सूरिमन्त्रजापतः प्रणिधानाद्व्यरंसीद्विरमते स्म । किं कृत्वा । तस्याः पूर्वोक्तसर्वाङ्गवर्णनागमनादिव्यतिकरायाः शासनदेवतायाः दर्शनं प्रत्यक्षावलोकनमासाद्य अधिगत्य । साक्षात्समीक्ष्येत्यर्थः । क इव । योगीव । यथा योगसाधको जितेन्द्रियो ध्यानविधानैकतानः परमात्मनः परमात्मस्वरूपस्य दर्शनं प्राप्य विरमति । ध्यानं कुर्वाणा योगीन्द्रा हृदि परमात्मानमालोक्य ध्यानाद्विरमन्ते । यथा 'योगं स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम' इति कुमारसंभवे ॥

सूरीन्दुर्वसतेर्मध्ये ध्यानस्थानादथागमत् ।
प्राग्गिरेः कन्दरक्रोडाद्भास्वानिव नभोङ्गणम् ॥ ७५ ॥

अथ शासनदेवतागमनप्रश्नकथनध्यानविरमणानन्तरं सूरीन्दुर्हीरविजयसूरिचन्द्रो ध्यानस्थानात्प्रणिधानविधानास्पदाद्वसतेरुपाश्रयस्य मध्ये उत्सङ्गे आगमदागतः । क इव ।

भास्वानिव । भानुमाली यथा प्राग्गिरेः प्राचीनपर्वतस्य कन्दरस्य । कन्दरशब्दस्त्रिलिङ्गे । 'पिठरप्रतिसरपात्रकन्दराः' इति लिङ्गानुशासने । क्रोडात् हृदयात् । मध्यादित्यर्थः । अथ वा क्रोडादुत्सङ्गान्नभोङ्गणं गगनाजिरे समागच्छति ॥

प्रीतिप्रह्वैः प्रभुस्तत्र परिवव्रे व्रतिव्रजैः ।
सुनासीर इवास्थानीमासीनः स्वर्गिणां गणैः ॥ ७६ ॥

तत्र मौलोपाश्रये प्रभुः सूरीश्वरः प्रीत्या प्रमोदेन गुरुशिष्यस्नेहेन धर्मस्य हार्देन प्रह्वैर्नम्रीभूतैः पदाम्भोजे भ्रमरीभावं प्राप्तैर्व्रतिव्रजैः श्रमणपुङ्गवगणैः परिवव्रे परिवृतः । क इव । सुनासीर इव । यथा आस्थानीं सुधर्माभिधानां सभामासीन आश्रित्य तिष्ठन् । उपविष्ट इत्यर्थः । सहस्रलोचनः स्वर्गिणां गीर्वाणानां गणैर्वृन्दैः परिव्रियते ॥

तत्रागमन्पत्तनादिसंघास्तं वन्दितुं तदा ।
स्वर्गादिदेवाः समवसरणस्थं यथा जिनम् ॥ ७७ ॥

तत्र डीसाभिधे नगरे पत्तनमणहिल्लपुटभेदनमादिर्येषां तेषां नगराणां संघाः श्राद्धगणास्तं ध्यानोत्थितं सूरिं वन्दितुं नमस्कर्तुमागमन्नागच्छन्ति स्म । यथा इवार्थे । के इव । देवा इव । यथा स्वर्गो देवलोक आदिः प्रथमं येषां तेषां भवननगरज्योतिर्विमानानां देवा भवनपतिवानमन्तरज्यौतिष्कद्वादशकल्पवासिनः सुराः समवसरणे तिष्ठतीति समवसरस्थस्तं जिनं तीर्थंकरं नमसितुमायान्ति ॥

प्रबोधयन्सुदृक्पद्मान्कुदृक्पङ्कांश्च शोषयन् ।
स्पर्धयेव रवेः सूरेः प्रतापो व्यानशे दिशः ॥ ७८ ॥

सूरेर्हीरविजयवाचंयमेन्दोः प्रतापो दिशो दशापि हरितः प्रति व्यानशे व्याप्नोति स्म । उत्प्रेक्ष्यते—रवेः सूर्यस्यार्थान्मार्तण्डचण्डप्रतापस्य स्पर्धया संघर्षेण मनस्यसूयया वा । किं कुर्वन् । सुदृशः सम्यक् दृष्टय एव पद्माः कमलानि प्रबोधयन् प्रतिबोधबन्धुरान् विदधत् । सुदर्शनिनः कुर्वन् । सूर्योऽपि पद्मानि प्रबोधयति विकाशयति । च पुनः किं कुर्वन् । कुत्सिताः शाक्यादिमतोपादानपटलसंवलिता दृशः दृष्टयो येषां सिद्धान्तविरुद्धवादित्वाद्दुष्टा दृष्टयो येषां ते कुदृशः कुवादिनः कुमतान्येव पङ्काः कर्दमास्तान् शोषयन् निष्ठापयन् । सूर्योऽपि पङ्कं शोषयति ॥

प्रतिक्रम्य चतुर्मासीं स क्रमाद्व्यहरत्ततः ।
हर्षाद्वर्षा इवोल्लङ्घ्य मानसादिष्टमानसः ॥ ७९ ॥

स सूरिः क्रमादनुक्रमेण विजयदशमीदीपालिकादिनगमनपरिपाट्या चतुर्णां मासानां समाहारश्चतुर्मासी वार्षिकचतुर्मासिकम् । अथ वा वर्षा शरल्लक्षणयोर्द्वाभ्यां मासाभ्यां कृत्वा चतुर्मासी, तां प्रतिक्रम्य । एतावता कार्तिकचतुर्मासिकप्रतिक्रमणं प्रणीय चतुर्मासीं पूर्णीकृत्य वा ततस्तस्माड्डीसानगराद्व्यहरत् विहारं कृतवान् । इत्यर्थः । क इव ।

इष्टमानस इव। यथा इष्टमानसो राजहंसः वर्षा वर्षासमयमुल्लङ्घ्य मानसात् स्वावासकासारतः हर्षादानन्दाद्विहरति पृथिवीपीठपानीयप्रपूर्णानेकपङ्कजनिकुञ्जमञ्जुलजलाशयेषु स्वैरं विहरति। 'नृपमानसमिष्टमानसः' इति नैषधे॥

क्रमेणाहम्मदाबादपुरे सूरिः समीयिवान्।
नभोनीरधिवर्णिन्याः प्रतीरे सुप्रतीकवत्॥ ८०॥

सूरिर्हीरगुरुः क्रमेण ग्रामानुग्रामादिविहारपरिपाट्या अहम्मदाबाद इति नाम यस्य तादृशे पुरे नगरे समीयिवान् समाजगाम। किंवत्। सुप्रतीकवत्। यथा ईशानविदिक्संबन्धी अष्टमः सुप्रतीकनामा ककुप्कुञ्जरः नभस आकाशस्य नीरधेर्जलराशेर्वरवर्णिनी पत्नी। 'वशा सीमन्तिनी वामा वर्णिनी महिलाबला' तथा 'कर्षुर्द्वीपवती समुद्रदयिता धुन्यौ स्रवन्ती सरः' इति द्वितयमपि हैम्याम्। एतावता आकाशगङ्गा। 'नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे' इति रघुवंशे। तस्याः प्रतीरे तटे। 'तटं तीरं प्रतीरं च' इति हैम्याम्॥

देवीनिगदितागण्यभाग्यसौभाग्यशालिनः।
स्वस्यान्तेवासिनस्तस्य कम्माङ्गजयतीशितुः॥ ८१॥

सूरीन्दुः कामयांचक्रे दातुं सूरिपदं ततः।
तनूजस्येव राज्यस्य धुरं धात्री पुरंदरः॥ ८२॥ (युग्मम्)

ततोऽहम्मदाबादगमनान्तरं सूरिर्हीरविजयरजनिजानिः स्वस्यात्मनः आत्मीयस्य वान्तेवासिनः समीपे वसनशीलस्य शिष्यस्य कम्मानाम्नो व्यवहारिणः गृहीतव्रतत्वात्साधोर्वा अङ्गजः पुत्रः तथा यतीनां मध्ये ईशिता मुख्यो गीतार्थत्वात्। अथ वा भाविनि भूतोपचारात् निर्ग्रन्थानां नायकः तस्य विमलप्रज्ञांशस्य सूरिपदमाचार्यपदं प्रदातुं कामयांचक्रे अभिलषति स्म। किंभूतस्य। देव्या शासनतरुण्या निगदिते सूचिते कथिते अनण्ये अप्रमेये वाङ्मानसगोचरीकर्तुमशक्ये भाग्यं पुण्यं तथा सौभाग्यं सुभगता विश्ववाल्लभ्यं ताभ्यां शालते शोभते इत्येवंशीलस्य। क इव। धात्रीपुरंदर इव। यथा पृथिवीपुरहूतो राजा तनूजस्य निजनन्दनस्य राज्यस्य स्वसकलमण्डलाधिपत्यधुरं प्रदातुं कामयते॥

प्रक्रमे तत्र तत्रत्यसंघेनागृह्यत प्रभुः।
तमिवाभिनवं सूरिशक्रमन्यं दिदृक्षता॥ ८३॥

तत्र प्रक्रमे तस्मिन्प्रस्तावे तत्रत्येन कमीपुरीयेण संघेन श्राद्धवर्गेण भगवानगृह्यत। अर्थात्सूरिपदप्रदानार्थं प्रभोराग्रहः कृतः। संघेन किं कर्तुमिच्छता। तमिव हीरविजयगणधरमिव अन्यमपरं अभिनवं नवीनं सूरिशक्रं गणभारधुरंधरं दिदृक्षता द्रष्टुमिच्छता॥

ततः स्वाशयसंवादि प्रपेदे तद्वचः प्रभुः।
व्रतव्यतिकरे लौकान्तिकदेवोक्तमाप्तवत्॥ ८४॥

ततः संघाग्रहानन्तरं प्रभुर्हीरविजयसूरिः स्वस्यात्मन आशयमभिप्रायं संवदत्यनुकरोत्येवंशीलं यादृशं गुरुचित्ते तादृश एव संघाग्रह इत्यर्थः । तद्वचः संघवचनं प्रपेदे प्रतिपन्नवान् । किंवत् । आप्तवत् । यथा जिनेन्द्रः व्रतव्यतिकरे दीक्षाग्रहणावसरे लोकस्य पञ्चमकल्पस्य अन्तः प्रान्तोऽवसानं तत्र तमिश्रराजिकान्तरालशालिविमानेषु । अर्चि–अर्चिमालि–वैरोचन–प्रभंकर–चन्द्राभ–सूर्याभ–शुक्राभ–सुप्रतिष्ठाभ–अरिष्टाभिधानेषु भवा लौकान्तिकाः । ते च नवविधाः । यथा—सारस्वत–आदित्य–वह्नि–वरुण–गर्दतो–तुषित–अव्यावाध–आग्नेय–अरिष्टनामानो देवास्तेषामुक्तं कथितमिवाङ्गीकृतवान् ॥

सूरीन्द्रेणाथ दैवज्ञैर्मुहूर्तं निरधार्यत ।
एतन्महोदयस्येव प्रारम्भप्रथमक्षणः ॥ ८५ ॥

अथ संघाग्रहाङ्गीकारानन्तरं सूरीन्द्रेण दैवज्ञैर्मौहूर्तिकैः सार्धं मुहूर्तं दोषादिनिर्मुक्तशुभवासरवेलालग्नं निरधार्यत निश्चीयते स्म । उत्प्रेक्ष्यते—एतस्य जयविमलप्रज्ञांशस्य यो महोदयो महानभ्युदयः तस्य प्रारम्भस्य प्रथम आद्यः क्षणः अवसरः कालविशेषः पञ्चदशलवलक्षणः ॥

शिल्पिभिः कारितः संघैर्मण्डपो यन्मुनीशितुः ।
पट्टश्रियं वरीतुं किं स्वयंवरणमण्डपः ॥ ८६ ॥

संघैः कमीपुरश्राद्धसमुदायैः कर्तृभिः शिल्पिभिर्वैज्ञानिकैस्तद्रचनचातुर्यैः कृत्वा साधनभूतैर्मण्डपो बहुजनाश्रयः कारितो निर्मापितः । उत्प्रेक्ष्यते—जयविमलनाम्नो मुनीशितुर्निर्ग्रन्थनाथस्य पट्टश्रियं वरीतुं सूरिपदलक्ष्मीमुद्वोढुं स्वीकर्तुं किं स्वयंवरणमण्डपः ॥

एतद्व्यतिकरेऽनेककौतुकालोकलालसा ।
त्रिलोकी चित्रदम्भेन मण्डपे किमुपेयुषी ॥ ८७ ॥

एष चासौ व्यतिकरश्च एतद्व्यतिकर आचार्यपदप्रदानावसरस्तस्मिन्ननेकानि कौतुकानि आश्चर्याणि तेषामालोकने लालसा उत्सुका त्रिलोकी भुवनत्रयी चित्राणामालेख्यभावं लम्भितानामर्थात्सुरासुरनागराणां दम्भेन कपटेन कृत्वा । उत्प्रेक्ष्यते—तत्र मण्डपे किमुपेयुषी आगतेव ॥

विस्तीर्णोऽपि स संकीर्णो बभूवानेकनागरैः ।
भाविभट्टारकागण्यपुण्याकृष्टैरिवागतैः ॥ ८८ ॥

स संघजननिर्मापितो विस्तीर्णोऽप्यतिविपुलोऽपि सन् मण्डपो जनाश्रयः अनेकैर्गणनातीतैर्नागरैर्जनपदग्रामसंनिवेशपुरनगरजननिवहैः संकीर्णः अतिलघीयः स्थानमिव बभूव संजातः । किंभूतैर्नागरैः । आगतैः समेतैः दशदिगन्तादपि तत्रोपनतैः । उत्प्रेक्ष्यते—भाविनो भविष्यतो भट्टारकस्य जयविमलसूरेरगण्यैः सुरनरादिभिरपि जेतुमशक्यैः पुण्यैर्भागधेयैराकृष्टैर्वारिकाबद्धानीतैरिव उपायातैः ॥

निशि तारैरिवाकाशो भ्रियमाणः स निर्भरम् ।
तन्महोमिलितै रेजे पौरैर्जानपदैर्जनैः ॥ ८९ ॥

तस्य जयविमलप्रज्ञांशस्य पट्टप्रदानस्य महसि उत्सवे मिलितैरितस्तत आगत्यैकीभूतैः । उत्सववाची महःशब्दः सकारान्तोऽप्यस्ति । यथा—'एनं महस्विनमुपैहि सदारुणोच्चैः' इति नैषधे । नलानलयोर्वर्णने । 'महस्विनं तेजस्विनमनलमुत्सववन्तं च' इति तद्वृत्तिः । तथा 'महस्तेजस्युत्सवे च' इत्यनेकार्थः । पौरैर्नागरैर्जानपदैर्गूर्जरपाञ्चाललाटसौराष्ट्राद्यनेकनीवृज्जन्मभिर्जनैर्लोके निर्भरं निचितं नीरन्ध्रं भ्रियमाणः पूर्यमाणः स मण्डपो भाति स्म । कैरिव । यथा निशि तमिस्रायां रात्रौ तारकैरुपलक्षणान्निखिलज्योतिःसंतानैर्भ्रियमाण आकाशो गगनं भाति । चन्द्रोद्योते च केचिद्दृश्यन्ते, केचिन्न । तमिस्रायां दर्शयामिन्यां तु सर्वेऽपि स्फुटा एव लक्ष्यन्ते, तस्मादत्र तमिस्रा रात्रिरेवोपादीयते नापरा ॥

तीर्थेशितेव समवसरणं श्रमणाग्रणीः ।
श्रमणश्रेणिभिः सार्धमध्यासामास मण्डपम् ॥ ९० ॥

श्रमणानां तत्समयवर्तिनां संविग्नपक्षिणां शुद्धाचारवतां च श्रमणानां साधूनामग्रणीर्मुख्यो हीरविजयसूरिः श्रमणश्रेणिभिः मुनिमण्डलीभिः सार्धं मण्डपमाचार्यपदप्रदानस्थानमध्यासामास । क इव । तीर्थेशितेव । यथा तीर्थनाथः साधुभिः सार्धं समवसरणं धर्मदेशनमन्दिरमध्यास्ते । केनापि महर्धिकेन देवेन दानवेन वा रचितमिति शेषः ॥

पण्डिताखण्डलं श्रीमज्जयाद्यविमलाभिधम् ।
आह्वातुं प्रेषयामास मुनिमुख्यान्मुनीश्वरः ॥ ९१ ॥

मुनीश्वरो हीरभट्टारकः । जयेति पदमाद्यं यस्यास्तादृशी विमलेत्यभिधा नाम यस्य स जयविमलस्तमेव पण्डितेषु कोविदेषु आखण्डल इवाखण्डल इन्द्रस्तमाह्वातुमाकारयितुं मुनिमुख्यान्वाचकादिवाचंयमपुंगवान् प्रेषयामास प्रहिणोति स्म ॥

अयमानीयतामीभिर्मण्डपं पण्डिताग्रणीः ।
उत्तराहैर्गन्धवाहैरम्बुवाहोऽम्बराङ्कवत् ॥ ९२ ॥

अमीभिर्मुनिमुख्यैरयं जयविमलनामा पण्डिताग्रणीः कोविदकुञ्जरः मण्डपं जनाश्रयमानीयत आनीतः । कैरिव । गन्धवाहैरिव । यथा उत्तरस्यां भवैरुत्तराहैः समीरणैः । लोके 'सूरवाय' इति प्रसिद्धैः । अम्बुवाहो जलभरनिर्भरभृतमध्यो धाराधरः अम्बरस्याकाशस्याङ्कमुत्सङ्गमानीयत ॥

प्रभुं बभाज तैः सार्धं साधुभिः साधुसिन्धुरः ।
युवराज इवानल्पैः सामन्तैः पितरं निजम् ॥ ९३ ॥

स साधुसिन्धुरः जयविमलमुनीन्द्रः तैः सूरिप्रहितैर्मुनिपञ्चाननैः सार्धं प्रभुं हीरविजयसूरीश्वरं बभाज आगत्य प्रणम्य सेवते स्म। क इव। युवराज इव। यथा सकलजनपदप्रजाचिन्ताकारकतया स्थापितो नृपकुमारः अनल्पैर्बहुभिः सामन्तैः सीमालभूपालैरनेकमण्डलीकमहीपालैर्वा समं निजं पितरं जनकं सेवते॥

भाविसूरेरभूत्तस्योपाध्यायपदमादितः।
[1]परमावधिवत्साधोरुदेष्यत्केवलश्रियः॥ ९४॥

भविष्यतीत्येवंशीलो भावी स चासौ सूरिश्च तस्य भविष्यदाचार्यस्य आदितः प्रथमं तस्य जयविमलविदुषः उपाध्यायनाम पदमभूद्बभूव। एतावता आचार्यपदादादुपाध्यायपदं प्रदत्तमित्यर्थः। किंभूतम्। परमावधिवत्। यथा उदेष्यन्ती प्रकटीभविष्यन्ती केवलश्रीः केवलज्ञानलक्ष्मीर्यस्य तादृशस्य साधोः श्रमणस्य परममुत्कृष्टं पृथक्परमाणुज्ञानकल्लोकमानमलोकेष्वपि लोकप्रमितासंख्येयखण्डावबोधविधायकमवधिज्ञानं भवति। अथ वा प्रादुर्भविष्यत्केवलमेकाकारं निखिललोकालोकाकाशप्रकाशकं ज्ञानं यस्य तादृग्विधस्य जिनेशितुः तीर्थंकरस्य आदितः संयमग्रहणप्रथमसमय एव तूर्यं चतुर्थं मनःपर्यायसंज्ञं ज्ञानं भवति इति द्वितीयपाठः॥

महामहैस्ततस्तस्य सूरिः सूरिपदं ददौ।
[2]जातवेदाः स्फुरज्ज्योतिर्निकेतनमणेरिव॥ ९५॥

तत उपाध्यायपदप्रदानानन्तरं सूरिर्हीरविजयप्रभुः महामहैरधिकजायमानोत्सवैस्तस्य जयविमलोपाध्यायस्य सूरिपदमाचार्यपदं ददौ। क इव। जातवेदा इव। यथा जातवेदाः कृशानुर्निकेतनमणेर्दीपस्य स्फुरद्देदीप्यमानं ज्योतिस्तेजो दत्ते। अथ वा। क इव। यथा स्नेहप्रियो दीपस्य दशेन्धनस्य तमोपहं भूच्छायभिदुरं निजमात्मीयं ज्योतिर्महो विश्राणयति॥

उज्झित्वा शमिनोऽशेषान्सुरानिव रमा हरिम्।
तं सूरिमुपगच्छन्ती रेजे सूरिपदेन्दिरा॥ ९६॥

तं नवं प्रत्यग्रं जयविमलनामानं सूरिमुपगच्छन्ती समायान्ती सूरिपदेन्दिरा आचार्यपदलक्ष्मी रेजे विराजते स्म। किं कृत्वा। उपगच्छन्ती अशेषान् समस्तान् तदभिलाषुकान् परान् शमिनो वाचकप्रज्ञांशप्रमुखान् मुनीनुज्झित्वा संत्यज्य। केव। रमेव। यथा समग्रान् सुरासुरानौज्झ्य हरिं नारायणमुपयान्ती मन्दरमन्थानकमथनसमये क्षीरपाथोधिपाथोवेलासमुत्थितसर्वाङ्गीणलक्ष्मीसमुल्लसल्लक्ष्मी राजते। किंच 'देवेन श्रुतममृतमथनावसरे सुरासुरकरपरिवर्त्यमानमन्दरमन्थानकनिर्घोषबधिरितसमस्तरोदःकन्दराद्दिवापि दूरोच्छलितदुग्धतुषारासारतारकितनभसः समुत्पन्नानेककौस्तुभादिवस्तु-

---

१. 'उदेष्यत्केवलस्येव तुर्यं ज्ञानं जिनेशितुः' इति पाठान्तरम्. २. 'प्रदीप इव दीपस्य निजज्योतिस्तमोपहम्' इति पाठान्तरम्.

विस्तारादुद्गच्छदप्सरसां मुखमण्डलैः क्षणमिव विहितविकचनलिनशोभादनेकाश्चर्यकुक्षेः क्षीरसागरात् अजनि जनितजगद्विस्मया स्मरजननी हस्तस्थिततरुणारविन्दा देवी देदीप्यमाना पुण्यलक्ष्मीर्यस्याः सर्वाङ्गलावण्यमधुं विकचलोचनकचैरापीय पीयूषभुजो मदनमदपरवशाः परस्परमवेर्ष्यन्तश्चक्रुश्चक्रपाणिना समं संगरम् । अथ सर्वानप्यन्तरान्तरापततस्तानुल्लङ्घ्य मन्दरगिरिशिखरशातकुम्भनिकषोपलायमानबाहोर्भगवतश्चिक्षेप । क्षेपीयः कण्ठे वैकुण्ठस्य स्वयंवरकुसुममालिकाम्' इति चम्पूकथायाम् ॥

तस्य पूरयतो विश्वकामांश्चिन्तामणेरिव ।
श्रीमद्विजयसेनेति सूरिराजोऽभिधां व्यधात् ॥ ९७ ॥

सूरिराजो हीरविजयसूरीन्द्रस्तस्य जयविमलसूरेः श्रीमान् विजयसेन इत्यभिधां नाम व्यधाच्चकार । तस्य किं कुर्वतः । विश्वेषां जगज्जनानां कामान्मनोभिलषितान् पूरयतः पूर्णान् सृजतः । कस्येव । चिन्तामणेरिव । यथा देवमणिः सर्वान्कामान् संपूरयति ॥

किंनर्य इव नागर्यो जगुर्गीतिं पिकीक्कणाः ।
संगीतं तेनिरे नाकिकुमारा इव नर्तकाः ॥ ९८ ॥

नागर्यो नागराङ्गनाः किंनर्यः किंपुरुषयोषित इव गीतिं गानं जगुर्गायन्ति स्म । किंभूताः । पिकीनां कोकिलानामिव क्कणः पञ्चमसूचकालापनमधुरध्वनिर्यासां तथा नर्तका नटा नाकिनां देवानां कुमारा इव संगीतं प्रेक्षणकनिमित्तप्रयुक्तगीतनृत्यवाद्यत्रयम् । अथ वा प्रेक्षणकं नाटकमेव तत्तेनिरे चक्रिरे ॥

त्रिलोकीमपि कुर्वाणं तत्र चित्रीकृतामिव ।
नेत्रश्रोत्रसुधास्पन्दि तौर्यत्रिकमजायत ॥ ९९ ॥

तत्र व्यतिकरे नेत्राणां लोचनानां श्रोत्राणां श्रवणानां च मध्ये सुधाममृतरसं स्पन्दते क्षरति सिञ्चतीत्येवंशीलं तादृशं तौर्यत्रिकं गीतनृत्यवाद्यत्रयमजायत जातम् । किं कुर्वाणम् । त्रिलोकीं विश्वत्रयीमपि चित्रीकृतामालेख्यलिखितामिव कुर्वाणं विदधानम् ॥

तत्रास्ति श्राद्धमूर्धन्यः श्राद्धो मूलाभिधः सुधीः ।
सौन्दर्यधर्मदार्ढ्याभ्यां कामदेव इवापरः ॥ १०० ॥

तत्राहम्मदाबादनाम्नि राजनगरे श्राद्धेषु श्रीमत्तया पक्षश्रावकवर्गेषु मूर्धन्यः शेखरः श्राद्ध आस्तिकः मूल इत्यभिधा नाम यस्य मूलकश्रेष्ठिनामा सोऽस्ति विद्यते । किंभूतः । सु शोभना जिनधर्मानुगामिनी दानादिधर्मेषु धीर्बुद्धिर्यस्य सः । उत्प्रेक्ष्यते— सौन्दर्येण वपुःप्रेयरूपकेण तथा धर्मेण पुण्यकृत्येषु दृढाशयतया च अपरोऽन्यः कामदेव इव । शरीररमणीयतया अपरः कन्दर्पदेव एकः सुस्मरो विद्यते । अपरस्त्वयं तत्तुल्यत्वेन तथा धर्मकर्तव्यदार्ढ्येन महावीरभगवतः द्वितीयश्रावकः कामदेवनामा यादृक्षोऽभूत्तादृगेवायमप्यास्ते ॥

जृम्भकव्रजवज्जन्मोत्सवे शंभोर्वणिग्वरः ।
ववर्ष वसुधाराभिस्तस्य सूरिपदक्षणे ॥ १०१ ॥

वणिग्वरः समयनैगमगणेष्वग्रणीः मूलाख्यश्रेष्ठी तस्य विजयसेनसूरेराचार्यस्य यत्पदं तस्य क्षणे प्रदानस्य महोत्सवे वसुधाराभिः सुवर्णरूप्यमाणकश्रेणिभिर्ववर्ष वर्षति स्म । सुवर्णरूप्यकमहमुन्दिनाणकैः प्रभावनां कृतवानित्यर्थः । किंवत् । जृम्भकव्रजवत् । यथा शंभोस्तीर्थंकरस्य जिनेन्द्रस्य जन्मोत्सवे जननमहामहे सौधर्मेन्द्रादिष्टधनदलोकपालानुज्ञया वैश्रवणसेवकस्तिर्यक्जृम्भवकगीर्वाणगणो हिरण्यस्वर्णरजतरत्नवस्त्रवासचूर्णपुष्पफलादिवृष्टिं कुर्वन्ति ॥

तस्मिन्विनिहितं सूरिपदं सूरिसितांशुना ।
दिदीपे भास्वता ज्योतिरिव सायं धनंजये ॥ १०२ ॥

तस्मिन्विजयसेनाभिधाने व्रतीन्द्रे सूरिसितांशुना हीरविजयसूरिसुधामरीचिना सूरेराचार्यस्य पदं विनिहितं स्थापितं सद्दिदीपे दीप्यते स्म । किमिव । ज्योतिरिव । यथा भास्वता दिवाकरेण सायं संध्यासमये धनंजये वैश्वानरे विनिहितं ज्योतिर्नक्तमतीव दीप्यते । वासरे तादृशी दीप्तिर्न भवति यादृशी निशायां दीप्रा दीप्तिर्भवति । प्रसिद्धं चैतत् । किं चास्तं व्रजन्नम्भोजिनीवल्लभो धूमध्वजे स्वतेजोऽवस्थाप्य गच्छति प्रातरागतश्च गृह्णातीति कविसमयः । तथा रघुवंशे—'दिनान्ते निहितं तेजः सवित्रेव हुताशनेः' इति ॥

शोभामुभौ लभेते स्म श्रीमत्सूरिपुरंदरौ ।
प्रणिघ्नन्तौ तमःस्तोमं सूर्याचन्द्रमसाविव ॥ १०३ ॥

श्रीमन्तौ गणनायकैश्वर्यलक्ष्मीकलितौ यशःशोभाभास्वरौ सूरिपुरंदरौ हीरविजयसेनाभिधाचार्यबिडौजसौ उभौ द्वावपि शोभां कीर्तिं ख्यातिं लभेते स्म आसादयामासतुः । किंभूतौ । तमसामज्ञानानां दुरितानां वा स्तोमं समूहं प्रणिघ्नन्तौ व्यापादयन्तौ । काविव । सूर्याचन्द्रमसाविव । यथा दिवाकरनिशाकरौ तमःस्तोममन्धकारनिकरं मूलादुच्छिन्दतौ शोभां भुवने प्रसिद्धिं लभेते ॥

वनीमिवावनीं सूरिशक्रौ चङ्क्रमणैः क्रमात् ।
मधुराधाविव मासौ शोभां लम्भयतः स्म तौ ॥ १०४ ॥

तौ हीरविजयविजयसेननामानौ सूरिशक्रौ आचार्यपर्जन्यौ क्रमादनुक्रमेण चङ्क्रमणैर्विहरणैः विहारक्रमेण अवनीं मेदिनीमण्डलं शोभां श्रियं लम्भयतः स्म प्रापयामासतुः । काविव । मधुराधाविव । यथा मधुश्चैत्रः, तथा राधो वैशाखः । 'चैत्रे मधुश्चैत्रकश्च वैशाखे राधमाधवौ' इति हैम्याम् । एतावता वसन्तर्तुसंबन्धिनौ चैत्रवैशाखमासौ क्रमादनुक्रमतः प्रथमं चैत्रः पत्रपुष्पमञ्जरीकलिकाफलोदयोन्मुखान्कुरुते । ततो वैशाखमासः

परिणतफलमण्डलकलितान् सालमण्डलान् विदधाति इत्यनुक्रमः। चङ्क्रमणैर्निजागमनैः कृत्वा वनीमुद्यानवीथीं वनमालां लम्भयतः। 'स्ववनीसंप्रवदत्पिकापि का'॥ इति ध्यानोत्थानाकमिपुरागमनाचार्यपदस्थापनम्॥

कोऽपि मेधाविमूर्धन्यो लुम्पाकानां मते तदा।
मेघजी ऋषिरित्यास्ते नाम्नामेध्ये मणिर्यथा॥ १०५॥

तदा तस्मिन्नवसरे लुम्पाकानां 'लउका' इति नाम्ना प्रसिद्धानां मते पक्षे मेघजी इति नाम्ना कोऽपि कश्चिदृषिः तन्मतवेषधारकः आस्ते विद्यते। किंभूतः। मेधाविनां बुद्धिमतां पण्डितानां वा मध्ये मूर्धन्यो मुकुटायमानः प्रज्ञालचूडामणिः। क इव। मणिरिव। यथा इवार्थे। यथा अमेध्ये अशुचिस्थाने रत्नं मणिर्भवति॥

ऋषिः कुअरजीनामा तं लुम्पाकमतप्रभुः।
पल्लीपतिर्यथा वङ्कचूलं निजपदे व्यधात्॥ १०६॥

लुम्पाकानां मतस्य प्रभुः स्वामी भारवाही कुअरजीनामा ऋषिः लुम्पाकवेषभूतं मेघजीऋषिं निजपदे स्वस्थाने व्यधात्स्थापयति स्म। यथा इवार्थे। क इव। पल्लीपतिरिव। यथा पल्लीपतिः पित्रातीवान्यायकारित्वात्कुपितेन स्वदेशात्प्रवासितं स्वपल्लीप्राप्तं नितरां क्रूरानीतिकारकत्वेन स्वस्थानोचितं पुत्राभावाद्वङ्कचूलं नाम राजपुत्रं निजपदे निधत्ते स्म। अथ वा रतिकलहकुपितपराङ्मुखभवनापरस्थानस्थचौरिकार्थागततदङ्गरङ्गस्पर्शनातिस्मरपरवशीभूतस्ववशाप्रार्थनाप्रक्रमनिर्व्यूढनिष्कलङ्कशीलव्रतदर्शनाह्लादितकेशववसुधावासवः स्वपदे युवराजपदे स्थापितवान्वङ्कचूलं नृपनन्दनम्॥

सिद्धान्तानेष निध्यायन्कदाचित्तत्वचक्षुषा।
प्रतिमामार्हतीं चित्रवल्लीं चाष इवैक्षत॥ १०७॥

एष मेघजीऋषिः कदाचित्कस्मिन्नपि प्रस्तावे। सिद्धान्तानां चाराङ्गाद्यङ्गोपपातिद्युपाङ्गप्रमुखानागमान्निध्यायन् विलोकमानः सन् तत्वचक्षुषा शुद्धमनोनयनेन कृत्वा अर्हतां तीर्थकृतामियमार्हती तां भगवत्प्रतिमां ऐक्षत विलोकते स्म। क इव। चाष इव। यथा नीलचाषः चित्रवल्लीमीक्षते। किं कुर्वन्। ध्यायन् पश्यन्। कान्। आ सामस्त्येन गमो गमनमुपलक्षणादागमं गमागमौ येषु त आगमाः भूमीप्रदेशाः तान्। 'चित्रकवल्लीं चाषः' इति सूत्रोक्तेः॥

लुम्पाकानां मतात्तस्मादिव कारानिकेतनात्।
निर्गन्तुं कामयामास स ततो मेघजीमुनिः॥ १०८॥

ततो जिनप्रतिमाक्षरदर्शनानन्तरं स मेघजीमुनिस्तस्माल्लुम्पाकमतान्निर्गन्तुं निःसर्तुं कामयामास काङ्क्षति स्म। कस्मादिव। कारानिकेतनादिव। यथा कश्चिज्जनः न्यायेन वा अन्यायेन न्यायेऽप्यन्यायीकृत्य वैरिबाहुल्यादिति न्यायात्। चारके नृपा-

दिना क्षिप्तः स तस्माद्वन्दिमन्दिरात् प्रपञ्चचातुर्येण कृत्वा निर्गन्तुं कामयते। इति मेघजीमुनेः प्रतिमाक्षरदर्शनात्प्रतिबोधः ॥

तन्मताधिकृतान्वेषधरान्वागुरिकानिव ।
पाशे पातयतो मुग्धान्मृगानिव विवेद सः ॥ १०९ ॥

स मेघजीमुनिस्तस्य लुम्पाकस्य यन्मतं पक्षस्तत्राधिकृतोऽङ्गीकृतो यो वेषो विरुद्धसाधुलिङ्गं धरतीति तन्मतस्याधिकारिणो वेषधरा वा केवललिङ्गधारकास्तान् लुम्पाकान् वागुरिकान् वागुरा मृगजातिलकामृगादिजन्तुग्रहणपाशोऽस्त्येषामिति वागुरिकाः । अस्त्यर्थे इकः । 'अइके मत्वर्थे' इति सारस्वतेन । तान् जालिकानिव विवेद हृदि जानाति स्म । किं कुर्वतः । मृगान् हरिणानिव मुग्धानभिज्ञान् तत्त्वातत्त्वविचारणाचतुरेतरान् जनाञ्जन्तून् पाशे पाशसदृशे कुमते पातयतः क्षेपयतः । तथात्रापि कोऽपि मुग्धः प्रतिभाप्रागल्भ्यनिर्मुक्तो न किमपि कपटचर्यादिकं वेत्तीति तादृगज्ञः केनापि धूर्तेन वाग्बन्धादिप्रदानेन विमोह्य स्वीकृतो लोकैः पाशे पातितेऽसौ विमुच्यते ॥

अमी वीङ्खां प्रकुर्वन्ति बका इव शनैः शनैः ।
सतां सम्यग्दृशो हन्तुं काङ्क्षन्तः शफरीरिव ॥ ११० ॥

अमी लुम्पाकवेषधारका बका बकोटा इव शनैः शनैर्मन्दं मन्दमालोक्यालोक्य मुग्धविप्रतारणबुद्ध्या वीङ्खां गमनं प्रकुर्वन्ति पादौ विमुञ्चन्ति । उत्प्रेक्ष्यते—सताम् अस्मासु श्रावकत्वं नाम्ना विद्यते परं तत्त्वं सम्यक्तया न विद्मः तेषां श्राद्धानां सतां परं मुग्धानां सम्यग्दृशः सत्यज्ञानदृष्टी। सम्यक्त्वानीत्यर्थः । हन्तुं व्यापादयितुं भ्रंशयितुमिव काङ्क्षन्तः इच्छन्तः । का इव । शफरीरिव । यथा बकाः शफरीर्मत्स्यीर्हन्तुं स्पृहयन्तः शनैर्हिण्डन्ते ॥

विगोपनमिवैतेषां वेषं वेषभृतामवैत् ।
तन्मतस्थं पुनर्मेने सौधं कूपगतं निजम् ॥ १११ ॥

स मेघजीऋषिरेतेषाममीषां कलिकालविलसितेन महावीरदेवशासनेऽपि कण्टकप्राचुर्याद्बहुभूतानां लुम्पाकानां वेषभृतां जैनाभासलिङ्गधारिणां वेषं लिङ्गं विगोपनमिव विडम्बनाप्रायमवैत् मनसि बुबुधे । पुनः स मेघजीमुनिः तेषां लुम्पाकानां मते पक्षे तिष्ठतीति तन्मतस्थं निजमात्मानं सौधं कूपगतमिवेत्यध्याहारः । बह्वन्धकारकलितपातालावटमध्यनिष्पतितमिव मेनेऽज्ञासीत् । इति गर्भितोपमा ॥

आप्तोक्तिरत्नगर्भायाममीषां प्रतिमार्हताम् ।
निधिकुम्भीव दुःस्थानां पथिकी नाभवद्दृशोः ॥ ११२ ॥

आप्तोक्तिरागमः सैव रत्नगर्भा वसुंधरा तस्यां दुःस्थानां दरिद्राणां निधिकुम्भीव रत्ननिधानकलशीव । अमीषां लुम्पाकमतपक्षीभूतभूयोवेषधारिणामर्हतां तीर्थकृतां

प्रतिमा बिम्बमर्चा दृशोर्लोचनयोः पथिकी विद्यमानापि पान्थी गोचरा नाभवत्। तत्र निमित्तं तु महांह एव ॥

ऐहिकामुष्मिके सौख्ये दूरेऽत्र स्थायिनो मम।
नीरतीरे सरःपङ्के निमग्नस्येव दन्तिनः ॥ ११३ ॥

अत्र भवपरम्परापारावारप्रतिहरित्प्रसरत्पयःपूरान्तरनिपतनप्रस्फुरन्महावर्तभूते लुम्पाकमते तिष्ठति चिरं स्थितिं विरचयतीत्येवंशीलस्य स्थायिनो मम मेघजीनामात्मनः इहलोकपरलोकसंबन्धिनी सौख्ये शर्मणी दूरे विप्रकृष्टे वर्तेते। भगवदाज्ञाविरोधेनोद्भूतभूयस्तरदुरन्तदुरितोदयप्रादुर्भूततिर्यङ्नरकाद्यनन्तदुर्भवपरम्परोपलम्भतः शर्मलेशोऽपि कुत्रस्थः सत्त्वः प्राप्नुयादिति। कस्येव। दन्तिन इव। यथा सरःपङ्के निदाघानिदाघकृद्धर्मद्युतितीव्रतरकरनिकरशुष्काल्पीयःसलिलपल्वलबहुलजम्बाले निमग्नस्य सर्वैरप्यङ्गोपाङ्गैर्ब्रूडित्वा स्थितस्य किंचिल्लक्ष्याङ्गस्य नीरतीरे पानीयप्रतीरे अतिदूरे भवतः ॥

चेतसीति विचिन्त्यासौ पण्डावानिव पण्डितः।
कैश्चिच्चालोचचतुरैरालोच्य सचिवैरिव ॥ ११४ ॥
स पल्वलमिवामेध्यं हंसो लुम्पाकनायकः।
अत्याक्षीत्पक्षमात्मीयं विनेयैस्त्रिंशता समम् ॥११५॥ (युग्मम्)

स मेघजीनामा लुम्पाकानां नायकः स्वामी त्रिंशता त्रिंशत्संख्यैर्विनेयैः शिष्यैः सममात्मीयं लुम्पाकसंबन्धिनं पक्षं लुम्पाकमतं गच्छं वा अत्याक्षीज्जहाति स्म। क इव। हंस इव। यथा राजमरालः पुरीषानेकास्थिपञ्जरविकटकण्टकठिक्करकबहुजलं बालशैवालकलितमत एवामेध्यमपावनं वायसनिवासोत्पादशयनादिशकुन्तसंतानं पल्वलं त्यजति। किं कृत्वा। इत्यमुना प्रकारेणार्थात्स्वयं तथा सिद्धान्तविरुद्धवचनभाषणभीरुकस्वाभिलषितज्ञापरगीतार्थैश्च चेतसि स्वस्यैव चेतसि वेत्ति। विचिन्त्य चिन्तयित्वा। विचार्येत्यर्थः। क इव। पण्डावानिव। यथा तत्त्वानुगतमतिमान् पण्डितो मेधावी विचिन्तयति। सम्यग्देवगुरुधर्मादितत्त्वं विचारयति। च पुनः सचिवैरमात्यैरिव आलोचेषु मन्त्रणेषु चतुरैर्निपुणैः कैश्चिदात्मीयैः सिद्धान्तवचनभाषणातिभीरुकस्वाभिमताभिप्रायज्ञापरगीतार्थैश्चालोच्य विचारयित्वा च ॥ युग्मम् ॥ इति मेघजीमुनेर्लुम्पाकमतत्यजनम् ॥

निर्जित्य स्वमतैश्वर्यस्मयं तौर्यत्रिकोत्सवैः।
प्राणमत्प्रतिमां जैनीं जयीव निजमातरम् ॥ ११६ ॥

स मेघजीऋषिः स्वस्यात्मनो मतस्य लुम्पाकवर्गस्य ऐश्वर्यमाधिपत्यं तस्य स्मयमहंकारं गर्वं निर्जित्य पराभूय। तदैश्वर्यं मुक्त्वेत्यर्थः। अथवा 'निर्मुच्य' इति पाठो वा। तत्र निःशेषेण मुक्त्वा संबन्धमात्रमप्यरक्षयन् त्यक्त्वा। 'निर्मुक्तः पञ्चदेह्या परमसुखमयः प्रास्तकर्मप्रपञ्चः' इति पञ्चमीस्तुतौ। तौर्यत्रिकोत्सवैर्गीतनृत्यवाद्यत्रिकेणोपलक्षितश्राद्ध-

जनारब्धमहामहैः सार्धं जैनीं जिनसंबन्धिनीं प्रतिमां मूर्तिं प्राणमत् प्रणमति स्म। क इव। जयीव। यथा निखिलदिङ्मङ्गलनिर्जयनशीलः पृथिवीपालो निजमातरं स्वजननीं प्रणमति ॥

कलौ स्वकामिताप्राप्तेर्लोकानालोक्य सीदतः।
पूर्णकामांश्चिकीर्षुं तान्स्वः सुरद्रुमिवागतम् ॥ ११७ ॥
स्वोदयाय कलिं लुप्त्वा किमु कर्तुं कृतं युगम्।
नक्तंदिनमिवादित्यं धर्मं मूर्तमिवोद्गतम् ॥ ११८ ॥
चतुर्थारकवल्लोकान्पञ्चमेऽप्यरकेऽथ वा।
अवतीर्णमिवोद्धर्तुं कृपया गौतमं पुनः ॥ ११९ ॥
तपागच्छश्रिया लीलाललाममिव जङ्गमम्।
श्रीहीरविजयं प्रीतेरैषीदेष निषेवितुम् ॥१२०॥ (कलापकम्)

एष मेघजीऋषिः श्रिया सूरिलक्ष्म्या कलितं हीरविजयम्। श्रीहीरविजयसूरिमित्यर्थः। प्रीतेरानन्दात्। विशुद्धधर्मप्ररूपकत्वेन गुरुस्नेहाद्वा निषेवितुमुपासितुमैषीद्वाञ्छति स्म। उत्प्रेक्ष्यते—तपागच्छश्रिया तपोगणलक्ष्म्या जङ्गमं संचरणशीलं लीलाललामं शृङ्गारकृते विधृतं कनकतिलकमिव। ललामशब्दो नकारान्तोऽकारान्तोऽप्यस्ति। 'ललामवल्ललामश्वादन्तः पुंक्लीबलिङ्गे नकारान्तः क्लीब एव' इत्यनेकार्थः। अथ हीरविजयसूरिं विशिनष्टि। उत्प्रेक्ष्यते—स्वः स्वर्गलोकादागतं भूमीमण्डलेऽवतीर्णं सुरद्रुं कल्पवृक्षमिव। किं कर्तुमिच्छुम्। तान् लोकान् पूर्णकामान् इच्छापूरणपर्यन्ताधिगतसमस्तस्वमनोभिलाषांश्चिकीर्षुं कर्तुमिच्छुम्। किं कृत्वा। कलौ कलिनाम्नि युगे पञ्चमारके स्वेषामात्मनां कामितानामभीष्टानामप्राप्तेरनासादनात्सीदतः दुःखीभवतः सकलान् यावद्वसुधावलयवर्तिनो लोकानालोक्य विज्ञायेत्यर्थः। पुनरुत्प्रेक्ष्यते—मूर्तं शरीरवन्तमङ्गीकृतकायं वा उद्गतं प्रकटीभूतं धर्मं जैनधर्ममिव। किं कर्तुम्। नक्तंदिनमहोरात्रम्। निरन्तरमित्यर्थः। स्वस्यात्मन उदयाय चतुर्भिरंशैस्तिरोभवनाय चतुरङ्गतया प्रादुर्भवाय वा कलिं प्रबलतापसंतापास्पदं कलियुगं लुप्त्वा विलुप्य निखिलावनीमण्डलान्निकास्य कृतं युगं प्रथमसमयं कर्तुं विधातुम्। कृतयुगे हि धर्मश्चतुरङ्गः स्यात्। यदुक्तम् नैषधे—'पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे' इति। कमिव। आदित्यमिव। यथा भास्करः नक्तं निशां विलुप्य दिनं वासरं कर्तुमुद्गच्छति। पुनरुत्प्रेक्ष्यते—पञ्चमे दुःसमानामन्यप्यरके कृपया कारुण्यरससमुद्रतया लोकाञ्जगज्जन्तून् भविकजनान्वा उद्धर्तुं भवविकटवटादुद्धृत्य मोक्षे महानन्दपदे नेतुं प्रापयितुं पुनर्द्वितीयवारमवतीर्णं गृहीतावतारं गौतममिव श्रीमन्महावीरप्रथमशिष्यं गणधराग्रगण्यमिव ॥ चतुर्भिः कलापकम् ॥

व्रतं जिघृक्षुः सोऽकाङ्क्षीद्धीरसूरेः समागमम् ।
श्रीसुव्रतजिनस्येव कार्तिकः श्रेष्ठिपुङ्गवः ॥ १२१ ॥

स मेघजीऋषिः व्रतं प्रव्रज्यां जिघृक्षुः गृहीतुमिच्छुः सन् हीरसूरेर्हीरविजयसूरीश्वरस्य समागममकमिपुरे पादावधारणं समागमनमकाङ्क्षीत् वाञ्छति स्म । क इव । कार्तिक इव । यथा श्रेष्ठिनां श्रीदेवताप्रतिमाङ्कितबद्धशिरःसुवर्णपट्टानां नगराधिकारिमुख्यानां मध्ये पुङ्गवः प्रधानः कार्तिकनामा श्रेष्ठी सुव्रतजिनस्य श्रीमुनिसुव्रतस्वामिनः आगमनं काङ्क्षति स्म ॥

विज्ञाय हीरसूरीन्दुराशयं मेघजीमुनेः ।
आगादहम्मदाबादे माकन्दे कीरवत्क्रमात् ॥ १२२ ॥

हीरसूरीन्दुः हीरविजयसूरिशर्वरीसार्वभौमः क्रमाद्ग्रामाद्ग्रामादिविहारस्य परिपाट्या अहम्मदाबादे गुर्जरमण्डलविपुलाखण्डलनिवासस्थानत्वेन राजनगरे आगात् आगच्छति स्म । स्वयमागत्य अकमिपुरे समवसृत इत्यर्थः । किंवत् । कीरवत् । यथा माकन्दे सहकारमहीरुहे शुकः समेति । किं कृत्वा आगतः । मेघजीमुनेराशयं स्वपार्श्वे संयमग्रहणाभिप्रायं विज्ञाय ज्ञात्वा स्वतः परतो वा अवसाय ॥ इति हीरविजयसूरेरकमिपुरीगमनम् ॥

प्राच्यामिव प्रतीच्यां च महोऽभ्यधिकमावहन् ।
[1]परोलक्षान्दधत्ताक्ष्यान्गृह्णन्राज्ञां श्रियं पुनः ॥ १२३ ॥
सैंहिकेयाञ्जयञ्शौर्याद्योऽजैषीत्पूषणं श्रिया ।
स गुर्जरेष्वथागच्छत्साहिः श्रीमदकब्बरः ॥१२४॥ (युग्मम्)

अथास्मिन्व्यतिकरे सकलवसुधावलयप्रसिद्धः श्रीमाननेकजनपदनायकाधिपत्याद्वैतलक्ष्म्या लक्षितः साहिः पातिसाहिः गुर्जरेषु आगच्छत्समागतः । स कः । योऽकब्बरसाहिः श्रिया वैभवेन कृत्वा पूषणं सहस्रकिरणमजैषीज्जयति स्म पराबभूव । 'नमसितुमना यन्नाम स्यान्न संप्रति पूषणम्' इति नैषधे । किं कुर्वन् । प्राच्यां पूर्वस्यां दिशि इव प्रतीच्यां पश्चिमायामप्याशायामभ्यधिकमतिशायितमं प्रतिपक्षपक्षलक्षदुःसहं स्वमहो निजप्रतापमावहन् आकलयन् । पुनः किंभूतः । लक्षात्परे [1]परोलक्षा लक्षशस्ताक्ष्यान् जात्यतुरङ्गमान् अर्थादश्ववारान् दधद्धारयन् । कटके कति वाजिनः सन्ति लक्षं द्विलक्षी त्रिलक्षी वा इति लोकभाषैव वर्तते । परं तावन्तोऽश्ववारा एव ज्ञेया इत्युक्तेः । पुनः किं कुर्वन् । राज्ञामपरापरपृथ्वीपालानां श्रियं संपदं देशनगरग्रामादिविभूतिं गृ-

१. पाणिनीयमते तु 'नाज्झलौ' इति. सूत्रस्थ 'पारस्करादित्वात्सुट्' इति, कैयटानुसारेण सुट एव संभवे तस्य परादित्वेन पदान्तत्वाभावाद्रुत्वोत्वयोरप्राप्तौ 'परस्लक्षान्' इति भवेत्.

त्न्नाददानः। पुनः किं कुर्वन्। शौर्यात् शूरत्वात्सिंहिकाया अपत्यानि सैंहिकेयाः केसरिणः जयन्पराभवन् पराक्रमन् सिंहव्याघ्रादिश्वापदान्निघ्नन्। सूर्यस्तु प्रतीच्यां मन्दायमानमहाः सप्ताश्व एव राज्ञः श्रियं दिशन्। 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघौ। तथा सैंहिकेयात्स्वर्भानोः सकाशादभिभवं लभमानः। अत एवाकब्बरसाहेः सूर्यजयो युक्त एव ॥ युग्मम् ॥ इत्यकब्बरः ॥

साहिना सार्धमभ्येयुः प्राच्याः केऽपीह नैगमाः।
शर्वरीसार्वभौमेन नभोमार्गे ग्रहा इव ॥ १२९ ॥

साहिना अकब्बरपातिसाहिना सार्धं केऽपि केचन प्राच्याः पूर्वदिक्संबन्धिनः नैगमा वणिजो व्यवहारिणः इह गुर्जरमण्डले अभ्येयुरागताः। के इव। ग्रहा इव। यथा शर्वरीसार्वभौमेन विधुना सार्धं नभोमार्गे गगनाङ्गणे ग्रहाः समायान्ति ॥

तेऽप्यासञ्शासने जैने लीना मीना इवाम्बुनि।
स्थानसिंहादिमा मान्या अमात्या इव भूपतेः ॥ १२६ ॥

ते नैगमा अपि जैने शासने भगवत्संबन्धिनि तपागच्छाभिधाने शासने लीना निलीयमानमानसाः एकतानीकृतचित्ताः सन्ति। क इव। मीना इव। यथा अम्बुनि पानीयविषये लीनास्तिष्ठन्ति। किंभूताः। स्थानसिंहः रामासाहसूनुः आदिमः प्रथमो मुख्यो वा येषु ते तादृशाः। पुनः किंभूताः। महीपतेरकब्बरपातिसाहेर्मान्या माननीयाः। क इव। अमात्याः सचिवा भूपतेर्माननार्हा भवन्ति ॥ इति प्राचीनश्राद्धाः ॥

अरंतुदं कुपक्षाणामिवासेचनकं सताम्।
परिव्रज्योत्सवं कर्तुं काङ्क्षन्तो मेघजीमुनेः ॥ १२७ ॥
निशितायसशल्यानि हृदि मिथ्यादृशामिव।
आनयन्ति स्म ते तुर्याण्यकम्बरमहीहरेः ॥ १२८ ॥ (युग्मम्)

ते प्राचीनाः श्राद्धा अकब्बरनाम्नो महीहरेः पृथ्वीपुरंदरस्य तुर्याणि वादित्राण्यानयन्ति स्म। उत्प्रेक्ष्यते—मिथ्यादृशां कुवादिनां हृदि हृदये वक्षसि निशितानि तीक्ष्णानि आयसानि लोहमयानि शल्यानि त्रिशूलानीव। 'हृदि शल्यमिवार्पितम्' इति रघौ। 'अतिपीडाकारित्वात्त्रिशूलम्' इति तद्वृत्तिः। तथा 'परस्परोल्लासितशल्यपल्लवे' इति नैषधे। 'मिथ उल्लालितकुन्ता येऽग्रे' इति तद्वृत्तिः। ततः शल्यानि कुन्ता इव। तथा 'शल्यं शस्त्रशलाकयोः' इत्यनेकार्थे। शस्त्राणीव वा। प्राच्याः किं कुर्वन्तः। मेघजीमुनेः प्रव्रज्याया दीक्षाया उत्सवं महाहवं कर्तुं निर्मातुं काङ्क्षन्तः ईहमानाः। किंभूतं परिव्रज्योत्सवम्। उत्प्रेक्ष्यते— कुपक्षाणां लुम्पाकादीनां कुमतभाजामरंतुदं मर्मव्यथकमिव। पुनरुत्प्रेक्ष्यते— सतां साधूनां जैनानां सुदृशामासेचनकमाप्यायकमिव। 'तदासेचनकं यस्य दर्शनाद्दृङ् तृप्यति' इति हैम्याम्। अत्र लालाघण्टान्यायेनोभयत्रापि इव संबध्यते ॥ युग्मम् ॥ इति वाद्यानयनम् ॥

स्पृहयद्भिरिवोद्वोढुं सिद्धिमुग्धमृगीदृशम् ।
श्राद्धैरस्य तपस्यायाः प्रारभ्यत महामहः ॥ १२९ ॥

प्राच्यैर्गौर्जरैश्च श्राद्धैः श्रावकैरस्य मेघजीमुनेस्तपस्याया दीक्षाया महामहः महोत्सवः प्रारभ्यत प्रारब्धः। उत्प्रेक्ष्यते—सिद्धिर्मुक्तिरेव मुग्धमृगीदृक् कमनीयकामिनी ताम्। 'मुग्धो मूढे च रम्ये च' इत्यनेकार्थः। उद्वोढुं परिणेतुं स्पृहयद्भिः कामयमानैरिव ॥

पूरिताशेषदिग्ध्वानढक्का तद्यशसामिव ।
तन्महो भूपदिग्जेत्रयात्राढक्काक्कणा इव ॥ १३० ॥
कुलशैलपयोराशिप्रतिध्वनिविधायिनः ।
वाद्यमानघनातोद्यनादाः प्रादुरबीभवन् ॥ १३१ ॥ (युग्मम्)

वाद्यमानानि ताड्यमानानि वादित्रवादिकैर्जनैः करैर्दण्डेन वा निहन्यमानानि घनानि प्रभूतानि आतोद्यानि तूर्याणि तेषां नादाः शब्दाः प्रादुरबीभवन् प्रकटीभवन्ति स्म। किंभूताः। कुलशैलाः मेरुमन्दरकैलाशादिकाः कुलाचलाः तथा पयोराशिः समुद्रस्तेषु ये प्रतिध्वनयः प्रतिशब्दास्तान्विदधते प्रणयन्तीत्येवंशीलाः। उत्प्रेक्ष्यते—तद्यशसां तस्य मेघजीऋषेः यशसां कीर्तीनां पूरिता निर्भरं भृता अशेषाः समस्ता दिशो दशाप्याशा यैस्तादृशा ध्वानाः शब्दा यासां ता ढक्का यशःपटहानि स्वाना इव। अथवा। तस्य मेघजीमुनेर्यश एव भूपो राजा तस्य दिशां समस्तहरितां जयनशीला यात्रा वैरिव्रजोपरि विजयकृते प्रस्थानं तस्य तदर्थं वा ढक्काक्कणा निःस्वाननिःस्वना इव। राज्ञां हि प्रयाणेषु निःस्वाना वाद्यन्ते, तद्ध्वनिभिश्च सर्वेऽपि सज्जीभवन्ति ॥ युग्मम् ॥

वदान्यैः श्रीदवद्दानं ददेऽगीयत गायनैः ।
अनर्ति नर्तकैरुच्चैर्बन्दिभिर्बिरुदावली ॥ १३२ ॥

तत्र मेघजीऋषिदीक्षासमये श्रीदवद्धनदैरिव वदान्यैर्दानशौण्डैर्विश्राणनशीलैर्दानं ददे दत्तम् पुनर्गायनैर्गन्धर्ववर्गैर्मधुरध्वनि अगीयत। पुनर्नर्तकैर्नटैस्ताण्डवाडम्बरविधायिभिरनर्ति नृत्यं निर्मितम्। पुनः बन्दिभिर्मङ्गलपाठकैर्बिरुदानामावलिः श्रेणिः उच्चैः कथिता ॥

वैधेयवन्निरीयान्धकूपात्कूपे पतामि किम् ।
परपक्षान्गणैः स्वस्य स्वस्याहूतिकृतस्तदा ॥ १३३ ॥
अवमत्येति दीक्षां स श्रीहीरविजयान्तिके ।
सत्याकृतिमिवादत्त संगमे सुगतिश्रियाम् ॥ १३४ ॥ (युग्मम्)

स मेघजीमुनिः श्रीहीरविजयसूरेरन्तिके संनिधौ पार्श्वे दीक्षां जैनतपस्यां जग्राह गृह्णाति स्म समादत्तवान्। कामिव। सत्याकृतिं सत्यकारमिव। लोके 'संचकार' इति प्रसिद्धः। कासाम्। सुगतीनां स्वर्गापवर्गफलदानां श्रियां लक्ष्मीणाम्। उत्प्रेक्ष्यते वा—

त्रिदिवशिखराणां सत्याकृतिमिव । किं कृत्वा । इत्यमुना प्रकारेण तदा तस्मिन्दीक्षाग्रहमहोत्सवसमये परपक्षान् परगच्छीयान् खरतरस्तनिकादीनवमत्यागणयित्वा । विमुच्येत्यर्थः । किंभूतान् परपक्षान् । स्वस्यात्मनः गणैर्गच्छैस्तस्य मेघजीमुनेराहूतिकृतः आकारणविधायिनः । आकारणं सूरिपदादिप्रदानादिना लोभयित्वा हठं कुर्वन्तीति तान् । इति किम् । यदहं वैधेयवन्मातृशासितो मूर्ख इव ज्ञानवानप्यज्ञानवानिव अन्धकूपात् ध्वान्तोपचितान्तरावटान्निरीय निर्गत्य पुनर्द्वितीयवारं कूपे अपरस्मिन्कूपे किं कथं पतामि झम्पामि । अपि तु नैव पतिष्यामीत्येवं विचार्येत्यर्थः ॥ युग्मम् ॥

उद्द्योतं शासने तेने विजयं दुर्दृशां च यत् ।
इतीवास्य व्यधात्सूरिरुद्द्योतविजयाभिधाम् ॥ १३५ ॥

सूरिर्हीरविजयप्रभुः । उत्प्रेक्ष्यते—इति हेतोरस्य मेघजीऋषेः उद्द्योतविजय इत्यभिधां नाम व्यधाच्चकार । इति किम् । यत्कारणादसौ त्यक्तलुम्पाकमताधिपत्यः शासने उद्द्योतं प्रकाशं तेने विस्तारयामास । च पुनर्दुर्दृशां कुपक्षाणां कुमतानां विजयमवगणनारूपं विदधे निर्मितवान् । पराभवं विहितवानित्यर्थः ॥

पादपीठलुठन्मूर्धा बद्धाञ्जलिरसौ विभुम् ।
श्रीनाभ इव नाभेयं स्वयंभुवमबीभजत् ॥ १३६ ॥

असौ उद्द्योतविजयमुनिः विभुं हीरविजयसूरीन्द्रमबीभजत्सिद्धान्तोक्तविधिवद्विनयविधानादिप्रकारेणातिशयेन भजते स्म निषेवते स्म । तदेव दर्श्यते—किंभूतः । पादपीठे पदासने लुठन्मिलन्मूर्धा मौलिर्यस्य । पुनः किंभूतः । बद्धाञ्जलिः ललाटपट्टघटितकरकमलकुड्मलः । क इव । श्रीनाभ इव । यथा श्रीनाभनामा गणधरः नाभेर्नाभिनामनृपस्यापत्यं संतानम् । नन्दन इति यावत् । नाभेयः श्रीऋषभदेवस्तं वृषभं स्वयंभुवं तीर्थकरं भजते स्म । विशेषणे पूर्ववत् । पादपीठे लुठन् संघट्टं प्राप्नुवन् मूर्धा मस्तकं यस्य । तथा बद्धो रचितोऽञ्जलिः पाणिद्वययोजनं येन ॥ इति मेघजीऋषिमहः ॥

पारीन्द्र इव सूरीन्द्रः प्रणिहत्य तमोद्विपम् ।
नृणां व्यश्राणयद्बोधिं मुक्तापङ्क्तिमिवार्थिनाम् ॥ १३७ ॥

सूरीन्द्रो हीरविजयगुरुः नृणां भव्यप्राणिनां बोधिं सम्यक्त्वं व्यश्राणयद्ददाति स्म । कामिव । मुक्तापङ्क्तिमिव । क इव । पारीन्द्र इव । यथा केसरी अर्थिनां याचकानां मुक्तानां स्वहारितकुम्भिकुम्भमध्यनिष्पतन्मौक्तिकानां श्रेणीं विश्राणयति प्रयच्छति । किं कृत्वा । प्रणिहत्य व्यापाद्य । किम् । तमः अज्ञानं पापं वा तद्रूपं श्यामत्वात्तत्सदृशं द्विपं हस्तिनम् ॥

मह्यां विहरति स्वैरं श्रीमत्सूरिपुरंदरे ।
दानवर्षितया भव्यव्रजेनानेकपायितम् ॥ १३८ ॥

श्रीमति अद्वैतवैभवभासिनि हीरविजयनाम्नि सूरिषु पुरंदरे वासवे मह्यां महीमण्डले स्वैरं स्वेच्छया न पारतन्त्र्याद्विहरति विहारं विदधति सति दानं द्रविणादिविश्राणनं मदाम्भश्च वर्षतीत्येवंशीलस्तत्तथा। 'दानं विश्राणनमदाम्भसोः' इत्यनेकार्थे । दानवर्षणस्वभावेन भव्यव्रजेन भविकजन्तुजातेन अनेकान्बहून्दुःस्थानर्थिनो वा पान्ति दारिद्र्यादुद्धरन्ति सुखीकुर्वन्ति च तेऽनेकपाः मतङ्गजाश्च तद्वदाचरितं सामयोनिसदृशीभूतं च ॥

पितेव सूनुना साकं कम्माङ्गजयतीन्दुना ।
पत्तनं पावनीचक्रे हीरसूरीश्वरः क्रमात् ॥ १३९ ॥

हीरसूरीश्वरः क्रमादनुक्रमाद्विहारपरिपाट्या स्वतन्त्रससुखविचरणात् पत्तनमणहिल्लवाटकाभिधानपत्तनं पावनीचक्रे पवित्रीकरोति स्म । कथम् । साकं सह । केन कस्मात् । कम्मासाधोरङ्गजो नन्दनः स एव यतिषु वाचंयमेषु यतीनां मध्ये आह्लादकत्वाद्वागमृतवर्षित्वादिन्दुरिव। इन्दुराचार्येणेत्यर्थः । क इव । पितेव। यथा जनकः सूनुना सार्धं पत्तनादिपुरं समेति ॥

कृत्वा क्रमादनूचानपदनन्दिं मुनीश्वरः ।
देशं स्वसूनो राजेव गणं तस्य वशं व्यधात् ॥ १४० ॥

मुनीश्वरो हीरविजयव्रतिवासवः गणं तपागच्छं तस्य विजयसेनसूरेर्वशमायत्तं व्यधाच्चकार । किं कृत्वा । क्रमादनुक्रमेण । हेतौ तृतीया पञ्चमी च वाच्येति तृतीयार्थः । पूर्वसूरिपरिपाटीतः अनूचानपदस्याचार्यपदस्य नन्दिं द्वादशावर्तवन्दनानुज्ञानादिविधिं कृत्वा विधाय । क इव । राजेव । यथा सकलमेदिनीमण्डलाखण्डलो निजनन्दनस्य देशं स्वजनपदं वशमधीनं विधत्ते ॥

प्रभोर्नन्दिमहे हेमराजो मन्त्रीश्वरो मुदा ।
अमानि मानवैः श्रीद इवामितधनं ददत् ॥ १४१ ॥

प्रभोर्विजयसेनसूरेर्नन्दिमहे आचार्यपदानुज्ञावन्दनकदानादिमहोत्सवे हेमराजो नाम मन्त्रीश्वरः सचिवो मानवैर्जानपदैः पौरैर्नागरिकैश्च मनुजैः श्रीदो वैश्रवण एव अमानि विज्ञातोऽवबुद्धः ॥ किं कुर्वन् । मुदा प्रमोदेन अमितं प्रमाणातीतमगणितं धनं द्रविणं ददद्यच्छन् ॥ इति विजयसेनसूरिनन्दिः ॥

प्रत्यतिष्ठत्पॅरोलक्षा आर्हतीः प्रतिमाः प्रभुः ।
कल्पितानल्पसंकल्पाः कल्पसाललता इव ॥ १४२ ॥

प्रभुर्हीरविजयसूरिः [1]परोलक्षाः लक्षशः आर्हतीर्जैनीः प्रतिमा मूर्तीर्बिम्बानि प्रत्यतिष्ठत् प्रतितिष्ठति स्म । उत्प्रेक्ष्यते—कल्पिताः प्रदत्ताः पूर्णीकृता अनल्पा अनेके भूयस्तराः संकल्पा मनोभिलषितानि याभिस्तादृशीः कल्पसाललताः कल्पद्रुमवल्लीरिव । 'कल्पद्रुमलताः' इति सोमसौभाग्यकाव्ये ॥

---

१. अत्र च १२३ संख्याकश्लोकटिप्पणिवत् 'परस्लक्षा' इति भवेत्.

पान्थानिव महानन्दपुटभेदनपद्धतौ ।
दीक्षयामास सूरीन्द्रोऽनेकानिभ्यतनूभवान् ॥ १४३ ॥

सूरीन्द्रोऽनेकान्परःशतानिभ्यतनूभवान्व्यवहारिपुत्रादीन्दीक्षयामास प्रव्राजयति स्म । उत्प्रेक्ष्यते—महानन्दो मोक्षः स एव पुटभेदनं रत्नयोनिपत्तनम् । रत्नयोनिरिति लोकरूढिः । तथा च रत्नसदृशानां पुरुषाणामुपत्तिस्थानम् । महानन्दे तीर्थंकरचक्रवर्तिबलदेवमहामण्डलीकमहीपतिसूरिवाचकमहामुनिप्रमुखा रत्नेभ्योऽभ्यधिकानां महापुरुषाणामुत्पत्तिस्थानकं ततः पत्तनोपमानम् । तस्य पद्धतौ मार्गे पान्थान् पाथिकानिव ॥

शाखाप्रशाखाश्रेणीभिराकीर्णः श्रमणाग्रणीः ।
व्यभाद्वट इव च्छायाच्छन्नः सेव्यश्च राजभिः ॥ १४४ ॥

श्रमणानां साधूनामग्रणीः पुरोगो हीरविजयसूरिः वट इव न्यग्रोधपादप इव व्यभात् । किंभूतः । शाखा विमलविजयसागरसुन्दरादिका प्रशाखा आनन्दहर्षसौभाग्यविशालकुशलादिकास्तासां श्रेणीभिराकीर्णः परिवृतः । पुनः किंभूतः । छायया शोभया छिन्नो निचितः सहितः । पुनः किंभूतः । राजभिर्भाविनिभूतोपचाराद्भूपालैः सेव्यः उपासनीयः । वटस्तु स्कन्धनिसृताः शाखास्ताभ्यः पुनर्निर्गताः प्रशाखास्तासां राजिभिर्व्याप्तो भरितः । तथा छायया प्रतिच्छायिकयाश्चितः सिश्चितः । तथा राजभिर्यक्षैः सेवनीयः । यक्षाणां वटवासित्वात् । 'यक्षः पुण्यजनो राजा गुह्यको वटवास्यपि' इति हैम्याम् ॥

समस्थापयत्तीर्थसार्थाननेकाननेकान्तवादाम्बुजाम्भोजबन्धुः ।
महीमण्डले रन्तुमुत्कण्ठितायाः स्फुरत्केलिगेहा इव ब्रह्मलक्ष्म्याः ॥ १४५ ॥

एकान्तेन निश्चयेन वदनमेकान्तवादो न एकान्तवादो यत्र तदनेकान्तवादं जिनशासनम् । यतः—'स्याद्वादवाद्यार्हतः स्यात्' इति हेमाचार्योक्तिः । स एव तदेव वाम्बुजं सरसीरुहं तत्र तद्विकाशने अम्भोजबन्धुः पद्मबान्धवः सहस्ररश्मिः सूरीन्द्रः अनेकान् शतशः तीर्थानां पापसंतापापनोदस्थानानां सार्थान् समूहान् । यद्यपि हैम्याम् 'संघसार्थौ तु देहिनाम्' इत्युक्तम्, तथापि हेमचन्द्रेणैवानेकार्थे प्रोक्तम्—'सार्थो वृन्दे वणिग्गणे' इत्युत्पन्नभेदात्, तथा 'पदार्थसार्थ–' इत्यपि दर्शनात्, अनुप्रासत्वाद्वा लक्षणयापि समूहार्थ एव तस्मादानीतः । समस्थापयत्संस्थापयति स्म । उत्प्रेक्ष्यते—महीमण्डले पृथ्वीपीठे रन्तुं क्रीडितुमुत्कण्ठिताया उत्सुकिताया ब्रह्मलक्ष्म्या मुक्तिश्रियाः । 'शिवं निःश्रेयसं श्रेयो निर्वाणं ब्रह्मनिर्वृतिः' इति हैम्याम् । स्फुरन्तः निखिलसुदृग्दृग्गोचरीभावं भजन्तः केलिगेहा विलाससौधानीव । सूरिस्थापितानां तीर्थानां पृथिवीपीठस्थायुकत्वात् अथ च ब्रह्मलक्ष्म्यास्त्रैलोक्योपरितभूमौ स्थायित्वाच महीमण्डले क्रीडाकाङ्क्षेति ॥ इति हीरविजयसूरिधर्मकृत्यानि महिमसंपदः ॥

अथो विहारप्रतिष्ठादीक्षाद्यनन्तरं कस्मिंश्चिदकब्बरसाहेराकारणसमये गन्धारनगरे चतुर्मासीं तिष्ठासोः सूरेर्गन्धारवर्णनं किंचित्—

अथो लाटलक्ष्मीललामायमानं पुरं वार्धितीरेऽस्ति गन्धारनाम ।
किमुद्वेज्यमाना जलैरम्बुराशेः प्रतीरं पुरी संश्रिता शार्ङ्गपाणेः ॥ १४६ ॥

लाटस्य लाडनाम्नो मण्डलस्य लक्ष्म्या ललामायमानं तिलकमिवाचरत् वार्धेः समुद्रस्य तीरं तटं तत्र गन्धार इति नाम यस्य तादृशं पुरं नगरमस्ति विद्यते । उत्प्रेक्ष्यते—अम्बुराशेः कल्लोलमालिनः प्रसरत्तुङ्गतरङ्गरङ्गविरलजलैरुद्वेज्यमाना अत्युद्वेगं प्राप्यमाना शार्ङ्गपाणेर्नारायणस्य पुरी द्वारका नगरी विष्णोः कुत्रापि गते सति समुद्रेणाप्लाव्य स्वसलिलमध्ये गृहीता, अत एव पानीयोद्वेगात्प्रतीरं तटं संश्रिता पानीयाद्बहिरागत्यात्र स्थितेव ॥

निधानेशरम्भाकुमारीगणेशान्दधानेन गाङ्गेयराजेश्वरांश्च ।
जिता येन वस्वोकसारा स्वलक्ष्म्या ह्रियेवाश्रिता शंभुशैलस्य मौलिम् १४७

गन्धारनगरेण स्वलक्ष्म्या निजवैभवेन जिता परिभूता सती वस्वोकसारा धनदपुरी ह्रियेव त्रपातिरेकादिव शंभुशैलस्य मौलिं मस्तकमुपरितनशिखरमाश्रिता भेजुषी । येन किं कुर्वाणेन । दधानेन । कान् । निधानानां निधीनामीशाः स्वामिनो निधिपतयः तास्तथा रम्भाः कदलीः कुमारीः कन्यकाः तथा गणानां जनसमुदायानामीशा गणनायकास्तान् तथा गाङ्गेयं स्वर्णं तथा राजेश्वरं देशाधिपतिं राज्यलक्ष्मीवन्तमीश्वरा गजप्रमाणद्रविणधारिणः तान् बिभ्राणेन । अलकापक्षे तु सर्वेऽप्येकैकाः । निधानेशो धनदः, तथा रम्भानाम्नी धनदाङ्गजनलकूबरपत्नी । 'अस्मान्किमश्रोत्रसुधां विधाय रम्भा चिरं भामतुलां नलस्य । तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ॥' इति नैषधे । कुमारी पार्वती गणेशो विघ्ननायकः गङ्गाया अपत्यं गाङ्गेयः स्वामिकार्तिकः । 'गङ्गोमाः कृत्तिकासुतः' इति हैम्याम् । तथा 'गाङ्गेयो गुहभीष्मयोः' इत्यनेकार्थः । राजानो यक्षाः ईश्वरः शंभुस्तान्बिभ्रती ॥

स्फूर्त्या मणीकम्बुवराटमुक्तिका प्रवालमातङ्गतुरङ्गमश्रियाम् ।
विहेलितेनाम्बुधिना द्विवेलं वेलाच्छलाद्यन्नगरं न्यषेवि ॥ १४८ ॥

मणयः चन्द्रकान्ताद्याः सामान्येन सर्वजातिजानि रत्नानि कम्बवः शङ्खाः वराटा रत्नमुख्यानि हीरका कपर्दा वा मुक्तिका मुक्ताफलानि । 'बहुकम्बुमणीवराटकागणनाटत्करकर्कटोत्करः' इति नैषधे । हट्टेषु कम्बवोऽपि दृश्यन्ते । प्रवाला विद्रुमा मातङ्गा हस्तिनः तुरङ्गमा अश्वाः श्रीर्धनधान्यादिविविधलक्ष्मीस्तासां स्फूर्त्या अत्युद्धरवैभवभरेण कृत्वा विहेलितेनावगणितेनाभिभूतेनाम्बुधिना समुद्रेण द्वे वेले वारावसरौ यत्र । 'वेला वारावसरः प्रस्तावः' इति हैम्याम् । तथा 'वेला स्याद्वृद्धिरम्भसः' । द्विवेलमिति क्रियाविशेषणम् । वेलाच्छलाज्जलवृद्धिकपटात् । वेलागममिषेणेत्यर्थः । यन्नगरं गन्धारपुरं न्यषेवि

उपास्यते स्म । अम्बुधावपि मण्यादयः सर्वेऽपि पदार्थाः सन्ति । ऐरावणोच्चैःश्रवसोस्तत्रोत्पन्नत्वात् जले गजाश्वानां संभवाद्वा ॥

इन्द्रनीलमणिशालिजालकाश्चन्द्रकान्तकृतचन्द्रशालिकाः ।
भूतलाभ्युदयिनो बभासिरे शारदीनशशिमण्डला इव ॥ १४९ ॥

यत्र गन्धारनगरे इन्द्रनीलमणिभिः मरकतादिनीलरत्नैः शालन्ते शोभन्ते इत्येवंशीला जालका गवाक्षा यासु तादृश्यः चन्द्रकान्तैश्चन्द्रमणिभिः कृता निर्मिता चन्द्रशालिका अर्थात्सौधानां शिरोगृहाणि उपरितनभूमिका बभासिरे भासन्ते स्म दीप्यन्ते स्म । उत्प्रेक्ष्यते—भूतले महीमण्डले अभ्यागत्योदयन्त्युद्गच्छतीत्येवंशीलास्तथा शारदीनाः प्रसरत्पयोधररोधापगमप्रोल्लसत्प्रचुरचन्द्रिकाकलिताः शरत्कालसंबन्धिनीः शशिनामिति सार्थकं नाम कलङ्ककालिमाकलितचन्द्राणां मण्डला बिम्बा इव । मण्डलशब्दस्त्रिषु लिङ्गेषु । चन्द्रशालिकासु लक्ष्मसदृशेन्द्रनीलगवाक्षाः ॥ इति गन्धारवर्णनम् ॥

महैर्महीयोभिरनेकनागरैः प्रवेशितः सूरिपुरंदरः पुरम् ।
दिग्जैत्रयात्रासु निजानुगीकृतप्रतीपभूमीपतिसार्वभौमवत् ॥ १५० ॥

अतिशयेन महान्तो महीयांसस्तैर्महीयोभिरत्यभ्यधिकैर्महैरुत्सवैः कृत्वानेके गणनातीता नागराः पुरजनास्तैः सूरिपुरंदरो हीरविजयसूरिवासवः पुरं गन्धारनगरं प्रवेशितः पुरे प्रवेशः कारितः । किंवत् । दिशां पूर्वपश्चिमदक्षिणोत्तराणां चतसृणां जैत्रासु जयनशीलासु यात्रासु सेनाभिः समं शात्रवेष्वभिगमोऽभिषेणनं तेषु निजस्यात्मनोऽनुगीकृताः सेवकभावं लम्भिताः प्रतीपाः पूर्वं प्रतिकूला विजये कृते च कथंचिदानुकूल्यभाजः भूमीपतयो राजानो येन तादृक् सार्वभौमवत् । यथा चक्रवर्ती महामहैः कृत्वा नागरैर्नगरं प्रवेश्यते ॥

गणकैरविणीरमणः श्रमणैर्बहुभिः सह तत्पुरमध्यवसत् ।
कलभप्रकरैरिव गन्धगजो जलबालकभूधरभूवलयम् ॥ १५१ ॥

श्रमणैः साधुभिः सार्धं गणे तपागच्छे आह्लादकत्वेन कैरविणीनां कुमुदिनीनां रमणः प्राणनाथश्चन्द्रो गच्छनायकः तद्गन्धाराभिधानं नगरमध्यवसत् आश्रयति स्म । गन्धारबन्दिरे तस्थिवानित्यर्थः । क इव । गन्धगज इव यथा कलभैस्त्रिंशदब्दकैः प्रौढैर्गजव्रजैरुपलक्षणाद्विंशतिवर्षीयैर्विक्कैः दशवार्षिकैः पोतैः पञ्चवार्षिकैर्बालैः इत्यादिभिर्द्विरदैः समम् । 'पञ्चवर्षो गजो बालः स्यात्पोतो दशवार्षिकः । विक्को विंशतिवर्षः स्यात्कलभस्त्रिंशदब्दकः ॥' इति हैम्याम् । गन्धहस्ती जलबालको विन्ध्यः स एव भूधरः पर्वतस्तस्य भूवलयं वनगहनपृथिवीपीठमधिवसति विन्ध्याद्रिवनखण्डे तिष्ठति । 'विन्ध्यस्तु जलबालकः' इति हैम्याम् ॥

अमरपुरीकृतलज्जे तत्र विजेतुं बलिगृहे सज्जे ।
प्रावृषि दुग्धपयोधौ मधुपरिपन्थीव तस्थौ सः ॥ १५२ ॥

स प्रसिद्धः सूरिः तत्र गन्धारनगरे प्रावृषि वर्षाकाले वार्षिकचतुर्मास्यां तस्थौ तिष्ठति स्म । क इव । मधुपरिपन्थीव । यथा प्रावृट्समये दुग्धपयोधौ क्षीरसमुद्रे मधुनाम्नो दैत्यस्य परिपन्थी शत्रुर्नारायणः तिष्ठति । किंभूते गन्धारपुरे । अमराणां देवानां पुर्या नगर्या अमरावत्याः स्वातिशायिताभ्यधिकवैभवभरैः कृता विहिता लज्जा मन्दाक्षं येन । पुनः किंभूते । बलिगृहं नागलोकं विजेतुं विशेषेण स्वविभवाधिक्येन पराभवितुं सज्जे सज्जीभूते ॥ इति गन्धारनगरे हीरसूरेः स्थितिः ॥

जीविकामिव नभोम्बुपावलेः प्रावृषं पुनरवेत्य पत्तने ।
हीरसूरिपुरुहूतशासनात्तस्थिवान्विजयसेनसूरिराट् ॥ १९३ ॥

विजयसेन इति नाम यस्य तादृशः सूरीणां राट् राजा हीरसूरिपुरुहूतस्य हीरविजयसूरिशक्रस्य शासनादादेशात्पुनरपरार्थे पत्तने अणहिल्लवाटकनगरे तस्थिवान् स्थितः । किं कृत्वा । प्रावृषं वर्षासमयमुपेतमवेत्य ज्ञात्वा । प्रावृषं कामिव । नभोम्बुपानां चातकानामावलेः पङ्क्तेः जीविका जीवनवृत्तिमिव ॥

प्रीणन्प्राणिनभोम्बुपान्प्रविदधद्दुर्वादिनां दुर्दिनं
बोधाङ्कूरकरम्बितां विरजसं कुर्वंश्च चित्तक्षितिम् ।
आनन्दं ददते स्म विस्मयकरीं व्याहारधारां किर-
न्भूमौ सूरिपुरंदरो जलधरो जम्भारिमार्गे पुनः ॥ १९४ ॥

भूमौ महीमण्डले सूरिपुरंदरो हीरविजयसूरीन्द्रः अथ च सूरिरेव पुरंदरो मेघः । यदुक्तम्—'एक एव खगो मानी चिरं जीवतु चातकः । पिपासितो वा म्रियते याचते वा पुरंदरम् ॥' इति । पुनर्जम्भारिमार्गे शक्रपद्धतौ आकाशे । यथा देवमार्गस्तथा देवेन्द्रमार्गोऽपि । तथा 'येनामुना बहुविगाढसुरेश्वरा ध्रू राज्याभिषेकविकसन्महसा बभूवे' इति नैषधेऽपि । जलधरो मेघ आनन्दं जनानां प्रमोदं ददते स्म । 'दद दाने' भ्वादिरात्मनेपदी च । किं कुर्वन् । प्राणिनो जन्तव एव नभोम्बुपा वप्पीहास्तान् प्रीणन् तर्पयन् तृप्तिमुत्पादयन् तेषाम् । पुनः किंभूतः । दुर्वादिनां परवादिनां मिथ्यादृशां दुर्दिनं दुष्टदिवसं पराजयगोचरीकृतत्वान्मेघान्धकारं च प्रविदधत् प्रकर्षेण कुर्वन् । पुनः किंभूतः । बोधस्तत्त्वज्ञानं सम्यक्त्वं वा तदेवाङ्कुरः प्ररोहः । अथ वा बहुवचनम् । बहुजनापेक्षया तत्त्वज्ञानानि सम्यक्त्वानि च त एवाङ्कुरास्तैः करम्बितां व्याप्तामत एव विरजसं विगतरजस्कां पापधूलीभ्यां रहितां चित्तक्षितिं मनोमेदिनीं कुर्वन् सृजन् । पुनः किंभूतः । विश्वेषां जगज्जनानां विस्मयकरीमाश्चर्योत्पादिकाम् । व्याहारा एव वाग्विलासा एव धारामम्भृतवृष्टिं किरन्विस्तारयन् ॥

भवसलिलनिधेरिवैकसेतुं विधिमवलम्ब्य तदागमप्रणीतम् ।
घनसमयदिनान्दिनेश्वरश्रीर्गमयामास मुनीश्वरः क्रमेण ॥ १९५ ॥

तदा तस्मिन् प्रावृट्समये मुनीश्वरो हीरविजयसूरिः क्रमेण पर्युषणादिपरिपाट्या घनसमयदिनान्प्रावृषेण्यवासरान् गमयामासातिक्रामति स्म । किंभूतः । दिनेश्वरश्रीः सूर्यवत्तेजोलक्ष्मीर्यस्य । किं कृत्वा । आगमे सिद्धान्ते उद्यनिर्युक्तियदिनचर्यादिशास्त्रे वा प्रणीतं प्रोक्तं विधिं चातुर्मासिकसाधुसंबन्धिविविधक्रियानुष्ठानादिकमवलम्ब्याश्रित्य । उत्प्रेक्ष्यते—भवः संसार एवानन्तत्वाददृग्गोचरपारत्वात्सलिलनिधिः समुद्रस्तस्य तत्र वा एकमद्वितीयं सेतुमिव । पद्यायाज इति जनप्रसिद्धाभिधानम् ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसीहसीहविमलान्तेवासिनामग्रिमम् ।
सर्गोऽसौ नवमोऽत्र देवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिरचिते संपूर्णतां प्राप्तवान् ॥ १९६ ॥

अत्र हीरसौभाग्यकाव्ये असौ अयमेव यो लिपेर्गोचरीकृतः । नवानां संख्यापूरणो नवमः सर्गः अधिकारविशेषः संपूर्णतां प्राप्तवान् संपूर्णो बभूव ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलविरचितायां स्वोपज्ञहीरसौभाग्यमहाकाव्यवृत्तौ शासनदेवीप्रकटीभवन–गुरुप्रश्न–तदुत्तर–स्वस्थानगमन–चन्द्रतारातमस्तमीविरामदिनकरोदयविजयसेनसूरिसूरिपद–मेघजीऋषिसमागमन–गन्धारनगरादिवर्णनो नाम नवमः सर्गः ।

दशमः सर्गः ।

निःशेषदेशककुदं भुवि भाति दिल्ली-
देशोऽथ केलिनिलयो नलिनालयायाः ।
नाभीभुवा भुजगनिर्जरसद्मसार-
मादाय निर्मित इवैष खनिः सुखानाम् ॥ १ ॥

अथ अकब्बरपातिसाहिमिलनादिप्रारम्भणे भुवि पृथिव्यां गुर्जरजनपदापेक्षया पूर्वस्यां दिशि दिल्लीदेशो मेवातनाममण्डलो दिल्लीमण्डल इत्यप्यभिधा भाति शोभते । किंलक्षणः । निःशेषाणां समस्तानां देशानां जनपदानां ककुदं प्रधानः । 'ककुदं तु प्रधानेंऽसे वृषाङ्के राजलक्ष्मणि' इत्यनेकार्थतिलके । पुनः किंभूतः । नलिने कमले आलयः सदनं यस्यास्तस्याः श्रियः केलये क्रीडार्थं निलयः सौधम् । उत्प्रेक्ष्यते—नाभीभुवा नारायणनाभ्यम्भोजजन्मना ब्रह्मणा भुजगनिर्जरसद्मनोर्नागलोकस्वर्गयोः सारं सम्यग्दलिकपटलीमादाय गृहीत्वा सुखानां सर्वशर्मणां खनिराकरः । एष देशो निर्मितः कृत इव ॥

यस्मिन्विभाति भगिनी तपनाङ्गजस्य
रङ्गत्तरङ्गशिखरोन्मथितारविन्दा ।

देशश्रियः किमपि निर्गलितोत्तरीया
वेणी विभूषणवतीव परिस्फुरन्ती ॥ २ ॥

यस्मिन्दिल्लीमण्डले तपनस्य भानोरङ्गजो नन्दनो धर्मराजस्तस्य भगिनी जामिर्यमुना यमभगिनी ।'कालिन्दी सूर्यजा यमी' इति हैम्याम् । किंभूता । रङ्गन्तश्चलन्तो ये तरङ्गाः कल्लोलास्तेषां शिखराण्यग्राणि तेषून्मथितानि विकसितानि अरविन्दानि पद्मानि यस्याम् । उत्प्रेक्ष्यते—देशश्रियः दिल्लीमण्डललक्ष्म्याः किमपि कथमपि केनापि प्रकारेण निर्गलितं क्वापि निपतितं उत्तरीयमुपरितनच्छादननिवसनं यस्याः तादृशी परिस्फुरन्ती दृग्गोचरीभवन्ती प्रत्यक्षलक्ष्या वेणी कबरीव । किंभूता । विभूषणवती चूडामण्यादिमस्तकाभरणभरविभ्राजिनी ॥

उत्ताननक्र इव वक्त्रकजं कुशाद्या-
वर्ते विभूषयति मध्यमहीममुष्य ।
उत्पत्तिमाकलयतो ददतोऽङ्गिकामा-
न्क्षीरार्णवे क्रतुभुजामिव पादपस्य ॥ ३ ॥
आसेदुषीभिरवने विदुषीभिरिक्षु-
च्छायासु यन्नवकुटुम्बिघनस्तनीभिः ।
कीर्तिर्जगज्जयिरतीशजयोर्जितेव
राजीमतीशितुरगीयत गीतिरुच्चैः ॥ ४ ॥ (युग्मम्)

यस्य दिल्लीमण्डलस्य नवाभिस्तरुणीभिः कुटुम्बिनां कर्षुकाणां घनस्तनीभिः पीनपयोधराभिः अथ वा घटस्तनीभिः जम्भवत्कुचौ यासामित्युन्नतस्तनीभिः वनिताभिर्गीतिर्गानमुच्चैः सातिशायिमधुरध्वनिनागीयत जगे गीता । किंभूताभिः । इक्षूणां रसालानां छायासु निरातपस्थानेषु आसेदुषीभिरुपविष्टाभिः । इत्थं किम् । अवने इक्षुक्षेत्ररक्षणे विदुषीभिर्निपुणाभिः । उत्प्रेक्ष्यते—जगन्ति त्रीणि भुवनानि । सुरासुरनरानित्यर्थः । जयतीत्येवंशीलस्य रतीशस्य मन्मथस्य जयेन पराभवेन क्षौदेनामूर्छोर्जिता स्वीकृता राजीमतीशितुः श्रीनेमिनाथस्य कीर्तिरेवागीयत । राजीमतीशितुः किं कुर्वतः । कुश इति पदमाद्यं यत्र तादृशे आवर्ते । कुशावर्ते देशे इत्यर्थः । उत्पत्तिं जन्म आकलयतः दधतः प्राप्नुवतः । कस्येव । पादपस्येव । यथा क्रतुभुजां देवानां पादपः पारिजातनामा कल्पद्रुमः क्षीरार्णवे दुग्धपयोधौ उत्पत्तिमाकलयति । पुनः किंभूतस्य । स्वर्द्रुमवदङ्गिनां प्राणिनां भविकानां कामानभिलाषान्ददतः यच्छतः । अथ वा । क्षीरार्णवे कल्पवृक्षस्येव कुशावर्तजनपदे जन्माकलयतः । कुशावर्ते किं कुर्वति । वक्त्रकजं वदनारविन्दं उत्तानमुन्नतं नक्रं नासिका तस्मिन्निव । अमुष्य दिल्लीमण्डलस्य मध्य-

महीमन्तरालभूमीं विभूषयति शोभां लम्भयति । मेवातमण्डलमध्ये श्रीनेमिनाथजन्मस्थानं कुशावर्तदेशोऽस्तीत्यर्थः ॥ युग्मम् ॥

संसेवितो द्विरसनैरसुराश्रयश्च
ख्यातो रसातलतया नरकानुषङ्गी ।
एतद्विगानमपनेतुमिदंमिषेण
वासो व्यधायि किसु भोगिगृहेण भूमौ ॥ ५ ॥

भोगिगृहेण नागलोकेन इदंमिषेण अस्य दिल्लीदेशस्य दम्भेन कपटेन भूमौ महीमण्डले वासः स्थितिर्व्यधायि विहिता । उत्प्रेक्ष्यते—एतदिहैव जनैरभिधीयमानमीदृशं वा विगानमपवादमपनेतुं निवारितुमिव । एतत्किम् । यदसौ भोगिगृहो द्विरसनैर्भुजगैः खलैश्च संसेवित आश्रितः । च पुनरसुराणां दैत्यानामाश्रयः स्थानम् । 'असुरा दितिदनुजाः पातालौकःसुरारयः' इति हैम्याम् । पुनः रसातलमित्यनिष्टवाक्यम् । धनपालोऽप्याह—'रसातलं यातु यदत्र पौरुषम्' इति । तत्त्वेन ख्यातः प्रथितः पुनर्नरकस्य नाम्नोऽसुरविशेषस्य । सप्तनरकानां दुर्गतीनामनुषङ्गो मिलनं यस्य ॥

तन्निर्जयोद्यतनिजस्य भयादवेत्य
यातं प्रणश्य बलिसद्म तलेऽचलायाः ।
पृष्ठे विलग्न इव तं विजिगीषुरेष
स्वर्गः क्षितावुपजगाम मिषादमुष्य ॥ ६ ॥

तद्विजिगीषुस्तद्बलेः सद्म नागलोकं विचेतुमिच्छुः पराभवनशीलः । अत एव पृष्ठे पश्चाद्विलग्नः अमुष्य दिल्लीदेशस्य मिषाद्व्याजात् । उत्प्रेक्ष्यते—एष प्रत्यक्षः स्वर्गो देवलोकः क्षितौ क्षोणीमण्डले उपजगाम समागतः । किं कृत्वा । तस्य बलिसद्मनो निर्जये परिभवनविधाने उद्यतस्य उद्यमं विनिर्मिमाणस्य उत्सुकस्य वा । निजस्यात्मनो भयादर्थात्स्वर्गस्य भीतेरचलायाः पृथिव्यास्तले अधस्ताद्भागे प्रणश्य यातं प्रतिभ्रष्टं बलिसद्म नागलोकमवेत्य विज्ञाय । पूर्वं हि बलिसद्म भूलोकस्वर्लोकयोरुपरिष्टादासीत्—इति कविसमयः । यदुक्तं नैषधे—'बलिसद्म दिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः' इति । पश्चादद्वैतविभूतिजाताबलवत्तया क्रतुभुजां भुवनेनाभिभूतं भूतले गतमित्यर्थः ॥

यः पद्मनन्दन इवास्ति हिरण्यगर्भो
रम्याप्सरा हरिरिवाच्युतवत्सलक्ष्मीः ।
रत्नाकरोऽम्बुधिरिवारिरिवात्मयोने-
र्दुर्गान्वितः पविरिवासहजैरजेयः ॥ ७ ॥

यो देशः पद्मनन्दनो विरञ्चिरिव । 'पद्मनन्दनसुतारिरंसुता' इति नैषधे । हिरण्यं

सुवर्णं गर्भे मध्ये यस्य । आकरादौ स्वर्णानां सद्भावात्, कनकभृतकलशानां भूमिगर्भेषु स्थायित्वाद्वा, सुवर्णादीनि गर्भे मध्ये यस्य व्यवहारिणां सौधेषु परःशतपरोलक्षपरःकोटिहिरण्यदर्शनाद्वा । ब्रह्मणस्तु केवलं नामैव । 'हिरण्यगर्भो लोकेशो नाभिपद्मात्मभूरपि' इति हैम्याम् । अस्ति विद्यते । पुनर्यो हरिरिव इन्द्र इव । रम्याणि कमलाकरसद्भावान्मनोज्ञानि अत एवात्प्रधानानि सरांसि तटाका यत्र । हरिस्तु रम्या रन्तुं योग्या कलाकेलिकलाभिर्विलसितुमुचिताः । रमणार्हा इत्यर्थः । अप्सरसो रम्भा-तिलोत्तमा-घृताची-मेनकाप्रभृतयः स्वर्वनिताः यस्य । पुनर्योऽच्युतवन्नारायण इव सह लक्ष्म्या धनधान्यादिविभवेन शोभया वा वर्तते सः । 'समासान्तविधेरनित्यत्वात्कप्रत्ययाभावः' । कृष्णस्तु श्रिया पत्न्या सहितः । पुनर्योऽम्बुधिः पारावारः इव रत्नानां प्रशस्तवस्तूनां रत्नपुरुषाणां नेमिनाथकृष्णबलभद्रादीनां महापुरुषाणामाकर उत्पत्तिस्थानम् । समुद्रोऽपि रत्नाकरः । पुनर्यो देशः आत्मयोनेः स्मरस्य अरिः शंभुरिव दुर्गैरद्रिकोट्टैरन्वितः । शिवस्तु दुर्गया पार्वत्या पत्न्या युक्तः । अर्धाङ्गभाजित्वात् । पुनर्यः पविरिव वज्रवदसह्यैः शत्रुभिरजेयो जेतुमशक्यो वैरिभिरग्राह्यः । वज्रं तु दुर्भेद्यं गिरिष्वप्यकुण्ठत्वात्, सुरासुराणां दुर्जयत्वाद्वा ॥ इति दिल्लीदेशः ॥

दिल्लीति तत्र नगरी न गरीयसीभिः
श्रीभिः क्वचिद्विरहिता रहिता न नीत्या ।
रेजे गिरीशगिरिशृङ्गकृतैस्तपोभिः
प्राप्ता परां श्रियमसौ त्रिशिरःपुरीव ॥ ८ ॥

तत्र तस्मिन्मण्डले दिल्ली इति नाम्नी नगरी पुरी अस्ति । किंभूता । गरीयसीभिः अतिमहतीभिः श्रीभिर्लक्ष्मीभिः क्वचित्कुत्रापि स्थाने न विरहिता न वियुक्ता । पुनः किंभूता । नीत्या न्यायेन न रहिता न वियुक्ता । 'रीत्या' इति पाठे रीत्या मर्यादया उत्तमकुलाद्याचारेण व्यवहारेण वा । उत्प्रेक्ष्यते—गिरीशस्य शंभोः गिरेः कैलासस्य शृङ्गे शिखरे कृतैः स्वस्थित्या विहितैर्निरशनपानादिकष्टतपोभिः कृत्वा परां प्रकृष्टां सर्वोत्कृष्टां वा श्रियं लक्ष्मीं शोभां वा प्राप्ता असौ दिल्ली त्रिशिरसो वैश्रवणस्य पुरी नगरी अलकेव ॥

दम्भोलिपाणिनगरीविभवाभिभाव-
प्रागल्भ्यमाकलयता निजवैभवेन ।
निर्जित्य या बलिगृहं पदमस्य मौलौ
कालीव कासरसुरासहजं ससर्ज ॥ ९ ॥

या दिल्लीपुरी निजवैभवेन आत्मीयाद्वैतलक्ष्म्या । 'स्फुरन्माञ्जिष्ठवैभवः' इति काव्यकल्पलतायाम् । बलिगृहं नागलोकं निर्जित्य पराभूय अस्य बलिगृहस्य मौलौ मस्तके पदं

चरणं स्थानं ससर्ज सृजति स्म। किंभूतेन वैभवेन। दम्भोलिर्वज्रं पाणौ हस्ते यस्य स तस्य सहस्रनेत्रस्य नगर्या अमरावत्या विभवस्य अभिभवनमभिभावस्तत्र प्रागल्भ्यं प्रतिभावत्तां चातुर्यमुद्यममुत्साहं वा आकलयता बिभ्रता पदं चक्रे। केव। कालीव। यथा पार्वती कासरनामानं सुराणां देवानामसहजं विरोधिनं स्वस्यात्मनो विभोर्भावो वैभवम्। अत्र भावेऽण्। तेन वैभवेन सामर्थ्येन महत्त्वेन वा। 'स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम्' इति कल्याणमन्दिरस्तवे। 'विभुः समर्थः' इति तद्वृत्तिः। बालगृहं पातालं निर्जित्य जित्वा अस्य महिषासुरस्य मौलौ मस्तके पदं स्वचरणं चकार। तन्मूर्तेस्तत्प्रकारदर्शनात्॥ इति दिल्ली॥

तस्यां महीहिमकरेण हमाँउनाम्ना
जज्ञे पुरंदरविजित्वरविक्रमेण।
यस्यौजसेव विजितेन पदं मुरारे-
स्तत्तुल्यतां स्पृहयतांशुमता न्यषेवि॥ १०॥

तस्यां दिल्लीनगर्यां हमाँउ इति नाम यस्येति तेन हमाँउनाम्ना महीहिमकरेण क्षोणीरोहिणीरमणेन जज्ञे संजातम्। किंभूतेन। पुरंदरस्य वासवस्य विजित्वरो विशेषेण जयनशीलो विक्रमो बलं यस्य तेन। यस्य हमाँउपातिसाहेरोजसा प्रतापेन विजितेनाभिभूतेन सता। पुनस्तस्य हमाँउप्रतापस्य तुल्यतां सादृश्यं स्पृहयता इच्छता अंशुमता सूर्येण। उत्प्रेक्ष्यते—मुरारेर्नारायणस्य पदं चरणं विष्णुपदं न्यषेवि सेव्यते स्म इव॥

श्रीकाबिलाधिपतिबब्बरपातिसाहि-
पुत्रः पुलोमदमनोऽखिलमुद्गलानाम्।
सूरस्य सूनुमपि निर्मितवान्सदण्डं
कालं करालमपि यः प्रसरत्प्रतापैः॥ ११॥

यो हमाँउपातिसाहिः अभिषेणनेन विनैव प्रसरद्भिर्जगद्व्यापकैर्दशदिक्षु विस्तृतैः प्रतापैः स्वतेजोभिरेव शूरस्य श्लेषचित्रयोः सकारशकारयोरभेदात् भास्करस्य सूनुं नन्दनम्। 'प्रेतात्पतिर्दण्डधरोऽर्कसूनुः' इति हैम्याम्। सुभटस्याङ्गजातमपि करालं मृत्युत्वेन विविधायुधधारकत्वेन भीषणं परेषां भयोत्पादकं कालं कृतान्तं कालवर्णमपि सदण्डं वेत्रिणम्। 'छडीदार' इति प्रसिद्धम्। राजदेयांशयुतं दण्डदायिनमित्यर्थः। निर्मितवान्विधत्ते स्म। केवलं स्वौजसैव, न पुनरभिषेणनादिना सदण्डं विहितवानित्यर्थः। किंभूतः। श्रिया सेनादिविभवेन कलितो यः काबिल इति नामा मुद्गलानां मण्डलो देशविशेषस्तस्याधिपतिः स्वामी यो बब्बरपातिसाहिस्तस्य पुत्रो नन्दनः। पुनः किंभूतः। अखिलानां मुद्गलानां यवनजातिविशेषाणां म्लेच्छानां पुलोमनाम्नो दानवविशेषस्य दमनो व्यापादकः शक्रः। मुद्गलेन्द्र इत्यर्थः॥ इति हमाँउपातिसाहिः॥

तस्याङ्गजोऽभवदकब्बरभूमिभास्वा-
न्भूपालमौलिमणिचुम्बितपादपद्मः ।
शौरेरिवाम्बुधिशयो भुजपञ्जरान्त-
र्विश्रान्तवार्धिवसनाजयराजहंसः ॥ १२ ॥

तस्य हमाँउसाहेरकब्बर इति नाम्ना भूमिभास्वान् परतेजस्तिरस्कारिप्रतापवत्त्वादद्वैतत्वाच्च क्षोणीसहस्ररश्मिरभवत् । 'मध्यंदिनावधिविधेर्वसुधाविवस्वान्' इति नैषधे । क इव । अम्बुधिशय इव । यथा शौरेर्वसुदेवस्य कृष्णः पुत्रो बभूव । किंलक्षणः । भूपालानां महानृपाणां मौलीनां मुकुटानां मणीभिर्माणिक्यैश्चुम्बितमाश्लिष्य समालीढं पादपद्मं चरणकमलं यस्य । पुनः किंलक्षणः । भुजौ स्वबाहू एव पञ्जरं पक्षिरक्षणस्थानं तस्यान्तर्मध्ये विश्रान्तो विश्रामाय स्थितो वार्धिः समुद्रो वसनं वस्त्रं यस्याः एतावता आचतुःसमुद्रान्तपृथिव्या जयः स्वायत्तीकरणं स एव राजहंसो यस्य सः ॥

साम्राज्यमप्यधिगतो निखिलस्य नाक-
लोकस्य लोलुपतया पुनरीहमानः ।
भोक्तुं समग्रमपि मध्यमलोकमेत-
द्व्याजादुवास मघवेव वसुंधरायाम् ॥ १३ ॥

एतद्व्याजादकब्बरसाहिकपटात् । उत्प्रेक्ष्यते—वसुंधरायां विश्वंभरावलये मघवा शक्र इवोवास वसति स्म । किंभूतः । निखिलस्य समस्तस्यापि नाकलोकस्य स्वर्गस्य साम्राज्यमाधिपत्यम् । 'सम्राट् तु शास्ति यो नृपान्' इति हैम्याम् । अतः सर्वेषामपि विमानाधिपतिनाकिनायकानामैश्वर्यमधिगतः प्राप्तोऽपि । 'अधिगतं विधिवद्यदपालयत्' इति रघुवंशे । 'अधिगतं प्राप्तम्' इति तद्वृत्तिः । पुनर्लोलुपतया अधिकाधिकसंपदैश्वर्यस्पृहयालुतया समग्रं समस्तमपि मध्यमलोकं पातालदेवलोकयोरध उपरि च वर्तमानयोर्मध्येऽन्तराले वर्तिनं लोकं भुवनं मध्यमलोकं सकलसमुद्रमेखलामण्डलं भोक्तुं स्वभोगविषयं विधातुमीहमानो वाञ्छन्निवेति गर्भितोत्प्रेक्षा ॥

अथास्य दिग्विजयविधित्सया प्रस्थाने वैरिणामुत्पाताविर्भावः—

यात्रासु यस्य चतुरङ्गचमूप्रचार-
प्रोद्धूतधूलिपटलैः परितः प्रसस्ते ।
प्रस्थानमस्य दशदिग्विजयाय जाने
यातैरितः कथयितुं हरितां महेन्द्रान् ॥ १४ ॥

यस्याकब्बरपातिसाहेर्यात्रासु परजनपदजिघृक्षया प्रस्थानेषु चत्वारि चतुःसंख्याकान्यङ्गानि साधकानि गजवाजिरथपदातिलक्षणाः प्रकाराः स्कन्धा यस्यास्तादृश्याश्चम्वाः

सेनायाः प्रचारेण प्रकर्षेण चलनेन प्रोद्भूतानां प्रबलतयोत्थितानां धूलीनां भूमिरजसां पटलै राशिभिः परितः सर्वदिक्षु प्रसस्रे प्रसृतम् । तत्राहमेवं जाने वेद्मि । उत्प्रेक्ष्यते वा—दशानां दशसंख्याकानाम् पूर्वाग्निदक्षिणनैर्ऋतपश्चिमावायूत्तरेशानाधोभुवनोर्ध्वलोकानां दिशां ककुभां विजयाय स्वायत्तीकरणार्थमस्य पातिसाहेः प्रस्थानं दिग्जैत्रयात्रां हरितां दशानामाशानां महेन्द्रान्पुरंदरान् । 'पतिः प्रतीच्या इति दिङ्महेन्द्राः' इति नैषधे । इन्द्राग्नियमराक्षसवरुणपवनकुबेरेशाननागेन्द्रब्रह्माभिधान्दिक्पालान् प्रति कथयितुं निवेदयितुमितो भूमण्डलाद्यातैरुड्डीय यातैः गतैरिव ॥

यत्प्रस्थितौ रथहयद्विपपत्तिवीङ्खा-
प्रोत्खातपांसुपिहिताखिलदिङ्मुखेषु ।
आक्रन्दि चक्रमिथुनैरथ पांसुलाभिः
प्राह्लादि पल्लवितमन्तरुलूकलोकैः ॥ १९ ॥

यस्याकब्बरपातिसाहेः प्रस्थितौ दिग्जैत्रयात्रायां प्रयाणावसरे रथाः स्यन्दना हया वाजिनः द्विपा हस्तिनः पत्तयः पदातयः पादचारिणस्तेषां वीङ्खाभिश्चङ्क्रमणैः बाहुल्यात्सर्वदिक्संचरणैः कृत्वा प्रोत्खातैरुत्थापितैः पांसुभिर्धूलीपटलीभिः पिहितान्यावृतानि आच्छादितानि । जनदृशामगोचरीकृतानीत्यर्थः । अखिलानि समग्राणि दिशां हरितां मुखानि विभागास्तेषु सत्सु सजलजलदपटलसंचलितरजनीजनितान्धकारप्रचारभ्रान्तेश्चक्राणां चक्रवाकानां मिथुनैर्द्वन्द्वैराक्रन्दि परस्परवियोगाशङ्कया दुःखादाक्रन्दोऽक्रियत । मुक्तकण्ठं रुरुदे इत्यर्थः । अथ पुनः पांसुलाभिर्व्यभिचारिणीभिस्तरुणीभिः प्राह्लादि प्रमुमुदे । घनान्धकारसमये हि तासां स्वेच्छाविहरणोत्साहस्पृहा पूर्णा स्यात् । पुनरुलूकलोकैर्घूकप्रकरैरन्तश्चित्तमध्ये पल्लवितमुच्छ्वसितम् । निशि तेषां स्वैरसंचारत्वात् । 'आलोकतालीकमुलूकलोकः' इति नैषधे ॥

बलवति भूमण्डलाखण्डले दिग्विजयाय प्रतिष्ठमाने सति भाविपराभवाः प्रतीपपृथ्वीपालाः भूकम्परजोवृष्टिदिग्दाहरविमण्डलच्छिद्रादिकानुत्पातान्पश्यन्तीति अत एवादौ त एव प्रोच्यन्ते—

धत्ते स्म कम्पमभिषेणयति क्षितीन्द्रे
यस्मिन्प्रतीपपृथिवीपुरुहूतपृथ्वी ।
यस्मादतः परमसौ भविता पतिर्मे
प्रीतेर्हृदन्तरिति निर्मितताण्डवेव ॥ १६ ॥

यस्मिन्नकब्बरनाम्नि क्षितीन्द्रे वसुधावलयवासवे अभिषेणयति रिपुपार्थिवान्प्रति पताकिनीभिरभिगच्छति सति प्रतीपाः प्रतिभटा ये पृथिवीपुरुहूताः वसुमतीबिडौजसः तेषां पृथ्वी वसुंधरा कम्पं वेपथुं चञ्चलतां धत्ते स्म दधौ । भूः कम्पते स्मेत्यर्थः । उत्प्रेक्ष्यते—इति हेतोर्हृदन्तः स्वमानसमध्ये प्रीतेः प्रमोदादिव । सम्यङ्नि-

जचेतोभिप्रेतभर्तरि स्नेहाद्वा निर्मितं कृतं ताण्डवं नृत्यं यया तादृशीव । इति किम् । यस्मात्कारणादतः परमद्यतनवासरादारभ्य असौ सकलराजचक्रचूडामणीरद्वैतनीतिमतामग्रणीरकब्बरक्षोणीनभोमणीर्मम भर्ता भावी भविष्यति ॥

संप्रस्थिते वसुमतीविजयाय यस्मि-
न्भूपैर्विरोधिभिरदृश्यत दिक्षु दाहः ।
जाने निजव्यसनवीक्षणभूतनूता(त्ना)-
सातस्वदिग्युवतिनिःश्वसिताग्निकीलः ॥ १७ ॥

यस्मिन्नकब्बरनृपतौ वसुमत्या वसुंधराया विजयाय स्वायत्तीकरणार्थं संप्रस्थिते सम्यग्विजयविधायिमुहूर्तदिने चतुरङ्गचमूचक्रेण समं निर्मितप्रस्थाने सति । प्रचलिते सतीत्यर्थः । विरोधो विद्यते येषां ते विरोधिनस्तैर्विपक्षैर्भूपैः क्षोणीपालैर्दिक्षु सर्वाशासु दाहो ज्वलज्ज्वालादि ज्वालामालाकुलत्वमदृश्यत दृष्टः । सर्वा अपि हरितो ज्वलन्त्यो दृष्टा इत्यर्थः । तत्राहमेवं जाने विदांकरोमि उत्प्रेक्षे वा निजानामात्मीयानामर्थादकब्बरपरिपन्थिपूर्वादिदिक्पतिनृपतीनां व्यसनानां भाविमरणावधिविपत्तीनां वीक्षणेन दीर्घदर्शितया अवलोकनेन ज्ञानेन कृत्वा भूतमुत्पन्नं यन्नूत्नं नवीनमसातं दुःखं यासां तासां स्वेषां तत्तद्दिक्पतिनृपाणां दिशामेव युवतीनां प्रियाणां निःश्वसिताग्नेर्निःश्वासानिलस्य कीलो ज्वालेव । कीलशब्दोऽकारान्तोऽप्यस्ति । 'त्रिनेत्रनेत्रानलकीलनीलम्' इति नैषधे । तथा 'वल्लरशफरमयूरकीलद्दालाः' इति लिङ्गानुशासने पुंस्त्रीलिङ्गे कीलः कीला ॥

भूपेऽभिषेणयति यत्र रजोभिवृष्ट्या
दृष्टा दिशः परनृपैर्मलिनाः समग्राः ।
स्वस्वामिसंकटसमीक्षणमूर्छनोर्वी-
निष्पातधूसरितगात्रलता इवैताः ॥ १८ ॥

यत्र यस्मिन्भूपे अकब्बरनृपे अभिषेणयति सति सेनाभिः समं प्रतिनृपतीनभिगच्छति सति परनृपैः प्रतिभटभूपालकलापै रजोभिवृष्ट्या अतिबहुलानां धूलीनामभि समन्ताद्वर्षणेन कृत्वा मलिनाः कश्मलाः मलीमसाः समग्राः समस्ता अपि दिश आशा दृष्टाः । उत्प्रेक्ष्यते—एता दिशः स्वासामात्मीयानां स्वामिनां भर्तृणां संकटानां व्यसनानां समीक्षणेन सम्यङ्निश्चितत्वेनावलोकनेन कृत्वा मूर्छनैर्दुःखोद्भूतातुच्छमूर्छाभिरुर्व्यां भूमौ निष्पातो निष्पतनं लुण्ठनं वा तेन धूसरिता ईषत्पाण्डुरिता धूलीलुलिता वा रजोमया वा जाता गात्रलताः शरीरयष्टयो यासां तादृश्य इव ॥

यन्मेदिनीकुमुदिनीरमणप्रयाणे
छिद्रं न्यभालि परिपन्थिभिरभ्रपान्थे ।

मद्वंशजक्षितिरथोदयिनी हृदन्त-
र्दुःखप्रकर्षत इति स्फुटितोरसीव ॥ १९ ॥

कुमुदिनीनां कैरविणीनां रमणो वरयिता कुमुदिनीरमणः। मेदिन्या धरण्याः कुमुदिनीरमणः स चासौ कुमुदिनीरमणश्च। 'इदं तमुर्वीतलशीतलद्युति' इति नैषधे। तस्य प्रयाणे स्वरिपूपरि प्रस्थाने परिपन्थिभिः प्रत्यर्थिभिरर्थात् पृथिवीनाथैरभ्रपान्थे गगनपथिके भास्करे। 'हरिः शुचीनौ गगनाद्ध्वजाध्वगौ' इति हैम्याम्। सूर्यमण्डले इत्यर्थः। छिद्रं विवरं न्यभालि ददृशे दृष्टम्। उत्प्रेक्ष्यते—अथाकब्बरसाहेरागमनानन्तरं मद्वंशे मदीयान्ववाये जायन्ते स्म उत्पद्यन्ते स्मेति मद्वंशजाः सूर्यवंशीयास्तेषामेतावता सूर्यवंशोत्पन्नानां भूपालानां राजन्यवीराणां च क्षितिः क्षयो विनाश उदेष्यति भविष्यतीत्येवंशीला उदयिनी भाविनी इति हेतोर्हृदन्तश्चित्तमध्ये दुःखस्य प्रकर्षतोऽतिशयतः स्फुटितं द्विधाभूतं सच्छिद्रं वा जातमुरो हृदयं यस्य तादृश इव। 'पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पार्थिवैः' इति नैषधे। म्रियमाणा रणे सूर्ये छिद्रं पश्यन्तीत्यरिष्टवेदिनः। यद्वा। 'द्वावेतौ पुरुषौ लोके सूर्यमण्डलभेदिनः। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः॥' इत्युक्तत्वात्। 'स सूर्ये छिद्रं निरीक्षते' इति तु तद्वृत्तिः। ततो भानौ रन्ध्रनिभालनमिति॥ इति प्रतीपनृपतीनामरिष्टाविर्भावना॥

यस्य प्रसृत्वरयशःशरभूसवित्री
स्वःकूलिनीव करवाललता बभूव।
यस्यां निमज्ज्य रिपुराजपरम्पराभि-
र्येनान्वभावि दितिजद्विषतां विभूतिः॥ २०॥

यस्याकब्बरसाहेः करवाललता खड्गयष्टिः स्वःकूलिनी मन्दाकिनीव बभूव जाता। किंभूता। प्रसृत्वरं विश्वविस्तरणशीलं यद्यशः कीर्तिः तदेव शरभूः स्वामिकार्तिकस्तस्य सवित्री जननी येन कारणेन। यस्यां करवाललतास्वःकूलिन्यां निमज्ज्य ब्रूडित्वा स्नात्वा तदभिमुखमागत्य प्रहृत्य च पञ्चत्वमासाद्य रिपवः शत्रवो जना एव राजानस्तेषां परम्पराभिः श्रेणीभिः दितिजानां दितेरसुरमातुर्जायन्ते स्मेति दितिजास्तेषां द्विषतां वैरिणां देवानां विभूतिः सुरश्रीरन्वभावि अनुभूयते स्म। गङ्गायां रणे च त्यक्तप्राणा देवभूयं भजन्तीति परमतम्। 'मृते चापि सुराङ्गनाः' इत्युक्तेः॥

यस्मिन्रणाङ्गणगते प्रहताहिताश्वाः
शौर्योदयाद्दिवि मुहुर्मुहुरुत्पतन्ति।
भूमौ निजाभिभवतः सवितुः सगोत्रां-
स्तार्क्ष्यानिवाश्रयितुमुत्सुकतां वहन्तः॥ २१॥

यस्मिन्नकब्बरभूपतौ रणाङ्गणं संग्राममध्यं गते प्राप्ते सति प्रहताः शस्त्रप्रहारादिना व्या-

पादिता ये अहितानां प्रतिपक्षिणामश्वास्तुरङ्गमास्ते शौर्योदयात् शूरतायाः प्रादुर्भावान्मुहुर्मुहुः वारं वारं दिवि गगने उत्पतन्ति उच्छलन्ति उच्चैः फालां ददते। उत्प्रेक्ष्यते—भूमौ पृथ्वीपीठे निजस्यात्मनोऽभिभवतः पराभवनोदयात् सवितुः सूर्यस्य पितुर्वा सगोत्रान् स्वजनान्बन्धून् तार्क्ष्यानश्वान् आश्रयितुं शरणीकर्तुमुत्सुकतामुत्कण्ठां वहन्तो धारयन्त इति। विपत्तौ स्वजनाः श्रीयन्ते इति स्थितिः श्रुतिर्वा॥

एतत्कृपाणनिहताहितकुम्भिकुम्भ-
निष्पातिमौक्तिकततिः समरे विरेजे।
दृष्ट्वा हतान्स्वपतिभूमिपतींस्तदीय-
लक्ष्मीक्षणप्रपतदश्रुकणावलीव॥ २२॥

एते अकब्बरसाहिना कृपाणेन निजचन्द्रहासयष्टिना कृत्वा निहता व्यापादिता विदारिता ये अहितानां स्वप्रतिपक्षाणां कुम्भिनां भद्रजातिजातानां कुम्भाः शिरःपिण्डास्तेभ्यो निष्पतति निर्गलति निःसरतीत्येवंशीला निष्पातिनी मौक्तिकानां मुक्ताफलानां ततिर्मालिका समरे संग्रामाङ्गणे विरेजे राजते स्म निर्बभौ। उत्प्रेक्ष्यते—स्वस्यात्मनः पतीन्नायकान् भूमिपतीन्धरणीरमणान् हतानर्थादकब्बरेण स्वविरोधितया यमातिथीकृतान्दृष्ट्वा व्यालोक्य तदीयलक्ष्मीणां प्रत्यर्थिपार्थिवसंबन्धिनीनां श्रीणाम्। राज्यलक्ष्मीणामित्यर्थः। ईक्षणेभ्यो विलोचनेभ्यः प्रपतन्ती प्रकर्षेणाविरलधाराधराम्बुधारायमाणधारं निःसरन्ती अश्रुकणानां बाष्पबिन्दूनामावलीव धोरणिरिव॥

रोमाङ्कुराः समिति यस्य समुच्छ्वसन्ती
संवाससंगतगुणप्रगुणीभवन्तः।
एतद्वदुद्धतविरोधिधराधवानां
हृल्लेखतामिव निशुम्भकृते वहन्तः॥ २३॥

यस्य हमाँउनन्दननृपस्य समिति संग्रामाङ्गणे रोम्णां तनूरुहाम्। लोम्नामित्यर्थः। 'रोमलोमतनूरुहः' इति हैम्याम्। अङ्कुराः प्ररोहाः समुच्छ्वसन्ति उच्चैः संजायन्ते उल्लसन्ति। उत्प्रेक्ष्यते—एतद्वदकब्बरसाहिरिव उद्धता उत्कटा मदोन्मत्ता ये विरोधिधराधवाः प्रत्यर्थिपार्थिवास्तेषां निशुम्भकृते दक्षिणारमणमदिराङ्गणप्राघुणीकरणार्थं हृल्लेखतामुत्कण्ठोद्रेकभावं वहन्तो बिभ्राणा इव। अत एव किंलक्षणाः। संवासेनाकब्बरसाहिदेहे सम्यग्वसनेन सहस्थानेन वा कृत्वा संगता मिलिताः समागता वा ये गुणाः शौर्योत्साहसत्त्वादयस्ते प्रगुणीभवन्तः प्रगल्भा जायमानाः। 'यादृशैः सहवासः संगतिस्तादृशा एवायान्ति गुणाः' इति लोकप्रसिद्धिः। यदुक्तं च—'जौ जारिसेण संगं सो वि हु तारिसो होइ। कुसुमेहिं सह वसंता तिलावि तग्गं धिया हुंति॥' इति सूत्रोक्तिः॥

एतद्दिनेशशशिभूदिनयामिनीभ्यां
सृष्टिं विधातुमखिलां विभुना न वैश्वीम् ।
तादृग्दिनेन्दुदयिताकृतये किमेत-
त्तेजोयशोरविविधू विधिना प्रणीतौ ॥ २४ ॥

विधिना विश्वसृजा विधात्रा तादृश्योरतिमहत्योर्विगलितावधिसमयाभ्युदयभाजोर्दिनेन्दुदयितयोर्दिवसनिशयोः कृतये निर्माणाय । उत्प्रेक्ष्यते—एतस्याकब्बरसाहेस्तेजः प्रतापः । 'निजस्य तेजः शिखिनः परःशताः' इति नैषधे । तथा 'एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने' इत्यपि नैषधे । 'त्वत्तेजसां भवत्प्रतापानाम्' इति तद्वृत्तिः । तथा यशः श्लोकस्तावेव रविविधू सूर्याचन्द्रमसौ प्रणीताविव निर्मापिताविव । किंभूतेन विधिना । एताभ्यां प्रत्यक्षलक्ष्यं विद्यमानाभ्यां दिनरजन्योर्गमागमं कुर्वाणाभ्यां दिनस्य वासरस्य ईशः पतिः । यतः—'परविषयाक्रमणकलाकलाधरस्यैव विषयमायाति । रजनिपतिर्भजति दिनं दिवसपतिर्भजति नो रजनीम् ॥' इति सुभाषितोक्तेः । दिननायको भास्करः शशी मृगाङ्कस्ताभ्यां सकाशाद्भूरुत्पत्तिर्ययोस्तादृश्यौ दिनयामिन्यौ वासरविभावर्यौ ताभ्यां कृत्वा अखिलां समस्तामपि समग्रामपि वैश्वीं जगत्संबन्धिनीं सृष्टिं सर्गं निर्माणं कर्तुं रचयितुं न विभुना तयोर्द्वयोः प्रत्येकं चतुर्यामत्वेनाल्पत्वान्न समर्थेन ॥

यद्वैरिराजकयशोगुणराशिरात्री-
प्राणेशतारकगणेन कदाचनापि ।
द्वीपान्तरं परिचरत्यपि यत्प्रताप-
प्रद्योतने न समवाप्युदयावकाशः ॥ २५ ॥

यस्याकब्बरपातिसाहेः प्रताप एव प्रद्योतनः सहस्रकिरणः तस्मिन् द्वीपान्तरमपरं द्वीपं द्वीपानामष्टादशत्वात् । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । तेष्वन्यतमं कंचिद्द्वीपं परिचरति भजति सति परद्वीपे गतवति अपि सति यद्वैरिराजकस्याकब्बररिपुभूपतिप्रकरस्य । राज्ञां समूहो राजकम् । 'स्याद्राजपुत्रकं राजन्यकं राजकमाजकम्' इति हैम्याम् । यशः श्लोकस्तद्युक्ता गुणानां राशयः समूहास्त एव रात्रीप्राणेशश्चन्द्रमास्तथा तारकाज्योतींषि तेषां गणेन मण्डलेन कदाचनापि कस्मिन्नपि प्रस्तावे उदयस्योद्गमनस्य प्रकटीभावस्यावकाशः समयो वेला नेति नैषधे समवापि संप्राप्तः । जगत्स्वाभाव्यात्सूर्ये द्वीपान्तरं गते अस्तमिते चन्द्रे ग्रहनक्षत्रतारका उदयावकाशं लभन्ते, परमकब्बरप्रतापसहस्ररश्मेर्नायं प्रकारः । यतः अष्टादशस्वपि द्वीपेषु सर्वत्रैव सद्भावः, परमत्र नास्तीत्येवं न तस्मिन् सहस्रांशौ सति चन्द्रादिज्योतिषामुदयावकाशः कुतः स्यादिति ॥

अश्रान्तदण्डनिहताहववादनीय-
वाद्यस्वरैः प्रसृमरैः समरे धरेन्दोः ।

अस्तम्भि वैरिनृपदोर्युगदण्डदर्पः
सर्पेन्द्रदर्प इव गारुडिकस्य मन्त्रैः ॥ २६ ॥

धरेन्दोर्वसुमतीवासतेयीपतेः प्रसमरैः सकलदिक्चक्रविस्तरणशीलैरश्रान्तमनवरतवाद्यवादकमानवैर्दण्डैर्वाद्यवादनयष्टिभिर्निहतानि ताडितानि तथा आहवे संग्रामाङ्गणेषु वादनीयानि वादयितुमुचितानि यानि वाद्यानि रणतूराणि अन्यवादित्राणि वा तेषां स्वरैर्निर्घोषैः कर्तृभिर्वैरिणोऽकब्बरसाहेरसहजा एव नृपाः पार्थिवास्तेषां दोर्युगदण्डानां भुजयामलकुटानां जान्वायतत्वेन दण्डाकारत्वाद्दण्डास्तेषाम् अथ वा बाहुद्वन्द्वानां सैन्यानां च चक्रगरुडादिव्यूहानां वा अश्वानां प्रतिनृपतियानरत्नतुरङ्गमाणां वा उपलक्षणादश्ववाराणां गजरथारोहिणां च। 'दण्डः सैन्ये दमे यमे ॥ मानव्यूहे ग्रहे भेदेष्वश्वेऽर्कानुचरे मथि। प्रकाण्डे लकुटे कोणे चतुर्थोपायवर्गयोः ॥' इत्यनेकार्थः । दर्पोऽभिमानोऽस्तम्भि स्तम्भ्यते स्म निराकृतः । जडीकृताः सर्वेऽपीत्यर्थः । कैरिव । मन्त्रैरिव गारुडं स्थावरजङ्गमविषनिवारणप्रवणमन्त्रतन्त्रादिशास्त्रमर्थ्यते वेत्ति वेति गारुडिकः तस्य मन्त्रैर्जाङ्गुलीप्रमुखैः सर्पेन्द्रस्य नागराजस्य दर्पो गर्वो विषवेगाहंकारः स्तम्भ्यते ॥

यत्कीर्तिविद्विषदकीर्तिहतप्रतीपा-
सृक्पङ्क्तिजह्नुतरणिद्रुहिणाङ्गजाभिः ।
जन्यावनीयदवनीशशिनस्त्रिवेणी-
सङ्गः किमाविरभवत्त्रिदिवाभिकानाम् ॥ २७ ॥

यस्यासावकब्बराभिधानस्यावनीशशिनो वसुधासुधांशोर्जन्यावनी संग्राममेदिनी । उत्प्रेक्ष्यते—त्रिदिवाभिकानां सुरलोकाभिलाषुकाणाम् । 'कामुकः कमिता कम्रोऽनुकामयिताभिकः' इति हैम्याम् । वीराणां तिसृणां वेणीनां तरङ्गिणीप्रवाहानां सङ्गो मिलनं गङ्गायमुनासरस्वतीसङ्ग इव आविरभवत् प्रकटीबभूव। वनिकाभिः कृत्वा यस्य साहेः कीर्तिः प्रसरद्यशस्तथा विद्विषामकब्बरपातिसाहिपुरो रणे भग्नानां प्रत्यर्थिपार्थिवानामकीर्तिरपयशः । तथा च हता अकब्बरनरेन्द्रेणैव रणाङ्गणे व्यापादिता ये प्रतीपाः परिपन्थिपृथिवीनाथास्तेषामसृजां रुधिराणां पङ्क्तयः श्रेणयस्ता एव जह्नोर्विष्णोस्तथा तरणेर्मार्तण्डस्य । तथा च द्रुहिणस्य ब्रह्मणः अङ्गजा नन्दिन्यः। जह्नुनन्दना गङ्गा तरणितनया यमुना द्रुहिणोद्वहा सरस्वती । सरस्वती सरित्परसमये शोणसलिला प्रोच्यते । ततोऽसृगानयनम् । ताभिः एता एकत्रमिलितास्त्रिवेणीसङ्गोऽजनि ॥

यत्संप्रहारहतहास्तिकमस्तकान्त-
र्निष्पातिशुक्तिजततिर्युधि पौस्फुरीति ।
दन्तावली प्रकटिता शमनेन जन्या-
पाने विरोधिरुधिरासवपायिनेव ॥ २८ ॥

येन साहिना संप्रहारे समरे सम्यक्परविल्लवकारि प्रहारेण वा हतानि निर्दलितानि हास्तिकानि मतङ्गजव्रजाः । हस्तिनां समूहो हास्तिकम् । 'हास्तिकं तु हस्तिनां स्यात्' इति हैम्याम् । समूहार्थेऽण् । तेषां मस्तकानि कुम्भस्थलानि तेषामन्तर्मध्याद्भद्रजातिजनितत्वेन शिरःपिण्डान्तरालान्निष्पातिनां निःशेषेण निरन्तरं वा पतनशीलानां शुक्तिजानामामलकप्रमाणमुक्ताफलानां ततिर्धोरणी समरे संग्रामे विरेजे विशेषेण भाति स्म । उत्प्रेक्ष्यते—जन्यापाने रणाङ्गणरूपवारुणीपानगोष्ठीस्थाने । 'आपानं पानगोष्ठी स्यात्' इति हैम्याम् । विरोधिनामकब्बरप्रतिभटभटानां रुधिराणि प्रहरणमहाप्रहारप्रवहदप्रमाणशोणितान्येवासवो मदिराः पिबतीत्येवंशीलेन शमनेन यमेन प्रकटिता जनदृग्गोचरीकृता दन्तावली दशनश्रेणिरिव ॥

एतद्भुजारणिसमुत्थमहो हुताश-
ज्वालाज्वलद्बहलबाहुजवंशराशेः ।
उद्गत्वरैः प्रसृमरैरिव धूमवारै-
राविर्बभूव शितिमा दिविषत्पदव्याम् ॥ २९ ॥

एतस्याकब्बरसाहेर्भुजो दोर्दण्डः स एवारणिरग्निकाष्ठं तस्मात् सम्यक् मित्राणां शारदीनसुधाकरतया अमित्राणां परिवर्तप्रचण्डकिरणतया उत्था उत्थानं यस्य तादृशं यन्महः प्रबलप्रतापः स एव हुताशो ज्वलज्ज्वालस्तस्य ज्वालाभिरभ्रंकषशिखाभिर्ज्वलन्तो दह्यमाना भस्मीभवन्तो वा ये बहला भूयिष्ठा अतिशयेन बहवः । 'बहोरिष्ठेयिः बहोश्च भूवादेशः' । बाहुजा राजन्याः । 'राजन्यो बाहुसंभवः' इति हैम्याम् । साहिविपक्षपक्षलक्षास्तेषां वंशा अन्वयास्त एव वंशा वेणवो वा तेषां राशिः समूहः तस्मादुद्गत्वरैरुत् ऊर्ध्वं गमनशीलैः उच्चैर्निर्यायिभिरुत्थितैर्वा तथा प्रसृमरैर्जगद्व्यापनशीलैर्धूमवारैर्वायुवाहव्रजैः । 'स्याद्वायुवाहोऽग्निवाहो दहनकेतनः' इति हैम्याम् । उत्प्रेक्ष्यते—दिविषत्पदव्यां देवमार्गे गगनाङ्गणे शितिमा श्यामता आविर्बभूव प्रकटीभूता । प्रायो वंशेषु दह्यमानेषु प्रबला धूमाः प्रादुर्भवन्ति बहुभिश्च दहनकेतनैर्गृहाद्युपरितनभागे च मेचकिमा भवेदिति प्रत्यक्षमेव दृश्यते ॥

यस्याशुगः प्रसरदाशुगवन्निषङ्गा-
त्कर्षागमेषु लघुहस्ततया कदाचित् ।
नालक्ष्यताक्षिभिरपि प्रतिपक्षलक्षै-
रङ्गे लगन्पुनरबुध्यत युद्धमूर्ध्नि ॥ ३० ॥

यस्य साहेराशुगो बाणः । जातावेकवचनम् । युद्धमूर्ध्नि संग्राममस्तके प्रतिपक्षलक्षैः परिपन्थिकपृथिवीवासवशतसहस्रैः लघुहस्ततया शीघ्रवेधित्वेन निषङ्गात्तूणीरात् आकर्षा आकर्षणानि तथा आगमा आगमनानि तेषु कदाचिदपि कस्मिन्नपि समये प्रस्तावे

अक्षिभिरात्मीयविलोचनैरपि नालक्ष्यत न दृश्यते स्म । क इव । प्रकर्षेण सरन् चलन् गच्छन्नाशुगवत् वायुरिव । यथा पवमान आगच्छन्न लक्ष्यते परं पुनरङ्गे काये लगन् प्रहृत्य मध्ये प्रविशन् सोऽबुध्यत ज्ञायते स्म ॥

यं स्वर्णकायमरिनागनिपातनिष्णं
दृष्ट्या निपीय हरिवाहनबद्धलीलम् ।
चित्रं किमत्र यदरातिमहीन्द्रबाहु-
कुम्भीनसैः समरमूर्ध्नि जडीबभूवे ॥ ३१ ॥

स्वर्णं जाम्बूनदं तत्सदृशो गौरवर्णत्वात्कायस्तनूलता यस्य तम्, तथा अरिषु परिपन्थिषु नागाः प्रधानाः । 'सिंहशार्दूलनागाद्याः । स्युरुत्तरपदे प्रख्याः प्रशस्तार्थप्रकाशकाः ॥' इति हैम्याम् । महीपालास्तेषां निपाते यमधामाजिरातिथीकरणे निष्णं निपुणम्, तथा हरिरश्व एव उपलक्षणाद्गजोऽपि वाहनं यानं तत्र बद्धा रचिता लीला क्रीडा वाह्याली-काद्या परस्परसंप्रहारादिका येन तादृशं यं पातिसाहिमकब्बरं दृष्ट्या विलोचनेन निपी-यापीय । भयविह्वलतरलकातरदृशा दृष्ट्वेत्यर्थः । यदरातयः यस्य विपक्षकक्षामङ्गीकुर्वाणा एव महीन्द्रा महामेदिनीमघवानस्तेषां बाहवो दोर्दण्डा एव कुम्भीनसा भुजंगमास्तैर्ज-डीबभूवे प्रहरणग्रहणबाणक्षेपणादिप्रकारे निश्चेष्टैः संजातम् । किंकर्तव्यतामूढैरिव आलेख्यलिखितैरिव वा निर्व्यापारैर्जज्ञे । अत्र प्रकारे किं चित्रं को विस्मयः । यद्गरु-डदर्शनादेव तत्कालं व्याला अपि जडीभवन्ति एव । गरुडः किंलक्षणः । सुवर्णस्य कायः पक्षप्रभृति शरीरं यस्य । तथा अरिभूताः शत्रुभावं प्राप्ता ये नागा भुजगास्तेषां निपाते नितरां पाते निष्णो निपुणः । तथा हरेर्गोविन्दस्य वाहनत्वे यानभावे बद्धा निर्मिता लीला विलासो येन ॥

यस्याशुगान्प्रणयतः प्रतिभूपतीनां
प्राणान्सुराध्वनि विधाय रविं शरव्यम् ।
आजिः सकार्मुककरस्य खलूरिकेव
रन्ध्रं रवौ रिपुभिरैक्षि न चेत्कुतस्त्यम् ॥ ३२ ॥

यस्याकब्बरस्य राज्ञः आजिः संग्रामभूमिः खलूरिका शस्त्राभ्यासभूरिवाभूद्बभूव । यस्य किं कुर्वतः । सुराध्वनि गगनाङ्गणे रविं मार्तण्डमण्डलं शरव्यं वेध्यं विधाय कृत्वा प्रतिभूपतीनां प्रतिपक्षक्षोणीपालानां प्राणाञ्जीवितानि आशु त्वरिततरं गच्छन्ति परलोकं यान्तीत्याशुगाः शीघ्रगामिनः शराश्च तान्प्रणयतः सृजतः । यस्य किंभूतस्य । सह कार्मु-केन कोदण्डेन वर्तते यः स तादृशः करः पाणिर्यस्य । एवं चेन्न तर्हि रिपुभिः परि-पन्थिपृथ्वीपतिभिः रवौ सूर्यबिम्बे रन्ध्रं छिद्रं कुतस्त्यं कुतोभवमैक्षि विलोकितं दृष्टम् ॥

येनाहवे प्रणिहतात्मपतिप्रवृत्तिं
कृत्वा स्वकर्णपथिकीं परिपन्थिकान्ताः ।

वक्षःशिलाः स्म विलिखन्ति नखाग्रटङ्कैः
कीर्तिप्रशस्तिमिव भूभृदकब्बरस्य ॥ ३३ ॥

परिपन्थिनां शात्रवधरित्रीभृतां कान्ताः प्रेयस्यः वक्षांसि हृदयान्येव शिलाः पृथुलपाषाणास्ता नखानां स्वकरजानामग्राणि शिखा एव टङ्काः पाषाणोत्कीर्णनकराण्यायसोपकरणानि टङ्कणकानीति प्रसिद्धास्तैर्विलिखन्ति विदारयन्ति स्म । उत्प्रेक्ष्यते—भूभृतो राज्ञोऽकब्बरस्य नृपस्य कीर्तिर्यशस्तस्याः प्रशस्तिर्जगद्विजयकरणवर्णनवर्णावली तामिव । किं कृत्वा । येन पातिसाहिनाहवे महाविग्रहे प्रणिहता यमराजगृहाङ्गणावगाहिनो विहिता ये आत्मनां स्वासां पतयः प्राणनाथास्तेषां प्रवृत्तिं वार्तां स्वेषामात्मीयानां कर्णानां श्रवणानां पथिकीं पाथीप्राघुणकीं कृत्वा । श्रुत्वेत्यर्थः ॥

एतद्भवन्निजनिशुम्भभविष्णुशङ्का-
तङ्काकुलीकृतवनेचरवैरिवध्वः ।
रङ्गत्प्रपा इव पयोधरशातकौम्भ-
कुम्भाश्च्युताश्रुजलपूरितनेत्रपात्रः ॥ ३४ ॥

एतस्मादकब्बरधरणीधरात् भवन्नुत्पद्यमानो यो निजस्य स्वात्मनः निशुम्भो वधस्तस्माद्भविष्णुर्भवनशीला या शङ्का अनिष्टसंभावनं तया आतङ्को भयं तेनाकुलीकृता विह्वला जाता अत एव वने गिरिगहने निकुञ्जे वा चरन्ति संचारिणो वनेचरा ये वैरिणो विपक्षक्षितिपालास्तेषां वध्वः स्त्रियः रङ्गन्त्यः संचरन्त्यः । जंगमा इत्यर्थः । प्रपाः पानीयशाला इवासन्बभूवुः । किंभूताः । पयोधरा उच्चकुचाः सलिलधारिणः । जलभृता इत्यर्थः । शातकौम्भाः सुवर्णसंबन्धिनः कुम्भाः कलशा यासु यासां वा । पुनः किंभूताः । च्युतानि दुःखप्रकर्षाद्विलोचनेभ्यो निःसरन्ति यान्यश्रूणि बाष्पाणि तेषां जलै रुदननीरभरैः पूरितानि निर्भरभृतानि नेत्राणि नयनानि एव पात्राणि पर्णानि भाजनानि यासां यासु वा । 'पात्रं तु कूलयोर्मध्ये पर्णे नृपतिमन्त्रिणि । योग्यभाजनयोर्यज्ञभाण्डे नाट्यानुकर्तरि ॥' इत्यनेकार्थः ॥

यस्याहवोऽजनि घनाघनवत्कृपाण-
विद्युत्पतत्समददन्तिमदाम्बुधारः ।
भल्लीनिकृत्तरिपुशोणितसिन्धुवेणी-
रुड्डीनपांसुपिहिताखिलदिग्विभागः ॥ ३५ ॥

शून्यं सृजन्भुवनमप्यरिकीर्तिहंसः
श्रेण्या कुले द्विषति दुर्दिनमादधानः ।

विद्रावयन्परवधूवदनाम्बुजानि
शूरद्रुमान्पुलककोरकितान्प्रकुर्वन् ॥ ३६ ॥ (युग्मम्)

यस्य जलालदीनसाहेराहवः संग्रामो घनाघनवन्मेघ इवाजनि संजज्ञे समभूत्। किंभूतः। कृपाणाः शाणशिखरोल्लिखितनिशितझगझगितिकान्तिकरवाला एव विद्युतस्तडिद्वितानानि यत्र। पुनः किंभूतः। पतन्त्यः कपोलपालीभ्योऽविरलं निःसरन्त्यः समदानां मदोद्धुराणां दन्तिनां दन्तावलेन्द्राणां मदाम्बूनां दानजलानां धारा वृष्टयो यत्र। पुनः किंभूतः। भल्लीभिः शस्त्रविशेषैः। 'तिमिरकरिकुम्भभेदनभल्लीष्विव दीपकलिकासु' इति चम्पूकथायाम्। निकृत्ताश्छेदिता ये रिपवो विपक्षास्तेषां शोणितानि रुधिराणि एव सिन्धूनां नदीनां वेणयः प्रवाहा यत्र। 'उच्छृङ्खलं चलन्तीनामसृग्जलधियोषिताम्' इति पाण्डवचरित्रे। वेणीशब्दो दीर्घो ह्रस्वोऽप्यस्ति। पुनः किंभूतः। उड्डीनैरूर्ध्वंगतैर्दशदिग्विस्तृतैः पांसुभिः गजवाजिरथपत्तिप्रकराणामितस्ततस्त्वरितसंचरणैरुत्खातैर्भ्रमदभ्राभ्रकविभ्रमायमाणै रजोव्रजैः पिहिता आच्छादिता अदृग्गोचरीकृता अखिलानां समस्तानां दिशां हरितां विभागाः प्रदेशा यत्र। अपि पुनः किं कुर्वन्। अरीणां शत्रूणां कीर्तय एव हंसास्तेषां श्रेण्या धोरण्या कृत्वा भुवनं विश्वं पानीयम्। 'भुवनं वनं घनरसो यादोनिवासोऽमृतम्' इति हैम्याम्। शून्यं रिक्तं च सृजन् कुर्वन्। प्रायः प्रावृषि राजहंसा मानससरसि यान्ति। प्रावृड्वृष्ट्या बहलजम्बालागमेन जलकालुष्यान्नान्यजलाशयेषु तिष्ठन्तीति। पुनः किं कुर्वाणः। द्विषति वैरिणि कुले वंशे विपक्षान्ववाये दौस्थ्याद्दौर्भाग्यवनवासपुत्रकलत्रमित्रप्रमुखस्वजनजनवियोगादिरूपं दुर्दिनं कुदिवसं दुष्टं दिनं मेघान्धकारं वादधानः निर्मिमाणः। 'वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः' इति नैषधे। पुनः किंभूतः। परेषां पथिकपृथ्वीनायकानां वधूनां पुरंध्रीणां वदनान्येवाम्बुजानि तामरसानि विद्रावयन् म्लानिं प्रापयन् गतप्रायाणि सृजन्। 'विद्राणपङ्कजरसे' इति चम्पूकथायां वर्षावर्णने। पुनः किंभूतः। शूराः सुभटा एव द्रुमा वृक्षास्तान्पुलकेन रोमाञ्चेन रोमहर्षणेन संनिभाश्च कोरकाः कुड्मलाः संजाता एष्विति कोरकितास्तथाविधान्प्रकर्षेण कुर्वन्। 'कदाचिदच्युत इव शिशिरकमलाकरगाहोत्पन्नपुलककोरकिततनुः' इति चम्पूकथायाम्। शूरा हि साहिशौर्यं श्रुत्वा रोमाञ्चकञ्चुकिता जायन्ते इत्यर्थः॥ युग्मम्॥

एतत्तुरङ्गमगणा दिवि संपराये
प्रोत्तालफालललितं कलयांबभूवुः।
जित्वा धरां विबुधधाम पुनर्जिघृक्षोः
संलक्ष्य तत्क्षणमिवाशयमात्मभर्तुः॥ ३७॥

संपराये संग्रामे एतस्याकब्बरनृपतेस्तुरङ्गमगणा वाजिव्रजा दिवि मरुन्मार्गे प्रोत्तालं शीघ्रम्। 'उतावळं' इति प्रसिद्धिः। तथा 'चलद्वलयमुखरकरतलोत्तालतालिका-

रम्भरमणीयरसिकरासकक्रीडानिर्भराः' इति चम्पूकथायां भिल्लीवर्णने । फालानामुच्चैर्गतिविशेषाणां ललितं विलासं कलयांबभूवुः । 'सान्द्रोत्फालमिषाद्धि गायति पदास्प्रष्टुं तुरङ्गोऽपि गाम्' इति नैषधे । उत्प्रेक्ष्यते—धरामासमुद्रपर्यन्तपृथिवीं जित्वा आत्मसाद्विधाय पुनरधिकलिप्सोरत एव विबुधधाम स्वर्गं जिघृक्षोर्गृहीतुमिच्छोरात्मभर्तुः स्वस्वामिनोऽकब्बरधरित्रीवरयितुः तत्क्षणं तत्कालं त्वरिततरमेवाशयमभिप्रायं संलक्ष्य विज्ञाय वोच्चैः स्वर्गदिग्विभागे यातुं प्रगल्भन्ते ॥

एतद्भवद्भयगृहीतदिशो दिगीशा
　निःस्वाननिःस्वनभरः प्रतिभूरिवान्तः ।
भूत्वात्मनाह्वयनिवावनिपद्मिनीश-
　मेनं पुनः प्रणतिगोचरतां प्रणेतुम् ॥ ३८ ॥

निःस्वानानां राजवाद्यानां 'नीसाण, दमांमा वा' इति लोके प्रसिद्धानां निःस्वनभरः प्रबलनिर्घोषः पुनर्द्वितीयवारमेनमकब्बरम् अवनिपद्मिनीशं मेदिनीमण्डलमार्तण्डं प्रणतिगोचरतां नमस्कृतेर्विषयतां प्रणेतुं निर्मातुम् । उत्प्रेक्ष्यते—दिगीशान् हरित्पतीन् आह्वयन्नाकारयन् इव । किं कृत्वा । अन्तः अकब्बरसाहिहरिन्महेन्द्राणां मध्ये प्रतिभूरिव साक्षीवात्मना स्वेन भूत्वा । यदा चान्तराले कश्चित्तथाविधः प्रतिभूर्भवेत् तदा एकस्य कस्याविरुद्धवत् स्यादिति हेतोः स्वयमेव साक्षीभूयाखिलान्दिक्पालानाकारयति । किंभूतान् दिगीशान् । एतस्मादकब्बरपातिसाहेरुद्भवत उत्पद्यमानाद्भयादातङ्कया गृहीता उपात्ता दिश आशा यैस्ते गृहीतदिशस्तान् । पलायितानित्यर्थः । 'पलायितस्तु नष्टः स्यात् गृहीतदिक्तिरोहितः' इति हैम्याम् ॥

स्वीयान्ववायभवभूधरराजिमाजौ
　येनाहतामहितपक्षतया समीक्ष्य ।
माभ्येतु जेतुमथ मामपि राजभावा-
　द्भेजेऽद्रिजापतिमितीव पती रजन्याः ॥ ३९ ॥

रजन्या रात्रेः पतिर्भर्ता चन्द्रः । उत्प्रेक्ष्यते—इति हेतोरद्रिजापतिमीश्वरमद्रौ पर्वते जाता इत्यद्रिजा विषमदुर्गभूमिस्तत्पतेः । पर्वते कीदृक्स्वामिनं भेजे श्रितवान् । तदाश्रयणाच्च दुर्जयत्वं परस्य वैरिणः अन्यस्य राजभावाद्राजत्वादयं राजा तथाहमपि राजा तस्मात्परराजत्वान्मयि राजभावादखिलपरनृपतिपरिभवानन्तरं मामपि जेतुं परिभवितुं माभ्येतु मा गच्छतात् इति भीतेः कृत्वा स्वीये आत्मीयेऽन्ववाये संताने । चन्द्रवंशे इत्यर्थः । भवा उत्पन्ना ये भूधरा भूपालाश्चन्द्रवंशीयकाश्यपीपतयस्तेषां राजीं श्रेणीमहितपक्षतया स्ववैरिवर्गत्वेन येनाकब्बरेण आजौ संग्रामविषये आहतां निपातितां समीक्ष्य नयनयोर्गोचरीभावमानीय ॥

पूर्वापराम्बुनिधिसैकतसीमभूमी
संचारिचञ्चुरचमूचरभूरिभारम्।
सोढुं न सासहिरहीश्वर एकमूर्ध्ना
शीर्ष्णां सहस्रमिति किं रचयांचकार ॥ ४० ॥

अहीश्वरः शेषनागनायकः। उत्प्रेक्ष्यते—इति हेतोः शीर्ष्णां मस्तकानाम्। फणानामित्यर्थः। सहस्रं दशशतीं किं रचयांचकार रचितवानिव। इति किम्। यदहं पूर्वापरौ प्राच्यप्रतीच्यौ यावम्बुनिधी समुद्रौ तयोः सैकते नीरनिर्मुक्तपुलिने ते एव सीमनी मर्यादास्थाने यस्यास्तादृशी भूमी वसुधा तस्यां विषये संचारिणां संचरणशीलानां चञ्चुराणां शौर्यधैर्यादिगुणगणप्रधानानां स्वस्वामिकार्यकरणप्रवणानां चमूचराणां सेनासुभटानां भूरि भूयिष्ठं भारं गजाश्वस्यन्दनपदातिपरम्परावीवधं सोढुं धारयितुम्। एकेन मूर्ध्ना मस्तकेन कृत्वा न सासहिर्न समर्थः। 'अहिर्महीगौरवसासहिर्यः' इति नैषधे। तथा सहनशीलः भृशं सहते इति। 'सासहिर्वावदिश्चाचलिःपापतिप्रभृतय इकारान्ता निपाताः' इति नरहर्यां नैषधवृत्तौ ॥

पाणौ रणाङ्गणगतस्य कृपाणयष्टिः
क्षोणीमणेस्तृणयतः पृतनां रिपूणाम्।
भाति प्रचण्डभुजदण्डवसज्जयश्रीः-
केशच्छटा प्रकटतामिव टीकमाना ॥ ४१ ॥

क्षोणीमणेर्भूमीरत्नस्याकब्बरपातिसाहेः पाणौ हस्ते कृपाणयष्टिः करवाललता भाति राजते। किंभूता। रणाङ्गणे युद्धमूर्ध्नि गतस्य प्राप्तस्य। अत एव किं कुर्वतः। रिपूणां प्रतिभटानां पृतनां सेनां पताकिनीं तृणयतः तृणप्रायां मन्यमानस्य तृणीकुर्वतः। न किंचित्करतां प्रणयतः तृणवत्खण्डयतो वा। उत्प्रेक्ष्यते—प्रकटतां प्रकाशभावं जनदृग्गोचरत्वं टीकमाना गच्छन्ती। प्रचण्डौ जानुयुगव्यायतौ द्विषज्जनासह्यपराक्रमौ भुजदण्डौ तयोर्वसन्त्या चिरं वासं सृजन्त्याः। तिष्ठन्त्या इत्यर्थः। जयश्रियो जयलक्ष्म्या केशच्छटा कुन्तलहस्तो वेणी वेत्यर्थः ॥

खङ्गाहतोद्धतमतङ्गजदन्तकुम्भ-
प्रोद्भूतपावककणोत्करमुक्तिकाभिः।
क्षुण्णे तुरङ्गमखुरै रणभूतले य
ओजोयशोऽवनिरुहोर्वपतीव बीजम् ॥ ४२ ॥

यः साहिस्तुरङ्गमाणां शौर्यादयोत्सुकतया खुरैः शफैर्नखशिखाभिः क्षुण्णे क्षोदिते अतिवाहिते 'खेडकुं' इति जनप्रसिद्धे रणभूतले रणाङ्गणे युद्धधरामण्डले। उत्प्रेक्ष्यते—

ओजः प्रतापः यशः कीर्तिस्त एवावनिरुहौ पादपौ तयोर्बीजं योनिनिबन्धनं तरुप्ररोहप्रादुर्भावकरं पर्वतेवपतीव निःक्षिपतीव । काभिः । खड्गैर्निशिततरवारिभिराहता गाढदत्तप्रहाराः सर्वाङ्गेषु आसामस्त्येन निस्त्रिंशतया निस्त्रिंशैर्निहता वा तथा उद्धताः समरशूरा अनवरतविनिःसरत्सप्तस्थानदानपयःप्रवाहोत्कटा वा ये मतङ्गजाः कुञ्जरास्तेषां दन्तेभ्यो दन्तकोशेभ्यः 'दंतूसल' इति प्रसिद्धेभ्यः। तथा कुम्भेभ्यः शिरःपिण्डस्थलेभ्यः प्रोद्भूताः प्रकटा जाता ये पावककणोत्करा वह्निस्फुलिङ्गगणास्तथा मुक्तिका मुक्ताफलानि खड्गप्रहतेभ्यो दन्तकोशेभ्यः कृशानुस्फुलिङ्गाः । दन्तेभ्यः खड्गाहतेः पावकोद्भवः । तथा कृपाणविदीर्णप्रहारकुम्भस्थलेभ्यो मौक्तिकानि विनिर्जग्मुः । कुम्भान्तरे मुक्तानामुत्पत्तित्वात्तन्निर्गमः इति । ताभिरवापेव ॥

युद्धोद्धुरे भुवनभीतिकरे नरेशे
　त्रासात्स्वकीयवसतेरिव सूरराजौ ।
भ्रष्टौ पुनस्तदनवेक्षणतोऽन्तरिक्षे
　प्रेक्षाकृते तत इतो भ्रमिमादधाते ॥ ४३ ॥

युद्धे समराङ्गणे उद्धुरे उद्धते उत्कटैर्वैरिभिर्द्रष्टुमशक्यैः। तथा भुवनानां प्रबलबलवत्तया जगतामपि सुरदानवमानवेन्द्राणामपि आकस्मिकात्यन्तिकान्तकशङ्कावर्तरि नरेशे अकब्बराभिधाननरनायके त्रासादाकस्मिकात्मपराभवनभयभरात् सूरराजौ सुभटभूपती सूर्यचन्द्रौ । उत्प्रेक्ष्यते—स्वकीयवसतेरात्मीयनिवसनस्थानकाद्भ्रष्टौ भ्रंशं प्राप्तौ । अतिभीतेः स्वस्थानं परित्यज्य अन्यत्र कुत्रापि प्रपलाय्य प्रयाताविसर्थः । पुनर्व्याघुट्य तदनवेक्षणतः तस्य स्वस्थानकस्य अनवेक्षणतोऽनवलोकनाददर्शनात् । निजनिवासस्थाने न पश्यत इत्यर्थः । अन्तरिक्षे आकाशे न तद्भयाद्भूमौ प्रेक्षाकृते अर्थात्स्वस्थानदर्शनार्थं तत इतः पूर्वपश्चिमदक्षिणोत्तरासु भ्रमिं भ्रान्तिमादधाते कुर्वाते । स्ववासस्थानमलभमानौ नित्यं भ्राम्यत इत्यर्थः ॥

आकस्मिकं तुमुलमेतदनन्यजन्य-
　व्याहन्यमानभटकोटिभवं निशम्य ।
आतङ्कितैः किमिदमित्यमरैर्वदद्भि-
　र्लेभे किमीक्षणयुगेषु निमेषनैस्व्यम् ॥ ४४ ॥

एतेनाकब्बरेणानन्ये असाधारणे अदृष्टाजातपूर्वे जन्ये संग्रामे व्याहन्यमानानां व्यापाद्यमानानां भटानां राजन्यवीराणां कोटीभ्यः । कवीनां कुत्रचित्केचित् कोटीप्रमुखाः शब्दाः प्रायो बाहुल्ये दृश्यन्ते । यथा पाण्डवचरित्रे घटोत्कचस्य 'घट्टको' इति प्रसिद्धस्य भीमहिडम्बाङ्गजातस्यैकरात्रिरणे—'रथान् पिपेष पाषाणैर्जघान तरुभिर्गजान् । सवेगापातवातेन भटकोटीरपातयत् ॥' तथा तत्रैव गाङ्गेयस्य दशमदिवसं-

ग्रामेऽप्युक्तम्—'कोटिशो भटसंभारसंहारे विहितश्रमम् । धनुर्विश्रामयांचक्रे कृपयेव पितामहः ॥' इति । श्रेणीभ्यो भवमुत्पन्नम् । अकस्माद्भवमाकस्मिकं तुमुलं व्याकुलकोलाहलशब्दं निशम्य श्रुत्वा आतङ्कितैः संजातभीतिभिः अत एव किमिदं किं जातं चेत्यमुना प्रकारेण वदद्भिः कथयद्भिरमरैर्देवैः । उत्प्रेक्ष्यते—ईक्षणयुगेषु नेत्रद्वन्द्वेषु निमेषाणां नेत्रोन्मीलननिमीलनानां नैस्व्यं दारिद्र्यं किं लेभे प्राप्तमिव । भीतेरतिशायितया विकाशितलोचनैरेवाभूयतेत्यर्थः ॥ इति अकब्बरसाहिसमरवीररसवर्णनम् ॥

भूमेर्जयाय चतुरम्बुधिमेखलाया
आराध्य पूर्वविधिना किमु जैत्रमन्त्रम् ।
गुप्तं क्वचिन्निजभुजप्रभवत्प्रताप-
वह्नौ ततोऽयमरिकीर्तिकनीं जुहाव ॥ ४५ ॥

अयमकब्बरपातिसाहिः चत्वारश्चतुःसंख्याकाः पूर्वापरदक्षिणोत्तरलक्षणा अम्बुधयः समुद्रा एव मेखला काञ्ची यस्यास्तादृश्या भूमेः पृथिव्या जयाय स्वीकरणाय पूर्वविधिना जापयतः प्रमुखपूर्वसेवाप्रकारेण जैत्रं यावन्निजप्रतिपक्षपक्षाणां जयनशीलं पराभवनैकस्वभावं मन्त्रं सप्रभाववर्णात्मकां विद्यामाराध्य सम्यगुपासनां विधाय । ततः पूर्णपूर्वविधिसेवानन्तरं क्वचित्कुत्रचित्प्रदेशे गुप्तं छन्नम् यथा कश्चिज्जनो न पश्यति न वेत्ति तादृगेकान्तस्थाने । उत्प्रेक्ष्यते—निजस्यात्मनो भुजाभ्यां बाहुभ्यां प्रकर्षेण भवन्नुत्पद्यमानो यः प्रतापो महःसंदोहः स एव वह्निः कृशानुस्तस्मिन् । अरीणां वैरिवसुधाधवानां कीर्तिरूपां कीर्तिनाम्नीं वा कनीं कुमारिकां जुहाव । तन्मन्त्रसिद्ध्यर्थमुत्तरसेवावसाने जुहोति स्मेत्यर्थः । शत्रुंजयमाहात्म्ये केनचित् खेचरेण होतुमानीता निबिडनिबद्धा गुणसुन्दरी राजकुमारी रोदनशब्दश्रवणागतेन महीपालकुमारेण रणप्रकरणप्रहरणप्रोक्तौषधीसज्जीकृततद्विद्याधरपार्श्वान्मोचिता सोऽपि प्रतिबोधितश्च । नेमिचरित्रेऽपि नेमिनाथेन पञ्चमभवे अपराजितनाम्ना कुमारेण तथैव मोचितेत्यर्थः ॥

उत्कंधरावनिधराधिकधीरभावै-
र्भूमीभुजा विगणनां गमिताः समग्राः ।
एनं निभात्परिणतोद्धुरसिन्धुराणां
संसेवितुं क्षितिधराः किममी समीयुः ॥ ४६ ॥

भूमीभुजा अकब्बरराजेन उत्कंधरत्वेनोच्चैःशिरस्तया । सर्वेभ्योऽपि भूभृद्भ्यो महत्त्वेनेत्यर्थः । तथा अवनिधरत्वेन भूमीमण्डलधारकत्वेन नागेन्द्रवत् अथवाधिकेन विश्वातिशायिना धीरभावेन धैर्येण एतैः प्रकारैः कृत्वा विगणनामवहेलनां गमिताः प्रापिताः सन्तः अमी मेरुमन्दरगौरिगुरुकैलासप्रमुखाः समग्राः समस्ता अपि क्षितिधराः पर्वताः परिणतानां तटेषु तिर्यक्प्रहारप्रदायिनाम् । 'परिणतगजप्रेक्षणीयं द-

दर्श' इति मेघदूतेऽपि । यथा उद्धुराणामुत्कटानां सिन्धुराणां वारणानां निभात्कपटात् । उत्प्रेक्ष्यते—एनं मुद्गलमेदिनीमण्डलाखण्डलम् किं संसेवितुं सम्यग्विधिनोपासितुमिव समीयुः समागताः ॥

कल्पावनीरुहवनानि महीमघोना
प्रोद्दामदानललितैरवहेलितानि ।
गुच्छप्रसूनफलभारनमच्छिखानि
व्रीडोदयादिव बभूवुरधोमुखानि ॥ ४७ ॥

महीमघोना अकब्बरक्षोणीसहस्रचक्षुषा प्रोद्दामानां जनमनःसमीहिताधिकतया प्रबलानां दानानां स्वर्णमणीगणादिविश्राणनानां ललितैः विलासैर्विजृम्भितैरवहेलितानि अवगणनां गमितानि कल्पावनीरुहाणां सुरतरूणां वनानि काननानि । समूहा इत्यर्थः । उत्प्रेक्ष्यते—व्रीडोदयाल्लज्जायाः प्रादुर्भावादिव । स्वावज्ञासंजातातिमन्दाक्षोद्गमनेत्यर्थः । अधोमुखानि नीचैर्भूतानि वदनानि येषां तादृशानि बभूवुर्जातानीव । किंभूतानि । गुच्छाः स्तबकाः, प्रसूनानि कुसुमानि, फलानि सस्यानि, तेषां भारेण वीवधेन नमन्त्यो भूमावेत्य लगन्त्यः शिखाः शाखा येषाम् ॥

एतन्महस्त्रिभुवनभ्रमणीविलासं
जैत्राङ्ककारनिकरैरपि दुःप्रधृष्यम् ।
उल्लङ्घितुं स्पृहयतेव सहस्रपादी
निर्मीयते स्म सरसीरुहिणीवरेण ॥ ४८ ॥

सरसीरुहिणीनां कमलिनीनां वरेण भर्त्रा भानुना । सहस्रसंख्याकानां पादानां समाहारः सहस्रपादी दशशतचरणाः । 'पादो मूलास्रतुर्यांशाङ्घ्रिषु प्रत्यन्तपर्वते' इत्यनेकार्थः । निर्मीयते स्म । कृत्वा । उत्प्रेक्ष्यते—एतस्याकब्बरसाहेर्महः प्रतापमुल्लङ्घितुमतिक्रमितुमिव । 'लघूङ् गतौ' अयं धातुर्भ्वादिरात्मनेपदी । अतिदुःसहतया निजजैत्रतया च एतत्पुरस्त्वरितुं पलायितुं वा स्पृहयता काङ्क्षता । किंभूतं महः । त्रिभुवने त्रैलोक्येऽपि भ्रमणी पर्यटनम् । 'विधेः कदाचिद्भ्रमणीविलासे' इति नैषधे । तत्र विलासः क्रीडा यस्य । पुनः किंभूतम् । जैत्राणां जयनशीलानां प्रतिपक्षलक्षतिरस्कृतिदीक्षितानामङ्ककाराणां प्रतिमल्लानां जिष्णूनामपि जित्वराणां निकरैः समुदायैरपि दुःप्रधृष्यं दुराकलनीयम् । सर्वथापि जेतुमशक्यमित्यर्थः । 'दूरं गौरगणैरहंकृतिभृतां जैत्राङ्ककारे चर–'इत्यपि नैषधे ॥

आकालिकीकुलिशशैवलिनीशवह्नि-
वैश्वानराम्बुरुहिणीरमणप्रदीपाः ।

अंशा अमी त्रिजगतीव परिस्फुरन्ति
राशेरिवास्य महसां रिपुराजघस्य ॥ ४९ ॥

रिपून् राज्ञो निखिलसपत्नावनिपतीन् हन्तीति पञ्चतागोचरान् चरीकर्तीति रिपुराजघः। 'पाणिघताडघौ शिल्पिनि विषये निपात्यौ, राजघश्च राज्ञो हन्ति' इति प्रक्रियाकौमुद्याम् । तथा 'रराज नीराजनया स राजघः' इति नैषधेऽपि । तस्य एतस्याकब्बरपातिसाहेर्महसां भूयसः प्रतापानां राशेः समूहस्य । 'स राशिरासीन्महसां महोज्ज्वलः' इति नैषधे । अर्थस्तु वृत्तौ । एवमेवेति । त्रिजगति त्रैलोक्ये अमी जनचक्षुःप्रत्यक्षलक्ष्याः अंशा भागा इव परिस्फुरन्ति स्फूर्तिं बिभ्रति । तानेव दर्शयति—आकालिकी विद्युत्, कुलिशं शक्रकराम्भोरुहभास्वद्दम्भोलिनामायुधम्, शैवलिनीशो नदीपतिः समुद्रस्तस्य वह्निर्हुताशनः वडवानलः । 'और्वः संवर्तकोऽब्ध्यग्निर्वाडवो वडवामुखः' इति हैम्याम् । तथा वैश्वानरः स्वाभाविकापरदवानलादि ज्वलनः अम्बुरुहिणीरमणः पद्मिनीप्राणनाथः सहस्ररश्मिः, प्रदीपाः स्नेहप्रियाः, इत्येते ॥

यस्यातिदानवशतः परितोषभाग्भि-
र्विश्वार्थिभिः सुरगवामपमानितानाम् ।
भूयोभवद्भिरविसर्जनतः पयोभि-
र्निष्पातिभिः किमभवद्दिवि देवसिन्धुः ॥ ५० ॥

सुरगवां कामधेनूनामविसर्जनतो दानभावाद्भूयोभवद्भिरतिबहुलीभावं प्राप्नुवद्भिः अत एव निष्पातिभिर्निःसरणशीलैरधस्तात्पतद्भिः पयोभिर्दुग्धैः कृत्वा । उत्प्रेक्ष्यते—दिवि आकाशे देवसिन्धुस्त्रिदशतटिनी स्वर्गगङ्गा अभवज्जातेव । किंभूतानां सुरगवाम् । यस्याकब्बरसाहेरतिदानवशतो याचकजनानामिच्छाभ्यधिकविश्राणनाधीनतया परि सामस्त्येन तोषं संतोषं स्वान्तस्वास्थ्यं स्वेच्छापरिपूर्तितया संतुष्टिं भजन्तीति तादृशैर्विश्वत्रयाणां भुवनानाम् । त्रैलोक्यस्येत्यर्थः । समस्तैर्निःशेषैरर्थिभिर्याचकैरपमानितानामवगणितानाम्। स्वप्नेऽप्यप्रार्थितानां भूपस्य मनःकामिताधिकदानैः संतुष्टचित्तैस्त्रिजगद्याचकैः स्वप्नावस्थायामपि कामधेनवो निष्यन्ते इत्यर्थः ॥

संप्रीणता कुवलयं नृपसूरिराज-
श्लोकावनीधनयुगेन महोदयेन ।
द्वैराज्यवज्जगदभूत्परमत्र चित्र-
मद्वैतसंमदपदं दधुरङ्गभाजः ॥ ५१ ॥

नृपोऽकब्बरपातिसाहिः सूरिराजो हीरविजयसूरिवसुंधरावासवः । पुनरपरवर्णनौत्सुक्येन ग्रन्थनायको विस्मृतो मा स्तादिति सूरिराजाभिधानग्रहणम् । तयोः श्लोकौ यशसी तावेवावनीधनौ राजानौ तयोर्युगेन द्वन्द्वेन कृत्वा जगद्विश्वम् । द्वौ राजानौ यत्र ।

राजा चन्द्रो नृपश्चेति द्विराजं तस्य भावो द्वैराज्यं तद्वद्वैराज्यमिवाभूत् जातम् । किंलक्षणेन नृपसूरिराजश्लोकावनीधनयुगेन। महानतिशायी अभ्युदयोऽनवरतपरोलक्ष[1]प्रतिपक्षपयोधरविधुंतुदादिभिरप्रतिहताद्वैतवैभवो यस्य । पुनः किं कुर्वता । कुवलयं पृथ्वीमण्डलमुत्पलं च संप्रीणता । प्रीतिमुत्पादयतेत्यर्थः । विकाशयता च । परं केवलमत्र द्वैराज्ये तच्चित्रमाश्चर्यमस्ति । यत्कारणादङ्गभाजः प्राणिनः न विद्यते तद्वैतं द्वितीयं कारणं युगलं वा यत्रेत्यद्वैतमसाधारणमानन्दपदं हर्षस्थानं दधुर्धारयन्ति स्म । द्वैराज्ये हि जनानां विषाद एव स्यात्, अत्र तु परमप्रमोदः, एतदेव महदाश्चर्यम् ॥

स्पर्धां दधन्निजयशःप्रसरैः स्वलक्ष्म्या
क्षोणीभुजा बहिरितो विहिताः स्वदेशात् ।
स्वःसिन्धुरोधसि तदादि मृगं दधानो
राजानिशं मृगयुवत्किमु बम्भ्रमीति ॥ ९२ ॥

क्षोणीभुजा अकब्बरनृपतिना निजानामात्मीयानां यशसां कीर्तीनां प्रसरैर्विस्तारैः सह स्वलक्ष्म्या आत्मश्वैत्यश्रिया सार्धं स्पर्धां संहर्षमभ्यसूयां दधद्बिभ्राणः सन् राजा चन्द्रो नृपश्च इतोऽस्माद्भूमण्डलवर्तिनः स्वदेशान्निजजनपदादात्मप्रदेशाद्वा बहिःकृतो निष्कासितः देशत्यागं कारितः। उत्प्रेक्ष्यते—तदादि तस्माद्वासरादारभ्य मृगं लक्ष्म कृष्णसारं दधानः कलयन् मृगयुवल्लुब्धक इव स्वःसिन्धोर्गगनगङ्गाया रोधसि तटे अनिशमहोरात्रं किमु बम्भ्रमीति अतिशयेन भ्राम्यतीव । प्रायो मृगेणैव मृगा गृह्यन्ते नद्यादिनीरसंनिधाने च पयःपानार्थं वन्यसत्त्वाश्च समायान्ति इति स्वयशःस्पर्धी चन्द्रो राज्ञा पृथ्वीपीठान्निष्कासितो नभसि पर्यटतीत्यर्थः ॥

यस्यौजसि स्फुरति जैत्र इव त्रिलोक्यां
त्रासादिवाम्बुनिधिमम्बुधिमन्त्रजिह्वः ।
वज्रः पुरंदरकरं सरसीजपाणिः
पादं हरेरपि दवोऽद्रिभुवं बभाज ॥ ९३ ॥

यस्य राज्ञो जैत्रे जयनशीले इव ओजसि प्रतापे त्रैलोक्यां जगत्त्रयेऽपि स्फुरति परिभ्राम्यति सति त्रासादाकस्मिकभयात् । उत्प्रेक्ष्यते—अम्बुधेः समुद्रस्य मन्त्रजिह्वः कृशानुः वडवानलः अम्बुनिधिमूर्मिमालिमध्यमिव बभाजाश्रयति स्म । अपि पुनर्वज्रो दम्भोलिः पुरंदरस्य वासवस्य करं हस्तमिवाश्रितः । अपि पुनः सरसीजं कमलं पाणौ हस्ते यस्यैतावता मार्तण्डो हरेर्नारायणस्य पादं चरणं विष्णुपदमाकाशं श्रितवानिव । अपि पुनर्दवो दावानलः अद्रिभुवं पर्वतघनगहनावनीमिव सेवते स्म ॥

---

१. लिखितपूर्वटिप्पणिवत् 'परस्लक्षा' इति भवेत्.

अभ्रभ्रमद्यदभिमात्ययशोलुलाय-
मालोक्य भीतिविवशस्य हरेर्हयस्य ।
संत्रस्यतो वदननिर्यदमन्दफेनै-
र्ज्योतिष्मतीव समभूत्पुरुहूतपद्या ॥ ९४ ॥

हरेरिन्द्रस्य हयस्य तुरगस्योच्चैःश्रवसो वदनान्मुखगह्वरान्निर्यद्भिरधोभूमौ निष्पतद्भिरमन्दैर्बहुलैः फेनैर्मुखकफैरश्वमुखलालाभिः कृत्वा । उत्प्रेक्ष्यते—पुरुहूतपद्या शक्रमार्गो गगनम् । ज्योतिष्मती ज्योतींषि ग्रहनक्षत्रतारका विद्यन्ते यस्यां तादृशी किमभवत्संपन्नेव । हयस्य किंभूतस्य । भीत्या भयेन विवशस्य विह्वलस्य व्याकुलस्य । अत एव किं कुर्वतः । संत्रस्यतः अकस्मान्निजजिघांसुदर्शनोद्भूतभूरिभीतिवशतो नश्यतः । किं कृत्वा । अभ्रे आकाशे भ्रमन्तं परितः पर्यटन्तं यस्याकब्बरस्याभिमातीनां विरोधिनामयशोऽपकीर्तिरेव श्यामवर्णत्वाल्लुलायं महिषमालोक्य समीक्ष्य । महिषो हि तुरगद्वेषी । यतः—'रजस्वलो वाहरिपुः' इति हैम्याम् । तथा जिनजन्माभिषेके देवागमे—'वाजिस्थं कासरारूढः' । तथा 'हयद्विषद्बष्कयिणीपयःसुतम्' हयद्विषत्या महिष्या किंभूताया बष्कयिण्याः प्रौढाङ्गजाया यत्पयः सरसदुग्धं तस्य सुतं दधि । दुग्धोद्भवात्पयः सुतमिति । तथा 'रामालिरोमावलिदिग्विगाहिध्वान्तायते वाहनमन्तकस्य । यत्प्रेक्ष्य दूरादपि बिभ्यतः स्वानश्वान्गृहीत्वापसृतो विवस्वान् ॥' द्वयमपि नैषधे ॥

पञ्चापि देवतरवोऽधरिताः स्वदान-
लीलायितैर्वसुमतीकुसुमध्वजेन ।
संभूय काञ्चनशिलोच्चयचूलिकायां
किं मन्त्रयन्त्यवनिवृत्रहणं विजेतुम् ॥ ९९ ॥

वसुमत्या वसुंधराया अतिरूपरामणीयकेन कुसुमध्वजेन श्रीनन्दनेन । 'निषधवसुधामानां कस्य प्रियाङ्कमुपेयुषः' इति नैषधे । 'सर्वातिशायिशरीरसौन्दर्याद्भूमीस्मरेण' इति तद्वृत्तिः । स्वदानस्य निजवितरणस्य लीलायितैर्विलसितैरधरितास्तिरस्कृताः पराभूताः सन्तः पञ्चापि पञ्चसंख्याका अपि कल्प–पारिजात–मन्दार–हरिचन्दन–संताननामानो देवतरवः सुरद्रुमाः । उत्प्रेक्ष्यते—काञ्चनशिलोच्चयस्य स्वर्णशैलस्य मेरोश्चूलिकायां शिरःशिखरे संभूय एकत्र मिलित्वा सर्वेऽप्येकीभूय अवनेर्भूमेर्वृत्रहणं पुरंदरमकब्बरसाहिं विजेतुमभिभवितुं किं मन्त्रयन्ति रहसि आलोचनमिव कुर्वन्ति । 'रहस्यालोचनं मन्त्रः' इति हैम्याम् । तथा पाठान्तरम्—तत्र कूलंकषाणां नदीनां प्रणयी पतिः समुद्रः सनेमिः स्यन्दनचक्रधाराकारो यस्याः सा भूमिस्तस्यास्तमीविवोढुः रजनीरमणस्य । अकब्बरभूपतेरित्यर्थः । विजिगीषयेव स्वाभिभवविधातुर्विजेतुमिच्छयेव अनिमि-

षान्देवान् संप्रीणयन्ति तोषयन्ति । समीहितदानादिना प्रीता हि देवा अभीष्टसिद्धिं ददते इत्यर्थः ॥

सर्वानुवाद इव यन्महसां विहायः-
पान्थः किमु प्रतिनिधिर्हुतभुक्पयोधेः ।
वज्रोऽनुकार इव कायलता हुताश-
पङ्क्तिः पुनः सहचरस्तडितां विलासः ॥ ९६ ॥

यन्महसाम् अकब्बरसाहेर्भूयसः प्रतापानां विहायःपान्थो गगनाध्वनीनः सहस्ररश्मिः सर्वं समस्तरूपमनुवदतीति सर्वानुवादः पुनरप्यभिधानमिव । पुनः पयोधेः समुद्रस्य हुतभुक् ज्वालाजिह्वो वडवामुखः प्रतिनिधिः प्रतिबिम्बमिव । पुनर्वज्रो वासवहस्तदम्भोलिः अनुकारः सादृश्यमिव । पुनर्हुताशानां पावकानां पङ्क्तिर्मालिका कायलता शरीरयष्टिरिव । पुनस्तडितां विद्युतां विलासो विजृम्भितं सहचरः सखा । 'स्निग्धः सहचरो मित्रं सखा' इति हैम्याम् ॥

ऐश्वर्यमीशत इव प्रभुतां सुरेन्द्रा-
दोजो रवेर्निधिपतेश्च वदान्यभावम् ।
भोगीश्वरादवनिगौरवसाहसित्व-
मादाय योऽम्बुजभुवा निरमायि भूमान् ॥ ९७ ॥

यो भूमान् अकब्बरसाहिः अम्बुजभुवा नारायणनाभिनीरजजन्मना ब्रह्मणा । उत्प्रेक्ष्यते—ईशत ईश्वरादैश्वर्यमीश्वरताम् । तथा सुरेन्द्राद्देवनायकात्प्रभुतां स्वामितां सामर्थ्यं वा । पुनः रवेः सहस्रकिरणाद्दोजः प्रतापम् । 'यदोजसो यद्यशसः स्थिताविमौ' इति नैषधे । ओजःशब्देनात्र प्रतापः । च पुनर्निधिपतेर्वैश्रवणाद्वदान्यभावं दानशीलताम् । पुनर्भोगीश्वरात् शेषनागनाथादवनेर्मेदिनीमण्डलस्य गौरवस्य साहसित्वं सहनशीलताम् । 'सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वाच्यौ' । 'सासहिः वावहिः चाचलिः पापतिः' इति प्रक्रियाकौमुद्याम् । आदाय गृहीत्वा निरमायि निष्पादित इव ॥ इत्यकब्बरसाहियशःप्रतापदातृतादिगुणाः ॥

क्षोणीक्षितः क्षितिरुहानिव वायुरंहः
प्राच्याननामयदकब्बरभूमिपालः ।
तस्माद्दिशो जगृहिरेऽपि च दाक्षिणात्य-
क्ष्माभृद्वरेण शरभादिव सिन्धुरेण ॥ ९८ ॥

अकब्बरनामा भूमीपालः क्षितिरक्षिता प्राच्यान् पूर्वदिग्भवान् पूर्वदिक्संबन्धिनो वा क्षोणीक्षितः पार्थिवान् । 'महीक्षित्पार्थिवो मूर्धाभिषिक्तो भूप्रजानृपः' इति हैम्याम् ।

अनामयत् स्वपदप्रणतान् प्रणयति स्म। क इव। वायुरंह इव यथा वातवेगः क्षितिरुहान् पादपान् नामयति नम्रीकरोति। अपि च पुनस्तस्मादकब्बरमुद्गलपातिसाहेर्दक्षिणस्यां दिशि भवा दाक्षिणात्यास्ते च ते क्ष्माभृतश्च राजानस्तेषां भरेण वृन्देन दिशो जगृहिरे पलायितम्। 'पलायितस्तु नष्टः स्याद्गृहीतदिग्भिराहितः' इति हैम्याम्। शरभादिव। यथा अष्टापदात्कुञ्जरारातेः सकाशात्। 'शरभः कुञ्जरारातिरुत्पादकोऽष्टपादपि' इति हैम्याम्। सिन्धुरेण। जातिवाचित्वादेकवचनम्। निजाहितत्वेन हननभीतेर्गजेन प्रपलाय्यते॥

आज्ञा यदम्बुनिधिनेमिविधेरधारि
शीर्षेव मूर्ध्नि धरणीरमणैरुदीच्यैः।
पाश्चात्यभूमिपतयो यतयो बभूवु-
र्भीतेर्विरागत इवोज्झितसङ्गरङ्गः॥ ५९॥

यश्चासौ अम्बुनिधिनेमौ वसुधावलये विधुश्च तस्याकब्बरभूपते राज्ञः आज्ञा शासनमुदीच्यैः उत्तरस्यां भवैर्धरणीरमणैः पृथिवीपतिभिर्मूर्ध्नि स्वमस्तके शीर्षेव 'सेस' इति लोकप्रसिद्धा। अधारि ध्रियते स्म। तथा पाश्चात्यभूमिपतयः पश्चिमदिक्संबन्धिनो भीतेरकब्बरसाहिसाध्वसातिरेकाद्यतयस्तापसा बभूवुः संजाताः। 'वैखानसो वानप्रस्थो भिक्षुः सांन्यासिको यतिः' इति हैम्याम्। किंभूताः। उज्झितस्त्यक्तः सङ्गस्य गृहगृहिणीधनैश्वर्यादिसंगमस्यानुषङ्गस्य रङ्गश्चित्तोत्साहो यैः। उत्प्रेक्ष्यते—विरागत इव। यथा वैराग्यात्तापसीभवन्ति। तेऽपि च विरागिणस्त्यक्तसङ्गरङ्गाः स्युः॥ इत्यकब्बरस्य चतुर्दिगाक्रमणम्॥

सर्वे जनाः सृजति राजनि यत्र राज्यं
प्रह्लत्तिपल्लवितचित्तपथा बभूवुः।
दुःस्थैरिवापि न परं प्रतिपक्षलक्ष-
क्षोणीमहेन्द्रमहिलानिवहैः सुखांशः॥ ६०॥

यत्र यस्मिन्नकब्बरे राजनि चतुरम्बुधिमेखलाखण्डले राज्यं सकलविपुलामण्डलैश्वर्यं सृजति कुर्वेति सति सर्वे समस्ता अपि जनाः प्रजालोकाः प्रह्लत्या प्रमोदेन। 'ह्लाद इति योगविगाभात् ह्रस्वः प्रह्लत्तिः' इति प्रक्रियाकौमुद्याम्। कृत्वा पल्लविताः बहलीभूताश्चित्तपथा मनोवृत्तयो येषां तादृशा बभूवुः संजाताः। परमयं विशेषः। अथ वा परं केवलं प्रतिपक्षा अकब्बरसाहेश्चेतोवचनादि निर्विपक्षीभूता मनसैव विरुद्धविधित्सवो वा न तु कायेन कथंचिदपि प्रभविष्णवः तादृग्विधा विरोधिनस्ते च लक्षा लक्षसंख्याका ये क्षोणीमहेन्द्राः पूर्वावस्थापेक्षया क्षितिऋभुक्षाणः महानृपास्तेषां महिला अवरोधवध्वस्तासां निवहैः समूहैः दुःस्थैर्दरिद्रैर्निर्धनैरिव सुखस्य सातस्य शर्मणो ले-

शोऽप्यंशोऽपि नावापि न प्राप्तः । महाराजा अपि यत्प्रतिपक्षतया परिभवं प्राप्य सर्वं राज्यं जनपदपुरग्रामद्रविणादि निर्गम्य द्रमकीभूय वनेचरा इव कान्तारान्तरचारिणो बभूवुः । अतस्तपस्विनीभिस्तद्वनिताभिः कुतः सुखांशोऽपि प्राप्यत इत्यर्थः ॥

मेरुर्गिरिष्विव गभस्तिरिव ग्रहेषु
बर्हिर्मुखेष्विव वृषा प्रमुखो नृपेषु ।
आक्रम्य चक्रिवदसौ क्षितिशक्रचक्रं
शास्ति स्म साहिरखिलां चतुरब्धिकाञ्चीम् ॥ ६१ ॥

असौ साहिरकब्बरः अखिलां समग्रामपि चत्वारोऽम्बुधयः समुद्राः काञ्ची मेखला यस्यास्तादृशीं पृथ्वीम् । यद्यप्युत्तरस्यां चक्रिसाध्यस्य भरतक्षेत्रस्य पर्यन्तो हिमवद्गिरिः तथापि कविसमयानुसार्यदो वचः । तथा च रघुवंशे—'पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम्' इति । तथा च नैषधे दमयन्तीस्वयंवरसमागमे भूपतीनाम्—'रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः । प्रियोक्तिदानादरनम्रताभिरुपाचरच्चारु स राजचक्रम् ॥ चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे । दानं दयासूनृतमातिथेयी चतुष्टयीरक्षणसौविदल्लाः ॥' इति । शास्ति पालयते । किं कृत्वा । चक्रिवत् चक्रवर्तिवत् क्षितिशक्राणां मूर्धाभिषिक्तानां महानृपाणां चक्रं वृन्दमाक्रम्य स्वसेवकीकृत्य । असौ किंभूतः । गिरिषु सर्वपर्वतेषु मेरुः सुवर्णाचल इव । यथा ग्रहेषु मङ्गलप्रभृतिष्वष्टाशीतिसंख्येषु गभस्तिर्भास्कर इव । ग्रहपतित्वात् । 'ग्रहाब्धिनीगो द्युपतिर्विकर्तनः' इति हैम्याम् । यथा बर्हिर्मुखेषु वृन्दारकेषु वृषा पुरंदर इव । तथा नृपेषु समस्तभूपतिषु प्रमुखो मुख्यः ॥ इत्यकब्बरवर्णनम् ॥

श्रीआगरापुरमुपेत्य कियन्ति वर्षा-
ण्यम्भोधिनेमिविधुना वसतिर्वितेने ।
भूकश्यपेन मथुरामिव हेमपद्म-
निष्पातिपौष्पकपिशार्कसुताकलापाम् ॥ ६२ ॥

अम्भोधिनेमेः समुद्रकाञ्च्या विधुना सुधाकरेणाकब्बरेण पातिसाहिना दिल्लीनगरात् श्रिया विविधलक्ष्म्या कलिताम् आगरा इत्यभिधानं यस्यास्तादृशीं पुरीं नगरमुपेत्यागत्य कियन्ति कतिचिद्वर्षाणि यावत्स्थितिः वसतिर्वितेने विहिता । स्थित इत्यर्थः । केनेव । भूकश्यपेनेव । यथा वसुदेवेन शौर्यपुरान्मथुरामागत्य कियन्ति हायनानि वसतिर्वितन्यते स्म । 'वसुदेवो भूकश्यपो दन्दुरानकदुन्दुभिः' इति हैम्याम् । किंभूतां पुरम् । हेमपद्मानां जाम्बूनदारविन्दानां निष्पातिभिर्नितरां पतनशीलैरथ वा काञ्चननीरजेभ्यो गलद्भिः । 'पशुपतिजटाजूट इव विकसितकनकमलकुवलयोच्छलितरजःपुञ्जपिञ्जरितराजहंसावतंसया' इति चम्पूकथायां हेमपद्मानां सद्भाव इति । पौष्पैः परागैः कपिशा पिङ्गीकृतपया यार्कसुता भानुनन्दना सैव कलापः कलधौतमेखला य[illegible] सा ताम् ॥

[तस्थौ समाः स कियतीः पुरमागराख्यां
भूमान्विभूष्य मथुरामिव वृष्णिसूनुः ।
भर्तुर्वशेव सरसा सरसीरुहास्या
श्यामाङ्कमर्कतनुजा भजते स्म यस्याः ॥

स भूमण्डले मुद्गलेन्द्रतया विख्यातो भूमानकब्बरः आगरा इत्याख्या नाम यस्यास्तादृशीं पुरं नगरीं विभूष्यालंकृत्य कियतीः कियत्संख्याकाः समा वर्षाणि । 'हायनोऽब्दं समाः शरत्' इति हैम्याम् । यावत्तस्थौ स्थितिमकार्षीत् । क इव । वृष्णिसूनुरिव । यथा वृष्णेरन्धकवृष्णेः सूनुर्नन्दनो वसुदेवोदसारः कंसोपरोधेन कतिचित्संख्याकान् संवत्सरान् स्थितवान् । यस्या आगराख्यायाः पुरो मथुरापुर्याश्च अर्कतनुजा कालिन्दी अङ्कं समीपं भजते स्म सिषेवे । 'अङ्को भूषारूपकलक्ष्मसु । चित्राजौ नाटकाद्यंशे स्थाने क्रोडेऽन्तिकागसोः ॥' इत्यनेकार्थः । केव वशेव । यथा पत्नी भर्तुरन्तिकमुत्सङ्गं भजते । किंभूता । सह रसैः पानीयैः शृङ्गारादिभिर्वा वर्तते या सा सरसा । पुनः किंभूता । सरसीरुहं पद्मं तदेव तद्वद्वा आस्यं वदनं यस्याः । पुनः किंभूता । श्यामा कृष्णवर्णा । 'जम्मन्तरे न विहडइ उत्तममहिलाण जं कियंपि कम्मं । कालिन्दी कन्हविरहे अज्जवि कालं जलं वहई ॥' इति वृत्तरत्नाकरवृत्तौ । पक्षे षोडशवार्षिकी ॥ पाठान्तरम् ॥]

स श्रीकरीपुरमवासयदात्मशिल्पि-
सार्थेन डाबरसरः सविधे धरेशः ।
इन्द्रानुजात इव पुण्यजनेश्वरेण
श्रीद्वारकां जलधिगाधवसंनिधाने ॥ ६३ ॥

स धरेशः अकब्बरधरणीरमणः आत्मनः स्वाज्ञावशवर्तिना शिल्पिसार्थेन विज्ञाननिर्वहेन डाबर इति नाम्नः सरसः प्राक् साहिनैव स्वयं खानितस्य द्वादशक्रोशमितस्य तटाकस्य सविधे पार्श्वे श्रीकरी इति नाम्नीं पुरं नगरं अवासयत् वासयति स्म । क इव । इन्द्रानुजात इव । यथा 'शक्रावरजो विष्णुः दाशार्हः । पुरुषोत्तमोऽब्धिशयनोपेन्द्रावजेन्द्रानुजाः ॥' इति हैम्याम् । तथा 'का नुजे मम निजे दनुजारौ' इत्यपि नैषधे । पुण्यजनानां यक्षाणामीश्वरेण स्वामिना । 'कैलाशौकायक्षधननिधिपुण्यकिंपुरुषेश्वरः' इति हैम्याम् । शक्रादिष्टधनदेन । जलधिगानां नदीनां धवो भर्ता समुद्रस्तस्य संनिधाने समीपे श्रिया स्वर्णरत्नादिसमृद्ध्या संयुक्तां द्वारकानाम्नीं पुरीं वासयामास निवेशयति स्म ॥

प्राक्काश्यपीपतिरकब्बरपातिसाहि-
स्तस्याः पुरः प्रतिभटान्प्रचलन्विजेतुम् ।
आशा दशापि कुरुते स्म फते स यस्मा-
त्तस्मात्फतेपुरमिति प्रददे तदाह्वाम् ॥ ६४ ॥

तस्मात्कारणात् काश्यपीपतिरवनिनायकः तस्याः श्रीकर्या आह्वां नाम फतेपुरमिति प्रददे दत्तवान् । करोति स्मेत्यर्थः । यत्तदोर्नित्याभिसंबन्धाद्यद्यस्मात्कारणात् सोऽकब्बरपातिसाहिः प्राक् पूर्वं वासनसमये तस्याः श्रीकर्याः पुरो नगर्याः प्रतिभटान् प्रत्यर्थिपार्थिवान् विजेतुं प्रचलन् प्रतिष्ठमानः दशापि प्राची–आग्नेयी–दक्षिणा–नैर्ऋती–प्रतीची–वायवी–उत्तरा–ऐशानी–नागी–ब्राह्मीलक्षणा आशा दिशः फते स्वायत्ताः । यवना हि विजयस्याभिधां 'फते' इति कथयन्ति इति । 'दशदिगन्तजिता रघुणा यथा' इति रघुवंशे । दशदिशां जयः कुरुते स्म कृतवान् । जैनमते तु महानद्यादिषु इतस्ततः पयःप्रवाहागमनैर्निम्नीभवद्भूभागनिवासिशबरादिग्रामाः शैलसंधिगह्वरमध्यगतभिल्लपल्ल्यो वा अधोदिग्वर्तिनः तथा पर्वतोपरिकोट्टादय ऊर्ध्वदिग्भाज इति तत्त्वम् इति दशदिग्जयः जिगायेत्यर्थः ॥

गौरीमहेश्वरगणा स्फटिकावनद्ध-
मध्या सशेवधिपतिः प्रचलत्कुमारा ।
कर्णातिथीभवदिभाननधीररावा
कैलासभूमिरिव या नगरी रराज ॥ ६९ ॥

या श्रीकरीनगरी कैलासभूमिः स्फटिकाचलक्षोणीव रराज राजते स्म । किंभूता । गौरीभिः काञ्चनचारुवर्णवर्णनीयवर्णिनीभिः कलितानां महेश्वराणां महेभ्यानामगणितद्रविणवतां व्यवहारिणां गणा व्रजा यत्र । पक्षे पार्वतीसंयुतशंभुः तथा गणाः पार्षदाः प्रमथादयो यस्याम् । पुनः किंभूता । स्फटिकादुज्ज्वलमवनद्धं सुधाकल्पितं गृहविपणिगणमयं मध्यं यस्याम् । पक्षे स्फटिकरत्नैरवनद्धं बद्धं मध्यं यस्याः स्फटिकाद्रित्वात् । पुनः किंभूता । सह शेवधीनां निधानानां पतिभिः स्वामिभिः अगणिताप्रमाणद्रविणत्वात्प्रतिस्थाननिक्षिप्तानेकनिधिनायकैरीश्वरैर्वर्तते या । पक्षे सधनदा । 'कैलासौकायक्षधननिधिकिंपुरुषेश्वरः' इति हैम्याम् । पुनः किंभूता । प्रचलन्तः क्रीडाकृते स्वतन्त्रमितस्ततः परिभ्राम्यन्तः कुमारा राजामात्यसामन्तमहेभ्यादीनां बालका यत्र । पक्षे प्रचलन् पित्रोर्मिलनार्थं गमागमं कुर्वन् कुमारः स्वामिकार्तिको यत्र । स्कन्दस्यान्यत्रापि स्थितिसंभवाद्गमागमौ युक्तौ । तथा—'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि' इति चम्पूकथायाम् । अथ वा गौरीनन्दनत्वात्तत्रापि मातुः पार्श्वेऽवस्थितत्वाच्चेति द्वयोरपि कर्मधारयः । पुनः किंभूता । कर्णातिथीभवन्तः श्रवणप्राघुर्णा जायमाना इभानां मदगन्धबन्धुरसिन्धुराणामाननेभ्यो वक्त्रेभ्योऽर्थान्निर्गता धीराः पानीयपूर्णाप्रमाणश्रावणसंबन्धिजलधरध्वनितानुकारिणो रावा गम्भीरगर्जारवा यस्याम् । पक्षे श्रूयमाणो गणनायकधीरध्वनिर्यस्याम् । विनायकस्यापि गौरीतनूजत्वात् ॥

भूमीभृतां प्रतिभटं सुमनःसु मुख्यं
जिष्णूग्रधन्वपविपाणिसहस्रनेत्रम् ।

प्रेक्ष्य प्रभुं हरिमिव स्वमुपेतमुर्व्यां
प्रीतेरनूपगतवत्यमरावतीयम् ॥ ६६ ॥

यं नृपम्। यन्मूर्तिमित्यर्थः। उर्व्यां महीमण्डले उपेतमागतं स्वमात्मीयं प्रभुं स्वामिनं हरिमिन्द्रं प्रेक्ष्य विलोक्य। विज्ञायेत्यर्थः। प्रीतेः स्वस्वामिनि स्नेहातिरेकात् अनु पृष्ठे उपगतवती समायाता। उत्प्रेक्ष्यते—इयं श्रीकरीरूपा अमरावती इन्द्रनगरीव। किंभूतं यं हरिं च। भूमीभृतां विपक्षक्षोणीक्षितां पर्वतानां च प्रतिभटं विद्वेषिणं निहन्तुकम्। पुनः किंभूतम्। सुष्ठु शोभनं मनो येषां निरवद्यहृदयेषु महत्सु देवेषु च मुख्यमग्रगण्यम्। पुनः किंभूतम्। जिष्णुं जयनशीलं तथा उग्रं प्रचण्डं स्वासहजपरःसहस्रसंहारकारकं धन्व कोदण्डं यस्य। तथा पविर्वज्रमाकृत्या पाणौ हस्ते यस्य। प्रायः पुण्यवतां पाणिपादेषु वज्रचक्राङ्कुशादिलक्षणानि स्युः। तथा सहस्रं दशशतसंख्याकानि नेत्राणि लोचनानि यस्य। 'सहस्रंखी राजा' इति लोकवाक्यमपि। चरप्रधानपुरोहितादीनां दृग्भिर्भूपालाः पश्यन्तीति कविसमयोऽपि। पश्चात्कर्मधारयः। शक्रस्य त्वेतानि नामान्येव सन्ति ॥

स्पर्धां यया विदधतं त्रिजगज्जयिन्या
दृष्ट्वा बलेर्गृहमियं क्वचिदौचिती न।
ध्यात्वेति पद्मजनुषा प्रतिघातिरेका-
त्क्षिप्तः क्षणात्क्षितितले बलिना किमेषः ॥ ६७ ॥

पद्मजनुषा ब्रह्मणा इत्यमुना प्रकारेण ध्यात्वा विचिन्त्य प्रतिघातिरेकादनुचितविभावनोद्भूतकोपातिशयात्। उत्प्रेक्ष्यते—बलिना बलिनाम्ना दैत्येन सार्धम्। अत्र सार्धपदाध्याहारः। अथ वा बलिना बलवता विधिना। बलवन्तं विना कापि कार्यसिद्धिर्न स्यात्। अत एष बलिगृहः क्षणान्निमेषमात्रात्क्षितेः पृथिव्यास्तले अधोभागे क्षिप्तः पाताले प्रवेशितः। 'बलिसद्म दिवं सतथ्यवागुपरि स्माह दिवोऽपि नारदः' इत्युपरि स्थितिर्बलिगृहस्य नैषधे। इति किम्। त्रिजगज्जयिन्या भुवनत्रितयीयावन्नगरीजयनशीलया यया श्रीकर्या नगर्या सार्धं स्पर्धामभ्यसूयां विदधतं कुर्वाणम्। बलेर्गृहं नागलोकं दृष्ट्वा स्वयमन्विष्य इयमनया श्रीकरीपुरा सह स्पर्धाकृतिः क्वचित्कुत्रापि नौचिती न युक्तिमती इति चेतसि विचार्य ॥

निर्वर्ण्य वर्ण्यविभवैः स्वभवैः पुरीं यां
संस्पर्धया निजजयाय समुज्जिहानाम्।
तद्भूतभूरितरभीतिविहस्तचेताः
किं द्वारका प्रविशति स्म पयोधिमध्ये ॥ ६८ ॥

द्वारका नारायणनगरी पयोधिमध्ये समुद्रसलिलदुर्गान्तराले प्रविशति स्म प्रविष्टा । उत्प्रेक्ष्यते—तस्याः श्रीकरीपुर्याः सकाशाद्भूता उत्पन्ना भूरितरा अतिमहती या भीतिर्भयं तया कृत्वा विहस्तं व्याकुलीभूतं चेतो मनो यस्याः । किं तादृशीव किं कृत्वा । स्वस्याः श्रीकर्या भवैरुत्पन्नैर्वर्ण्यैर्जगत्त्रयजनवर्णनीयैर्विभवैः श्रीभिः संस्पर्धया अभ्यसूयया कृत्वा निजस्य द्वारवत्याः आत्मनो जयाय पराभवनाय समुज्जिहानामुद्यतां प्रगल्भानां कृतोद्यमानां वा यां श्रीकरीपुरीं निर्वर्ण्य दृग्गोचरीकृत्य ।। इति समुदायेन नगरीवर्णनम् ।।

अथ पृथग्वर्णनम्—

> धात्रीधृतौ फणसहस्रभृताभ्यसूयां
> 　बिभ्रद्भुजंगविभुनाम्बरचुम्बिमौलिः ।
> सालः स्मयेन कपिशीर्षककोटिमुच्चै-
> 　र्धर्तुं मरुद्गृहमिव स्वयमप्यधत्त ॥ ६९ ॥

सालो यत्प्राकारः स्मयेन गर्वावेशवशंवदतया । उत्प्रेक्ष्यते—स्वयमप्यात्मनोऽपि मरुद्गृहं स्वर्गं धर्तुमुद्वोढुं धारयितुमुच्चैरूर्ध्वमुपरिष्टात् कपिशीर्षकाणामट्टालकानां 'कासीसां' इति प्रसिद्धानां कोटिमधत्त धृतवानिव । सालः किं कुर्वन् । भुजंगविभुना शेषनागनायकेन सममभ्यसूयामीर्ष्यां स्पर्धां बिभ्रद्दधानः । किंभूतेन भुजंगविभुना । धात्र्या धरित्र्या धृतौ धारणविषये फणानां स्वशिरसां सहस्रं दशशतीं बिभर्तीति । सालः किंभूतः । अम्बरमाकाशं चुम्बतीति शिखरेण स्पृशतीत्येवंशीलो मौलिर्मूर्धा यस्य । अभ्रंलिह इत्यर्थः ॥

> यद्वप्रवज्ररुचिसंचितशक्रचाप-
> 　चक्राभ्रचुम्बिकपिशीर्षकराजिराभात् ।
> युद्धं विधातुमहितेन विधुंतुदेन
> 　मित्रान्तिकं किमु समीयुरमी सगोत्राः ॥ ७० ॥

यस्या नगर्याः वप्रः प्राकारः तस्य तत्संबन्धिनां वा वज्राणां गर्भसंदर्भीकृतकुलिशरत्नानां रुचिभिः कान्तिभिः संचितानि पुष्टानि कृतानि प्रकटीकृतानि वा शक्रचापचक्राणि इन्द्रधनुर्मण्डलानि । अथ च वज्रशक्रकोदण्डचक्राख्यानि आयुधानि यस्यां तादृशी । तथा अभ्रमाकाशं चुम्बत्यालिङ्गतीत्येवंशीला अभ्रंकषा कपिशीर्षकाणां राजिः पङ्क्तिः आभाद्वभौ । उत्प्रेक्ष्यते—अहितेन शत्रुणा विधुंतुदेन राहुणा सार्धं युद्धं संग्रामं विधातुं कर्तुं मित्रस्य सुहृदः सूर्यस्य चान्तिकं समीपममी सगोत्राः स्वजनाः किमु समेता उपगता इव। सगोत्रत्वं तु वृत्ताकारत्वेन प्रकाशकत्वेन च नभःपान्थत्वेन प्रभाकरत्वेन च । तथा सगोत्रा हि सायुधाः संग्रामसमये सगोत्रसमीपे प्रायः समायान्ति इति रीतिरियम् । तत्रापि

कश्चित्सगोत्रोऽप्यनिष्टो भावदेवं च सत्पयं परं मित्रः ततः सर्वमप्युचितमेवेति ॥ इति प्राकारः ॥

यत्रापणेष्वगुरुचन्दनगन्धधूली
चन्द्रप्रकीर्णकमणीसुरदुष्यमुख्याः ।
ज्ञानैर्जिनैस्त्रिजगतीव समस्तवस्तु-
वीथी व्यलोक्यत नरैर्निजनेत्रपद्मैः ॥ ७१ ॥

यत्र फतेपुरे आपणेषु व्यवहारिणां हट्टेषु समस्तानां वस्तूनां क्रयाणकानां वीथी श्रेणी नरैर्नगरग्रामजनपदजन्मभिर्जनैर्निजनेत्रपद्मैः स्वनयनारविन्दैर्व्यलोक्यत समीक्ष्यते स्म । किंभूता । अगुरवः काकतुण्डाः, चन्दनाः श्रीखण्डाः, गन्धधूल्यः कस्तूरिकाः, चन्द्राः कर्पूराः सुवर्णानि वा, प्रकीर्णकानि चामराणि मणयश्चन्द्रकान्ताद्याः सर्वजातिरत्नानि वा सुरदुष्याणि देवकुलानि वासांसि मुख्यान्यादीनि प्रधानानि वा यस्याम् । कैरिव । जिनैरिव । यथा वीतरागैः केवलिभिः केवलज्ञानैः कृत्वा त्रिजगति त्रैलोक्ये समस्तवस्तुविस्तारो विलोक्यते । समस्तवस्तुविस्तारो लोके एव नालोके, ततस्त्रिजगद्ग्रहणम् ॥

श्रेणीभवन्त्युभयपक्षवलक्षरत्न-
हट्टावली विलसति स्म फतेपुरस्य ।
सुस्वामिसंमदितयत्पुरपद्मधाम्ना
वक्षःस्थलीकलितमौक्तिकमालिकेव ॥ ७२ ॥

फतेपुरस्याकब्बरनगरस्य श्रेणीभवन्ती द्विपङ्क्त्या जायमाना उभयपक्षयोर्द्वयोः पार्श्वयोः । 'शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमाः' इति रघुवंशे । 'उभयाभ्यां द्वाभ्यां पक्षाभ्यां पार्श्वाभ्यां परिवर्तनेन कृत्वा विनीता अपहस्तिता निद्रा यैः' इति तद्वृत्तौ । वलक्षरत्नानां स्फटिकमणीनां स्फटिकोपलकल्पितानां हट्टानामापणानामावली धोरणी विलसति स्म शुशुभे । उत्प्रेक्ष्यते—सुशोभनो नीतिमान् स्वामी अकब्बरसाहिस्तेन संमदो हर्षः संजातोऽस्यास्तया संमदितया संजातानन्दया यत्पुरस्य फतेपुरनगरस्य पद्मधाम्न्या अरविन्दमन्दिरया लक्ष्म्या वक्षःस्थले स्वहृदये आकलिता धृता परिहिता मौक्तिकमालिका मुक्ताहारलतेव ॥ इति हट्टावली ॥

वेश्मव्रजाः पुरि विभान्ति मणीमरीचि-
संचारचूर्णिततमीतिमिरप्रसाराः ।
स्फूर्त्या विजित्य सुमनोनगरी गृहीता
मन्ये विमाननिवहा अनयादसीयाः ॥ ७३ ॥

पुरि फतेपुरनगर्यां वेश्मव्रजा गृहगणा विभान्ति। किंभूताः। मणीनां विविधरत्नानां मरीचीनां कान्तीनां संचारेण प्रसारेण चूर्णिताः खण्डशः कृताः तमीतिमिराणां निशान्धकाराणां प्रसारा विस्तारा यैः। तत्राहमेवं मन्ये मानयामि जाने उत्प्रेक्षे वा। अनया नगर्या स्फूर्त्या स्वविभूषाविस्फूर्जितेन सुमनोनगरी अमरपुरी अमरावती विजित्य परिभूय अदसीयाः स्वःपुरीसंबन्धिनो विमाननिवहाः सुरयाननिकरा गृहीता इवादत्ता इव॥

चित्ते विचिन्त्य भयमभ्रपथेऽभियाति-
स्वर्भाणुतो निजपरिच्छदमप्यशेषम्।
आदाय यद्विविधरत्ननिकेतकायाः
सातं क्षिताविव वसन्ति सितांशुसूर्याः॥ ७४॥

यन्नगर्यां विविधानामनेकजातीयानां रत्नानां कर्केतनादीनां मणीनां ये निकेता नैकोचितचक्षुररचनासंदर्भितभवनास्त एव कायाः शरीराणि येषां ते। सितांशवः श्वेतकान्तयश्चन्द्राः सूर्या आदित्याः। उत्प्रेक्ष्यते—क्षितौ पृथिव्यां सातं सुखं यथा स्यात्तथा वसन्ति निर्विघ्नं स्थितिं कुर्वन्ति। किं कृत्वा। अभ्रपथे मेघमार्गे गगने अभियातिः प्रतिपन्थी यः स्वर्भाणुर्विधुंतुदः तस्मात्सकाशाच्चित्ते स्वमानसे भयं निजग्रसनसाध्वसं विचिन्त्य विमृश्य अपि पुनः अशेषं समस्तमात्मपरिच्छदं ग्रहनक्षत्रतारकादिपरीवारमादाय सार्धं गृहीत्वा॥

उन्नालनीरजमिव श्रियमापदेक-
स्तम्भं निकेतनमकब्बरभूमिभानोः।
वंश्या रवेरिव परेऽपि गृहा वहन्ते
शोभां मणीद्युतिविभासितदिग्विभागाः॥ ७५॥

अकब्बरनामा भूमेर्विश्वंभराया भानुर्भास्वांस्तस्य एतावता राज्ञः एक एवाधस्ताद्भागे स्तम्भ आधारस्थूणा यस्य तादृशं निकेतनमेकस्तम्भभवनं श्रियं शोभामापल्लभते स्म। किमिव। उन्नालं नीरजमिव। यथा उत् ऊर्ध्वमुदुच्चैः सलिलाद्बहिर्वर्ति जनलोचनगोचरं वा नालं मृणालं यस्य तादृक् नीरजं कमलं श्रियं शोभामाप्नोति। अपि पुनरकब्बरसाहेः परेऽन्येऽपि गृहाः सप्तभूमिकादयः प्रासादाः शोभां विभूषां वहन्ते। भासन्ते इत्यर्थः। उत्प्रेक्ष्यते—रवेः सूर्यस्य वंश्याः सगोत्राः इव। एकस्मिन् वंशे भवाः समुत्पन्ना वंश्याः प्रोच्यन्ते एकवंशजाः प्रायः सदृशा भवेयुरिति। अत एव मणीनां भवनगर्भसंदर्भीभूतानां नानाविधरत्नानां द्युतिभिर्ज्योतिर्भिर्विभासिताः प्रकाशिता उद्द्योतिता दिशां दशानामप्याशानां विभागाः प्रदेशा यैः॥ इति नगरनृपगृहाः॥

छायापथे निरवलम्बतया वसन्ती
संख्यातिपातिमखभुग्भरभारितेव ।
पौरस्फुरत्पुरनिभादमरावतीयं
भूमौ समं निजजनैर्न्यपतत्त्रुटित्वा ॥ ७६ ॥

पौरैर्नागरैर्नगरवासिभिर्निखिलजनैः स्फुरन्निर्भरभृतं दृश्यमानं विलसद्वा यत्पुरं फतेपुराभिधनगरं तस्य निभात्कपटान्निजजनैः स्वदेवीदेवलोकैः समम् । उत्प्रेक्ष्यते—इयं प्रत्यक्षलक्ष्या अमरावती पुरंदरपुरीव त्रुटित्वावस्थानाद्भ्रंशमवाप्य न्यपतत् । अधोभूपीठे निपतिता स्थिता चावाप्याधारम् । किंभूता । छायापथे छायारूपे न तु क्रमादिमोचिते स्थाने तादृशे पथे मार्गे गगने निरवलम्बतया निराश्रयभावेन वसन्ती वासं विदधती । तिष्ठन्तीत्यर्थः । पुनः किंभूता । संख्यां गणनामतिपतन्ति अतिक्रामन्तीत्येवंशीला ये मखभुजो देवास्तेषां भरैर्वीवधैर्भारः गौरवं संजातोऽस्या इति भारिता भारयुक्ता जाता नम्रीभूता । अत एव त्रुटित्वा पतिता इत्यर्थः ॥

स्मारावरोधनधियं विदुषां ददाना
यस्मिन्स्मिताम्बुजदृशः श्रियमाश्रयन्ते ।
गोष्ठीं विधित्सव इवात्र चतुर्निकाय-
देवाङ्गनाः कुतुकिता मिलिता मिथोऽमूः ॥ ७७ ॥

यस्मिन् फतेपुरे स्मिताम्बुजदृशः स्मेरारविन्दनयनाः श्रियं शोभामाश्रयन्ते बिभ्रते । किं कुर्वाणाः । ददानाः प्रयच्छन्त्यः । काम् । स्मरस्य मदनस्येदं स्मारं तादृगवरोधनमन्तःपुरं तस्य धियं बुद्धिम् । केषाम् । विदुषां पण्डितानाम् । 'स्मरावरोधभ्रममावहन्ती' इति नैषधे । उत्प्रेक्ष्यते—अमूः प्रत्यक्षाः चतुर्णां भवनपतिव्यन्तरज्योतिष्कविमानवासिलक्षणानां निकायानां जातिविशेषाणां देवानामङ्गनाः स्त्रियः मिथः परस्परम् अत्र नगरे अमूः जगज्जननयनविषया मिलिता इव । किंभूताः । गोष्ठीं विधित्सवः अन्योन्यं गोष्ठीं स्वस्ववार्तां कर्तुं काङ्क्षन्त्यः । अत एव किंभूताः । कुतुकिताः कुतुकं स्वपरस्परस्वान्तप्रवृत्तिप्रविधाने कौतूहलं हृदयोल्लासो जातमासामिति कुतुकिताः ॥ इति नरनार्यः ॥

स्वर्गे सुरेश इव शेष इवाहिगेहे
चन्द्रो दिवीव निधिनाथ इवालकायाम् ।
प्रीणन्प्रजा दशदिशां विजयं विधाय
तस्यां पुरि क्षितिपतिः स्म करोति राज्यम् ॥ ७८ ॥

दशानामपि दिशां हरितामासमुद्रक्षितेर्विजयं स्वायत्तीकरणं विधाय कृत्वा प्रजाः प्रकृतीः समस्तलोकान् प्रीणन् संतुष्टान् कुर्वन् । स क्षितिपतिः जगत्प्रसिद्धिमानक-

ब्बरपातिसाहिः तस्यां फतेपुरनाम्न्यां पुरि नगर्यां राज्यं करोति स्म। समग्रनगरजनपदगजचक्रैश्वर्यं भुनक्ति स्म। क इव। सुरेश इव। यथा स्वर्गे देवलोके देवेन्द्रो राज्यं पालयति। पुनः क इव। शेष इव। यथा अहिगेहे नागलोके शेषनागाधिपो धरणेन्द्रो वा राज्यं कुरुते। पुनः क इव। चन्द्र इव। यथा दिवि आकाशे निशापतिर्ज्योतिषामैश्वर्यं कुरुते। पुनः क इव। निधिनाथ इव। यथा अलकायां निधीनां समस्तमहीमण्डलगतनिधानानां नाथः स्वामी धनदः राज्यं पालयति ॥ इत्यकब्बरवासितफतेपुरवर्णनम् ॥

गान्धर्विकाः क्वचन घोषवतीं वहन्तो
गायन्ति यत्र नवपञ्चमगर्भगीतिम्।
प्रस्थापितास्तमुपवीणयितुं मघोना
स्वर्गायनाः स्वजयशङ्कितचेतसेव ॥ ७९ ॥

यत्राकब्बरसभायां क्वचन कुत्रापि प्रदेशे घोषवतीं वीणां वहन्तः करे धारयन्तः गान्धर्विकाः गायनवरा इतरगायनजनगानेभ्योऽसाधारणोऽश्रुतपूर्वत्वान्नवीनः पञ्चमनामा रागो गर्भे मध्ये यस्यास्तादृशीं गीतिं गानं गायन्ति गेयविषयीकुर्वन्ति। उत्प्रेक्ष्यते—स्वस्यात्मनो जये पराभवे असौ स्वर्गे समेत्य मा मां जयतादिति शङ्कितं शङ्कायुक्तं जातं चेतो यस्य तादृशेन मघोना शक्रेण तं साहिं वीणया कृत्वा उप समीपे समेत्य गातुं गानगोचरीकर्तुं प्रस्थापिताः प्रेषिताः स्वर्गायना हाहाहूहूप्रमुखा देवगन्धर्वा इव ॥

यस्यां महीमदनसंसदि नर्तकेषु
नृत्यं मनोनयनवृत्तिहरं सृजत्सु।
सप्तस्वरैस्तदुदिताप्रमितप्रसत्ति-
सप्ताङ्गलक्ष्मिमुदितध्वनितैरिवासे ॥ ८० ॥

यस्यां वर्णनागोचरीकर्तुमारब्धायामतिशायिरूपत्वान्महीमदनो भूमीमनोभूरकब्बरपातिसाहिस्तस्य संसदि सभायाम्। 'निषधवसुधामानां कस्य' इति नैषधे। नर्तकेषु नृत्यकारकेषु मनसां तथा नयनानामर्थाच्चतुरचित्तलोचनानां वृत्तेर्व्यापारस्य हरमपहारकम् अनन्यवृत्तिविधायकं नृत्यं ताण्डवं सृजत्सु कुर्वत्सु सत्सु। षड्ज–ऋषभ–गान्धार–मध्यम–पञ्चम–धैवत–निषधनामभिः सप्तभिः स्वरैरासे। सप्तस्वराणां तानमानमूर्छनाभिर्बभूवे इत्यर्थः। उत्प्रेक्ष्यते—तस्मादकब्बरसाहेरुदिता प्रकटीभूता या अप्रमाणा प्रमाणातीता असाधारणा प्रसत्तिः प्रसन्नता यस्यास्तादृश्याः। स्वामि–अमात्य–सुहृत्–कोश–राष्ट्र–दुर्ग–सैन्यलक्षणानि सप्तसंख्याकान्यङ्गानि अवयवा यस्यास्तद्विधायाः लक्ष्म्या राज्यश्रियाः। समासमध्ये लक्ष्मिशब्दो ह्रस्वोऽपि दृश्यते। यथा—'चरणलक्ष्मिकरणग्रहणोत्सवे' इति ऋषभनम्रस्तवे। तथा—'लक्ष्मीर्लक्ष्मिर्हरेः स्त्रियाम्' इति शब्दप्रभेदेऽपि। मुदितध्वनितैरिव प्रमोदमेदुरमनस्त्वेन शब्दितैरिव ॥

कुत्रापि मौरजिकमण्डलवाद्यमान-
माद्यन्मृदङ्गनिनदाननुकर्तुकामः।
जैनं पदं परिचरन्विगतावलम्बः
श्रेयोऽनुतिष्ठति घनः किमु कामवर्षी ॥ ८१ ॥

कुत्रापि साहिसभायाः कस्मिंश्चित्प्रदेशे मुरजान्वादयन्तीति मौरजिका मृदङ्गवादकास्तेषां मण्डलेन संदोहेन वाद्यमानानां विविधतालैः पाणिभिस्ताड्यमानानां तथा माद्यतां भोजनदानलोभेन मदवतां गम्भीरनिजाभ्यां मृदङ्गानां मर्दलानां निनदान् शब्दाननुकर्तुं सदृशीभवितुं कामोऽभिलाषो यस्य तादृक् घनो जलधरः श्रेयः सुकृतं पुण्यमनुतिष्ठति करोतीव। किंभूतः। विगतो निर्यातोऽवलम्ब आश्रयः स्वजनादिवर्गः स्वामिनगराद्युपष्टम्भो यस्य। एतावता एकाकी गगनेस्थितत्वात् च निराधारः। पुनः किंभूतः। काममतिशयेन जनमनोभिलाषं वा वर्षति प्रचुरपयोवृष्टिं कुरुते प्रददातीत्येवंशीलः कामवर्षी। पुनः किं कुर्वन्। जैनं जिनोऽर्हन्नारायणश्च तत्संबन्धि पदं चरणं परिचरन् सेवमानः। अर्हच्चरणं विष्णुपदं च भजमानः। आकाशे तिष्ठन्नित्यर्थः॥

स्वर्गे न किंचिदपि दानमवाप्नुवद्भिः
प्राप्तैस्तदाप्तुमवनीं धनदाद्धरेन्द्रात्।
देवैर्न तुम्बुरुमुखैः क्वचन प्रवीणै-
र्वीणा अवादिषत कर्णसुधां किरन्त्यः ॥ ८२ ॥

क्वचन सभायाः कुत्रचित्स्थाने प्रवीणैर्वीणावादनातिनिपुणैर्वैणिकैर्वीणावादकैर्वीणा विपञ्च्योऽवादिषत वाद्यन्ते स्म। किं कुर्वन्त्यो वीणाः। कर्णयोः श्रोतृश्रवणयोः सुधामत्यन्ताह्लादकारित्वादमृतं किरन्त्यो वर्षन्त्यः। उत्प्रेक्ष्यते—तुम्बुरुर्नामा कश्चित्सुरगायनविशेषः स मुख आदिर्येषां तैः। देवगायनैरित्यर्थः। नेत्युत्प्रेक्षार्थे। किंभूतैर्देवैः। अवनीं भूमीं प्राप्तैरागतैरिव। किं कर्तुम्। अवन्या भूमेर्धनदादतिवदान्यतया वैश्रवणाद्धरेन्द्रादकब्बरात्सकाशाद्दानं मनःसमीहितधनं आप्तुमधिगन्तुम्। तर्हि किम्। स्वर्गे दानं नास्ति। तदेवाह—किंभूतैर्देवैः। स्वर्गे देवलोके किंचिदपि स्तोकमात्रमपि दानं विश्राणनं द्रविणादि। नेति निषेधे। नावाप्नुवद्भिः अलभमानैः। देवेन्द्रादीनां दृढमुष्टितया वसुधायां वदान्यबाहुल्यादुपेतमिति॥

एषैव पूस्त्रिजगतीजयिनी निवस्तु-
मौचित्यमावहति भो हरितां महेन्द्राः।
कुत्रापि वेणुरिति वैणविकैः प्रणुन्नो
वस्तुं किमाह्वयति तानिह सान्द्रनादैः ॥ ८३ ॥

कुत्रापि साहिसभायाः क्वचन प्रदेशे वैणविकैः वेणुं वादयन्तीति वंशवादकैर्गन्धर्वजनैः प्रणुन्नः प्रेरितः । वादित इत्यर्थः । वेणुर्वंशः 'बासली' इति प्रसिद्धः । सान्द्रैः स्नेहलैः श्रवणहृदयप्रमोत्पादकैर्बहलैर्नीरन्ध्रैर्वा नादैर्निजनिनादैः कृत्वा । उत्प्रेक्ष्यते—इति हेतोस्तान् हरितां महेन्द्रान् इह फतेपुरनाम्नि साहिनगरे वस्तुं वासं विधातुं किमाह्वयति आकारयतीव । अन्योऽपि कश्चिज्जनः केनापि प्रेरितः कमप्यनिर्दिष्टनामानमाकारयति । इति किम् । भो इति संबोधने । अहो हरितां महेन्द्राः दशानामपि दिशामधीशाः, त्रिजगतीजयिनी त्रिभुवननिखिलनगरीनिर्जयनशीला एषैव फतेपुरलक्षणा पूः पुरी निवस्तुं वस्तुं निवासं विधातुमौचित्यमार्हन्तीयोग्यतामावहति दधातीति ॥

कुत्रापि केलिविहगा मगधा इवोर्वी-
भानोर्मुदा जयजयेदमुदीरयन्ति ।
शास्त्राम्बुधेरिव सुधालहरीर्हृदन्त-
स्थास्नोः कथाश्च कथकाः कथयांबभूवुः ॥ ८४ ॥

कुत्रापि सभायाः कस्मिन्नपि भूमिभागे केलिविहगा राजशुकसारिकाप्रमुखपतत्रिणः मुदा इष्टफलावलीप्राप्तिप्रमुदितमनस्त्वेन उर्वीभानोरतिशायिप्रतापवत्वेन वसुधाविवस्वतः अकब्बरस्य जयजयेदं हे साहे, त्वं चिरं विगलितावधि जय जय सर्वोत्कर्षेण वर्तस्व सर्वोत्कर्षेण वर्तस्व इदमेतदुदीरयन्ति । 'तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ता पटवस्तमस्तुवन्' इति नैषधे । कथयन्ति । क इव। मगधा इव । यथा मागधा मङ्गलजयशब्दादिकथकाः जयजयशब्दं राज्ञो वदन्ति च पुनः कथकाः पुराणोदितव्याख्यानकारिणः पुरातनकथाकथयितारो वा ब्राह्मणादयः पुरुषाः कथा महापुरुषचरितानि कथयांबभूवुः । उत्प्रेक्ष्यते—हृदन्तर्हृदयमध्ये स्थास्नोः स्थायुकस्य निवसनशीलस्य शास्त्राम्बुधेर्वाङ्मयसमुद्रस्य सुधालहरीरमृततरङ्गानिव ॥

यस्यामवीज्यत विभुश्चमरैः सुरेन्द्रः
स्वर्वर्णिनीभिरिव वारविलासिनीभिः ।
रेजे पुनर्नृपतिमूर्ध्नि सितातपत्रं
राजत्वनिर्जित इवोपचरन्मृगाङ्कः ॥ ८५ ॥

यस्यामकब्बरसभायां विभुरकब्बरपातिसाहिः वारविलासिनीभिः बालव्यजनवीजनातपत्रधारणादिप्रकारैः पार्थिवसेवाविधायिकाभिः पण्याङ्गनाजातिभिः वारसारङ्गलोचनाभिः चमरैर्वालव्यजनैः कृत्वा । 'चमरश्चामरोऽपि च' इति शब्दप्रभेदे । अवीज्यत वीज्यते स्म । क इव । सुरेन्द्र इव । यथा वासवः स्वर्वर्णिनीभिरुर्वशीप्रमुखाभिरप्सरोभिः दिव्यप्रकीर्णकैर्वीज्यते । पुनरपरोक्तौ यस्यां संसदि नृपतिमूर्ध्नि पातिसाहिमस्तके सितातपत्रं सितातपवारणं रेजे भाति स्म । उत्प्रेक्ष्यते—राजत्वेन राजभावेन निर्जितः

सन्नुपचरन् सेवां कुर्वाणो मृगाङ्कः सुधादीधितिरिव । यो येन निर्जित्य निजसेवकीकृतः स तस्यातपनिवारणादिना संनिधौ तिष्ठन्ननिशं सेवां विधत्ते ॥

शृङ्गारिताः क्वचन मत्तमतङ्गजेन्द्रा
विन्ध्याञ्जनावनिभृतोरिव तुङ्गशृङ्गाः ।
वाजिव्रजाः क्वचन सन्ति परैरसह्य-
तेजोजितैः कजकरैरुपदीकृताः किम् ॥ ८६ ॥

यत्र सभायां क्वचन कुत्रचित्प्रदेशे शृङ्गारिताः सिन्दूरतैलादिभिः तथा चमरकाञ्चनरचितपट्टबन्धादिभिर्विभूषिताः मत्ता मदोद्धुराः सप्तसु स्थानकेषु द्वौ कपोलौ द्वे पार्श्वे द्वौ शिरःपिण्डौ मेढ्रं च । अथ च कुत्राप्येवं दृश्यते यथा—'द्वौ गण्डौ लोचने द्वे च गुदं मेढ्रं करः पुनः । मदच्युतिर्भवेत्सप्तस्विति स्थानेषु हस्तिनाम् ॥' इति । पश्चात्तद्रक्षिता रावा तच्छास्त्रविदो विदन्तीति । एतेषु स्थानकेष्वविरलमदप्रवाहझरन्तोऽत्युत्कटा मतङ्गजेन्द्राः गजराजाः सन्ति सजलजलधरगलगर्जितं कुर्वन्तो विद्यन्ते । उत्प्रेक्ष्यते—विन्ध्यो जलवालकाद्रिः, विन्ध्याचलः अञ्जननामा च अवनिभृत्, तयोस्तुङ्गा गगनाङ्गणलिङ्गिनः शृङ्गाः शिखराणीव । शृङ्गः पुंनपुंसकलिङ्गे । क्वचन वाजिव्रजाः शृङ्गारिताः । अत्राप्येतद्विशेषणम् । सुवर्णखलीनपर्याणादिभिः शोभिताः तुरङ्गमगणाः सन्ति वितिष्ठन्ते । उत्प्रेक्ष्यते—परैः सर्ववैरिवारैरसह्यानि सोढुमशक्यानि यानि तेजांसि प्रबलप्रतापाः तैः कृत्वा जितैः परिभूतैः कजकरैः पद्मपाणिभिः । 'मित्रो ध्वान्ताराातिरब्जांशुहस्तः' इति हैम्याम् । भास्करैः । सूर्याणां बाहुल्याद्बहुत्वम् । 'द्वादशात्मा च हेलिः' इति हैम्याम् । उपदीकृता ढौकिता इव ॥

शौर्याज्जिगीषुमवगत्य निजं मृगेन्द्रै
रेजेऽनुनेतुमिव यं प्रहितैर्मृगैः स्वैः ।
स्कन्धेन येन विजितैर्वनजैस्तुरङ्ग-
द्वेष्यैर्निषेवितुमिवोपगतैश्च यस्याम् ॥ ८७ ॥

च पुनर्यस्यां सभायां क्वचन मृगैः कृष्णसारैर्हरिणै रेजे । उत्प्रेक्ष्यते—शौर्यात् शूरभावात् यं नृपं निजमात्मानं जिगीषुं जेतुमिच्छुमवगत्य ज्ञात्वा मृगेन्द्रैः सारङ्गराजैस्तमनुनेतुं प्रसादयितुं स्वानुकूलीकर्तुं स्वैरात्मीयसेवकैर्मृगेन्द्रत्वात्प्रहितैः सेवाकृते प्रेषितैः सारङ्गैरिव । च पुनर्यस्यां क्वचिद्रेजे । तुरङ्गद्वेष्यैर्वन्यैर्वनखण्डजन्मभिः । 'रजस्वलो वाहरिपुः' इति हैम्याम् । उत्प्रेक्ष्यते—येनाकब्बरेण स्कन्धेन निजांसस्थलेन कृत्वा विजितैः । अत एव तं नृपं निषेवितुमुपासनागोचरं नेतुं वनजैर्वन्यैः कासरैरिवोपगतैः ॥

द्वीपाधिपत्वमिह नो वनवासभाजो
यद्द्वीपिनो मम निरर्थकमेव नाम ।

तत्तत्प्रभोः प्रदिश कल्पितकल्पशाखि-
न्द्वीपिव्रजो भजति वक्तुमितीव भूपम् ॥ ८८ ॥

यस्यां क्वचित्स्थाने द्वीपिव्रजो व्याघ्रसमूहो भूपं भजते । उत्प्रेक्ष्यते—इति वक्तुमिव कथयितुमिव । इति किम् । मम द्वीपीति नाम निरर्थकमिव वर्तते । द्वीपानि सन्त्यस्येति द्वीपी इदमभिधानं व्यर्थमेवास्ति । यत्कारणादिह जगति भूमण्डले वा मम द्वीपाधिपत्वमेव नास्ति । मम किंभूतस्य । वनवासभाजः । द्वीपाधिपत्वं तु दूरे तिष्ठतु, द्वीपनगरादिमध्ये स्थितिरपि नास्ति । इदं तु जम्बुद्वीपम् । तद्ग्रामादिष्वपि स्थितेरभावः । गिरिगह्वरे वासभाजः स्थितिं कुर्वाणस्य । तत्तस्मात्कारणात् । हे कल्पितानां मनसोऽभिलषितानां पूरणे कल्पशाखिन् स्वस्तरो हे प्रभो हे साहे, तन्ममत्वं द्वीपाधिपत्वं प्रदिश देहि । इति विज्ञप्तुमिव ॥

प्राचीपतिं विबुधराजबलारिघाति-
जिष्णुं सहस्रनयनं शतकोटिपाणिम् ।
दृष्ट्वा भ्रमादिव हरेः स्वपतेरुपेताः
स्वःसुभ्रुवो व्यभुरिहामितवारवध्वः ॥ ८९ ॥

इह सभायाममिताः प्राणातीतास्ताम्बूलजलवालव्यजनादिवाहिन्यो वारवध्वो वारविलासिन्यो व्यभुः शुशुभिरे । उत्प्रेक्ष्यते—स्वःसुभ्रुवोऽप्सरसः उपेता आगताः । कस्मात् स्वस्यात्मनः पत्युर्भर्तुर्हरेरिन्द्रस्य भ्रमाद्भ्रान्त्या । किं कृत्वा । दृष्ट्वा । अर्थायं नृपम् । किंभूतम् । प्राचीपतिं पूर्वदिक्स्वामिनम् । गुर्जरदेशापेक्षया फतेपुरस्य पूर्वदिग्वर्तित्वात् । पुनः किंभूतम् । विबुधानां पण्डितानां राजानमधीश्वरम् । सर्वशास्त्रकलापारगामित्वात् । पुनः किंभूतम् । बलेन कलिता बलिष्ठा ये अरयो वैरिणस्तेषां घातिनं हननशीलम् । पुनः किंभूतम् । जिष्णुं जयनशीलम् । सर्वत्राप्यप्रतिहतत्वात् । पुनः किंभूतम् । सहस्रनयनं सहस्राक्षम् । पुनः किंभूतम् । शतशः कोटयः स्वर्णादीनां शतसहस्रलक्षाः पाणौ यस्य प्रबलकोशकलितम् । इन्द्रार्थे पूर्वापतिं देवराजं बलनामदैत्यस्य रिपोर्घातिनं नाम्ना जिष्णुं सहस्रनयनं वज्रहस्तं च ॥

ऊर्ध्वंदमा क्वचन मौलिविलासिहस्ताः
श्रीकण्ठमित्रमिव शीलति राजराजिः ।
शैला इवैतदभिभूतमहीपतीनां
मुक्तामणीवसुगणाद्युपदाः स्फुरन्ति ॥ ९० ॥

क्वचन क्वापि सभायां राज्ञां महामहीन्द्राणां राजिः श्रेणी शीलति । अर्थात्सभापतित्वात् । यं नृपं भजते । किंभूताः । ऊर्ध्वंदमा ऊर्ध्वीभूताः । प्रायोऽकब्बरसाहिसमाजे सर्वेऽपि जनाः सामन्तादय ऊर्ध्वीभूयैव संतिष्ठन्ते इति रीतिरासीत् । पुनः किंभूताः । मौलौ

मस्तके विलसनशीलौ स्थायुकौ हस्तौ यस्याः । कमिव । श्रीकण्ठमित्रमिव । यथा वैश्रवणं यक्षेश्वरत्वात् राज्ञां यक्षाणां राजिर्धोरणी शीलति । 'यक्षः पुण्यजनो राजा' इति हैम्याम् । पुनः क्वचन एतेनाकब्बरसाहिना अभिभूतानां स्वसेवकीभूतानां महीपतीनां राज्ञां मुक्ता मौक्तिकानि, मणयो रत्नानि । अधुना 'जवाहर' इति प्रसिद्धाः । वसूनि स्वर्णरूप्यधनानि, तेषां गणा आदौ यासां तादृश्य उपदाः प्राभृतानि ढौकनकानि 'भिटणा' इति प्रसिद्धाः स्फुरन्ति । क इव । शैला इव । यथा अत्युच्चाः शैला वीक्ष्यन्ते । यथा अतिबह्व्योऽभ्रंलिहाश्चोपदा दृश्यन्ते ॥

शीलन्ति यं क्वचन संसदि लोकपालाः
शच्या इव प्रियतमं च चतुर्दिगीशाः ।
साङ्गा इव क्वचन वीररसाश्च वीराः
सेनान्यमेव चतुरङ्गचमूरनूनाः ॥ ९१ ॥

च पुनः संसदि सभायां क्वचन प्रदेशे चतसृणां प्राची-अवाची-प्रतीची-उदीची-लक्षणानां दिशां हरितामीशाः स्वामिनो लोकपालाः राजानो यमकब्बरं शीलन्ति । कमिव । यथा शच्या इन्द्राण्याः प्रियतमं प्राणनाथं पुरंदरं सोमयमवरुणवैश्रवणाभिधानाश्चतुर्दिङ्नायका लोकपालाः शीलन्ति । च पुनः क्वचन क्वापि वीराः सुभटाः शीलन्ति । उत्प्रेक्ष्यते—साङ्गाः सशरीरा वीरनामानः पञ्चमा रसाः इव । पुनः अनूना सुदृढतनुत्रनिशितशस्त्रादिद्विचत्वारिंशदुपगरणकलिता चत्वारि गजवाजिरथपदातिलक्षणानि अङ्गान्यवयवा यस्यास्तादृशी चमूः शीलति । कमिव । सेनान्यमिव । अत्र एव इवार्थे । यथा चक्रवर्त्यादिसेनापतिं चतुरङ्गिणी सेना सेवते । अथवा । सेनान्यं स्वामिकार्तिकं चतुःस्कन्धा सुरसेना सेवते । देवैः स्कन्दमेव सेनानीत्वेऽभिषिच्य तारको निहतः । एतद्विस्तरः परसमये ॥

आकाशवत्कविबुधश्रियमादधाना
नीरेशितार इव जिष्णुरमाभिरामाः ।
श्रीदा इव प्रदधतोऽत्र वदान्यभावं
सभ्या विभान्ति धिषणा इव वागधीशाः ॥ ९२ ॥

अत्राकब्बरसभायां सभायां साधवः सभ्याः सभासदः राजसभोपवेष्टारः विभान्ति शोभन्ते । किंभूताः । कवितया काव्यकर्तृत्वेन । यदुक्तं स्वगर्वापहारिणा केनचिद्विदुषा— 'वयमपि कवयः कवयः कवयः कवयश्च सिद्धसेनाद्याः । यद्यपि डलयोरैक्यं तत्किं कलभीयते करभः ॥' इति । तथा बुधतया पाण्डित्येन श्रियं शोभामा सामस्त्येन सर्वकलावेत्तृत्वेन दधानाः सभाया विभूषां कुर्वाणा वा । किंवत् । आकाशवत् । यथा आकाशाः कवीनां शुक्रानां बुधानां रोहिणीनन्दनानां च श्रियं लक्ष्मीमा सामस्त्येन बिभ्राणाः कुर्वाणा

वा सन्ति । सूर्याणां द्वादशत्वेन बाहुल्याद्ग्रहाणामपि बाहुल्यम् । सूर्याणां ग्रहपतित्वात् । पुनः किंभूताः । जिष्णुत्वेन सुभटतया शौर्येण जयनशीलतया रमा लक्ष्मीः तया अभिरामा गजाश्वग्रामादिबहुविभूतिभ्राजिनः । 'जिते च लभ्यते लक्ष्मीः' इति वचनात् । शत्रुं जैत्राणां सुभटानां हि प्रायः स्वामिनो ग्रामान्ददते इति रीतिः । के इव । नीरेशितार इव । 'वार्नदीशः सरस्वान्' इति हैम्याम् । वारिपतिर्नदीपतिश्चेति संयोगाद्वा । यथा समुद्रा जिष्णुरमाभ्यां कृष्णतत्पत्नीभ्यां कृत्वा मनोज्ञाः । समुद्रशायी कृष्णः । लक्ष्म्यास्तज्जायात्वेन सांनिध्यम् । पुनः किंभूताः । वदान्यभावं दानशौण्डतां प्रकर्षेण दधतो बिभ्रतः । के इव । श्रीदा इव । यथा धनदा दानशीलत्वं दधते । पुनः किंभूताः । वागधीशाः । प्रगल्भवाग्विलासाः । 'वागीशो वाक्पतौ' इति हैम्याम् । क इव । धिषणा इव । यथा सुराचार्याः । 'धिषणः फाल्गुनीभवः । गीर्बृहत्योः पतिः' इति हैम्याम् । वाचामधीशा भवन्ति ॥

स्वस्त्रैणजैत्रमणिकल्पितशिल्पचञ्च-
त्पाञ्चालिकापहृतलोचनचित्तवृत्तिः ।
पूर्वापराम्बुनिधिसीममहीमघोनो
या संसदाप सुषमां बलभित्सभेव ॥ ९३ ॥

पूर्वापराम्बुनिधी प्राच्यप्रतीच्यसमुद्रौ सीमा अवसानं मर्यादा यस्यास्तादृश्या मह्या भूमेर्मघोनो वासवस्य संसत् सभा सुषमां सातिशायिशोभां प्राप लेभे । केव बलभित्सभेव । यथा बलनामानं दानवेन्द्रं भिनत्ति हन्तीति बलभित्पुरंदरस्तस्य सभा पर्षत् सुधर्मानाम्नी सुषमामाप्नोति । किंभूता । स्वः स्वर्गस्य स्त्रीणां समूहः स्त्रैणं सुराङ्गनागणस्तस्य जैत्रीभिर्जयनशीलाभिः मणिभिर्विविधरत्नैः कल्पितं रचितं शिल्पं विज्ञानं तेन चञ्चन्तीभिः शोभमानाभिः । अथ वा मणिभिर्निर्मितं विज्ञानं यासां तथा चञ्चन्तीभिः पाञ्चालिकाभिः पुत्रिकाभिरपहृता स्वायत्तीकृता स्वासु एकताना विहिता लोचनानामर्थाद्विलोककान्तानयनानां मनसां चेतसां च वृत्तिर्व्यापारो यया सा ॥ इत्यकब्बरसभावर्णनम् ॥

गोष्ठीं सृजन्क्षितिसितांशुरशेषशास्त्रा-
धीतीव तत्सदसि कोविदमेदुरायाम् ।
धर्मं विशिष्य परिचेतुमना इति स
सामाजिकाननुयुनक्ति कदाचिदेषः ॥ ९४ ॥

एषोऽकब्बरः क्षितिसितांशुर्धरणीरोहिणीरमणः कदाचित् कस्मिंश्चित्समये विशिष्य विशेषप्रकारेण कृत्वा धर्मं मोक्षसाधकं मार्गं परिचेतुं परिचितिगोचरीकर्तुं मनोऽन्तःकरणं यस्य सः । तस्यां पूर्वव्यावर्णितस्वरूपायां सदसि सभायां सामाजिकान्

सभ्यानित्यमुना प्रकारेणानुयुनक्ति स्म । पप्रच्छेत्यर्थः । किंभूतायां सदसि । कोविदैर्निरवद्यविद्याविदुरविशारदवृन्दैर्मेदुरायां पुष्टायां भृतायाम् । मण्डितायामित्यर्थः । क्षितिसितांशुः किं कुर्वन् । गोष्ठीं विनोदवार्ता सृजन्निर्मिमाणः । क इव । अशेषशास्त्राधीतीव । यथा अशेषेषु समस्तेषु शास्त्रेषु व्याकरणसाहित्यप्रमाणच्छन्दोवेदज्योतिरलंकारनीतिचाणक्यादिषु वाङ्मयेषु अधीतमध्ययनमस्यास्तीत्यधीती सर्वशास्त्राध्येता गोष्ठीं सृजति ॥

किं पप्रच्छ तदेवाह—

भास्वानिव प्रकटयत्यनवद्यमार्गं
प्राणान्निजानिव पिपर्ति समग्रसत्त्वान् ।
धत्ते स्पृहामिह न सिद्धमिव क्वचिद्यो-
ऽनुक्रोशशालिपदवीमिव योजनौघः ॥ ९५ ॥

विश्वासुमत्सु समदृक्परमेशितेव
सङ्गं कुसङ्गमिव शान्तमना जहाति ।
यः पोतवत्तरति तारयते परांश्च
संसृत्युदन्वति स कश्चिदिहास्ति साधुः ॥९६॥ (युग्मम्)

इह ममाज्ञावर्तिनि महामण्डले सर्वदर्शनेषु वा स प्रसिद्धिमान् साधुर्महात्मा कश्चित्कोऽपि अस्ति वर्तते । यत्तदोर्नित्यसंबन्धात् स कः । यो महात्मा भास्वान् मार्तण्ड इवानवद्यं निष्पापं मार्गं पन्थानं प्रकटयति प्रकाशयति । तथा यो निजानात्मीयान्प्राणान् असूनिव समग्रान् सर्वान् सत्त्वान् प्राणिनः पिपर्ति पालयति । तथा यः सिद्धो मुक्तात्मेव इह विश्वे पुत्रकलत्रधनादिसंसाराभिषङ्गे वा क्वचित्कुत्रापि पदार्थे स्पृहां वाञ्छां न धत्ते दधाति सृजति वा । पुनर्योजनानां चतुःक्रोशीमानानां मार्गप्रमाणविशेषाणामोघः समूह इव अनुक्रोशेन दयया । 'कृपानुकम्पानुक्रोशः' इति हैम्याम् । अनुगतैः परस्परं संबद्धैः क्रोशैर्गव्यूतिभिः शालते शोभते इत्येवंशीलां पदवीं मार्गमाचारं पन्थानं च धत्ते । तथा यः परमेशितेव परमेश्वर इव विश्वेषां त्रयाणां भुवनानां समस्तेषु वा असुमत्सु जन्तुषु समा समभावा स्वपरव्यवसायरहिता एकस्वभावैव दृक् दृष्टिर्यस्य । तथा यः शान्तमुपशमशालि मित्रामित्रेषु समतया समपरिणामतया प्रवर्तमानं वा मनः स्वान्तं यस्य तादृक् सन् कुसङ्गं कुकुत्सितं पाप्मभिर्व्यसनिभिः पिशुनैर्वा सङ्गं संगममिव । सङ्गं प्रमुदाप्रमुखसंबन्धं धनभोगविलासादिकं संगमं वा जहाति स्वयं त्यजति । च पुनः संसृतिः संसारः स एवागाधोऽपरचक्षुरलक्ष्यतलः उदन्वानपारः समुद्रः तस्मिन् पोतवद्यानपात्र इव स्वयं तरति परपारं प्रयासं विनैव सुखेन प्रयाति, परांश्च तारयते परं पारं लम्भयते ॥

वाचं सुधामिव निपीय ततः समुद्र-

नेमीतमीवरयितुः श्रवणाञ्जलिभ्याम् ।

सामाजिकैः स जगदे द्विजचन्द्रिकाभिः

संवर्धितस्फुरदुरःस्थलतारहारैः ॥ ९७ ॥

ततः साहिप्रश्नानन्तरं सामाजिकैः पार्षद्यैः स साहिर्जगदे भाषितः प्रत्युत्तरं प्रदीयते स्म । किंभूतः । निजवदनपद्मविराजिद्विजानां दशनानां चन्द्रिकाभिः कान्तिभिः । दन्ताधिकारे चन्द्रिकाशब्देन कान्तिरेवोच्यते । यथा रघौ—'दशनचन्द्रिकया व्यवभासितम्' इति । संवर्धिताः सम्यक्प्रकारेण वृद्धिं नीताः स्फुरन्तो दीप्यमाना उरःस्थले वक्षःस्थाने स्थितास्तारा उज्ज्वलास्तारकसदृक्षा वा हारा मुक्ताकलापा यैः । किं कृत्वा । श्रवणे कर्णावेवाञ्जलो यो जिनपाणिः एकोऽञ्जलिः ताभ्यां द्वाभ्यां कृत्वा समुद्रनेम्या क्षोणेः तमीवरयितुः शर्वरीवरस्याकब्बरपातिसाहेः पूर्वप्ररूपितप्रश्नलक्षणां वाणीं निपीय सादरं श्रवणविषयीकृत्य । कामिव । सुधामिव । कश्चिद्भाग्यवान् पुमान् सद्गुरुप्रदत्तमन्त्राराधनविधिना पूर्वप्रेम्णा वा प्राचीनाचीर्णातिशायिपुण्येन वा प्रसन्नीभूतसुधाभुजा प्रदत्तं पीयूषमञ्जलिभ्यां पिबति ॥

अस्माभिरीशितरदृश्यत दर्शनेषु

सर्वेषु शेखर इवाखिलधार्मिकाणाम् ।

एकः स हीरविजयाभिधसूरिराजः

क्ष्मापालपङ्क्तिषु भवानिव भूमिपीठे ॥ ९८ ॥

हे ईष्टे सर्वत्र पृथिवीपीठे विजयविधानादौ समर्थीभवतीति ईशिता तस्य संबोधनम् हे ईशितः स्वामिन्, अस्माभिः श्रीमत्सदस्यैः भूमिपीठे निखिलमेदिनीमण्डले सर्वेषु समस्तेषु जैनबौद्धशैवसांख्यवैशेषिकनास्तिकलक्षणेषु षट्सु दर्शनेषु शासनेषु । अथ वा भाट्टप्राभाकरजैमनीयादिषु षड्दर्शनानां शाखाप्रशाखाभूतेष्वपि । सोऽसाधारणगणितानणुगुणगणैर्जगत्त्रये विख्यातः एको न द्वितीयो यस्माद्द्वितीयः हीरविजय इत्यभिधा नाम यस्य तादृशः सूरिष्वाचार्येषु त्रिंशत्प्रतिरूपादिषड्गुणितषट्त्रिंशद्गुणै राजते दीप्यते इति राजा एतावता श्रीहीरविजयसूरिपुरुहूतोऽदृश्यत दर्शनगोचरीचक्रे नापरः । क इव । भवानिव । यथा निखिलानां मुद्गलानां प्रतिष्ठानानां 'पठाण' इति प्रसिद्धानां विविधजातितुरुष्काणां राजपुत्राणां क्ष्मापालानां पृथिवीपतीनां पङ्क्तिषु मण्डलीषु भवान् साहीनामपि साहिर्दृश्यते । उत्प्रेक्ष्यते—अखिलानामिदानींतनयुगजन्मनां समस्तानां धार्मिकाणां धर्मकर्तॄणां शेखरोऽवतंस इव मुकुटो वा ॥

अथ हीरविजयसूरिगुणवर्णनप्रारम्भः—

अध्याप्य देवगुरुणा स्वविनेयवर्गैः
स्वख्यातये प्रतिभुवं प्रहितैरिवैतैः ।
सभ्यैर्गुणान्कवयितुं कतिचित्तदीया
न्प्रारभ्यते स्म वसुधाधिपतेः पुरस्तात् ॥ ९९ ॥

सभायां साधुभिः सभ्यैः सभास्तारैः वसुधाधिपतेर्भूमण्डलाखण्डलस्य पुरस्तादग्रे तदीयान् हीरविजयसूरिसंबन्धिनः कतिचित्सर्वात्मना कथयितुमशक्यतया कियत्संख्याकान् गुणान्कवयितुं स्तोतुम् । 'ईडे कवयति कवते' इति क्रियाकलापे । प्रारभ्यते स्म । उत्प्रेक्ष्यते—देवगुरुणा सुराचार्येण बृहस्पतिना अध्याप्य पाठयित्वा स्वयं सर्वशास्त्रकलापारगामिनो विधाय स्वख्यातये सर्वावनीवलये निजप्रसिद्धिविहितये भुवं प्रति भूमीमण्डले प्रहितैः प्रस्थापितैः स्वविनेयवर्गैर्निजान्तेवासिवृन्दैरिव ॥

एतस्य दृष्टिरजनिष्ट विभो सदृक्षा
भिक्षाचरेऽमृतभुजामपि सार्वभौमे ।
भक्तेऽप्यभक्तिकृति वार्षिकवारिदस्य
वृष्टिर्यथेक्षुविपिने कनकद्रुमे च ॥ १०० ॥

हे विभो स्वामिन्, एतस्य हीरविजयसूरेर्दृष्टिर्दृक् भिक्षया ग्रासमात्रेण चरति वृत्तिमाजीविकां विदधातीति भिक्षाचरो भिक्षुकः । दरिद्र इत्यर्थः । तस्मिंस्तथा अमृतभुजां सुधाशनानां देवानां सार्वभौमे चक्रवर्तिनि पुरंदरे च सदृशा निर्विशेषा सदृशी अजनिष्ट संजाता । पुनर्भक्ते स्वसेवासक्ते भक्तिनिर्भरान्तःकरणतयाशनांशुकादिदायके वा तथा अभक्तिकृति अवज्ञाकारिणि अनिष्टविधायिनि वा पुंसि तुल्यैव अस्य सूरेर्दृष्टिरजनिष्ट । यथा वर्षासु भवो वार्षिकः वर्षाकालसंबन्धिनो वारिदस्य बहुलसलिलाखण्डधारावर्षिणो मेघस्य वृष्टिर्वर्षणमिक्षूणां रसालानां 'सेलडी गूंदगरी' इति प्रसिद्धानां विपिने वने । क्षेत्रे इत्यर्थः । तथा कनकतरौ धत्तूरकवृक्षे च सदृशैव संजायते ॥

संध्याभ्रविभ्रममिवाध्रुवभावभाज-
मुद्भावयन्भवमभङ्गुरतां च सिद्धेः ।
आवेदयत्यसुमतः कुलयातयामो
वंश्यानिवायतिहितः स हिताहितार्थम् ॥ १०१ ॥

स हीरविजयसूरिरसुमतः सकलभविकजन्तून् प्रति हितानिहपरलोकेष्टान् । तथा अहितान् द्वयोरपि लोकयोरनिष्टविधायिनोऽर्थान् भावान्पदार्थान्वा आवेदयते कथयति। क इव । कुलयातयाम इव । यथा गोत्रवृद्धः पुमान् वंश्यान्निजपुत्रपौत्रादिकान् प्रति

हिताहितार्थानावेदयते शुभाशुभान् भावान् कथयति हितमहितं च वक्ति । सूरिः किं कुर्वन् । संध्याभ्राणां संध्याकालसंजातविविधनीलपीतरक्तादिरागकलिताभ्रकाणां दिवसावसानपितृ(सू)प्रभवद्विविधरागाणां विभ्रमं विलासमिव । अध्रुवभावभाजमशाश्वतपरिणामजुषं भवं संसारमुद्भावयन् प्रकटीकुर्वन् । च पुनः किं कुर्वन् । सिद्धेर्महानन्दनगर्या अभङ्गुरतामनश्वरत्वं शाश्वतसुखानुषङ्गितां प्रकटयन् प्रकाशयन् । अर्थाज्जनानां पुरस्तात् । अत एव सूरिर्यातयामश्च किंलक्षणः । आयतावुत्तरकाले इहपरलोकादौ सांसारिकसर्वव्यवहारादौ च हितः शुभचिन्तकः पथ्यवक्ता च ॥

यस्मिन्गतावधि वसन्ति परे निमग्ना
मीनव्रजा इव जना वृजिनावगूढाः ।
तस्माद्भवाम्बुनिधितः स पृथग्बभूव
पङ्कान्तराद्घनरसादिव पुण्डरीकम् ॥ १०२ ॥

स सूरिस्तस्मादवाङ्मनसगोचरीभूतपूर्वपारादनन्तानन्तपुद्गलपरावर्तिनिवर्तननृत्तसूत्रधारात्संसारो देवागाधापारत्वेनाम्बुनिधिः समुद्रस्तस्मात्सकाशात् पृथक् बभूव भिन्नो जातः । संसारं निरस्य मोक्षमार्गे संयमे तस्थिवानित्यर्थः । किंभूतात्तस्मात् । पङ्कः पापमन्तरे मध्ये यस्य । केवलपापमयादित्यर्थः । 'अंहः कलङ्कमघं पङ्कः' इति हैम्याम् । किमिव । पुण्डरीकमिव । यथा सिताम्भोजं पुण्डरीकं पङ्कः कर्दमोऽन्तरे मध्ये तले यस्य तादृशात् घनरसात्सलिलात्पृथक् भवति । स कः । यस्मिन् भवाम्बुनिधौ संसारसमुद्रे वृजिनैः पापकर्मभिरवगूढा आश्लिष्टा व्याप्ताः पापभरभारिताः सन्तः परे इतरे बहुलसंसारिणो जना लोका विगतो विशेषेण यातोऽवधिः सीमावसानं यत्रेति क्रियाविशेषणम् । अनन्तानन्तसमयमित्यर्थः । लीनास्तल्लीनमानसा वसन्ति संतिष्ठन्ते । क इव । मीनव्रजा इव । यथा मत्स्याः समुद्रे निमग्ना एव तिष्ठन्ति ॥

संत्रस्यदेणरमणीदृगपाङ्गरङ्गो-
त्सङ्गप्रणर्तितकटाक्षपरम्पराभिः ।
चेतस्यविश्यत मुमुक्षुमणेर्न तस्या-
लोकस्य मध्य इव चण्डरुचीरुचीभिः ॥ १०३ ॥

तस्य हीरविजयस्य मुमुक्षुमणेः श्रमणमाणिक्यस्य चेतसि चित्ते संत्रस्यन्तीनां लुब्धकादीनामाकस्मिकभयाकुलतया पलायमानानामेणरमणीनां सारङ्गाङ्गनानां दृगिव चटुललोचनमिव दृक् दृष्टिर्यासां तासाम् । चपलविलोचनानां स्त्रीणामित्यर्थः । दृशां नयनानामपाङ्गयोर्नेत्रप्रान्तयोरेव रङ्गयोर्नर्तनस्थानकयोरुत्सङ्गे क्रोडे प्रणर्तिताभिस्ताण्डवं कारिताभिः कटाक्षाणामक्षिविकूणितानां परम्पराभिर्धोरणीभिर्नाविश्यत न प्रविष्टम् । काभिरिव । चण्डरो(रु)चीरुचीभिरिव । यथा तीव्रकिरणस्य भास्करस्य रुचिभिः कान्तिभिः ।

रुचीशब्दो दीर्घइकारान्तोऽप्यस्ति । यथा नैषधे—'वरुणग्रहिणीमाशामासादयन्तममुं रुचीनिचयमिव' इति । 'नो चेत्ता चण्डरोचीरुचिरुचिरुची' इति जिनशतकेऽपि । अलोकस्य जीवाजीवादीनामनाधारक्षेत्रस्य मध्ये विचालेन प्रविश्यते । अलोकेषु सूर्यादीनां न प्रकाशः । परशासनेऽपि दृश्यते । यथा रघुवंशे—'सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः । प्रकाशश्चान्धकारश्च लोकालोक इवाचलः ॥' 'चक्रवालाचलादर्वाक् प्रकाशः परतश्चाप्रकाशः' इति तद्वृत्तौ । 'लोकालोकश्चक्रवालः' इति हैम्याम् ॥

संसृत्यसारसरणीभ्रमणीभवेन
विश्वत्रयीजनिमतां नयता विमोहम् ।
सङ्गेन यद्यतिपतेः पुरतः प्रणेशे
नागेन नागदमनीत इवोद्धतेन ॥ १०४ ॥

यस्य यतिपतेर्निर्ग्रन्थनाथस्य पुरतोऽग्रे सङ्गेन स्वजनपरिजनाभिष्वङ्गेन प्रणेशे प्रणष्टम् । संसारविरक्तत्वात्तस्य कुत्रापि प्रतिबन्धो नास्तीत्यर्थः । किंभूतेन । संसृतिः संसरणमनन्तभवाटवी पर्यटनं संसारः तद्रूपा विविधनरकतिर्यगादिदुःखपरम्परादायित्वादसारा निकृष्टा सरणिर्मार्गस्तत्र भ्रमण्या पर्यटने भ्रमणेन कृत्वा भवेनोत्पन्नेन । सांसारिककुटुम्बसंबन्धसंजातेनेत्यर्थः । अत एव किं कुर्वता । विश्वत्रय्यास्त्रैलोक्यस्य जनिमतां सुरासुरनराणां विमोहं मौढ्यं नयता प्रापयता । केनेव नेशे । नागेनेव । यथा उत्कटेन मदेन कोपेन वोद्धुरेण भुजंगमेन नागानां सर्पाणां दमनी शक्तिमवनी औषधिविशेषस्तस्मात्प्रणश्यते ॥

संक्रान्तशक्रबलिधामधरापदार्थ-
सार्थे जिनागमकषोल्लिखितान्तराले ।
संक्रान्तिरापि न कदापि हृदात्मदर्शे
सूरीश्वरस्य किमनङ्गतयाङ्गजेन ॥ १०५ ॥

सूरीश्वरस्य हृत् हृदयमेवातिस्वच्छत्वादात्मदर्शो दर्पणस्तत्र अङ्गजेन कंदर्पेण कमनः कलाकेलिः । 'अनन्यजोऽङ्गजः' इति हैम्याम् । कदापि कस्मिन्नपि काले स्वापजाग्रदवस्थातारुण्यतरुणीदर्शनादिसमयेऽपि संक्रान्तिः संक्रमणं प्रतिबिम्बं प्रवेशं च नापि न प्रापे ।-यस्य मनसि कस्मिन्नपि प्रस्तावे स्मरोद्रेको नासीदित्यर्थः । उत्प्रेक्ष्यते—अनङ्गतया अशरीरत्वेनेव संक्रामणं तु देहस्यैव स्यात्तस्य तु स एव नास्ति तस्मात्कुतः संक्रान्तिरिति । किंभूते हृदात्मदर्शे । संक्रान्ताः प्रतिबिम्बिताः शक्रस्येन्द्रस्य बलेर्बलिनाम्नो दानवेन्द्रविशेषस्य धाम्नोर्मन्दिरयोः स्वर्गपातालयोः । तथा धराया निखिलमहीमण्डलस्य च पदार्थानां घटपटस्तम्भकुम्भदानवदानवारिमानवाद्यनेकवस्तूनां सार्थाः समूहा यत्र । प्रतिबिम्बं च निर्मले वस्तुनि स्यात् । अत एव पुनः किंभूते हृदात्मदर्शे । जिनागमो

जैनसिद्धान्तः स एव कषः शाणाग्रं तेनोल्लिखितमुत्तेजितं देदीप्यमानं निर्मितमन्तरालं मध्यं यस्य ॥

नीत्वा बहिर्निजमनःसदनान्निहन्य-
मानं विभाव्य विभुना स्वमरातिभावात्।
नश्यन्निवान्यजनहृत्परमाणुमध्ये
रागो विवेश विवशाशयतादधानः ॥ १०६ ॥

रागोऽनुरागः सांसारिकः स्नेहः। उत्प्रेक्ष्यते—नश्यन्पलायमानः सन् अन्येषां सूरिव्यतिरिक्तानामितरेषां जनानां हृत् हृदयमेव परम उत्कृष्टो योऽणुः सर्वलघुरतिसूक्ष्मस्थानं तस्य मध्ये विचाले विवेश प्रविष्टवान्। नैयायिकानां मते हि मनसः परमाणुत्वमुच्यते। यथा नैषधे—'यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति साक्षात्। बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम् ॥' इति। किंभूतः। विवशं व्याकुलमाशयमभिप्रायं मनो वा आ सामस्त्येन सर्वप्रकारेण दधानो बिभ्राणः। तदेव व्याकुलत्वमाह—किं कृत्वा। निजस्यात्मनो मनश्चित्तमेव सदनं वाससौधं तस्माद्बहिर्बाह्यप्रदेशभूमौ नीत्वा निःसार्य कर्षयित्वा। निष्कास्येत्यर्थः। अरातिभावात्प्रतिभवं दुःखदायकत्वेन वैरित्वाद्विभुना सूरिणा निहन्यमानं मार्यमाणं स्वमात्मानं विभाव्य दृष्ट्वा विज्ञाय वा ॥

एतेन दुर्गतिरशोष्यत भूपमुख्य
ग्रीष्मोष्मणेव विगलज्जलपङ्कपङ्क्तिः।
उल्लङ्घ्यते स्म भवपद्धतिरप्यनेन
पाथोजिनीप्रियतमेन यथाभ्रवीथी ॥ १०७ ॥

हे भूपमुख्य सकलराजचक्रचक्रवर्तिन्, एतेन सूरिणा दुर्गतिः सम्यङ्नियमयमसंयमाराधनतो दुष्टा अनन्तदुःखदायका नरकतिर्यग्लक्षणा कुगतिरशोष्यत निषिद्धा निष्ठापिता स्वतः। केनेव। ग्रीष्मोष्मणेव यथा निदाघदाघेन विगलन्ति तापातिरेकान्निर्यान्ति विशुष्य गच्छन्ति जलानि पानीयानि यस्यास्तादृशी पङ्कानां जम्बालानां पङ्क्तिः श्रेणी शोष्यते। अपि पुनरनेन गुरुणा भवपद्धतिः भाविनि भूतोपचारात्संसारमार्ग उल्लङ्घ्यते स्म अतिक्रान्तः। केनेव। पाथोजिनीप्रियतमेनेव। यथा पद्मिनीप्राणनाथेन सूर्येण अभ्रवीथी गगनपदवी मेघमाला वा उल्लङ्घ्यते ॥

वाचंयमावनिभृतः शमनामसाम-
योनिप्रतीपकलिताङ्कमनोगुहायाम्।

स्वालम्भभीलुक इवोत्कटकोपकुम्भी
कर्तुं प्रवेशमपि नो प्रभविष्णुरासीत् ॥ १०८ ॥

हे सकलराजचक्रचूडामणे, वाचं वाणीं यमयन्ति सावद्यव्यवहारे प्रवर्तमानां नियन्त्रयन्तीति वाचंयमा वाग्गुप्तिधारका । वाक्कथनेन मनःकायगुप्ती समेते । मध्यग्रहणेन आद्यन्तयोर्ग्रहणं कार्यम् । 'तुलादण्डस्येव' इति न्यायेन । तथा 'ढक्कायसमारम्भे' इत्यत्र समारम्भ इति मध्यमपदग्रहणेन संरम्भारम्भयोराद्यन्तयोः पदयोर्ग्रहणम् । 'तुलादण्डन्यायेन' इति श्रीरत्नशेखरसूरिपादाः श्राद्धप्रतिक्रमणसूत्रवृत्तौ प्रोचुः । तेषां संगुप्तित्रयधारिणां साधूनां तेषु वावनिभृत्पार्थिवः पर्वतश्च तस्य शमः प्रशान्तरसः स एव नामाभिधानं यस्य तादृशाः । सामवेदाद्योनिरुत्पत्तिर्यस्य । श्रूयते च—'नारायणनाभ्यम्भोरुहकुहरकुटीरमधिशयानस्य वेदविद्यानिगदतो भगवतः पितामहस्य बृहद्रथान्तरविकीर्णाभासनामानि गायतः सामश्लोकरसनिष्पन्दादुदपद्यन्त ऐरावतसुप्रतीकप्रभृतयोऽष्टौ दिग्गजेन्द्रास्तेभ्योऽभवन् भद्रमन्दमृगमिश्रजातयो गिरिचरनदीचरोभयचारिणः । प्रसिद्धं चैतत् सामजा गजाः' इति चम्पूकथायाम् । तस्य तेषां वा प्रतीपः शत्रुः केसरी तेन कलितोऽङ्क उत्सङ्गो यस्यास्तादृशीम् । मनः चित्तमेव गुहा कंदरा तस्यामुत्कटो मदोद्धतः कोपः क्रोध एव कुम्भी हस्ती प्रवेशमपि कर्तुं प्रभविष्णुः समर्थो नासीत् न बभूव । उत्प्रेक्ष्यते—स्वस्यात्मन आलम्भो व्यापादनं तत्र भीलुको बिभ्यदिव ॥

विश्राणयत्यसुमतां क्षितिकान्त बोधि-
बीजं निधिं जनयितेव निजाङ्गजानाम् ।
सिद्धः स्वसिद्धिमिव भक्तिमतां विनीता-
न्तेवासिनामिव गुरुः परमात्मविद्याम् ॥ १०९ ॥

हे क्षितेर्भूभामिन्याः कान्त वल्लभ, असुमतां भव्यजन्तूनां बोधिबीजं सम्यक्त्वं विश्राणयति ददाति । क इव । जनयितेव । यथा पिता निजाङ्गजानां स्वनन्दनानां निधिं निधानं दत्ते प्रयच्छति । पुनः क इव । सिद्ध इव । यथा विद्यासिद्धिभृद्भक्तिमतां स्वसेवासक्तानां स्वस्यात्मनः सिद्धिं मन्त्रादिसामर्थ्यं दत्ते । पुनः क इव । गुरुरिव । यथा सम्यग्धर्मोपदेष्टा विनीतानां विनयकलितानां स्वादेशवशंवदानामन्तेवासिनां शिष्याणां परमात्मविद्यामध्यात्माम्नायं वितरति ॥

मानोपमानममुना गमितः क्षितीन्दो
जेतुं पुनः प्रतिहतस्तमरातिमिच्छन् ।
साहाय्यकं किमु चिकारयिषुः स्वकीयं
नक्तंदिनं वितनुते जगतामुपास्तिम् ॥ ११० ॥

हे क्षितीन्दो वसुधासुधांशो, मानोऽभिमानो गर्वः अपमानमर्थात्तेन सूरिणैवावगणनां गमितः प्रापितः सन् पुनर्व्याघुट्य प्रतिघातकोपात्तं सूरिमेवात्मारातिं स्ववैरिणं जेतुमभिभवितुमिच्छन् वाञ्छन् सन् जगतां त्रिभुवनजनानामुपास्तिं सेवां वितनुते विदधाति । कथम् । नक्तंदिनं रात्रिंदिवा । उत्प्रेक्ष्यते—स्वकीयमात्मीयं साहाय्यकं साहाय्यं चिकारयिषुः कारयितुमिच्छुरिव ॥

विद्वेषिणीयमिति येन निहन्यमाना
शिश्राय शंबरमसौ दितिजं प्रणश्य ।
स्थातुं न तत्र विभुरेतदुदीतभीतेः
प्रत्यङ्गिनं त्रिभुवने भ्रमतीव माया ॥ १११ ॥

इयमस्माकं प्रतिभवं विद्वेषिणी वैरिणी महाहानिविधायिनी इति कृत्वा निहन्यमाना मार्यमाणा सती असौ प्रायः संसारवर्तिसर्वजनहृदयसदत्वेन जगत्प्रतीता माया शठता दम्भचर्या । कपटवर्तिरित्यर्थः । प्रणश्य कथंचित्प्राह्या प्रपलाय्य शंबरं शंबरनामानं दितिर्दानवमाता तस्या जायते स्मेति दितिजस्तं शिश्राय श्रिता । एतस्मात्सूरेरुदीतायाः प्रादुर्भूताया भीतेर्भयात् तत्रापि शंबरसमीपेऽपि स्मरेण घातित्वात्स्थातुं स्थितिं कर्तुं न विभुरसमर्था सती । उत्प्रेक्ष्यते—निर्विघ्नस्थानाभावात्त्रिभुवने त्रैलोक्येऽपि प्रत्यङ्गिनं जन्तून् जन्तून् प्रति माया भ्रमति पर्यटतीव ॥

संतोषतोयनिधिमध्य इवास्य मग्नो
दग्धः किमुद्धतसितप्रणिधानवह्नौ ।
जग्धोऽथ वा चरणकेसरिणा करीव
लोभः प्रभोरिति न चेत्किमनक्षिलक्ष्यः ॥ ११२ ॥

हे प्रभो स्वामिन्, सूरेर्लोभः । उत्प्रेक्ष्यते—संतोषः धृतिः निर्लोभता स एव तोयनिधिः समुद्रस्तस्य मध्ये गर्भे जलान्तराले मग्नो ब्रूडित इव । अथ वा उत्प्रेक्ष्यते—उद्धतः प्रज्वलन् सितप्रणिधानमेव शुक्लध्यानमेव वह्निर्ज्वालाजिह्वः तत्र तन्मध्ये दग्धो भस्मीभूत इव । अथ वा करीव हस्तीव चरणं चारित्रं तदेव केसरी पञ्चाननस्तेन जग्धो भक्षितः कुक्षिगतीकृतः इव । इति चेन्न तर्हि किं कथमनक्षिलक्ष्यः न लोचनगोचरः कदाचिदपि लोभो न दृश्यत इत्यर्थः ॥

तृष्णां महीतलमहेन्द्र विभुर्विरत्या
यो वागुरामिव कृपाणिकया न्यकृन्तत् ।
दुःखान्यलम्भिषत मुग्धजनैर्निपत्य
यस्यां मृगैरिव भवं विपिनं भ्रमद्भिः ॥ ११३ ॥

हे महीतलमहेन्द्र हे भूमीमण्डलाखण्डल, यो विभुर्हीरविजयसूरिः तृष्णां नानाभिलाषस्वरूपां स्पृहां विरत्या निखिलाभिलाषविरमणरूपनियमेन कृत्वा न्यकृन्तत् चिच्छेद । कामिव । वागुरामिव । यथा कश्चित्सकलजन्तुजातकृपापरः पुमान् वागुरां मृगजालिकां कृपाणिकया क्षुरिकया कर्तर्या वा कृन्तति छिनत्ति । यस्यां तृष्णायां वागुरायां भवं संसारं विपिनमरण्यं च भ्रमद्भिर्मृगैर्हरिणैरिव मुग्धजनैरज्ञानिलोकैर्निपत्य तदधीनीभूय पतित्वा दुःखानि अनेकप्रकारासातपरम्परा अलम्भिषत प्राप्तानि ॥

विश्वत्रयीश इव निःशरणात्मभाजा-
मास्ते महीमिहिर यः शरणं शरण्यः ।
मैत्र्यं बिभर्ति जगता न कदाप्यमित्र-
भावं स भानुरिव नश्यदशेषदोषः ॥ ११४ ॥

हे महीमिहिर भूमीभानो, विश्वत्रयीशः त्रैलोक्यनायकः परमेश्वर इव यः सूरिर्निर्गतं शरणमाधारो यस्य तादृशमात्मानं भजतीति तेषामशरणानां शरणं गतिरास्ते । किंभूतः । शरण्यः शरणागतवत्सलः । पुनः स भानुरिव भास्वानिव जगता विश्वलोकेन साकं मैत्र्यं मित्रतां सखिभावं बिभर्ति, परं कदापि कस्मिन्नपि प्रस्तावे अमित्रभावं वैरिताशयं न विधत्ते । किंभूतः । नश्यन्तः पलायमाना अशेषाः समस्ता दोषा अपगुणा यस्मात् । सूर्यस्तु सर्वदापि मित्र इत्यभिधानत्वं परं नामित्राख्यताम् । सोऽपि किंभूतः । नश्यन्तोऽशेषाः सर्वा अपि श्वेताः कृष्णाश्च दोषा रात्रयो यस्मात् ॥

संमोहसंतमससंततिसान्द्रितेषु
मानावनीधरतटीस्थपुटीकृतेषु ।
संसारवर्त्मसु विमोहवतां शिवस्या-
ख्याता पथः स जगतामिव वर्त्मवेदी ॥ ११५ ॥

हे स्वामिन् अखिलजलधिमेखलापीठप्रभो, संसारवर्त्मसु भवगहनमार्गेषु विमोहवतां मिथ्यात्वाज्ञानादिना मूढभावभाजां दिङ्मूढीभूतानां जगतां तात्स्थ्यात्तद्व्यपदेश इति न्यायेन जगज्जनानां शिवस्य मोक्षस्य पथो मार्गस्याख्याता कथयिता ते । किंभूतः । संमोहो महाज्ञानम् । 'संमोहधूलीहरणे समीरम्' इति संसारदावस्तुतौ । स एव संतमसानि प्रसृमरान्धकाराणि तेषां संतत्या परम्परया सान्द्रितेषु नीरन्ध्रीकृतेषु । पुनः किंभूतः । मानोऽहंकारः स एवावनीधरः पर्वतस्तस्य तटीभिः प्रपातस्थानकैः स्थपुटीकृतेषु विषमेषु विहितेषु । क इव । वर्त्मवेदीव यथा सदसन्मार्गवेत्ता पुमान् पथिषु विमोहवतां मार्गामार्गदिगपदिक्शुद्धिविरहितानां पथिकलोकानां शिवस्य निरुपद्रवरूपस्य मार्गस्याख्याता वक्ता भवेत् । महापर्वतादिगह्वरैरन्धकारैर्बहलीभूतेषु विषमेषु च ॥

अर्थात्क्षमाधरपदं क्वचिदप्रवृत्तं
यस्यात्मनस्तु गिरिभूपतिभिर्विभक्तम्।
ज्ञात्वा तदाप्तुमिव शीलति शार्ङ्गपाणिं
पर्यङ्कमूर्तिधरकुण्डलिचक्रवर्ती ॥ ११६ ॥

पर्यङ्कस्य पल्यङ्कस्य मूर्तिं शरीरं धरतीति बिभर्तीति तादृशः कुण्डलिनां भोगिनां चक्रवर्ती सार्वभौमः शेषनागेन्द्रः शार्ङ्गपाणिं केशवं शीलति सेवते। 'शेषशय्याशायी कृष्णः' इति श्रुतिः। उत्प्रेक्ष्यते—तत्सूरेः स चासौ हीरविजयनामा सूरिराचार्यश्च तस्य क्षमाधरपदम् आप्तुं लब्धुमिव। किं कृत्वा। यस्य सूरेरर्थात्परमार्थवृत्त्या क्षमाधरपदमद्वैतभावेन क्वचिदन्यत्र पुरुषादावप्रवृत्तं कुत्रचित्कदाचित्केनापि न प्राप्तम्। तु पुनः आत्मनः स्वस्य शेषनागस्य तु क्षमाधरपदं गिरिभिः कुलशैलादिशिलोच्चयैः तथा भूपतिभिर्भूपालैर्विभक्तं विभागीकृतम्। गिरयो भूपालाश्च क्षमाधराः शेषनागोऽपि क्षमाधरः इति न किमपि। शेषः। सूरिसंदृशस्त्वन्यः कोऽपि त्रैलोक्येऽपि क्षमाधरो नास्ति। क्षमा क्षान्तिः क्षितिश्च विज्ञाय ज्ञात्वा॥

गम्भीरभावं दधता जिनं च हृदा विगीतः प्रभुणा पयोधिः।
पादारविन्दे किममुष्य लक्ष्मलक्षादुपास्त्यै स्थितवानुपेत्य ॥ ११७ ॥

पयोधिः समुद्रः अमुष्य सूरेरुपास्त्यै सेवायै। उत्प्रेक्ष्यते—लक्ष्मणः आकृतिरूपलाञ्छनस्य लक्षात्कपटादुपेत्यागत्य समीपे समेत्य पादारविन्दे सूरिचरणकमले किं स्थितवांस्तस्थाविव। किंभूतेन। प्रभुणा सूरीन्द्रेण गम्भीरभावं गाम्भीर्यं तथा च पुनर्जिनमर्हन्तम्। चन्द्रसूर्यादीनां राजधानीषु प्रासादसद्भावात्तत्र चत्वारः ऋषभ-चन्द्रानन-वारिषेण-वर्धमान-नामानः शाश्वतजिनाः सन्ति। जिनजातिवाचित्वादेकवचनम्। तथा लोकप्रवादेन कृष्णं समुद्रशायित्वाद्दाशार्हः। 'पुरुषोत्तमोऽब्धिशयनोपेन्द्रावज्रेन्द्रानुजः' इति हैम्याम्। तं दधता। अथ सूरिस्तु जिनशासनाधारत्वाज्जैनत्वाच्च जिनं वीतरागं बिभ्रता। केन। हृदा हृदयेनान्तःकरणेन मध्येन च॥

धरेश येनाधरितो महिम्ना सुजातरूपेण च धीरताभिः।
महीधरो मन्युभुजामुदीतव्रीडाज्जडीभावमिवाबभार ॥ ११८ ॥

हे धरेश पृथिवीपते, येन सूरिणा महिम्ना स्वमाहात्म्येन निजगौरवेण, तथा सुष्ठु शोभनं यज्जातं प्रकटीभूतं रूपं सौन्दर्यातिशयः शोभनेन स्वर्णेन च, तथा धीरताभिः परीषदादिभिर्निष्प्रकम्पताभिः अनन्यसामान्यधैर्यैर्वा अधरितः हीनीकृतस्तिरस्कृतः सन् मन्युभुजां यज्ञांशाभ्यवहारिणां सुराणां शैलः पर्वतो मेरुरुदीतः प्रादुर्भूतो यो व्रीडो लज्जा तस्मात्। 'उदीतमातङ्कितवानशङ्कत' इति नैषधे। तथा 'व्रीडायां च भवेद्व्रीडो

लज्जामात्रेऽप्यपत्रपा' इति शब्दप्रभेदे। व्रीडशब्दोऽकारान्तोऽप्यस्ति। 'स्मरव्रीडसमस्यानया' इति नैषधे। जडीबभूव मूढः। विचेत इति यावत्। जातः॥

बाह्यं हन्ति तमो द्विधापि स नृणामस्तंगमी नास्तवा-
न्विश्वस्यैव विबोधकृत्स जगतां कृत्स्नन्पृणन्कौशिकम्।
गृह्णन्सर्वरसानसौ नवरसांश्चिन्वञ्जनांस्तापय-
ञ्छान्तानेष सृजन्प्रभो तदुपमां धत्ते क्व भास्वांस्ततः॥ ११९॥

हे प्रभो स्वामिन्, ततस्तस्मात्कारणात् भानुः सूर्यस्तदुपमां सूरिसाम्यं क्व कुत्र लभते। अपि तु न कुत्रापि। यतो हेतोः सूर्यो बाह्यं चक्षुर्गोचरं लोकगतं तमोऽन्धकारं हन्ति। पुनः सूरिर्द्विधापि बाह्यं तमोऽज्ञानं मौर्ख्यं तथा बाह्यं पापमपि व्यापादयति। तथा भानुः अस्तं नाशं गच्छतीत्येवंशीलो गमी। सूरिस्तु न विद्यतेऽस्तः क्षयोऽभ्युदयभ्रंशो वा यस्येति नास्तवान्। सर्वदोदयीत्यर्थः। पुनः किंभूतः। विश्वस्यैकस्यैव भूलोकस्य विबोधकृज्जागरकारकः उद्द्योतकर्ता वा सूरिस्तु जगतां त्रयाणां भुवनानां प्रतिबोधविधाता। भास्वान्किं कुर्वन्। कौशिकमुलूकलोकं कृत्स्नन् पीडयन् वासरे तस्यान्धीभवनात्। गुरुस्तु कौशिकं पुरंदरं पृणन् अतिशायिसंयमगुणैः कृत्वा प्रीतिमुत्पादयन्। पुनः किंभूतः भानुमान्। सर्वानशेषान् रसान् भूमण्डलगतपानीयानि गृह्णन्नाददानः। 'ग्रीष्मे सहस्ररश्मिः भूतलगतरुर्वीरसानादत्ते' इति श्रुतिः। मुनीन्द्रस्तु सरसव्याख्यानविधानावसरे नवान् नवीनान्नवसंख्याकान् शृङ्गारहास्यकरुणारौद्रवीरभयानकबीभत्साद्भुतशान्ताभिधानान् रसांश्चिन्वन् पुष्टान्कुर्वन्। प्रायश्चरितानुवादेषु सर्वेऽपि रसाः समायान्ति न तथा सिद्धान्तव्याख्यानादिषु। पुनर्मार्तण्डः किं कुर्वन्। जनांल्लोकांस्तापयन् स्वकीयात्युष्णकिरणैस्तापसंतापभाजः सृजन्। भवपरम्परापरिचितीकृतदुरन्तदुरितोदीतदुःसहदुःखदावानलज्वालाप्रतप्तानेकभविकलोकान् ध्वंसितापरसिद्धान्तवैरुध्यजैनराद्धान्तसंवन्धिबन्धुरस्तवव्याख्यानप्रागल्भ्यप्रगुणानणुपयोधरामृतधाराधोरणीभिः शान्तान्निस्तापाञ्छीतलान् शान्तरसयुक्तान् वा कुर्वाणः॥

यद्वाग्विधित्सया धात्रादत्तां वीक्ष्याम्बुधिः सुधाम्।
खेदादिवोर्मितुमुलैः पतितो रटति क्षितौ॥ १२०॥

अम्बुधिः क्षीरसमुद्रोऽर्थाल्लभ्यते उर्मीणां चतुर्दिग्गमनप्रवृत्तकल्लोलकलापानां तुमुलैर्व्याकुलशब्दकोलाहलैः कृत्वा। उत्प्रेक्ष्यते—क्षितौ भूपीठे पतितः सन् रटति रोदितीव पूत्कुरुते इव। किं कृत्वा। यद्वाचां वाचंयमचन्द्रमसां वाणीनां विधित्सया विधातुमिच्छया करणस्पृहया धात्रा जगत्स्रजा ब्रह्मणा आदत्तां गृहीतां सुधां स्वामृतं वीक्ष्य। धनिकदोहनावसरे प्रेमातिरेका स्वतर्णकपानकृते गोर्गवां वा दुग्धमिव हरिणा मन्थानगमन्थानकमथनसमये तस्मात्कथंचिच्चोरित्वा रक्षितं पीयूषं प्राप्तं प्रेक्ष्य॥

न कदाचन गोचरा मनाक्स्म भजन्ते प्रभविष्णुतां प्रभौ ।
दशना इव दन्तिनां महीभृति वा भानुमतीव तामसाः ॥ १२१ ॥

हे साहे, प्रभौ सूरीन्द्रे सकलसामर्थ्यवति वा यत्र कदाचन कस्मिन्नपि तारुण्यादिसमये गोचराः शब्दरूपगन्धरसस्पर्शाख्याः पञ्चापि विषयाः प्रभविष्णुतां सामर्थ्यं न भजन्ते स्म । तं न प्राभवन्नित्यर्थः । क इव । दशना इव । यथा दन्तिनां गजेन्द्राणां दन्तकोशा महीभृति पर्वते न प्रभवन्ति । वा पुनस्तामसा इव । यथा तामसास्तमसां समूहा घूका वा भानुमति सहस्रकिरणे न प्रभवन्ति ॥

सुधाधामदुग्धाब्धिकर्पूरपारीकुमुत्कुन्दशुभ्रैर्यशोभिर्यतीन्दोः ।
कुदृक्कोटिसंटीकमानायशोभिः पुनर्विश्वमीशप्रयागी(गा)यते स्म ॥ १२२ ॥

हे ईष्टे सकलभूमण्डलैश्वर्यवान् भवतीति ईशस्तस्य संबोधनं हे ईश्वर, यतीन्दोः सूरेः सुधाधामामृतकिरणश्चन्द्रः, तथा दुग्धाब्धिः क्षीरसमुद्रः, तथा कर्पूराणां घनसाराणां पार्यः शकलानि 'फडसि' इति प्रसिद्धाः समूहा वा कुमुदानि कैरवाणि कुन्दानि मुचकुन्दकुसुमानि तद्वत् शुभ्रैरुज्ज्वलैर्यशोभिः कीर्तिभिः । पुनः कुदृशां कुपाक्षिकाणां कोटेः संटीकमानैः प्रसरद्भिरयशोभिर्मषीश्यामापकीर्तिभिः कृत्वा विश्वमिदं जगत् प्रयागी(गा)यते स्म गङ्गायमुनासंयोगवदाचरति स्म । सूरियशांस्यत्युज्ज्वलानि गङ्गाप्रवाहाः, कुदृशामपयशांसि श्यामानि कालिन्दीकलुषजलानि, तेषां सङ्गो निखिलेऽपि लोकेऽतो विश्वमेव प्रयागी(गा)यति(ते) प्रयागं तु एकत्रास्ते ॥

राजन्यस्य गुणान्गलन्मितिसुधास्पन्दान्निपीयादरा-
न्मद्भोज्या अपि मय्यनादरपरा भोगीश्वरा भाविनः ।
मां तातानुगृहाण तेन सुधयात्यभ्यर्थितः साग्रहं
तानश्रावयितुं किमम्बुरुहभूरेतान्विकर्णान्व्यधात् ॥ १२३ ॥

हे राजन्, अम्बुरुहभूर्ब्रह्मा तान् सूरिगुणान् अश्रावयितुं न श्रवणगोचरीकारयितुम् । उत्प्रेक्ष्यते—एतान् भोगीन्द्रान् विकर्णान्कर्णरहितान् व्यधात् कृतवानिव । 'अश्रोत्राः फणिनस्तदेव रुचिरं नो चेदहिस्वामिना' इति खण्डप्रशस्तौ । किंभूतो वेधाः । तेन कारणेन हे तात धातः, मामनुगृहाण मय्यनुग्रहं कुरु इत्यमुना प्रकारेण सुधया कक्कोलाख्येन पीयूषेन साग्रहं सोपरोधमभ्यर्थितो याचितः । यत्तदोः संबन्धाद्येन कारणेन गलन्ती निर्यान्ती मितिर्मानं येषु । अप्रमाणानित्यर्थः । तादृशान् सुधास्पन्दानमृतरसान् यस्य गुरोर्गुणान् निपीय सादरं श्रुत्वा अहमेव भोज्यं भोजनं येषां ते मद्भोज्या अपि भोगीश्वराः सर्वेऽपि नागेन्द्राः मयि सुधायां विषये न विद्यते आदरः आदृतिः पुरोऽग्रे येषाम् । अथ वा आदरे तत्परता येषां ते अनादरपरा अस्वीकारपरायणा इत्यर्थः । भाविनो भविष्यन्ति । इत्ययं हेतुः ॥

सुरशिखरिणस्तुङ्गे शृङ्गे ध्वनिग्रहपारणां
त्रिदशसुदृशां गायन्तीनां गुणाञ्श्रमणेशितुः।
रसिकमनसौ श्यामारामावराम्बरकेतनौ
किमयत इतो गीतिं श्रोतुं तमीदिवसात्यये ॥ १२४ ॥

श्यामा शर्वरी सैव रामा वनिता तस्या वरो भर्ता। 'यामिनीकामिनीपतिः' इति काव्यकल्पलतायाम्। चन्द्रः, तथा अम्बरकेतनः सूर्यः। 'गगनध्वजाध्वगाः' इति हैम्याम्। यथा गगनध्वजस्तथा पर्यायपरिवर्तनादम्बरकेतनः। 'द्वयेऽपि भूभृदाद्येषु' इति हैमीवचनात्। इति तौ तमी रात्रिर्दिवसो वासरस्तयोरत्यये विरामे क्षये वा। प्रभाते संध्यायां चेत्यर्थः। उत्प्रेक्ष्यते—त्रिदशसुदृशां सुराङ्गनानां गीतिं गुणग्रामगानं श्रोतुं श्रवणविषयीकर्तुं किमयतः गच्छत इव। त्रिदशसुदृशां किं कुर्वन्तीनाम्। सुरशिखरिणः सुपर्वपर्वतस्य तुङ्गे गगनालिङ्गिनि शृङ्गे शिखरे गायन्तीनां गानगोचरीकुर्वन्तीनाम्। कान्। श्रमणेशितुः सूरिराजस्य गुणान्। किंभूतां गीतिम्। ध्वनिग्रहपारणां रसिकायितमानसमनुजानां श्रवणानाम्। 'श्रुतौ श्रवः। शब्दाधिष्ठानपैजूषमहानादध्वनिग्रहाः॥ कर्णः श्रोत्रं श्रवणं च' इति हैम्याम्। पारणाम्। यथा उपोषितानां षड्रससरसीकृतरसवतीवल्लने पारणा तदास्वादे चातितृप्तिः स्यात् तथा सूरिगुणगीतिश्रवणेन कर्णानां तृप्तिः स्यात्। अत एव श्रुतिपारणां गीतिं श्रोतुं प्रयातः कुत इतोऽस्मात्स्थानान्मेरोः समीपे शिखरसंनिधाने। किंभूतौ। स्वादरसिकमनसौ सरसगानाकर्णने रसकलिते उत्सुकतायुक्ते चेतसी ययोस्तौ॥

धन्यास्ते नृपते फलेग्रहि पुनस्तेषामभूज्जीवितं
तैः प्रापे स्वजनुःफलं प्रथमतो गण्याश्च पुण्यात्मनाम्।
यैर्लावण्यसुधां न्यपीयततमामाकण्ठमुत्कण्ठितैः
सूरेः स्मेरमुखाम्बुजन्मनि शरच्चन्द्रे चकोरैरिव ॥ १२५ ॥

हे नृपते हे नरनाथ, जगति ते पुरुषा धन्याः कृतपुण्याः पुण्यवन्तः। पुनस्तेषां पुरुषाणां जीवितं प्राणितव्यं फलेग्रहि सफलमभूत्संजातम्। पुनस्तैरेव मानवैः स्वजनुषः निजावरस्य फलं सार्थकभावः प्रापे लब्धम्। च पुनस्ते मानुषाः पुण्यात्मनां पवित्रात्मनाम्। सुकृतवतामित्यर्थः। मध्ये प्रथमत आदितो गण्याः पुण्यवन्तो जनास्तानादौ संस्थाप्य गणनीयाः संख्यागोचरीकर्तव्याः। ते के। यैरुत्कण्ठा औत्सुक्यं जाता येषां ते उत्कण्ठितास्तैरुत्कण्ठितैः सद्भिः सूरेर्हीरविजययतिराजस्य स्मेरं विकसितं यन्मुखाम्बुजं तस्मिन्विषये लावण्यं सौन्दर्यमेव सुधाम् आकण्ठं कण्ठं मर्यादीकृत्य नितराम-तिशयेनापीयततमामापीता आस्वादिता। कैरिव। चकोरैरिव। यथा शरच्चन्द्रे जलधरविरामसमयोदयमानसुधाकिरणे ज्योत्स्नाप्रियैः पीयूषं पीयते॥

ताडङ्का इव कर्णपूरपदवीमालम्बमाना पुन-
र्बिभ्राणा हृदये श्रियं त्रिजगतां मुक्ताकलापा इव ।
हर्षादुद्धुषिता वयं स्मृतिवशाद्येषां प्रियाणामिव
क्षोणीभूषण भूषणैरिव गुणैस्तैर्भूष्यते स प्रभुः ॥ १२६ ॥

हे क्षोणीभूषण मेदिनीमण्डलमण्डन, भूषणैर्मणीस्वर्णाभरणैरिव तैर्जगज्जनविख्यातैर्गुणैः कृत्वा स प्रभुः भूष्यते अलंक्रियते । ते के । ये गुणास्ताडङ्काः कुण्डला इव । कुण्डलशब्दः पुंनपुंसकलिङ्गे । 'कमलं मलं तु शलशालकुण्डलाः' इति लिङ्गानुशासने । कर्णौ श्रवणौ पूरयन्तीति, कर्णौ श्रवसी पूर्येते पूर्येते यैर्वा, तेषां पदवीं पदमालम्बमानाः आश्रयन्तः सन्तीत्यध्याहारः । पुनर्ये गुणाः मुक्ताकलापा इव मौक्तिकहारा इव त्रिजगतां त्रिभुवनजनानां हृदये मनसि वक्षसि च श्रियं शोभां बिभ्राणाः सन्ति । पुनर्येषां प्रियाणामिष्टानामिव स्मृतिवशात्स्मरणयोगाद्वयं श्रीमत्सभ्या अपि हर्षाच्चेतःप्रसन्नताया वशात्प्रमोदाद्वा उद्धुषिता रोमाञ्चिताः स्मः ॥

पण्डा चित्रशिखण्डिनां तनुजवच्चेत्स्यादसाधारणी
यस्यास्ये भुजगप्रभोरिव भवेज्जिह्वासहस्रं पुनः ।
यस्याप्यस्खलिता सुरेश्वरसरिद्वीचीव वाक्चातुरी
संस्तोतुं प्रभवेन्न सोऽपि सुगुरोर्यावद्गुणान्भूमणे ॥ १२७ ॥

हे भूमणे क्षोणीमाणिक्य, सोऽपि पुमान् सुगुरोर्हीरसूरेर्यावतः समस्तान् । 'यावज्जनरञ्जनव्रती' इति नैषधे । 'समस्तलोकरागोत्पादने व्रतमस्यास्ति' इति तद्वृत्तौ । गुणान् संस्तोतुं सम्यक्तया सर्वप्रकारेण वर्णयितुं न प्रभवेन्न समर्थीभवेत् । स कः । यस्य पुंसः चित्रशिखण्डिनां सप्तर्षीणाम् । 'सप्तर्षयश्चित्रशिखण्डिनः' इति हैम्याम् । तनुजवन्नन्दस्येव बृहस्पतेरिव । 'विचित्रवाक्चित्रशिखण्डिनन्दनः' इति नैषधे । पण्डा तच्चानुगामिनी मतिश्चेद्यदि असाधारणी विश्वे कस्यापि सदृशी न सर्वेभ्यो वाग्देवतावाचस्पतिप्रमुखमखभुग्दानवमानवेभ्योऽभ्यधिका । 'साधारणी गिरमुषर्बुधनैषधाभ्याम्' इति नैषधे । 'साधारणात्स्वार्थे भो विकल्पो ङीपोऽपि विकल्पोक्तिः । साधारणी साधारणा' इति प्रक्रियाकौमुद्याम् । अपि पुनर्भुजगप्रभोर्नागराजस्येव यस्यास्ये यदीयवदने जिह्वानां रसनानां सहस्रे द्विसहस्री वा इत्यर्थाल्लभ्यते । भवेत् । अपि पुनः सुरेश्वरसरितो गगनगङ्गायाः । 'सिद्धस्वःस्वर्गिरवापगाः' इति हैम्याम् । यथा सुरापगा तथा सुरेश्वरापगापि । तथा 'सुरेश्वरतटिनीतीरस्थसिद्धाङ्गनाः' इति भोजप्रबन्धेऽपि । वीचीव जातावेकवचनम् । कल्लोलमालिकेवेत्यर्थः । यस्य वाक्चातुरी वचनविलासः कुत्रापि वर्णनादौ अस्खलिता अकुण्ठा क्वापि न स्खलति ॥

दृशो गोचरो न श्रुतेः प्राघुणश्च प्रणीतः परः कश्चिदस्माभिरीदृक् ।
विधात्रा विधायैनमारोपि विद्मो ध्वजोऽधीश सत्सर्गसौधाग्रशृङ्गे ॥ १२८॥

हे अधीश हे नायक, अस्माभिः स्वपरानेकदेशे दृश्वभिः श्रीमत्सभास्तारैरीदृगद्वैतगुणमणीगणरोहणधरणीधरः परोऽन्यः कश्चित्कोऽपि दृशो लोचनस्य गोचरो विषयः चक्षुर्लक्ष्यः तथा श्रुतेः प्राघुणः कर्णस्याप्यतिथिर्न प्रणीतः । न दृष्टो नापि श्रुत इत्यर्थः । अत्र वयमेवं विद्मः—विधात्रा वेधसा सतामुत्तमानां सर्गः सृष्टिनिर्माणं स एव सौधं मन्दिरं तस्याग्रशृङ्गमुपरितनशिखरं तत्र ध्वजः केतुरारोपितः । किं कृत्वा । एनं सूरिं विधाय निर्माय ॥ इति हीरविजयसूरिगुणवर्णनम् ॥

अवनिरजनिजानिः प्रेमरोमाञ्चिताङ्गो
निगदितमिति तेषां कर्णपेयं प्रणीय ।
रणरणकितचेता जायते स्म व्रतीन्दोः
क्रतुभुज इव सिद्धेर्दायिनो दर्शनाय ॥ १२९ ॥

अवनिः क्षोणी तस्याः । रजनी रात्रिर्जाया यस्य । 'जायाया निङ् यलोपश्च' इति । रजनिजानिश्चन्द्रः अकब्बरपातिसाहिः व्रतीन्दोः सूरीश्वरस्य दर्शनाय अवलोकनार्थं रणरणक औत्सुक्यं जातं यस्मिंस्तद्रणरणकितं चेतो मनो यस्य तादृशो जायते स्म बभूव । किंभूतः । प्रेम्णा स्नेहेन रोमाञ्चेन पुलकेन च युक्तमङ्गं यस्य । कस्येव । क्रतुभुज इव । यथा कश्चित्सिद्धेरभिलषितस्य दायिनो दानशीलस्य दर्शनार्थमुत्कण्ठमना भवेत् । किं कृत्वा । इति पूर्वोक्तप्रकारेण तेषां सभ्यानां निगदितं भाषितं सूरीस्तुतिरूपं वचःकर्णयोः पेयं पातुं योग्यं श्रवणार्हं प्रणीय कृत्वा ॥

अवनिवलयवासवो वशीन्दोर्जगदतिशायिगुणैकतानचेताः ।
वसुपुरुषमिवात्मदिष्टदिष्टं स्वसविधमेनमुपानिनीषुरासीत् ॥ १३० ॥

अवनिवलयवासवो भूमण्डलाखण्डलः एनं सूरिं स्वसविधं निजसमीपमुपानिनीषुरानेतुमिच्छुः आसीत् । किंभूतः । जगन्ति त्रीणि भुवनान्यतिशेरते अतिक्रामन्ति इत्येवंशीला ये गुणास्तेषु एकतानं लयानुगमैकाग्रं चेतो यस्य मानसं यस्य सः । कमिव । वसुपुरुषमिव । यथा आत्मनो निजस्य दिष्टेन भाग्येन दिष्टं दत्तं स्वर्णनरं स्वसमीपमानयति ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
संजातो दशमोऽत्र देवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गो रसैरुज्ज्वलः ॥ १३१ ॥

अत्रास्मिन् हीरसौभाग्यमिति नाम यस्य तादृशे हीरसूरेर्हीरविजयगणधरस्य चरिते दशमः सर्गः संजातः समभवत्। किंभूतः। रसैः वीरकरुणाबीभत्सशान्तादिभिर्नामभिः कृत्वा उज्ज्वलो दीप्यमानः॥

इति पण्डितसीहविमलशिष्यपण्डितदेवविमलविरचितायां स्वोपज्ञहीरसौभाग्यनाममहाकाव्यवृत्तौ दिल्लीमण्डलनगरनागरहमांउतनन्दनाकब्बरसाहिरिपुदिग्विजयफतेपुरस्थापनासाहिसभासाहितप्रश्नसभ्यप्रोक्तश्रीहीरविजयसूरिगुणवर्णनो नाम दशमः सर्गः॥

एकादशः सर्गः।

अथाह्वातुमीहांबभूवाब्धिनेमीतमीशो मुनीनां सुनासीरमेनम्।
प्रबोधाय धर्मात्मनः किं निजस्यावतीर्णं पुनर्हेमचन्द्रं व्रतीन्द्रम्॥ १॥

अथ सभ्यजनवर्णितश्रमणेन्द्रगुणश्रवणानन्तरमब्धिनेमेः समुद्रमेखलाया भूमेस्तमीशो रात्रिपतिश्चन्द्रः। भूपतिरित्यर्थः। सः अकब्बरसाहिः एनं श्रीहीरविजयनामानं मुनीनां सुनासीरं वाचंयमपुरंदरमाह्वातुं स्वसमीपे समाकारयितुमीहांबभूव वाञ्छति स्म। धर्म एव आत्मा स्वरूपं यस्य भाविनिभूतोपचारात् तादृशस्य निजस्याकब्बरात्मनः प्रबोधाय धर्मावबोधार्थम्। अथ च धर्मात्मनः कुमारपालस्य। 'कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः। मृतस्वमोक्ता धर्मात्मा मारिव्यसनवारकः॥' इति हैम्याम्। प्रबोधाय प्रतिबोधकृते पुनर्द्वितीयवारमवतीर्णं गृहीतावतारं हेमचन्द्रं व्रतीन्द्रं हेमाचार्यमिव॥

ततोऽजूहवद्दूतयुग्मं वियुग्मीकृतारातिपक्षः क्षमाकर्मसाक्षी।
पयोराशिपर्यन्तराष्ट्रप्रतिष्ठा मनीषीव यद्वेद निःशेषभाषाः॥ २॥

ततः सूरेराकारणाकाङ्क्षानन्तरं क्षमायाः क्षोणेः कर्मसाक्षी भास्वानकब्बरसाहिः स्वसभायां भूमौ च प्रसिद्धं ख्यातिमत् दूतयुग्मं संदेशहारकद्वन्द्वमजूहवदाकारयामास। किंभूतः क्षमाकर्मसाक्षी। वियुग्मीकृताः वियोगं स्त्रीभिः समं विश्लेषं प्रापिताः अरातीनां वैरिणां पक्षा वंशा रिपुवर्गा येन। किंभूतं दूतयुग्मम्। यत् निःशेषाः समस्ता भाषा विविधदेशोक्तीर्वेद जानातीति। क इव। मनीषीव। यथा विद्वान्निःशेषाः षडपि संस्कृत-प्राकृत-मागधी-शौरसेनी-पैशाची-अपभ्रंशी-लक्षणा भाषा वेत्ति। किंलक्षणा भाषाः। पयोराशयश्चत्वारः समुद्राः पर्यन्तः प्रान्तो येषां तादृशा ये राष्ट्रा देशाः। राष्ट्रशब्दः पुंनपुंसके। 'भ्रष्ट्रापह्वरराष्ट्रातकजठराः' इति लिङ्गानुशासने। तेषु प्रतिष्ठा माहात्म्यप्रसिद्धिर्यासां ताः॥

विपक्षान्क्षितौ क्षमाभृतो हन्तुमेतो द्युलोकादिवाखण्डलः स्वर्गिवर्गैः।
द्विषत्कालरात्रीयितानेकवीरं द्विषां पर्षदीति स्तवीति प्रभुं यत्॥ ३॥

यद्दूतयुग्मं द्विषां शत्रूणां पर्षदि सभामध्ये प्रभुं स्वस्वामिनमित्यमुना प्रकारेण स्तवीति वर्णयति। किंभूतं प्रभुम्। द्विषतां प्रतिपक्षलक्षाणां कालरात्रिः प्रलयनिशा। यस्यां

यामिन्यां कालिका सर्वान् सत्त्वान्कुक्षिगतान्करिष्यति तद्वदाचरितानामशेषीकृताशेषद्विषः संख्यातिगा वीराः सुभटा यस्य तम् । इति किम् । यदस्माकं स्वामी द्युलोकाद्देवभवनात्स्वर्गात्स्वर्गिवर्गैर्देववृन्दैः समं विपक्षान्वैरिण एव तद्रूपान्वा क्ष्माभृतः क्षोणीपालान्पर्वतांश्च हन्तुं व्यापादयितुमुच्छेत्तुं क्षितौ पृथिव्यामेत आगतः आखण्डलः शक्र इवास्ते ॥

हताऽरातिसारङ्गदृक्कज्जलाङ्कस्रवद्बाष्पभानूद्वहावारिपूरे ।

अभिष्टौति लीलामरालायमानं यशो यत्प्रभोर्वैरभाजां समाजे ॥ ४ ॥

यद्दूतयुग्मं वैरभाजां विद्वेषिणां समाजे सभायां हताः स्वस्वामिना संग्रामाङ्गणे व्यापादिता ये अरातयः विपक्षक्षोणीन्द्राः तेषां सारङ्गदृशो मृगलोचनाः प्रियतमास्तासां दृग्भ्यो नयनेभ्यः कज्जलमञ्जनमङ्के क्रोडे अर्थान्मध्ये मिश्रीभूतत्वाद्येषां तादृशाः स्रवन्तो गलन्तो निरन्तरनिष्पतन्तो बाष्पा अम्बु(श्रु)धारास्त एव भानूद्वहा सूर्यसुता यमुना तस्या वारिपुरे पयःप्रवाहे लीलामरालायमानं क्रीडालसराजहंस इवाचरत् प्रभोः स्वामिनो यशः श्लोकमभिष्टौति वर्णयति ॥

वचोवैदुषीमेतदीयामधृष्यां निरूप्य प्रतीपैः क्षितीशैः प्रणेशे ।

यदुर्वीविभोरागमात्प्राग्गभस्तेरिवानूरुरोचिस्तमिश्रप्रसारैः ॥ ५ ॥

एतदीयां दूतयुग्मसंबन्धिनीमधृष्यामनाकलनीयां प्रतिपक्षपक्षलक्षस्वान्तक्षोभकारिकां वचोवैदुषीं वचनचातुरीं निरूप्य प्रेक्ष्यार्थादवधार्य यदुर्वीविभोः यस्याकब्बरसाहेरागमादभिषेणनैरागमात्प्राक् पूर्वमेव प्रतीपैर्विरोधिभिः क्षितीशैर्भूपालैः प्रणेशे प्रपलायितम् । कैरिव । तमिश्रप्रसारैरिव । यथा गभस्तेर्भानोः आगमादुदयात्पूर्वमनूरुरोचिः अरुणप्रभां विभाव्य । ध्वान्तविस्तारैः प्रणश्यते ॥ आदितश्चतुर्भिः कुलकम् ॥ इति दूतस्वभावः ॥

चिरं जीव नन्देति दूतौ निगद्याधिपं नेमतुर्मूर्ध्नि पाणी प्रणीय ।

पुनस्तौ सुधासाधिमानं दधत्या संभावयामास वाचेव दृष्ट्या ॥ ६ ॥

हे प्रभो, त्वं चिरं बहुकालं गलितावधिसमयं जीव मेरुमहीधरसमानमायुः परिपालय। तथा नन्द पुरंदरवत्परमसमृद्धिमान् भव । इत्यमुना प्रकारेण निगद्य आशीर्वचनं कथयित्वा । तथा मूर्ध्नि मस्तके पाणी स्वहस्तौ प्रणीय संयोज्य । शिरस्यञ्जलिं विधायेत्यर्थः। तौ दूतौ संदेशहारकौ अधिपं स्वामिनं नेमतुः प्रणमतः स्म । पुनः सोऽकब्बरसाहिः तौ दूतौ प्रति सुधयेव पीयूषेनेव साधिमानं मधुरिमाणं शुभ्रिमाणं च दधत्या धारयन्त्या । 'त्वयादृतः किं भरसाधिमभ्रमः' इति नैषधे । वाचेव वाण्येव दृष्ट्या दृशा विलोकनेन कृत्वा संभावयामास । प्रसन्नदृशा व्यलोकयदित्यर्थः ॥

ततः क्षोणिशक्राशयं तौ बुभुत्सू स्म युङ्क्तः स्ववक्राम्बुजे वाग्विलासैः ।
सरित्प्रेयसश्चेतसस्तादृशानां पुनः केन येन प्रतीयेत पारः ॥ ७ ॥

ततः साहिना दृष्टिसंभावनानन्तरं तौ दूतौ वाग्विलासैर्वचनवैचित्रीभिः स्ववक्राम्बुजे निजवदनकमले युङ्क्तः योजयतः स्मेत्यर्थः। किं कर्तुमिच्छू। बुभुत्सू बोद्धुमिच्छू ज्ञातुं काङ्क्षन्तौ। कम्। क्षोणिशक्रस्य साहेराशयं मनोभिप्रायम्। येन कारणेन सरित्प्रेयसः समुद्रस्य पुनस्तादृशानां गम्भीराशयानां महात्मनां चेतसो हृदयस्य च पारः परतीरं पूर्णाशयभावः केन पुंसा प्रतीयेत ज्ञायते। अपि तु न केनाप्यवबुध्यते ॥

हरिर्वा कृतान्तः प्रचेताः कुबेरः किमु त्वद्दिगम्भोजदृग्रक्षकेषु ।
यदेतेषु केनापि कृत्यं भवेत्तत्प्रगल्भीभवावस्तदाह्वाविधासु ॥ ८ ॥

हे ईश, हरिरिन्द्रः, तथा कृतान्तो यमः, तथा प्रचेता वरुणः, तथा कुबेरो वैश्रवणः, एतेषु चतुर्षु मध्ये चेद्यदि ते तव एकेनाप्यन्यतमेन कृत्यं कार्यं भवेत्स्यात्। उत्प्रेक्ष्यते— त्वद्दिगम्भोजदृशां तव पूर्वादक्षिणापश्चिमोत्तरालक्षणानां नाम्नां दिङ्मृगाक्षीणां रक्षकेषु किमु रक्षाकारकेष्विव सौविदल्लेष्विव। यतो हरिर्वानरः, कृतान्तः कालः अथवा कृतस्योपकारस्यान्तोऽवसानं यस्मिन् स कृतं किमपि न वेत्ति कृतघ्नः, तथा प्रचेताः सुमना राजपत्नीं जननीं मनुते। तथा कुत्सितशरीरः, एवंविधानामवरोधरक्षणं युक्तमेवेति। त्वदन्तःपुररक्षकेषु तर्हि तदाह्वाविधासु तेषामिन्द्रादीनां चतुर्णां लोकपालानां प्राकारणप्रकारेषु प्रगल्भीभवाव उद्यमं कुर्वः। तमाकारयाव इत्यर्थः ॥

त्रिलोक्या इवाधीशितुर्भूमिभर्तर्भवत्तो भवेत्कोऽपि वैमुख्यभाग्यः ।
पुरस्तादुदेष्यन्त्यजानन्वनाङ्केष्वनन्तानि दुःखानि खानिः स्मयानाम् ॥९॥

हे भूमिभर्तः हे धरणीरमणीरमण, यः कोऽपि विपक्षादिको भवत्तस्त्वत्तः सकाशात् वैमुख्यभाक् पराङ्मुखताभाजी भवेत्। कस्मादिव। त्रिलोक्यास्त्रिभुवनस्य अधीशितुः स्वामिनः परमेश्वरादिव। यथा कोऽपि पापात्मा परमेष्ठिनः पराङ्मुखो भवति। किं कुर्वन्। अजानन् अविदन्। कानि। वनाङ्केषु काननानां क्रोडेषु मध्येषु पुरस्तादग्रे उदेष्यन्ति प्रकटीभविष्यन्ति उत्पत्स्यमानानि अनन्तान्यपाराणि न विद्यतेऽन्तोऽवसानं येषां तादृशानि दुःखानि। यः किंभूतः। स्मयानामहंकाराणां खानिराकरः स्थानम्। अथ च भगवतः पराङ्मुखोऽपि पाप्मा अनादिकालानामात्याकीनं शैवशासनमिति गर्वावेशवशंवदो दुर्बुद्धिर्वनाङ्केषु सूक्ष्मबदरसाधारणप्रत्येकवनस्पतिकायादिमध्येषु पुरस्ताद्भाविसंसारपरम्परासु प्रादुर्भवष्यन्ति संपत्स्यमानानि अनन्तानि अनन्तकालवेद्यानि दुःखानि छेदनभेदनाद्यनेकवेदना न जानीते। मिथ्यामतमूढीभूतत्वान्न वेत्तीत्यर्थः ॥

असंख्येषु संख्येषु विद्वेषिलक्षाविलक्ष्यीकृतेर्बिभ्रदुत्सेकभावम् ।
विधित्सुर्मृधं भूधवौद्धत्यभाग्यस्त्वया पूर्वदेवेशवत्केशवेन ॥ १० ॥

हे भूधव पृथिवीप्रियतम, औद्धत्यवान् उद्धततया उन्मत्तत्वेन वा युक्तः कोऽपि नृपः त्वया भवता साहिना समं मृधं युद्धं विधित्सुः कर्तुमिच्छुर्भवेत् । किंवत् । पूर्वदेवेशवत् । यथा दानवेन्द्रः केशवेन नारायणेन सार्धं संग्रामं विधातुमिच्छति । 'असुरा दितिदनुजाः पातालौकः सुरारयः । पूर्वदेवाः शुक्रशिष्याः' इति हैम्याम् । यः किंभूतः । असंख्येषु संख्यातीतेषु अनेकेषु संख्येषु संग्रामेषु विद्वेषिणां वैरिणां लक्षाणां शतसहस्राणां विलक्ष्यीकृतेरभिभवनादुत्सेकभावं गर्वावेशवशंवदताम् । 'उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम्' इति रघौ । बिभ्रद्दधान ॥

भवच्छिद्रदर्शी भवेद्वा यदन्यः पुरोभागिवद्भागधेयैर्विमुक्तः ।
प्रणीयानुकूलीभवन्मानसं तं पदाब्जे प्रभोर्भृङ्गभूयं नयावः ॥ ११ ॥

हे प्रभो स्वामिन्, च पुनर्यद्यदि अन्यः परः कोऽपि वैभववान् पुरोभागिवद्भुवनजनदोषदर्शनैकतानदृष्टिरिव भवतस्तव छिद्राणि स्वेन पराभवितुमिच्छया सासूयत्वेन देशादिजिघृक्षया वा अपगुणान्दोषान्पश्यतीत्येवंशीलो भवच्छिद्रदर्शी भवेज्जातः स्यात् किं भागधेयैः सुकृतैर्विमुक्तो भाविराज्यादिभ्रंशात्पुण्यैस्त्यक्तः । तं पूर्वोक्तं सकलमप्यनुकूलीभवत्तव सेवाहेवाकिभावं भवन्मानसं मनो यस्य तादृशं प्रणीय कृत्वा प्रभोः स्वामिनः पदाब्जे चरणकमलाङ्के भृङ्गभूयं भ्रमरीभावं नयावः प्रापयावः ॥ त्रिभिर्विशेषकम् ॥

तपस्वी सभस्मा श्मशानाश्रयो वा त्रिदण्डी जटी वा मठी रुण्डमाली ।
व्रती वाडवो धूमपः सोमपो वा भवेद्येन ते कृत्यमादिश्यतां सः ॥१२॥

हे साहे, तपस्वी तापसः, सह भस्मना भसितोद्धूलितेन वर्तते यः स सभस्मा । योगीत्यर्थः । श्मशाने प्रेतवने आश्रयो यस्य स श्मशानवासी चेटकादिकुमन्त्रसाधकः । तथा त्रिदण्डी त्रयो दण्डा यस्य स कापिलः त्रिशूली वा । तथा जटा भस्मावगुण्ठितकेशकलापः अस्यास्तीति जटी बृहज्जटाधारकः । तथा मठो निवसनस्थानं छात्रपठनशाला वा अस्यास्तीति मठी मठवासी । तथा रुण्डानां विकचनरकपालानां माला हृदये हारोऽस्यास्तीति कपाली । तथा व्रती मौननग्नत्वादिनियमवान् सांन्यासिको वा यती वा । तथा वाडवो ब्राह्मणः । धूमं पिबति मन्त्रादिसाधनकृते कष्टक्रियार्थं वा ऊर्ध्वपादाधःशिरा द्रुमशिखासु स्वशरीरलम्बनपूर्वं धूमपानकर्ता । सोमपः अमृतवल्लीरसपायी वा, एतेषु मध्ये येन केनापि ते तव कृत्यं कार्यं स्यात्स आदिश्यतां प्रसाद्यतां कथ्यताम् ॥ इति दूतवचनानि ॥

निगद्येति विश्रान्तयोरेतयोस्तां गिरं श्रोत्रवर्माध्वनीनां प्रणीय ।
अगृह्यन्त वाचः पयोराशिकाञ्चीशचीशेन शङ्के सुधाया वयस्यः ॥ १३ ॥

पयोराशिः समुद्रः काञ्ची मेखला यस्यास्तस्या भूमेः शचीशेन पुरंदरेण वाचो वाण्यः अगृह्यन्त गृहीताः । बभाषे इत्यर्थः । तत्र वाक्षु अहमेवं शङ्के वितर्कयामि

उत्प्रेक्षे वा—वाचः सुधाया अमृतस्य वयस्यः सख्य इव । किं कृत्वा । इत्यमुना प्रकारेण निगद्य साहेः पुरः कथयित्वा विश्रान्तयोर्मौनमाधाय स्थितयोः एतयोर्दूतयोस्तां पूर्वप्रतिपादितां गिरं वाणीं श्रोत्रयोः स्वश्रवणयोरेव वर्त्मनोर्मार्गयोरध्वनीनां पान्थीं प्रणीय ॥

घनैरायुरापूर्तिभिश्च प्रजानां प्रचेतस्तया कोशसंपूरणैश्च ।
भजन्तेऽनुकूलां प्रवृत्तिं दिगीशाः प्रवाहा इवावारपारप्रियाणाम् ॥१४॥

हे दूतौ, दिगीशाश्चत्वारोऽपि हरिन्महेन्द्राः मम मनोरुचितां ममाभिलषितां वा प्रकर्षेण वृत्तिं वर्तनम् । व्यापारमिति यावत् । भजन्ते श्रयन्ति । ममानुकूलीकरणार्थं प्रयतन्ते । कैः कृत्वा । घनैरिन्द्रो मेघवर्षणैः । 'जानामि त्वां प्रवर(कृति)पुरुषं कामरूपं मघोनः' इति मेघदूतकाव्ये । 'इन्द्रादिष्टो मेघो वर्षति' इति श्रुतिश्च । च पुनरायुरापूर्तिभिः यमः प्रजानां ममापत्यानां सकललोकानामायुषो जीवितकालस्य आ सामस्त्येन पूर्तिभिः संपूरणैर्यावदायुर्जीवितप्रदानैः । अर्धायुष्कं कमपि न यमो गृह्णातीत्यर्थः । च पुनः प्रजानां प्रकृतीनां प्रचेतस्तया प्रकृष्टचित्तत्वेन साधुवृत्तितया वरुणः । प्रजानामित्युभयत्रापि लालाघण्टान्यायेन संबध्यते । च पुनर्मे मम कोशानां भाण्डागाराणां रत्नस्वर्णरजतादीनां संपूरणैः पूरणीकरणैर्भरणैर्धनदः । के इव । प्रवाहा इव । यथा अवारपारप्रियाणां पयोराशिपत्नीनामोघाः कूलं तटमनु लक्षीकृत्य प्रवृत्तिं प्रवर्तनं प्रसरणं गमनं भजन्ते गच्छन्ति ॥

नृपैर्मूर्ध्नि मालेव दध्रे ममाज्ञा पुरोगैरिवाभावि भूपैः प्रतीपैः ।
अहं देववत्संस्तुतस्तापसाद्यैस्ततस्तैर्ममास्ते न किंचिद्विधेयम् ॥ १५ ॥

हे दूतौ, यस्माद्धेतोः नृपैरन्यराजभिर्मालेव पुष्पदामवन्मूर्ध्नि स्वमस्तके मदाज्ञा मम शासनं दध्रे धृता । पुनः प्रतीपैः भूपैः प्रतिपक्षक्षोणीन्द्रैर्मम पुरोगैः पदातिभिरिवाभावि भूतं बभूवे । पुनस्तापसाद्यैः परिव्राजकप्रमुखैरहं देववन्निजाभीष्टदेवतेव संस्तुतः । ततः कारणात्तैर्युष्मत्प्रोक्तप्रतीपनृपतितापसादिभिर्मम किंचित्किमपि विधेयं कार्यं नास्ते न विद्यते ॥ इति दूतप्रोक्तलोकपालादिषु कृत्याभावकथनम् ॥

पुनः प्रस्तुतं वक्ति—

पुरे लाटलक्ष्मीललामायमाने प्रतीरेऽम्बुधेः किं तु गन्धारनाम्नि ।
प्रभावैर्भुवं भासयन्हीरसूरीश्वरः साधुधर्मस्तनूमानिवास्ते ॥ १६ ॥

हे दूतौ, किं तु एतत्कृत्यमास्ते । अम्बुधेः समुद्रस्य प्रतीरे तटे गन्धार इति नामाभिधा यस्य तादृशे पुरे नगरे हीरसूरीश्वरः श्रीहीरविजयसूरिपुरंदर आस्ते विद्यते । किंभूते पुरे । लाट इति नाम मण्डलस्य 'लाडदेश' इति प्रसिद्धस्य लक्ष्म्याः श्रिया अर्थाल्ललाटपट्टे ललामायमाने तिलकवदाचरिते । हीरसूरिः किं कुर्वन् । प्रभावैर्माहात्म्यैः प्रतापैर्वा । 'सप्रभावः प्रभाववत्' इति हैम्याम् । भुवं भूमीमण्डलं भासयन् शोभां

नयन् दीपयन्वा । उत्प्रेक्ष्यते—तनूमान् शरीरयष्टिं बिभ्राणः साधुधर्म इव यत्याचारः किमु । 'धर्मो यमोपमापुण्यस्वभावाचारधन्वसु । सत्सङ्गे ह्न्यहिंसादौ न्यायोपनिषदोरपि॥' इति । 'धर्मं दानादिके' इत्यनेकार्थः ॥

असातस्य लेशोऽपि तेनैकपद्यां यथावाप्यते नात्मना ब्रह्मणीव ।
शिवानामिवावासमत्रानयेतां भवन्तौ ततः सूरिसारङ्गराजम् ॥ १७ ॥

हे दूतौ, भवन्तौ तथा तेन प्रकारेण ततो गन्धारनगरतस्तं हीरविजयनामानं सूरिष्वाचार्येषु सारङ्गराजं कण्ठीरवमत्र मत्पार्श्वे आनयेताम् । उत्प्रेक्ष्यते—शिवानां सर्वकल्याणानामावासं वासस्थानकमिव । तथा कथं येन प्रकारेण तेन सूरिणा एकपद्यां गन्धारफतेपुरयोरन्तरालमार्गे । 'पदव्येकपदी पद्या पद्धतिर्वर्त्मवर्तनी' इति हैम्याम् । असातस्य दुःखस्य लेशोऽप्यंशोऽपि नावाप्यते न लभ्यते । केनेव । आत्मनेव । यथा मुक्तात्मना ब्रह्मणि मोक्षे दुःखांशो न प्राप्यते । 'क्षेत्रज्ञ आत्मा पुरुषः' इति हैम्याम् ॥

मदीयानुगः साहिबः खान आस्ते हितैषी पितेवाङ्गिनां गुर्जरेषु ।
ददातां युवां तस्य निःशेषवाच्यं दधानं स्फुरन्मानमेतन्मदीयम् ॥१८॥

हे दूतौ, गुर्जरेषु धरित्रीजनपदेषु मध्ये मदीयानुगो मम सेवकः साहिबः साहिबनामा खानः । 'खान' इति नाम यवनजातौ प्रसिद्धम् । सामन्त इत्यर्थः । आस्ते विद्यते । किंभूतः । अङ्गिनां प्राणिनां पितेव जनक इव हितमायतावभीष्टमिच्छत्यभिलषतीत्येवंशीलो हितैषी इष्टाभिलाषुकः । हे दूतौ, एतन्मया भवतोर्हस्ते समर्प्यमाणं मदीयं मम संबन्धि स्फुरन्मानम् । राजलेखमित्यर्थः । 'फरमान' इति यवनभाषया लेखाख्या । तस्य साहिबखानस्य ददातामर्पयताम् । स्फुरन्मानं किं कुर्वाणम् । निःशेषं समस्तमपि वाच्यमुदितं(दन्तं) मम हृदयहार्दं दधानं धारयत् ॥

यदास्तेऽन्य आत्मेव मे देहभेदात्स कर्ता ततः सर्वमस्मद्विधेयम् ।
निवृत्ते निगद्येति भूसार्वभौमे परां प्रीतिरन्तर्दधाते स्म दूतौ ॥ १९ ॥

हे दूतौ, तौ अन्तश्चित्ते परां प्रीतिं दधाते स्म दधतुः । कस्मिन्सति । भूसार्वभौमे अकब्बरे इति निगद्य भाषित्वा निवृत्ते विरामे सति । इति किम् । यत्कारणात् स साहिबखानः मम देहस्य शरीरस्य भेदात्पार्थक्यादन्यः अपरः आत्मा जीव इवास्ते विद्यते ततः कारणात्स साहिबखानः सर्वं समस्तमप्यस्मद्विधेयमस्माकीनं कार्यं कर्ता करिष्यति ॥ इति दूतयोः साहेः सूरिसमाकारणादेशः ॥

ततो दूतयुग्मं क्षमापूषलेखं प्रतस्थे समादाय तत्संनिधानात् ।
अनूनां तनूमुद्वहन्नेतदीयाभिलाषः प्रसर्पन्प्रतीव व्रतीन्द्रम् ॥ २० ॥

ततो भूपालादेशानन्तरं दूतयुग्मं संदेशहारकद्वन्द्वं तस्य साहेः संनिधानात्समीपात्प्रतस्थे प्रचचाल । किं कृत्वा । क्षमायाः पृथिव्याः पूषा भास्वान् तस्य लेखं स्फुरन्मानं

सम्यक् शिरस्यारोपणपूर्वमादाय गृहीत्वा । उत्प्रेक्ष्यते—अनूनां संपूर्णां तनूं शरीरमुद्वहन् बिभ्राणः । तथा व्रतीन्द्रं सूरिराजं प्रति प्रसर्पन् गच्छन् । एतदीयोऽकब्बरसाहिसंबन्धी अभिलाषः कामः मनोरथ इव ॥

प्रबुद्धैरबोधीति नोत्तालफालं चलद्वीक्ष्य जङ्घालदूतद्वयं तत् ।
स्पदस्फूर्तिरस्थैर्यभाजां मनोभिस्ततस्तेन तेभ्योऽथ वाधीयते स्म ॥२१॥

उत्ताला अतित्वरिता फाला गगनगामीनि उल्ललनरूपा गतिविशेषा यस्य तादृशं तत्साहिसंबन्धि साहिप्रेषितं वा जङ्घालमतिवेगवद्गतिकं दूतद्वयं संदेशहारकयामलं चलत्पथि प्रसर्पत् वीक्ष्य विलोक्य प्रबुद्धैर्विद्वद्भिरेतन्नाबोधि न ज्ञातम् न मनस्यवधारितम् । इति किम् । न स्थैर्यं स्थिरतां भजन्ते इत्यस्थैर्यभाजः चपलाशयास्तेषां मनोभिश्चित्तैस्तस्माद्दूतयुग्मात्किमिति उत्प्रेक्षायां विचारणायां वा । स्पदानां गतिवेगानाम् । 'रयो रहस्त्वरः स्पदः' इति हैम्याम् । तथा 'स्पदझाङ्कारितपत्रपद्धतिः' इति नैषधे । स्फूर्तिरतित्वरितता अधीयते स्म पठिता । अथ वा तेन दूतद्वन्द्वेन तेभ्यो मनोभ्योऽधीयते स्म शिक्ष्यते स्म किम् । इति संशयोत्प्रेक्षा ॥

क्रमाभ्यामतिक्रम्य संदेशहारिद्विकं ग्रामकुल्याचलारामसीमाः ।
मुदाहम्मदाबादमागात्क्रमात्तत्सहाध्यायि किं रंहसां मारुतानाम् ॥ २२ ॥

क्रमादनुक्रमतः स्वादेशपरदेशप्रचलनपरिपाट्या तत्साहिसंबन्धि संदेशहारिद्विकं दूतद्वयं मुदा हर्षोत्कर्षेण अहम्मदाबादमागादकमिपुरमाजगाम । 'मा गास्त्वं खेदमन्दिरम्', तथा 'अरे त्वं साध्वसं मागाः' इति सारस्वतव्याकरणादौ । ग्रामाः संवयथास्तोकचातुर्यादिगुणा ग्रामा लघुपुराणि वा उपलक्षणान्नगरपुरपत्तनादीन्यपि, तथा कुल्या लघुमहद्वादिन्यः, अचलाः पर्वताः, आरामाः उद्यानानि उपलक्षणाद्वनगहनारण्यादीन्यपि, सीमा ग्रामनगरादीनां क्षेत्रभूमयो देशावसानभुवो वा, ताः क्रमाभ्यां स्वपदाभ्यां न तु यानैरतिक्रम्योल्लङ्घ्य । उत्प्रेक्ष्यते—दूतद्वन्द्वं मारुतानां पवनानां रंहसां वेगानां सह सार्धमध्येतीत्येवंशीलं सहाध्यायि एकगुरुसमीपेऽधीतिकृत्किम् । वेगेन तुल्यत्वादियमुत्प्रेक्षा ॥ इत्यकमिपुरे दूतगमनम् ॥

रणे वैरिणां पार्थिवा येन देहा हताः पेतुरुर्वीमिवाम्बां मिलन्ति ।
ययौ तत्पुराधीशितुः संनिधाने द्वयं दूतयोर्मुद्गलक्षोणिभर्तुः ॥ २३ ॥

दूतयोः शासनहारिणोर्द्वयं युगलं तस्याहम्मदाबादनाम्नः पुरस्य नगरस्याधीशितुः स्वामिनः मुद्गलानां काबिलमण्डलजन्मनां यवनजातिविशेषाणां क्षोणिभर्तुर्भूपस्य संनिधाने समीपे ययौ । तस्य कस्य । येन साहिबखानेन रणे संग्रामाङ्गणे वैरिणां शत्रूणां पृथिवीपरमाणुभिरारब्धाः पृथिवीविभागाः पृथिवीसंबन्धिनः । 'पार्थिवं हि निजमाजिषु वीरा गौरवाद्वपुरपास्य भजन्ते' इति नैषधे । देहाः शरीराणि हताः क-

रवालैर्व्यापादिताः सन्तः पेतुः । क्षितौ पतन्तीत्यर्थः । उत्प्रेक्ष्यते—उर्वीमम्बां क्षो
मातरं मिलन्तीव पृथिव्युत्पन्नत्वेन स्नेहात् ॥

सुवर्णश्रियाद्वैतयालंकृतायाः सुधास्पन्दिवाग्वैदुषीभूषितायाः ।
कुमार्या इव क्ष्मापतेः पत्रिकाया असौ तेन पाणिग्रहः कार्यते स्म ॥ २४

तेन दूतद्वन्द्वेन असौ साहिबखानः क्ष्मापतेर्भूमीभर्तुः कुमार्याः कन्याया इव क्ष्मापते रकब्बरसाहेः पत्रिकायाः स्फुरन्मानस्य पाणिना हस्तेन ग्रहणमादानं स्वीकरणं पाणिग्रहण परिणयनं च कार्यते स्म निर्माप्यते स्म । पाणौ ग्राहितेत्यर्थः । किंभूताया पत्रिकायाः कुमार्याश्च । अद्वैतया अनन्यसामान्यया सुशोभनानां वर्णानामक्षराण हेम्नश्च श्रिया लक्ष्म्या सुवर्णतुल्यया वा श्रिया अलंकृताया भूषितायाः । पुनः किं तायाः । सुधाममृतं स्पदन्ते क्षरतीति प्रस्रवतीत्येवंशीला या वाग्वैदुषी वचनचातु तया भूषितायाः ॥

ततः कोशवद्भूमहेन्द्रस्य मुद्रां प्रमोदादुपादाय लेखं दधानम् ।
विमुद्याक्षराण्यक्षिलक्षाणि कुर्वन्विवेदाशयं तस्य निःशेषमेषः ॥ २५

ततो लेखादानानन्तरमेषः साहिबखानः तस्य स्फुरन्मानस्य निःशेषं समग्रमप्या यमभिप्रायं रहस्यं विवेद जानाति स्म । किं कुर्वन् । विमुद्य मुद्रयित्वा अक्षरा वर्णानक्षिलक्षाणि लोचनगोचरान् कुर्वन् । किं कृत्वा । प्रमोदादानन्दाल्लेखं साहिस्फु न्मानमुपादाय 'तसलीम' इति यवनप्रसिद्धेन नाम्ना प्रणामपूर्वं तदुपरि स्वशिरोम चनपूर्वं वा गृहीत्वा । किं कुर्वाणं लेखम् । भूमहेन्द्रस्य राज्ञः कोशं भाण्डागार मुद्रां मुद्रणं निमीलनं दधानम् ॥ इति साहिस्फुरन्मानस्यार्पणं वाचनं च ॥

पुरस्तात्तयोः प्रीतिमान्मुद्गलेशो गिरं वासयामास वक्त्रारविन्दे ।
विनिर्यद्द्विजश्रेणिशोचिर्विमिश्रस्मितेनेव तन्वन्मरालैकलीलाम् ॥ २६

प्रीतिमान् स्नेहार्द्रहृदयो मुद्गलेशः साहिबखानः तयोर्दूतयोः पुरस्तादग्रे वक्त्रारवि वदनकमले गिरं वाणीं वासयामास स्थापयति स्म । बभाषे इत्यर्थः । अथ च सरस्वतीं देवीं मुखपद्मे वासितवान् । सरस्वत्याः संनिधाने त्ववश्यं वाहेन हं भाव्यं तदेव दर्शयति । उत्प्रेक्ष्यते—विनिर्यद्वदनाद्बहिर्निःसरद्द्विजानां दन्तानां श्रेण्यो लिकयोः शोचिः कान्तिस्तेन विमिश्रेण करम्बितेन स्मितेन कृत्वा मरालस्य राजहंस एकामद्वितीयां लीलां विलासं शोभां वा तन्वद्विस्तारयन्निव ॥

प्रभुर्भद्रवान्कच्चिदास्ते हमाऊंसुतोऽकब्बरो बब्बरोर्वीशवंश्यः ।
जिताश्चण्डदोर्दण्डवीर्येण येन न्यवात्सुर्दिगन्तेषु शङ्के दिगीशाः ॥२७

कच्चिदिष्टपरिप्रश्ने अव्ययम् । द्विवचनस्याप्यव्ययाद्विभक्तेर्लुक् । हे दूतौ, अकब्ब प्रभुर्नः स्वामी भद्रवान् कुशली आस्ते । किंभूतः । हमाऊंनाम्नो राज्ञः सुतः । ए

कीभूतः। बब्बरनामा उर्वीशो मुद्गलेन्द्रस्तस्य वंशे गोत्रे भवः वंश्यः। अहमेवं शङ्के त्प्रेक्षे। येनाकब्बरसाहिना चण्डेन प्रबलेन प्रतिभटोद्भटभूमीमहेन्द्रासह्येन दोर्दण्डयो-जपरिघयोर्वीर्येण पराक्रमेण जिताः परिभूताः सन्तः दिगीशाश्चत्वारोऽष्टौ दश वा देगीशा दिक्पाला दिशां हरितामन्तेष्ववसानेषु न्यवात्सुरिव निवसन्ति स्म किमु शङ्के इवार्थे ॥

चतुर्वार्धिसंवर्तकीभूततेजस्ततेः सन्ति जैवात्रिकास्तस्य पुत्राः।
महीचारिणः पूषविद्वेषिगोत्रद्विषद्यक्षराजाङ्गजाता इवैते ॥ २८ ॥

हे दूतौ, चतुर्षु प्राच्यप्रतीच्यापाच्योदीच्यलक्षणेषु वार्धिषु समुद्रेषु संवर्तकीभूता वडवानलभावं प्राप्ता तेजसां प्रतापानां ततिर्मण्डली यस्य तस्य साहेः पुत्राः शेखजी–पाहडी–दानिया–इत्यभिधानास्त्रयोऽपि नन्दना जैवात्रिका दीर्घायुषः सन्ति। उत्प्रेक्ष्यते—महीचारिणः क्षोण्यां कौतूहलेन संचरणशीला पूषविद्वेषी ईश्वरो गोत्रद्विष-पर्वतरिपुरिन्द्रो यक्षराजो धनदस्तेषां क्रमेणाङ्गजाताः। स्वामिकार्तिक–जयन्त–नल-कूबर–नामानस्तनुजा इव ॥

अये स्वस्तिमन्त्यो नृपाम्भोजनेत्रा उपेता इव क्ष्मां हरेरिन्दुवक्त्राः।
परीवार आस्ते शिवः सोऽपि येनावनीन्दोर्मनो ज्ञानिनेवान्वगामि॥२९॥

अये दूतौ, नृपाम्भोजनेत्रा अकब्बरसाहेः कमललोचनाः स्त्रियः स्वस्तिमन्त्यः कुशलिन्यः वर्तन्ते। उत्प्रेक्ष्यते—क्ष्मां महीमुपेताः समागताः हरेः शचीकान्तस्य जयवा-हिनीवल्लभस्य वासवस्य इन्दुवक्त्राः कान्ताः प्रिया इव। अपि पुनरवनीन्दोर्भूमीतमीरमणस्य राज्ञः स परपक्षविजयित्वेन ख्यातः परिवारः स्वजनादिपरिजनः शिवो निरुपद्रवो वर्तते। स कः। येन परीवारेण ज्ञानिना ज्ञानवतेव ज्ञानाभिप्रायेणेवावनीन्दोः पातिसा-हेर्मनो मानसमन्वगामि। इङ्गिताकारज्ञातृत्वेन मनसोऽभिलषितमेव विधीयते इत्यनु-गम्यते। 'अये कियद्यावदुपैषि दूरम्' इति नैषधे ॥

अनीकं शुभं भूभुजो येन जज्ञे युगान्तान्धकद्वेषिणेवारिचक्रे।
प्रजा आसते प्रीतिभाजः प्रजावन्मुदा प्रश्नयामास तावित्यधीशः ॥३०॥

हे दूतौ, भूभुजः अकब्बरसाहेः तद्विजित्वरतया सर्वत्र प्रसिद्धमनीकं वाजिवारण-पदातिरूपं चतुरङ्गकटकं शुभं कल्याणकलितं वर्तते। तत्किम्। येनानीकेन अरीणां वैरिणां चक्रे वृन्दे सेनायां वा। 'वरूथिनीचमूचक्रम्' इति हैम्याम्। युगान्तस्य कल्पा-न्तकालस्यान्धकनाम्नो दानवस्य द्वेषिणा शत्रुणेव एतावता शंभुनेव जज्ञे संजातम्। संहारकत्वेन बभूवे इत्यर्थः। 'क्षये जगज्जीवपिबं शिवं वदन्' इति नैषधे। पुनर्भूभुजः प्रजाः प्रकृतयो लोकाः प्रजावत्संततय इव प्रीतिं प्रमोदं स्नेहं वा भजन्ते इति प्रीति-भाजः सन्ति। अधीशः अकमिपुरप्रभुः इत्यमुना प्रकारेण तौ दूतौ प्रश्नयामास पृच्छति स्म ॥ इति साहिबखानकृतसाहिपरिवारादीनां कुशलप्रश्नः ॥

स्थितोऽद्रिः सुराणामिवाक्रम्य सर्वा दिशः साहिरास्ते प्रभो पर्वतायुः ।
सुताः शक्तिभेदा इव स्फूर्तिमन्तः सुखिन्यः सुमुख्योऽपि किं राजलक्ष्म्यः ॥
कुले धैर्यभाजामिवाधीश साहेः परीवारतन्त्रे अनातङ्किनी स्तः ।
महानन्दयुक्ताश्च मुक्तात्मवत्तत्प्रजा इत्यमुं तद्द्वयं प्रत्यवोचत् ॥ ३२ ॥

तद्द्वयं दूतयुग्मम् अमुं साहिबखानं प्रति इत्यमुना प्रकारेण प्रत्यवोचत् प्रतिभाषते स्म । प्रत्युत्तरं प्रददावित्यर्थः । हे प्रभो हे साहिबखान, साहिरकब्बरः पर्वतवद्गिरिरिव दीर्घमायुर्यस्य तादृगास्ते । किंलक्षणः । सुराणामद्रिर्मेरुरिव सर्वाः समस्ता अपि दिश आक्रम्य स्वीकृत्य स्थितः । पुनः सुताः साहिपुत्राः प्रभुत्वोत्साहमन्त्रलक्षणानां तिसृणां शक्तीनां भेदा इव स्फूर्तिमन्तः प्रोर्जस्वलाः सन्ति । अपि पुनः सुमुख्यः साहिगृहिण्यः सुखिन्यः शर्मशालिन्यः सन्ति । उत्प्रेक्ष्यते—सुमुख्यो राजलक्ष्म्य इव । प्रबलप्रतिभटाभावात् राजलक्ष्म्यः सुखिन्यो भवेयुः । हे अधीश हे स्वामिन्, साहेः परीवारतन्त्रे परिच्छदसैन्ये । 'कटकं ध्वजिनी तन्त्रम्' इति हैम्याम् । अनातङ्किनी नीरोगे समाधिशालिनी । के इव । कुले इव । यथा धैर्यभाजां धीरताधारिणां सत्त्ववताम् । महावीराणामित्यर्थः । गोत्रे वंशौ अनातङ्किनी निर्भये भवतः । 'रोगो रुजा रुगान्तष्कः,' तथा 'भयं भीर्भीतिरातङ्कः' इति द्वयमपि हैम्याम् । च पुनस्तस्य साहेः प्रजाः पौरजानपदाश्च लोका महानन्देन परमाह्लादेन युक्ताः सहिता वर्तन्ते । किंवत् । मुक्तात्मवत् । यथा संसारनिर्मुक्तात्मानः सिद्धाः महानन्देन मोक्षेण सहिता भवन्ति ॥ इति दूतप्रोक्तसाहिप्रमुखकुशलोक्तिः ॥ युग्मम् ॥

निपीयेति तद्वाग्विलासामृतं स ह्रदं दन्तिवत्प्रीतिमन्तर्जगाहे ।
अवेत्य प्रसत्तिं पुनः पातिसाहेरवैति स संप्राप्तसर्वस्ववत्स्वम् ॥ ३३ ॥

स साहिबखानः इति पूर्वोक्तप्रकारेण तयोर्दूतयोर्वाग्विलासो वचनचातुरी स एवामृतं सुधां निपीय सादरं श्रवणगोचरीकृत्य अन्तश्चित्ते प्रीतिं मोदं जगाहे प्राप्नोति स्म । किंवत् । दन्तिवत् । यथा हस्ती अमृतं पानीयं नितरां पीत्वा ह्रदं द्रहमवगाहते । पुनरपरार्थकथने । खानः पातिसाहेरकब्बरधराधिराजस्य प्रसत्तिं स्वस्मिन्विषये प्रसादं संतुष्टिपुष्टिमवेत्य हृद्गोचरीकृत्य स्वमात्मानं संप्राप्तं हस्ते अधिगतं सर्वस्वं निःशेषक्ष्मामण्डलमध्यवर्तिद्रव्यम् उपलक्षणात् राज्यादिग्रहः सर्वपदार्थसार्थो वा येन । तद्वदवैति स्म जानाति स्म बुबुधे ॥

अथाकारिताः श्रावकास्तेन भृत्यैश्चकोरा इव श्वेतभासा मयूखैः ।
क्रमात्तेऽपि तेषां गताः संनिकर्षं निदेशं प्रभोर्निर्दिशन्ति स्म सर्वम् ॥ ३४ ॥

अथ दूतवचनानन्तरं तेन साहिबखानेन भृत्यैः स्वसेवकैः श्रावका अकमिपुरवृद्धश्राद्धा आकारिता आहूताः । केनेव । श्वेतभासेव । यथा चन्द्रमसा मयूखैः स्वकिरणैश्च-

रा ज्योत्स्नाप्रियाः आकार्यन्ते स्म । अपि पुनः ते भृत्याः क्रमात् स्वस्वामिनिदेशश्र- प्रणामकरणपरिपाट्या तेषामकमिपुरतपापक्षश्राद्धानां संनिकर्षं समीपं गताः प्राप्ताः तः प्रभोः स्वस्वामिनः सर्वं निदेशमाज्ञां निर्दिशन्ति स्म निवेदयन्ति स्म कथयन्ति स्म॥

समानीयमाना अमीभिर्जनास्तेऽप्यराजन्त मध्येपुरं दानशौण्डाः ।
महामात्रवृन्दैर्द्विपेन्द्रा इवोर्वीपतेर्मन्दिरं दानधारां किरन्तः ॥ ३५ ॥

अमीभिः साहिबखानभृत्यैर्मध्येपुरमकमिपुरस्य मध्ये । 'पारे मध्ये षष्ठ्या वा समस्यते'। मासश्चाव्ययीभावः । 'गङ्गायाः पारे पारेगङ्गम् । गङ्गायामध्ये मध्येगङ्गम्' इति प्रक्रि- ाकौमुद्याम् । तद्वन्मध्येपुरं सम्यक् संमाननादिप्रकारेणास्ते श्राद्धा अपि व्यराजन्त ुशुभिरे । किंभूताः । दानशौण्डाः बहुद्रव्यप्रदायिनः विश्राणनेन विख्याता वा । शौण्डा विख्यातमत्तयोः' इत्यनेकार्थः । के इव । द्विपेन्द्रा इव । यथा महामात्राणां स्तिपकानां 'माहत' इति प्रसिद्धानां वृन्दैराधोरणगणैः उर्वीपते राज्ञो मन्दिरे नीय- ाना गजराजा विराजन्ते । किं कुर्वन्तः । दानधारां मदवारिवृष्टिं कुर्वन्तः सृजन्तः क्षरन्तः ॥

जना जैनपक्षैकदक्षाः क्षितिक्षित्समाजं विशन्ति स्म संभूय सर्वे ।
ततस्तेऽप्यनर्घ्योपदापूर्णपाणीन्स्वबन्धूनिवास्थापयत्तानुपान्ते ॥ ३६ ॥

सर्वे समस्ता जनाः जिनानां वीतरागाणामयं जैनः स चासौ पक्षश्च । जिनशासनमि- त्यर्थः । तत्रैकतया अद्वितीयत्वेन दक्षा अतिनिपुणा जनाः श्राद्धाः संभूय एकत्र मेलित्वा क्षितिक्षितः खानस्य समाजं सभां विशन्ति स्म । सभामध्ये ययुरित्यर्थः । ततो जनागमनानन्तरं सोऽपि खानः अनर्घ्याभिः प्रशस्याभिरुपदाभिः प्राभृतैः पूर्णाः भृताः पाणयो हस्ता येषां तान् जनान् स्वबन्धूनात्मस्वजनानिव उपान्ते स्वसमीपे आस्थापयदुपवेशयति स्म ॥

अमी मूलकर्मेव तच्चित्तवृत्तेः पुरः प्राभृतं भूमिभर्तुर्विमुच्य ।
अलीकातिथीभूतहस्तेऽरविन्दाः प्रमोदप्रगल्भाः स्म भाषन्त इत्थम् ॥३७॥

अलीके ललाटे अतिथीभूतानि प्राघुणानि जातानि हस्ता एवारविन्दानि पद्मानि येषां कृताञ्जलय इत्यर्थः। अमी श्राद्धाः प्रमोदेन हर्षेण प्रगल्भाः सोत्साहा इत्थमग्रे वक्ष्यमाणमभाषन्त प्रोचुः । किं कृत्वा । भूमिभर्तुर्नृपस्य पुरोऽग्रे प्राभृतं ढौकितकं विमुच्य ढौकयित्वा । उत्प्रेक्ष्यते—तस्य साहिबखानस्य चित्तवृत्तेर्मनोव्यापारस्य मूलकर्म कार्मणमिव ॥

नृणां शासिता त्वं वयं शासनीयाः वयं सेवकास्त्वं पुनः सेवनीयः ।
नियोज्या वयं त्वं नियोक्तासि यस्मात्तदादिश्यतां कृत्यमस्माकमीश ३८

हे ईश, त्वं यस्मात्कारणात् त्वं नृणां नराणां शासिता पालयिता असि, पुनर्वयं

शासनीयाः पालयितव्याः स्मः। पुनस्त्वं सेवनीयः सेवितव्यः सेवितुं योग्योऽसि, पुनर्वयं सेवकाः सेवाकारकाः स्म। पुनस्त्वं नियोक्ता कार्ये प्रयोजकोऽसि, पुनर्वयं नियोज्याः कर्तव्ये निर्देश्याः स्म। तत्तस्मात्कारणादस्माकं कृत्यं कार्यमादिश्यतां प्रसद्यताम् ॥ इति श्राद्धानामाकरणं तत्प्रश्नश्च ॥

स ऊचेऽथ वाचेति पीयूषवर्षं किरन्कैतवाद्दन्तनिर्यद्द्युतीनाम्।
चतुर्दिक्षु चण्डांशुवद्यत्प्रतापो भ्रमत्यब्धिनेमीचरोऽकब्बरोऽस्ति ॥३९॥

अथ श्राद्धजनप्रश्नानन्तरं स साहिबखानो वाचा वाण्या कृत्वा इत्यग्रे वक्ष्यमाणमूचे बभाषे। किं कुर्वन्। दन्तेभ्यो दशनेभ्यो निर्यान्तीनां निःसरन्तीनां द्युतीनां कान्तीनां कैतवात्कपटात्पीयूषवर्षममृतवृष्टिं किरन्विस्तारयन्निवेतीयं गर्भितोत्प्रेक्षा। किमूचे तदेवाह—हे जनाः, अकब्बरनामा अब्धिनेमीचरः आपाथो नायकपर्यन्तपृथ्वीनाथोऽस्ति। यत्प्रतापश्चतुर्दिक्षु पूर्वापरदक्षिणोत्तरालक्षणासु हरित्सु भ्रमति पर्यटति। किंवत्। चण्डांशुवत्। यथा भास्वांश्चतुरासामुपरि भ्रमति ॥

यया ज्योत्स्नयेवावदातीक्रियन्ते दिशः सस्मिता वा स्वकान्तैः क्रियन्ते।
सखीभिर्विशिष्येव गोशीर्षचन्द्रद्रवैः पत्रभङ्गैकतालंक्रियन्ते ॥ ४० ॥
कदाचिज्जगत्कर्णपूरायमाणां गुणश्रेणिमाकर्ण्य तां हीरसूरेः।
तमाह्वातुकामेन तेनात्मदूताविह प्रेषितौ दर्शनोत्कण्ठितेन ॥ ४१ ॥

हे जनाः, तेनाकब्बरपातिसाहिना इहाहम्मदाबादे मत्पार्श्वे वा आत्मदूतौ स्वसंदेशहारकौ प्रेषितौ प्रहितौ स्तः। तेन किं कर्तुकामेन। तं जगत्प्रसिद्धगुणग्रामं हीरविजयसूरिमाह्वातुमाकारयितुं कामोऽभिलाषो यस्य तादृशेन। अत एव पुनः किंभूतेन। दर्शनोत्कण्ठितेन गुरोरालोकनौत्सुक्यभाजा। किं कृत्वा। कदाचित्कस्मिन्नपि समये जगतां भुवनानां कर्णौ श्रवणौ पूर्येते अनयेति कर्णपूरा। अथवा कर्णपूरौ कर्णाभरणे तद्वदाचरितां यावज्जगज्जनाह्लादिनीं हीरसूरेर्गुणानां श्रेणीं धोरणीमाकर्ण्य श्रुत्वा। तां काम्। यया गुरुगुणश्रेण्या ज्योत्स्नया चन्द्रचन्द्रिकयेव दिशः सर्वा अप्याशा अवदातीक्रियन्ते श्वेता विधीयन्ते। अथ वा स्वकान्तैरात्मात्मभर्तृभिर्दिशो निजनिजदिगङ्गना नर्मलीलावशात्सस्मिताः सहासाः क्रियन्ते सृज्यन्ते। वा अथ वा। सखीभिर्वयसीभिर्मण्डनकारिकाभिर्वा गोशीर्षकाणां चन्दनानां चन्द्राणां कर्पूराणां च द्रवैः पङ्कैः कृत्वा यत्र वल्लीभिः। 'देव भवद्वैरिवधूवदने वने च नागरुचिताश्चन्दनपत्रभङ्गाः' इति चम्पूकथायाम्। उत्प्रेक्ष्यते—विशिष्य विशेषप्रकारेणालंक्रियन्ते भूष्यन्ते इव ॥ युग्मम् ॥

समुद्रोऽपि भीतिं दधद्वारिपूराद्विशुद्धोऽपि कार्ष्ण्यं पुनर्बिभ्रदन्तः।
भुवो वासवेनैष लेखो विशेषप्रवृत्तिं वहंल्लेखवत्प्रेषितश्च ॥ ४२ ॥

हे जनाः, च पुनर्भुवो वासवेनाकब्बरेण पृथ्वीपुरंदरेण विशेषप्रवृत्तिं स्वहृदयाभि-